UNIVERSITY OF DELHI

ARTS LIBRARY

ARTS LIBRARY

(DELHI UNIVERSITY LIBRARY SYSTEM)

Cl. No 015:1D63:1 G9

Ac No. 32416

Date of release for laon

This book should be returned on or before the date last stamped below. An overdue charge of Rupee One will be charged for each day the book is kept overtime

(Authonty . EC Res. 200 dated 27th August 1996)

THE

HARIDAS SANSKRIT SERIES

105

THE

KIRĀTĀRJUNĪYA

OF

BHĀRAVI

WITH

The Ghaṇṭāpatha Commentary of Mallinātha

The Prose-order, Hindi Translation,

AND

THE BHĀVABODHINĪ COMMENTARY [I–III CANTOS]

BY

PT. S'RĪ KANAKALĀL S'ARMĀ

Edited by

Pt. Rāmachandra Ṇanas'ikara S'āstri

PUBLISHED BY

JAYA KRISHNA DÂS HARIDÂS GUPTA

The Chowkhamba Sanskrit Series Office.

Benares City.

1939.

PRINTED BY

JAYA KRISHNA DAS GUPTA,

VIDYA VILAS PRESS, BENARES CITY.

1939.

All Rights Reserved by the Publishers.

॥ श्रीः ॥

हरिदास-संस्कृत-ग्रन्थमाला

१०५

॥ श्रीः ॥

महाकविश्रीभारविप्रणीतं

किरातार्जुनीयम् ।

महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथव्याख्यया

दण्डान्वयेन हिन्दीभाषानुवादेन

प्रथमतः सर्गत्रयं यावत् श्री पं० कनककान्तठक्कुर विरचितया

भावबोधिनीव्याख्यया च समुल्लसितम् ।

पणशीकरकुलोत्पन्नेन रामकृष्णशास्त्रिणा सुसम्पादितम् ।

प्रकाशकः—

जयकृष्णदास हरिदास गुप्तः—

चौखम्बा संस्कृत सीरिज आफिस,

बनारस सिटी ।

१९९६

अस्य ग्रन्थस्य सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः ।

श्रीः ।

किञ्चित् प्रस्ताविकम् ।

अथेदमु[illegible] [illegible]यते किरातार्जुनीयनाम श्रीमन्महाकविभारविप्रणीतमहाकाव्यं मुद्र-यित्वा प्रका[illegible]शयितुम् । अत्र च महामहोपाध्याय-कोलाचल-मल्लिनाथसूरिविरचिता [illegible]घण्टापथसमाख्या व्याख्याऽपि सान्वया संयोजिता वर्तते । इमाश्च व्याख्यामन्तरेणास्य [illegible] [illegible]अर्थावगमोऽपि प्रायः दुष्करः प्रतिभाति । परिमितं सारभूतमर्थं प्रौढ्या प्रतिपादयन्ती [illegible] [illegible] [illegible] या कस्य नाम सचेतसो हृदयं प्रमोदसन्दोहपरिपूरितं नाचरतीति [illegible] [illegible] [illegible] स्वीक्रियते ।

[illegible] महाकवेर्भारवेः परिचयप्रदानौपयिकं किमपि प्रस्तूयते । कविपण्डित-[illegible] [illegible]नः पितामहः, काञ्चीपुरीपरिवृढेन सिंहविष्णुना स्वीयनगरमानीता-[illegible] [illegible] [illegible]नयो, दामोदराऽपरनामा महाकविर्भारविरयं ६०१–६९० यावत् [illegible] । श्रीमन्तं दुर्विनीतनृपतिमाश्रयति स्म । एतेन षष्ठशतकान्ते [illegible] [illegible]हाकवेरमुष्य सत्ता निर्विवादं सिध्यति ।

[illegible] कतमं देशं भूषयामासेत्यत्र किमपि निश्चेतुं प्रमाणाभावा-

[illegible] गुरुभूतः प्रहिता मुहुः प्रतिहति यान्तुरर्जुनमुष्टयः ।
[illegible] इव सह्यमहीभृतः पृथुनि रोधसि सिन्धुमहोर्मयः ॥”

[illegible] , [illegible]किरातार्जुनीयस्याष्टादशसर्गस्थं पद्यमं) श्लोकं प्रमाणीकृत्य केचिन्महा-नुभा[illegible], [illegible] [illegible] पर्वतं वर्णयतो महाकवेरेतस्य दाक्षिणात्यत्वं प्रतिपादयन्ति, किन्[illegible] [illegible] [illegible] तथात्वकथनसाहसमाधातुं प्रभूयते ।

व्याख्याकर्तुर्लोकख्यातिजनस्य मल्लिनाथस्य कवेः सत्ताकालस्तु [illegible] चतुर्दशं शतकमासीदित्येतद्बहूनां सम्मतम् ।

इदानीं किरातार्जुनीयनामेदं महाकाव्यमधिकृत्य लेखनीयमापाद्यते किञ्चित्। अस्मिन् काव्ये 'भारवेरर्थगौरवम्' इत्येषा लोकोक्तिः स्थले स्थले स्फुटं देदीप्यमाना दृश्यते। प्रतिसर्गान्तिमश्लोकं लक्ष्मीपदेनाङ्कितं तत्तन्महाकाव्योचितवर्णनीयगुणगणालङ्कृतं महाकाव्यमिदं विदुषां समाजे कथं नाम प्राप्तादरं वरीवर्तीत्यत्र विषये साक्षी विद्वद्वर्ग एव। काव्येऽस्मिन् अर्जुनस्य तपसा परितोषिताद् भगवतश्चन्द्रशेखरात् पाशुपतास्त्रप्राप्तिः प्राधान्येन उपावर्णि।

स्वार्थलाभलोभमवधूय निरन्तरं संस्कृतसमाजहितैकतानचित्तवृत्तिभिः विविध-संस्कृतग्रन्थप्रकाशनतत्परैः श्रीजयकृष्णदासमहोदयैः सम्मुद्रयितुमुपक्रान्तं तदिदं महाकाव्यं घण्टापथव्याख्यया विद्वदानन्दसन्दोहसाधनतां गतमपि स्वल्पसुकुमार-बुद्धीनां छात्राणां बोधसौकर्याय प्रतिश्लोकं दण्डान्वयेन पाण्डेयकुलभूषणैः आदित्य-नारायणशास्त्रिवर्यैः कृतेन हिन्दीभाषानुवादेन च स्थाने संयोज्य सपरिश्रमं समशोधि।

अत्र च अन्वयरचनासंशोधनयोः कृतसाहाय्याः पं० लक्ष्मीधरपन्तशर्माधिकारिणः पं० विश्वेश्वरझा शास्त्रिणश्च कैः शब्दैरभिनन्दनीयाः। कृतेऽप्यत्र सावधानं संशोधने मुद्रणालयदोषान्मदीयमतिमान्द्याद्वा चेत्त्रुटयः काश्चिन्नयनगोचरतां गच्छेयुस्तर्हि ताः संशोध्य पठेयुर्ग्रन्थमेनं विद्यानुरागाः सज्जनाः इत्येवं सम्भाव्य सर्वान्तर्यामिणं परमेश्वरं वाराणसीकुलपतिं श्रीमद्विश्वेश्वरं च सादरं प्रणम्य विरम्यतेऽस्माद् वृथा पल्लवितात्प्रास्ताविकाल्लेखादिति शम्।

वाराणसी
वामनद्वादशी
संवत् १९९६

विदुषामनुचरः—
रामचन्द्रशास्त्री पणशीकरः।

किरातार्जुनीयस्य विषयानुक्रमणिका ।

सर्गाङ्कः	विषयाः	पृ०
१	युधिष्ठिरवनेचरयोः सम्मेलनम् । तत्सम्पादितं दुर्योधनस्य राजनीतिचातुर्यवर्णनम् । वनेचरगमनम् । धर्मराजम्प्रति द्रौपदीगदनम् ।	१
२	युधिष्ठिरम्प्रति सकोपभीमसेनोक्तिः । भीमसेनम्प्रति युधिष्ठिरपरिबोधनम् । पाण्डवसन्निधौ व्यासमुनेः समागमनम् । तत्कृतमुनिसत्कारवर्णनम् ।	३४
३	व्यासमहर्षिस्वरूपवर्णनम् । व्यासयुधिष्ठिरयोः संवादः । अर्जुनम्प्रति मुनिकृतो विद्योपदेशः । तपश्चर्यार्थं निदेशनञ्च, व्यासमहर्षेरन्तर्धानम् । अर्जुनस्य गमनोपक्रमः । पाण्डवानां भाव्यर्जुनविश्लेषजन्यदुःखनिमग्नत्वम् । अर्जुनस्य द्रौपदीदर्शनम् । अर्जुनम्प्रति कृष्णोक्तिः । व्यासादिष्टेन गुह्यकेन सार्द्धमर्जुनस्येन्द्रकीलाभिधेयं हिमाद्रिपादविशेषम्प्रति प्रस्थानम् ।	६९
४	कविकृतशरद्वर्णनम् । यक्षाभिहितशरद्वर्णनम् । हिमालयदर्शनम् ।	१०३
५	हिमालयवर्णनम्, तन्मूलेऽर्जुनसम्प्राप्तिः । यक्षगमनम् ।	११७
६	इन्द्रकीले पृथासूनोरारोहणादिवर्णनम् । तत्र तस्य तपश्चर्यायाः आरम्भः । तपोवर्णनम् । सहस्राक्षसमीपे इन्द्रकीलवनरक्षककृतार्जुनतपोऽतिशयज्ञापनम् । पृथासूनुतपोऽन्तरायार्थं वाराङ्गनागणम्प्रति पाकशासनादेशः ।	१३९
७	सगन्धर्वगणिकागणस्य सविलासगमनादिवर्णनम् । इन्द्रकीलाद्रौ समागतानां तेषां स्यन्दननागादिसमेतस्य तच्छिबिरस्य सन्निवेशादिवर्णनम् ।	१५५
८	गन्धर्वाणां वारस्त्रीणाञ्च सुमनश्चयकेलिवर्णनम् । उदककेलिवर्णनम् ।	१६८
९	सन्ध्यावेलावर्णनम् । हिमांशूदयवर्णनम् । सुरतवर्णनम् । पानगोष्ठीवर्णनम् । पुनः सङ्क्षेपेण सुरतवर्णनम् । सङ्क्षेपेण प्रभातवर्णनम् ।	१८८
१०	अर्जुनप्रक्षोभणार्थम् । वाराङ्गनानां तत्समीपे गमनवर्णनम् । पृथासूनुवर्णनम् । वर्षादिऋतुवर्णनम्, पार्थमवलोक्य वारस्त्रीणां चेष्टावर्णनम् । गणिकाप्रयत्ननिष्फलताप्रकथनम् ।	२१६

सर्गाङ्काः	विषयाः	पृ०
११	पार्थाश्रमे मुनिवेषधारिणः मघवतः समागमनम् । पार्थपाकशासनयोः संवादः । शक्रः प्रत्यक्षीभूयार्जुनम्प्रतिशङ्कराराधनं समादिदेशेति वर्णनम् ।	२३९
१२	शङ्कराऽऽराधनार्थमर्जुनकृतस्य तपसः वर्णनम् । पार्थतपसा भृशं तप्तानां सिद्धतापसानां शङ्करपार्श्वे गमनं तत्तपोवृत्तकथने च शङ्करकृतं मुनि सान्त्वनं पार्थस्वरूपकथनं च । वराहवेषमास्थाय पार्थपराजयार्थमागतस्य मूकदानवस्य वधार्थं पार्थानुजिघृक्षया च किरातरूपधारिणस्तद्रूपधारिणयैव गणसेनया सहितस्य भगवतो मृगयाव्याजेन पार्थाश्रमे गमनवर्णनम् ।	२६८
१३	शूकरवेषधारिणो मूकदानवस्यार्जुनकृतं विलोकनम् । तस्यावलोकनेन पार्थस्य विविधाः वितर्काः । शूकरम्प्रति भगवतः पार्थस्य च सायकमोक्षवर्णनम् । वराहपञ्चत्वगमनवर्णनम् । शूकरशरीरतः निजसायकमाददानं पार्थम्प्रति शङ्करप्रहितस्य वनेचरस्योत्तेजकं वचनम् ।	२८५
१४	वनेचरम्प्रति पार्थोक्तिः । तच्छ्रुत्वा समागतस्य वनेचरस्य लपितं समाकर्ण्य सेनासहितस्य लीलाकिरातस्य भगवतोऽर्जुनविजयार्थं समागमनम् । भगवत्सेनयार्जुनस्य सम्परायवर्णनम् ।	३१८
१५	चित्रयुद्धवर्णनम् ।	३३४
१६	किरातावतारधारिणः भगवतः सम्परायदक्षत्वं समालोक्य पार्थस्य वितर्कः । भगवता साकं पार्थस्य शस्त्रसम्परायवर्णनम् ।	३५२
१७	सेनया सार्द्धं पार्थसम्परायवर्णनम् । भगवदर्जुनयोर्युद्धवर्णनम् ।	३७२
१८	भगवदर्जुनयोर्भुजयुद्धवर्णनम् । पार्थस्य अतुलपराक्रमं विलोक्य भगवतः प्रसन्नतास्वरूपप्रकटीकरणञ्च तत्रैव शक्रादिसुरागमनम् । पार्थकृता भगवत्स्तुतिः । वरयाचनम् । पार्थम्प्रति पाशुपतास्त्रसहितस्य धनुर्वेदस्य भगवत्कृत-उपदेशः । पाकशासनादिसुराणामपि भगवदाज्ञया पार्थम्प्रति वरयाचनं निजनिजाशीर्वादानं च । कृतकृत्यस्य पार्थस्य भगवदाज्ञया धर्मावतारयुधिष्ठिरपार्श्वे समागमनम् ।	३९३

॥ श्रीः ॥

महाकविश्रीभारविप्रणीतं-

किरातार्जुनीयम्

प्रथमः सर्गः ।

अर्धाङ्गीकृतदाम्पत्यमपि गाढानुरागि यत् ।
पितृभ्यां जगतस्तस्मै कस्मैचिन्महसे नमः ॥
आलम्बे जगदालम्बं हेरम्बचरणाम्बुजम् ।
शुष्यन्ति यद्रजःस्पर्शात्सद्यः प्रत्यूहवार्धयः ॥
तद्दिव्यमव्ययं धाम सारस्वतमुपास्महे ।
यत्प्रकाशात्प्रलीयन्ते मोहान्धतमसश्छटाः ॥
वाणीं काणभुजीमजीगणदवाशासीच्च वैयासकी-
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत् ।
वाचामाचकलद्रहस्यमखिलं यश्चाक्षपादस्फुरां-
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥
मल्लिनाथकविः सोऽयं मन्दात्मानुजिघृक्षया ।
तत्किरातार्जुनीयाख्यं काव्यं व्याख्यातुमिच्छति ॥
नारिकेलफलसंमितं वचो भारवेः सपदि तद्विभज्यते ।
स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम् ॥

नानानिबन्धविषमैकपदैर्नितान्तं-
स्वाशङ्कचङ्क्रमणखिन्नधियामशङ्कम् ॥
कर्तुं प्रवेशमिह भारविकाव्यबन्धे
घण्टापथं कमपि नूतनमातनिष्ये ॥
इहान्वयमुखेनैव सर्वं व्याख्यायते मया ।
नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते ॥

अथ तत्र भवान्भारविनामा कविः 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे' ॥ इत्याद्यालङ्कारिकवचनप्रामाण्यात्काव्यस्यानेकश्रेयःसाधनतां, 'काव्यालापांश्च वर्जयेत्' इति निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यन्किरातार्जुनीयाख्यं महाकाव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसाधनत्वात् 'आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम्' इत्याद्याशीर्वादाद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च वनेचरस्य युधिष्ठिरप्राप्तिरूपं वस्तु निर्दिशन्कथामुपक्षिपति—

श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ॥१॥

अन्वयः—कुरूणाम्, अधिपस्य, श्रियः, पालनीं, प्रजासु, वृत्तिम्, वेदितुम्, यम्, अयुङ्क्त, सः, वर्णिलिङ्गी, विदितः, वनेचरः, द्वैतवने, युधिष्ठिरं, समाययौ ॥ १ ॥

(म०) श्रिय इति । आदितः श्रीशब्दप्रयोगाद्वर्णगणादिशुद्धिर्नात्रातीवोपयुज्यते । तदुक्तं—'देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा' । इति । कुरूणां निवासाः कुरवो जनपदाः । 'तस्य निवासः' इत्यण्प्रत्ययः । जनपदे लुप् । तेषामधिपस्य संबन्धिनीम् । शेषे षष्ठी । श्रियो राज्यलक्ष्म्याः । 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठी । पाल्यतेऽनयेति पालनी ताम् । प्रतिष्ठापिकामित्यर्थः । प्रजारागमूलत्वात्सम्पद इति भावः । 'करणाधिकरणयोश्च' इति करणे ल्युट् । 'टिड्ढाणञ्—' इत्यादिना ङीप् । प्रजासु जनेषु विषये । 'प्रजा स्यात्सन्ततौ जने' इत्यमरः । वृत्तिं व्यवहारं वेदितुं ज्ञातुं यं वनेचरमयुङ्क्त नियुक्तवान् । वर्णः प्रशस्तिरस्यास्तीति वर्णी ब्रह्मचारी । तदुक्तं—'स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् । सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च । एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः । विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम् ।' एतदष्टविधमैथुनाभावः प्रशस्तिः 'वर्णाद् ब्रह्मचारिणि' इतीनिप्रत्ययः । तस्य लिङ्गं चिह्नमस्यास्तीति वर्णिलिङ्गी । ब्रह्मचारिवेषवानित्यर्थः । स नियुक्तः, वने चरतीति वनेचरः किरातः । 'भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः' इत्यमरः । 'चरेष्टः' इति टप्रत्ययः । 'तत्पुरुषे कृति बहुलम्' इत्यलुक् । विदितं वेदनमस्यास्तीति विदितः । परवृत्तान्तज्ञानवानित्यर्थः । 'अर्श आदिभ्योऽच्' इत्यच्प्रत्ययः । उभयत्रापि 'पीता गावः', 'भुक्ता ब्राह्मणाः', 'विभक्ता भ्रातरः' इत्यादिवत्साधुत्वं । न तु कर्तरि क्तः, सकर्मकेभ्यस्तस्य विधानाभावात् । अत एव भाष्यकारः—'अकारो मत्वर्थीयः । विभक्तमेषामस्तीति विभक्ताः । पीतमेषामस्तीति पीताः' इति सर्वत्र । अथवोत्तरपदलोपोऽत्र द्रष्टव्यः । विभक्तधना विभक्ताः, पीतोदकाः पीता इति । अत्र लोपशब्दार्थमाह कैयटः "गम्यार्थस्याप्रयोग एव लोपोऽभिमतः । 'विभक्ता भ्रातरः' इत्यत्र च धनस्य यद्विभक्तत्वं तद् भ्रातृषूपचरितम् । 'पीतोदका गावः' इत्यत्राप्युदकस्य पीत-

त्वं गोष्वारोप्यते" इति । तद्वदत्रापि वृत्तिगतं विदितत्वं वेदितरि वनेचर उपचर्यते । एतेन 'वनाय पीतप्रतिबद्धवत्साम्', 'पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या' एवमादयो व्याख्याताः । अथवा विदितवान् । सकर्मकादप्यविवक्षिते कर्मणि कर्तरि क्तः । यथा 'आशितः कर्ता' इत्यादौ । यथाऽऽहुः—'धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ।' इति । द्वैतवने द्वैताख्ये तपोवने । यद्वा द्वे इते गते यस्मात्तद् द्वीतं, तच्च तद्वनं च तस्मिन् । शोकमोहादिवर्जित इत्यर्थः । युधिष्ठिरं धर्मराजं । 'हलदन्तात्सप्तम्याः संज्ञायाम्' इत्यलुक् । 'गवियुधिभ्यां स्थिरः' इति षत्वं । समाययौ सम्प्राप्तवान् । अत्र 'वने वनेचरः' इति द्वयोः स्वरव्यञ्जनसमुदाययोरेकधैवावृत्त्या वृत्त्यनुप्रासो नामालङ्कारः । अस्मिन्सर्गे वंशस्थवृत्तं, तल्लक्षणं—'जतौ तु वंशस्थमुदीरितं जरौ' इति ॥ १ ॥

(भा०) श्रिय इति । कुरूणां तदाख्यजनपदानाम् अधिपस्य स्वामिनः (दुर्योधनस्य) सम्बन्धिनीं श्रियो राज्यलक्ष्म्याः पालनीं स्थितिसम्पादिनीं, प्रजासु सन्ततिषु विषये वृत्तिं व्यवहारं वेदितुं ज्ञातुं यं दूतं (वनेचरम्) अयुङ्क्त नियुक्तवान् । स नियुक्तो वर्णिलिङ्गी ब्रह्मचारिस्वरूपो विदितः परवृत्तान्ताभिज्ञो वनेचरः किरातः (दूतः) द्वैतवने तदाख्यतपोवने युधिष्ठिरं धर्मराजं समाययौ प्राप । युधिष्ठिरो दुर्योधनराज्यलक्ष्मीस्थितिसम्पादकप्रजाविषयकव्यवहारमवगन्तुं यं वनेचरं (दूतं) प्रेषितवान् स वनेचरो द्वैताख्ये तपोवने युधिष्ठिरं प्रापेत्यर्थः । द्वैतवन एतद्घटकवन इत्यत्र वनेचरशब्दघटकवन इत्यत्र च वनयोः सकृत् स्वरूपतः क्रमतश्चाऽऽवर्त्तनादत्र वृत्त्यनुप्रासोऽलङ्कारः ॥ १ ॥

सम्प्रति तत्कालोचितत्वमादेशयंस्तस्य तद्गुणसम्पन्नत्वमादर्शयन्नाह—

कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥२॥

अन्वयः—कृतप्रणामस्य, सपत्नेन, जितां, महीं, महीभुजे, निवेदयिष्यतः, तस्य, मनः, न, विव्यथे । हि, हितैषिणः, मृषा, प्रियं, प्रवक्तुं, न, इच्छन्ति ॥ २ ॥

(म०) कृतप्रणामस्येति । कृतप्रणामस्य तत्कालोचितत्वात्कृतनमस्कारस्य सपत्नेन रिपुणा दुर्योधनेन । 'रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः' इत्यमरः । जितां स्वायत्तीकृतां महीं महीभुजे युधिष्ठिराय क्रियाग्रहणात्सम्प्रदानत्वं । निवेदयिष्यतो ज्ञापयिष्यतः । 'लृटः सद्वा' इति शतृप्रत्ययः । तस्य वनेचरस्य मनो न विव्यथे । कथमीदृगप्रियं राज्ञे विज्ञापयामीति मनसि न चचालेत्यर्थः । 'व्यथ भयचलनयोः' इति धातोर्लिट् ॥ उक्तमर्थमर्थान्तरन्यासेन समर्थयते—न हीति ॥ हि यस्मात् । हितमिच्छन्तीति हितैषिणः स्वामिहितार्थिनः पुरुषा मृषा मिथ्याभूतं प्रियं प्रवक्तुं नेच्छन्ति, अन्यथा कार्यविघातकतया स्वामिद्रोहिणः स्युरिति भावः । 'अमौल्यममान्द्यममृषाभाषित्वमभ्यूहकत्वं चेति चारगुणाः' इति नीतिवाक्यामृते ॥ २ ॥

(भा०) कृतप्रणामस्येति । कृतप्रणामस्य विहितनमस्कारस्य सपत्नेन शत्रुणा जितां स्वायत्तीकृतां महीं भूमिं (राज्यं) महीभुजे भूपतये, युधिष्ठिरायेत्यर्थः । निवेदयिष्यतः, कथयिष्यतः, तस्य वनेचरस्य मनश्चित्तं न विव्यथे न व्यथां प्राप, हि यतः कारणात् हितैषिणः शुभेच्छवो मृषा मिथ्या प्रियम् ईप्सितम् (इष्टं) प्रवक्तुम् अभिधातुं नेच्छन्ति नाभिलष्यन्ति । कृतनमस्कारो दूतो युधिष्ठिरं प्रति दुर्योधनायत्तीकृतमहीनिवेदनं करिष्यन् मनसि ग्लानिं न प्राप, यतो हिताभिलाषिणोऽसत्यप्रियवचनं नाभिदधतीत्यर्थः ।) महीं महीत्यत्र स्वरव्यञ्जनसमुदाययोः सकृत् स्वरूपतः क्रमतश्चावर्त्तनादत्रापि वृत्त्यनुप्रासोऽलङ्कारः । स चार्थान्तरन्यासससंसृष्टः ॥ २ ॥

तथाऽपि प्रियार्हे राज्ञि कटुनिष्ठुरोक्तिर्न युक्तेत्याशङ्क्य स्वाम्यनुज्ञया न दुष्यतीत्याशयेनाह—

द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः ।
स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे ॥३॥

अन्वयः—रहसि, सः, द्विषां, विघाताय, विधातुम्, इच्छतः, भूभृतः, अनुज्ञाम्, अधिगम्य, सौष्ठवौदार्यविशेषशालिनीं, विनिश्चितार्थाम्, इति, वाचम्, आददे ॥ ३ ॥

(म०) द्विषामिति । रहस्येकान्ते स वनेचरो द्विषां शत्रूणां । कर्मणी षष्ठी । विघाताय । विहन्तुमित्यर्थः । 'तुमर्थाच्च भाववचनात्' इति चतुर्थी । 'भाववचनाश्च' इति तुमर्थे घञ्प्रत्ययः ॥ अत्र तादर्थ्यमपि न दोषः । तथाऽपि प्रयोगवैचित्रीविशेषस्याप्यलङ्कारत्वादेवं व्याचक्षते । विधातुं व्यापारं कर्त्तुमिच्छतः । 'समानकर्तृकेषु तुमुन्' द्विषोविहन्तुमुद्युक्तज्ञानस्येत्यर्थः । अत एव भूभृतो युधिष्ठिरस्यानुज्ञामधिगम्य । सुष्ठु भावः सौष्ठवं शब्दसामर्थ्यम् । सुष्ठुशब्दादव्ययादुद्गात्रादित्वादण्प्रत्ययः । उदारस्य भाव औदार्यमर्थसम्पत्तिः । तयोर्द्वन्द्वः सौष्ठवौदार्ये । अत्रौदार्यशब्दस्याजाद्यदन्तत्वेऽपि 'लक्षणहेत्वोः क्रियायाः' इत्यत्राल्पस्वरस्यापि हेतुशब्दस्य पूर्वनिपातमकुर्वता सूत्रकृतैव पूर्वनिपातस्यानित्यत्वज्ञापनान्न पूर्वनिपातः । उक्तञ्च काशिकायाम्—अयमेव लक्षणहेत्वोरिति निर्देशः पूर्वनिपातव्यभिचारचिह्नम्' इति । त एव विशेषः । तयोर्वा विशेषः । तेन शालते शोभत इति सौष्ठवौदार्यविशेषशालिनी तां । ताच्छील्ये णिनिः । विनिश्चितार्थां विशेषतः प्रमाणतो निर्णीतार्थामिति वक्ष्यमाणरूपां वाचमाददे स्वीकृतवान् । उवाचेत्यर्थः ॥ ३ ॥

(भा०) द्विषामिति । रहस्येकान्ते स वनेचरः किरातः, द्विषां शत्रूणां विघाताय विनाशाय विधातुं व्यापारं कर्तुम् इच्छतोऽभिलषतो भूभृतो राज्ञोऽनुज्ञाम् आज्ञाम् अधिगम्य प्राप्य, सौष्ठवौदार्यविशेषशालिनीं शब्दसामर्थ्यार्थसम्पत्तिरूपविशेषशोभमानां विनिश्चितार्थां निर्णीताभिप्रायाम् इति वक्ष्यमाणरूपां वाचं वाणीम् आददे उवाच । एकान्ते शत्रुविनाशोद्यमवतो युधिष्ठिरस्याज्ञामादाय वनेचरो युक्तियुक्तं वचनमुवाचेत्यर्थः । सौ-

छ्वौदार्येति विनिश्चितार्थामिति च विशेषणद्वयस्य साभिप्रायत्वात्परिकरालङ्कारः। स च वनेचरकर्तृकविनिश्चितार्थवचनोक्तौ भूभृदनुज्ञाऽधिगमस्य हेतोः पदार्थत्वेनोक्त्या पदार्थहेतुककाव्यलिङ्गानुप्राणितः ॥ ३ ॥

प्रथमं तावदप्रियनिवेदकमात्मानं प्रत्यक्षोभं याचते—

क्रियासु युक्तैर्नृप ! चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः॥४॥

अ०–हे नृप !, क्रियासु, युक्तैः, अनुजीविभिः, चारचक्षुषः, प्रभवः, न, वञ्चनीयाः। अतः, असाधु, साधु, वा, क्षन्तुम्, अर्हसि, हितं, मनोहारि, च, वचः, दुर्लभम् (भवति) ॥ ४॥

(म०) क्रियास्विति ॥ हे नृप ! क्रियासु कृत्यवस्तुषु युक्तैर्नियुक्तैरनुजीविभिर्भृत्यैः। चरादिभिरित्यर्थः। चरन्तीति चराः। पचाद्यच्। त एव चाराः। चरेः पचाद्यजन्तात्प्रज्ञादित्वादण्प्रत्ययः। त एव चक्षुर्येषां ते चारचक्षुषः। 'स्वपरमण्डले कार्याकार्यावलोकने चाराश्चक्षूंषि क्षितिपतीनाम्' इति नीतिवाक्यामृते। प्रभवो निग्रहानुग्रहसमर्थाः स्वामिनो न वञ्चनीया न प्रतारणीयाः। सत्यमेव वक्तव्या इत्यर्थः। चारापचारे चक्षुरपचारवद्राज्ञां पदे पदे निपात इति भावः। अतोऽप्रतार्यत्वाद्धेतोः। असाध्वप्रियं साधु प्रियं वा। मदुक्तमिति शेषः। क्षन्तुं सोढुमर्हसि। कुतः। हितं पथ्यं मनोहारि प्रियं च वचो दुर्लभम्। अतो मद्वचोऽपि क्षन्तव्यमित्यर्थः ॥ ४ ॥

(भा०) क्रियास्विति। हे नृप ! राजन् ! क्रियासु कार्येषु नियुक्तैर्युक्तैरनुजीविभिः, अनुचरैः, चारचक्षुषो दूतनयनाः प्रभवः स्वामिनो न वञ्चनीयाः, न प्रतारणीयाः। अतोऽस्मात्कारणाद् असाधु, अयुक्तं साधु युक्तं वा मद्वचः क्षन्तुं सोढुम् अर्हसि, कुतः, हितं पथ्यं मनोहारि प्रियं च वचो वचनं दुर्लभम्। भृत्यैः प्रभोरवञ्चनीयत्वान्मदुक्तमप्रियमपि हितकरञ्चेत्क्षन्तव्यमेवेत्यर्थः। असाधुसाधुवचनक्षमायां भृत्यैः प्रभवो न वञ्चनीया इति पदार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गं। तच्च तुर्यपादगतार्थान्तरन्यासेन संसृष्टम्, अर्थान्तरन्यासश्च–हितं मनोहारि वचो दुर्लभमिति सामान्यार्थेन, अतो मदुक्तमसाधु साधु वा वचनं क्षन्तव्यमिति विशेषार्थस्य समर्थनादत्र सामान्येन विशेषसमर्थनरूपो बोध्यः ॥ ४ ॥

तर्हि तूष्णींभाव एव वरमित्याशङ्क्याह—

स किंसखा साधु न शास्ति योऽधिपं हिताच्च यः संशृणुते स किंप्रभुः।
सदाऽनुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसंपदः॥ ५ ॥

अ०–यः, अधिपं, साधु, न, शास्ति, स, किंसखा, यः, हिताद्, न, संशृणुते, सः, किंप्रभुः। हि, सदा, अनुकूलेषु, नृपेषु, अमात्येषु, च, सर्वसंपदः, रतिं, कुर्वते॥ ५ ॥

(म०) स इति ॥ यः सखाऽमात्यादिरधिपं स्वामिनं साधु हितं न शास्ति नोपदि-

भवति । ब्रुविशासि—इत्यादिना शासेर्दुहादिपाठाद् द्विकर्मकत्वं । स हितानुपदेष्टा । कुत्सितः सखा किंसखा । दुर्मन्त्रीत्यर्थः । 'किमः क्षेपे' इति समासान्तप्रतिषेधः । तथा यः प्रभुर्निग्रहानुग्रहसमर्थः स्वामी हिताद् आप्तजनाद्धितोपदेष्टुः सकाशात् । 'आख्यातोपयोगे' इत्यपादानत्वात्पञ्चमी । न संश्रृणुते न श्रृणोति हितमिति शेषः । 'समो गम्यृच्छि—' इत्यादिना सम्पूर्वाच्छृणोतेरकर्मकादात्मनेपदम् अकर्मकत्वं वैवक्षिकं । स हितमश्रोता प्रभुः किंप्रभु कुत्सितस्वामी पूर्ववत्समासः । सर्वथा सचिवेन वक्तव्यं श्रोतव्यं स्वामिना । एवं च राजमन्त्रिणोरैकमत्यं स्यादित्यर्थः । ऐकमत्यस्य फलमाह—सदेति । हि यस्मान्नृपेषु । अमा सह भवा अमात्यास्तेषु च । 'अव्ययात्त्यप्' । अनुकूलेषु परस्परानुरक्तेषु सत्सु सर्वसम्पदः सदा रतिमनुरागं कुर्वते कुर्वन्ति । न जातु जहतीत्यर्थः । अतो मया वक्तव्यं त्वया च श्रोतव्यमिति भावः ॥ अत्रैवं राजमन्त्रिणोर्हितानुपदेशतदश्रवणनिन्दासामर्थ्यासिद्धेरैकमत्यलक्षणकारणस्य निर्दिष्टस्य सर्वसम्पत्सिद्धिरूपकार्येण समर्थनात्कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः । तदुक्तं-'सामान्यविशेषकार्यकारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनमर्थान्तरन्यासः, इति ॥ ५ ॥

(भा०) स किमिति । यः सखा सुहृत् (सचिवादिः) अधिपं स्वामिनं साधु सम्यग् न शास्ति नोपदिशति स किंसखा कुत्सितमित्रं, योऽधिप स्वामी हिताद् हितोपदेष्टुः (जनात्) न संश्रृणुते न हितवचनमाकर्णयति स किंप्रभु कुत्सितस्वामी हि यतः कारणाद् अनुकूलेषु परस्परानुरागवत्सु नृपेषु क्षितिपतिषु, अमात्येषु सचिवेषु च सर्वसम्पदः सकलसंपत्तयः सदा सर्वदा रतिं प्रीतिं कुर्वते विदधते । योऽमात्यो नोपदिशति राजानं सम्यग् यश्च राजा नामात्यहितवचनमाकर्णयति तावुभावप्रशंसनीयौ यतोऽन्योऽन्यस्नेहवत्स्वेव नृपतिसचिवेषु सकलसम्पदनुरागो भवतीत्यर्थः । अतो मया वक्तव्यं भवता च श्रोतव्यमिति भाव. । नृपसचिवोभयैकमत्यात्मककारणस्य सर्वसम्पत्सिद्ध्यात्मककार्येण समर्थनात्कार्येण कारणसमर्थनात्मकोऽर्थान्तरन्यासोऽलङ्कारः ॥ ५ ॥

सम्प्रति स्वाहङ्कारं परिहरति—

निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः ।
तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥६॥

अ०-निसर्गदुर्बोधम्, भूपतीनाम्, चरितम्, क्व । अबोधविक्लवाः, जन्तवः, क्व । मया, विद्विषाम्, निगूढतत्त्वम्, नयवर्त्म, यद्, अवेदि, (तद्) अयम्, तव, अनुभावः ॥६॥

(म०) निसर्गेति ॥ निसर्गदुर्बोधं स्वभावदुर्ग्रहम् । 'ईषद्दुः—' इत्यादिना खल्प्रत्ययः । भूपतीनां चरितं क्व । अबोधविक्लवा अज्ञानोपहता जन्तवः । मादृशाः पामरजना इत्यर्थः । क्व । कोऽयं सङ्गत इत्यर्थः । तथाऽपि निगूढतत्त्वं संवृतयाथार्थ्यं विद्विषां नयवर्त्म षाड्गुण्यप्रयोगः 'संधिविग्रहयानानि संस्थाप्यासनमेव च । द्वैधीभावश्च विज्ञेयाः षड्गुणा नीतिवेदिनाम्' ॥ इत्याद्युक्तो यन्मयाऽवेदि । ज्ञातमिति यावत् । चिरः

कर्मणि लुङ्। अयम्। इदं वेदनमित्यर्थः। विधेयप्राधान्यात्। पुंलिङ्गनिर्देशः। तवानुभावः सामर्थ्यम्। अनुगतो भावोऽनुभाव इति घञन्तेन प्रादिसमासः। न तु कर्तरि अप्प्रत्ययः। 'श्रिणीभुवोऽनुपसर्गे' इत्यनुपसर्गाद्भवतेर्धातोर्घञ्विधानात्। अत एव काशिकायां—'कथं प्रभावो राज्ञां प्रकृष्टो भाव इति प्रादिसमासः' इति। दोषपरिहारौ सम्यग्ज्ञात्वैव विज्ञापयामि। न तु वृथा कर्णकठोरं प्रलपामीत्याशयः ॥ ६ ॥

(भा०) निसर्गेति। निसर्गदुर्बोधं स्वभावदुरवगमं भूपतीनां राज्ञां चरितं माहात्म्यं क। अबोधविक्लवा अज्ञानयुक्ता जन्तवः प्राणिनः (मादृशाः) क। नोभयसंघटनसम्भवः। मया विद्विषां शत्रूणां निगूढतत्त्वं गुप्ततात्पर्यं नयवर्त्म नीतिमार्गो यदवेदि, अज्ञायि, अयम् इदं वेदनं तवानुभावस्तव प्रभावो न ममेति शेषः।

नृपप्रभावस्य स्वभावतो दुरवगमान्मद्विधप्राणिनाञ्च सर्वविषयज्ञानाभावादनयोरन्तरेऽपि रिपुगूढनयवर्त्मज्ञाने तव प्रभाव एव हेतुर्न त्वन्य इत्यर्थः। दोषपरिहारोभयं सम्यगवगत्यैव निवेदयामि न तु श्रोत्रक्लेशदमात्रं वचो ब्रवीमीति भावः विषमालङ्कारः॥६॥

सम्प्रति यद्वक्तव्यं तदाह—

विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः ॥ ७ ॥

अ०—सुयोधनः, नृपासनस्थः, अपि, वनाधिवासिनः, भवतः, पराभवं, विशङ्कमानः, दुरोदरच्छद्मजितां, जगतीम्, नयेन, जेतुम्, समीहते ॥ ७ ॥

(म०) विशङ्कमान इति ॥ सुखेन युध्यते सुयोधनः। 'भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्य'। नृपासनस्थः सिंहासनस्थोऽपि। वनमधिवसतीति वनाधिवासिनो वनस्थात्। राज्यभ्रष्टादपीत्यर्थः। भवतस्त्वत्तः पराभवं पराजयं विशङ्कमान उत्प्रेक्षमाणः सन्। दुष्टमुदरमस्येति दुरोदरं द्यूतम्। पृषोदरादित्वात्साधुः। 'दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम्' इत्यमरः। तस्य छद्मना मिषेण जितां लब्धां दुर्नयार्जितां जगतीं महीम्। 'जगती विष्टपे मह्यां वास्तुच्छन्दोविशेषयोः' इति वैजयन्ती। नयेन नीत्या जेतुं वशीकर्तुं समीहते व्याप्रियते। न तूदास्त इत्यर्थः। बलवत्स्वामिकमविनुद्यागमं च धनं भुञ्जानस्य कुतो मनसः समाधिरिति भावः। अत्र 'दुरोदरच्छद्मजिताम्' इति विशेषणद्वारेण पदार्थस्य चतुर्थपादार्थं प्रति हेतुत्वेनोपन्यासाद् द्वितीयकाव्यलिङ्गमलङ्कारः। तदुक्तं—हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् ॥ ७ ॥

(भा०) विशङ्कमान इति। सुयोधनो दुर्योधनः (धृतराष्ट्रपुत्रः) नृपासनस्थोऽपि सिंहासनवर्त्यपि वनाधिवासिनो वनौकसो भवतस्त्वत्तः सकाशात्। पराभवं पराजयं विशङ्कमानः सन्दिहानः। दुरोदरच्छद्मजितां द्यूतव्याजाऽऽयत्तीकृतां जगतीं महीं नयेन नीत्या जेतुं वशीकर्तुं समीहते इच्छति। द्यूतव्याजादधिगतराज्योऽपि दुर्योधनो भवतः पराभवशङ्कया नीतिपूर्वकराज्यकार्यसम्पादनद्वारा लोकान् वशीकर्तुमिच्छतीत्यर्थः।

स्वापेक्षया भवतामधिकपराक्रमशालित्वाद्राज्यस्य च व्याजप्राप्तत्वाच्च शङ्कितहृदयस्य तस्य कुतश्चित्स्थैर्यमिति भावः। नीत्या जगतीवशीकरणे पराभवशङ्का भूतव्याजाप्तत्वं च पदार्थद्वयं हेतुरिति पदार्थहेतुकं काव्यलिङ्गम् ॥ ७ ॥

'नयेन जेतुं जगतीं समीहते' इत्युक्तम्। तत्प्रकारमाह—

तथाऽपि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन्भूतिमनार्यसङ्गमाद् वरं विरोधोऽपि समं महात्मभिः ॥८॥

अ०–तथाऽपि, जिह्मः, सः, भवज्जिगीषया, गुणसम्पदा, शुभ्रं, यशः, तनोति। भूतिम्, समुन्नयन्, अनार्यसङ्गमाद्, महात्मभिः, समम्, विरोधः, अपि, वरम् ॥ ८ ॥

(म०) तथाऽपीति। तथाऽपि साशङ्कोऽपि। जिह्मो वक्रः। वञ्चक इति यावत्। स दुर्योधनो भवज्जिगीषया। गुणैर्भवन्तमाक्रमितुमिच्छयेत्यर्थः। 'हेतौ' इति तृतीया। गुणसंपदा दानदाक्षिण्यादिगुणगरिम्णा। करणेन। शुभ्रं यशस्तनोति। स खलो गुणलोभनीयां त्वत्सम्पदमात्मसात्कर्तुं त्वत्तोऽपि गुणवत्तामात्मनः प्रकटयतीत्यर्थः। नन्वेवं गुणिनः सतोऽपि सज्जनविरोधो महानस्त्यस्य दोष इत्याशङ्क्य; सोऽपि सत्संसर्गालाभे नीचसङ्गमाद्वरमुत्कर्षावहत्वादित्याह–समिति। तथा हि। भूतिं समुन्नयन्नुत्कर्षमापादयन्। 'लटः शतृशानचौ—'इत्यादिना शतृप्रत्ययः। पुनर्लड्ग्रहणसामर्थ्यात्प्रथमासामानाधिकरण्यम्। महात्मभिः समम्। सहेत्यर्थः। 'साकं सत्रा समं सह' इत्यमरः। अनार्यसङ्गमाद् दुर्जनसंसर्गात्। 'पञ्चमी विभक्ते' इति पञ्चमी। विरोधोऽपि वरं मनाक्प्रियः। 'देवाद् वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये' इत्यमरः। अत्र मैत्र्यपेक्षया मनाक्प्रियत्वं विरोधस्य 'भूतिं समुन्नयन्' इत्यस्य पूर्ववाक्यान्वये समाप्तस्य वाक्यार्थस्य पुनरादानात्समाप्तपुनरात्ताख्यदोषापत्तिः। तदुक्तं काव्यप्रकाशे—'समाप्तपुनरादानात्समाप्तपुनरात्तकम्' इति। न च वाक्यान्तरमेतद्। येनोक्तदोषपरिहारः स्यात्। अर्थान्तरन्यासालङ्कारः। स च भूतिसमुन्नयनस्य पदार्थविशेषणद्वारा विरोधवरत्वं प्रति हेतुत्वाभिधानरूपकाव्यलिङ्गानुप्राणित इति ॥ ८ ॥

(भा०) तथाऽपीति। तथाऽपि साशङ्कोऽपि जिह्मः कुटिलः स दुर्योधनो भवज्जिगीषया गुणैर्भवन्तमाक्रमितुमिच्छया (हेतुना) गुणसम्पदा दानदाक्षिण्यादिगुणगौरवेण (करणेन) शुभ्रं स्वच्छं यशः कीर्त्ति तनोति विस्तारयति। भूतिम् ऐश्वर्यं समुन्नयन् उत्कर्षमापादयन् महात्मभिः समं सज्जनैः सह विरोधोऽपि विद्वेषोऽपि, अनार्यसङ्गमाद् (दुर्जनसम्पर्कापेक्षयेत्यर्थः) वरम् ईषत्प्रियः। वञ्चकोऽसौ दुर्योधनः, चातुर्यादिगुणैर्यशो विस्तारयति, नीचसंसर्गापेक्षया भूत्युत्कर्षसम्पादनशीलः सद्विद्वेषोऽपि शुभ इति भावः। उत्तरार्द्धोपात्तविशेषार्थेन पूर्वार्द्धगतसामान्यार्थस्य समर्थनात् सामान्यस्य विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः। स च पदार्थविशेषणद्वारा भूतिसमुन्नयनस्य विरोधवरत्वे हेतुत्वोक्त्या पदार्थहेतुककाव्यलिङ्गानुप्राणितः ॥ ८ ॥

ननु 'कातर्यं केवला नीतिः' इत्याशङ्क्य नीतियुक्तं पौरुषमस्येत्याह—

कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना ।
विभज्य नक्तंदिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ॥९॥

अ०—कृतारिषड्वर्गजयेन, अगम्यरूपां, मानवीम्, पदवीम्, प्रपित्सुना, अस्ततन्द्रिणा, तेन, नक्तंदिवं, विभज्य, नयेन, पौरुषम्, वितन्यते ॥ ९ ॥

(म०) कृतेति ॥ षण्णां वर्गः षड्वर्गः । अरीणामन्तःशत्रूणां षड्वर्गोऽरिषड्वर्गः । शिवभागवतवत्समासः । तस्य जयः कृतो येन तेन तथोक्तेन । विनीतेनेत्यर्थः । विनीताधिकारं प्रजापालनमिति भावः । अगम्यरूपां पुरुषमात्रदुष्प्राप्याम् । मनोरिमां मानवीम् । मनूपदिष्टसदाचारक्षुण्णामित्यर्थः । पदवीं प्रजापालनपद्धतिं प्रपित्सुना प्रपत्तुमिच्छुना । प्रपद्यतेः सन्नन्तादुप्रत्ययः 'सनि मीमा—' इत्यादिनेसादेशः । 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपः । अस्ता तन्द्रिरालस्यं यस्य तेनास्ततन्द्रिणा । अनलसेनेत्यर्थः । तद्रिः-सौत्रो धातुः । तस्मात् । 'वह्न्यादयश्च' इत्यौणादिकः क्रिन्प्रत्ययः 'कृदिकारादक्तिनो-वा ङीष् वक्तव्यः' इति । 'वन्दीघटीतरीतन्द्रीति ङीषन्तोऽपि' इति क्षीरस्वामी । तथा रामायणे प्रयोगः—'निस्तन्द्रिरप्रमत्तश्च स्वदोषपरदोषवित्' इति । तेन दुर्योधनेन । पुरुषस्य कर्म पौरुषं पुरुषकार उद्योग इति यावत् । युवादित्वादण् प्रत्ययः । 'पौरुषं पुरुषस्योक्ते भावे कर्मणि तेजसि' इति विश्वः । नक्तं च दिवा च नक्तंदिवम् । अहोरात्रयोरित्यर्थः । 'अचतुर' इत्यादिना सप्तम्यर्थवृत्त्योरव्यययोर्द्वन्द्वनिपातेऽच्समासान्तः, विभज्यास्यां वेलायामिदं कर्मेति विभागं कृत्वा नयेन नीत्या वितन्यते विस्तार्यते ॥ ९ ॥

(भा०) कृतारिषड्वर्गेति । कृतारिषड्वर्गजयेन कामक्रोधादिषट्कविजयिना अगम्यरूपां दुष्प्राप्याम् मानवीं मनूक्तसदाचारयुक्तां पदवीं प्रजापालनपद्धतिं प्रपित्सुना प्रतिपत्तुमिच्छुना, अस्ततन्द्रिणाऽनलसेन तेन दुर्योधनेन नक्तंदिवं रात्रिन्दिवं विभज्य विभागं कृत्वा नयेन नीत्या पौरुषं पुरुषकारं (सामर्थ्यं) वितन्यते विस्तार्यते । विनीतः-प्रजारक्षणक्षमोऽनलसो दुर्योधनः कार्यक्षणं विभज्य नीतिशास्त्रोक्तदिशा पौरुषं करोतीत्यर्थः । असौ दुर्योधनः साम्प्रतं नीतिशास्त्रमवलम्ब्यैव तिष्ठतीति भावः । कृतारिषड्वर्गजयेनेत्यादिविशेषणत्रयस्य साभिप्रायत्वात्परिकरालङ्कारः ॥ ९ ॥

सम्प्रति भृत्याद्यनुरागमाह—

सखीनिव प्रीतियुजोऽनुजीविनः समानमानान्सुहृदश्च बन्धुभिः ।
स सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम् ॥१०॥

अ०—गतस्मयः, सः, सन्ततम्, साधु, अनुजीविनः, प्रीतियुजः, सखीन्, इव, सुहृदः, च, बन्धुभिः, समानमानान्, बन्धुताम्, कृताधिपत्याम्, इव, दर्शयते ॥ १० ॥

(म०) सखीनीति ॥ गतस्मयो निरहङ्कारोऽत एव स दुर्योधनः सन्ततमनारतं साधु

सम्यक् । अकपटमित्यर्थः । अनुजीविनो भृत्यान् । प्रीतियुजः स्निग्धान्सखीनिव मित्राणीव । दर्शयते । लोकस्येति शेषः । 'हेतुमति च' इति णिच् । 'णिचश्च' इत्यात्मनेपदम् । शोभनं हृदयं येषां तान्सुहृदो मित्राणि च । 'सुहृद्दुर्हृदौ 'मित्रामित्रयोः' इति निपातः । बन्धुभिर्भ्रात्रादिभिः समानमानांस्तुल्यसत्कारान् दर्शयते । बन्धूनां समूहो बन्धुता ताम् ॥ 'ग्रामजनबन्धुसहायेभ्यस्तल्' । कृतमाधिपत्यं स्वाम्यं यस्यास्तां कृताधिपत्यामिव दर्शयते । बन्धूनधिपतीनिव दर्शयतीत्यर्थः । यथा भृत्यादिषु सख्यादिबुद्धिर्जायते लोकस्य तथा तान्संभावयतीत्यर्थः । अनुजीव्यादीनां 'कर्तुरीप्सिततमं कर्म' इति कर्मत्वम् । पूर्वे त्वस्मिन्नेव पदान्वये वाक्यार्थमित्थं वर्णयन्ति–स राजाऽनुजीव्यादीन्सख्यादीनिव दर्शयते । सख्यादय इव ते तु तं पश्यन्ति । सख्यादिभावेन पश्यतस्तांस्तथा दर्शयते । स्वयमेव छन्दानुवर्त्तितया स्वदर्शनं तेभ्यः प्रयच्छतीत्यर्थः । अर्थात्तस्येप्सितकर्मत्वम् । अणि कर्तुरनुजीव्यादेः 'अभिवादिदृशोरात्मनेपदमुपसंख्यानम्' इति पाक्षिकं कर्मत्वम् । एवं चात्राण्यन्तकर्मणो राज्ञो ण्यन्ते कर्तृत्वेऽपि 'आरोहयते हस्ती स्वयमेव' इत्यादिवदश्रूयमाणकर्मान्तरत्वाभावान्नायं णेरणादिसूत्रस्य विषय इति मत्वा 'णिचश्च' इत्यात्मनेपदं प्रतिपेदिरे । भाष्ये तु णेरणादिसूत्रविषयत्वमप्यस्योक्तम् । यथाऽऽह–"पश्यन्ति भृत्या राजानं" 'दर्शयते भृत्यान् राजा' 'दर्शयते भृत्यै राजा' अत्रात्मनेपदं सिद्धं भवति" इति । अत्राह कैयटः–ननु कर्मान्तरसद्भावादत्रात्मनेपदेन भाव्यम् । उच्यते—अस्मादेवोदाहरणाद्भाष्यकारस्यायमेवाभिप्राय उन्नीयते–'अण्यन्तावस्थायां ये कर्तृकर्मणी तद्व्यतिरिक्तकर्मान्तरसद्भावादात्मनेपदं न भवति । यथा—'स्थलमारोहयति मनुष्यान्' इति । इह त्वण्यन्तावस्थायां कर्तृणां भृत्यानां णौ कर्मत्वमिति भवत्येवात्मनेपदमिति ॥ १० ॥

(भा०) सखीनिवेति । गतस्मयस्त्यक्तमदः स दुर्योधनः सन्ततं सततं साधु सम्यग् (अकपटम्) अनुजीविनो भृत्यान् प्रीतियुजः स्नेहपात्रान् सखीन् मित्राणीव, सुहृदो मित्राणि बन्धुभिर्ज्ञातिभिः समानमानान् तुल्यसत्कारान् बन्धुतां ज्ञातिसमूहं कृताधिपत्यां कृतस्वाम्यमिव दर्शयते बोधयते (लोकस्येति शेषः) असौ दुर्योधनो भृत्येषु मित्रभावं सुहृत्सु बन्धुभावं बन्धुषु च स्वामिभावं बोधयति लोकानित्यर्थः। अत्र श्रौतीपूर्णोपमात्रयम् ॥ १० ॥

न चायं त्रिवर्गोऽप्यमाद्यतीत्याह—

असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया ।
गुणानुरागादिव सख्यमीयिवान् न बाधतेऽस्य त्रिगणः परस्परम् ॥ ११ ॥

अ०–यथायथं, विभज्य, समपक्षपातया, भक्त्या, असक्तम्, आराधयतः, अस्य, त्रिगणः, गुणानुरागात्, सख्यम्, ईयिवान्, इव, परस्परं, न, बाधते ॥ ११ ॥

(म०) असक्तमिति ॥ यथायथं यथास्वं विभज्य, असङ्कीर्णस्वं विविच्येत्यर्थः । यथा-

स्वे यथायथम्' इति निपातनाद् द्विर्भावो नपुंसकत्वं च। 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वत्वम्। पक्षे पातः पक्षपात आसक्तिविशेषः समस्तुल्यो यस्यां तया समपक्षपातया। भक्त्याऽनुरागविशेषेण। पूज्येष्वनुरागो भक्तिरित्युपदेशः। पूज्यश्चायं त्रिवर्ग इति। असक्तमनासक्तम्। अव्यसनितयेति यावत्। आराधयतः सेवमानस्यास्य दुर्योधनस्य त्रयाणां धर्मार्थकामानां गणस्त्रिगणस्त्रिवर्गः। 'त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः' इत्यमरः। गुणानुरागात्तदीयगुणेष्वनुरागात्। गुणवदाश्रयलोभादित्यर्थः। सख्यं मैत्री 'सख्युर्यः' इति यप्रत्ययः। ईयिवानुपगतवानिवेत्युत्प्रेक्षा। 'उपेयिवाननाश्वाननूचानश्च' इति क्वसुप्रत्ययान्तो निपातः। 'नात्रोपसर्गस्तन्त्रम्' इति काशिकाकार आह स्म। परस्परं न बाधते। समवर्तित्वादस्य 'धर्मार्थकामाः परस्परानुपमर्देन वर्धन्त' इत्यर्थः। उक्तं च—'धर्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स जनो जघन्यः' इति ॥११॥

(भा०) असक्तमिति। यथायथं यथायोग्यं विभज्य पृथक्कृत्य (असङ्कीर्णरूपं विविच्य) समपक्षपातया तुल्यासक्तिविशेषया भक्त्याऽनुरागेण, असक्तम् अनासक्तम् आराधयतः सेवमानस्यास्य दुर्योधनस्य त्रिगणस्त्रिवर्गो धर्मार्थकामरूपो गुणानुरागात् गुणवदाश्रयलोभात् सख्यं सुहृत्त्वम् ईयिवान् उपगतवानिव परस्परम् अन्योऽन्यं न बाधते न हन्ति। तुल्यभावेन धर्मार्थकामसेविनो दुर्योधनस्य प्रत्यहं त्रिवर्गो वर्द्धत एव न क्षिणोतीति भावः। प्रस्तुतोपमेयस्य त्रिगणस्याप्रस्तुतोपमानेन सख्यमीयुषा सहेव शब्दबलेन तादात्म्यसम्भावनया वाच्योत्प्रेक्षाऽलङ्कारः ॥ ११ ॥

अथ श्लोकत्रयेणोपायकौशलं दर्शयन्नादौ सामदाने दर्शयति—

निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियाम्।
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ॥१२॥

अ०—तस्य, निरत्ययम्, साम, दानवर्जितं, न (प्रवर्तते)। भूरि, दानं, सत्क्रियां, विरहय्य, न (प्रवर्तते)। विशेषशालिनी, सत्क्रिया, गुणानुरोधेन, विना, न, प्रवर्तते ॥ १२ ॥

(म०) निरत्ययमिति ॥ तस्य दुर्योधनस्य निरत्ययं निर्बाधम्। अमायिकमित्यर्थः। अन्यथा जनानां दुर्ग्रहत्वादिति भावः। साम सान्त्वम्। 'साम सान्त्वमुभे समे' इत्यमरः। दानवर्जितं न प्रवर्तते। अन्यथा लुब्धप्रायत्वाज्जनस्य शुष्कप्रियैर्वाक्यैर्दुष्करत्वादिति भावः। उक्तं च—'लुब्धमर्थेन गृह्णीयात्साधुमञ्जलिकर्मणा। मूर्खं छन्दानुरोधेन तत्त्वार्थेन च पण्डितम्' ॥ इति। तथा भूरि प्रभूतं न तु कृशं चित्स्वल्पमित्यर्थः। दानं धनत्यागः। सदित्यादरार्थेऽव्ययम्। 'आदरानादरयोः सदसती' इति निपातसंज्ञास्मरणात्। तस्य क्रियां सत्क्रियां विरहय्य विहाय। 'ल्यपि लघुपूर्वात्' इत्ययादेशः। न प्रवर्तते। अनादरे दानवैफल्यादिति भावः। न चैवं सर्वत्र तेनाविवेकित्वं कोशहानिश्च स्यादित्याह—प्रेति। विशेषशालिन्यतिशययोगिनी सत्क्रियाऽऽदरक्रिया गुणानुरोधेन गुणानुरागेण विना न प्रवर्तते। 'पृथग्विना—' इत्यादिना तृतीया। गुणेष्वेवादरो भूरि दानं चेति

नोत्तरोत्तरावकाश इत्यर्थः। अत्रोत्तरोत्तरस्य पूर्वपूर्वविशेषणतया स्थापनादेकावल्यल-ङ्कारः। तदुक्तं काव्यप्रकाशे—'स्थाप्यतेऽपोह्यते वाऽपि यथापूर्वं परं परम्। विशेषणतया वस्तु यत्र सैकावली द्विधा॥' इति॥ १२॥

(भा०) निरत्ययमिति। तस्य दुर्योधनस्य निरत्ययं निर्बाधं साम सान्त्वं दानव-र्जितं दानरहितं न प्रवर्त्तते भूरि प्रचुरं दानं वितरणं सत्क्रियां सत्कारं विरहय्यानादृत्य न प्रवर्त्तते। विशेषशालिनी अतिशययोगिनी, सत्क्रिया आदरक्रिया, गुणानुरोधेन गुणानुरागेण विना न प्रवर्त्तते। असौ दुर्योधनो धनादिदानपूर्वकं लोकान् सान्त्वयति, आदरपूर्वकं च ददाति, गुणवतश्च सत्करोतीति भावः। उत्तरोत्तरवाक्यस्य पूर्वपूर्वविशे-षणत्वेन स्थापनादेकावल्यलङ्कारः॥ १२॥

अथ दण्डप्रकारमाह—

वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः।
गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम्॥१३॥

अ०—वशी, सः, (दुर्योधनः) वसूनि, वाञ्छन्, न, मन्युना, न, निवृत्तकारणः (सन्) स्वधर्मः, इति, एव, गुरूपदिष्टेन, दण्डेन, रिपौ, वा, सुते, अपि, धर्मविप्लवं, निहन्ति॥१३॥

(म०) वसूनीति॥ वशी स दुर्योधनो वसूनि धनानि वाञ्छन्न। लोभान्नेत्यर्थः। 'वसु तोये धने मणौ' इति वैजयन्ती। निहन्तीति शेषः। तथा मन्युना कोपेन न च। 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः। 'धर्मशास्त्रानुसारेण क्रोधलोभविवर्जित.' इति स्मर-णादित्यर्थः। किन्तु निवृत्तकारणो निवृत्तलोभादिनिमित्तः सन्स्वधर्म इत्येव। स्वस्य राज्ञः सतो ममायं धर्मो ममेदं कर्त्तव्यमित्यस्मादेव हेतोरित्यर्थः। 'अदण्ड्यान्दण्डय-न्राजा दण्ड्यांश्चैवाप्यदण्डयन्। अयशो महदाप्नोति नरकं चैव गच्छति'॥ इति स्मर-णादिति भावः। गुरूपदिष्टेन प्राड्विवाकोपदिष्टेन। 'धर्मशास्त्रं पुरस्कृत्य प्राड्विवा-कमते स्थितः। समाहितमतिः पश्येद् व्यवहाराननुक्रमात्॥ इति नारदस्मरणात्। दण्डेन दमेन। शिक्षयेत्यर्थः। रिपौ सुतेऽपि वा। स्थितमिति शेषः। एतेनास्य समद-र्शित्वमुक्तम्। धर्मविप्लवं धर्मव्यतिक्रमम्। अधर्ममिति यावत्। निहन्ति निवारय-ति। दुष्ट एवास्य शत्रुः शिष्ट एव बन्धुर्न तु सम्बन्धनिबन्धन पक्षपातोऽस्तीत्यर्थः॥१३॥

(भा०) वसूनीति। वशी जितेन्द्रियः स दुर्योधनो वसूनि धनानि वाञ्छन्नभिलषन् न मन्युना कोपेन न, किन्तु निवृत्तकारणो निवृत्तलोभादिनिमित्तः सन् स्वधर्म इत्येव हेतोर्गुरूपदिष्टेन गुरुशिक्षितेन दण्डेन दमेन (शिक्षया) रिपौ शत्रौ सुते पुत्रेऽपि धर्म-विप्लवं धर्मव्यतिक्रमं निहन्ति निवारयति। असौ दुर्योधनो दुष्टानेव शास्ति शिष्टानेव पालयति न चास्य सम्बन्धानुरोधेन क्व चित्पक्षपातोऽस्तीति भावः। अत्र धर्मविप्लव-वारणे हेतुभूतस्य स्वधर्म इत्येतत्प्रतिपाद्यराजधर्मस्य पदार्थत्वेनाभिधानात्पदार्थहेतुकं काव्यलिङ्गमलङ्कारः॥ १३॥

सम्प्रति भेदकौशलं दर्शयति—

विधाय रक्षान्परितः परेतरानशङ्किताकारमुपैति शङ्कितः ।
क्रियाऽपवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः ॥१४॥

अ०–शङ्कितः, (सन्) परितः, परेतरान्, रक्षान्, विधाय, अशङ्किताकारम्, उपैति, क्रियाऽपवर्गेषु, अनुजीविसात्कृताः, सम्पदः, अस्य, कृतज्ञताम्, वदन्ति ॥ १४ ॥

(म०) विधायेति ॥ शङ्का सञ्जाताऽस्य शङ्कितोऽविश्वस्तः सन् परितः सर्वत्र स्वपरमण्डले परेतरानात्मीयान् । अवञ्चकानिति यावत् । यद्वा परानितरयन्ति भेदेनात्मसात्कुर्वन्तीति परेतरान् । तत्करोति ण्यन्तात्कर्मण्यण्प्रत्ययः । रक्षन्तीति रक्षान्रक्षकान् । मन्त्रगुप्तिसमर्थानित्यर्थः । 'नन्दिग्रहि—इत्यादिना पचाद्यच् । विधाय कृत्वा । नियुज्येत्यर्थः । अशङ्किताकारमुपैति । स्वयमविश्वस्तोऽपि विश्वस्तवदेव व्यवहरन्परमुखेनैव परान्भिनत्तीत्यर्थः । न च तान्रक्षानुपेक्षते येन तेऽपि विकुर्वीरन्नित्याह—क्रियेति । क्रियाऽपवर्गेषु कर्मसमाप्तिष्वनुजीविसात्कृता भृत्याधीनाः कृताः । अपरावर्त्तितया दत्ता इत्यर्थः । 'देये त्रा च' इति साति प्रत्ययः । सम्पदोऽस्य राज्ञः कृतज्ञतामुपकारित्वं वदन्ति । प्रीतिदानैरेवास्य कृतज्ञत्वं प्रकाश्यते, न तु वाङ्मात्रेणेत्यर्थः । कृतज्ञे राजन्यनुजीविनोऽनुरज्यन्तेऽनुरक्ताश्च तं रक्षन्तीति भावः ॥ १४ ॥

(भा०) विधायेति । स दुर्योधनः शङ्कितः सञ्जातशङ्कः सन् परितः सर्वत्र परेतरान् आत्मीयान् रक्षान् रक्षकान् विधाय कृत्वा अशङ्किताकारं विश्वस्ताकृतिम् उपैति प्राप्नोति । क्रियाऽपवर्गेषु कार्यावसानेषु, अनुजीविसात्कृताः भृत्यायत्तीकृताः सम्पदः सम्पत्तयोऽस्य दुर्योधनस्य कृतज्ञतां कृतोपकारित्वं वदन्ति कथयन्ति । स्वयमविश्वस्तोऽपि दुर्योधन आत्मीयान् धनरक्षकान् नियुज्य विश्वस्तः सन् तिष्ठति सेवकार्पिताश्चास्य सम्पदः कृतज्ञत्वं प्रकाशयन्ति नोक्तिमात्रेणेत्यर्थः । उपकारिणि नृपे सेवकानुरागो जायतेऽनुरागवन्तश्च सेवका नृपं रक्षन्तीति भावः । पूर्वार्द्धे द्वितीयपादप्रतिपाद्यायेऽशङ्किताकारप्राप्तौ परेतररक्षकनियोजनस्योत्तरार्द्धे च कृतज्ञताऽभिधानेऽनुजीविसात्कृता इत्यत्र च विशेषणद्वारा हेतुत्वात्पदार्थहेतुकं काव्यलिङ्गम् ॥ १४ ॥

अर्थोपायप्रयोगस्य फलवत्तां दर्शयति—

अनारतं तेन पदेषु लम्भिता विभज्य सम्यग्विनियोगसत्क्रियाः ।
फलन्त्युपायाः परिबृंहितायतीरुपेत्य संघर्षमिवार्थसम्पदः ॥१५॥

अ०–तेन, सम्यग्, विभज्य, पदेषु, लम्भिताः, विनियोगसत्क्रियाः, उपायाः, संघर्षम्, उपेत्य, इव, परिबृंहितायतीः, अर्थसम्पदः, अनारतम्, फलन्ति ॥ १५ ॥

(म०) अनारतमिति ॥ तेन राज्ञा पदेषूपादेयवस्तुषु । 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । सम्यगसङ्कीर्णमव्यस्तं च विभज्य विविच्य । विनियोग एव सत्क्रि-

षाऽनुग्रहः। सत्कार इति यावत्। येषां ते लम्भिताः। स्थानेषु सम्यक्प्रयुक्ता इत्यर्थः। उपायाः सामादयः। सङ्घर्षं परस्परस्पर्धामुपेत्येवेत्युत्प्रेक्षा। परिबृंहितायतीः प्रचितोत्तरकालाः। स्थिरा इत्यर्थः। अर्थसम्पदोऽनारतमजस्रं फलन्ति। प्रसुवत इत्यर्थः ॥१५॥

(भा०) अनारतमिति। तेन दुर्योधनेन सम्यग् विभज्य, असङ्कीर्णं विविच्य पदेषु स्थानेषु लम्भिताः प्रापिताः, विनियोगसत्क्रिया विनियोगानुग्रहाः, उपायाः सामादय सङ्घर्षमुपेत्येव परिबृंहितायती. प्रचितोत्तरकालाः (स्थिरा.) अर्थसम्पदः अर्थसम्पत्तीः, अनारतं प्रभूतं सततं फलन्ति प्रसुवते। तेन दुर्योधनेन स्थानेषु सम्यक् प्रयुक्तमुपायचतुष्टयं सततं स्थिरसम्पत्तीरुत्पादयतीत्यर्थः। अत्रोत्प्रेक्षाऽलङ्कारः ॥ १५ ॥

अर्थसम्पदमेवाह—

अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरम् ।
नयत्ययुग्मच्छदगन्धिरार्द्रतां भृशं नृपोपायनदन्तिनां मदः ॥१६॥

अ०–अयुग्मच्छदगन्धिः, नृपोपायनदन्तिनां, मदः, अनेकराजन्यरथाश्वसङ्कुलं, तदीयम् , आस्थाननिकेतनाजिरम्, भृशम् , आर्द्रताम् , नयति ॥ १६ ॥

(म०) अनेकेति॥ अयुग्मच्छदस्य सप्तपर्णपुष्पस्य गन्ध इव गन्धो यस्यासावयुग्मच्छदगन्धिः। 'सप्तम्युपमा–' इत्यादिना बहुव्रीहिरुत्तरपदलोपश्च। 'उपमानाच्च" इति समासान्त इकारः। नृपाणामुपायनान्युपहारभूता ये दन्तिनस्तेषां मदः। 'उपायनमुपग्राह्यमुपहारस्तथोपदा' इत्यमर। राज्ञामपत्यानि पुमांसो राजन्याः क्षत्रियाः। 'राजश्वशुराद्यत्' इति यत्प्रत्यय.। राज्ञोऽपत्ये जातिग्रहणादन्। रथाश्चाश्वाश्च रथाश्वम्। 'सेनाङ्गत्वादेकवद्भाव.। अनेकेषां राजन्यानां रथाश्वेन सङ्कुलं व्याप्तं तदीयमास्थाननिकेतनाजिरं सभामण्डपाङ्गनं भृशमत्यर्थमार्द्रतां पङ्किलत्वं नयति। एतेन महासमृद्धिरस्योक्ता। अत एवोदात्तालङ्कार। तथा चालङ्कारसूत्रं—'समृद्धिमद्वस्तुवर्णनमुदात्तः' इति ॥ १६ ॥

(भा०) अनेकेति। अयुग्मच्छदगन्धिः सप्तपर्णसुरभि, नृपोपायनदन्तिनां मदो-राजोपहारहस्तिनां मदः, अनेकराजन्यरथाश्वसङ्कुलं बहुनृपस्यन्दनवाजिसङ्क्रान्तं तदीयं-दुर्योधनसंबन्धि, आस्थाननिकेतनाजिरं सभामण्डपाङ्गनम् भृशम् अत्यर्थम् आर्द्रतां-पङ्किलत्वं नयति प्रापयति। स्ववशवर्त्तिनां करदानार्थमागतानां राज्ञां रथवाजिसमूहव्याप्तं दुर्योधनसभामण्डपाङ्गनं नृपोपहारभूतहस्तिमदजलेन नितरामार्द्रतां नीतमिति सरलार्थः। अयं दुर्योधनोऽतिसमृद्धिमानुत्कृष्टप्रभावश्चेति भाव। अत्र समृद्धिमद्वस्तुवर्णनादुदात्तालङ्कारः ॥ १६ ॥

सम्प्रति जनपदक्षेमकरत्वमाह—

सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसंपदः ।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन्कुरवश्चकासति ॥ १७ ॥

अ०-चिराय, तस्मिन्, क्षेमं, वितन्वति, अदेवमातृकाः, कुरवः, अकृष्टपच्याः, इव, कृषीवलैः, सुखेन, लभ्याः, सस्यसम्पदः, दधतः, चकासति ॥ १७ ॥

(म०) सुखेनेति ॥ चिराय तस्मिन् दुर्योधने क्षेमं वितन्वति क्षेमङ्करे सति ॥ देवः पर्जन्य एव माता येषां ते देवमातृका वृष्ट्यम्बुजीविनो देशाः। ते न भवन्तीत्यदेवमातृका-नदीमातृका इत्यर्थः । 'देशो नद्यम्बुवृष्ट्यम्बुसम्पन्नव्रीहिपालितः। स्यान्नदीमातृको देव-मातृकश्च यथाक्रमम्' ॥ इत्यमरः । एतेनास्य कुल्याऽऽदिपूर्तप्रवर्तकत्वमुक्तम् । कुरवो-निवासाः कुरवो जनपदविशेषाः । कृष्टेन पच्यन्त इति कृष्टपच्याः । 'राजसूय—'इत्या-दिना कर्मकर्तरि क्यप्प्रत्ययान्तो निपातः। तद्विपरीता अकृष्टपच्या इव । रजःकृषि—' इत्यादिना वलच् प्रत्ययः । 'वले' इति दीर्घः । सुखेनाक्लेशेन लभ्या लब्धुं शक्याः सस्यसम्पदो दधतो धारयन्तः । 'नाभ्यस्ताच्छतुः' इति नुमागमप्रतिषेधः । चकासति । सर्वोत्कर्षेण वर्तन्त इत्यर्थः । 'अदभ्यस्तात्' इति झेरदादेशः । 'जक्षित्यादयः षट्' इत्य-भ्यस्तसञ्ज्ञा । सम्पन्नजनपदत्वादसन्तापकरत्वाच्च दुःसाध्योऽयमिति भावः ॥ १७ ॥

(भा०) सुखेनेति । चिराय चिरकालपर्यन्तं तस्मिन् दुर्योधने क्षेमं कल्याणं वित-न्वति वितरति सति, अदेवमातृका नदीपालिताः कुरवस्तन्नामकदेशविशेषाः, अकृष्टप-च्या हलाद्यचालितक्षेत्रोद्भूता इव कृषीवलैः क्षेत्रपतिभिः सुखेनानायासेन लभ्याः सस्यसम्पदो वृक्षफलानि दधतो धारयन्तः, चकासति दीप्यन्ते । प्रजाहितैषिणि दुर्यो-धने विद्यमाने सति सरिदम्बुपालिताः कुरुनामकदेशविशेषाः क्षेत्रपतिभिः प्रयासमन्तरा-लभ्याः स्वयमुद्भूता सस्यसम्पदो धारयन्त. सन्तः सर्वोत्कर्षेण वर्तन्त इत्यर्थः जनपदानां सस्यसम्पन्नत्वात्स्वस्य च प्रजाहितैषित्वाच्च नायं दुर्योधनो लघुनोपायेन वश्यो भवितुमर्हतीति भाव । अत्रोत्प्रेक्षाऽलङ्कारः ॥ १७ ॥

नन्वेवं जनपदानुवर्त्तिन कथमर्थलाभ इत्यत आह—

उदारकीर्त्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षया ।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी ॥१८॥

अ०-उदारकीर्त्तेः, दयावतः, प्रशान्तबाधम्, अभिरक्षया, उदयं, दिशतः, वसूप-मानस्य, अस्य, गुणैः, उपस्नुता, मेदिनी, वसूनि, स्वयं, प्रदुग्धे ॥ १८ ॥

(म०) उदारेति ॥ उदारकीर्तेर्महायशस । 'उदारो दातृमहतोः' इत्यमर । दयावतः-परदुःखप्रहाणेच्छोः । अत एव प्रशान्तबाधं प्रशमितोपद्रवं यथा स्यात्तथेति क्रियाविशे-षणम् । उदयविशेषणं वा । 'वा दान्तशान्त—' इत्यादिना शमिधातोर्ण्यन्तान्निष्ठाऽन्तो-निपातः । अभिरक्षया सर्वतस्त्राणेनोदयं वृद्धिं दिशत सम्पादयतो वसूपमानस्य कुबेरो-पमस्य । 'वसुर्मयूखाग्निधनाधिपेषु' इति विश्वः । अस्य दुर्योधनस्य गुणैर्दयादाक्षिण्या-दिभिरुपस्नुता द्राविता मेदिनी वसूनि धनानि । 'वसु तोये धने मणौ' इति वैजयन्ती। स्वयं प्रदुग्धे । अक्लेशेन दुग्धत इत्यर्थः । दुहेः कर्मकर्तरि लट् ॥ 'न दुहस्नुनमां य-

त्विवणौ' इति यकृप्रतिषेधः। यथा केन चिद्धि दुग्धेन नवप्रसूता च गौः स्वयं प्रदुग्धे तद्वदिति भावः। अलङ्कारस्तु—'विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः' इति सर्वस्वकारः। अत्र प्रतीयमानया गवा सह प्रकृताङ्गया मेदिन्या भेदेऽभेदलक्षणातिशयोक्तिवशाद्दोह्यत्वेनोक्तिरिति सङ्क्षेपः ॥ १८ ॥

(भा०) उदारकीर्त्तेरिति। उदारकीर्त्तेः उत्कृष्टयशस्विनः, दयावतः करुणाशालिनः परदुःखविनाशलिप्सोः प्रशान्तबाधं निरुपद्रवं यथा स्यात्तथा, अभिरक्षया सर्वतस्त्राणेन, उदयम् उत्कर्षं दिशतः सम्पादयतः, वसूपमानस्य कुबेरतुल्यस्य, अस्य दुर्योधनस्य गुणैर्दयादाक्षिण्यादिभिः, उपस्नुता द्राविता मेदिनी पृथ्वी वसूनि धनानि स्वयं प्रदुग्धे। केन चिच्चतुरेण नवप्रसूता रक्षिता च गौ यथाऽक्लेशेन दुह्यते तथा दुर्योधनेन रक्षिता भूरप्यश्रमेण वसु दुह्यत इति भाव.। अत्र समासोक्तिरतिशयोक्तिर्वाऽलङ्कारः ॥ १८ ॥

वीरभटानुकूल्यमाह—

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्त्तयः।
नसंहतास्तस्य नभिन्नवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम्॥१९॥

अ०—महौजसः, मानधनाः, धनार्चिताः, संयति, लब्धकीर्त्तयः, नसंहताः, नभिन्नवृत्तयः, धनुर्भृतः, तस्य, असुभिः, प्रियाणि, समीहितुम्, वाञ्छन्ति ॥ १९ ॥

(म०) महौजस इति। महौजसो महाबलाः। अन्यथा दुर्बलानामनुपकारित्वादिति भावः। मानः कुलशीलाद्यभिमान एव धनं येषां ते मानधना., अन्यथा कदा चिद् बलादपोह्निकुर्वीरन्निति भावः। धनार्चिता धनैरर्चिताः सत्कृता., अन्यथा दारिद्र्यादेनं जह्युरिति भावः। संयति सङ्ग्रामे लब्धकीर्त्तय.। बहुयशस इत्यर्थ·। अन्यथा कश्च चिन्मुह्येयुरिति भावः। संहता मिथ·सङ्गताः स्वार्थनिष्ठा न भवन्तीति नसंहता·। नञर्थस्य नशब्दस्य 'सुप्सुपे'ति समासः। भिन्नवृत्तयो मिथो विरोधात्स्वामिकार्यकरा न भवन्तीति नभिन्नवृत्तयः। पूर्ववत्समासः। अन्यथा स्वामिकार्यविघातकतया स्वामिद्रोहिणः स्युरित्युभयत्रापि तात्पर्यार्थः। धनुर्भृतो धानुष्का.। आयुधीयमात्रोपलक्षणमेतत्। प्राधान्याद्धनुर्ग्रहणम्। तस्य दुर्योधनस्यासुभिः प्राणैः प्रियाणि समीहितुं कर्तुं वाञ्छन्ति। आनृण्यार्थं प्राणान्दातुमिच्छन्ति। अन्यथा दोषस्मरणादिति भावः। अत्र महौजसादिपदार्थानां प्राणदानकर्तव्यतां प्रति विशेषणगत्या हेतुत्वाभिधानात्काव्यलिङ्गमलङ्कारः। लक्षणं तूक्तम्। तथा साभिप्रायविशेषणत्वात्परिकरालङ्कार इति द्वयोस्तिलतण्डुलवद् विभक्ततया स्फुरणात्संसृष्टिः ॥ १९ ॥

(भा०) महौजस इति। महौजसोऽतिबलिनः, मानधनाः कुलशीलाद्यभिमानसर्वस्वाः, धनार्चिता धनसत्कृताः संयति सङ्ग्रामे लब्धकीर्त्तयः प्राप्तयशसः, नसंहता अस्वार्थिनः (परोपकारिणः) नभिन्नवृत्तय एकव्यापाराः, धनुर्भृतो राजानः, तस्य दुर्योधनस्य, असुभिः प्राणैः प्रियाणीष्टानि समीहितुं कर्त्तुं, वाञ्छन्त्यभिलष्यन्ति, अनेकवीरसहायभूतस्य दुर्योधनस्य नाभिभवसम्भावनेतिभावः। काव्यलिङ्गपरिकरालङ्कारसंसृष्टिः ॥ १९ ॥

सम्प्रति स्वराष्ट्रवत्परराष्ट्रवृत्तान्तमपि वेत्तीत्याह—

महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निश्शेषमशेषितक्रियः ।
महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः ॥२०॥

अन्वयः—अशेषितक्रियः, सः, सच्चरितैः, चरैः, महीभृताम्, क्रियाः, निःशेषम्, वेद। तस्य, धातुः, इव, ईहितं, महोदयैः, हितानुबन्धिभिः, फलैः, प्रतीयते ॥२०॥

(म०) महीभृतामिति ॥ अशेषितक्रियः समापितकृत्यः । आफलोदयकर्मेत्यर्थः । स दुर्योधनः सच्चरितैः शुद्धचरितैः । अवञ्चकैरित्यर्थः । चरन्तीति चरास्तैश्चरैः । प्रणिधिभिः । पचाद्यच् । महीभृतां क्रियाः प्रारम्भान्निःशेषं वेद वेत्ति । 'विदो लटो वा' इति णलादेशः । स्वरहस्यं तु न कश्चिद्वेदेत्याह—महोदयैरिति । धातुरिव तस्य दुर्योधनस्येहितमुद्योगो महोदयैर्महावृद्धिभिः । हितमनुबध्नन्त्यनुरुन्धन्तीति हितानुबन्धिभिः । स्वन्तैरित्यर्थः । फलैः कार्यसिद्धिभिः प्रतीयते ज्ञायते । फलानुमेयास्तस्य प्रारम्भा इत्यर्थः ॥ २० ॥

(भा०) महीभृतामिति । अशेषितक्रियोऽनवशिष्टकार्यः स दुर्योधनः सच्चरितः साधुकार्यकारिभिः, चरैर्महीभृतां राज्ञां निश्शेषं समग्रं यथा तथा क्रियाः कार्याणि वेद वेत्ति (जानाति) तस्य दुर्योधनस्य धातुरिव तिङ्कृत्प्रत्ययप्रकृतिरिव, ईहितं चेष्टितम् (उद्योगः) महोदयैः प्रभूतवृद्धिभिः, हितानुबन्धिभिः प्रियानुरोधिभिः, फलैः कार्यनिष्पत्तिभिः प्रतीयते तर्क्यते (अनुमीयते–ज्ञायते)। उत्कृष्टकार्यसाधकचरद्वारा सकलमहीपतिसर्वव्यापारं जानतो दुर्योधनस्योद्योगस्तत्सिद्ध्युत्तरमेव ज्ञायते लोकैर्न तु ततः प्रागित्यर्थः । पूर्वार्द्धे महीभृत्क्रियाज्ञाने सच्चरितचरपदार्थो हेतुरिति काव्यलिङ्गम् । उत्तरार्द्धे काव्यलिङ्गानुप्राणितोपमा चेति ॥ २० ॥

मित्रबलमाह—

न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननम् ।
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ॥२१॥

अन्वयः—तेन, क्व चित्, सज्यं, धनुः, न, उद्यतम्, वा, आननम्, कोपविजिह्मम्, न, कृतम्, गुणानुरागेण, अस्य, शासनम्, नराधिपैः, माल्यमिव, शिरोभिः, उह्यते ॥२१॥

(म०) नेति । तेन राज्ञा क्व चित्कुत्रापि । सह ज्यया मौर्व्या सज्यम् । 'मौर्वी ज्या शिञ्जिनी गुणः' इत्यमरः । 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः । धनुर्नोद्यतं नोर्ध्वीकृतम् । आननं च कोपविजिह्मं कोपकुटिलं न कृतम् । यस्य कोप एव नोदेति कुतस्तस्य युद्धप्रसक्तिरिति भावः । कथं तर्ह्याज्ञां कारयति राज्ञ इत्यत्राह—गुणेति । गुणेषु दयादाक्षिण्यादिष्वनुरागेण प्रेम्णा । माल्यपक्षे सूत्रानुषङ्गेण । यद्वा सौरभ्यगुणलोभेन । नराधिपैरस्य शासनमाज्ञा । मालैव माल्यं तदिव । 'चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्

इति क्षीरस्वामी। शिरोभिरुह्यते। धार्यते। 'वचिस्वपियजादीनां किति' इति यकि सम्प्रसारणम्। अत्रोपमा स्फुटैव ॥ २१ ॥

(भा०) न तेनेति। तेन दुर्योधनेन क्व चित् सज्यं समौर्वीकं धनुः शरासनं नोद्यतं नोत्थापितम्, वाऽथवा, आननं मुखं कोपविजिह्मं क्रोधकुटिलं न कृतं न विहितम्। गुणानुरागेण दयादाक्षिण्यादिगुणस्नेहेन, अस्य दुर्योधनस्य शासनम् आदेशः, नराधिपैर्नृपतिभिर्माल्यमिव स्रगिव शिरोभिरुत्तमाङ्गैः, उह्यते धार्यते। यद्यप्यसौ दुर्योधनो धनुर्न गृह्णाति नापि क्रुध्यति तथा-पि तदनुमतिं माल्यमिव नृपाः शिरसा वहन्तीत्यर्थः। अस्य क्रोधो नास्ति कुतस्तस्य संग्रामावसरः शासनभङ्गश्चेति भावः। पूर्वार्द्धे धनुराननयोर्विशेषणद्वयस्य साभिप्रायत्वात्परिकरालङ्कारः। उत्तरार्द्धेऽन्यनृपकर्तृकदुर्योधनशासनप्रापणे गुणानुरागपदार्थस्य हेतुत्वात्काव्यलिङ्गानुप्राणितोपमा च ॥ २१ ॥

संप्रत्यस्य धार्मिकत्वमाह—

स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः।
मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम् ॥२२॥

अन्वयः—इद्धशासनः, सः, नवयौवनोद्धतम्, दुःशासनम्, यौवराज्ये, निधाय, मखेषु, पुरोधसा, अनुमतः, अखिन्नः, (सन्) हव्येन, हिरण्तरेतसम्, धिनोति ॥२२॥

(म०) स इति ॥ इद्धशासनोऽप्रतिहताज्ञः स दुर्योधनो नवयौवनोद्धतं प्रगल्भम्। धुरन्धरमित्यर्थः। दुःखेन शास्यत इति दुःशासनस्तम्। 'भाषायां शासियुधि'— इत्यादिना खलर्थे युच्प्रत्ययः। यौवराज्यं युवराजकर्मणि। ब्राह्मणादित्वात्ष्यञ्। निधाय। नियुज्येत्यर्थः। पुरोधसा पुरोहितेनानुमतोऽनुज्ञातः। तस्मिन्याजके सतीत्यर्थः। तदुल्लङ्घने दोषस्मरणादिति भावः। 'निष्ठा' इति भूतार्थे क्तः। न तु 'मतिबुद्धि' इत्यादिना वर्त्तमानार्थे। अन्यथा 'पुरोधसा' इत्यत्र 'क्तस्य च वर्त्तमाने' इति षष्ठी स्यात्। अखिन्नोऽनलसो मखेषु क्रतुषु हव्येन हविषा। हिरण्यं रेतो यस्य तं हिरण्यरेतसमनलं धिनोति प्रीणयति। धिन्वेः प्रीणनार्थाद् 'धिन्विकृण्व्योर च' इत्युप्रत्ययः। अकारश्चान्तादेशः ॥ २२ ॥

(भा०) स यौवराज्य इति। इद्धशासनः स्वीकृतादेशः स दुर्योधनः, नवयौवनोद्धतं नूतनतारुण्यधृष्टं दुःशासनं स्वकनीयसं यौवराज्ये युवराजकर्मणि निधाय संस्थाप्य पुरोधसा पुरोहितेन, अनुमत आज्ञप्तः, अखिन्नोऽनलसः सन् मखेषु क्रतुषु हव्येन हविषा हिरण्यरेतसम् अग्निं धिनोति प्रीणयति। कनिष्ठसोदरं दुःशासनं युवराजं सम्पाद्य पुरोहितादेशमादाय दुर्योधनो यज्ञेष्वनलसः सन् वह्निं जुहोतीत्यर्थः। नहि धर्मात्मनां कुतश्चिदपिष्टप्रसङ्ग इति भावः। वह्निप्रीणने पुरोधसाऽनुमत इत्यस्य विशेषणमात्या हेतुत्वात्काव्यलिङ्गम् ॥ २२ ॥

स चैतावता निरुद्योगैर्भाव्यमित्याशङ्कयाशां दर्शयति—

प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः ।
स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥२३॥

अन्वयः—सः, प्रलीनभूपालं, स्थिरायति, भुवः, मण्डलम्, आवारिधि, प्रशासद्, अपि, त्वदेष्यतीः, भियः, चिन्तयति, एव। अहो, बलवद्विरोधिता, दुरन्ता (भवति)॥२३॥

(म०) प्रलीनेति ॥ स दुर्योधनः प्रलीनभूपालम्। निःसपत्नमित्यर्थः। स्थिरायति। चिरस्थायीत्यर्थः। भुवो मण्डलमा वारिधिभ्य आवारिधि। 'आङ्मर्यादाऽभिविध्योः' इत्यव्ययीभावः। प्रशासदाज्ञापयन्नपि। 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञा। 'नाभ्यस्ताच्छतुः' इति नुमागमप्रतिषेधः। त्वत्त्वत्त एष्यतीरागमिष्यतीः। धातूनामनेकार्थत्वादुक्तार्थसिद्धिः। अथवाऽऽङ्पूर्वः पाठः। 'एत्येधत्यूठ्सु' इति वृद्धिः। 'लृटः सद्वा' इति शतृप्रत्ययः। 'उगितश्च' इति ङीप्। 'आच्छीनद्योर्नुम्' इति विकल्पान्नुमभावः। भियो भयहेतून्। विपद इत्यर्थः। चिन्तयत्यालोचयत्येव। स एवाह—अहो बलवद्विरोधिता दुरन्ता दुष्टावसाना। सार्वभौमस्यापि प्रबलैः सह वैरायमाणत्वमनर्थपर्यवसाय्येवेति तात्पर्यम्। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ २३ ॥

(भा०) प्रलीनभूपालमिति। स दुर्योधनः प्रलीनभूपालं विनष्टनृपं स्थिरायति सुस्थिरं भुवो मण्डलं पृथिव्याः खण्डम् आवारिधि समुद्रपर्यन्तं प्रशासद् आज्ञापयन्नपि त्वदेष्यतीः त्वत्त आगमिष्यतीः (आगामिनीः) भियः साध्वसानि (विपदः) चिन्तयत्येव, अहो आश्चर्यं बलवद्विरोधिता पराक्रमिशत्रुता दुरन्ता दुष्टपरिणामा भवतीति शेषः। निरशत्रुजलधिपर्यन्तभूखण्डपालकस्यापि दुर्योधनस्य त्वत्तो भयं भवत्येव यतः प्रबलशत्रुभिर्विरोधोऽनिष्टमुत्पादयतीत्यर्थः। चतुर्थपादप्रतिपाद्यसामान्यार्थेन पादत्रयप्रतिपाद्यविशेषार्थस्य समर्थनात्सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥२३॥

ननु गूढाकारेङ्गितस्य तस्य भयं त्वया कथं ? निरधारीत्यत्राह—

कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः ।
तवाभिधानाद् व्यथते नताननः स दुःसहान्मन्त्रपदादिवोरगः ॥२४॥

अन्वयः—कथाप्रसङ्गेन, जनैः, उदाहृतात्, तव, अभिधानाद्, अनुस्मृताखण्डलसूनुविक्रमः, सः, (दुर्योधनः) सुदुःसहाद्, मन्त्रपदाद्, उरगः, इव, नताननः (सन्) व्यथते ॥२४॥

(म०) कथेति ॥ कथाप्रसङ्गेन गोष्ठीवचनेन जनैः। अन्यत्र कथाप्रसङ्गेन उदाजहार ॥२४॥
'कथाप्रसङ्गो वार्तायां विषवैद्येऽपि वाच्यवत्' इति विश्वः। 'सिद्धिं बुद्धिरूपां निशम्य' विशेषणम्। उदाहृतादुच्चारितात्तवाभिधानान्नामधेयात्। 'अव्ययात्त्यप्' इति त्यप्। पञ्चमी। 'आख्याह्वे अभिधानं च नामधेयं च नाम च' युधिष्ठिरस्य मन्युमनवाप्य नात्। 'नामैकदेशग्रहणे नाममात्रग्रहणम्' इति न्याजहार। अमारेत्यर्थः ॥ २४ ॥

नाम्नोरभिधानं यस्मिन्पदे तस्मात्। यद्वा कथाप्रसङ्ग इनाश्च ते जनाश्चेत्येकं पदम्। अनुस्मृताखण्डलसूनुविक्रमः स्मृतार्जुनपराक्रमः सुदुःसहादतिदुःसहान्मन्त्रपदान्मन्त्रशब्दात्स्मारकाद्धेतोः। आखण्डलसूनुरिन्द्रानुज। उपेन्द्रो विष्णुरिति यावत्। 'सूनुः पुत्रेऽनुजे रवौ' इति विश्वः। तस्य विः पक्षी। गरुड इत्यर्थः। तस्य क्रमः पादविक्षेपः। सोऽनुस्मृतो येन स तथोक्तः स्मृतगरुडमहिमा। उरग इव नताननः सन्। व्यथते दुःखायते। 'पीडा बाधा व्यथा दुःखम्' इत्यमरः। अत्युत्कटभयदोषादिविकारा दुर्वारा इति भावः। 'सर्वतो जयमन्विच्छेत्पुत्रादिच्छेत्पराजयम्' इति न्यायादर्जुनोत्कर्षकथनं युधिष्ठिरस्य भूषणमेवेति सर्वमवदातम्॥ -४॥

(भा०) कथाप्रसङ्गेनेति। कथाप्रसङ्गेन गोष्ठीवचनेन (परस्परालापप्रसङ्गेन) जनैर्लोकैः (तत्रत्यैः) उदाहृतादुच्चारितात् (कथितात्) तव भवतः, अभिधानाद् नाम्नो-हेतोः, अनुस्मृताखण्डलसूनुविक्रमोऽनुचिन्तितार्जुनपराक्रमः सन् स दुर्योधनः कथाप्रसङ्गेन, आलापप्रसक्त्या जनैर्विषवैद्यैः, उदाहृतादुक्तात् (उच्चारितात्) तवाभिधानात् तार्क्ष्यवासुकिनाम्नः सुदुःसहात् सहनायोग्याद् मन्त्रपदाद् मन्त्रशब्दात्। स्मारकाद्धेतोः, अनुस्मृताखण्डलसूनुविक्रमः स्मृतगरुडपादविक्षेपः सन्। उरगो भोगीव नताननो नम्रमुखः सन् व्यथते क्लिश्यति। विषवैद्योच्चारिततार्क्ष्यवासुकिनामाङ्कितमन्त्रमाकर्ण्य तत्पादविक्षेपं संस्मरन्नुरगो यथा क्लिश्यति तथा लोकोक्तत्वन्नामाकर्ण्यार्जुनपराक्रमं स्मरन् दुर्योधनः क्लिश्यतीत्यर्थः। अत्युत्कटदोषविकाराणां प्रतीकारो नैवास्तीति भावः। अत्रोपमाऽलङ्कारः॥ २४॥

निगमयति—

तदाशु कर्त्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम्।
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः॥२५॥

अन्वयः—तत्, त्वयि, जिह्मं, कर्त्तुम्, उद्यते, तत्र, विधेयम्, उत्तरम्, आशु, विधीयताम्। परप्रणीतानि, वचांसि, चिन्वतां, मादृशां, गिरः, प्रवृत्तिसाराः, खलु॥२५॥

तस (म०) तदिति॥ तत्तस्मात्त्वयि जिह्मं कपटं कर्त्तुमुद्यते। त्वां जिघांसावित्यर्थः। तत्र अकारश्च दुर्योधने विधेयं कर्त्तव्यमुत्तरं प्रतिक्रियाऽऽशु विधीयतां क्रियताम्। ननु कर्त्तव्य-

(भा०) ह्यतामिति चेत्तत्राह—परेति। परप्रणीतानि परोक्तानि वचांसि चिन्वतां-

नूतनतारुण्यघट्ट गाम्। वार्त्ताहारिणामित्यर्थः। गिरः प्रवृत्तिसारा वार्त्तामात्रसाराः

पुरोधसा पुरोहितेन, वृत्तान्तः' इत्यमरः। वार्त्तामात्रवादिनो वयं न तु कर्त्तव्यार्थोपदे-

हिरण्यरेतसम् अग्नि धिन। निर्धार्य कार्यमिति भावः। सामान्येन विशेषसमर्थनादर्था-

हितादेशमादाय दुर्योधनो व स्मात् कारणात् त्वयि भवति जिह्मं कपटं कर्त्तुं विधा-

कुतश्चिदनिष्टप्रसङ्ग इति भावः। योधने विधेयं कर्त्तव्यम् उत्तरम् प्रतीकारः, आशु शीघ्रं-

हेतुत्वात्काव्यलिङ्गम्॥ २२॥

विधीयताम्। क्रियताम्। परप्रणीतान्यन्योक्तानि वचांसि वाक्यानि चिन्वतां कुर्वतां-मादृशाम् अस्मद्विधानां गिरो वाचः प्रवृत्तिसारा वार्त्तामात्रसारा भवन्ति खलु। मादृशा अल्पबुद्धयो वार्त्तामात्राभिज्ञा भवन्ति न तु तदतिरिक्तकार्याभिज्ञाः, अतो भवतैव विचार्यं कर्तव्यमिति भावः। तुर्यपादगतसामान्यार्थेन पादत्रयगतविशेषार्थस्य समर्थनात्सामान्येन विशेषसमर्थनात्मकोऽर्थान्तरन्यासोऽलङ्कारः ॥ २५ ॥

इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसंनिवासिनाम्।
प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेऽनुजसंनिधौ वचः ॥२६॥

अन्वयः–आत्तसत्क्रिये, वनसंनिवासिनां, पत्यौ, इति, गिरम्, ईरयित्वा, गते, (सति) अथ, महीभुजा, सदनं, प्रविश्य, अनुजसन्निधौ, तद्, वचः, कृष्णा, आचचक्षे ॥२६॥

(म०) इतीति ॥ वनसंनिवासिनां पत्यौ वनेचराधिप इति गिरमीरयित्वोक्त्वाऽऽत्तसत्क्रिये गृहीतपारितोषिके गते सति। 'तुष्टिदानमेव चाराणां हि वेतनम्। ते हि तल्लोभात्स्वामिकार्येष्वतीव त्वरयन्ते' इति नीतिवाक्यामृते। अथ महीभुजा राज्ञा कृष्णासदनं द्रौपदीभवनं प्रविश्यानुजसंनिधौ तद्वनेचरोक्तं वचो वाक्यमाचचक्ष आख्यातम्। अथवा। कृष्णेति पदच्छेदः। सदनं प्रविश्यानुजसन्निधौ तद्वचः कृष्णाऽऽचचक्ष-आख्याता) चक्षिङो दुहादेर्द्विकर्मकत्वादप्रधाने कर्मणि लिट् ॥ २६ ॥

(भा०) इतीरयित्वेति। आत्तसत्क्रिये प्राप्तपारितोषिकात्मसत्कारे वनसन्निवासिनां वनौकसां पत्यौ स्वामिनि (वनेचरे) इत्युक्तप्रकारां गिरं वाचम् ईरयित्वोक्त्वा गते स्वगृहं प्राप्ते सति। अथानन्तरं महीभुजा राज्ञा (युधिष्ठिरेण) कृष्णासदनं द्रौपदीभवनं प्रविश्यान्तरागत्य, अनुजसन्निधाववरजान्तिके तद् वनेचरोक्तं वचोवचनम् आचचक्षे जगदे. अथवा–महीभुजा राज्ञा सदनं भवनं प्रविश्य, अनुजसन्निधौ तद् वच. कृष्णा, आचचक्ष आख्याता। शत्रुचरितान्यभिधाय तद्धेतुकपारितोषिकमाधाय गते वनेचरे युधिष्ठिरो द्रौपदीगृहं प्रविश्य भीमसन्निधौ वनेचरवचनमनूदितवानित्यर्थः। उत्तरार्द्धगतवाक्यार्थे पूर्वार्द्धगतपदार्थस्य हेतुत्वात्पदार्थहेतुकं काव्यलिङ्गम् ॥२६॥

निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियन्तुमक्षमा।
नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः ॥२७॥

अन्वयः—(अथ) द्रुपदात्मजा, द्विषतां, सिद्धिं, निशम्य, ततः, ततस्त्याः, अपाकृतीः, विनियन्तुम्, अक्षमा (सती), नृपस्य, मन्युव्यवसायदीपिनीः, गिरः, उदाजहार ॥२७॥

(म०) निशम्येति ॥ अथ द्रुपदात्मजा द्रौपदी द्विषतां सिद्धिं वृद्धिरूपां निशम्य ततस्तदनन्तरम्। ततो द्विषद्भ्य आगतास्ततस्त्याः। 'अव्ययात्त्यप्' इति त्यप्। अपाकृतीर्विकारान्विनियन्तुं निरोद्धुमक्षमा सती नृपस्य युधिष्ठिरस्य मन्युव्यवसाययोः कोपोद्योगयोर्दीपिनीः सन्धुक्षिणीर्गिरो वाक्यान्युदाजहार। जगादेत्यर्थः ॥ २७ ॥

(भा०) निशम्येति । अथानन्तरं द्रुपदात्मजा द्रुपदपुत्री (द्रौपदी) द्विषतां शत्रूणां श्रियम् उत्कर्षं निशम्य श्रुत्वा ततस्तदनन्तरं ततस्त्याः शत्रुभ्य आगता अपाकृतीरपकारान् विनियन्तुम् अपनेतुम् अक्षमाऽसमर्था सती नृपस्य राज्ञो मन्युव्यवसायदीपिनीः क्रोधोद्योगोत्तेजनकरीः, गिरो वाच उदाजहार उवाच । शत्रूत्कर्षमाकर्ण्य तत्कृतापकृतिनिराकरणासमर्थाऽपि द्रौपदी शत्रूच्छेदफलकनृपोत्साहवर्द्धकवचांसि जगादेत्यर्थः । द्रौपदीकर्तृकनृपमन्युव्यवसायोद्दीपकवचनाभिधाने शत्रुत्कर्षाकर्णनोत्तरतत्प्रतीकाराक्षमत्वस्य विशेषणविधया हेतुत्वमिति पदार्थहेतुकं काव्यलिङ्गम् ॥ २७ ॥

भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम् ।
तथाऽपि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः ॥२८॥

अन्वयः—(यद्यपि) भवादृशेषु, प्रमदाजनोदितम् , अनुशासनम् , अधिक्षेपः, इव, भवति । तथाऽपि, निरस्तनारीसमयाः, दुराधयः, मां, वक्तुं, व्यवसाययन्ति ॥ २८ ॥

(म०) भवादृशेष्विति ॥ भवादृशो भवद्विधाः । पण्डिता इत्यर्थः । तेषु विषये । 'त्यदादिषु—' इत्यादिना कञ् । 'आ सर्वनाम्नः' इत्याकारादेशः । प्रमदाजनोदितं स्त्रीजनोक्तं । वदेः क्तः । 'वचिस्वपि—इत्यादिना सम्प्रसारणम् । अनुशासनं नियोगवचनमधिक्षेपस्तिरस्कार इव भवति । अतो न युक्तं वक्तुमित्यर्थः । तथाऽपि वक्तुमनुचितत्वेऽपि निरस्तनारीसमयास्त्याजितशालीनतारूपस्त्रीसमाचाराः । 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः । दुराधयः समयोल्लङ्घनहेतुत्वाद् दुष्टा मनोव्यथाः । 'पुंस्याधिर्मानसी व्यथा' इत्यमरः । मां वक्तुं व्यवसाययन्ति प्रेरयन्ति । न किञ्चिदयुक्तं दुःखिनामिति भावः ॥ २८ ॥

(भा०) भवादृशेष्विति । भवादृशेषु त्वद्विधेषु प्रमदाजनोदितं स्त्रीजनोदीरितम् अनुशासनम् आदेशः, अधिक्षेपस्तिरस्कार इव भवति तथाऽपि विज्ञेष्वादेशस्याधिक्षेपतुल्यत्वेऽपि निरस्तनारीसमयास्त्यक्तयोषिदाचारा दुराधयो दुष्टमनोव्यथा मां वक्तुं तादृशवचनमभिधातुं व्यवसाययन्ति प्रेरयन्ति । शत्रुकृतानादरोद्भूतमनोव्यथाप्रेरणया विज्ञेष्वनादरवचो ब्रवीमि न तु साक्षादित्यर्थः । नहि दुःखिनामुक्तौ युक्तायुक्तविवेको भवतीति भावः । पूर्वार्द्धे उपमा । उत्तरार्द्धेऽनुशासनवचनोक्तौ दुराधयो व्यवसाययन्तीतिवाक्यार्थस्य हेतुगत्योक्त्या वाक्यार्थ हेतुकं काव्यलिङ्गञ्चेत्यनयोः संसृष्टिः ॥ २८ ॥

अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः ।
त्वयाऽऽत्महस्तेन मही मदच्युता मतङ्गजेन स्रगिवापवर्जिता ॥२९॥

अन्वयः—आखण्डलतुल्यधामभिः, स्ववंशजैः, भूपतिभिः, चिरम् , अखण्डं, धृता, मही, त्वया, मदच्युता, मतङ्गजेन, स्रग् , इव, आत्महस्तेन, अपवर्जिता ॥ २९ ॥

(म०) अखण्डमिति ॥ आखण्डलतुल्यधामभिरिन्द्रतुल्यप्रभावैः । स्ववंशजैर्भूपति-

भिर्भरतादिभिश्चिरमखण्डमविच्छिन्नं धृता मही त्वया। मदं च्योततीति मदच्युत्। क्विप्। तेन मदस्राविणा मतङ्गजेन स्रगिवात्महस्तेन स्वकरेण स्वचापलेनेत्यर्थः। अपवर्जिता परिहृता त्यक्ता। स्वदोषादेवायमनर्थागम इत्यर्थः॥ २९॥

*(भा०) अखण्डमिति। आखण्डलतुल्यधामभिरिन्द्रसदृशतेजोभिः स्ववंशजैः स्व-*कुलोत्पन्नैर्भूपतिभी राजभिश्चिरं चिरकालम् अखण्डं समग्रं यथा तथा धृता पालिता (रक्षिता) मही पृथ्वी त्वया भवता मदच्युता मदस्राविणा मतङ्गजेन हस्तिना स्रगिव, मालेव, आत्महस्तेन स्वकरेण, अपवर्जिता विनाशिता। अरिकृतानादरात्मकदुःखप्रासावात्मदोष एव हेतुर्न त्वस्य हेत्वन्तरमस्तीति भावः। उपमाऽलङ्कारः॥ २९॥

'स्वदोषादेवायमनर्थागम' इत्युक्तम्। स च दोषः कुटिलेष्वकौटिल्यमेवेत्याह—

व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः॥३०॥

अन्वयः—मूढधियः, ते, पराभवं, व्रजन्ति। ये, मायाविषु, मायिनः, न, भवन्ति, हि, शठाः, तथाविधान्, असंवृताङ्गान्, निशिताः, इषवः, इव, प्रविश्य, घ्नन्ति॥ ३०॥

(म०) व्रजन्तीति। मूढधियो निर्विवेकबुद्धयस्ते पराभवं व्रजन्ति ये मायाविषु मायावत्सु विषये। 'अस्मायामेधा—' इत्यादिना विनिप्रत्ययः। मायिनो मायावन्तः। व्रीह्यादित्वादिनिप्रत्ययः। न भवन्ति। अत्रैवार्थान्तरं न्यस्यति–प्रविश्येति। शठा अपकारिणो धूर्तास्तथाविधानकुटिलानसंवृताङ्गानवर्मितशरीरान्निशिता इषव इव प्रविश्य प्रवेशं कृत्वाऽऽत्मीया भूत्वा घ्नन्ति हि। आर्जवं हि कुटिलेषु न नीतिरिति भावः॥३०॥

(भा०) व्रजन्तीति। मूढधियोऽल्पबुद्धयः, ते जनाः पराभवम् अपमानं व्रजन्ति प्राप्नुवन्ति ये जनाः, मायाविषु कपटिषु मायिनः कपटिनो न भवन्ति। हि यतः कारणाद् शठा धूर्तास्तथाविधान् अकुटिलान् असंवृताङ्गान् अवर्मितशरीरान् (जनान्) निशितास्तीक्ष्णा इषवो बाणा इव प्रविश्य प्रवेशं कृत्वा घ्नन्ति। अवर्मितशरीरान् निशितेषव इवामायिनः शठा नाशयन्तीत्यर्थः। नहि मायिषु सरलतोचितेति भावः। अर्थान्तरन्यासानुप्राणितोपमाऽलङ्कारः॥ ३०॥

न च लक्ष्मीचाञ्चल्यादयमनर्थागमः किन्तु स्वोपेक्षादोषमूलत्वादित्याशयेनाह—

गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः।
परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम्॥३१॥

अन्वयः—अनुरक्तसाधनः, कुलाभिमानी, त्वदन्यः, कः, इव, नराधिपः, गुणानुरक्तां, कुलजां, मनोरमाम्, आत्मवधूम्, इव, श्रियम्, परैः, अपहारयेत्॥ ३१॥

(म०) गुणेति॥ अनुरक्तसाधनोऽनुकूलसहायवान्। उक्तं च कामन्दकीये—'उद्योगादनिवृत्तस्य ससहायस्य धीमतः। छायेवानुगता तस्य नित्यं श्रीः सहचारिणी॥'

इति । कुलाभिमानी क्षत्रियत्वाभिमानी कुलीनत्वाभिमानी च त्वदन्यस्त्वत्तोऽन्यः । 'अन्यारात्'—इत्यादिना पञ्चमी । क इव नराधिपो गुणैः सन्ध्यादिभिः सौन्दर्यादिभिश्चानुरागिणीं कुलजां कुलक्रमादागतां कुलीनां च मनोरमां श्रियमात्मवधूमिव स्वभार्यामिव 'वधूर्जाया स्नुषा स्त्री च' इत्यमरः । परैः शत्रुभिरन्यैश्चापहारयेत् । स्वयमेवापहारं कारयेदित्यर्थः । कलत्रापहारवल्लक्ष्म्यपहारोऽपि राज्ञा मानहानिकरत्वादनुपेक्षणीय इति भावः ॥ ३१ ॥

(भा०) गुणानुरक्तामिति । अनुरक्तसाधनोऽनुकूलसहायवान् (स्निग्धानुचरः) कुलाभिमानी क्षत्रियत्वाभिमानी कुलीनत्वाभिमानी च त्वदन्यस्त्वत्तोऽपरः क इव नराधिपो नृपो गुणानुरक्तां सन्ध्यादिसौन्दर्यादिगुणानुरागिणीं कुलजां वंशक्रमप्राप्तां सत्कुलोद्भवाञ्च मनोरमां हृदयाऽऽह्लादिनीम् आत्मवधूमिव निजस्त्रियमिव श्रियं लक्ष्मीं परैरितरैः शत्रुभिश्चापहारयेद् विनाशयेद् नहि भवदन्यः कश्चिद्योषितमिव श्रियमपहारयति, किन्तु भवानेवेति श्रियश्चाञ्चल्ये भवदुपेक्षैव हेतुर्नान्य इत्यर्थः । राज्ञां नारीहरणमिव लक्ष्मीहरणमपि निन्दोत्पादकमिति भावः । एकस्योपमेयस्यैकाधिकोपमानसद्भावो मालोपमाऽलङ्कारविषय इति मालोपमाऽलङ्कारः ॥ ३१ ॥

अथ दशभिः कोपोद्दीपनं करोति—

भवन्तमेतर्हि मनस्विगर्हिते विवर्त्तमानं नरदेव ! वर्त्मनि ।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥ ३२ ॥

अन्वयः—नरदेव ! एतर्हि, मनस्विगर्हिते, वर्त्मनि, विवर्त्तमानं, भवन्तम्, उदीरितः, मन्युः, शुष्कं, शमीतरुम्, उच्छिखः, अग्निः, इव, कथं, न, ज्वलयति ॥ ३२ ॥

(म०) भवन्तमिति ॥ नरदेव ! हे ! नरेन्द्र ! एतर्हीदानीम् । अस्मिन्नापत्कालेऽपीत्यर्थः । 'एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा' इत्यमरः । 'इदमोर्हिल्' इति र्हिल्प्रत्ययः । 'एतेतौ रथोः' इत्येतादेशः । आपदमेवाह—मनस्विगर्हिते शूरजनजुगुप्सिते वर्त्मनि मार्गे विवर्त्तमानम् । शत्रुकृतां दुर्दशामनुभवन्तमित्यर्थः । भवन्तं त्वामुदीरित उद्दीपितो मन्युः क्रोधः । शुष्कं नीरसम् । 'शुषः कः' इति निष्ठातकारस्य ककारः । शमी चासौ तरुश्चेति विशेषणसमासः । तम् । शमीग्रहणं शीघ्रज्वलनस्वभावात्कृतम् । उच्छिख उद्गतज्वालः । 'घृणिज्वाले अपि शिखे' इत्यमरः । वह्निरिव । कथं न ज्वलयति । ज्वलयितुमुचितमित्यर्थः । 'मितां ह्रस्वः ॥ ३२ ॥

(भा०) भवन्तमिति । नरदेव ! हे राजन् ! एतर्ह्येतस्मिन् विपत्क्षणे प्राप्तेऽपि मनस्विगर्हिते वीरपुरुषानाश्रिते वर्त्मनि मार्गे विवर्त्तमानं विद्यमानं भवन्तं त्वाम् उदीरितः परिवर्द्धितो मन्युः कोपः शुष्कं नीरसं शमीवृक्षम् उच्छिखोऽग्निरिव, उद्गतज्वालो वह्निरिव कथं न ज्वलयति कुतो न दीपयति । वह्निना शमीवृक्षस्येव कापुरुषाश्रितवर्त्मविहारिणो भवतो मन्युना ज्वलनमेवोचितमित्यर्थः । अत्रोपमाऽलङ्कारः ॥ ३२ ॥

...न्वन्तः शत्रुत्वार्थं क्रोधस्त्याज्य एवेत्याशङ्क्याह—

अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः॥३३॥

अन्वयः–अवन्ध्यकोपस्य, आपदां, विहन्तुः, देहिनः, स्वयम्, एव, वश्याः, भवन्ति, अमर्षशून्येन, जन्तुना, जातहार्देन (सता), जनस्य, आदरः, न (भवति), वा, विद्विषा (सता), दरः, न (भवति)॥ ३३॥

(म०) अवन्ध्येति॥ अवन्ध्यः कोपो यस्य तस्यावन्ध्यकोपस्यात एवापदां विहन्तु-र्निग्रहानुग्रहसमर्थस्येत्यर्थः। पुंस इति शेषः। देहिनो जन्तवः स्वयमेव वश्या वशंगता भवन्ति। 'वशं गतः' इति यत्प्रत्ययः। अतस्त्वया कोपिना भवितव्यमित्यर्थः। व्यतिरेके त्वनिष्टमाचष्टे—अमर्षशून्येन निष्कोपेन जन्तुना। कन्यया शोक इतिवत्। ...तौ' इति तृतीया। हृदयस्य कर्म हार्दं स्नेहः। 'प्रेमा ना प्रियता हार्दं प्रेम स्नेहः' ...त्यमरः। युवादित्वादण्। 'हृदयस्य हृल्लेखयदण्लासेषु' इति हृदादेशः। जातहार्देन ...तस्नेहेन सता जनस्यादरो न। विद्विषा द्विषता च सतादरो न। अमर्षहीनस्य राग...भावकिञ्चित्करत्वादगण्यात्वित्यर्थः। अथवा विद्विषा सता दरो भयं न। 'दरोऽस्त्रियां ... श्वभ्रे' इत्यमरः। एतस्मिन्नेव प्रयोगे संधिवशाद् द्विधा पदच्छेदः। पुंवाक्येषु न ...ः। अतः स्थाने कोपः कार्यस्त्याज्यस्त्वस्थाने कोप इति भावः॥ ३३॥

(भा०) अवन्ध्यकोपस्येति। अवन्ध्यकोपस्यानिष्फलक्रोधस्य, आपदां विपदां वि-...तुर्विनाशकस्य (निग्रहानुग्रहसमर्थस्य) पुरुषस्येति शेषः। देहिनो जन्तवः स्वयमे-...त्मनैव वश्या वशङ्गता भवन्तीति क्रियाशेषः। अमर्षशून्येन निष्कोपेन जन्तुना प्राणिना जातहार्देन जातस्नेहेन सता जनस्य लोकस्य, आदरः सम्मानो न, अमर्षशून्येन विद्विषा शत्रुणा च दरो भयं न। अमर्षहीनोऽगण्यो भवतीत्यर्थः। स्थानास्थानयोः कोपविधानत्यागौचित्यमिति भावः॥ ३३॥

परिभ्रमँल्लोहितचन्दनोचितः पदातिरन्तर्गिरि रेणुरूषितः।
महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः॥३४॥

अन्वय.—लोहितचन्दनोचितः, महारथः, रेणुरूषितः, पदातिः, (सन्), अन्तर्गिरि, परिभ्रमन्, अयं, वृकोदरः, सत्यधनस्य (तव), मानसं, नो, दुनोति, कच्चित्॥ ३४॥

(म०) परिभ्रमन्निति॥ लोहितचन्दनोचित उचितलोहितचन्दनः। 'वाऽऽहिताग्न्यादिषु' इति साधुः। अभ्यस्तरक्तचन्दन इत्यर्थः। 'अभ्यस्तेत्युचितं न्याय्यम्' इति यादवः। महारथो रथचारी। उभयत्रापि प्रागिति शेषः। अद्य तु रेणुरूषितो धूलिधूसरितः ...भ्यामतति गच्छतीति पदातिः पादचारी 'अज्यतिभ्यां च' इत्यनुवृत्तौ 'पादे च' ...क इण्प्रत्ययः। 'पादस्य पदाज्यातिगोपहतेषु' इति पदादेशः। अन्त-

गिरि गिरिष्वन्तः। विभक्त्यर्थेऽव्ययीभावः। 'गिरेश्च सेनकस्य' इति विकल्पात्समासान्ताभावः। परिभ्रमन्नयं वृकोदरो भीमः। सत्यधनस्येति सोल्लुण्ठनवचनम्। त्वयापि सत्यमेव रक्ष्यते, न तु भ्रातर इति भावः। तवेति शेषः। मानसं नो दुनोति किम् न परितापयति। 'कच्चित्कामप्रवेदने' इत्यमरः। स्वाभिप्रायाविष्करणं कामप्रवेदनम्॥ ३४॥

(भा०) परिभ्रमन्निति। प्राग् लोहितचन्दनोचितोऽभ्यस्तरक्तचन्दनः प्राग् महारथो रथचारी, साम्प्रतं तु रेणुरूषितो धूलिच्छुरितः पादचारी, अन्तर्गिरि गिरिष्वन्तः परिभ्रमन्नयं वृकोदरो भीमः सत्यधनस्य तव मानसं हृदयं नो दुनोति कच्चिद् न परितापयति किम्। एष भीमस्तवानुजः प्राक् सुखी सम्प्रति दुःखी, तथाऽपि भ्रातृदुःखं विहन्तुं नेच्छसीत्याश्चर्यमित्यर्थः। परिकरालङ्कारः॥ ३४॥

विजित्य यः प्राज्यमयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः।
स वल्कवासांसि तवाधुनाऽऽहरन् करोति मन्युं न कथं धनञ्जयः॥३५॥

अन्वयः—वासवोपमः, यः (अर्जुनः), उत्तरान्, कुरून्, विजित्य, प्राज्यम्, अकुप्यं वसु, अयच्छत्। सः, धनञ्जयः, अधुना, वल्कवासांसि, आहरन्, तव, मन्युं, कथं, न करोति॥ ३५॥

(म०) विजित्येति। वासव इन्द्र उपमा उपमानं यस्य स वासवोपम इन्द्रतुल्यो यो धनञ्जयः। उत्तरान्कुरून्मेरोरुत्तरान्मानुषान्देशविशेषान्विजित्य प्राज्यं प्रभूतम्। 'प्रभूतं प्रचुरं प्राज्यम्' इत्यमरः। कुप्यादन्यदकुप्यं हेमरूप्यात्मकम्। 'स्यात्कोशश्च हिरण्यं च हेमरूप्यं कृताकृते। ताभ्यां यदन्यत्तत्कुप्यम्' इत्यमरः। वसु धनमयच्छद् दत्तवान्। 'पाघ्रा'—इत्यादिना दाणो यच्छादेशः। स धनं जयतीति धनञ्जयोऽर्जुनः। 'संज्ञायां भृतॄवृजि'—इत्यादिना खच्प्रत्ययः। 'अरुर्द्विषद्'—इत्यादिना मुमागमः। अधुनाऽस्मिन्काले। 'अधुना' इति निपातनात्साधु। तव वल्कवासांस्याहरन्कथं तव मन्युं क्रोधं दुःखं वा न करोति॥ ३५॥

(भा०) विजित्येति। वासवोपमः शक्रतुल्यः, यो धनञ्जयोऽर्जुनः, उत्तरान् मेरूत्तरवर्त्तिनः कुरून् मानवजनपदविशेषान् विजित्यातिक्रम्य प्राज्यं प्रभूतम् अकुप्यं स्वर्णरूप्यकात्मकं वसु धनम् अयच्छद् अददात् स धनञ्जयोऽर्जुनः, अधुना सम्प्रति वल्कवासांसि वृक्षत्वगात्मकवस्त्राणि, आहरन् परिदधत्, तव भवतो मन्युं क्रोधं कथं न करोति कुतो न जनयति। योऽर्जुनो जीवनावधिभोग्यं धनं भवत्कोषगृहे स्थापितवान् सोऽधुना वस्त्राभावात्तरुवल्कलपरिधारणेन शोककोपौ कुतो नोत्पादयतीत्यर्थः॥ ३५॥

वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम्॥३६॥

अन्वयः—वनान्तशय्याकठिनीकृताकृती, विष्वक्, कचाचितौ, अगजौ, गजौ, इव, यमौ, विलोकयन्, त्वं, धृतिसंयमौ, बाधितुं, कथं, न, उत्सहसे ॥ ३६ ॥

(म०) वनान्तेति । वनान्तो वनभूमिरेव शय्या तया कठिनीकृताकृती कठिनीकृतदेहौ । 'आकारो देह आकृतिः' इति वैजयन्ती । विष्वक्समन्तात् । 'समन्ततस्तु परितः सर्वतो विष्वगित्यपि' इत्यमरः । कचाचितौ कचव्याप्तौ । विशीर्णकेशावित्यर्थः । अतएवागजौ गिरिसम्भवौ गजाविव स्थितावेतौ यमौ युग्मजातौ । माद्रीपुत्रावित्यर्थः । 'यमो दण्डधरे ध्वाङ्क्षे संयमे यमजेऽपि च' इति विश्वः । विलोकयंस्त्वं कथं धृतिसंयमौ सन्तोषनियमौ । 'धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिषु' इति विश्वः । बाधितुं नोत्सहसे न प्रवर्त्तसे । 'शकधृ–' इत्यादिना तुमुन् । अहो ते महद्धैर्यमिति भावः ॥ ३६ ॥

(भा०) वनान्तशय्येति । वनान्तशय्याकठिनीकृताकृती वनभूम्यास्तरणरूक्षीकृताकारौ विष्वक् सर्वतः कचाचितौ केशव्याप्तौ, अत एव—अगजौ वन्यौ गजौ हस्तिनाविव (स्थितौ) एतौ यमौ सहजौ (माद्रीसुतौ–नकुलसहदेवौ) विलोकयन् पश्यन्, त्वं धृतिसंयमौ धैर्यसन्तोषौ बाधितुं त्यक्तुं कथं नोत्सहसे कुतो नोत्साहं करोषि । तादृशावस्थापन्नभ्रातृद्वयमवलोक्यापि धैर्यसंतोषत्यागे मात्सर्यं तवाश्चर्यसूचकमिति भावः । अत्रोपमाऽलङ्कारः ॥ ३६ ॥

अथ राज्ञो दुर्दशां दर्शयितुमुपोद्घातमाह । प्रकृतार्थं वर्णयितुमर्थान्तरवर्णनमुपोद्घातः—

इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदं परां रुजन्ति चेतः प्रसभं ममाधयः॥३७॥

अन्वयः—अहम्, इमाम्, तावकीं, धियं, न, वेद । चित्तवृत्तयः, विचित्ररूपाः, खलु । परां, भवदापदं, विचिन्तयन्त्याः, मम, चेतः, आधयः, प्रसभं, रुजन्ति ॥ ३७ ॥

(म०) इमामिति । इमां वर्त्तमानाम् । तवेमां तावकीं त्वदीयाम् । 'तस्येदम्' इत्यण्प्रत्ययः । 'तवकममकावेकवचने' इति तवकादेशः । धियं त्वदापद्विषयां चित्तवृत्तिमहं न वेद कीदृशी वा न वेद्मि । परबुद्धेरप्रत्यक्षत्वादिति भावः । 'विदो लटो वा' इति लटो णलादेशः । न चात्मदृष्टान्तेनापन्नत्वाद् दुःखित्वमनुमातुं शक्यते । धीरादिष्वनैकान्तिकत्वादित्याशयेनाह—चित्तवृत्तयो विचित्ररूपा धीराधीराद्यनेकप्रकाराः खलु । किन्तु परामुत्कृष्टां भवदापदं विचिन्तयन्त्या भावयन्त्या मम चेतश्चित्तम् । आधयो मनोव्यथाः । 'उपसर्गे घोः किः' इति किप्रत्ययः । प्रसभं प्रसह्य रुजन्ति भञ्जन्ति । 'रुजो भङ्गे' इति धातोर्लट् । पश्यतामपि दुःसहा दुःखजननी त्वद्विपत्तिरनुभवितारं त्वां न विकरोतीति महच्चित्रमित्यर्थः । चेत इति 'रुजार्थानां भाववचनानामज्वरेः' इति षष्ठी न भवति । तत्र शेषाधिकाराच्छेषत्वस्य विवक्षितत्वादिति ॥ ३७ ॥

(भा०) इमामहमिति । अहम् इमाम् एतां तावकीं त्वदीयां धियं बुद्धिं न वेद न जानामि, चित्तवृत्तयो मनोव्यापाराः, विचित्ररूपाः खलु विविधप्रकाराः खलु । परम्

उत्कृष्टां (विरुद्धां) भवदापदं त्वत्क्लेशं विचिन्तयन्त्या विचारयन्त्या मम चेत आधयो मानसव्यथाः प्रसभं हठाद् रुजन्ति पीडयन्ति। या त्वदीया विपद् दुःखप्रदा सा त्वां न पीडयतीत्याश्चर्यमिति भावः। अत्र दृष्टान्तालङ्कारः॥ ३७॥

तदापदमेव श्लोकत्रयेणाह—

पुराऽधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः।
अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः॥३८॥

अन्वयः—यः, (त्वं) महाधनं, शयनम्, अधिरूढः (सन्), स्तुतिगीतिमङ्गलैः पुरा, विबोध्यसे, सः, (त्वम्,) अदभ्रदर्भां, स्थलीम्, अधिशय्य, अशिवैः, शिवारुतैः, निद्रां जहासि॥ ३८॥

(म०) पुरेति। यस्त्वं महाधनं बहुमूल्यं श्रेष्ठम्। 'महाधनं महामूल्ये' इति विश्वः शयनं शय्यामधिरूढः सन् स्तुतयो गीतयश्च ता एव मङ्गलानि तैः करणभूतैः पुरा विबोध्यसे। वैतालिकैरिति शेषः। पूर्वं बोधित इत्यर्थः। 'पुरि लुङ् चास्मे' इति भूतार्थे लट्। स त्वमदभ्रदर्भां बहुकुशाम्। 'अस्त्री कुशं कुशो दर्भः' इति। 'अदभ्रं बहुलं बहु' इति चामरः। स्थलीमकृत्रिमभूमिम्। 'जानपद'—इत्यादिना कृत्रिमार्थे ङीष्। एतेन दुःसहस्पर्शत्वमुक्तम्। 'अधिशीङ्स्थाऽऽसां कर्म' इति कर्मत्वम्। अधिशय्य शयित्वा। 'अयङ्यि क्ङिति' इत्ययङादेशः। अशिवैरमङ्गलैः शिवारुतैः क्रोष्टुवासितैः। 'शिवा हरीतकी क्रोष्टा शमी नद्यामलक्युभे' इति वैजयन्ती। निद्रां जहासि। अद्येति शेषः॥ ३८॥

(भा०) पुराऽधिरूढ इति। यस्त्वं महाधनं बहुमूल्यं शयनं शय्याम् (पर्यङ्कम्), अधिरूढोऽधिसुप्तः सन् स्तुतिगीतिमङ्गलैः (करणैः) पुरा पूर्वं विबोध्यसेऽबुद्धाः। स त्वम् अदभ्रदर्भां प्रचुरकुशां स्थलीम् असंस्कृतभूमिम् अधिशय्य शयित्वा, अशिवैरभद्रैः शिवारुतैर्जम्बुकीशब्दैः (करणैः) सम्प्रति निद्रां शयनं जहासि त्यजसि। ईदृशविपत्यासावपि तत्प्रतिविधानं शोचनीयमिति भावः। अत्र विषमालङ्कारः॥ ३८॥

पुरोपनीतं नृप! रामणीयकं द्विजातिशेषेण यदेतदन्धसा।
तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः॥३९॥

अन्वयः—नृप! यत् एतत्, (वपुः) पुरा, द्विजातिशेषेण, अन्धसा, रामणीयकम्, उपनीतम्, अद्य, वन्यफलाशिनः, ते, तत्, वपुः, यशसा समं, परम्, कार्श्यम्, परैति॥३९॥

(म०) पुरेति। हे नृप! यदेतत्पुरोवर्ति वपुः पुरा द्विजातिशेषेण द्विजभुक्तावशिष्टेनान्धसाऽन्नेन। 'भिस्सा स्त्री भक्तमन्धोऽन्नम्' इत्यमरः। रमणीयस्य भावो रामणीयकं मनोहरत्वमुपनीतं प्रापितम्। नयतेर्द्विकर्मकत्वात्प्रधाने कर्मणि क्तः। 'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्' इति वचनात्। अद्य वन्यफलाशिनस्ते तव तद्वपुर्यशसा

पि परमतिमात्रं कार्श्यं परैति प्राप्नोति । उभयमपि क्षीयत इत्यर्थः । अत्र सहोक्तिरलङ्कारः । तदुक्तं काव्यप्रकाशे—'सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्' इति ॥ ३९ ॥

(भा०) पुरोपनीतमिति । नृप ! हे राजन् ! यदेतद् वपुः शरीरं पुरा पूर्वं द्विजातिशेषेण ब्राह्मणोच्छिष्टेनान्धसा भक्तेन रामणीयकं पुष्टिम् उपनीतम् प्रापितम् । अद्य साम्प्रतं वन्यफलाशिनो वन्यफलभक्षितुस्ते तव तद्वपुः, यशसा समं कीर्त्या साकं परम् अतिशयं कार्श्यं क्षीणतां परैति प्राप्नोति । ब्राह्मणोच्छिष्टान्नभक्षणाद्यत्प्रागुपचितं तव शरीरं तदेव सम्प्रति वन्यफलभक्षणात् क्षीणमथापि न ते मनोव्यथेत्याश्चर्यमित्यर्थः । अत्र सहोक्तिरलङ्कारः ॥ ३९ ॥

अनारतं यौ मणिपीठशायिनावरञ्जयद्राजशिरःस्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम् ॥४०॥

अन्वयः—अनारतं, मणिपीठशायिनौ, यौ, (चरणौ) [illegible] शिरःस्रजां, रजः, अरञ्जयत्, तौ, ते, चरणौ, मृगद्विजालूनशिखेषु [illegible] ॥ ४० ॥

(म०) [illegible] मणिमयपादपीठस्थायिनौ [illegible] मौलिस्रजां रजः परागोऽरञ्जयत्, तौ ते चरणौ [illegible] शिखेषु छिन्नाग्रेषु बर्हिषां कुशानाम् । 'बर्हिः कुशहुताशयोः' [illegible] वनेषु निषीदतस्तिष्ठतः ॥ ४० ॥

(भा०) अनारतमिति । अनारतं सततं मणिपीठशायिनौ मणिपीठवर्त्तिनौ यौ चरणौ पादौ (कर्मभूतौ) राजशिरःस्रजां नमद्भूपमौलिवर्त्तिमाल्यानां रजः परागः (कर्तृ) अरञ्जयत् । तौ ते तव चरणौ पादौ (कर्तृभूतौ) मृगद्विजालूनशिखेषु हरिणतपस्विजनछिन्नाग्रभागेषु बर्हिषां कुशानां वनेषु काननेषु निषीदतस्तिष्ठत. । अतः परं किं दुःखमित्यर्थः । अत्रापि विषमालङ्कारः ॥ ४० ॥

ननु सर्वप्राणिसाधारण्यामापदि का परिदेवनेत्यत्राह—

द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः ।
परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम् ॥४१॥

अन्वयः—यत् , इयं, दशा, द्विषन्निमित्ता (तवास्ति), ततः, मे, मनः, समूलम्, उन्मूलयति, इव । परैः, अपर्यासितवीर्यसम्पदां, मानिनां, पराभवः, अपि, उत्सवः, एव, (भवति) ॥ ४१ ॥

(म०) द्विषदिति ॥ यद्यतः कारणादियं दशाऽवस्था । 'दशा वर्त्तावस्थायाम्' इति विश्वः । द्विषन्तो निमित्तं यस्याः सा । 'द्विषोऽमित्रे' इति शतृप्रत्ययः । अतो मे मनः समूलं सावशेषमुन्मूलयतीवोत्पाटयतीव । दैविकी त्वापन्न दुःखायेत्याह—परैरिति । परैः

शत्रुभिरपर्यासिताऽप्यधीर्षिता वीर्यसम्पदेषां तेषां मानिनां मानहानिर्दुःसहा, न तु परा-
भूतिरिति भावः ॥ ४१ ॥

(भा०) द्विषद्भिरित्येति । यद् यस्मात् कारणाद् इयमेषा दशाऽवस्था द्विषन्निमित्ता
शत्रुहेतुका ततस्तस्मात्कारणाद् मे मम मनश्चित्तं समूलं समग्रं यथा तथा, उन्मूल्य
उत्क्षिपतीव परैः शत्रुभिः, अपर्यासितवीर्यसम्पदाम् अतिरस्कृतपौरुषैश्वर्याणां मानिनां
पराभवस्तिरस्कारोऽपि, उत्सव एव सुखप्रद एव न तु मानहानिरिति शेषः । मानिनां
मानभङ्गो दुःसहो न तु पराभवो दुःसह इति भावः । पूर्वार्द्धे उत्प्रेक्षाऽलङ्कारः । उत्तरा-
र्द्धे वैधर्म्येणार्थान्तरन्यासालङ्कारश्चेत्यनयोः संसृष्टिः ॥ ४१ ॥

विहाय शान्तिं नृप! धाम तत्पुनः प्रसीद संधेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः॥४२॥

अन्वयः—नृप ! शान्तिं, विहाय, तद् , धाम, विद्विषां, वधाय, पुनः, सन्धेहि, प्रसीद । निःस्पृहाः, मुनयः, शत्रून् , अवधूय, शमेन, सिद्धिं, व्रजन्ति । (किन्तु) भूभृतः (तथा) न ॥ ४२ ॥

(म०) विहायेति ॥ हे नृप ! शान्तिं विहाय तत्प्रसिद्धं धाम तेजो विद्विषां वधाय
पुनः सन्धेह्यङ्गीकुरु प्रसीद । प्रार्थनायां लोट् । ननु शमेन कार्यसिद्धौ किं क्रोधेनेत्यत्राह
व्रजन्तीति । निःस्पृहा मुनयः शत्रूनवधूय निर्जित्य शमेन क्रोधवर्जनेन सिद्धिं व्रजन्ति
भूभृतस्तु न । कैवल्यकार्यवद्राजकार्यं न शान्तिसाध्यमित्यर्थः ॥ ४२ ॥

(भा०) विहायेति । नृप ! हे राजन् ! शान्तिं तितिक्षां विहाय परित्यज्य तत् प्रसि-
सिद्धं धाम तेजः (पौरुषम्) विद्विषां शत्रूणां वधाय विनाशाय पुनर्भूयः सन्धेहि स्वी-
कुरु प्रसीद प्रसन्नो भव । निःस्पृहा निराकाङ्क्षिणो मुनयस्तपस्विनः शत्रून् रिपून् अवधूय
तिरस्कृत्य शमेन शान्त्या सिद्धिं (मुक्तिरूपाम्) व्रजन्ति प्राप्नुवन्ति, किन्तु भूभृ-
तो राजानः शमेन सिद्धिं रिपुपराजयात्मककार्यसिद्धिं न व्रजन्ति नाधिगच्छन्ति । इ-
ष्टमोक्षकं कार्यमिव राजकार्यं न शान्तिसाध्यमिति शत्रुविनाशसाधकतेजो ग्राह्यमिति
भावः । अर्थान्तरन्यासोऽलङ्कारः ॥ ४२ ॥

पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशम् ।
भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हन्त! हता मनस्विता ॥४३॥

अन्वयः—धामवतां, पुरःसराः, यशोधनाः, भवादृशाः (नराः), सुदुःसहम् , ईदृशं निकारम्, प्राप्य, रतिम् , अधिकुर्वते, चेद् (तर्हि) हन्त !!! मनस्विता, निराश्रय (सती), हता ॥ ४३ ॥

(म०) पुर इति । किं च धामवतां तेजस्विनाम् । परनिकारासहिष्णूनामित्यर्थः
पुरःसरा अग्रेसराः । 'पुरोऽग्रतोऽग्रेषु सर्तेः' इति टप्रत्ययः । यशोधना भवादृशाः सुदुःस-

तथिवु(?)त्वादृशीरमुकप्रकारं निकारं पराभवं प्राप्य रतिं सन्तोषमधिकुर्वते स्वीकुर्वते तर्हि । हन्त इति खेदे । मनस्विताऽभिमानिता निराश्रया सती हता । तेजस्विजनैकशरणत्वान्मनस्वितताया इत्यर्थः । अतः पराक्रमितव्यमिति भावः । यद्यप्यत्र प्रसहनं प्रत्यासत्तेरधिपूर्वात्करोतेः, 'अधःप्रसहने' इत्यात्मनेपदं न भवति । 'प्रसहनं परिभवः' इति काशिका । तथाऽप्यस्या. कर्त्रभिप्रायविवक्षायामेव प्रयोजकत्वात्कर्त्रभिप्राये 'स्वरितञितः–' इत्यात्मनेपदं प्रसिद्धम् ॥ ४३ ॥

(भा०) पुरस्सरा इति । धामवतां तेजस्विनां पुरस्सरा अग्रगामिनः, यशोधनाः-कीर्त्तिसर्वस्वा भवादृशास्त्वत्सदृशाः (नराः) मुदुःसहं सोढुमनर्हम् ईदृशम् उक्तविधं निकारं शत्रुकृतानादरं प्राप्याधिगत्य रतिं प्रीतिमधिकुर्वते विदधते चेत्तर्हि हन्त खेदे मनस्विताऽभिमानिता (अहङ्कारशालिता) निराश्रया निरवलम्बा सती हता विनष्टा । उत्कृष्टशक्तिशालिनो भवादृशा अपि जना यदि शत्रुकृतपराभवं न प्रतिकुर्युस्तदा मनस्विजनैकशरणाऽभिमानिता हतैवेत्यर्थः । अतः पराक्रमो विधातव्य इति भावः ॥ अत्र वैधर्म्येणार्थान्तरन्यासोऽलङ्कारः ॥ ४३ ॥

अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सञ्जुहुधीह पावकम् ॥४४॥

अन्वयः—अथ, निरस्तविक्रम. (सन्), चिराय, क्षमाम्, एव, सुखस्य, साधनं पर्येषि, (तर्हि) लक्ष्मीपतिलक्ष्म, कार्मुकं, विहाय, जटाधरः, सन्, इह, पावकं, जुहुधि ॥ ४४ ॥

(म०) अथेति । अथ पक्षान्तरे निरस्तविक्रमः सन् । चिराय चिरकालेनापि क्षमां क्षान्तिमेव । 'क्षितिक्षान्त्योः क्षमा' इत्यमर. । सुखस्य साधनं पर्येष्यवगच्छसि तर्हि लक्ष्मीपतिलक्ष्म राजचिह्नं कार्मुकं विहाय । धरतीति धरः । पचाद्यच् । जटानां धरो जटाधरः सन्निह वने पावकं जुहुधि । पावके होमं कुर्वित्यर्थः । अधिकरणे कर्मत्वोपचारः । विरक्तस्य किं धनुषेत्यर्थः । 'हुझल्भ्यो हेर्धिः' ॥ ४४ ॥

(भा०) अथ क्षमामिति । अथ अथवा (पक्षान्तरेऽथशब्दः) निरस्तविक्रमस्त्यक्तपौरुषः सन्, चिराय चिरकालपर्यन्तं क्षमां शान्तिमेव सुखस्यानन्दस्य साधनं कारणं पर्येषि जानासि चेत् तर्हि लक्ष्मीपतिलक्ष्म नृपचिह्नं कार्मुकं धनुर्विहाय सन्त्यज्य जटाधरो मुनिवेषधारी सन्, इहाऽस्मिन् वने पावकं वह्निं जुहुधि तर्पय (वह्नौ होमं कुरु) । शक्तिमतामपि क्षान्तिरेव सुखोत्पादिका चेत्तर्हि कृतं विरक्तानां (मुनीनाम्) इव शक्तिमतां धनुषेतिभावः ॥ ४४ ॥

अथ समयोल्लङ्घनाद् बिभेषि तदपि न किञ्चिदित्याह—

न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः ।
अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि सन्धिदूषणानि ॥४५॥

अन्वयः—परेषु, निकृतिपरेषु, (सत्सु) भूरिधाम्न., ते, समयपरिरक्षणं, न, क्षमं, हि, विजयार्थिनः, क्षितीशाः, अरिषु, सोपधि, सन्धिदूषणानि, विदधति ॥ ४५ ॥

(म०) नेति ॥ परेषु शत्रुषु । निकृतिः परं प्रधानं येषु तेषु । तथोक्तेष्वपकारकेषु सत्सु भूरिधाम्नो महौजसः प्रतीकारक्षमस्य ते तव समयस्त्रयोदशसंवत्सरमस्वामीत्येवंरूपा संवित् । 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः । तस्य परिरक्षणं प्रतीक्षणं न क्षमं न युक्तम् । 'युक्ते क्षमं शक्ते हिते त्रिषु' इत्यमरः । कुतः यस्माद्विजयार्थिनो विजिगीषवः क्षितीशा अरिषु विषये सोपधि सकपटं यथा तथा । 'कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे' इत्यमरः । सन्धिदूषणानि विदधति केन चित् व्याजेन दोषमापाद्य संधिं दूषयन्ति । विघटयन्तीत्यर्थः । शक्तस्य हि विजिगीषोः सर्वथा कार्यसाधनं प्रधानमन्यत्समयरक्षणादिकमशक्तस्यैति भावः । अर्थान्तरन्यासोऽलङ्कारः । पुष्पिताग्रावृत्तम् ॥ ४५ ॥

(भा०) न समयेति । परेषु शत्रुषु निकृतिपरेषु शाठ्यप्रधानेषु सत्सु भूरिधाम्नोऽतितेजस्विनस्ते तव समयपरिरक्षणं त्रयोदशवर्षात्मकालप्रतीक्षणं न क्षमं नोचितं । हि यतः कारणाद् विजयार्थिनो विजयाभिलाषिणः क्षितीशा राजानोऽरिषु शत्रुषु विषये सोपधि सव्याजं यथा तथा सन्धिदूषणानि मैत्रीभङ्गानि विदधति कुर्वन्ति । शक्तिमतां कार्यविधानमेव सर्वथा श्रेयः, समयापेक्षणादिकन्त्वशक्तिमतामिति भावः । अत्र काव्यलिङ्गार्थान्तरन्यासयोरङ्गाङ्गिभावेन साङ्कर्यम् ॥ ४५ ॥

उक्तमर्थमाशीर्वादपूर्वकमुपसंहरति—

विधिसमयनियोगाद्दीप्तिसंहारजिह्मं-
शिथिलवसुमगाधे मग्नमापत्पयोधौ ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ॥ ४६ ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये प्रथमः सर्गः ॥१॥

अन्वयः—विधिसमयनियोगाद्, अगाधे, आपत्पयोधौ, मग्नं, दीप्तिसंहारजिह्मं, शिथिलवसुं, रिपुतिमिरम्, उदस्य, उदीयमानं, त्वां, दिनादौ, दिनकृतम्, इव, लक्ष्मीः, भूयः, समभ्येतु ॥ ४६ ॥

(म०) विधीति ॥ विधिर्दैवम् । 'विधिर्विधाने दैवे च' इत्यमरः । समयः कालस्तयोर्नियोगान्नियमनाद्धेतोः । तयोर्दुरतिक्रमत्वादिति भावः । अगाधे दुस्तरे । आपत्पयोधिरिवेत्युपमितसमासः । दिनकृतमिवेति वक्ष्यमाणानुसारात्तस्मिन्नापत्पयोधौ

नम् । 'सूर्योऽपि सायं सागरे मज्जति परेद्युरुन्मज्जती'त्यागमः। दीप्तिः प्रताप आतपश्च तस्याः संहारेण जिह्ममप्रसन्नम् । शिथिलवसु शिथिलधनम् , अन्यत्र शिथिलरश्मिम् । 'वसुर्देवेऽग्नौ रश्मौ च।'वसु तोये धने मणौ' इति वैजयन्ती। 'शिथिलबलम्' इति पाठे तूभयत्रापि शिथिलशक्तिकमित्यर्थः। रिपुस्तिमिरमिवेति रिपुतिमिरमुदस्य निरस्योदीयमानमुद्यन्तम् । 'इङ् गतौ' इति धातोर्दैवादिकात्कर्त्तरि शानच् । त्वां दिनादौ दिनकृतमिव लक्ष्मीर्भूयः समभ्येतु भजतु । 'आशिषि लिङ्लोटौ' इति लोट् । चमत्कारकारितया मङ्गलाचरणरूपतया च सर्गान्त्यश्लोकेषु लक्ष्मीशब्दप्रयोगः । यथाऽऽह भगवान्भाष्यकारः—'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषकाण्यायुष्मत्पुरुषकाणि च भवन्त्यध्येतारश्च प्रवक्तारो भवन्ति' इति । पूर्णोपमेयम् । मालिनी वृत्तं 'सर्गान्तत्वाद् वृत्तभेदः । यथाऽऽह दण्डी—'सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसंधिभिः । सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम्' ॥ इति ॥

अथ कविः काव्यवर्णनीयाख्यानपूर्वकं सर्गपरिसमाप्तिं कथयति—इतीत्यादि । इतिशब्दः परिसमाप्तौ । भारविकृताविति कविनामकथनम्। महाकाव्य इति महच्छब्देन लक्षणसम्पत्तिः सूचिता । किरातार्जुनीय इति काव्यवर्णनीययोः कथनम् । प्रथमः सर्गः । समाप्त इति शेषः । एवमुत्तरत्रापि द्रष्टव्यम् । किरातार्जुनावधिकृत्य कृतो ग्रन्थः किरातार्जुनीयम् । 'शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः'—इति द्वन्द्वाच्छप्रत्ययः । 'देवपाण्डवीयमितिवत्' तथा ह्यर्जुन एवात्र नायकः । किरातस्तु तदुत्कर्षाय प्रतिभटत्वेन वर्णितः । यथाऽऽह दण्डी—'वंशवीर्यप्रतापादि वर्णयित्वा रिपोरपि । तज्जयान्नायकोत्कर्षकथनं च धिनोति नः' ॥ इति । अथायं सङ्ग्रहः—'नेता मध्यमपाण्डवो भगवतो नारायणस्यांशजस्तस्योत्कर्षकृते त्ववर्ण्यततरां दिव्यः किरातः पुनः । शृङ्गारादिरसोऽङ्गमत्र विजयी वीर प्रधानो रसः शैलाद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलम्' इति ॥ ४६ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां प्रथमः सर्गः समाप्तः ॥ १ ॥

(भा०) विधिसमयेति । विधिसमयनियोगाद् दैवकालानतिक्रमणाद् अगाधे दुरवगाहे, आपत्पयोधौ दुःखार्णवे मग्नं पतितं दीप्तिसंहारजिह्मं प्रतापक्षयाप्रसन्नं शिथिलवसुं विनष्टधनं रिपुतिमिरं शत्र्वन्धकारम् उदस्य विनाश्य, उदीयमानं विद्यमानं त्वां भवन्तं दिनादौ प्रातःकाले विधिसमयनियोगाद् दैवकालानतिक्रमणाद् अगाधे दुस्तरे, आपत्पयोधौ मग्नं पतितं दीप्तिसंहारजिह्मम् आतपविनाशनिस्तेजस्कं शिथिलवसुं क्षीणरश्मिं रिपुतिमिरं शत्रुसदृशान्धकारम् । उदस्य निरस्य, उदीयमानम् उद्यन्तं दिनकृतमिव सूर्यमिव लक्ष्मीः सम्पत्तिः शोभा च भूयः समभ्येतु समाश्रयतु । प्रातरुदीयमानं सूर्यं यथा लक्ष्मीराश्रयति तथैव त्वामपि सा पुनराश्रयत्वित्यर्थः । अत्र पूर्णोपमालङ्कारः ॥ ४६ ॥

इति प्रथमः सर्गः ॥ १ ॥

अथ द्वितीयः सर्गः ।

विहितां प्रियया मनःप्रियामथ निश्चित्य गिरं गरीयसीम् ।
उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं वृकोदरः ॥ १ ॥

अन्वयः—अथ, वृकोदरः, प्रियया, विहिताम्, मनःप्रियाम्, गिरं, गरीयसीम्, निश्चित्य, नृपम्, उपपत्तिमद्, ऊर्जिताश्रयम्, वचनम्, ऊचे ॥ १ ॥

(म०) विहितामिति ॥ अथ वृकोदरो भीमः प्रियया द्रौपद्या । प्रियाग्रहणमस्या-हितोपदेशतात्पर्यसूचनार्थम् । विहिताम् । अभिहितामित्यर्थः । विपूर्वस्य दधातेः-क्रियासामान्यवाचिनो योग्यविशेषपर्यवसानाद् । मनःप्रियामभिमतार्थयोगान्मनो-हरां, विशेषणद्वयेनापि गिरो ग्राह्यत्वमुक्तं, गिरं गरीयसीं सारवत्तरां निश्चित्य नृपं-धर्मराजमुपपत्तिमद् युक्तियुक्तमूर्जिताश्रयमुदारार्थं वचनमूच उक्तवान् । कर्त्तरि लिट् । ब्रुवो वचिरादेशः । 'ब्रुविशासि'—इत्यादिना द्विकर्मकत्वम् । 'अकथितं च' इति नृपस्य कर्मत्वम् ॥ १ ॥

(भा०) विहितामिति । अथानन्तरं वृकोदरो भीमः प्रियया द्रौपद्या विहिताम् उक्ताम् मनःप्रियां चित्तानन्दप्रदां गिरं वाणीं गरीयसीं श्रेष्ठां निश्चित्य विचार्य नृपं-राजानम् उपपत्तिमद् युक्तियुक्तं (समुचितम्) ऊर्जिताश्रयं प्रशस्तार्थशालि वचनं वाक्यम् ऊच उक्तवान् । द्रौपद्युक्तेरौचित्यमवगत्य वृकोदरो युधिष्ठिरमुद्दिश्य तदुक्तिसमर्थकवचो-जगादेत्यर्थः । वृकोदरकर्तृकोचितवचनाभिधाने प्रियोक्तगिरो गरीयस्त्वनिश्चयस्य हेतु-त्वेन तस्य च पदार्थत्वेन पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ १ ॥

किं तद्वचनं तदाह—

यदवोचत वीक्ष्य मानिनी परितः स्नेहमयेन चक्षुषा ।
अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम् ॥ २ ॥

अन्वयः—मानिनी, स्नेहमयेन, चक्षुषा, परितः, वीक्ष्य, अवोचत, यद्, (वचनम्), दुर्वचं, तद्, वचनं, वागधिपस्य, अपि, विस्मयं, विदधीत ॥ २ ॥

(म०) यदिति ॥ मानिनी क्षत्रियकुलाभिमानवती द्रौपदी स्नेहमयेन स्नेहप्रचुरेण । 'तत्प्रकृतवचने मयट्' । चक्षुषा ज्ञानचक्षुषा । एतेनाप्तत्वमुक्तम् । परितो वीक्ष्य समन्ततो-विविच्य यद्वचनमवोचत । ब्रुवो वक्तेर्वा लुङ् । 'वच उम्' इत्युमागमः । वागधिपस्य बृहस्पतेरपि दुर्वचं वक्तुमशक्यम् । शेषे षष्ठीयं, न कृद्योगलक्षणा । अतो 'न लोक'—इत्यादिना षष्ठीप्रतिषेधो नास्ति । तद्वचनं विस्मयं विदधीत । सर्वस्यापीति शेषः । अथवा वागधिपस्यापि विस्मयं विदधीतेति सम्बन्धः । दुर्वचम् । केनापीति शेषः ।

यतः स्त्रैणमपि शास्त्रमनुरुणद्धि हितं चानुबध्नाति । अतो विस्मयकरं ग्राह्यं चैतद्वचन-मिति तात्पर्यार्थः ॥ २ ॥

(भा०) यदवोचतेति । मानिनी क्षत्रियकुलाभिमानवती स्नेहमयेन स्नेहपूर्णेन चक्षुषा नेत्रेण (ज्ञानाक्ष्णा) परितः समन्ताद् वीक्ष्य विचार्य यद्वचनं वाक्यम् अवोचतोक्तवती। दुर्वचं दुःखेनापि वक्तुमशक्यं (केनापीति शेषः) तद्वचनं द्रौपदीवाक्यं वागधिपस्य बृहस्पतेरपि विस्मयं विषादम् (आश्चर्यम्) विदधीत कुर्वीत । अथवा वागधिपस्यापि दुर्वचं तद्वचनं विस्मयं विदधीत। सर्वस्यापीति शेषः। शास्त्रसिद्धं हितकरञ्च नारीवाक्यं-विस्मयोत्पादकमप्यङ्गीकार्यमित्यर्थः । उत्तरार्द्धगतवाक्यार्थम्प्रति पूर्वार्द्धगतवाक्यार्थस्य हेतुत्वेनोपन्यासाद्वाक्यार्थ हेतुकं काव्यलिङ्गमलङ्कारः ॥ २ ॥

विस्मयकरत्वे हेतुमाह—

विषमोऽपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः ।
स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः ॥ ३ ॥

अन्वयः—विषम , कृततीर्थ , पयसाम् , आशयः, इव, विषमः, अपि, नयः, कृततीर्थः, (सन्) विगाह्यते, तु, तत्र, सः, विशेषदुर्लभः, यः, सत्, कृत्यवर्त्म, उपन्यस्यति ॥३॥

(म०) विषम इति ॥ विषमोऽपि दुर्बोधोऽपि । अन्यत्र दुष्प्रवेशोऽपि । नयो नीतिशास्त्रम् । पयसामाशयो ह्रद इव । कृततीर्थः कृताभ्यासादुपायः सन् । 'तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु' इति विश्वः । अन्यत्र कृतजलावतारः सन् । 'तीर्थं योनौ जलावतारे च' इति हलायुध । विगाह्यते गृह्यते प्रविश्यते च । किंतु तत्र नये जलाशये च स तादृशः पुरुषो विशेषदुर्लभोऽत्यन्तदुर्लभो यः कृत्यं संधिविग्रहादि कार्यं-स्नानादिकं च तस्य वर्त्म सत् साधु देशकालाद्यविरुद्धम् । यथा तथा । अन्यत्र गर्त्त ग्राहपाषाणादिरहितम् । यथा तथोपन्यस्यत्युदाहरति । 'उपन्यासस्तु वाङ्मुखम् । उपोद्घात उदाहार' इत्यमरः । यथा केन चित्कृततीर्थे पयसि गम्भीरेऽपि प्रवेष्टारः सन्ति । तीर्थकरस्तु विरलः । तद्वन्नीतावपि गूढमपि तत्त्वं वक्तरि सति बोद्धारः सन्ति । वक्ता तु न सुलभः । अत इयमपठिताऽपि साधु वक्तीति युज्यते विस्मय इत्यर्थः ॥३॥

(भा०) विषम इति । विषमो दुष्प्रवेशः कृततीर्थः कृततरणाभ्यास पयसामाशयो-जलाशय इव विषमोऽपि दुरवगमोऽपि नयो नीतिशास्त्रं कृततीर्थ कृताभ्यासः सन् विगाह्यते (जलाशयपक्षे–प्रविश्यते) । तु किन्तु तत्र जलाशये नये च स तादृशो जनो-विशेषदुर्लभोऽतिदुर्लभोऽतिदुष्प्रापः, यो जनः सत् सम्यक (देशकालाद्यविरुद्धं) कृत्य-वर्त्म सन्धिविग्रहादि स्नानादिकञ्च, उपन्यस्यत्युपदिशति । तरणाभ्यासद्वाराऽगाध-जलाशयप्रवेशस्येवाभ्यासादुपायद्वारा नीतिशास्त्रीयगूढतत्त्वावगमस्य सौलभ्येऽप्युभ-यत्राभ्यासादुपायशिक्षको दुर्लभ एवेति भावः । अत्रोपमाऽर्थान्तरयोः संसृष्टिः ॥३॥

अथ ग्राह्यत्वे हेतुमाह—

परिणामसुखे गरीयसि व्यथकेऽस्मिन्वचसि क्षतौजसाम् ।
अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः ॥ ४ ॥

अन्वयः—परिणामसुखे, गरीयसि, क्षतौजसां, व्यथके, अल्पीयसि, अतिवीर्यवति, भेषजे, इव, (परिणामसुखे, गरीयसि, क्षतौजसां, व्यथके, अल्पीयसि,) अस्मिन्, वचसि, बहुः, गुणः, दृश्यते ॥ ४ ॥

(म०) परिणामेति । परिणामः फलकालः परिपाकावस्था च । तत्र सुखे हिते । 'शस्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च' इति सुखशब्दस्य विशेष्यलिङ्गत्वम् । गरीयसि भूयिष्ठे श्रेष्ठे च । क्षतौजसामुभयत्रापि क्षीणशक्तीनां व्यथके युद्धोपोद्बलकत्वाद्भयङ्करे । अन्यत्रादौ संशयादिदुःखजनके । अल्पीयस्यल्पाक्षरेऽल्पमात्रे च । उक्तं च—'स्वल्पा च मात्रा बहुलो गुणश्च' इति । अस्मिन्वचसि द्रौपदीवाक्ये । अतिवीर्यवत्यत्यन्तसामर्थ्यवति भेषज औषध इव । 'भेषजौषधभैषज्यम्' इत्यमरः । बहुरनेको गुणो मानत्राणराज्यलाभादिरारोग्यबलपोषादिश्च दृश्यते । अतो ग्राह्यमस्या वचनमिति भावः ॥ ४ ॥

(भा०) परिणामेति । परिणामसुखे परिपाकदशाहिते गरीयस्यत्युत्तमे क्षतौजसां क्षीणशक्तीनां व्यथके पाचनशक्त्यभावाद् दुःखदेऽल्पीयसि स्वल्पमात्रेऽतिवीर्यवत्युत्कृष्टसामर्थ्यशालिनि भेषज औषध इव परिणामसुखे फलक्षणसुखजनके गरीयसि प्रशस्ततरे क्षतौजसां सामर्थ्यहीनानां व्यथके दुःखप्रदेऽल्पीयसि अल्पाक्षरेऽस्मिन् वचसि द्रौपदीवचने बहुरधिको गुणो मानत्राणराज्यलाभादिरूपः (भेषजपक्षे) आरोग्यबलपोषादिरूपश्च दृश्यतेऽवलोक्यते सर्वजनैरिति शेषः । यथोत्कृष्टभेषजसेवनादारोग्यादिलाभस्तथा द्रौपदीवचनग्रहणान्मानत्राणादिलाभ इति भावः । अत्रोपमाऽलङ्कारः ॥ ४ ॥

सत्यमेवं तथाऽपि मह्यं न रोचते किं करोमीत्यत्राह—

इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती ।
ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः ॥ ५ ॥

अन्वयः—रुचिरार्था, इयं, भारती, इष्टगुणाय, भवते, अपि, रोचताम् । गुणगृह्याः, विपश्चितः, वचने, वक्तृविशेषनिस्पृहाः, ननु ॥ ५ ॥

(म०) इयमिति ॥ रुचिरार्था महितार्थसम्पन्नेति रुचिहेतूक्तिः । इयं भारती द्रौपदीवाक्यमिष्टगुणाय । गुणग्राहिण इत्यर्थः । भवते तुभ्यमपि । 'रुच्यर्थानां प्रीयमाणः' इति सम्प्रदानत्वाच्चतुर्थी । रोचतां स्वदताम् । विध्यर्थे लोट् । हितवचने बलादपीच्छां कुर्यादौषधवदिति भावः । तथाऽपि स्त्रैणे वचसि का श्रद्धा तत्राह—नन्विति । गुणानां गृह्या गुणगृह्याः । गुणपक्षपातिन इत्यर्थः । 'पदास्वैरिबाह्यापक्ष्येषु च' इति ग्रहेः क्यप् ।

विपश्चितो विद्वांसः । 'विद्वान्विपश्चिद्दोषज्ञः' इत्यमरः । वचने विषये वक्तृविशेषे स्त्री-पुंसादिलक्षणे निःस्पृहा ननु निरास्थाः खलु । 'बालादपि सुभाषितं ग्राह्यम्' इति न्यायादिति भावः ॥ ५ ॥

(भा०) इयमिति । रुचिरार्था मनोज्ञार्थशालिनी, इयमेषा भारती वाणी द्रौपद्युक्तवाणी, इष्टगुणाय गुणग्रहणशीलाय भवते तुभ्यमपि रोचतां स्वदताम् । गुणगृह्या गुणग्रहणशीला विपश्चितो विद्वांसो वचने विषये वक्तृविशेषनिःस्पृहा ननु स्त्रीपुंसादिलक्षणे वक्तरि निरपेक्षिणः खलु भवन्तीति क्रियाशेषः । विदुषां स्त्रीपुंसादिरूपवक्तृविशेषे निःस्पृहत्वात्तैर्भेषजमिव तासामपि हितवचनं ग्राह्यमिति भावः । अर्थान्तरन्यासोऽलङ्कारः ॥५॥

सम्प्रति स्वयमुपालभते—

चतसृष्वपि ते विवेकिनी नृप ! विद्यासु निरूढिमागता ।
कथमेत्य मतिर्विपर्ययं करिणी पङ्कमिवावसीदति ॥ ६ ॥

अन्वयः—नृप !, चतसृषु, विद्यासु, निरूढिम्, आगता, विवेकिनी, ते, मति, करिणी, पङ्कम्, इव, विपर्ययम्, एत्य, कथम्, अवसीदति ॥ ६ ॥

(म०) चतसृष्विति ॥ हे नृप ! चतसृष्वपि विद्यास्वान्वीक्षिक्यादिषु । 'आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्च शाश्वती । विद्याश्चैताश्चतस्रस्तु लोकसंस्थितिहेतवः' इति कामन्दकः । निरूढिमागता प्रसिद्धिं गता । अत एव विवेकिनी सदसद्विवेकवती । यथाऽऽह मनुः—'आन्वीक्षिक्यां तु विज्ञानं धर्माधर्मौ त्रयीस्थितौ । अर्थानर्थौ तु वार्त्तायां दण्डनीत्यां नयानयौ ॥' इति ॥ ते मतिः कथं करिणी पङ्कमिव विपर्ययं वैपरीत्यमविवेकरूपमेत्यावसीदति नश्यति । तन्न युक्तमिति भावः ॥ ६ ॥

(भा०) चतसृष्विति । नृप ! हे राजन् ! चतसृषु चतुःसंख्यकास्वपि विद्यासु नीतिविद्यासु निरूढिं प्रसिद्धिम् आगता प्राप्ता विवेकिनी विचारशीला ते तव मतिर्बुद्धिः करिणी हस्तिनी पङ्कं कर्दममिव विपर्ययं वैपरीत्यम् एत्य प्राप्य कथमवसीदति विनश्यति । यथा हस्तिनी पङ्कं प्राप्य विनश्यति तथैव विवेकिनी तव बुद्धिर्वैपरीत्यम्प्राप्य विनश्यतीत्यर्थः । अत्रोपमाऽलङ्कारः ॥ ६ ॥

किं नश्छिन्नमिदानीं येनेत्थमुपालभ्येमहीत्यत्राह—

विधुरं किमतः परं परैरवगीतां गमिते दशामिमाम् ।
अवसीदति यत्सुरैरपि त्वयि सम्भावितवृत्ति पौरुषम् ॥ ७ ॥

अन्वयः—त्वयि, परैः, इमाम्, अवगीताम्, दशाम्, गमिते, (सति) सुरैः, अपि, सम्भावितवृत्ति, पौरुषम्, अवसीदति, यद्, अतः, परं, किं, विधुरम् ॥ ७ ॥

(म०) विधुरमिति ॥ त्वयि परैः शत्रुभिरिमामीदृशीमवगीतां गर्हिताम् । 'अवगीतं तु निर्वादे मुहुर्दृष्टे च गर्हिते' इति विश्वः । दशां गमिते प्रापिते सति । सुरैरपि

संभावितवृत्ति बहुकृतप्रसारम्। अथवा–निश्चितसद्भावम्। पौरुषं पुरुषकारः। युवादित्वादण्प्रत्ययः। अवसीदति नश्यतीति यत्। अतः परम् अतोऽन्यदधिकं किं विधुरं किं कष्टम्। न किञ्चिदित्यर्थः। 'विधुरं प्रत्यवाये स्यात्कष्टविश्लेषयोरपि' इति वैजयन्ती। अस्तीति शेषः। 'अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति' इति भाष्यकारः। भवन्तीति लटः पूर्वाचार्याणां संज्ञा। यद्वा–पुरुषाधिकारस्य दुर्दशा सा च शत्रुकृता। तदुपरि महत्कष्टं तच्च त्वदुपेक्षयेत्युपालम्भः स इत्यर्थः॥ ७॥

(भा०) विधुरमिति। त्वयि भवति परैः शत्रुभिः, इमाम् एतादृशीम् अवगीतां निन्दितां दशाम् अवस्थां गमिते प्रापिते सति सुरैर्देवैरपि सम्भावितवृत्ति निश्चितसत्त्वं पौरुषं सामर्थ्यम् अवसीदति नश्यतीति यद् अतः परं किं विधुरं किं कष्टम् अस्तीति क्रियाशेषः। शत्रुकृतदुःखमनुभवति त्वयि सुरनिश्चितसत्ताकं सामर्थ्यं क्षिणोतीत्यतोऽधिकं, किमन्यत्कष्टं स्यादित्यर्थः। उत्तरार्द्धगतवाक्यार्थं प्रति द्वितीयपादगतपदार्थस्य हेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गम्। अतः परं किं विधुरं स्यादर्थान्न स्यादित्यर्थादर्थापत्तिरलङ्कारो वा॥ ७॥

अथोपेक्षाकालत्वादियमुपेक्षेत्याशङ्क्य नायमुपेक्षाकाल इति वक्तुं तदेव तावच्छ्लोकद्वयेन विविनक्ति—

द्विषतामुदयः सुमेधसा गुरुरस्वन्ततरः सुमर्षणः।

न महानपि भूतिमिच्छता फलसम्पत्प्रवणः परिक्षयः॥ ८॥

अन्वयः—भूतिम्, इच्छता, सुमेधसा, गुरुः, अस्वन्ततरः, द्विषताम्, उदयः, सुमर्षणः (भवति)। महान्, अपि, फलसम्पत्प्रवणः, परिक्षयः, न (सुमर्षणः भवति)॥ ८॥

(म०) द्विषतामिति॥ भूतिमुदयमिच्छता। शोभना मेधा यस्य तेन सुमेधसा सुधिया। 'नित्यमसिच्प्रजामेधयोः' इत्यसिच्प्रत्ययः। गुरुर्महानप्यस्वन्ततरोऽत्यन्तदुरन्तः। क्षयोन्मुख इत्यर्थः। द्विषतामुदयो वृद्धिः। सुखेन मृष्यत इति सुमर्षणः सुसह। उपेक्ष्य इत्यर्थः। स्वन्तश्चेद् दुर्मर्षण इति भावः। 'भाषायां शासि'—इत्यादिना खलर्थे युच्प्रत्ययः। महानपि फलसम्पत्प्रवण फलसम्पदुन्मुखः। "प्रनिरन्तर–" इत्यादिना णत्वम्। परिक्षयो न सुमर्षणः, नोपेक्ष्य इत्यर्थः। अन्यथा तूपेक्ष्य इति भावः। नह्युदय एव प्रतीकार्यो न च क्षय इत्येवोपेक्ष्य। किन्तु स्वन्तत्वास्वन्तत्वाभ्यामुभावपि प्रतीकार्यावुपेक्ष्यौ च भवत इत्यर्थः॥ ८॥

(भा०) द्विषतामिति। भूतिम् ऐश्वर्यम् इच्छता अभिलषता सुमेधसा बुद्धिमता (पुरुषेण) गुरुर्महान् अस्वन्ततरो विनाशोन्मुखो द्विषतां शत्रूणाम् उदय उत्कर्षः सुमर्षणः सह्यः। महानप्यधिकोऽपि फलसम्पत्प्रवणः फलसिद्ध्युन्मुखः परिक्षयो विनाशोन सुमर्षणो न सह्यः, ऐश्वर्याभिलाषिणा पुरुषेण क्षयोन्मुखः शत्रूत्कर्ष उपेक्ष्यः, फलसिद्ध्युन्मुखः क्षयो नोपेक्ष्य इत्यर्थः। पूर्वार्द्धे शत्रूदयोपेक्षणेऽस्वन्ततरत्वस्यहेतोः,

उत्तरार्द्धे शत्रुक्षयानुपेक्षणे फलसम्पत्प्रवणत्वरूपहेतोश्च विशेषणगत्योपन्यासात्पदार्थहेतुकं काव्यलिङ्गद्वयम् ॥ ८ ॥

अथोभयोरपि मध्य एकतरस्योदयक्षययोर्गतिमुक्त्वेदानीं युगपत्परिक्षयागमे गतिमाह—

अचिरेण परस्य भूयसीं विपरीतां विगणय्य चात्मनः ।
क्षययुक्तिमुपेक्षते कृती कुरुते तत्प्रतिकारमन्यथा ॥ ९ ॥

अन्वयः—कृती, परस्य, क्षययुक्तिम्, अचिरेण, भूयसीम्, आत्मनः, च, (क्षययुक्ति) विपरीतां, विगणय्य, उपेक्षते । अन्यथा, तत्प्रतिकारं, कुरुते ॥ ९ ॥

(म०) अचिरेणेति ॥ कृतमनेनेति कृती । कुशल इत्यर्थः । 'इष्टादिभ्यश्च' इतीनिप्रत्ययः । परस्य शत्रोः क्षययुक्तिं क्षययोगमचिरेणाशुभाविनीं भूयसीं दुरन्तां च, तथाऽऽत्मनः क्षययुक्तिं विपरीतां चिरभाविनीमल्पीयसीं च विगणय्य विचार्य । "ल्यपि लघुपूर्वाद्' इत्ययादेशः । उपेक्षते । अन्यथोक्तवैपरीत्ये । परस्य क्षययुक्तावल्पीयस्यां, स्वस्य भूयस्यां च सत्यामित्यर्थः । तत्प्रतिकारं तस्याः क्षययुक्तेः प्रतिकारमचिरेणाशु कुरुते । एवं सति यदा शत्रोरभ्युदय. स्वस्य चातिपरिक्षयो यथाऽस्माकं, तदा किं वक्तव्यम् । सद्यः प्रतिकुरुत इत्यर्थात्सिद्धमनुसन्धेयम् ॥ ९ ॥

(भा०) अचिरेणेति । कृती विचारशीलः (पण्डितः) परस्य शत्रोः क्षययुक्तिं विनाशयोगम् अचिरेण शीघ्रभाविनीं भूयसीम् अधिकां (दुरवसानां वा) आत्मनः स्वस्य च क्षययुक्तिं विनाशयोगं विपरीतां चिरेण भाविनीम् । अल्पीयसीं च विगणय्य विचार्य, उपेक्षते न प्रतिकुरुते, अन्यथा तद्वैपरीत्ये (परस्य क्षययुक्तेरल्पत्वे स्वस्य च क्षययुक्तेरनल्पत्वे चेत्यर्थः) तत्प्रतिकारं क्षययुक्त्यनुपेक्षणं कुरुते विधत्ते । आशुभावी शत्रुक्षयश्चिरभावी स्वक्षयश्चेत्युभयमुपेक्ष्य चिरभावी शत्रुक्षयोऽचिरभावी स्वक्षयश्चेत्युभयं नोपेक्ष्यमिति भाव. । क्षययुक्तेरुपेक्षणे शत्रुक्षययुक्तेश्चिरभावित्वमभूयस्त्वं च स्वक्षययुक्तेराशुभावित्वं भूयस्त्वं च हेतुरिति पदार्थहेतुकं काव्यलिङ्गम् ॥ ९ ॥

तथाऽप्युपेक्षायामनिष्टमाचष्टे—

अनुपालयतामुदेष्यतीं प्रभुशक्तिं द्विषतामनीहया ।
अपयान्त्यचिरान्महीभुजां जननिर्वादभयादिव श्रियः ॥ १० ॥

अन्वय.—उदेष्यतीम्, द्विषताम्, प्रभुशक्तिम्, अनीहया, अनुपालयताम्, महीभुजाम्, श्रियः, जननिर्वादभयाद्, इव, अचिराद्, अपयान्ति ॥ १० ॥

(म०)अनुपालयतामिति । उदेष्यतीं वर्द्धिष्यमाणाम् । 'आच्छीनद्योर्नुम्' इति विकल्पान्नुमभावः । द्विषतां प्रभुशक्तिं कोशदण्डजं तेजः । 'स प्रभावः प्रतापश्च यत्तेजः-कोशदण्डजम्' इत्यमरः । अनीहयाऽनुत्साहेनानुपालयतामुपेक्षमाणानां महीभुजां श्रियः-

सम्पदो जननिर्वादभयान्निकृष्टपुरुषानुरागोत्थलोकापवादभयादिवेति हेतूत्प्रेक्षा । अचिरादपयान्त्यपसरन्ति । यथाऽऽह ,कामन्दकः—'स्त्रीभि' षण्ढ इव श्रीभिरलस' परिभूयते' इति । अतः पराक्रमितव्यमित्यर्थ' ॥ १० ॥

(भा०) अनुपालयतामिति । उदेष्यतीं वर्द्धिष्यमाणां द्विषतां शत्रूणां प्रभुशक्तिप्रतापम् अनीहयाऽनुत्साहेन, अनुपालयताम् अप्रतिकुर्वतां, महीभुजां राज्ञां श्रियःसम्पत्तयः, जननिर्वादभयाद् लोकापवादसाध्वसाद्, इव अचिराद् शीघ्रम् अपयान्ति, अपगच्छन्ति । शत्रुप्रतापमप्रतिकुर्वतां राज्ञां सम्पत्तयोऽचिरमेव विनश्यन्तीति पौरुषंविधेयमिति भावः । अत्र जननिर्वादभयादिवेति हेतुत्प्रेक्षणादुत्प्रेक्षाऽलङ्कारः ॥ १० ॥

ननु परिक्षीण कथं प्रलयेनाभियुज्यत इत्यत्राह—

क्षययुक्तमपि स्वभावजं दधतं धाम शिवं समृद्धये ।
प्रणमन्त्यनपायमुत्थितं प्रतिपच्चन्द्रमिव प्रजा नृपम् ॥ ११ ॥

अन्वयः—क्षययुक्तम्, अपि, स्वभावजं, शिवं, धाम, दधतम्, समृद्धये, उत्थितम्, अनपायम्, नृपम्, प्रतिपच्चन्द्रम्, इव, प्रजा, प्रणमन्ति ॥ ११ ॥

(म०) क्षयेति ॥ क्षययुक्तमपि तथा क्षीणमपि सन्तं स्वभावजं सहजं शिवं सर्वलोकाल्हादकं धाम क्षात्र' तेजः प्रकाशं च दधतं समृद्धये वृद्ध्यर्थमुत्थितमुद्युक्तम् । वर्द्धिष्णुमित्यर्थः । नृपं । प्रजाः । प्रतिपच्चन्द्रं द्वितीयाचन्द्रमिवेत्यर्थ. । प्रतिपच्छब्देन द्वितीयाग्रहणम् । प्रतिपदि तस्यादृश्यत्वादिति । प्रणमन्ति । प्रह्वीभावेन वर्त्तन्त इति भावः । चन्द्रं तु नमस्कुर्वन्ति । क्षीणस्याप्युत्साह कार्यसिद्धेर्निदानमित्यर्थ । 'जयं हि सततोत्साही दुर्बलोऽपि समश्नुते' इति कामन्दक ॥ ११ ॥

(भा०) क्षययुक्तमपीति । क्षययुक्तमपि=अल्पकलमपि क्षीणमपि, स्वभावजं स्वाभाविकं (सहजं) शिवं सकलजनानन्दप्रदं धाम तेजः, दधतं धारयन्तं समृद्धये वृद्ध्यर्थम्, उत्थितम् उद्युक्तम्, अनपायम् अविनाशिनं प्रतिपच्चन्द्रमिव द्वितीयाचन्द्रमिव, क्षययुक्तमपि=अल्पशक्तिकमपि, स्वभावजं सहजं शिवं सर्वलोकाल्हादकं धाम तेजो दधतं धारयन्तं समृद्धये, उत्थितम् उद्युक्तम् अनपायं वर्द्धिष्यमाणं नृपं राजानं प्रजाःसन्ततय' प्रणमन्ति नमस्कुर्वन्ति । क्षीणशक्तेरप्युत्साह सकलकार्यसाधक इत्युत्साहोविधेय इति भावः । अत्रोपमाऽलङ्कार ॥ ११ ॥

ननु प्रभुशक्तिशून्यस्योत्साह कुत्रोपयुज्यत इत्यत्राह—

प्रभवः खलु कोशदण्डयोः कृतपञ्चाङ्गविनिर्णयो नयः ।
स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते ॥ १२ ॥

अन्वयः—कृतपञ्चाङ्गविनिर्णयः, नयः, कोशदण्डयोः, प्रभवः, खलु । स. (नय.), विधेयपदेषु, दक्षताम्, लोकः, नियतिम्, इव, अनुरुध्यते ॥ १२ ॥

(म०) प्रभव इति ॥ कर्मणामारम्भोपायः, पुरुषद्रव्यसम्पद्, देशकालविभागो, विनिपातप्रतीकारः, कार्यसिद्धिश्चेति पञ्चाङ्गानि । यथाऽऽह कामन्दक -'सहायाः साधनोपाया विभागो देशकालयोः । विनिपातप्रतीकारः सिद्धिः पञ्चाङ्गमिष्यते' ॥ इति । पञ्चानामङ्गानां विनिर्णय. पञ्चाङ्गविनिर्णयः । 'तद्धितार्थ—'इत्यादिनोत्तरपदसमासः । कृतः पञ्चाङ्गविनिर्णयो यस्य येन वा स तथोक्तः । नयो नीतिः । मन्त्र इति यावत् । कोशोऽर्थराशिः । कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः' इत्यमर । दण्डश्चतुरङ्गसैन्यम् । 'दण्डोऽस्त्री शासने राज्ञां हिंसायां लगुडे यमे । यात्राऽऽज्ञायां सैन्यभेदे' इति वैजयन्ती । तयोः-कोशदण्डयो. । प्रभुशक्तेरित्यर्थः । प्रभवत्यस्मादिति प्रभवः-कारणम् । ऋदोरप् । स नयो विधेयपदेषु कार्यवस्तुषु । 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । दक्षतां क्षिप्रकारित्वम् । उत्साहमित्यर्थ । लोकः कृष्यादिप्रवृत्तो जनः । नियतिं दैवमिव । 'नियतिर्नियमे दैवे' इति विश्वः । अनुरुध्यते अनुसरति । रुधेर्द्वादिकात्कर्त्तरि लट् मन्त्रस्यापि मूलमुत्साहस्तन्मूलायाः प्रभुशक्तेर्मूलमिति किमु वक्तव्यम् । अतः स एवाश्रयणीय । यतो नक्तंदिवं मन्त्रयतस्तस्यापि प्रभोर्निरुत्साहस्य न किञ्चित्सिध्यतीति ॥ १२ ॥

(भा०) प्रभव इति । कृतपञ्चाङ्गविनिर्णय कृतसहायाद्यङ्गपञ्चकविनिश्चयः, नयो नीतिशास्त्रं कोशदण्डयोरर्थराशिचतुरङ्गसैन्ययोः प्रभवो हेतुः, स नयो नीतिशास्त्रं विधेयपदेषु कृत्यवस्तुषु दक्षतां क्षिप्रकारित्वम् (उत्साहं) लोको जनो नियतिं भाग्यमिव, अनुरुध्यतेऽनुगच्छति । नीतिशास्त्रस्याप्युत्साहानुगमनशीलत्वान्निरुत्साहस्य च कार्यसिद्ध्यभावादुत्साह एव कार्यसाधकत्वेनाश्रयणीय इति भावः । अत्रोपमाऽलङ्कारः॥१२॥

ननु सोत्साहस्यासहायस्य कथमर्थसिद्धिरित्यत्राह --

अभिमानवतो मनस्विनः प्रियमुच्चैः पदमारुरुक्षतः ।
विनिपातनिवर्त्तनक्षमं मतमालम्बनमात्मपौरुषम् ॥ १३ ॥

अन्वयः—अभिमानवत , प्रियम् , उच्चैः, पदम् , आरुरुक्षत , मनस्विन , आत्मपौरुषम् , विनिपातनिवर्त्तनक्षमम् , आलम्बनम् , मतम् (अस्ति) ॥ १३ ॥

(म०) अभिमानवत इति ॥ अभिमानवतो मानधनस्य प्रियमिष्टमुच्चैरुन्नतं पदं स्थानं राज्यादिकमारुरुक्षत आरोढुमिच्छत. प्राप्तुकामस्य मनस्विनो धीरस्यात्मपौरुषं स्वपुरुषकार एव विनिपातनिवर्त्तनक्षममनर्थप्रतीकारसमर्थमालम्बनं सहकारि मतमिष्टम् । यथा कस्य चित्तुङ्गमारोहतः किञ्चित्पतनप्रतिबन्धकमनुचरहस्तादिकमालम्बनं तद्वदिति ध्वनिः । किं पौरुषादन्यैः सहायै शूराणामिति भाव ॥ १३ ॥

(भा०) अभिमानवत इति । अभिमानवतो मानिनः प्रियम् ईप्सितम् उच्चैरुन्नतं पदं स्थानम् आरुरुक्षतः प्राप्तुकामस्य मनस्विनो धीरस्य (जनस्य) आत्मपौरुषं स्वकीयसामर्थ्यमेव विनिपातनिवर्त्तनक्षमं विपत्प्रतीकारसमर्थम् आलम्बनं सहायकं मतम्।

अस्तीति शेषः । पुरुषार्थशालिनां पौरुषातिरिक्तो न कश्चिदन्यः सहायोऽस्तीति भावः । आत्मपौरुषमेवालम्बनं नान्यदित्यन्यार्थागमादर्थापत्तिरलङ्कारः ॥ १३ ॥

पौरुषानङ्गीकारे दोषमाह—

विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः ॥ १४ ॥

अन्वयः—विपदः, अविक्रमम्, अभिभवन्ति, आपदुपेतम्, आयतिः, रहयति । निरायतेः, लघुता, नियता, अगरीयान्, नृपश्रियः, पदं, न (लभते) ॥ १४ ॥

(म०) विपद इति ॥ अविक्रमं पौरुषहीनं विपदोऽभिभवन्त्याक्रामन्ति । आपदुपेतं विपन्नमायतिरुत्तरकाल । 'उत्तर. काल आयति.' इत्यमरः । रहयति त्यजति । निरायतेः । आसन्नक्षयस्येत्यर्थः । लघुताऽगौरवं नियताऽवश्यम्भाविनी । न कश्चिदेनमाद्रियत इत्यर्थः । अगरीयांल्लघीयान्नृपश्रियो राजलक्ष्म्याः पदमास्पदं न भवति । यद्वा—नृपेति पदच्छेदः । तस्मात्पौरुषं कर्त्तव्यमेवेत्यर्थः । अत्र पूर्वपूर्वस्याविक्रमत्वादेरुत्तरोत्तरविपदादिकं प्रति कारणत्वात् कारणमालाऽऽख्योऽलङ्कारः) तथा सूत्रम्—पूर्वपूर्वस्योत्तरोत्तरहेतुत्वे कारणमाला ॥ १४ ॥

(भा०) विपद इति । विपदो विपत्तयः, अविक्रमं पुरुषार्थहीनं (जनम्) अभिभवन्ति तिरस्कुर्वन्ति, आपदुपेतं विपत्तियुक्तम् । आयतिरुत्तरकालो रहयति त्यजति । निरायते. आसन्नक्षयस्य (जनस्य) लघुताऽगौरवं नियताऽवश्यंभाविनी निश्चिता, अगरीयांल्लघीयान् (जनः) नृपश्रियो राजलक्ष्म्याः पदं स्थानं न भवति । पौरुषहीना अभिभवाद्यनेकक्लेशभाजिनो भवन्तीति पौरुषं विधेयमेवेति भावः । अत्र कारणमालानामालङ्कारः ॥ १४ ॥

फलितमाह—

तदलं प्रतिपक्षमुन्नतेरवलम्ब्य व्यवसायवन्ध्यताम् ।
निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः ॥ १५ ॥

अन्वयः—तद्, उन्नतेः, प्रतिपक्षम्, व्यवसायवन्ध्यताम्, अवलम्ब्य, अलम् । (यतः) पराक्रमाश्रया., समृद्धयः, विषादेन, समं, न, निवसन्ति ॥ १५ ॥

(म०) तदिति ॥ तत्तस्माद् , उपेक्षायां दोषसम्भवादित्यर्थः । उन्नतेरभ्युदयस्य प्रतिपक्षमन्तरायं व्यवसायवन्ध्यतामुद्योगशून्यतामवलम्ब्यालम् । अवलम्बनेनालमित्यर्थः । 'अलङ्खल्वोः प्रतिषेधयोः प्राचां क्त्वा" इति क्त्वाप्रत्ययः । तस्य ल्यबादेशः । तथा हि । पराक्रम आश्रयः कारणं यासां तास्तथोक्ताः समृद्धयः सम्पदो विषादेन सममनुत्साहेन सह न निवसन्ति । पौरुषसाध्या. सम्पदो नानुत्साहसाध्याः । उभयोः—सहावस्थानविरोधादित्यर्थः । वैधर्म्येण कार्यकारणरूपोऽर्थान्तरन्यासः ॥ १५ ॥

(भा०) तदिति । तत् तस्माद्, उन्नतेरुदयस्य प्रतिपक्षम् अन्तरायं व्यवसायवन्ध्यताम् उद्यमराहित्यम् अवलम्ब्याश्रित्य, अलं व्यर्थम् । तथा हि पराक्रमाश्रयाः पौरुषकारणाः समृद्धयः सम्पत्तयः, विषादेन ममम् अनुत्साहेन सह न निवसन्ति न तिष्ठन्ति । पौरुषानुत्साहयोः सहावस्थानविरोधात्पौरुषसाध्याः सम्पदो नानुत्साहसाध्या भवन्तीति भावः । अत्र वैधर्म्येण कार्यकारणरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥ १५ ॥

ननु समयः प्रतीक्ष्यते, किं वेगेनेत्यत्राह—

अथ चेदवधिः प्रतीक्ष्यते कथमाविष्कृतजिह्मवृत्तिना ।
धृतराष्ट्रसुतेन सुत्यजाश्चिरमास्वाद्य नरेन्द्रसम्पदः ॥ १६ ॥

अन्वयः—अथ, अवधिः, प्रतीक्ष्यते, चेत्, (तर्हि) आविष्कृतजिह्मवृत्तिना, धृतराष्ट्रसुतेन, नरेन्द्रसम्पदः, चिरम्, आस्वाद्य, कथं, सुत्यजाः (भविष्यन्ति) ॥ १६ ॥

(म०) अथेति ॥ अथावधिः कालः प्रतीक्ष्यते चेद् । 'अवधिस्त्ववधाने स्यात्सीम्नि काले बिलेऽपि च' इति विश्वः । आविष्कृतजिह्मवृत्तिना प्रकटितकपटव्यवहारेण धृतराष्ट्रसुतेन दुर्योधनेन नरेन्द्रसम्पदो राज्यसम्पदः । नरेन्द्रेति वा पदच्छेदः । चिरं चतुर्दशवर्षाण्यास्वाद्यानुभूय कथं सुत्यजाः । ज्ञातास्वादेन तेन पश्चादपि सुखेन युद्धक्लेशं विना न त्यक्ष्यन्त एवेत्यवधिप्रतीक्षणं व्यर्थमित्यर्थः ॥ १६ ॥

(भा०) अथेति । अथानन्तरम् अवधिः समयः प्रतीक्ष्यते समीक्ष्यते चेद् आविष्कृतजिह्मवृत्तिना प्रकटित (दर्शित) कपटव्यवहारेण धृतराष्ट्रसुतेन धृतराष्ट्रपुत्रेण (दुर्योधनेन) नरेन्द्रसम्पदो राज्यसम्पत्तीः (नरेन्द्रेति सम्बोधनं वा) चिरं चिरकालं (चतुर्दशवर्षकालम्) आस्वाद्य, अनुभूय कथं सुत्यजा, युद्धादिकमन्तरा नैव सुत्यजाः, इत्यर्थः । चिरकालं सम्पदास्वादज्ञाताऽसौ दुर्योधनो युद्धादिकमन्तरा सम्पदो न त्यक्ष्यतीति समयप्रतीक्षा व्यर्थेति भाव । नरेन्द्रसम्पदः कथं सुत्यजाः ? इत्यस्य युद्धादिक्लेशमन्तरा न सुत्यजा इत्यन्यार्थप्रतीत्याऽर्थापत्तिरलङ्कारः ॥ १६ ॥

अथवा तदा दैववशात्स्वयमेव सम्पदो दास्यति चेत्तथाऽपि तत्कथं रोचयेमहीत्याह—

द्विषता विहितं त्वयाऽथवा यदि लब्धा पुनरात्मनः पदम् ।
जननाथ ! तवानुजन्मनां कृतमाविष्कृतपौरुषैर्भुजैः ॥ १७ ॥

अन्वयः—अथवा, द्विषता, विहितम्, आत्मनः, पदं, पुनः, त्वया, लब्धा, यदि । (तदा) जननाथ ! तव, अनुजन्मनाम्, आविष्कृतपौरुषैः, भुजैः, कृतम् ॥ १७ ॥

(म०)द्विषतेति ॥ अथवा द्विषता विहितं पुनः प्रत्यर्पितमात्मनः पदं राज्यं त्वया लब्धा लप्स्यते यदि । लभेः कर्मणि लुट् । हे जननाथ ! तवानुजन्मनामनुजानामाविष्कृतपौरुषैः प्रकटितपराक्रमैर्भुजैः कृतमलम् । अस्मद्भुजैर्न किञ्चित्साध्यमित्यर्थः । रा-

ज्यदानादानयोर्द्विषतामेव स्वातन्त्र्येऽस्मद्भुजवैफल्यात् । 'क्षत्रियस्य विजितव्यम्' इति शास्त्रात्क्षात्रेणैव राज्यं ग्राह्यमिति भावः । कृतमिति प्रतिषेधार्थमव्ययं चादिषु पठ्यते । 'कृतमिति निवारणनिषेधयो ' इति गणव्याख्याने । भुजैरिति गम्यमानसाधनक्रियाऽपेक्षया करणत्वात्तृतीया । उक्तं च न्यासोद्द्योते-'न केवलं श्रूयमाणैव क्रिया निमित्तं कारकभावस्यापि तु गम्यमानाऽपि' इति ।। १७ ।।

(भा०) द्विषतेति । अथवा द्विषता शत्रुणा (दुर्योधनेन) विहितं दत्तम् आत्मनः-स्वस्य पदं राज्यं पुनर्भूयो लब्धा यदि लप्स्यते चेत् तदा जननाथ ! हे राजन् ! तव भवतोऽनुजन्मनां कनिष्ठभ्रातृणाम् आविष्कृतपौरुषैः प्रकटितपराक्रमैर्भुजैर्बाहुभि कृतं-व्यर्थम् । द्विषता समर्पितस्य राज्यस्य ग्रहणादस्मद्भुजवैफल्यात्क्षात्रेणैव धर्मेण राज्य-ग्रहणमुचितमिति भावः । आविष्कृतपौरुषैर्भुजैः कृतमित्यतस्तदा नास्मद्भुजैः किञ्चित्साध्यमित्यन्यार्थागमादर्थापत्तिरलङ्कारः । परिकरालङ्कारो वा ॥ १७ ॥

ननु साम्नैव कार्यसिद्धौ किं क्षात्रेण । यथाऽऽह मनु —'साम्ना दानेन भेदेन समस्तैरथवा पृथक् । विजेतुं प्रयतेतारीन्न युद्धेन कदा चन' इति । तत्किमाग्रहेणेत्याशङ्क्याह—

मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्त्तयते स्वयं हतैः ।
लघयन्खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः ॥ १८ ॥

अन्वय —मृगाधिपः, मदसिक्तमुखैः, स्वयं हतैः, करिभिः, वर्त्तयते। तेजसा, जगद्, लघयन्, महान्, अन्यतः, भूतिम्, न, इच्छति ॥ १८ ॥

(म०) मदेति ।। मृगाधिप. सिंहो मदसिक्तमुखै. । मदवर्षिभिरित्यर्थः । स्वयं स्वेनैव हतैः करिभिर्वर्त्तयते वृत्तिं करोति । तैरेव जीवतीत्यर्थ । चौरादिकाद् वृत्तेर्लट् । भौवादिकस्य तु 'अणावकर्मकाच्चित्तवत्कर्तृकाद्' इति परस्मैपदनियमादिति । तथाहि। तेजसा प्रभावेण । 'तेजो बले प्रभावे च ज्योतिष्यर्चिषि रेतसि, इति वैजयन्ती । जगल्लघयंल्लघूकुर्वन्महांस्तेजस्व्यन्यतोऽन्यस्मात्पुरुषाद् भूतिं वृद्धिं नेच्छति खलु । नहि तेजस्विनः परायत्तवृत्तित्वं युक्तम् । मनुवचनं त्वशूरविषयमिति भाव । विशेषेण वक्ष्यमाणसामान्यसमर्थनरूपोऽर्थान्तरन्यासः ।। १८ ।।

(भा०) मदसिक्तेति । मृगाधिप. सिंहः, मदसिक्तमुखैर्मदवर्षिभिः स्वयंहतैः स्वयं-विनाशितैः करिभिर्हस्तिभिः, वर्त्तयते वृत्तिं करोति । तेजसा सामर्थ्येन जगद् लघयन् लघूकुर्वन् महान् तेजस्वी पुरुषः, अन्यतोऽन्यस्मात्पुरुषाद्, भूतिं सम्पत्तिं नेच्छति नाभिलषति खलु । नहि तेजस्विनः पराधीनवृत्तयो भवन्ति । मनूक्तवचनं त्वशूरविषयकमिति भावः । एतत्पद्यप्रतिपाद्येन विशेषार्थेन वक्ष्यमाणस्य सामान्यार्थस्य समर्थनाद्विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासालङ्कारः ॥ १८ ॥

ननु युद्धात्पाक्षिको लाभः, उपायान्तरैस्तु न तथेत्याशङ्क्याह—

अभिमानधनस्य गत्वरैरसुभिः स्थास्नु यशश्चिचीषतः ।
अचिरांशुविलासचञ्चला ननु लक्ष्मीः फलमानुषङ्गिकम् ॥१९॥

अन्वयः—अभिमानधनस्य, गत्वरैः, असुभिः, स्थास्नु, यशः, चिचीषतः, अचिरांशुविलासचञ्चला, लक्ष्मीः, आनुषङ्गिकं, फलं, ननु ॥ १९ ॥

(म०) अभिमानेति ॥ अभिमानधनस्य वैरनिर्यातनमात्रनिष्ठस्य । अत एव गत्वरैर्गमनशीलैरस्थिरैः । 'गत्वरश्च' इति क्वरबन्तो निपातः । असुभिः । प्राणैः । करणैः । 'पुंसि भूम्न्यसवः प्राणाः' इत्यमरः । स्थास्नु स्थिरम् । 'ग्लाजिस्थश्च ग्स्नुः' इति ग्स्नुप्रत्ययः । यशश्चिचीषतश्चेतुं संग्रहीतुमिच्छतः । चिनोतेः सन्नन्ताच्छतृप्रत्ययः । अचिरमंशवो यस्याः साऽचिरांशुर्विद्युत्तस्या विलासः स्फुरणं तद्वच्चञ्चला । क्षणिकेत्यर्थः । लक्ष्मीः सम्पदनुषङ्गादागतमानुषङ्गिकमन्वाचयशिष्टमल्पं फलम् । मानत्राणजं यश एव मुख्यं फलमभ्युच्चयस्तु लक्ष्मीरिति मानिनामिदमेव श्लाघ्यमित्यर्थः । अत्रास्थिरप्राणत्यागेन स्थिरयशःस्वीकाराभिधानान्न्यूनाधिकविनिमयाख्यः परिवृत्त्यलङ्कारः । तदुक्तं काव्यप्रकाशे-'परिवृत्तिर्विनिमयो योऽर्थानां स्यात्समासमैः' इति ॥१९॥

(भा०) अभिमानेति । अभिमानधनस्य मानिनः (शत्रुनिर्यातनमात्रनिष्ठस्य) अत एव गत्वरैर्गमनशीलैरसुभिः प्राणैः स्थास्नु स्थिरं यशः कीर्त्तिं चिचीषतः सङ्ग्रहीतुमिच्छतः (पुरुषस्य) अचिरांशुविलासचञ्चला विद्युत्स्फुरणचपला लक्ष्मीः सम्पद् आनुषङ्गिकम् अनायासलभ्यं फलं ननु । मानत्राणाय यश एव मुख्यं फलं लक्ष्मीस्त्वप्रधानफलमिति मानिनामिदमेव प्रशस्यमिति भावः । अस्थिरासुत्यागेन स्थिरयशोऽङ्गीकारोक्त्या न्यूनाधिकयोर्विनिमयेन परिवृत्त्यलङ्कारः ॥ १९ ॥

नन्वल्पस्य मानस्य हेतोः कथं प्राणत्यागः शक्यते कर्त्तुं, यतः—'जीवन्नरो भद्रशतानि पश्येद्' इत्याशङ्क्याह—

ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः ।
अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः ॥ २० ॥

अन्वयः—जनः, भस्मनां, चयम्, आस्कन्दति, (किन्तु) ज्वलितं, हिरण्यरेतसं, न, (आस्कन्दति) अतः, अभिभूतिभयाद्, असून्, सुखम्, उज्झन्ति, धाम, न (उज्झन्ति) ॥ २० ॥

(म०) ज्वलितमिति ॥ जनो भस्मनां चयं पुञ्जमास्कन्दति पादादिनाऽऽक्रामति । अदाहकत्वादिति भावः । ज्वलन्तम् । कर्त्तरि क्तः । 'मतिबुद्धि-' इत्यादिसूत्रे चकाराद्वर्त्तमानार्थत्वम् । हिरण्यं रेतो यस्य तं हिरण्यरेतसमग्निं नास्कन्दति । दाहकत्वादिति भावः । अतो हेतोर्मानिनोऽभिभूतिभयात्प्राणलाभेन तेजस्त्यागे परिभवो भविष्यतीति

भयादसूनेव सुखमक्लिष्टमुज्झन्ति । मानहानिकराज्जीवनात्स्वतेजसा मरणमेव वरमित्यर्थः । पूर्वतरश्लोकवदर्थान्तरन्यासः ॥ २० ॥

(भा०) ज्वलितमिति । जनो लोकः, भस्मनां चयम् भूतीनां पुञ्जम् आस्कन्दति पादादिनाऽऽक्रामति ज्वलितं प्रदीप्तं हिरण्यरेतसं वह्निं नास्कन्दति । अतोऽस्मात्कारणाद् मानिनोऽभिमानवन्तः, अभिभूतिभयाद् अनादरभीत्या । असून् प्राणान् सुखमक्लिष्टं यथा तथा, उज्झन्ति त्यजन्ति धाम तेजो नोज्झन्ति न त्यजन्ति । मानिनां मानत्यागापेक्षया प्राणत्याग एव वरमिति भावः । विशेषेण वक्ष्यमाणसामान्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥ २० ॥

अथवा किमत्र प्रयोजनचिन्तया, किन्तु तेजस्विनामयं स्वभाव एव यज्जिगीषुत्वमित्याशयेनाह—

किमपेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥ २१ ॥

अन्वयः—मृगाधिपः, किं, फलम् , अपेक्ष्य, ध्वनतः, पयोधरान् , प्रार्थयते । महीयसः, सा, प्रकृतिः, खलु । यया, अन्यसमुन्नतिं, न, सहते ॥ २१ ॥

(म०) किमिति ॥ मृगाधिपः सिंह किं फलं प्रयोजनमपेक्ष्य ध्वनतो गर्जत । धरन्तीति धरा । पचाद्यच् । पयसां धरास्तान्पयोधरान्मेघान्प्रार्थयतेऽभियाति 'याच्ञायामभियाने च प्रार्थना कथ्यते बुधैः' इति केशव । यद्वा–अवरुणद्धीत्यर्थः । प्रा–अर्थयते । 'प्रा स्याद् याच्ञाऽवरोधयोः' इत्यभिधानात्प्रा अवरोधेन । प्रा इति तृतीयान्तस्य प्राशब्दस्य योगविभागाद् 'आतो धातो., इत्यालोप । तथा हि । महीयसो महत्तरस्य सा प्रकृतिः खलु यया प्रकृत्याऽन्यसमुन्नतिं परवृद्धिं न सहते । महत परभञ्जनमेव पुरुषार्थ इत्यर्थ. । पूर्ववदलङ्कार ॥ २१ ॥

(भा०) किमपेक्ष्येति । मृगाधिपः सिंह. किं फलं प्रयोजनम् अपेक्ष्योद्दिश्य ध्वनतो-गर्जतः पयोधरान् मेघान् प्रार्थयतेऽभियाति । तथा हि महीयसोऽत्युत्कर्षशालिन. (जनस्य) सा प्रकृति. स्वभावः खलु यया प्रकृत्याऽन्यसमुन्नतिं परोदयं न सहते न मृष्यते । महतां (पौरुषवतां) परपीडनमेव पौरुषमिति भाव । अत्राप्यर्थान्तरन्यासोऽलङ्कारः ॥ २१ ॥

निगमयति—उक्तार्थोपसंहरणं निगम उच्यते—

कुरु तन्मतिमेव विक्रमे नृप ! निर्धूय तमः प्रमादजम् ।
ध्रुवमेतदवेहि विद्विषां त्वदनुत्साहहता विपत्तयः ॥ २२ ॥

अन्वयः—नृप ! तत् , प्रमादजं, तमः, निर्धूय, विक्रमे, मतिं, कुरु । विद्विषां, विपत्तयः, त्वदनुत्साहहताः, (सन्ति) एतद् , ध्रुवम् , अवेहि ॥ २२ ॥

(म०) कुरु तदिति ॥ हे नृप ! तत्तस्मादुक्तरीत्या पराक्रमोत्साहयोर्हेतुत्वाद्धेतोः- 'यत्तद्यतस्ततो हेतौ' इत्यमरः । प्रमादजं तमो मोहं निर्धूय निरस्य विक्रमे पौरुष एव मतिं कुरु, न तूपायान्तरमित्यर्थः । न च विक्रमवैफल्यशङ्का कार्येत्याह—ध्रुवमिति । विद्विषां विपत्तयस्त्वदनुत्साहहतास्तवानुत्साहेनाव्यवसायेन हताः प्रतिबद्धाः । अन्यथा प्रागेव विपद्येरन्निति भावः । इत्येतद् ध्रुवं निश्चितमवेहि विद्धि । 'ध्रुवं नित्ये निश्चिते च' इति शाश्वतः ॥ २२ ॥

(भा०) कुरु तदिति । नृप ! हे राजन् ! तत्तस्माद्धेतोः प्रमादजम् अनवधानोत्पन्नम् । तमो मोहं निर्धूय निरस्य (परित्यज्य) विक्रम एव पुरुषार्थ एव मतिं बुद्धिं कुरु विधेहि विद्विषां शत्रूणां विपत्तयो विपदः, त्वदनुत्साहहताः, तवाव्यवसायप्रतिबद्धाः, ध्रुवं निश्चितम् अवेहि जानीहि । त्वदालस्याद्दरिद्रं स्वं विनष्टमन्यथा प्रागेव ते विनश्येयुरिति भावः) उत्तरार्द्धप्रतिपाद्यवाक्यार्थम्प्रति पूर्वार्द्धप्रतिपाद्यवाक्यार्थस्य हेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ २२ ॥

न च नः पराजयशङ्का कार्येत्याह—

द्विरदानिव दिग्विभावितांश्चतुरस्तोयनिधीनिवायतः ।
प्रसहेत रणे तवानुजान् द्विषतां कः शतमन्युतेजसः ॥ २३ ॥

अन्वय.— दिग्विभावितान्, आयतः, चतुरः, द्विरदान्, इव, (दिग्विभावितान्, आयतः, चतुरः) तोयनिधीन्, इव, रणे, (आयतः, दिग्विभावितान्, चतुरः,) शतमन्युतेजसः, तव, अनुजान्, द्विषतां, कः, प्रसहेत ? ॥ २३ ॥

(म०) द्विरदानिति ॥ दिग्विभावितान्दिक्षु प्रसिद्धांस्तानायत आगच्छतः । आङ्पूर्वादिण्धातोः शतृप्रत्ययः । चतुरो द्विरदान्दिग्गजानिव, तथोक्तविशेषणांश्चतुरस्तोयनिधीनिव, रण आयतो दिग्विभाविताञ्छतमन्युतेजस इन्द्रविक्रमांश्चतुरस्तवानुजान्द्विषतां मध्ये कः प्रसहेत । सोढुं शक्नुयादित्यर्थः । 'शकि लिङ् च' इति शक्यार्थे लिङ् । अतो निःशङ्कं प्रवर्तस्वेति भावः ॥ २३ ॥

(भा०) द्विरदानिति । दिग्विभावितान् दिक्षु प्रसिद्धान् आयत आगच्छतः, चतुरश्चतुःसंख्यकान् द्विरदान् दिग्गजानिव दिग्विभावितान् दिक्षु प्रसिद्धान् आयत आगच्छतश्चतुरश्चतुःसंख्यकांस्तोयनिधीन् समुद्रानिव रणे संग्रामे आयतो दिग्विभावितांश्चतुरः शतमन्युतेजस इन्द्रसदृशपराक्रमशालिन, तव भवतोऽनुजान् कनिष्ठसोदरान् द्विषतां शत्रूणां मध्ये कः प्रसहेत, न कोऽपीत्यर्थः । इन्द्रतुल्यपराक्रमवतां तवानुजानां दर्शनादेव रणे द्विषदवस्थानासम्भवान्निश्शङ्कं प्रवर्त्तितव्यमिति भावः । पूर्वार्द्धे उपमाद्वयम् । उत्तरार्द्धे कः प्रसहेत न कोऽपीत्यन्यार्थागमादर्थापत्तिरलङ्कारश्चेति संसृष्टिः ॥ २३ ॥

आशीर्वादव्याजेन फलितमाह—

ज्वलतस्तव जातवेदसः सततं वैरिकृतस्य चेतसि ।
विदधातु शमं शिवेतरा रिपुनारीनयनाम्बुसन्ततिः ॥ २४ ॥

अन्वयः—तव, चेतसि, वैरिकृतस्य, सततं, ज्वलतः, जातवेदसः, शिवेतरा, रिपुनारीनयनाम्बुसन्तति , शमं, विदधातु ॥ २४ ॥

(म०) ज्वलत इति ॥ तव चेतसि सततं ज्वलतो वैरिकृतस्य जातवेदसः । क्रोधाग्नेरित्यर्थः । शिवेतराऽशिवाऽमङ्गला । वैधव्यदुःखजनकत्वादिति भावः । रिपुनारीनयनाम्बुसन्ततिर्वैरिवनिताऽश्रुप्रवाहः शमं विदधातु । वैरिकृतस्य क्रोधस्य वैरिवधमन्तरेण शान्त्यसम्भवादवश्यं तद्वधस्त्वया कर्त्तव्य इत्यर्थः । क्रोधस्य विषयस्य निगरणेन विषयिणो जातवेदस एवोपनिबन्धादतिशयोक्तिरलङ्कारः । तदुक्तं–'विषयस्यानुपादानाद्विषय्युपनिबध्यते । यत्र साऽतिशयोक्तिः स्यात्कवेः प्रौढोक्तिजीविता' ॥ इति । तत्रापि क्रोधस्य जातवेदसो भेदेऽप्यभेदाध्यवसायाद् भेदेऽभेदरूपा । तत एवाम्बुनिर्वाप्यत्वोक्तिश्च घटते । तया च–यथाऽम्बुसेकेनाग्निः शाम्यति तथा शत्रुवधेन क्रोध इत्यौपम्यं गम्यते ॥ २४ ॥

(भा०) ज्वलत इति । तव भवतः, चेतसि हृदये वैरिकृतस्य शत्रूत्पादितस्य सततम् अनवरतं ज्वलतो दीप्तस्य जातवेदसो वह्नेः शिवेतरा अशुभा रिपुनारीनयनाम्बुसन्ततिः शत्रुस्त्रीनेत्रजप्रवाहः शमं शान्ति विदधातु विरचयतु । शत्रुविनाशमन्तरेण कोपस्याप्रशमनादवश्यं त्वया तद्विनाशो विधातव्य इति भावः । भेदेऽप्यभेदरूपाऽतिशयोक्तिरलङ्कारः । अम्बुसेकेनाग्निरिव शत्रुवधेन क्रोधः शाम्यतीति गम्योपमा चेत्युभयोः सङ्करः ॥ २४ ॥

इति दर्शितविक्रियं सुतं मरुतः कोपपरीतमानसम् ।
उपसान्त्वयितुं महीपतिर्द्विरदं दुष्टमिवोपचक्रमे ॥ २५ ॥

अन्वयः—इति, दर्शितविक्रियं, कोपपरीतमानसं, मरुतः, सुतम्, महीपतिः, (दर्शितविक्रियं, कोपपरीतमानसम्) दुष्टं, द्विरदम्, इव, उपसान्त्वयितुम्, उपचक्रमे॥२५॥

(म०) इतीति ॥ इत्युक्तरीत्या दर्शिता विक्रिया विकारो वागारम्भात्मको येन तं कोपपरीतमानसं कोपाक्रान्तचित्तम् । इदं विशेषणद्वयं द्विरदेऽपि योज्यम् । मरुतःसुतं भीमं महीपतिर्युधिष्ठिरो दुष्टं द्विरदमिव । एतेन भीमस्य शौर्यमेव, न बुद्धिरस्तीति गम्यते । उपसान्त्वयितुमनुनेतुमुपचक्रमे प्रवृत्तः 'प्रोपाभ्यां समर्थाभ्याञ्च' इत्यात्मनेपदम् । राज्ञा तावदुपकारविशेषापेक्षया कथञ्चिदवशो जनः शनैः शनैर्द्विरदवद्वशीकरणीयः, न तु त्याज्य इति भावः ॥ २५ ॥

(भा०) इति दर्शितेति । इति उक्तप्रकारेण दर्शितविक्रियं दर्शितवागारम्भात्म-कविकारं कोपपरीतमानसं क्रोधाक्रान्तहृदयं मरुतः सुतं वायो. पुत्रं (भीमं) महीपति-र्युधिष्ठिरः, दर्शितविक्रियं कोपपरीतमानसं दुष्टं खलं द्विरदं गजमिव, उपसान्त्वयितुं-वशीकर्तुम् उपचक्रमे प्रवृत्त । भविष्यन्महोपकारानुरोधादनायत्तो जनो राज्ञा क्रमशो-गजवद् वशीकार्यो नोपेक्षणीय इति भावः । अत्र श्रौतीपूर्णोपमाऽलङ्कारः ॥ २५ ॥

प्रथमं तावत्स्तुत्यादिभिः प्रसादयति—

अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे ।
विमला तव विस्तरे गिरां मतिरादर्श इवाभिदृश्यते ॥ २६ ॥

अन्वयः—अपवर्जितविप्लवे, शुचौ, हृदयग्राहिणि, मङ्गलास्पदे, आदर्शे, इव, (अपवर्जितविप्लवे, शुचौ, हृदयग्राहिणि, मङ्गलास्पदे) तव, गिरां, विस्तरे, विमला, मतिः अभिदृश्यते ॥ २६ ॥

(म०) अपवर्जितेति ॥ विप्लवः प्रमाणबाध । अन्यत्र बाह्यमलसंक्रमः । सोऽपव-र्जितो यस्य तस्मिन्नपवर्जितविप्लवे । शुचौ । सौशब्द्यं लोहशुद्धिश्च शुचित्वम् । तद्वती-त्यर्थः । अत एव हृदयग्राहिणि मनोरमे मङ्गलास्पदे । एकत्र हितार्थप्रतिपादकत्वाद-न्यत्र मङ्गलवस्तुत्वाच्च श्रेयस्करे । 'रोचनं चन्दनं हेम मृदङ्गं दर्पणं मणिम् । गुरुमग्नि-तथा सूर्यं प्रात पश्येत्सदा बुध ' ॥ इति पुराणवचनात् । तव गिरां विस्तरे वाक्प्र-पञ्चे । 'प्रथने वावशब्दे' इति घञ्प्रतिषेधाद् 'ऋदोरप्' इत्यप् । अत एव 'विस्तारो-विग्रहो व्यास. स तु शब्दस्य विस्तरः' इत्यमरः । मतिस्त्वद्बुद्धिरादर्शे दर्पण इव । 'दर्पणे मुकुरादर्शौ' इत्यमरः । विमला विशदाऽभिदृश्यते । वाग्वैशद्यादेव मतिवैशद्यमनु-मीयते । तत्पूर्वकत्वात्तस्येत्यर्थः ॥ २६ ॥

(भा०) अपवर्जितेति । अपवर्जितविप्लवे त्यक्तबाह्यमलसङ्क्रमे शुचौ लोहशुद्धि-मति हृदयग्राहिणि मनोरमे मङ्गलास्पदे श्रेयस्करे, आदर्शे दर्पण इव, अपवर्जितवि-प्लवे परित्यक्तप्रमाणबाधे शुचौ शब्दसौष्ठवयुक्ते हृदयग्राहिणि चितानन्दजनके मङ्गला-स्पदे हितार्थप्रतिपादके तव भवतो गिरां विस्तरे वाक्प्रपञ्चे विमला विशदा मतिर्बुद्धिः, अभिदृश्यते विलोक्यते । तव वाग्वैशद्येनैव मतिवैशद्यमनुमीयत इति भाव । उपमा-ऽलङ्कार ॥ २६ ॥

अथ युग्मेनाह—

स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् ।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्व चित् ॥२७॥

अन्वयः—पदैः, स्फुटता, न, अपाकृता। अर्थगौरवं, च, न, न, स्वीकृतम्, गिरां, पृथगर्थता, रचिता, क्व चित्, सामर्थ्यं, न, अपोहितम् ॥ २७ ॥

(म०) स्फुटतेति। पदैः सुप्तिङन्तशब्दैः स्फुटता विशदार्थता नापाकृता न. त्यक्ता। अर्थभूयस्त्वं च न न स्वीकृतम्। स्वीकृतमेवेत्यर्थः। वैशद्यप्रसक्तार्थगौरवाभावनिवर्तनार्थं नञ्द्वयम्। 'सम्भाव्यनिषेधनिवर्त्तने द्वौ प्रतिषेधौ, इति वामनः। गिरां पदानामवान्तरवाक्यानां च पृथगर्थता भिन्नार्थता। अपुनरुक्तार्थतेति यावत्। रचिता कृता। तथा क्व चिदपि सामर्थ्यं गिरामन्योऽन्यसाकाङ्क्षत्वं नापोहितं न वर्जितम्। अन्यथा दशदाडिमादिशब्दवदेकवाक्यता न स्याद्। यथाऽऽहुः—'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्याद्' इति। नन्वर्थगौरवमित्यत्र कथं षष्ठी समासः, 'पूरणगुण—'इत्यादिना प्रतिषेधाद्। नैष दोषः। ये शुक्लादयः शब्दा गुणे गुणिनि च वर्त्तन्ते यथा पटस्य शौक्ल्यं शुक्लः पट इति च तेषामेवात्र निषेधाद्। ये पुनः स्वतो गुणमात्रवचना यथा–गौरवं प्राधान्यं रसो गन्धः स्पर्श इत्येवमादयः, तेषामनिषेधात्। तथा 'तत्स्थैश्च गुणैः षष्ठी समस्यते' इति वचनाद् बहुलमभियुक्तप्रयोगदर्शनाच्च। बलाकायाः शौक्ल्यमित्यादौ तु भाष्यकारवचनादसमासः। अत एवाह वामनः—'पत्रपीतिमादिषु गुणवचनसमासो बालिश्याद्' इति ॥ २७ ॥

(भा०) स्फुटतेति। पदैः सुप्तिङन्तशब्दैः स्फुटता विशदार्थता नापाकृता न त्यक्ता, अर्थगौरवं तात्पर्यबाहुल्यं च न न स्वीकृतं (किन्तु) स्वीकृतमेव। गिरां पदानाम् अवान्तरवाक्यानाञ्च पृथगर्थता भिन्नार्थता रचिता कृता तथा क्व चित्कुत्र चिदपि सामर्थ्यं वागन्योऽन्यसाकाङ्क्षत्वं नापोहितं न परित्यक्तम्। परिनिष्ठिता त्वदीया वाणीति भाव.। एकस्य पदरूपकर्तृकारकस्यापाकरणाभावाद्यनेकक्रियास्वन्वयाद्दीपकालङ्कारः ॥ २७ ॥

उपपत्तिरुदाहृता बलादनुमानेन न चागमः क्षतः।
इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः ॥ २८ ॥

अन्वयः—बलाद्, उपपत्तिः, उदाहृता। अनुमानेन, आगमः, च, न, क्षतः, ईदृग्, इदम्, अनीदृगाशयः, कः, प्रसभं, वक्तुम्, उपक्रमेत ॥ २८ ॥

(म०) उपपत्तिरिति। किञ्च बलाद् बलमाश्रित्य। कर्मणि ल्यब्लोपे पञ्चमी वक्तव्या। उपपत्तिर्युक्तिरुदाहृता। पराक्रमपक्ष एव श्रेयानिति युक्तिरुक्तेत्यर्थः। उचितं चैतन्महावीरस्येति भावः। तथाऽनुमानेन युक्त्याऽऽगमः शास्त्रं च न क्षतो न हतः। किन्त्वागमाविरुद्धमेवोक्तम्। अन्यथा–तद्विरोधानुमानस्यैव प्रामाण्यभङ्गादिति भावः। ईदृगित्थं क्षात्रयुक्तमिदं वचनमविद्यमान इदृगाशय इत्थं क्षात्रयुक्ताभिप्रायो यस्य सोऽनीदृगाशयः। 'अभिप्रायश्छन्द आशयः' इत्यमरः। कः प्रसभं हठाद्वक्तुमुपक्रमेत। न कोऽपीत्यर्थः। इत्थं वक्तुमुपक्रमितैव नास्ति। वक्ता तु दूरापास्त एवेति भावः। के चिदेत-

च्छ्लोकत्रयं निन्दापरत्वेनापि योजयन्ति । तदसत् । हितोपदेशमात्रतत्परस्यातिवत्सलस्य राज्ञो मत्सरिण इव महावीरे भ्रातरि विधेये सर्वानर्थमूलभूतनिन्दातात्पर्यकल्पनाऽनौचित्यादिति ॥ २८ ॥

(भा०) उपपत्तिरिति । बलाद् आत्मबलमाश्रित्य, उपपत्तिर्युक्तिः, उदाहृता कथिता, अनुमानेन युक्त्या, आगम शास्त्रं च न क्षतो न हतः । ईदृग् इत्थं क्षात्रयुक्तम् इदं वचनम् अनीदृगाशयः, अविद्यमानक्षात्रयुक्ताभिप्रायः कः प्रसभं हठाद् वक्तुम् अभिधातुम् उपक्रमेतारभेत न कोऽपि । एतादृशवागुपक्रमितैव नास्ति वक्ता तु दूरे तिष्ठतीति भावः । क उपक्रमेत ? कोऽपीत्यन्यार्थागमादर्थापत्तिरलङ्कारः ॥ २८ ॥

यदि साधूक्तं तर्हि तथैव क्रियतामित्याशङ्क्याह—

अवितृप्ततया तथाऽपि मे हृदयं निर्णयमेव धावति ।
अवसाययितुं क्षमाः सुखं न विधेयेषु विशेषसम्पदः ॥२९॥

अन्वयः—तथाऽपि, मे, हृदयम्, अवितृप्ततया, निर्णयम् , एव, धावति । विधेयेषु, विशेषसम्पदः , सुखम् , अवसाययितुं, न, क्षमाः (भवन्ति) ॥ २९

(म०) अवितृप्ततयेति ॥ तथाऽपि त्वया सम्यङ्निर्णीतेऽपि मे हृदयमवितृप्ततयाऽसन्तुष्टतया । अद्यापि संशयगतत्वेनेत्यर्थ । निर्णयमेव धावत्यनुसरति । अपेक्षत इति यावद् । अद्यापि निर्णयस्यानुदयादिति भाव । निर्णयानुदये हेतुमाह—अवेति । विधेयेषु सन्धिविग्रहादिकर्त्तव्यार्थेषु या विशेषसम्पदोऽवान्तरभेदभूमानस्ताः सुखमक्लेशेऽवसाययितुम् । पुरुषान्प्रत्यानुकूल्येन स्वस्वरूपं स्वयमेव शीघ्रं प्रत्याययितुमित्यर्थः । स्यतेर्ण्यन्तादणिकर्मकर्तृकात्तुमुन् । णेरणादिसूत्रस्यायं विषयः । क्षमन्त इति क्षमाः । पचाद्यच् । शक्ता न भवन्ति । 'क्षमं शक्ते हिते त्रिषु' इत्यमरः । विधेयमात्रस्य सुगमत्वेऽपि तद्विशेषाणां सौक्ष्म्याद्बाहुल्याच्च दुर्ज्ञेयत्वादद्यापि निर्णयाकाङ्क्षेति तात्पर्यार्थः । अत्र निर्णयधावनं प्रत्युत्तरवाक्यार्थस्य हेतुत्वाभिधानाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । तदुक्तं—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्' ॥ २९ ॥

(भा०) अवितृप्ततयेति । तथाऽपि भवता सम्यङ्निर्णीतेऽपि मे मम हृदयं चित्तम् अवितृप्ततयाऽसन्तुष्टतया निर्णयमेव विचारमेव (सिद्धान्तमेव) धावत्यपेक्षते । विधेयेषु सन्धिविग्रहादिकर्त्तव्यप्रयोजनेषु विशेषसम्पदोऽवान्तरभेदसमृद्धयः सुखम् अनायासेन, अवसाययितुम् आत्मस्वरूपं स्वयमेव प्रत्याययितुं न क्षमा न समर्थाः । सन्धिविग्रहादिकर्त्तव्यप्रयोजनानां सुगमत्वेऽपि तदवान्तरभेदानां सूक्ष्मत्वादाधिक्याच्च दुर्ज्ञेयत्वादद्यापि विचारकाङ्क्षेति भावः । पूर्वार्द्धगतवाक्यार्थम्प्रति परार्द्धगतवाक्यार्थो हेतुरिति वाक्यार्थहेतुकं काव्यलिङ्गम् ॥ २९ ॥

वस्तुविशेषावधारणमन्तरेणैव प्रवृत्तिरित्याशङ्क्याह—

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥३०॥

अन्वयः—क्रियां, सहसा, न विदधीत । अविवेक , आपदां, परम् , पदं (भवति) । हि, गुणलुब्धाः, सम्पदः, विमृश्यकारिणं, स्वयम् , एव, वृणते ॥ ३० ॥

(म०) सहसेति ॥ क्रियत इति क्रियां कार्यं सहसा । अविमृश्येत्यर्थ । 'सहसेत्याकस्मिकाविमर्शयो.' इति गणव्याख्याने स्वरादिपाठादव्ययम् । न विदधीत न कुर्वीत । कुतः । अविवेकोऽविमृश्यकारित्वं परमत्यन्तमापदां पदं स्थानम् । कारणमित्यर्थः । व्यतिरेकेणोक्तमर्थमन्वयेनाह—वृणत इति । गुणलुब्धा गुणगृध्नव इति स्वयंवरहेतूक्ति. । सम्पदः श्रियः । विमृश्य करोतीति विमृश्यकारी । 'उपपदमतिङ्' इति समासः । तं स्वयमेव वृणते भजन्ते हि । 'वृङ् संभक्तौ' इति धातु । तस्माद्विमृश्यैव प्रवर्त्तितव्यमित्यर्थ । अत्र सहसा विधाननिषेधलब्धविमृश्यकारित्वरूपकारणस्यापद्रूपव्यतिरेककार्येण समर्थनाद्वैधर्म्येणार्थान्तरन्यास । द्वितीयार्धेन च स एव साधर्म्येणेति ज्ञेयम् ॥ ३० ॥

(भा०) सहसेति । क्रियां कार्यं सहसा हठाद् न विदधीत न कुर्वीत कुतः? अविवेकोऽविचारः, आपदां विपत्तीनाम् परं प्रधानं पदं स्थानम् । हि यतो यस्माद् गुणलुब्धा गुणग्रहणशीलाः सम्पदः सम्पत्तयः, विमृश्यकारिणं विचारशीलं (जनं) स्वयमेव वृणत आश्रयन्ति । अविमृश्य कार्ये प्रवृत्तौ विपद्बाहुल्याद्विमृश्यैव प्रवर्त्तितव्यमिति भावः । अत्र वैधर्म्येणार्थान्तरन्यासोऽलङ्कार ॥ ३० ॥

ननु साहसिकस्यापि फलसिद्धिर्दृश्यत एव । तत्किं विवेकेनेत्यत्राह—

अभिवर्षति योऽनुपालयन्विधिबीजानि विवेकवारिणा ।
स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति ॥३१॥

अन्वयः—यः, विधिबीजानि, विवेकवारिणा, अनुपालयन् , अभिवर्षति, सः, लोक , फलशालिनीम्, शरदम्, इव, क्रियाम् , सदा, अधितिष्ठति ॥ ३१ ॥

(म०) अभीति ॥ य पुमान् । विधीयन्त इति विधयः कृत्यवस्तूनि बीजानीवेत्युपमितसमासः । शरदं लोक इवेति वाक्यगतोपमाऽनुसारात् । तानि विधिबीजानि । विवेको वारीव तेन विवेकवारिणा । पूर्ववत्समास. । अनुपालयन्प्रतीक्षमाणः संरक्षन्नभिवर्षति सिञ्चति । स पुमान् । फलं साधननिष्पाद्योऽर्थ., सस्यं च 'सस्य हेतुकृते फलम्' इत्युभयत्राप्यमरः । तच्छालिनीं क्रियां कर्म लोको जनः । 'लोकस्तु भुवने जने' इत्यमरः । शरदमिव सदा नित्यमधितिष्ठति । सदा क्रियाफलं प्राप्नोत्येव । न कदा चिद्व्यभिचरतीत्यर्थः । साहसिकस्य काकतालीयन्यायेन फलसिद्धिर्विवेकिनस्तु नियतेति

भाव । अत्र फलशब्देन सस्यहेतुकृतयोरर्थयोरभेदाध्यवसायाच्छ्लेषमूलातिशयोक्तिस्त-दनुगृहीता चोपमेत्यनुसन्धेयम् ॥ ३१ ॥

(भा०) अभिवर्षतीति । यः पुरुष., विधिबीजानि बीजसदृशकृत्यवस्तूनि विवेक-वारिणा विचाराम्बुना, अनुपालयन् प्रतीक्षमाणः सन् , अभिवर्षति सिञ्चति । स पुरुष - लोको जन फलशालिनीं सस्यशालिनीं शरदमिव फलशालिनीं क्रियां साधननिष्पा-द्यार्थयुक्तां कृतिम् सदा सर्वदा, अधितिष्ठत्यधिगच्छति । साहसिकानां काकताली-यन्यायेन फलसिद्धि , विवेकिनां तु निश्चितेति भाव । अत्र श्लेषमूलाऽतिशयोक्तिस्त-दनुगृहीता चोपमेत्यलङ्कारद्वयसंसृष्टिः ॥ ३१ ॥

'नियता विवेकिनः फलसिद्धिरि'त्युक्तम् । सम्प्रति तामेव रुच्यर्थं स्तौति—

शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलंक्रिया ।
प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः ॥ ३२ ॥

अन्वय —शुचि, श्रुतं, वपुः, भूषयति । प्रशमः, तस्य, अलंक्रिया, भवति । परा-क्रमः, प्रशमाभरणं (भवति) । स , नयापादितसिद्धिभूषण (भवति) ॥ ३२ ॥

(म०) शुचीति ॥ शुचि संप्रदायशुद्धं श्रुतं शास्त्रश्रवणं कर्तृ वपुर्भूषयति । अन्यथा विद्वान्पुरुषः शोच्य इति भाव । तस्य श्रुतस्य प्रशम क्रोधोपशान्तिरलंक्रिया भूषणं भवति । अन्यथा श्रुतवैफल्यादिति भावः । पराक्रम सत्यवसरे शौर्यं प्रशमस्याभरणं-भवति । अन्यथा सर्वः परिभूयत इति भावः । स पराक्रम । नयापादिता नीतिसम्पा-दिता । विवेकपूर्विकेति यावत् । सा चासौ सिद्धिश्च सैव भूषणं यस्य स तथोक्त । अन्यथा साहसिकस्य सिद्धिः काकतालीयत्वेन पक्षे पराक्रमवैयर्थ्यं स्यादिति भावः । 'वपुषो भूष्यत्वमेवात्र सिद्धेर्भूषणतैव तु । उभयं मध्यमानां तु तेषां पूर्वोत्तरेच्छया' ॥ इति विवेक । एवं विशिष्टसिद्धेरनन्यभूषिताया एव भूषणत्वोक्त्या सर्वोत्तरतया स्तु-तिर्गम्यते । अत्रोत्तरोत्तरस्य पूर्वपूर्वविशेषणत्वादेकावल्यलङ्कार । तदुक्तं—'यत्र विशे-षणभावं पूर्वं पूर्वं प्रति क्रमेणैव । भजति परं परमेषाऽलङ्कृतिरेकावली कथिता' इति ॥ ३२ ॥

(भा०) शुचीति । शुचि सम्प्रदायशुद्धं श्रुतं शास्त्रश्रवणं वपुः शरीरं भूषयत्यल-ङ्करोति प्रशमः क्रोधशान्तिः, तस्य श्रुतस्य, अलंक्रियाऽलङ्करणं भवति । पराक्रमः-पौरुषं प्रशमाभरणं क्रोधोपशान्तिभूषणं स पराक्रमः, नयापादितसिद्धिभूषणो नीतिस-म्पादितसिद्ध्यलङ्करणः । विवेकपूर्वकसिद्धिभाक् पराक्रमः प्रशस्यो न तु तद्भिन्नोऽन्यथा साहसवतां काकतालीयन्यायेन फलसिद्धे पराक्रमो विफल स्यादिति भावः । अत्रैका-वल्यलङ्कारः ॥ ३२ ॥

कुर्यादि'ति स्थितम्। तत्र विमर्शोपायः कः? इत्युक्ते शास्त्रमेवेत्याह—

मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम्।
सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम्॥ ३३॥

अन्वयः—मतिभेदतमस्तिरोहिते, गहने, कृत्यविधौ, विवेकिनां, सुकृतः, परिशुद्धः, आगमः, (सुकृतः, परिशुद्धः,) दीपः, इव, अर्थदर्शनं, कुरुते॥ ३३॥

(म०) मतीति॥ मतिभेदः कार्यविप्रतिपत्तिः। मतिभेदस्तम इवेत्युपमितसमासः। दीप इवेत्युपमाऽनुसारात्। तेन तिरोहित आच्छन्नेऽत एव गहने दुरवगाहे कृत्यविधौ कार्यानुष्ठाने विवेकिनां सुकृतः सदभ्यस्तोऽत एव परिशुद्धो निश्चितोऽन्यत्र सुविहितः-प्रवातादिदोषरहितश्च। आगमः शास्त्रम्। 'आगम शास्त्र आयतौ' इति विश्व। दीप-इवार्थदर्शनं कार्यज्ञानं वस्तुप्रतिभासनं च कुरुते॥ ३ ।

(भा०) मतिभेदेति। मतिभेदतमस्तिरोहिते कार्यविप्रतिपत्त्यात्मकान्धकारान्त-र्हिते गहने दुरवगाहे कृत्यविधौ कार्यानुष्ठाने विवेकिनां विचारशीलानां सुकृतः सम्य-गभ्यस्तः, अत एव परिशुद्धो निश्चित आगमः शास्त्रं सुकृतः सुविहितः परिशुद्ध प्रवा-तादिदोषरहितो दीप इव, अर्थदर्शनं कार्यज्ञानं वस्तुप्रतिभासनञ्च कुरुते विधत्ते। विवे-किनां शास्त्रादेव सकलविषयज्ञानं भवतीति भाव। अत्र श्रौतीपूर्णोपमाऽलङ्कार॥३३॥

एवं विमृश्य कुर्वतो दैवादनर्थागमोऽपि न कश्चिदपराध इत्याह—

स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः।
विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः॥ ३४॥

अन्वय—स्पृहणीयगुणैः, महात्मभिः, चरिते, वर्त्मनि, मनः, यच्छताम्, विधि-हेतुः। आगसाम् अहेतु, विनिपातः, अपि समुन्नतेः, समः (भवति)॥ ३४॥

(म०) स्पृहणीयेति॥ स्पृहणीयगुणैर्लोकश्लाघ्यगुणैर्महात्मभिः सज्जनैश्चरितेऽनुष्ठिते वर्त्मन्याचारे मनो यच्छतां निदधताम्। सन्मार्गेण व्यवहरतामित्यर्थ। विधिहेतुर्दैव-निमित्तकः। 'विधिर्विधाने दैवे च' इत्यमरः। अत एवागसामपराधानामहेतुर्विनि-पातो दैविकानर्थोऽपि। 'विनिपातोऽवपाते स्याद् दैवादिव्यसनेऽपि' च इति विश्वः। समुन्नतेरतिवृद्धेः समस्तुल्य। दैविकेषु पुरुषस्यानुपालभ्यत्वादिति भावः। यथाऽऽह कामन्दकः—'यत्तु सम्यगुपक्रान्तं कार्यमेति विपर्ययम्। पुरुषस्त्वनुपालभ्यो दैवान्त-रितपौरुषः' इति॥ ३४॥

(भा०) स्पृहणीयेति॥ स्पृहणीयगुणैर्लोकश्लाघ्यगुणैर्महात्मभिः साधुपुरुषैश्चरिते-ऽनुष्ठिते वर्त्मनि मार्गे (आचारे) मनश्चित्तं यच्छतां निदधतां (पुरुषाणां) विधिहेतु-र्दैवनिमित्तकः, अत एव, आगसाम् अपराधानाम् अहेतुः, विनिपातोऽप्यनर्थोऽपि समु-

न्ततेरभ्युदयस्य समस्तुल्यः। दैवनिमित्तकेऽनर्थे प्राप्ते सति पुरुषो नोपालभ्य इति भावः। अत्र समालङ्कारः॥ ३४॥

शिवमौपयिकं गरीयसीं फलनिष्पत्तिमदूषितायतिम्।
विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः॥ ३५॥

अन्वयः—जिगीषवः, विजितक्रोधरयाः, गरीयसीम्, अदूषितायतिम्, फलनिष्पत्तिम्, विगणय्य, पौरुषम्, शिवम्, औपयिकम्, नयन्ति॥ ३५॥

(म०) शिवमिति॥ जिगीषवो विजयेच्छवो नृपा विजितक्रोधरया जितक्रोधवेगाः सन्तो गरीयसीं प्रभूतामदूषितायतिमक्षतोत्तरकालाम्। स्वन्तामित्यर्थः। फलनिष्पत्तिं फलसिद्धिं विगणय्य। फलवत्त्वं निश्चित्येत्यर्थ। पौरुषं पुरुषकारं शिवमनुकूलमौपयिकमुपायम्। विनयादित्वात्स्वार्थे ठक्। उपायाद्ध्रस्वत्वं च। नयन्ति प्रापयन्ति। पौरुषमुपायेन योजयन्तीत्यर्थः। नानिश्चितफलं कर्म कुर्वत इति भावः। यथाऽऽह कामन्दकः—'निष्फलं क्लेशबहुलं सन्दिग्धफलमेव च। न कर्म कुर्यान्मतिमान्सदा वैरानुबन्धि च'॥ इति। नयतिः प्रापणार्थे द्विकर्मकः। अत्र पौरुषस्य कर्तृस्थकर्मत्वेऽप्युपायस्यातथात्वात्क्रोधं विनयत इत्यादिवत् 'कर्तृस्थे चाशरीरे कर्मणि' इत्यात्मनेपदं न भवति॥ ३५॥

(भा०) शिवमिति। जिगीषवो जयाभिलाषिणो (राजानः) विजितक्रोधरयाः अभिभूतकोपवेगाः सन्त, गरीयसीं गुरुतराम् अदूषितायतिम् अक्षतोत्तरकालां फलनिष्पत्तिं प्रयोजनसिद्धिं विगणय्य निश्चित्य (विचार्य) पौरुषं पुरुषार्थं शिवम् अनुकूलम् औपयिकम् उपायं नयन्ति प्रापयन्ति। राजानः क्रोधं परिहृत्य पौरुषमुपायेन योजयन्तीत्यर्थः। निश्चितफलस्य कर्मण एव प्रसिद्ध्याऽनिश्चितफलं कर्म न कुर्वीतेति भावः। विजिगीषुराजकर्तृके पौरुषस्योपायेन योजने फलनिष्पत्तिविचारो हेतुरिति पदार्थहेतुकं काव्यलिङ्गम्॥ ३५॥

यदुक्तं 'विजितक्रोधरया' इति तदावश्यकमित्याह—

अपनेयमुदेतुमिच्छता तिमिरं रोषमयं धिया पुरः।
अविभिद्य निशाकृतं तमः प्रभया नांशुमताऽप्युदीयते॥ ३६॥

अन्वयः—उदेतुम्, इच्छता (पुरुषेण) रोषमयं, तिमिरम्, धिया, पुरः, अपनेयम्। अंशुमता, अपि, प्रभया, निशाकृतं, तमः, अविभिद्य, न, उदीयते॥ ३६॥

(म०) अपनेयमिति॥ उदेतुमभ्युदेतुमिच्छता राज्ञा पुरः प्रथमं रोषमयं रोषादागतम्। 'मयट् च' इति मयट्। तिमिरमज्ञानं धिया विवेकबुद्ध्या करणेनापनेयमपनोद्यम्। तथा हि। अंशुमताऽपि कर्त्रा प्रभया तेजसा करणेन निशाकृतं तमो ध्वान्तम-

विभिद्य नादीयते । किन्तु विभिद्यैवेत्यर्थः । सूर्यस्याप्येवं किमुतान्येषामित्यपिशब्दार्थः । इणो भावे लट् ॥ ३६ ॥

(भा०) अपनेयमिति । उदेतुम् अभ्युदेतुम् इच्छता वाञ्छता (पुरुषेण) रोषमयं क्रोधोद्भूतं तिमिरम् अज्ञानं धिया विचारबुद्ध्या पुरः प्राग् अपनेयं परिहरणीयम् । तथा हि—अंशुमताऽपि सूर्येणापि (कर्त्रा) प्रभया दीप्त्या (करणेन) निशाकृतं रात्रिसम्बन्धि तमोऽन्धकारम् अविभिद्य अविनाश्य नोदीयते न प्रादुर्भूयते । किन्तु रात्रिजन्यतमो विभिद्यैव प्रादुर्भूयत इत्यर्थः । यथा सूर्यस्य रात्रितमःपरिहारोत्तरप्रादुर्भाव इष्टसाधकस्तथा नराणामप्यज्ञानपरिहारोत्तरमभ्युदय इष्टसाधक इति मल्लार्थः । विचारदृष्ट्याऽज्ञानतमो विनाश्यैव कार्यप्रवृत्तिः फलजनिकेति भावः । अत्र साधर्म्येणार्थान्तरन्यासः ॥ ॥ ३६ ॥

ननु दुर्बलस्यैवमस्तु । बलीयसस्तु क्रोधादेव कार्यसिद्धिरित्यत आह

बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः ।
क्षयपक्ष इवैन्दवीः कलाः सकला हन्ति स शक्तिसम्पदः ॥ ३७ ॥

अन्वय —बलवान्, अपि, यः, कोपजन्मनः, तमसः, अभिभवं, न, रुणद्धि । सः, क्षयपक्षः, ऐन्दवीः, कलाः, इव, सकलाः, शक्तिसम्पदः, हन्ति ॥ ३७ ॥

(म०) बलवानिति । बलवाञ्छूरोऽपि यः कोपाज्जन्म यस्य तस्य कोपजन्मनः । 'अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः' इति वामनः । तमसो मोहस्य । कृद्योगात्कर्त्तरि षष्ठी । अभिभवमाक्रान्तिं न रुणद्धि । न निवारयति । स नृपः । क्षयस्य पक्षः क्षयपक्षः कृष्णपक्षः ऐन्दवीरिन्दुसम्बन्धिनीः कला इव । 'कला तु षोडशो भागः' इत्यमरः । सकलाः समग्राः शक्तिसम्पदः प्रभुमन्त्रोत्साहशक्तीस्तिस्रोऽपि हन्ति नाशयति । अन्धस्य जङ्घाबलमिव क्रोधान्धस्य लोकोत्तरमपि सामर्थ्यं व्यर्थमेवेत्यर्थः । अत्र कालस्य सर्वकारणत्वात्क्षयपक्षस्य कलाक्षयकारित्वमस्त्येव । तमसस्तु तत्कालविजृम्भणात्तथा व्यपदेशः ॥ ३७ ॥

(भा०) बलवानिति । बलवाञ्शूरोऽपि यः (पुरुषः) कोपजन्मनः क्रोधोत्पन्नस्य तमसोऽज्ञानस्य, अभिभवं पराभवम् (आक्रमणं) न रुणद्धि न निवारयति सः (पुरुषः) (नृपः) क्षयपक्षः कृष्णपक्षः ऐन्दवीश्चान्द्रीः कला षोडशांशानिव सकलाः सम्पूर्णाः शक्तिसम्पदः प्रभुमन्त्रोत्साहेतिशक्तित्रयात्मकसम्पत्तीर्विनाशयति । शक्तिमताऽपि पुरुषेण कोपजाज्ञानाक्रमणं परिहर्त्तव्यमन्यथा सः (पुरुषः) कृष्णपक्षश्चन्द्रकला इव शक्तित्रयात्मकसम्पदो विनाशयतीत्यर्थः । चक्षुर्विहीनपुरुषस्य जङ्घाबलमिव कोपान्धपुरुषस्योत्कृष्टपौरुषं विफलमिति भावः । अत्र श्रौती पूर्णोपमाऽलङ्कारः ॥ ३७ ॥

विमृश्य कुर्वतः क्रियाप्रकारमाह—

समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम् ।
अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः ॥ ३८ ॥

अन्वय —यः, समवृत्ति (सन्), समये, मार्दवम्, उपैति, तिग्मतां, च, तनोति, स', मेदिनीपतिः, विवस्वान्, इव, ओजसा, लोकम्, अधितिष्ठति ॥ ३८ ॥

(म०) समेति ॥ यः समा नातिमृदुर्नातितिग्मा वृत्तिर्यस्य स समवृत्ति सन् समये सत्यवसरे मार्दवं मृदुवृत्तित्वमुपैति तिग्मतां तीक्ष्णवृत्तित्वं च तनोति । स मेदिनीपतिर्विवस्वानिव, ओजसा तेजसा लोकमधितिष्ठत्याक्रामति । सूर्योऽपि, ऋतुभेदेन समवृत्तिरित्यादि योज्यम् ॥ ३८ ॥

(भा०) समवृत्तिरिति । यो मेदिनीपतिः समवृत्तिर्नातितिग्ममृदुव्यापारः (तुल्यव्यापार) सन् समये काले प्राप्ते सति मार्दवं मृदुत्वं (शान्तिम्) उपैति प्राप्नोति तिग्मतां तीक्ष्णवृत्तित्वञ्च तनोति धारयति । स मेदिनीपतिर्नृपो विवस्वान् सूर्य इव, ओजसा तेजसा लोकं जनम् अधितिष्ठत्याक्रामति । अवसरम्प्राप्य मार्दवतिग्मत्वयोरङ्गीकरणशीलो जन, सूर्य इव तेजसा लोकमतिक्रामतीति भाव । अत्र दीपकालङ्कारसंक्रान्ता श्रौती पूर्णोपमाऽलङ्कारः ॥ ३८ ॥

उक्तान्यथाकरणेऽनिष्टमाह—

क ? चिराय परिग्रहः श्रियां क ? च दुष्टेन्द्रियवाजिवश्यता ।
शरदभ्रचलाश्चलेन्द्रियैरसुरक्षा हि बहुच्छलाः श्रियः ॥ ३९ ॥

अन्वयः—श्रियां, चिराय, परिग्रहः, क ?, दुष्टेन्द्रियवाजिवश्यता, च, क ?, हि, शरदभ्रचलाः, बहुच्छलाः, श्रिय, चलेन्द्रियैः, असुरक्षाः (भवन्ति) ॥ ३९ ॥

(म०) क्वेति ॥ श्रियां संपदां चिराय बहुकालं परिग्रहः स्वायत्तीकरणं क ? इन्द्रियाणि वाजिन इवेति समासः । दुष्टानाममार्गधाविनामिन्द्रियवाजिनां वश्योवशङ्गतस्तस्य भावस्तत्ता क ? नोभयमेकत्र तिष्ठतीत्यर्थः । कुत । हि यस्माच्छरदभ्रवच्चलाश्चञ्चलाः । किञ्च बहुच्छला बहुव्याजाः । बहुरन्ध्रा इति यावद् । 'छलं तु स्खलिते व्याजे' इति विश्वः । श्रिय संपदः । चलेन्द्रियैरजितेन्द्रियैरसुरक्षा रक्षितुमशक्याः । कथञ्चित्प्राप्ता अपि श्रियो नाविनीतेषु तिष्ठन्तीत्यर्थ । वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कार ॥ ३९ ॥

(भा०) क्वेति । श्रियां सम्पदां चिराय चिरकालपर्यन्तं परिग्रहः स्वायत्तीकरणं क ? दुष्टेन्द्रियवाजिवश्यता दुर्मार्गधावीन्द्रियाश्वायत्तीकरणं क्व ? (नोभयोरेकत्र स्थितिसम्भव)। हि यतो यस्माद् शरदभ्रचलाः शरद्घनसदृशचञ्चलाः बहुच्छला बहुच्छिद्रा. श्रिय सम्पत्तयः (लक्ष्म्य) चलेन्द्रियैरजितेन्द्रियैः (जनैः) असुरक्षा रक्षितुमशक्याः ।

नाविनीताः कथञ्चित्प्राप्ताः श्रियो रक्षितुं शक्नुवन्तीति भावः। उत्तरार्द्धगतवाक्यार्थम्प्रति पूर्वार्द्धगतवाक्यार्थस्य हेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ३९ ॥

क्रोधस्य दुष्टतामुक्त्वा तस्य त्यागमुपदिशति—

किमसामयिकं वितन्वता मनसः क्षोभमुपात्तरंहसः।
क्रियते पतिरुच्चकैरपां भवता धीरतयाऽधरीकृतः ॥ ४० ॥

अन्वयः—उपात्तरंहस, मनसः, असामयिकं, क्षोभं, वितन्वता, भवता, धीरतया, अधरीकृत., अपां पति, किम्, उच्चकैः, क्रियते ॥ ४० ॥

(म०) किमिति। उपात्तरंहसः, प्राप्तत्वरस्य मनस। समयोऽस्य प्राप्त· सामयिकः। 'समयस्तदस्य प्राप्तम्' इति ठञ्। स न भवतीत्यसामयिकस्तमप्राप्तकालं क्षोभं वितन्वता भवता धीरतया धैर्यगुणेन। 'मनसो निर्विकारत्वं धैर्यं सत्स्वपि हेतुषु' इति रसिकाः। अधरीकृतस्तिरस्कृतः। प्रागिति शेषः। अपां पतिः समुद्र कि किमर्थमुच्चकैरधिकः क्रियते। न पराजितं पुनरुच्चकैः कुर्यादिति भावः। अत्र वितन्वतेति भीमविशेषणत्वेन, अपाम्पतिपदार्थस्योच्चै·करणे हेतुत्वोक्त्या काव्यलिङ्गमलङ्कारः ॥ ४० ॥

(भा०) *किमसामयिकमिति। उपात्तरंहसः प्राप्तवेगस्य मनसो हृदयस्य,* असामयिकम् आकालिकं क्षोभं चाञ्चल्यं वितन्वता कुर्वता भवता त्वया धीरतया धैर्येण, अधरीकृतोऽभिभूतः, अपां पति समुद्रं किं किमर्थम् उच्चकैरुन्नत क्रियते विधीयते। न पराजितोऽधिकः क्रियते कैश्चिदिति भाव। अपां पतेरुच्चैः करणे क्षोभं वितन्वतेति पदार्थस्य विशेषणविधया हेतुत्वाभिधानात्पदार्थहेतुकं काव्यलिङ्गम् ॥ ४० ॥

श्रुतमप्यधिगम्य ये रिपून् विनयन्ते न शरीरजन्मनः।
जनयन्त्यचिराय सम्पदामयशस्ते खलु चापलाश्रयम् ॥ ४१ ॥

अन्वयः—ये, श्रुतम्, अधिगम्य, अपि, शरीरजन्मन, रिपून्, न, विनयन्ते, ते, खलु, अचिराय, सम्पदां, चापलाश्रयम्, अयश, जनयन्ति ॥ ४१ ॥

(म०) श्रुतमिति। किञ्च। ये श्रुतं शास्त्रमधिगम्यापि शरीरजन्मनः शरीरप्रभवान् रिपून्कामक्रोधादीन्न विनयन्ते न नियच्छन्ति। 'कर्तृस्थे चाशरीरे कर्मणि' इत्यात्मनेपदम्। ते खल्वचिराय सम्पदां चापलाश्रयमस्थैर्यनिबन्धनमयशो दुष्कीर्त्तिं जनयन्ति। आश्रयदोषादस्थैर्यं सम्पदां न स्वदोषादित्यर्थः। अजितारिषड्वर्गस्य कुत सम्पद इति भावः ॥ ४१ ॥

(भा०) श्रुतमिति। ये (नराः) श्रुतं शास्त्रम् अधिगम्य पठित्वाऽपि शरीरजन्मनो देहोत्पन्नान् रिपून् कामक्रोधलोभमोहमदमात्सर्याणि न विनयन्ते नातिक्रामन्ति। ते (नराः) खलु निश्चयेन, अचिराय शीघ्रं सम्पदां सम्पत्तीनां चापलाश्रयं चाञ्चल्यप्रयुक्तम् अयशोऽकीर्त्तिं जनयन्त्युत्पादयन्ति। आश्रयदोषेणैव श्रियोऽस्थिरा-

नात्मदोषेणेत्यर्थः । यैर्नारिषड्वर्गो विजितस्तेषां कुतः सम्पत्प्राप्तिरिति भावः । चाञ्चल्यप्रयुक्तसम्पदकीर्त्त्युत्पादने रिपून् न विनयन्त इति वाक्यार्थो हेतुरिति वाक्यार्थहेतुकं काव्यलिङ्गम् ॥ (उत्तरार्द्धं पूर्वार्द्धो हेतुः) ॥ ४१ ॥

तथा क्रोधात्कार्यहानिरित्याशयेनाह—

अतिपातितकालसाधना स्वशरीरेन्द्रियवर्गतापनी ।

जनवन्न भवन्तमक्षमा नयसिद्धेरपनेतुमर्हति ॥ ४२ ॥

अन्वय.—अतिपातितकालसाधना, स्वशरीरेन्द्रियवर्गतापनी, अक्षमा, भवन्तं, जनवद्, नयसिद्धेः, अपनेतुम्, न, अर्हति ॥ ४२ ॥

(म०) अतिपातितेति । अतिपातितान्यतिक्रान्तानि कालः समयोऽनुरूपः साधनानि सहायादीनि यया सा तथोक्ता । तापयतीति तापनी । कर्त्तरि ल्युट् । टित्वान्ङीप् । स्वस्य यच्छरीरमिन्द्रियवर्गश्च तयोस्तापन्यक्षमा क्रोधो भवन्तं जनवत्पृथग्जनमिव । 'तेन तुल्यम्'०–इति वतिप्रत्यः । तेनेवार्थो लक्ष्यते । 'तद्धितश्चासर्वविभक्तिः' इत्यव्ययम् । नयसिद्धेर्नयसाध्यफलादपनेतु पृथक्कर्त्तुं नार्हति । असमयक्रोधस्यात्मसन्तापातिरिक्तं फलं नास्तीत्यर्थः ॥ ४२ ॥

(भा०) अतिपातितेति । अतिपातितकालसाधनाऽतिक्रान्तसमयसहाया स्वशरीरेन्द्रियवर्गतापनी निजकायेन्द्रियसन्तापदा, अक्षमाऽशान्तिः (क्रोध) भवन्तं त्वां जनवत् पृथगजनं(नीचम्) इव नयसिद्धेः नीतिसाध्यफलाद् अपनेतुं पृथक्कर्त्तुं नार्हति योग्योऽस्ति । असामयिक क्रोधो नात्मसन्तापातिरिक्तफलप्रदो भवतीति भावः । अत्रोपमाऽलङ्कारः ॥ ४२ ॥

'दुष्टः क्रोध' इत्युक्तम् । अत्र क्षमाया गुणानाह—

उपकारकमायतेर्भृशं प्रसवः कर्मफलस्य भूरिणः ।

अनपायि निबर्हणं द्विषां न तितिक्षासममस्ति साधनम् ॥ ४३ ॥

अन्वय.—आयतेः, भृशम्, उपकारकम्, भूरिणः, कर्मफलस्य, प्रसवः, अनपायि, द्विषां, निबर्हणं, साधनं, तितिक्षासमं, न, अस्ति ॥ ४३ ॥

(म०) उपकारकमिति ॥ आयतेरुत्तरकालस्य भृशमत्यन्तमुपकारकं - स्थिरफलहेतुरित्यर्थ । भूरिणः प्रभूतस्य कर्मफलस्य । प्रसूयतेऽनेनेति प्रसव कारणम् । अपायि न भवतीत्यनपायि स्वयमविनश्यदेव द्विषां निबर्हणं विनाशकमेवंगुणकं साधनं तितिक्षासमं क्षमातुल्यं ।नास्ति । 'क्षान्ति क्षमा तितिक्षा च' इत्यमरः । 'तिज निशाने' इति धातो । 'गुप्तिज्किद्भ्यः सन्' इति क्षमार्थे सन्प्रत्ययः । तितिक्षासममित्यनुक्तोपमेया समास आर्थी लुप्तोपमा, भृशायत्यनपायिशब्दैः साधनान्तरवैलक्षण्याद् व्यतिरेकश्च व्यज्यते । भेदप्राधान्य उपमानादुपमेयस्याधिक्ये विपर्यये च व्यतिरेकः ॥ ४३ ॥

(भा०) उपकारकमिति । आयतेरुत्तरकालस्य भृशम् अत्यन्तम् उपकारकं स्थिरफलहेतुः भूरिणः प्रचुरस्य कर्मफलस्य क्रियाप्रयोजनस्य प्रसव उत्पत्तिकारणम् अनपाय्यविनश्यद् द्विषां शत्रूणां निबर्हणं विनाशकर्मगुणकं साधनम् उपायः, तितिक्षासमं क्षमासदृशं नास्ति न विद्यते । क्षान्तिसदृशोऽभीष्टसाधको न कश्चिदुपायोऽस्तीति भाव. । अत्र लुप्तोपमा व्यतिरेकश्चेत्यलङ्कारद्वयम् ॥ ४३ ॥

ननु तितिक्षया कालक्षेपे दुर्योधनः सर्वान्राज्ञो वशांकुर्यादित्यत्राह—

प्रणतिप्रवणान्विहाय नः सहजस्नेहनिबद्धचेतसः ।
प्रणमन्ति सदा सुयोधनं प्रथमे मानभृतां न वृष्णयः ॥ ४४ ॥

अन्वय —सहजस्नेहनिबद्धचेतसः, मानभृतां, प्रथमे, वृष्णयः, प्रणतिप्रवणान्, नः, विहाय, सुयोधनं, सदा, न प्रणमन्ति ॥ ४४ ॥

(म०) प्रणतीति ॥ सहजस्नेहेनाकृत्रिमप्रेम्णा निबद्धचेतसोऽस्मासु गाढं लग्नचित्ताः । सुयोधने तु न तथेति भाव । किं च । मानभृतामहङ्कारिणां प्रथमेऽग्रेसराः । सुयोधनस्तु ततोऽपीति भावः । वृष्णयो यादवाः प्रणतिप्रवणान्प्रणामपरान् । सुयोधनस्तु न तथेति भाव. । नोऽस्मान्विहाय सुयोधनं सदा न प्रणमन्ति न नमन्ति नानुसरन्ति । किन्तु कार्यकाले त्यक्ष्यन्त्येवेत्यर्थः । सति यादवविग्रहे न किञ्चिदस्माकमसाध्यं भवेदिति भावः । अनेकपदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ४४ ॥

(भा०) प्रणतीति । सहजस्नेहनिबद्धचेतस स्वाभाविकप्रेमसंलग्नमानसा मानभृताम् अभिमानवतां प्रथमे मुख्या वृष्णयो यादवाः प्रणतिप्रवणान् प्रणामासक्तान् नोऽस्मान् विहाय त्यक्त्वा सुयोधनं दुर्योधनं सदा न प्रणमन्ति नानुगच्छन्ति स्नेहिनामेवोपकारप्रसिद्धिरिति तादृशानस्मानेवोपकरिष्यन्ति यादवा न तु सुयोधनमिति भावः । (सति यादवसङ्गे नास्माकमसाध्यं किञ्चिदिति वा भाव) वृष्णीनां सुयोधनाननुसरणे प्रणतिप्रवणान् सहजस्नेहनिबद्धचेतसो मानभृतां प्रथम इति पदार्थत्रयं हेतुरिति पदार्थहेतुकं काव्यलिङ्गम् ॥ ४४ ॥

सुहृदः सहजास्तथेतरे मतमेषां न विलङ्घयन्ति ये ।
विनयादिव यापयन्ति ते धृतराष्ट्रात्मजमात्मसिद्धये ॥ ४५ ॥

अन्वयः—एषां, ये, सहजा , सुहृदः, तथा, इतरे, च, (एषां) मतं, न, विलङ्घयन्ति । ते, आत्मसिद्धये, धृतराष्ट्रात्मजं, विनयाद् , इव, यापयन्ति ॥ ४५ ॥

(म०)सुहृद इति । किं चैषां वृष्णीनां ये सहजाः सहजाता । मातृपितृपक्षा इत्यर्थः । 'अन्येष्वपि दृश्यते' इति डप्रत्ययः । सुहृदो मित्राणि तथेतरे कृत्रिमसुहृदश्च मतं वृष्णिपक्षं न विलङ्घयन्ति नातिक्रामन्ति । ते द्वयेऽपि नृपाः । दुर्योधनोपजीविनोऽपीति भावः । आत्मजीवनार्थं धृतराष्ट्रात्मजं दुर्योधनं विनयादानुकूल्यादिव यापयन्ति कालं गम-

यन्ति । कार्यकाले तु वृष्णिपक्षप्रवेशिन एवेत्यर्थः । यातेण्यन्ताल्लट् । 'अर्तिह्री—'इत्यादिना पुगागम ॥ ४५ ॥

(भा०) सुहृद इति । एषां वृष्णीनां ये सहजाः सहोत्पन्ना मातृपितृपक्षाः सुहृदो- मित्राणि तथा, इतरेऽन्ये कृत्रिमसुहृदश्च, एषां वृष्णीनां मतं पक्षं न विलङ्घयन्ति नातिक्रामन्ति (न त्यजन्ति) ते कृत्रिमा अकृत्रिमाश्च, आत्मसिद्धये स्वजीवनस्याधनाय धृतराष्ट्रात्मजं दुर्योधनं विनयाद् आनुकूल्याद् इव यापयन्ति समयं क्षपयन्ति । ये वृष्णिवंशीयाः साम्प्रतं दुर्योधनानुगामिनस्ते कार्यकाले वृष्णिपक्षानुगामिन एवेति भावः । अत्र दीपकोत्प्रेक्षयोः संसृष्टिः ॥ ४५ ॥

किञ्च नायमभियोगकाल इत्याशयेनाह—

अभियोग इमान्महाभुजो भवता तस्य कृतः कृतावधेः ।
प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिव ॥ ४६ ॥

अन्वयः—कृतावधेः, तस्य, भवता, कृतः, अभियोगः, इमान्, महाभुजः, हरिदश्व, कमलाकरान्, इव, समुत्पतन्, प्रविघाटयिता ॥४६॥

(म०) अभियोग इति ॥ कृतावधेः परिभाषितकालस्य । 'अवधिस्त्ववधाने स्यात्सीम्नि काले बिलेऽपि च' इति विश्व । तस्य सुयोधनस्य । कर्मणि षष्ठी । भवता कृतः । अवधित इति शेषः। अभियोगः । आर्द्राभिभव इति यावद् । 'अभियोगस्तु शपथे स्यादार्द्रे च पराभवे' इति विश्व । इमान्पूर्वोक्तान्महाभुजो राज्ञो हरिदश्व उष्णरश्मिः कमलाकरानिव समुत्पतन्नुद्यन्नेव प्रविघाटयिता भेत्स्यति । घाटयतेर्भौवादिकाल्लुट् चौरादिकस्य तु 'मितां ह्रस्वः' इति ह्रस्वत्वं स्यात् ॥ ४६ ॥

(भा०) अभियोग इति । कृतावधेर्निर्णीतावसरस्य तस्य (दुर्योधनस्य) भवता त्वया कृतो विहितोऽभियोग आर्द्राभिभव इमान् पूर्वोक्तान् महाभुजो राज्ञ (यादवान्) हरिदश्व सूर्यः कमलाकरान् पद्मसमूहान् इव समुत्पतन्नुद्यन्नेव प्रविघाटयिता भेत्स्यति । भवता कृतो दुर्योधनाभियोग एव यादववंश्यान् राज्ञः स्वपक्षाश्रितान् करिष्यतीति भावः । अत्रोपमाऽलङ्कारः ॥ ४६ ॥

अथ न ये वृष्णिपक्षास्तान्प्रत्याह—

उपजापसहान्विलङ्घयन् स विधाता नृपतीन्मदोद्धतः ।
सहते न जनोऽप्यधःक्रियां किमु लोकाधिकधाम राजकम् ॥४७॥

अन्वयः—मदोद्धतः, सः, नृपतीन्, विलङ्घयन् (सन्), उपजापसहान्, विधाता, जनः, अपि, अधःक्रियां, न, सहते, लोकाधिकधाम, राजकं, किमु ॥ ४७ ॥

(भा०) उपजापेति ॥ मदोद्धतः स दुर्योधनो नृपतीनन्यान्नृपान्विलङ्घयन्मदा-

वृवमानयन् । सहन्त इति सहाः पचाद्यच् । उपजापस्य सहान्भेदयोग्यान् । 'समौ भेदोपजापौ' इत्यमरः । विधाता विधास्यति । दधातेर्लुट् । अवमानितो जनः सुभेद्य इति भावः । न च ते सहिष्णव इत्याह-जन प्राकृतोऽप्यधःक्रियामपमानं न सहते । लोकाधिकधाम लोकोत्तरप्रतापं राजकं राजसमूह । 'गोत्रोक्षोष्ट्र'—इत्यादिना वुञ्प्रत्ययः । किमु । न सहत इति किं वक्तव्यमित्यर्थ । तथा सति कृत्स्नमेव राजमण्डलमस्मानेवावलम्बिष्यत इति भावः ॥ ४७ ॥

(भा०) उपजापेति । मदोद्धतोऽभिमानोग्रः स (दुर्योधनः) नृपतीन् अन्यान् नृपान् विलङ्घयँस्तिरस्कुर्वन् , उपजापसहान् भेदयोग्यान् विधाता विधास्यति । जनः-साधारणजनोऽपि, अध क्रियाम् अनादरं न सहते न मृष्यति लोकाधिकधाम, उत्कृष्टप्रतापशालि राजकं राजसमूह किमु । नैवाध क्रियां सहत इत्यर्थः । दुर्योधनकृतापमानात्सर्व एव राजानोऽस्मत्पक्षावलम्बिनो भविष्यन्तीति भावः । अत्र वैधर्म्येणार्थान्तरन्यासोऽलङ्कारः ॥ ४७ ॥

ननु 'सखीनिवे'त्यादिवनेचरोक्त्या तस्य मदसंभावनाऽपि कथमित्यत्राह—

असमापितकृत्यसम्पदां हतवेगं विनयेन तावता ।
प्रभवन्त्यभिमानशालिनां मदमुत्तम्भयितुं विभूतयः ॥ ४८ ॥

अन्वयः—असमापितकृत्यसम्पदाम्, अभिमानशालिनां, विभूतयः, तावता, विनयेन, हतवेगं, मदम्, उत्तम्भयितुं, प्रभवन्ति ॥ ४८ ॥

(म०) असमापितेति ॥ असमापितकृत्यसम्पदामकृतकृत्यानामतोऽभिमानशालिनामहङ्कारिणां विभूतय सम्पद एव तावता स्वल्पेन विनयेन । कार्यवशादारोपितेनेति शेषः । हतवेगं प्रतिबद्धवेगं न तु स्वरूपतो हतं मदमुत्तम्भयितुं बर्धयितुं प्रभवन्ति । सर्वथा दुर्जनसम्पदो विकारयन्तीति भावः ॥ ४८ ॥

(भा०) असमापितेति । असमापितकृत्यसम्पदाम् अपूरितकार्यसम्पत्तीनाम् (अकृतकृत्यानाम्) अभिमानशालिनाम् मानवतां विभूतय सम्पत्तय एव तावता स्वल्पेन विनयेन नम्रभावेन हतवेगं प्रतिबद्धरंहसं मदम् अभिमानम् उत्तम्भयितुं बर्द्धयितुं प्रभवन्ति । सम्पदो दुर्योधनस्य मदौद्धत्यमवश्यं विधास्यन्तीति भावः । अभिमानशालिनां मदोत्तम्भने विभूतिपदार्थस्य हेतुत्वात्पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ४८ ॥

अथ मदस्यानर्थहेतुतां युग्मेनाह—

मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढता ।
अतिमूढ उदस्यते नयान्नयहीनादपरज्यते जनः ॥ ४९ ॥

अन्वयः—मदमानसमुद्धतं, नृपं, मूढता, नियमेन, न, वियुङ्क्ते । अतिमूढः, नयाद्, उदस्यते, नयहीनाद्, जनः, अपरज्यते ॥ ४९ ॥

(म०) मदेति। मदमानाभ्यां दर्पाहङ्काराभ्यां समुद्धतं नृपं मूढता कार्यापरिज्ञानं नियमेनावश्यं न वियुङ्क्ते न विमुञ्चति । अतिमूढो नयान्नीतिमार्गादुदस्यत उत्क्षिप्यते । कर्मकर्त्तरि लट् । नयहीनाज्जनोऽपरज्यतेऽपरक्तो भवति । 'स्वरितञित–' इत्यादिनाऽऽत्मनेपदम् ॥ ४९ ॥

(भा०) मदमानेति। मदमानसमुद्धतं दर्पाभिमानोद्धं नृपं राजानं मूढताऽज्ञानता नियमेनावश्यं न वियुङ्क्ते न त्यजति । अतिमूढोऽत्यज्ञानी नयाद् नीतिमार्गाद् उदस्यत- उत्क्षिप्यते (पृथग् भवति) नयहीनात् त्यक्तनीतेः (जनाद्) जनो लोकोऽपरज्यतेऽपरक्तो भवति । कार्यकाले मदौद्धत्येन दुर्योधनादवश्यं सर्वे नृपाः पृथग्भविष्यन्तीति भावः । अत्र कारणमालाऽलङ्कार ॥ ४९ ॥

अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसन्ततिः ।
सुकरस्तरुवत्सहिष्णुना रिपुरुन्मूलयितुं महानपि ॥ ५० ॥

अन्वय —अपरागसमीरणेरित , क्रमशीर्णाऽऽकुलमूलसन्तति , रिपु , महान्, अपि, तरुवत्, सहिष्णुना, उन्मूलयितुं, सुकर , ॥ ५० ॥

(म०) अपरागेति। अपरागोऽप्रीतिः । द्वेष इति यावत् । समीरण इव । तेनेरितश्चोदित । अत एव क्रमेण शीर्णा शीर्णीभूताऽऽकुला चला च मूलसन्तति प्रकृत्यादिस्वजनवर्गः सिफासङ्घातश्च यस्य स तथोक्तः । 'मूलं वशीकृते स्वीये सिफातारान्तिकादिषु' इति वैजयन्ती । रिपुर्महानपि तरुवद् वृक्ष इव सहिष्णुना क्षमावतोन्मूलयितुमुद्धर्त्तुं सुकरः सुसाध्य. । सुकरोन्मूलन इत्यर्थः । अत्र मदादेः पूर्वपूर्वस्योत्तरोत्तरं प्रति कारणत्वात्कारणमाला, तरुवदित्युपमा चेति द्वयोः संसृष्टिः ॥ ५० ॥

(भा०) अपरागेति । अपरागसमीरणेरितो द्वेषवायुप्रेरितःक्रमशीर्णाकुलमूलसन्ततिः क्रमविनष्टचलामात्यप्रभृतिलोको रिपुः शत्रुर्महान् विशिष्टोऽपि, अपरागसमीरणेरितो द्वेपसदृशवायुप्रकम्पित. क्रमशीर्णाकुलमूलसन्ततिः क्रमशिथिलचलसिफासमुदायस्तरुवद् वृक्ष इव सहिष्णुना क्षमाशीलेन (पुरुषेण) उन्मूलयितुम् उत्पाटयितुं (विनाशयितुं) सुकर. सुलभ. । क्षमाशील. प्रयासमन्तरेणैव शत्रुमभिभवितुमर्हतीति क्षमैव सकलकार्यसाधनहेतुरिति भाव. । अत्र कारणमालाऽलङ्कार ॥ ५० ॥

नन्वन्तर्भेदमात्रेण कथं सुसाध्यस्तत्राह—

अणुरप्युपहन्ति विग्रहः प्रभुमन्तःप्रकृतिप्रकोपजः ।
अखिलं हि हिनस्ति भूधरं तरुशाखाऽन्तनिघर्षजोऽनलः ॥५१॥

अन्वयः—अणु , अपि, अन्त प्रकृतिप्रकोपजः, विग्रह., प्रभुम्, उपहन्ति । तरुशाखाऽन्तनिघर्षजः, अनलः, अखिलं, भूधरं, हिनस्ति, हि ॥ ५१ ॥

(म०) अणुरिति ॥ अणुरल्पोऽप्यन्त.प्रकृतिप्रकोपजोऽन्तरङ्गामात्याद्यपरागसमुत्थः । 'प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे । छन्दःकारणगुह्येषु जन्त्वमात्यादिकेष्वपि' ॥ इति वैजयन्ती । विग्रहो वैरं प्रभुमुपहन्ति नाशयति । अत्र दृष्टान्तमाह–तरुशाखाऽन्तानां निघर्षो घर्षणं तज्जोऽनलोऽग्नि· । भूधरं गिरिमखिलं साकल्येन हिनस्ति हि । दहतीत्यर्थ. । अत्रोपमानोपमेयसमानधर्माणां प्रतिबिम्बतया निर्देशेन दृष्टान्तालङ्कारः ॥ ५१ ॥

(भा०) अणुरिति । अणुरप्यल्पोऽपि (सूक्ष्मोऽपि) अन्तःप्रकृतिप्रकोपजोऽन्तरङ्गसचिवादिविरागोत्पन्नो विग्रहो वैरं प्रभुं स्वामिनं (राजानम्) उपहन्ति विनाशयति । तरुशाखाऽन्तनिघर्षजोऽनलो वृक्षशाखाऽग्रसंघर्षणोत्पन्नोऽग्निरखिलं सकलं भूधरं पर्वतंहिनस्ति दहति हि । यथा—वृक्षशाखाऽग्रसंघर्षजन्योऽग्निर्भूधरं दहति तथा सचिवादिविरागजन्यो विग्रहो राजानं हन्तीत्यर्थः । अन्तरङ्गसचिवादिभेदे न सुजय एव शत्रुरिति भावः । अत्र दृष्टान्तालङ्कारः ॥ ५१ ॥

तथाऽपि कथं बर्द्धमानं शत्रुमुपेक्षेतेत्याशङ्क्य दुर्विनीतत्वादित्याह --

मतिमान्विनप्रमाथिनः समुपेक्षेत समुन्नतिं द्विषः ।

सुजयः खलु तादृगन्तरे विपदन्ता ह्यविनीतम्पदः ॥ ५२ ॥

अन्वयः—मतिमान्, विनयप्रमाथिनः, द्विष , समुन्नति, समुपेक्षेत । तादृग्, अन्तरे, सुजयः, खलु । हि, अविनीतसम्पद , विपदन्ता ॥ ५२ ॥

(म०) मतिमानिति ॥ मतिमान्प्राज्ञ । विनयं प्रमथ्नातीति विनयप्रमाथिनो· दुर्विनीतस्य द्विषः समुन्नतिं वृद्धिं समुपेक्षेत । उपेक्षाया· फलमाह–तादृगविनीतोऽन्तरे क्व चिद्रन्ध्रे सुजय· सुखेन जेतुं शक्य खलु । हि यस्मादविनीतसम्पदो विपदन्ता विपन्मर्यादकाः । अनर्थोदर्का इत्यर्थः ॥ ५२ ॥

(भा०) मतिमानिति । मतिमान् प्रतिभाशाली (पुरुषः) विनयप्रमाथिनोऽविनीतस्य द्विष· शत्रो समुन्नतिम् अभ्युदयम् समुपेक्षेत त्यजेत् । तादृग् अविनीतोऽन्तरे कस्मिंश्चिच्छिद्रे सुजयः जेतुं शक्य· खलु । हि यस्माद् अविनीतसम्पदो दुर्विनीतसम्पत्तयो विपदन्ता दुःखावसाना भवन्ति । दुर्विनीतशत्रोरुपेक्षणादेव जयसम्भव इति भाव । अत्रार्थान्तरन्यासोऽलङ्कार ॥ ५२ ॥

कथं दुर्विनीतस्य शत्रो सुजयत्वमित्याशङ्क्य भेदजर्जरितत्वादित्याह—

लघुवृत्तितया भिदां गतं बहिरन्तश्च नृपस्य मण्डलम् ।

अभिभूय हरत्यनन्तरः शिथिलं कूलमिवापगारयः ॥ ५३ ॥

अन्वयः— लघुवृत्तितया, बहि., अन्तः, च, भिदां, गतं. नृपस्य, मण्डलम्, अनन्तरः, आपगारयः, शिथिलं, कूलम्, इव, अभिभूय, हरति ॥ ५३ ॥

(म०) लघ्विति ॥ लघुवृत्तितया स्वल्पदुर्वृत्तरूपतया बहिर्मित्रादिजनपदेष्वन्तरमात्यादिषु च भिदां भेदं गतम् । 'षिद्भिदादिभ्योऽङ्' इत्यङ्प्रत्ययः । नृपस्य मण्डलं राष्ट्रमनन्तरः सन्निहितो जिगीषुरापगारयो नदीवेगः शिथिलमन्तर्भेदजर्जरं कूलमिवाभिभूयाक्रम्य हरति ॥ ५३ ॥

(भा०) लघुवृत्तितयेति । लघुवृत्तितया स्वदुर्वृत्ततया बहिर्मित्रादिजनपदेष्वन्तरमात्यप्रभृतिषु च भिदां भेदं गतं नृपस्य मण्डलं राष्ट्रम् अनन्तरः सन्निधिवर्त्ती जिगीषुरापगारयो नदीवेगः शिथिलम् । अन्तर्भेदजर्ज्जरं कूलं तटमिवाभिभूयातिक्रम्य हरति नाशयति । भेदे दुर्विनीतशत्रुजयो नायाससाध्य इति भावः । अत्रोपमाऽलङ्कारः ॥५३॥

अनुशासतमित्यनाकुलं नयवर्त्माकुलमर्जुनाग्रजम् ।
स्वयमर्थ इवाभिवाञ्छितस्तमभीयाय पराशरात्मजः ॥ ५४ ॥

अन्वयः—इति, आकुलम्, अर्जुनाग्रजम्, नयवर्त्म, अनाकुलम्, अनुशासतं, तं, पराशरात्मजः, स्वयम्, अभिवाञ्छितः, अर्थः, इव, अभीयाय ॥५४॥

(म०) अन्विति ॥ इतीत्थमाकुलमरिनिकारस्मरणात्क्षुभितमर्जुनाग्रजं भीमसेनं नयवर्त्म नीतिमार्गमनाकुलमसङ्कीर्णं यथा तथाऽनुशासतमुपदिशन्तम् । 'जक्षित्यादयः षट्' इत्यभ्यस्तात्वाच्छतुर्नुमभावः । तं युधिष्ठिरं पराशरात्मजो वेदव्यासः स्वयमभिवाञ्छितोऽर्थ इव । साक्षान्मनोरथ इवेत्युत्प्रेक्षा । अभीयाय प्राप्तः ॥ ५४ ॥

(भा०) अनुशासतमिति । इतीत्थम् आकुलं क्षुभितम् । अर्जुनाग्रजं भीमम् । नयवर्त्म नीतिमार्गम् अनाकुलम् असङ्कीर्णं यथा तथाऽनुशासतम् उपदिशन्तं तं धर्मराजं (युधिष्ठिरं) पराशरात्मजो वेदव्यासः स्वयं साक्षाद् अभिवाञ्छितोऽर्थो मनोरथ इव, अभीयाय प्राप्तः । साक्षान्मनोरथ इव वेदव्यासो हितमुपदिशन्तं युधिष्ठिरं प्राप्तवानित्यर्थः । अत्रोत्प्रेक्षाऽलङ्कारः ॥ ५४ ॥

अथ युग्मेनाह—

मधुरैरवशानि लम्भयन्नपि तिर्यञ्चि शमं निरीक्षितैः ।
परितः पटु बिभ्रदेनसां दहनं धाम विलोकनक्षमम् ॥ ५५ ॥

अन्वयः—मधुरैः, निरीक्षितैः, अवशानि, अपि, तिर्यञ्चि, शमं, लम्भयन्, परितः, पटु, एनसां, दहनं, विलोकनक्षमं, धाम, बिभ्रत् ॥ ५५ ॥

(म०) मधुरैरिति । मधुरैः शान्तैर्निरीक्षितैरवलोकनैः । नपुंसके भावे क्तः । न विद्यते वशमायत्तत्वं येषां तान्यवशानि प्रतिकूलानि । 'वशमायत्ततायां च' इति विश्वः । तिर्यञ्चि मृगपक्ष्यादीनि शमं शान्ति लम्भयन्प्रापयन् । 'लभेश्च' इति नुमागमः । 'गत्यर्थ'—इत्यादिना द्विकर्मकत्वम् । परितः पटूज्ज्वलमेनसाम् । दह्यतेऽनेनेति

दहनं निवर्तकं तथाऽपि विलोकनक्षमं दर्शनीयम् । वह्न्यादिविलक्षणमिति भावः । धाम तेजो बिभ्रत् ॥ ५५ ॥

(भा०) मधुरैरिति । मधुरैः स्निग्धैः (शान्तैः) निरीक्षितैरवलोकनैरवशानि प्रतिकूलान्यपि तिर्यञ्चि मृगपक्ष्यादीनि शर्म शान्तिं लम्भयन् प्रापयन् । परितः पटु समुज्ज्वलम् एनसां पापानां दहनं विनाशकं विलोकनक्षमं दर्शनयोग्यं धाम तेजो-बिभ्रद् धारयन् वह्न्यादिविलक्षणतेजोविशिष्टो मुनिर्युधिष्ठिरेण दृष्ट इत्यर्थः ॥५५॥

सहसोपगतः सविस्मयं तपसां सूतिरसूतिरापदाम् ।
ददृशे जगतीभुजा मुनिः स वपुष्मानिव पुण्यसञ्चयः ॥ ५६ ॥

अन्वयः—सहसा, उपगतः, तपसां, सूतिः, आपदाम्, असूतिः, सः, मुनिः, वपुष्मान्, पुण्यसञ्चयः, इव, जगतीभुजा, सविस्मयं, ददृशे ॥ ५६ ॥

(म०) सहसेति । पुनः सहसोपगतोऽकस्मादागतस्तपसां सूतिः प्रभव आपदामसूतिरप्रभवः । निवर्तक इति यावत् । स मुनिर्व्यासो वपुष्मान्देहधारी पुण्यसञ्चयः-पुण्यराशिरिवेत्युत्प्रेक्षा । जगतीभुजा राज्ञा सविस्मयं ददृशे दृष्टः ॥ ५६ ॥

(भा०) सहसेति । (पुनः) सहसोपगतः, अकस्मादागतः, तपसां नियमानां सूतिः-प्रसवः, इव, आपदां दुःखानाम् असूतिरप्रसवः स मुनिर्व्यासो वपुष्मान् देहधारी पुण्य-सञ्चयः सुकृतपुञ्ज इव जगतीभुजा राज्ञा (युधिष्ठिरेण) सविस्मयं साश्चर्यं यथा तथा ददृशे दृष्टः । साक्षाद् देहधारी पुण्यराशिरिव मुनिर्महीभुजा दृष्ट इत्यर्थः। अत्रोत्प्रेक्षाऽ-लङ्कारः ॥ ५६ ॥

अथोच्चकैरासनतः परार्ध्यादुद्यन्स धूतारुणवल्कलाग्रः ।
रराज कीर्णाकपिशांशुजालः शृङ्गात्सुमेरोरिव तिग्मरश्मिः ॥ ५७॥

अन्वयः—अथ, उच्चकैः, परार्ध्यात्, आसनतः, उद्यन्, धूतारुणवल्कलाग्रः, सः, कीर्णाकपिशांशुजालः, सुमेरोः, शृङ्गात्, (उद्यन्) तिग्मरश्मिः, इव, रराज ॥ ५७ ॥

(म०) अथेति । अथ दर्शनानन्तरम् । उच्चकैरुन्नतात्परार्ध्याच्छ्रेष्ठाद् । 'अर्धाद्यत्' । 'परावराधमोत्तमपूर्वाच्च' इति यत्प्रत्ययः। आसनतः सिंहासनादुद्यन्नुत्तिष्ठन्नत-एव धूतानि कम्पितान्यरुणानि वल्कलाग्राणि यस्य स तथोक्तः । स नृपः कीर्णं विस्तृतमाकपिशमंशुजालं यस्य स तथोक्तः । सुमेरोः शृङ्गादुद्यंस्तिग्मरश्मिरिव । रराज॥५७॥

(भा०) अथोच्चकैरिति । अथ मुनिदर्शनानन्तरम् उच्चकैरुन्नतात् परार्ध्यादुत्कृष्टाद् आसनत आस्तरणाद् उद्यन्नुत्तिष्ठन् धूतारुणवल्कलाग्रः कम्पितवल्कलावसानभागः-स नृपः (युधिष्ठिरः) कीर्णाकपिशांशुजालो विस्तृतपिशङ्गकिरणपुञ्जः सुमेरोः शृङ्गाद् देवपर्वतस्य शिखराद् उद्यन्नुत्तिष्ठन्, तिग्मरश्मिः सूर्य इव रराज शुशुभे । यथा सुमे-

रुशिखरादुद्यन् सूर्यः शोभते तथोन्नतसिंहासनादुद्यन्नृपः शोभते स्मेत्यर्थः। अत्रोपमाऽलङ्कारः॥ ५७॥

अवहितहृदयो विधाय सोऽर्हामृषिवदृषिप्रवरे गुरूपदिष्टाम्।
तदनुमतमलञ्चकार पश्चात् प्रशम इव श्रुतमासनं नरेन्द्रः॥ ५८॥

अन्वयः—सः, नरेन्द्रः, अवहितहृदयः (सन्), ऋषिप्रवरे, ऋषिवद्, गुरूपदिष्टाम्, अर्हां, विधाय, पश्चात्, तदनुमतम्, आसनम्, प्रशमः, श्रुतम्, इव, अलञ्चकार॥ ५८॥

(म०) अवहितेति। स नरेन्द्रोऽवहितहृदयोऽप्रमत्तचित्तः सन्। ऋषिप्रवरे मुनिश्रेष्ठे। ऋषिवदृष्यर्हाम्। अर्हार्थे वतिप्रत्ययः। गुरूपदिष्टाम्। शास्त्रीयामित्यर्थः। अर्हां पूजाम्। 'गुरोश्च हलः' इत्यकारप्रत्ययः। विधाय पश्चादनन्तरं तदनुमतं तेनानुज्ञातमासनम्। प्रशम शान्तिः श्रुतं शास्त्रश्रवणमिव। अलञ्चकार। उक्तं च—'प्रशमस्तस्य भवत्यलंक्रिया' इति। मुन्याज्ञयोपविष्टवानित्यर्थः॥ ५८॥

(भा०) अवहितेति। स नरेन्द्रः (युधिष्ठिरः) अवहितहृदयोऽप्रमत्तचित्तः सन् ऋषिप्रवरे मुनिवर्ये (व्यासे) ऋषिवद् मुनियोग्यां गुरूपदिष्टां शास्त्रोक्ताम् अर्हां पूजां विधाय सम्पाद्य (कृत्वा) पश्चाद् अनन्तरं तदनुमतं मुनिनाऽऽदिष्टम् आसनम् आस्तरणं प्रशमः क्षान्तिः श्रुतं शास्त्रश्रवणमिव, अलञ्चकार भूषयाञ्चक्रे। यथा क्षान्तिः श्रुतमलङ्करोति तथा मुन्याज्ञप्तमासनमलञ्चकारेत्यर्थः। अत्रोपमाऽलङ्कारः॥ ५८॥

व्यक्तोदितस्मितमयूखविभासितोष्ठ-
स्तिष्ठन्मुनेरभिमुखं स विकीर्णधाम्नः।
तन्वन्तमिद्धमभितो गुरुमंशुजालं-
लक्ष्मीमुवाह सकलस्य शशाङ्कमूर्त्तेः॥ ५९॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये द्वितीयः सर्गः॥ २॥

अन्वयः—व्यक्तोदितस्मितमयूखविभासितोष्ठः, विकीर्णधाम्नः, मुनेः, अभिमुखं, तिष्ठन्, सः, इद्धम्, अंशुजालं, तन्वन्तं, गुरुम्, अभितः, सकलस्य, शशाङ्कमूर्त्तेः, लक्ष्मीम्, उवाह॥ ५९॥

(म०) व्यक्तेति । व्यक्तोदितैः स्फुटोद्गतैः स्मितमयूखैर्विभासितावोष्ठौ यस्य स तथोक्तः । विकीर्णधाम्नो विस्तीर्णतेजसो मुनेरभिमुखं तिष्ठन् स नृपः । इद्धं दीप्तमंशुजालं तन्वन्तं गुरुं गोष्पतिम् । 'गुरुर्गीष्पतिपित्रादौ' इत्यमरः' । 'अभितः परितः'— इत्यादिना द्वितीया । अभितोऽभिमुखम् । तिष्ठत इति शेषः । सकलस्य संपूर्णस्य शशाङ्का मूर्त्तिर्यस्य तस्येन्दोर्लक्ष्मीमुवाह वहति स्म । अत्रोपमेयस्य राज्ञ उपमानेन्दुधर्मेण लक्ष्म्याः साक्षात्सम्बन्धासम्भवात्तत्सदृशीं लक्ष्मीमिवेति प्रतिबिम्बकरणाक्षेपादसम्भवद्वस्तुसम्बन्धात्पदार्थवृत्तिर्निदर्शनालंकार । तदुक्तम्—'प्रतिबिम्बस्याकरणं सम्भवता यत्र वस्तुयोगेन । तत्साम्यमसम्भवता निदर्शना सा द्विधाऽभिमता' ॥ इति ॥ ५९ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां-
किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां-
द्वितीय· सर्गः समाप्तः ॥ २ ॥

(भा०) व्यक्तोदितेति । व्यक्तोदितस्मितमयूखविभासितोष्ठः स्फुटोद्गतस्मितकिरणशोभितोष्ठ· विकीर्णधाम्नो विस्तीर्णतेजसो मुनेर्व्यासस्याभिमुखं सम्मुखं तिष्ठन् वर्त्तमानः स नृपः (युधिष्ठिर) इद्धं प्रदीप्तम् अंशुजालं किरणपुञ्जं तन्वन्तं विस्तारयन्तं गुरुं बृहस्पतिम् अभितोऽभिमुखं तिष्ठतः सकलस्य समग्रस्य शशाङ्कमूर्त्तेश्चन्द्रस्य लक्ष्मीं शोभाम् उवाह प्राप । बृहस्पतिसम्मुखवर्त्ती चन्द्र इव मुनिसम्मुखवर्त्ती नृप.- शोभते स्मेत्यर्थः । अत्रोपमाऽलङ्कार· ॥ ५९ ॥

इति द्वितीयः सर्गः ॥ २ ॥

अथ तृतीयः सर्गः ।

अथ त्रिभिर्मुनिं विशिनष्टि चतुर्भिः कलापकमाह । तदुक्तं-'द्वाभ्यां युग्ममिति प्रोक्तं-त्रिभिः श्लोकैर्विशेषकम् । कलापकं चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृतम्' ॥ इति—

ततः शरच्चन्द्रकराभिरामैरुत्सर्पिभिः प्रांशुमिवांशुजालैः ।
बिभ्राणमानीलरुचं पिशङ्गीर्जटास्तडित्वन्तमिवाम्बुवाहम् ॥ १ ॥

अन्वयः—ततः, शरच्चन्द्रकराभिरामैः, उत्सर्पिभिः, अंशुजालैः, प्रांशुम्, इव, आनीलरुचम्, पिशङ्गीः, जटाः, बिभ्राणं, तडित्वन्तम्, अम्बुवाहम्, इव, (स्थितं मुनिं धर्मात्मज आबभाषे) इति चतुर्थश्लोकेन सम्बन्धः ॥ १ ॥

(म०) तत इति ॥ तत उपवेशानन्तरं धर्मात्मजो युधिष्ठिरः शरच्चन्द्रकराभिरामैः । आह्लादकैरित्यर्थः । उत्सर्पिभिरूर्ध्वं प्रसारिभिरंशुजालैः प्रांशुमुन्नतमिव स्थितमित्युत्प्रेक्षा । पुनरानीलरुचं कृष्णवर्णं पिशङ्गीः पिङ्गलवर्णाः । गौरादित्वान्ङीष् । जटा बिभ्राणं धारयन्तमत एव तडित्वन्तं विद्युद्युक्तमम्बुवाहमिव स्थितमित्युत्प्रेक्षा॥१॥

(भा०) तत इति । तत उपवेशनोत्तरं शरच्चन्द्रकराभिरामैः शरदिन्दुकिरणसदृशानन्दजनकैः, उत्सर्पिभिरूर्ध्वप्रसारिभिः, अंशुजालैः प्रभापुञ्जैः प्रांशुम् उन्नतमिव स्थितम् । आनीलरुचं कृष्णवर्णं पिशङ्गीः पिङ्गलवर्णाः, जटाः सटा बिभ्राणं धारयन्तं-तडित्वन्तं विद्युत्सहितम् अम्बुवाहं मेघमिव स्थितम् । इन्दुकिरणसदृशानन्दप्रदोर्ध्वगामिप्रभापुञ्जैरुन्नतमिव जटाधारणाद् विद्युत्सहितमेघमिव, स्थितं मुनिमाबभाष-इत्यर्थः । अत्रोत्प्रेक्षाद्वयम् ॥ १ ॥

प्रसादलक्ष्मीं दधतं समग्रां वपुःप्रकर्षेण जनातिगेन ।
प्रसह्य चेतःसु समासजन्तमसंस्तुतानामपि भावमार्द्रम् ॥ २ ॥

अन्वयः—समग्रां, प्रसादलक्ष्मीं, दधतं, जनातिगेन, वपुःप्रकर्षेण, असंस्तुतानाम्, अपि, चेतःसु, आर्द्रं, भावं, प्रसह्य, समासजन्तम् (मुनिं धर्मात्मज आबभाषे) इति चतुर्थश्लोकेन सङ्गतिः ॥ २ ॥

(म०) प्रसादेति ॥ पुनः समग्रां संपूर्णां प्रसादः सौम्यता तस्य लक्ष्मीं संपदं दधतम् । अत एव जनमतिगच्छतीति जनातिगेन लोकातिशायिना । 'अन्येष्वपि दृश्यते' इति डप्रत्ययः । वपुःप्रकर्षेणाकारसंपदाऽसंस्तुतानामपरिचितानामपि । व्यासोऽयमित्यजानतामपीत्यर्थः । 'संस्तवः स्यात्परिचय' इत्यमरः । चेतःसु चित्तेष्वार्द्रभावमभिप्रायं प्रसह्य बलात्समासजन्तम् । लगयन्तमिति यावद् । 'दंशसञ्जस्वञ्जां शपि' इत्युपधाया लोपः । प्रसन्नाकारेषु सर्वोऽपि स्निह्यतीति भावः ॥ २ ॥

(भा०) प्रसादेति । पुनः समग्रां सकलां प्रसादलक्ष्मीं प्रसन्नतासम्पदं दधतं धारयन्तं जनातिगेन लोकोत्तरेण वपुःप्रकर्षेण शरीरोत्कर्षेण (आकारसम्पदा) असंस्तुतानाम् । अपरिचितानामपि (जनानाम्) चेतःसु मानसेषु, आर्द्रं प्रेमक्लिन्नं भावम् अभिप्रायं प्रसह्य हठात् समासजन्तं लगयन्तम् । प्रसन्नताशालिषु जनेषु सर्वेषां स्नेहो भवतीति भावः । अपरिचितजनमानसेष्वार्द्रभावसम्बन्धसम्पादने लोकोत्तरशरीरोत्कर्षस्य पदार्थस्य हेतुत्वात्पदार्थहेतुकं काव्यलिङ्गम् ॥ २ ॥

अनुद्धताकारतया विविक्तां तन्वन्तमन्तःकरणस्य वृत्तिम् ।
माधुर्यविस्रम्भविशेषभाजा कृतोपसंभाषमिवेक्षितेन ॥ ३ ॥

अन्वयः—अनुद्धताकारतया, अन्तःकरणस्य, वृत्तिं, विविक्तां, तन्वन्तम् , माधुर्यविस्रम्भविशेषभाजा, ईक्षितेन, कृतोपसम्भाषम् , इव (स्थितं मुनिं धर्मात्मज आबभाषे) ॥ ३ ॥

(म०) अनुद्धतेति ॥ पुनरनुद्धताकारतया शान्ताकारत्वेन लिङ्गेनान्तःकरणस्य वृत्तिं विविक्तां पूताम् । शान्तामिति यावद् । 'विविक्तौ पूतविजनौ' इत्यमरः । तन्वन्तं प्रकटयन्तम् । आकृतिरेवास्य चित्तशुद्धिं कथयतीत्यर्थः । पुनर्माधुर्यं निसर्गसौम्यता विस्रम्भो विश्वासः । 'समौ विस्रम्भविश्वासौ' इत्यमरः । तयोर्विशेषमतिशयं भजतीति तथोक्तेनेक्षितेन दर्शनेनैव कृतोपसंभाषा संभाषणं येन तमिवेत्युत्प्रेक्षा । दृष्टिविशेषेणैवोपसंभाषमाणमिव स्थितमित्यर्थः । काशिकायां तु 'उपसम्भाषणमुपसान्त्वनम्' इति भासनादिसूत्रे ॥ ३ ॥

(भा०) अनुद्धतेति । अनुद्धताकारतया शान्ताकारतया (लिङ्गेन) अन्तःकरणस्य मानसस्य वृत्तिं व्यापारं विविक्तां शान्तां तन्वन्तं विस्तारयन्तम् (प्रकटयन्तं) माधुर्यविस्रम्भविशेषभाजा स्वाभाविकसौम्यताविश्वासातिशयशालिना, ईक्षितेनावलोकनेन कृतोपसम्भाषं कृतसम्भाषणमिव स्थितम् । आकृतिरेव यस्य मानसशुद्धिमभिदधाति यश्चावलोकनेन कृतसम्भाषण इव प्रतिभाति तादृशं मुनिमाबभाष इत्यर्थः । अत्रोत्प्रेक्षाऽलङ्कारः ॥ ३ ॥

धर्मात्मजो धर्मनिबन्धिनीनां प्रसूतिमेनःप्रणुदां श्रुतीनाम् ।
हेतुं तदभ्यागमने परीप्सुः सुखोपविष्टं मुनिमाबभाषे ॥ ४ ॥

अन्वयः—धर्मनिबन्धिनीनाम्, एनःप्रणुदां, श्रुतीनाम्, प्रसूतिं, सुखोपविष्टं, मुनिम् , तदभ्यागमने, हेतुं, परीप्सुः, धर्मात्मजः, आबभाषे ॥ ४ ॥

(म०) धर्मेति ॥ पुनर्धर्मं निबध्नन्तीति धर्मनिबन्धिनीनामग्निहोत्रादिधर्मप्रतिपादिकानाम् । एनःप्रणुदामघच्छिदाम् । क्विप् । श्रुतीनां वेदानाम् । 'श्रुतिः स्त्री वेद आम्नायः' इत्यमरः । प्रसूतिं प्रभवं सुखेनोपविष्टं मुनिं तदभ्यागमने तस्य मुनेरागमने

हेतुं परीप्सुर्जिज्ञासुः। आप्नोतेः सन्नन्तादुप्रत्ययः। 'आप्ज्ञप्यृधामीत्' इतीकारः। 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपः। आबभाष उवाच ॥ ४ ॥

(भा०) धर्मात्मज इति। धर्मनिबन्धिनीनां धर्मप्रतिपादिकानाम् एनःप्रणुदां पापविनाशिकानां श्रुतीनां वेदानां प्रसूतिम् उत्पत्तिकारणं सुखोपविष्टं सम्यगुपविष्टं मुनिं व्यासं तदभ्यागमने व्यासागमने हेतुं कारणं परीप्सुर्जिज्ञासुर्धर्मात्मजो युधिष्ठिर आबभाष उवाच। आगमनहेतुमवगन्तुमिच्छुर्युधिष्ठिरो वेदोत्पत्तिकारणं व्यासमुवाचेत्यर्थः। युधिष्ठिरकर्तृकव्यासोद्देश्यकभाषणे तदागमनहेतुजिज्ञासाऽऽत्मकपदार्थस्य हेतुत्वात्पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ४ ॥

अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्धूतरजाः सवित्री।
तुल्या भवद्दर्शनसंपदेषा वृष्टेर्दिवो वीतवलाहकायाः ॥ ५ ॥

अन्वय—अनाप्तपुण्योपचयैः, दुरापा, फलस्य, सवित्री, निर्धूतरजाः, एषा, भवद्दर्शनसम्पद्, वीतवलाहकायाः, दिवः, वृष्टेः, तुल्या ॥ ५ ॥

(म०) अनाप्तेति ॥ अनाप्तपुण्योपचयैरकृतपुण्यसंग्रहैर्दुरापा दुर्लभा फलस्य सवित्री श्रेयस्करी निर्धूतरजा हतरजोगुणा। अन्यत्र निरस्तधूलिः। 'रजो रजोगुणे धूलौ परागार्त्तवयोरपि' इति शाश्वतः। एषा भवद्दर्शनसंपत्संपत्तिः। लाभ इति यावत्। संपदादिभ्यः क्विपो भावार्थत्वात्। वीतवलाहकाया गतमेघाया दिव आकाशस्य संबन्धिन्या वृष्टेस्तुल्येत्युपमाऽलंकारः। अनभ्रवृष्टिवदतर्कितोपनतं भवद्दर्शनं सर्वथा कस्यचिच्छ्रेयसो निदानमित्यर्थः। वारि वहतीति वलाहकः। पृषोदरादित्वात्साधुः ॥ ५ ॥

(भा०) अनाप्तपुण्येति। अनाप्तपुण्योपचयैरकृतसुकृतपुञ्जैः (जनैः) दुरापा दुष्प्रापा फलस्य प्रयोजनस्य सवित्री, उत्पादयित्री। निर्धूतरजा रजोगुणरहिता (हतरजोगुणा) एषा भवद्दर्शनसम्पत् त्वदवलोकनसम्पत्तिः, वीतवलाहकाया हतमेघाया दिव आकाशस्य (सम्बन्धिन्याः) वृष्टेस्तुल्या वर्षणसदृशी। अकालवृष्टिवदासंभवदवलोकनं सर्वदा कल्याणकारणमित्यर्थः। अत्रोपमाऽलंकारः ॥ ५ ॥

अद्य क्रियाः कामदुघाः क्रतूनां सत्याशिषः संप्रति भूमिदेवाः।
आ संसृतेरस्मि जगत्सु जातस्त्वय्यागते यद् बहुमानपात्रम् ॥६॥

अन्वयः—अद्य, क्रतूनां, क्रियाः, कामदुघाः, सम्प्रति, भूमिदेवा सत्याशिषः, (जाताः)। यत्, त्वयि, आगते, अस्मि, आ संसृतेः, जगत्सु, बहुमानपात्रं, जातः ॥६॥

(म०) अद्येति ॥ अद्य क्रतूनां क्रिया अनुष्ठानानि कामान् दुहन्तीति कामदुघाः। फलदा इत्यर्थः। 'दुहः कब्घश्च' इति कप्रत्ययो घादेशश्च। संप्रत्यद्य भूमिदेवा ब्राह्मणाः। 'द्विजात्यग्रजन्मभूदेववाडवाः। विप्रश्च ब्राह्मणः' इत्यमरः। सत्याशिषो जाताः। ब्राह्मणाशिषोऽद्य फलिता इत्यर्थः। यद्यतः कारणात्त्वय्यागते सति। त्वदागम-

नेन निमित्तेनेत्यर्थः। अस्मीत्यहमर्थेऽव्ययम्। 'अस्मीत्यस्मदर्थानुवादेऽहमर्थेऽपि' इति प्रयोगाच्च। आ संसृतेरा संसाराद्। यावत्संसारमित्यर्थः। अभिविधावाङ्विकल्पाद-समासः। जगत्सु बहुमानपात्रम् बहुयोग्यताभाजनम्। जातः। सकलसत्कर्मफलभूतं त्वदागमनं येन मे जगन्मान्यतेति भावः॥ ६॥

(भा०) अद्येति। अद्यास्मिन्वासरे क्रतूनां यज्ञानां क्रिया अनुष्ठानानि कामदुघाः-फलोत्पादिकाः सम्प्रत्यद्य भूमिदेवा ब्राह्मणाः सत्याशिषस्तथ्यवचना जाताः। यद् यतः-कारणात् त्वयि भवति, आगते प्राप्ते सति, अस्म्यहम्, आ संसृतेर्यावत्संसारं जगत्सु लोकेषु बहुमानपात्रं बहुयोग्यताभाजनं जातः प्राप्तः, सकलसुकृतफलभूतभवदवलो-कनाज्जगन्मान्यः संवृत्तोऽस्मीति भावः। यज्ञक्रियायाः फलोत्पादकत्वे भूमिदेवानां सत्यवादित्वे बहुमानपात्रताप्राप्तौ च त्वय्यागते, इति पदार्थस्य हेतुत्वात्पदार्थहेतुक-काव्यलिङ्गमलङ्कारः॥ ६॥

श्रियं विकर्षत्यपहन्त्यघानि श्रेयः परिस्नौति तनोति कीर्त्तिम्।
संदर्शनं लोकगुरोरमोघं तवात्मयोनेरिव किं न धत्ते॥ ७॥

अन्वयः—आत्मयोनेः, इव, लोकगुरोः, तव, अमोघं, सन्दर्शनम्, श्रियं, विक-र्षति, अघानि, अपहन्ति, श्रेयः, परिस्नौति, कीर्त्तिं, तनोति, किं, न, धत्ते॥ ७॥

(म०) श्रियमिति। आत्मयोनेर्ब्रह्मण इव लोकगुरोस्तवामोघमविफलं संदर्शनं-श्रियं विकर्षत्याकर्षति। अघानि दुःखान्यपहन्ति। 'अंहोदुःखव्यसनेष्वघम्' इत्यमरः। श्रेयः पुरुषार्थं परिस्नौति स्रवति। कीर्त्तिं च तनोति किं बहुना किं न धत्ते किं न करोति। सर्वं करोतीत्यर्थः॥ ७॥

(भा०) श्रियमिति। आत्मयोनेर्ब्रह्मण इव लोकगुरोर्जगत्पूज्यस्य तव भवतः, अ-मोघमनिष्फलं संदर्शनं श्रियं सम्पत्तिं विकर्षत्याकर्षति, अघानि पापानि, अपहन्ति नाशयति श्रेयः कल्याणं (पौरुषं) परिस्नौति जनयति कीर्त्तिं यशस्तनोति विस्तारयति किं विशेषेण किं न धत्ते सर्वं करोतीत्यर्थः। यथा ब्रह्मणो दर्शनमभीष्टसाधकं तथा भव-द्दर्शनं मदभीष्टसाधकमिति भावः। पूर्वार्द्धे समुच्चयालङ्कारः। उत्तरार्द्धे उपमाऽर्थापत्ति-श्चेति त्रयाणां संसृष्टिः॥ ७॥

श्च्योतन्मयूखेऽपि हिमद्युतौ मे ननिर्वृतं निर्वृतिमेति चक्षुः।
समुज्झितज्ञातिवियोगखेदं त्वत्संनिधावुच्छ्वसितीव चेतः॥ ८॥

अन्वयः—श्च्योतन्मयूखे, हिमद्युतौ, अपि, ननिर्वृतं, मे, चक्षुः, त्वत्सन्निधौ, नि-र्वृतिम्, एति। (तथा) चेतः, समुज्झितज्ञातिवियोगखेदम्, उच्छ्वसिति, इव॥ ८॥

(म०) श्च्योतदिति॥ हे भगवन्! श्च्योतन्मयूखे सुधास्राविकरे हिमद्युतावि-न्दावपि विषये ननिर्वृतम्। नञर्थस्य नशब्दस्य सुप्सुपेति समासः। मे चक्षुस्त्वत्सन्निधौ

निर्वृतिं सुखमेति । तथा चेतश्च समुज्झितज्ञातिवियोगखेदं त्यक्तबन्धुविरहदुःखं समुच्छ्वसितीवानुपरोधेन प्राणितीवेत्युत्प्रेक्षा । पूर्वार्द्धे तु निर्वृतिकारणे सत्यपीन्द्वावनिर्वृतिकथनाद्विशेषोक्तिः । तदुक्तं—'तत्सामग्र्यामनिर्वृत्तिर्विशेषोक्तिर्निगद्यते' इति ॥८॥

(भा०) श्च्योतदिति । हे मुने ! श्च्योतन्मयूखेऽपि स्रवत्पीयूषेऽपि हिमद्युतौ चन्द्रेऽपि ननिर्वृतम् अनाप्तसुखं मे मम चक्षुर्नेत्रं त्वत्सन्निधौ भवत्सविधे निर्वृतिं सुखम् एति प्राप्नोति । तथा चेतो मनश्च त्वत्सन्निधौ समुज्झितज्ञातिवियोगखेदं त्यक्तबन्धुविरहदुःखं सद् उच्छ्वसितीव, अनुपरोधेन प्राणितीव चन्द्रेऽप्यनवाप्तसुखं मच्चक्षुस्त्वय्येव सुखमवाप्य, चेतश्च बन्धुविरहदुःखं विस्मृत्य समुच्छ्वसितीव चेत्यर्थः । पूर्वार्द्धे विशेषोक्तिः, उत्तरार्द्धे उत्प्रेक्षा चेति संसृष्टिः ॥ ८ ॥

निरास्पदं प्रश्नकुतूहलित्वमस्मास्वधीनं किमु निःस्पृहाणाम् ।
तथाऽपि कल्याणकरीं गिरं ते मां श्रोतुमिच्छा मुखरीकरोति ॥९॥

अन्वयः—प्रश्नकुतूहलित्वं, निरास्पदम्, निःस्पृहाणाम्, अस्मासु, अधीनं, किमु । तथाऽपि, कल्याणकरीं, ते, गिरं, श्रोतुम्, इच्छा, मां, मुखरीकरोति ॥ ९ ॥

(म०) निरास्पदमिति ॥ प्रश्नकुतूहलित्वं निरास्पदम् । त्वदागमनप्रयोजनप्रश्नो निरास्पद इत्यर्थः । 'आस्पदं प्रतिष्ठायाम्' इति निपातः । प्रश्नानवकाशे हेतुमाह—निःस्पृहाणाम् । युष्मादृशामित्यर्थः । अस्मास्वधीनमायत्तं किमु । न किञ्चिदस्मत्तो लभ्यमित्यर्थः । आधारत्वविवक्षायां सप्तमी । तथाऽपि कल्याणकरीम् । अस्मद्धितैकहेतुमित्यर्थः । निःस्पृहवृत्तेः पारार्थ्यादिति भावः । 'कृञो हेतु–' इति टप्रत्यये ङीप् । अतस्ते गिरं श्रोतुमिच्छा माम् । मुखं वागस्यास्तीति मुखरो निरन्तरभाषी । 'रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम्' इति रः । 'दुर्मुखे मुखराबद्धमुखौ' इत्यमरः । तनश्च्विप्रत्ययः । मुखरीकरोति । व्याहारयतीत्यर्थः । निःस्पृहस्यापि ते वाक्यमस्मद्धितकरत्वाच्छ्रोतव्यमिति भावः ॥ ९ ॥

(भा०) निरास्पदमिति । प्रश्नकुतूहलित्वं पृच्छौत्कण्ठ्यं निरास्पदं स्थानरहितं निःस्पृहाणां निरभिलाषिणां (भवादृशानाम्) अस्मास्वधीनं मदायत्तं किमु न किमपीत्यर्थः । तथाऽपि कल्याणकरीं श्रेयःसाधिनीम् (अस्मद्धितैकहेतुं) ते तव गिरं वाणीं श्रोतुमिच्छा, आकर्णितुमभिलाषा मां मुखरीकरोत्यनवरतभाषीकरोति । निरभिलाषिणोऽपि भवतो वचो हितसाधकमित्याकर्णितव्यमिति भावः । पूर्वार्द्धे प्रश्नकुतूहलित्वस्य निरास्पदत्वे, अस्मास्वधीनं किम्विति पदार्थो हेतुः, उत्तरार्द्धे च मां मुखरीकरोतीत्यत्र कल्याणकरीं गिरं श्रोतुमिच्छा हेतुरिति पदार्थहेतुकं काव्यलिङ्गद्वयम् ॥ ९ ॥

इत्युक्त्वानुक्तिविशेषरम्यं मनः समाधाय जयोपपत्तौ ।
उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधे नरेन्द्रः ॥ १० ॥

अन्वयः—इति, उक्तिविशेषरम्यम्, उक्तवान्, उदारचेताः, नरेन्द्रः, द्वैपायनेन, जयोपपत्तौ, मनः, समाधाय, इति, उदारां, गिरम्, अभिदधे ॥ १० ॥

(म०) इतीति ॥ इतीत्थमुक्तिविशेषरम्यमुक्तिवैचित्र्यचारु यथा तथोक्तवान् । उदारचेता महामना नरेन्द्रो द्वैपायनेन व्यासेन । द्वीपमयनं स्थानं जन्मभूमिर्यस्य स द्वीपायनः । स एव द्वैपायनस्तेन । 'प्रज्ञादिभ्यश्च' इति स्वार्थेऽण्प्रत्ययः । नापत्यार्थे । 'नडादिभ्यः फक्' । तेष्वेव पाठाद्बाधितार्थत्वाच्च । जयोपपत्तौ मनः समाधाय । जयसिद्धिमपेक्ष्येत्यर्थः । इति वक्ष्यमाणप्रकारामुदारामर्थवतीं गिरमभिदध उक्तः । दुहादित्वादप्रधाने कर्मणि लिट् । 'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् । अप्रधाने दुहादीनां ण्यन्ते कर्त्तुश्च कर्मणः' ॥ इति वचनात् ॥ १० ॥

(भा०) इत्युक्तवानिति । इतीत्थम् उक्तिविशेषरम्यम् उक्तिवैचित्र्यचारु यथा तथोक्तवान् अभिहितवान् उदारचेता उदारप्रकृतिः, नरेन्द्रो युधिष्ठिरः, द्वैपायनेन व्यासेन जयोपपत्तौ जयसिद्धौ मनश्चित्तं समाधाय संस्थाप्य, इति वक्ष्यमाणप्रकाराम् उदाराम् औदार्यशालिनीं गिरं वाणीम् अभिदध उक्तः । सम्यगुक्तवन्तं युधिष्ठिरमुद्दिश्य जयसिद्धिमपेक्ष्य मुनिः समुचितवचनमुक्तवानित्यर्थः । व्यासकर्तृकनरेन्द्रोद्देश्यकोदारवचनाभिधाने जयसिद्धिमपेक्ष्येत्यस्य हेतुत्वात्पदार्थहेतुकं काव्यलिङ्गम् ॥ १० ॥

आदौ तावत्तस्य माध्यस्थ्यभङ्गदोषं युग्मेन परिहरति—

चिचीषतां जन्मवतामलघ्वीं यशोऽवतंसामुभयत्र भूतिम् ।
अभ्यर्हिता बन्धुषु तुल्यरूपा वृत्तिर्विशेषेण तपोधनानाम् ॥ ११ ॥

अन्वयः—अलघ्वीं, यशोऽवतंसाम्, उभयत्र, भूतिम्, चिचीषतां, जन्मवतां, बन्धुषु, तुल्यरूपा, वृत्तिः, अभ्यर्हिता, तपोधनानां (तु), विशेषेण ॥ ११ ॥

(म०) चिचीषतामिति ॥ अलघ्वीं गुर्वीम् । 'वोतो गुणवचनात्' इति ङीष् । यशोऽवतंसां कीर्त्तिभूषणाम् । उभयत्रेह चामुत्र च भूतिं श्रेयश्चिचीषतां चेतुं सङ्ग्रहीतुमिच्छताम् । चिनोतेः सन्नन्ताच्छतृप्रत्ययः । जन्मवतां शरीरिणां बन्धुषु विषये तुल्यरूपैकविधा वृत्तिर्व्यवहारोऽभ्यर्हितोचिता तपोधनानां त्वस्मत्सदृशां विशेषेण नियमेनाभ्यर्हिता ॥ ११ ॥

(भा०) चिचीषतामिति । अलघ्वीं गुर्वीं यशोऽवतंसां कीर्त्तिभूषणाम् उभयत्र, इह परत्र च भूतिं कल्याणं चिचीषतां संग्रहीतुमिच्छतां जन्मवतां देहधारिणां बन्धुषु बन्धुविषये तुल्यरूपा समाना वृत्तिर्व्यवहारोऽभ्यर्हिता युक्ता, तपोधनानाम् अनुष्ठानासक्तानां (भवादृशाम्) तु बन्धुविषये विशेषेण तुल्यरूपा वृत्तिरभ्यर्हित युक्ता । लोके सर्वेषां जन्तुषु तुल्यव्यवहारः, तपोधनानां तु विशेषेणेत्यर्थः । देहधारिणां-

बन्धुषु तुल्यव्यवहारस्याभ्यर्हितत्वे, उभयत्र भूतिसंग्रहस्य हेतोः पदार्थत्वात्पदार्थहेतुकं काव्यलिङ्गम् ॥ ११ ॥

तथाऽपि निघ्नं नृप ! तावकीनैः प्रह्वीकृतं मे हृदयं गुणौघैः ।
वीतस्पृहाणामपि मुक्तिभाजां भवन्ति भव्येषु हि पक्षपाताः ॥१२॥

अन्वयः—(हे) नृप !, तथाऽपि, तावकीनैः, गुणौघैः, प्रह्वीकृतम्, मे, हृदयं, निघ्नं, हि, वीतस्पृहाणां, मुक्तिभाजाम्, अपि, भव्येषु, पक्षपाता, भवन्ति ॥ १२ ॥

(म०) तथाऽपीति ॥ तथाऽपि तुल्यवृत्तौ चित्तेऽपि । हे नृप ! तावकीनैस्त्वदीयैः । 'युष्मदस्मदोरन्यतरस्यां खञ्च' इति खञ्प्रत्यय । 'तवकममकावेकवचने' इति तवकादेश । गुणौघैः प्रह्वीकृतमावर्जितं मे हृदयं निघ्नं त्वदायत्तम् । 'अधीनो निघ्न आयत्तः' इत्यमर । ननु निःस्पृहस्य कोऽयं पक्षपात इत्यत्राह—वीतेति । वीतस्पृहाणां विरक्तानां मुक्तिभाजाम् । मुमुक्षूणामपीत्यर्थः । भवन्तीति भव्याः साधवः । 'भव्यगेय—' इत्यादिना कर्त्तरि निपात । तेषु पक्षपाताः स्नेहा भवन्ति । न तु साध्वनुग्रहो महतां माध्यस्थ्यभञ्जक इति भावः ॥ १२ ॥

(भा०) तथाऽपीति । हे नृप ! राजन् ! तथाऽपि तुल्यवृत्तेरभ्यर्हितत्वेऽपि तावकीनैर्भवदीयैः, गुणौघैर्गुणसमूहैः प्रह्वीकृतम् आवर्जितं मे मम हृदयं चित्तं निघ्नं त्वदायत्तम् । हि यतः कारणात् वीतस्पृहाणां विगताभिलाषिणां मुक्तिभाजां मुमुक्षूणामपि भव्येषु साधुषु पक्षपाताः स्नेहा भवन्ति जायन्ते । महतां साधुष्वनुकम्पया नोत्कृष्टत्वहानिरिति भावः । पूर्वार्द्धप्रतिपाद्यविशेषार्थस्योत्तरार्द्धप्रतिपाद्यसामान्यार्थेन समर्थनात्सामान्येन विशेषसमर्थनात्मकोऽर्थान्तरन्यास ॥ १२ ॥

अथ नृपस्य गुणवत्तां प्रकटयितुं धृतराष्ट्रस्य दुश्चेष्टामुद्घाटयति—

सुता न यूयं किमु तस्य राज्ञः सुयोधनं वा न गुणैरतीताः ।
यस्त्यक्तवान्वः स वृथा बलाद्वा मोहं विधत्ते विषयाभिलाषः ॥१३॥

अन्वय.—यूयं, तस्य, राज्ञः, सुता, न किमु, गुणैः, सुयोधनं न, अतीताः, वा, य, वः, वृथा, त्यक्तवान्, सः, विषयाभिलाषः, बलात्, वा मोहं, विधत्ते ॥ १३ ॥

(म०) सुता इति ॥ यूयं तस्य राज्ञो धृतराष्ट्रस्य सुताः पुत्रा न किमु । अपि तु सुता एवेत्यर्थ । गुणैः शान्तिदानदाक्षिण्यादिभिः । सुयोधनं नातीता नातिक्रान्ता वा । अतीता एवेत्यर्थ । कर्त्तरि क्तः । असुतत्वमगुणत्वं च त्यागे हेतु । युष्मासु तन्नास्तीत्यर्थ । उपालम्भे कारणमाह—य इति । यो धृतराष्ट्रो वो युष्मान् वृथा निष्कारणमेव त्यक्तवान् । यदि वयं सुता गुणाधिकाश्च तर्हि कथमस्याक्षीत्तत्राह—बलादिति । स विषयाभिलाषो भोगतृष्णा बलाद्वा बलादिव । 'वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये' इति विश्वः । मोहमविवेकं विधत्ते । विषयाभिलाषातिरिक्तो न

कश्चिद्युष्मत्त्यागहेतुरस्तीत्यर्थः । अत्र कार्यकारणसमर्थनरूपोऽर्थान्तरन्यासः ॥ १३ ॥

(भा०) सुता इति । यूयं भवन्तः, तस्य राज्ञो (धृतराष्ट्रस्य) सुताः पुत्रा न किमु, अपि तु सुता एव । गुणैर्दयादाक्षिण्यप्रभृतिभिः सुयोधनं दुर्योधनं नातीता नाक्रान्ता वा, किन्तु-अतीता एव । यो धृतराष्ट्रः, वो युष्मान् वृथा निष्कारणमेव त्यक्तवान् स विषयाभिलाषो भोगस्पृहा बलाद् बलात्कारादिव मोहम् अविवेकं विधत्ते करोति । धृतराष्ट्रस्य विषयवाञ्छैव युष्मत्परित्यागे हेतुर्न तदतिरिक्तः कश्चिदित्यर्थः । अत्र कार्यकारणसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥ १३ ॥

अथ राज्ञ उत्साहवर्द्धनाय शत्रोर्हानिं सूचयति—

जहातु नैनं कथमर्थसिद्धिः संशय्य कर्णादिषु तिष्ठते यः ।
असाधुयोगा हि जयान्तरायाः प्रमाथिनीनां विपदां पदानि ॥१४॥

अन्वयः—यः, कर्णादिषु, संशय्य, तिष्ठते, एनम्, अर्थसिद्धिः, कथं, न, जहातु, हि, असाधुयोगाः, जयान्तरायाः, प्रमाथिनीनां, विपदां, पदानि (भवन्ति) ॥ १ ॥

(म०) जहात्विति ॥ एनं धृतराष्ट्रमर्थसिद्धिः कथं न जहातु । जहात्वेवेत्यर्थः । 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' इति प्राप्तकाले लोट् । तस्य हानिकालः प्राप्त इत्यर्थः। कुतः । यो धृतराष्ट्रः संशय्य संदिह्य कर्णादिषु तिष्ठते । कर्णादीन्दुर्मन्त्रिण सन्दिग्धार्थे निर्णेतृत्वेनावलम्बत इत्यर्थः । 'प्रकाशनस्थेयाख्ययोश्च' इति स्थेयाख्यायामात्मनेपदम् । तिष्ठतेऽस्मिन्निति स्थेयो विवादपदनिर्णेता । तथा हि । असाधुयोगा दुर्जनसंसर्गा जयान्तराया जयविघातकाः । किञ्च प्रमाथिनीनामुन्मूलनशीलानां विपदां पदानि स्थानानि । 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । न केवलं जयघातिन किंत्वनर्थकारिणश्चेत्यर्थः । धृतराष्ट्रोऽपि दुर्जनविधेयत्वाद्विनङ्क्ष्यतीति भावः ॥१४॥

(भा०) जहात्विति । यो धृतराष्ट्रः कर्णादिषु कर्णप्रभृतिषु दुरमात्येषु संशय्य संदेहं कृत्वा तिष्ठते विद्यते, एनं धृतराष्ट्रम् अर्थसिद्धिरैश्वर्य्यस्थितिः कथं न जहातु कुतो न त्यजतु, किन्तु जहात्वेव । हि यतः कारणाद् असाधुयोगा असत्संसर्गाः, जयान्तराया-जयविघातका भवन्ति, किञ्च प्रमाथिनीनाम् उन्मूलनशीलानां विपदां दुःखानां पदानि स्थानानि च भवन्ति । कर्णादिदुरमात्यमवलम्बमानस्य धृतराष्ट्रस्यार्थो नङ्क्ष्यत्येव, असत्संसर्गाश्च न केवलं जयविघातका अपि तु दुःखप्रदा अपीत्यर्थ । दुर्जनसंसर्गाद् धृतराष्ट्रो विनङ्क्ष्यत्येवेति भावः । उत्तरार्द्धप्रतिपाद्यसामान्यार्थेन पूर्वार्द्धप्रतिपाद्यविशेषार्थस्य समर्थनात्सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥ १४ ॥

एवं शत्रोरनर्थं सूचयित्वा राज्ञोऽर्थसिद्धिं सूचयति—

पथश्च्युतायां समितौ रिपूणां धर्म्यां दधानेन धुरं चिराय ।
त्वया विपत्स्वप्यविपत्तिरम्यमाविष्कृतं प्रेम परं गुणेषु ॥ १५ ॥

अन्वयः—पथः, च्युतायां, रिपूणां, समितौ, चिराय, धर्म्यां, धुरं, दधानेन, त्वया, विपत्सु, अपि, अविपत्तिरम्यं, गुणेषु, परं, प्रेम, आविष्कृतम् ॥ १५ ॥

(म०) पथ इति । रिपूणां समितौ सभायाम् । 'सभासमितिसंसदः' इत्यमरः । पथश्च्युतायां मार्गाद् भ्रष्टायाम् । दुरात्मनो दुःशासनस्य स्त्रीग्रहणसाहसमङ्गीकृतवत्यामित्यर्थः । चिराय धर्म्यां धर्मादनपेताम् । 'धर्मपथ्यर्थन्यायादनपेते' इति यत्प्रत्ययः । धुरं भारं दधानेन । कृच्छ्रेष्वपि धर्मादचलतेत्यर्थ । त्वया विपत्स्वपि, अविपत्त्यविनाश्यत एव रम्यं गुणेषु शान्त्यादिषु विषये परमुत्कृष्टम् प्रेमाविष्कृतं प्रकटीकृतम् । दुःसहमपि सोढवता त्वया साधु कृतमिति भाव ॥ १५ ॥

(भा०) पथश्च्युतायामिति । पथो मार्गाद् च्युतायां परिभ्रष्टायां रिपूणां शत्रूणां समितौ सभायां चिराय चिरकालं धर्म्यां धर्मादनपेतां धुरं भारं दधानेन धारयता त्वया भवता विपत्सु दुःखेस्वपि, अविपत्तिरम्यम् अविपत्सुभगं गुणेषु शान्त्यादिषु परम् उत्कृष्टं प्रेम स्नेहः ,आविष्कृतं प्रकटितम् । रिपुकृतम्त्रीग्रहणादिदुर्व्यवहारमप्रतिकुर्वाणो भवान् साधु कृतवानिति भाव । विपत्स्वविपत्तिरम्यत्वं विरुद्धमिति विरोधाभासनामाऽलङ्कार ॥१५ ॥

विधाय विध्वंसमनात्मनीनं शमैकवृत्तेर्भवतश्छलेन ।
प्रकाशितत्वन्मतिशीलसाराः कृतोपकारा इव विद्विषस्ते ॥१६॥

अन्वयः—शमैकवृत्तेः, भवत , छलेन, अनात्मनीनं, विध्वंसं, विधाय, प्रकाशितत्वन्मतिशीलसाराः, ते, विद्विषः, कृतोपकाराः, इव, ॥ १६ ॥

(म०) विधायेति ॥ किं च शम एवैका मुख्या वृत्तिर्यस्य तस्यापरोपतापिनो भवतश्छलेन कपटेन। आत्मने हित आत्मनीन । स न भवतीत्यनात्मनीन. । स्वस्यैवानर्थहेतुरित्यर्थः । तम् । 'आत्मन्विश्वजनभोगोत्तरपदात्ख ' इति खप्रत्यय । विध्वंसमपकारं विधाय कृत्वा । प्रकाशितः प्रख्यापितस्त्वन्मतिशीलयोस्तव प्रज्ञासद्वृत्तयो -सार प्रकर्षो यैस्ते तथोक्ताः । ते तव विद्विषः कृतोपकारा इवोपकृतवन्त इव । अपकाराऽप्युपकारायैव संवृत्त. । यदेषां दौर्जन्यं युष्मत्सौजन्यं च जगति सुव्यक्तमासीदित्यर्थः । विद्यमानस्यापि सुजनस्य चन्दनदारुण इव गुणा परिभव एव प्रचुरीभवन्तीति भावः ॥ १६ ॥

(भा०) विधायेति । शमैकवृत्तेः क्षान्तिमुख्यव्यापारस्य भवतस्तव छलेन व्याजेन, अनात्मनीनं स्वार्थं विध्वंसम् अपकारं विधाय कृत्वा प्रकाशितत्वन्मतिशीलसारा प्रकटितभवत्प्रज्ञास्वभावप्रकर्षा. ते तव विद्विषः शत्रव कृतोपकारा·, हितकारिण इव । संवृत्ता इति शेषः । शत्रोर्भवतश्च सौजन्यस्य लोकप्रसिद्धत्वात्तत्कृतापकृतिरुपकृतिरूपेण प रणतेत्यर्थः । चन्दनतरोरिव सुजनस्यापि परिभवे सत्येव गुणाधिक्यंप्रसिद्ध्यतीति भावः। अत्रोत्प्रेक्षाऽलङ्कार. ॥ १६ ॥

अथ प्रयोजनान्तरमाह—

लभ्या धरित्री तव विक्रमेण ज्यायांश्च वीर्यास्त्रबलैर्विपक्षः ।
अतः प्रकर्षाय विधिर्विधेयः प्रकर्षतन्त्रा हि रणे जयश्रीः ॥ १७ ॥

अन्वयः—तव, धरित्री, विक्रमेण, लभ्या, विपक्षः, च, वीर्यास्त्रबलैः, ज्यायान्, अतः, प्रकर्षाय, विधि, विधेयः, हि, रणे, जयश्री, प्रकर्षतन्त्रा ॥ १७ ॥

(म०) लभ्येति । तव । त्वयेत्यर्थः । 'कृत्यानां कर्त्तरि वा' इति षष्ठी । धरित्री विक्रमेण लभ्या प्राप्तव्या । न च सुलभ्या तं विनेत्याह–विपक्षश्च शत्रुरपि । वीर्यं शौर्यमस्त्राण्याग्नेयादीनि बलानि सैन्यानि तैर्ज्यायान्प्रशस्यतर. । अधिकतर इति यावद् । ज्येष्ठस्य 'ज्यादादीयस' इति ज्यादेशः । अतः प्रकर्षायाधिक्याय विधिरुपायो विधेय - कर्त्तव्य । कुतः । हि यस्माद्रणे जयश्रीः प्रकर्षतन्त्रा प्रकर्षप्रधाना । प्रकर्षायत्तेत्यर्थः । 'तन्त्रं प्रधाने सिद्धान्ते' इत्यमरः । बलिन एव जय, न तु दुर्बलस्येति भावः ॥ १७ ॥

(भा०) लभ्येति । तव त्वया धरित्री पृथिवी विक्रमेण पौरुषेण लभ्या प्राप्या विपक्षश्च शत्रुरपि वीर्यास्त्रबलैः सामर्थ्यास्त्रसैन्यैः, ज्यायान् प्रशस्यतर । अतोऽस्मात्कारणात् प्रकर्षाय विधिरुपायो विधेय कर्त्तव्य, हि यतः कारणाद् रणे संग्रामे जयश्रीर्जयलक्ष्मीः प्रकर्षतन्त्रा प्रकर्षायत्ता । बलवन्त एव जयभाजिनो भवन्ति न तु बलहीना इति भाव । प्रकर्षार्थोपायविधाने पूर्वार्द्धोपात्तस्य हेतुद्वयस्य वाक्यार्थत्वेनोक्त्या वाक्यार्थहेतुकं काव्यलिङ्गम् । तुरीयपादेऽर्थान्तरन्यासश्चेत्युभयो संसृष्टिः ॥ १७ ॥

अथ 'त्रि'—इत्यादिना श्लोकचतुष्टयेन विपक्षज्यायस्त्वं वर्णयति—

त्रिःसप्तकृत्वो जगतीपतीनां हन्ता गुरुर्यस्य स जामदग्न्यः ।
वीर्यावधूतः स्म तदा विवेद प्रकर्षमाधारवशं गुणानाम् ॥ १८ ॥

अन्वयः—(य) त्रिःसप्तकृत्वः, जगतीपतीनां, हन्ता, गुरुः सः, जामदग्न्यः, यस्य, वीर्यावधूत., (सन्) तदा, गुणानां, प्रकर्षम्, आधारवशं, विवेद ॥ १८ ॥

(म०) त्रिःसप्तेति । त्रिरावृत्तान्सप्तवारांस्त्रिःसप्तकृत्वः । एकविंशतिकृत्व इत्यर्थः । त्रि सप्तशब्दयोः 'सुप्सुपे'ति समासः । 'संख्यायाः क्रियाऽभ्यावृत्तिगणने कृत्वसुच्' इति कृत्वसुच्प्रत्ययः । जगतीपतीनां महीपतीनां हन्ता नाशको गुरुरस्त्रवेदोपदेष्टा सः प्रसिद्ध इत्यर्थ । अत एव यच्छब्दानपेक्षत्वम् । तदुक्तं काव्यप्रकाशे—'प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते' इति । जमदग्नेरपत्यं पुमाञ्जामदग्न्यः । 'गर्गादिभ्यो यञ्' इति यञ्प्रत्यः । यस्य भीष्मस्य वीर्यावधूतो विक्रमाभिभूतः । अम्बिकास्वयंवर इत्यर्थः । तदा भङ्गप्राप्तिसमये गुणानां शौर्यादीनां प्रकर्षमतिशयमाधारवशमाश्रयाधीनं विवेद जज्ञे । स्म । स्वविद्यायाः स्वशिष्ये भीष्मे स्वस्मादपि प्रकर्षाधानदर्शनादिति भावः । 'स्म पादपूरणे भूतेऽर्थे च' इति विश्वः ॥ १८ ॥

(भा०) त्रिःसप्तकृत्व इति। त्रिःसप्तकृत्व एकविंशतिकृत्वः, जगतीपतीनां राज्ञां-हन्ता विनाशकः, गुरुर्धनुर्वेदशिक्षकः स प्रसिद्धो जामदग्न्यो जमदग्निपुत्रः (परशुरामः) यस्य भीष्मस्य वीर्यावधूतः पौरुषाभिभूतः (शक्तिपराजितः) सन्, तदा रणकाले गुणानां शौर्यादीनां प्रकर्षम् (उत्कर्षम्) आधारवशम् आश्रयाधीनं विवेद ज्ञातवान्। स्म। अम्बिकास्वयम्वरविषयके रणे स्वान्तेवासिवर्ये भीष्मे स्वापेक्षया स्वशिक्षितास्त्रविद्योत्कर्षदर्शनाद् गुणोत्कर्षस्याश्रयाधीनत्वमवगतवानित्यर्थः। गुणप्रकर्षस्याधारवशत्वज्ञाने वीर्यावधूत इति पदार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गम्॥ १८॥

यस्मिन्ननैश्वर्यकृतव्यलीकः पराभवं प्राप्त इवान्तकोऽपि।

धुन्वन्धनुः कस्य रणे न कुर्यान्मनो भयैकप्रवणं स भीष्मः॥ १९॥

अन्वयः—यस्मिन्, अनैश्वर्यकृतव्यलीकः, अन्तकः, अपि, पराभवं, प्राप्तः, इव, सः, भीष्म, रणे, धनुः, धुन्वन्, कस्य, मनः, भयैकप्रवणं, न, कुर्यात्? ॥ १९॥

(म०) *यस्मिन्निति। यस्मिन्भीष्मे विषये।* अनीश्वरस्य भावोऽनैश्वर्यमसामर्थ्यम्। 'नञ शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्' इति विकल्पान्नञ पूर्वपदवृद्ध्यभाव। तेन कृतव्यलीको जनितवैलक्ष्यः। 'दुःखे वैलक्ष्ये व्यलीकम्' इति यादवः। अन्तकोऽपि यमोऽपि पराभवं प्राप्त इव। भीष्मस्येच्छामरणत्वादन्तकोऽपि पराजित इवास्ते, किमुतान्य इति भाव। स भीष्मो रणे धनुर्धुन्वन्कम्पयन्कस्य मनो भयैकप्रवणं भयएकप्रवणमेकोन्मुखम्। शिवभागवतवत्समासः। न कुर्यात्। सर्वस्यापि मनसि भयं-कुर्यादेवेत्यर्थः॥ १९॥

(भा०) यस्मिन्निति। यस्मिन् भीष्मविषये, अनैश्वर्यकृतव्यलीकोऽशक्तिजनितवैलक्ष्य, अन्तको यमोऽपि पराभवं पराजयं प्राप्त इव (आस्त इति शेषः)। स-भीष्मः, रणे संग्रामे धनुश्चापं धुन्वन् कम्पयन् कस्य जनस्य मनश्चित्तं भयैकप्रवणं ससाध्वसं न कुर्याद् न विदध्याद्, अपि तु सर्वस्यापि। अन्तकस्याप्यभिभावयिता भीष्मो-रणे धनुर्द्धर सन् सर्वेषां मनसि भयं कुर्यादेवेत्यर्थः। नहि भीष्मो जेतुं शक्यते कैश्चिदिति भावः। पूर्वार्द्धे-उत्प्रेक्षाऽलङ्कार। परार्द्धे मनसो भयैकप्रवणत्वविधाने धनुर्धुन्वत्त्यस्य विशेषणगत्या हेतुत्वात्पदार्थहेतुकं काव्यलिङ्गमित्युभयो संसृष्टिः॥ १९॥

सृजन्तमाजाविषुसंहतीर्वः सहेत कोपज्वलितं गुरुं कः॥

परिस्फुरल्लोलशिखाऽग्रजिह्वं जगज्जिघत्सन्तमिवान्तवह्निम्॥२०॥

अन्वयः—आजौ, इषुसंहतीः, सृजन्तं, कोपज्वलितं, परिस्फुरल्लोलशिखाऽग्रजिह्वं, जगद्, जिघत्सन्तम्, अन्तवह्निम्, इव, गुरुम्, व, कः, सहेत॥ २०॥

(म०) सृजन्तमिति॥ आजौ रण इषुसंहतीर्बाणसङ्घान्सृजन्तं वर्षन्तं कोपज्वलितमत एव परिस्फुरन्त्यो लोलाश्च शिखाऽग्राण्येव जिह्वा यस्य तं तथोक्तं। जग-

लोकं जिघत्सन्तमत्तुमिच्छन्तम् । अदेः सन्नन्ताच्छतृप्रत्ययः । 'लुङ्सनोर्घस्लृ' इति घस्लादेशः । अन्तवह्निं कालाग्निमिव स्थितं गुरुं द्रोणं वो युष्माकं मध्ये कः सहेत सोढुं शक्नुयात् । न कोऽपीत्यर्थः । 'शकि लिङ् च' इति शक्यार्थे लिङ् ॥ २० ॥

(भा०) सृजन्तमिति । आजौ संग्रामे, इषुसंहतीः शरसमूहान् सृजन्तं वर्षन्तं कोपज्वलितं क्रोधप्रदीप्तम् अत एव परिस्फुरल्लोलशिखाऽग्रजिह्वं दीप्यमानचपलज्वालाऽग्ररसनम् अत एव जगज्जिघत्सन्तं लोकमत्तुमिच्छन्तम् अन्तवह्निं प्रलयानलम् (कालाग्निम्) इव स्थितं गुरुं द्रोणाचार्यं वो युष्माकं मध्ये कः सहेत न कोऽपीत्यर्थः । नहि द्रोणं पराजेतुं शक्नोति कश्चिदिति भावः । अत्रोत्प्रेक्षाऽलङ्कारः ॥ २० ॥

निरीक्ष्य संरम्भनिरस्तधैर्यं राधेयमाराधितजामदग्न्यम् ।
असंस्तुतेषु प्रसभं भयेषु जायेत मृत्योरपि पक्षपातः ॥ २१ ॥

अन्वयः—संरम्भनिरस्तधैर्यम्, आराधितजामदग्न्यं, राधेयं, निरीक्ष्य, मृत्योः, अपि, असंस्तुतेषु, भयेषु, प्रसभं, पक्षपातः, जायेत ॥ २१ ॥

(म०) निरीक्ष्येति ॥ संरम्भेण कोपेन निरस्तं त्याजितं धैर्यं निर्विकारचित्तत्वं येन तं तथोक्तम् । आटोपेनैव परधैर्यापहारिणमित्यर्थः । आराधितजामदग्न्यं शुश्रूषितभार्गवम् । जामदग्न्यादधिगतास्त्ररहस्यमित्यर्थः । राधेयं राधासुतं कर्णम् । 'स्त्रीभ्यो ढक्' । निरीक्ष्य मृत्योरप्यसंस्तुतेष्वपरिचितेषु । 'संस्तवः स्यात्परिचय' इत्यमरः । भयेषु प्रसभं पक्षपातः परिचयो जायेत । मृत्युरप्यस्माद्बिभीयात्किमुतान्य इति भावः । संभावनायां लिङ् । अत्र जनिक्रियाऽपेक्षया समानकर्तृकत्वाभावेऽपि पक्षपातक्रियाऽपेक्षया तत्सम्भवान्निरीक्ष्येति ल्यब्निर्देशः समर्थनीयः । 'प्रधानोपसर्जनभावस्त्वप्रयोजकः' इति व्यक्तिविवेककारः । अत्र भयसम्बन्धरहितस्य मृत्योर्भयसम्बन्धाभिधानादसम्बन्धे सम्बन्धरूपाऽतिशयोक्तिरलङ्कारः ॥ २१ ॥

(भा०) निरीक्ष्येति ॥ संरम्भनिरस्तधैर्यं कोपत्याजितनिर्विकारचित्तत्वम् (आकृत्याऽन्यधैर्यविलोपिनम्) आराधितजामदग्न्यं सेवितपरशुरामं राधेयं राधासुतं कर्णं निरीक्ष्य विलोक्य मृत्योर्यमस्यापि, असंस्तुतेष्वपरिचितेषु भयेषु साध्वसेषु प्रसभं हठात् पक्षपातः परिचयो जायेतोत्पद्येत । मृत्योरपि भयप्रदः कर्णो न शक्यते जेतुं कैश्चिदिति भावः । मृत्यौ भीतेरसम्बन्धेऽपि सम्बन्धोक्त्याऽसम्बन्धे सम्बन्धरूपाऽतिशयोक्तिरलङ्कारः ॥ २१ ॥

अथानन्तरं करणीयमागमनप्रयोजनं च युग्मेनाह—

यया समासादितसाधनेन सुदुश्चरामाचरता तपस्याम् ।
एते दुरापं समवाप्य वीर्यमुन्मूलितारः कपिकेतनेन ॥ २२ ॥

अन्वयः—यया, सुदुश्चरां, तपस्याम्, आचरता, समासादितसाधनेन, कपिकेतनेन, दुरापं, वीर्यं, समवाप्य, एते, उन्मूलितारः ॥ २२ ॥

(म०) ययेति । यया विद्यया करणेन सुदुश्चरामतिदुष्करां तपस्यां तपश्चर्याम् । 'कर्म्मणो रोमन्थतपोभ्यां वर्त्तिचरो' इति क्यङ् । 'अप्रत्ययात्' इति स्त्रियामप्रत्ययः । आचरता । पशुपतिं प्रति तपः कुर्वतेत्यर्थः । अत एव समासादितं प्राप्तं साधनं पाशुपतास्त्ररूपं येन तेन । कपिर्हनुमान्केतनं चिह्नं यस्य तेन । अर्जुनेनेत्यर्थः । दुरापमन्यस्य दुर्लभं वीर्यं तेजः समवाप्य । एते पूर्वोक्ता भीष्मादय उन्मूलितार उन्मूलयिष्यन्ते । उन्मूलयतेर्ण्यन्तात्कर्मणि लुट् । अत्र चिण्वदिडागमेऽपि तस्य 'असिद्धवदत्राभात्' इत्यसिद्धत्वाद् 'णेरनिटि' इति णिलोप । तन्निमित्तस्यैव 'अनिटि' इति निषेधाद् । उक्तं च—'चिण्वद् वृद्धिर्युक्च हन्तेश्च घत्वं, दीर्घश्चोक्तो यो मितां वा चिणीति । इट् चासिद्धस्तेन मे लुप्यते णि. नित्यश्चायं वल्निमित्तो विघाती' इति ॥ २२ ॥

(भा०) ययेति । यया विद्यया सुदुश्चरां कठिनां तपस्यां तपश्चर्याम् आचरता विदधता, अत एव समासादितसाधनेन प्राप्तपाशुपतास्त्रसाधनेन कपिकेतनेन हनुमच्चिह्नेन (अर्जुनेन) दुरापं दुर्लभं वीर्यं सामर्थ्यं समवाप्य प्राप्य, एते पूर्वोक्ता भीष्मप्रभृतयः, उन्मूलितारो विनाशयिष्यन्ते । शवप्रसादादधिगतशक्तिरर्जुनो भीष्मादीन् हनिष्यतीति भावः । अत्र वाक्यार्थहेतुकं काव्यलिङ्गम् ॥ २२ ॥

महत्त्वयोगाय महामहिम्नामाराधनीं तां नृप ! देवतानाम् ।
दातुं प्रदानोचित ! भूरिधाम्नीमुपागतः सिद्धिमिवास्मि विद्याम् ॥ २३ ॥

अन्वयः—नृप !, महत्त्वयोगाय, महामहिम्नां, देवतानाम्, आराधनीं, भूरिधाम्नीं, तां, विद्यां, सिद्धिम्, इव, प्रदानोचित !, दातुम्, उपागतः, अस्मि ॥ २३ ॥

(म०) महत्त्वेति । हे नृप ! महत्त्वयोगाय प्रकर्षलाभाय महामहिम्नां महानुभावानां देवतानामिन्द्रादीनाम् । आराध्यतेऽनयेत्याराधनी ताम् । प्रसादयित्रीमित्यर्थः । करणे ल्युट् । ङीप् । भूरिधाम्नीं महाप्रभावाम् । 'धाम देशे गृहे रश्मौ स्थाने जन्मप्रभावयोः' इति विश्वः । 'अन उपधालोपिनोऽन्यतरस्याम्' इति वा ङीप् । तां विद्यामिन्द्रमन्त्ररूपां सिद्धिं साक्षात्कार्यसिद्धिमिवेति विद्याया अमोघत्वोक्तिः । हे प्रदानोचित ! दानपात्रभूत ! । फलभोक्तृत्वादस्य पात्रत्वोक्तिः । दातुमुपागतोऽस्मि ॥ २३ ॥

(भा०) महत्त्वयोगेति । नृप ! हे राजन् ! महत्त्वयोगाय प्रकर्षलाभाय महामहिम्नां महानुभावानां देवतानाम् इन्द्रप्रभृतीनाम् आराधनीं शुश्रूषमाणां (प्रसादयित्रीं) भूरिधाम्नीं महाप्रभावां तां प्रसिद्धां विद्याम् इन्द्रमन्त्ररूपां सिद्धिं साक्षात्कार्यसिद्धिमिव हे प्रदानोचित ! दानपात्र ! दातुं वितरितुम् उपागतः प्राप्तोऽस्मि । जयार्थ-

मिन्द्रमन्त्ररूपां साक्षात्कार्यसिद्धिमिव विद्यां दातुमिहागतोऽस्मीत्यर्थः । अत्रोपमाऽलङ्कारः ॥ २३ ॥

इत्युक्तवन्तं व्रज साधयेति प्रमाणयन्वाक्यमजातशत्रोः ।
प्रसेदिवांसं तमुपाससाद वसन्निवान्ते विनयेन जिष्णुः ॥ २४ ॥

अन्वयः—इति, उक्तवन्तं, प्रसेदिवांसं, तं, जिष्णुः, व्रज, साधय, इति, अजातशत्रोः, वाक्यम्, प्रमाणयन्, अन्ते, वसन्, इव, विनयेन, उपाससाद ॥ २४ ॥

(म०) इतीति । इत्युक्तवन्तं प्रसेदिवांसं प्रसन्नम् । 'भाषायां सदवसश्रुव' इति क्वसुः । तं मुनिं जिष्णुर्जयनशीलोऽर्जुनः । 'ग्लाजिस्थश्च—' इति ग्स्नुप्रत्ययः । व्रज साधयानुतिष्ठेत्येवंरूपम् । अजातशत्रोर्धर्मराजस्य । स्वयमविद्वेषणशीलत्वादियं संज्ञा । वाक्यं प्रमाणयन् । तदादिष्ट· सन्नित्यर्थः । अन्ते वसंश्छात्त्र इव 'छात्त्रान्तेवासिनौ शिष्ये' इत्यमरः । विनयेनानौद्धत्येनोपाससाद समीपं प्राप ॥ २४ ॥

(भा०) इत्युक्तवन्तमिति । इतीत्थम् उक्तवन्तं कथितवन्तं प्रसेदिवांसं प्रसन्नं तं मुनिं (व्यासं) जिष्णुर्जयनशीलोऽर्जुनः कपिकेतन·, व्रज गच्छ साधय सम्पादय, इतीत्येवं रूपम् । अजातशत्रोर्युधिष्ठिरस्य वाक्यं वचनं प्रमाणयन् स्वीकुर्वन्, अन्ते वसंश्छात्र इव विनयेनानुद्धतत्वेन, उपाससादोपजगाम । श्रेष्ठजनवचनमङ्गीकुर्वन्, छात्रो गुरुमिव, अग्रजवचनमङ्गीकुर्वन्नर्जुनो व्यासमुपजगामेत्यर्थः । अत्रोपमाऽलङ्कारः ॥२४॥

निर्याय विद्याऽथ दिनादिरम्याद् बिम्बादिवार्कस्य मुखान्महर्षेः ।
पार्थाननं वह्निकणावदाता दीप्तिः स्फुरत्पद्ममिवाभिपेदे ॥ २५ ॥

अन्वयः—अथ, वह्निकणावदाता, विद्या, (कर्त्री), दिनादिरम्याद्, अर्कस्य, बिम्बाद्, इव, महर्षेः, मुखाद्, निर्याय, दीप्तिः, स्फुरत्, पद्मम्, इव, पार्थाननम्, अभिपेदे ॥२५।

(म०) निर्यायेति । अथ वह्निकणावदाता स्फुलिङ्गवदुज्ज्वला । देवतासान्निध्यादिति भावः । विद्येन्द्रमन्त्ररूपा । दिनादिरम्यादर्कस्य प्रभातभास्करस्य बिम्बादिव महर्षेर्व्यासस्य मुखान्निर्याय निर्गत्य । 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' । दीप्तिरर्कदीधिति । स्फुरद्विकसत्पद्ममिव । पार्थाननमर्जुनस्य मुखमभिपेदे प्रविष्टा ॥ २५ ॥

(भा०) निर्यायेति । अथ समीपगमनोत्तरं वह्निकणावदाता स्फुलिङ्गोज्ज्वला विद्येन्द्रमन्त्ररूपा दिनादिरम्यात् प्रभातमनोज्ञाद् अर्कस्य सूर्यस्य बिम्बाद् मण्डलाद् इव महर्षेर्व्यासस्य मुखाद् आस्याद् निर्याय निर्गत्य दीप्तिरर्कदीधिति· स्फुरद् विकसत् पद्मं कमलमिव।पार्थाननम् । अर्जुनमुखम् । अभिपेदे प्रविष्टा । सूर्यमण्डलाद्विनिर्गता दीप्तिर्यथा पद्मं प्रविशति तथा व्यासमुखाद्विनिर्गतेन्द्रमन्त्ररूपा विद्याऽर्जुनमुखं प्रविष्टेत्यर्थ· । अत्रोपमाद्वयम् ॥ २५ ॥

योगं च तं योग्यतमाय तस्मै तपःप्रभावाद्वितताार सद्यः ।
येनास्य तत्त्वेषु कृतेऽवभासे समुन्मिमीलेव चिराय चक्षुः ॥२६॥

अन्वय —(स मुनि.) योग्यतमाय, तस्मै, तं, योगं, च, तपःप्रभावात्, सद्यः, वितताार । येन, तत्त्वेषु, अवभासे, कृते, अस्य, चक्षुः, चिराय, समुन्मिमील, इव ॥ २६ ॥

(म०) योगं चेति । योग्यतमायार्हतमाय तस्मै पार्थाय तं वक्ष्यमाणमहिमानं योगं ध्यानविधिं च । 'योगः संनहनोपायध्यानसङ्गतियुक्तिषु' इत्यमर । तपःप्रभावात् सद्यो वितताार ददौ । चिरकालप्राह्यमर्पाति भाव. । येन योगेन तत्त्वेषु प्रकृतिमहदादिषु । तथा च । 'मूलप्रकृतिर्महानहङ्कारो मनश्च पञ्च कर्मेन्द्रियाणि पञ्च महाभूतानीति चतुर्विंशति तत्त्वानि । तत्रावभासे साक्षात्कारे कृते सत्यस्यार्जुनस्य चक्षुरक्षि चिराय समुन्मिमीलेवोन्मिषितमिवेत्युत्प्रेक्षा । तदा तस्य कोऽपि महानखिलाज्ञानभञ्जनस्तत्त्वावभासश्चिरादन्धस्य दृष्टिलाभ इवाभवदिति भाव ॥ २६ ॥

(भा०,) योगमिति । स मुनिः (व्यासः) योग्यतमायार्हतमाय तस्मै पार्थाय तं वक्ष्यमाणं योगं ध्यानविधिं च तपःप्रभावाद् अनुष्ठानसामर्थ्यात् सद्यस्तत्क्षणं वितताार ददौ । येन योगेन तत्त्वेषु चतुर्विंशतिसंख्यकेषु प्रकृतिमहदादिषु, अवभासे साक्षात्कारे कृते सति, अस्यार्जुनस्य चक्षुर्नेत्रं चिराय चिरकालं समुन्मिमीलेव = उन्मिषितमिव । अन्धस्य दृष्टिलाभ इव पार्थस्य कोऽप्यज्ञाननिवर्त्तकस्तत्त्वावभासोऽभवदिति भावः । अत्रोत्प्रेक्षाऽलङ्कारः ॥ २६ ॥

आकारमाशंसितभूरिलाभं दधानमन्तःकरणानुरूपम् ।
नियोजयिष्यन्विजयोदये तं तपःसमाधौ मुनिरित्युवाच ॥ २७ ॥

अन्वयः—आशंसितभूरिलाभम्, अन्त करणानुरूपम्, आकारं, दधानं, तं, मुनि, विजयोदये, तपःसमाधौ, नियोजयिष्यन्, इति, उवाच ॥ २७ ॥

(म०) आकारमिति । आशंसित आख्यातो भूरिलाभोऽनेकश्रेयःप्राप्तिर्येन तं तथोक्तम् । महाभाग्यसूचकमित्यर्थः । अन्त करणशब्देन तद्वृत्तिरुत्साहो लक्ष्यते । तदनुरूपं तदनुकूलम् । उत्साहानुगुणव्यापारक्षममित्यर्थ । आकारं मूर्त्ति दधानं तमर्जुनं मुनिर्विजयोदये विजयफलके तपःसमाधौ तपोनियमे । 'समाधिर्नियमे ध्याने नीवाके च समर्थने' इति विश्वः । नियोजयिष्यन् नियोजयितुमिच्छन्नित्यर्थः । 'लृट् शेषे च' इति लृट् । 'लृटः सद्वा' इति सत्प्रत्ययः । इति वक्ष्यमाणमुवाच ॥ २७ ॥

(भा०) आकारमिति । आशंसितभूरिलाभं कथितानेककल्याणाधिगमम् (महाभाग्यसूचकम्) अन्तःकरणानुरूपम् उत्साहानुकूलव्यापारयोग्यम् आकारं स्वरूपं दधानं धारयन्तं तम् अर्जुनम् । मुनिर्व्यासो विजयोदये विजयफलके तपःसमाधौ तपोनियमे नियोजयिष्यन् नियोजयितुमिच्छन्, इति वक्ष्यमाणं (वचनम्) उवाच जगाद ।

विजयफलकतपश्चरणेऽर्जुनं प्रवर्त्तयन् मुनिर्वक्ष्यमाणं वचो जगादेत्यर्थः। विजयफलके तपःसमाधावर्जुननियोजने पूर्वार्द्धगतपदार्थस्य हेतुत्वात्पदार्थहेतुकं काव्यलिङ्गम् ॥२७॥

अनेन योगेन विवृद्धतेजा निजां परस्मै पदवीमयच्छन् ।
समाचराचारमुपात्तशस्त्रो जपोपवासाभिषवैर्मुनीनाम् ॥ २८ ॥

अन्वयः—अनेन, योगेन, विवृद्धतेजा., निजां, पदवीं, परस्मै, अयच्छन्, उपात्तशस्त्रः, (सन्) जपोपवासाभिषवैः, मुनीनाम्, आचारं, समाचर ॥ २८ ॥

(म०) अनेनेति। अनेन स्वोपदिष्टेन योगेन विवृद्धतेजा निजां पदवीं परस्मा-अयच्छन्। परस्य प्रवेशमयच्छन्नित्यर्थः। उपात्तशस्त्रो निगृहीतायुधः सन्। जपोपवा-साभिषवैः स्वाध्यायानशनस्नानैर्मुनीनामाचारं समाचरानुतिष्ठ ॥ २८ ॥

(भा०) अनेनेति। अनेन मुन्युक्तेन योगेन तपश्चर्यया विवृद्धतेजाः प्राप्तोत्कृष्ट-दीप्तिः, निजां स्वकीयां पदवीं मार्गं, परस्मै = अन्यस्मै, अयच्छन्नददत् उपात्तशस्त्रो-गृहीतायुधः सन्, जपोपवासाभिषवैः स्वाध्यायानशनस्नानैः, मुनीनां तपस्विनाम् आचारं व्यवहारं समाचरानुतिष्ठ। यथा मुनयो ध्यानेन विधिना च तपश्चरन्ति तथा त्वमपि तपश्चरेति वचो व्यासो जगादेति भावः। त्वं मुनिरिव तपश्चरेत्यर्थस्य फलित-त्वादार्थीयमुपमा ॥ २८ ॥

क्षेत्रविशेषे तपःसिद्धिरित्याशयेन तं निदर्शयन्नाह—

करिष्यसे यत्र सुदुश्चराणि प्रसत्तये गोत्रभिदस्तपांसि ।
शिलोच्चयं चारुशिलोच्चयं तमेष क्षणान्नेष्यति गुह्यकस्त्वाम् ॥२९॥

अन्वयः—यत्र, गोत्रभिदः, प्रसत्तये, सुदुश्चराणि, तपांसि, करिष्यसे, चारुशिलो-च्चयं, तं, शिलोच्चयम, त्वाम्, एषः, गुह्यकः, क्षणात्, नेष्यति ॥ २९ ॥

(म०) करिष्यस इति। यत्र शिलोच्चये गोत्रभिद इन्द्रस्य प्रसत्तये प्रसादाय सुदुश्चराणि तपांसि करिष्यसे चारुशिलोच्चयं रम्यशिखरं तं शिलोच्चयं गिरिमिन्द्र-कीलरूपम्। 'अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः' इत्यमरः। त्वामेष गुह्यको-यक्षः। अनन्तरमेवास्य पुरःप्रादुर्भावादेष इति निर्देशः। क्षणान्नेष्यति प्राप-यिष्यति ॥ २९ ॥

(भा०) करिष्यस इति। यत्र यस्मिन् शिलोच्चये पर्वते गोत्रभिद इन्द्रस्य प्रस-त्तये प्रसन्नतार्थं सुदुश्चराण्यतिदुष्कराणि तपांसि नियमान् करिष्यसे विधास्यसे चारु-शिलोच्चयं प्रशस्तशृङ्गं तं शिलोच्चयं पर्वतम् (इन्द्रकीलम्) त्वां भवन्तम् एष गुह्यको-यक्षः क्षणात् शीघ्रं नेष्यति प्रापयिष्यति। उत्तमस्थाने तपःसिद्धिरवश्यंभावी-त्येष यक्षो भवन्तं तपश्चरणस्थानं प्रापयिष्यतीत्यर्थः। अनुप्रासकाव्यलिङ्गयोः संसृष्टिः ॥ २९ ॥

इति ब्रुवाणेन महेन्द्रसूनुं महर्षिणा तेन तिरोबभूवे।
तं राजराजानुचरोऽस्य साक्षात्प्रदेशमादेशमिवाधितष्ठौ ॥ ३० ॥

अन्वय.—इति, महेन्द्रसूनुम्, ब्रुवाणेन, तेन, महर्षिणा, तिरोबभूवे, राजराजानुचरः, अस्य, आदेशम्, साक्षाद्, इव, तं, प्रदेशम्, अधितष्ठौ ॥ ३० ॥

(म०) इतीति। इतीत्थं महेन्द्रसूनुमर्जुनं ब्रुवाणेनोक्तवता। 'वर्त्तमानसामीप्ये' इति भूते वर्त्तमानवत्प्रत्ययस्तिरोधानस्याविलम्बसूचनार्थं। तेन महर्षिणा तिरोबभूवेऽन्तर्दधे। भावे लिट्। राजराजो यक्षराज। 'राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयो' इति विश्व। तस्यानुचर पूर्वोक्तयक्षोऽस्य मुनेरादेशं साक्षादिव तं प्रदेशमर्जुनाधिष्ठितस्थानमधितष्ठौ। प्राप्त इत्यर्थ। 'स्थादिष्वभ्यासेन चाभ्यासस्य' इति षत्वम् ॥ ३० ॥

(भा०) इतीति। इतीत्थं महेन्द्रसूनुम् अर्जुनं प्रति ब्रुवाणेनोक्तवता तेन पूर्वोक्तेन महर्षिणा व्यासेन तिरोबभूवेऽन्तर्दधे राजराजानुचरः कुबेरभृत्यो यक्षः, अस्य मुनेरादेशम्। साक्षादिव तम् अर्जुनाधिष्ठितं प्रदेशम् स्थानम् अधितष्ठौ प्राप। शान्तवचसाऽर्जुनमादिश्य गते मुनौ यक्षोऽर्जुनमुपजगामेत्यर्थ। अत्रोत्प्रेक्षाऽलङ्कारः ॥३०॥

कृतानतिर्व्याहृतसान्त्ववादे जातस्पृहः पुण्यजनः स जिष्णौ।
इयाय सख्याविव सम्प्रसादं विश्वासयत्याशु सतां हि योगः ॥३१॥

अन्वयः—सः, पुण्यजन, कृतानतिः, जातस्पृहः, व्याहृतसान्त्ववादे, जिष्णौ, सख्यौ, इव, संप्रसादम्, इयाय, हि, सतां, योग, आशु, विश्वासयति ॥ ३१ ॥

(म०) कृतेति। स पुण्यजनो यक्षः कृतानति· कृतप्रणामः सन्, व्याहृतसान्त्ववादे=उक्तप्रियवचने। 'व्याहार उक्तिर्लपितम्' इत्यमरः। जिष्णावर्जुने जातस्पृहो जातानुरागः सन्। सख्यौ सुहृदीव। 'अथ मित्रं सखा सुहृद्' इत्यमरः। संप्रसादं विस्रम्भमियाय प्राप। तथा हि—सतां साधूनां योगः संगतिराशु विश्वासयति विश्वासं जनयति हि। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यास· ॥ ३१ ॥

(भा०) कृतानतिरिति। स पुण्यजनो यक्ष कृतानतिः कृतप्रणामो जातस्पृह उत्पन्नवाञ्छः सन्, व्याहृतसान्त्ववादे=उक्तप्रियवचने, जिष्णौ=अर्जुने, सख्यौ सुहृदीव सम्प्रसादं प्रसन्नताम् इयाय प्राप। हि यतः सतां साधूनां योगः सम्बन्धः, आशु शीघ्रं विश्वासयति विश्वासं जनयति। साधावाशु विश्वासोद्भवादागतो यक्षोऽर्जुनं प्रणम्य तत्र मित्रत्वमङ्गीचकारेत्यर्थः। तुर्यपादगतेन सतां योगो द्रुतं विश्वासजनक इति सामान्यार्थेन पादत्रयगतविशेषार्थस्य समर्थनात्सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ३१ ॥

अथोष्णभासेव सुमेरुकुञ्जान्विहीयमानानुदयाय तेन ।
बृहद्द्युतीन्दुःखकृतात्मलाभं तमः शनैः पाण्डुसुतान्प्रपेदे ॥ ३२ ॥

अन्वयः—अथ, उष्णभासा, उदयाय, विहीयमानान्, बृहद्द्युतीन्, सुमेरुकुञ्जान्, इव, तेन, (उदयाय, विहीयमानान्, बृहद्द्युतीन्) पाण्डुसुतान्, दुःखकृतात्मलाभं, तमः, शनैः, प्रपेदे ॥ ३२ ॥

(म०) अथेति । अथोष्णभासा सूर्येणोदयाय पुनरुद्गमाय विहीयमानांस्त्यज्यमानानिति तमःप्राप्तिकारणोक्तिः । बृहद्द्युतीन् सौवर्णत्वाद्दीप्यमानानित्यर्थः । इति तमसः संकोचकारणोक्तिः । सुमेरुकुञ्जानिव । अत्र सुमेरुग्रहणं कुञ्जानां सौवर्णत्वद्योतनार्थम् । तेनार्जुनेनोदयाय श्रेयसे विहीयमानान्बृहद्द्युतीननेकबुद्धिप्रकाशान् । पूर्ववद्विशेषणद्वययोजनमनुसंधेयम् । पाण्डुसुतान् । चतुर इति शेषः । दुःखेन कृच्छ्रेण कृत उपपादित आत्मलाभ उत्पत्तिर्यस्य तत्तथोक्तम् । तेषां विवेकित्वात्कथं चिल्लब्धोदयमित्यर्थः । तम शोकोऽन्धकारश्च । 'तमोऽन्धकारे स्वर्भानौ तमः शोके गुणान्तरे' इत्युभयत्रापि विश्वः । शनैर्मन्दं प्रपेदे । तेषां विवेकित्वाद्भीतभीतमिवेति भाव । अत्र तमःशब्दस्य श्लिष्टत्वाच्छ्लेषानुप्राणितेयमुपमा ॥ ३२ ॥

(भा०) अथोष्णभासेवेति । अथानन्तरम्, उष्णभासा सूर्येणोदयाय पुनरुद्गमाय विहीयमानान् संत्यज्यमानान् बृहद्द्युतीन् देदीप्यमानान् सुमेरुकुञ्जान् मेरुलतागृहान् इव तेनार्जुनेन, उदयाय कल्याणाय विहीयमानान् अर्जुनविरहितान् बृहद्द्युतीन् विशिष्टतेजोवतः पाण्डुसुतान् युधिष्ठिरप्रभृतीन् (चतुरो भ्रातॄन्) दुःखःकृतात्मलाभं-कष्टोपपादितात्मोत्पत्ति तमोऽन्धकारः शोकश्च शनैः क्रमतः प्रपेदे प्राप । यथा सूर्यपरित्यक्तं मेरुकुञ्जं तम प्राप्नोति तथाऽर्जुनविरहितान् युधिष्ठिरादीन्, तम · शोकः प्रापेत्यर्थः । तमश्शब्दस्य श्लिष्टत्वाच्छ्लेषानुप्राणितोपमाऽलङ्कार ॥ ३२ ॥

असंशयालोचितकार्यनुन्नः प्रेम्णा समानीय विभज्यमानः ।
तुल्याद्विभागादिव तन्मनोभिर्दुःखातिभारोऽपि लघुः स मेने॥३३॥

अन्वय.—असंशयालोचितकार्यनुन्नः, प्रेम्णा, समानीय, विभज्यमान , स , दुःखातिभारः, अपि, तन्मनोभि , तुल्याद्, विभागाद्, इव, लघुः, मेने ॥ ३३ ॥

(म०) असंशयेति । असंशयमसंदिग्धं यथा तथाऽऽलोचितं विवेचितं यत्कार्यं तेन नुन्नो निरस्त इति लघुत्वहेतूक्तिः । 'नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्' इति निष्ठानत्वम् । कार्यगौरवमालोच्य निरस्त इत्यर्थः । तथाऽपि प्रेम्णा भ्रातृवात्सल्येन कर्त्रा समानीय पुनराकृष्य विभज्यमानः समशोकभागी क्रियमाणः । तुल्येन प्रेम्णा तुल्यदुःखत्वं भवतीति भाव । स पूर्वोक्तो दुःखमेवातिभारोऽपि । अतिभारभूतमपि दुःखमित्यर्थः । तन्मनोभिस्तेषां चतुर्णां पार्थानां मनोभिस्तुल्याद्विभागादिव । पूर्वो-

न्तात्प्रेमकृतात् समविभागादिवेत्यर्थः। वस्तुतस्तु विवेकादेवेति भावः। पुनर्विभागग्रहणं तस्य हेतुत्वोत्प्रेक्षाऽर्थमनुवादाददोषः। लघुमेने मतः। यथैकोऽनेकधा विभज्य बहुभिरुह्यमानो महानपि भारो लघुर्मन्यते तद्वदित्यर्थः॥ ३३॥

(भा०) असंशयेति। असंशयालोचितकार्यनुन्नोऽसन्दिग्धविचारितकार्यैर्निरस्तः, तथाऽपि प्रेम्णा भ्रातृस्नेहेन (कर्त्रा) समानीय पुनराकृष्य विभज्यमानः समशोकभागीक्रियमाणः स दुःखातिभारोऽपि तन्मनोभिर्युधिष्ठिरादिमानसैः, तुल्याद्विभागादिव पूर्वोक्तात्प्रेमकृतात्समविभागादिव लघुर्मेनेऽमानि। यथैको बहुधा विभज्य बहुभिरुह्यमानो विशिष्टोऽपि भारो लघुर्मन्यते लोकैस्तथाऽर्जुनेनापि विभज्य भ्रातृभिरुह्यमानो दुःखातिभारो लघुर्मेने–इत्यर्थः। तुल्याद्विभागादिवेति हेतुत्वोत्प्रेक्षणादत्र हेतूत्प्रेक्षाऽलङ्कारः॥ ३३॥

अथैवं प्रेम्णाऽऽकृष्यमाणमपि शोकं विवेको निर्जिगायेत्याह—

धैर्येण विश्वास्यतया महर्षेस्तीव्रादरातिप्रभवाच्च मन्योः।
वीर्यं च विद्वत्सु सुते मघोनः स तेषु न स्थानमवाप शोकः॥३४॥

अन्वयः—धैर्येण,, महर्षेः, विश्वास्यतया, अरातिप्रभवात्, तीव्राद्, मन्योः, (हेतो) मघोनः, सुते, वीर्यं, च, विद्वत्सु, तेषु, सः, शोकः, स्थानं, न, अवाप॥ ३४॥

(म०) धैर्येणेति। धैर्येण तेषां निसर्गतो निर्विकारचित्तत्वेन तथा महर्षेर्व्यासस्य। प्रवर्त्तकस्येति शेषः। विश्वास्यतया। श्रद्धेयवचनत्वेनेत्यर्थः। अरातिप्रभवादरातिहेतुकात्तीव्राद् दुःसहान्मन्योः क्रोधाद्धेतोस्तथाऽर्जुनप्रभावपरिज्ञानाच्चेति हेत्वन्तरं विशेषणमुखेनाह–मघोनः सुतेऽर्जुने वीर्यं च। 'न लोक—'इत्यादिना षष्ठीप्रतिषेधः। विद्वत्सु। ज्ञातवत्स्विति यावत्। 'विदेः शतुर्वसुः' इति वैकल्पिको वस्वादेशः। तेषु पार्थेषु स शोकः स्थानं स्थितिं नावाप न प्राप॥ ३४॥

(भा०) धैर्येणेति। धैर्येण स्वाभाविकविकारशून्यमानसत्वेन (तथा) महर्षेर्व्यासस्य विश्वास्यतया श्रद्धेयवचनत्वेन (तथा) अरातिप्रभवाद् शत्रुनिमित्तकात् तीव्राद् दुःसहाद् मन्योः क्रोधात् (तथा) मघोनः शक्रस्य सुते तनुजे (अर्जुने) वीर्यं पराक्रमञ्च विद्वत्सु ज्ञातवत्सु (अर्जुनप्रभावपरिज्ञानाच्चेतिहेतोरित्यर्थः) तेषु युधिष्ठिरप्रभृतिषु स शोकः स्थानं स्थितिं नावाप न प्राप। नहि ज्ञानिनः शोकोऽतिक्राम्यतीति भावः। पार्थेषु शोकस्थित्यलाभेऽनेकहेत्वभिधानादत्र हेत्वलङ्कारः॥ ३४॥

तान् भूरिधाम्नश्चतुरोऽपि दूरं विहाय यामानिव वासरस्य।
एकौघभूतं तदशर्म कृष्णां विभावरीं ध्वान्तमिव प्रपेदे॥ ३५॥

अन्वयः—तद्, अशर्म, भूरिधाम्नः, चतुरः, तान्, अपि, वासरस्य, (भूरिधाम्नः,

चतुरः,) यामान्, इव, दूरं, विहाय, एकौघभूतं, (सत्, कृष्णां) विभावरीम्, ध्वान्तम्, इव, कृष्णां, प्रपेदे ॥ ३९ ॥

(म०)तानिति। तत्पार्थांस्त्यक्त्वच्छर्म सुखम्। 'शर्मशातसुखानि च' इत्यमरः। तद्विरुद्धमशर्म दुःखम्। 'नञ्' इति नञ्समासः। भूरिधाम्नोऽतितेजस्विन इति हानिहेतुत्वोक्तिः। चतुरस्तान्पार्थानपि वासरस्य भूरिधाम्नश्चतुरो यामान्प्रहरानिव। दूरं विहाय त्यक्त्वैकौघभूतमेकराशिभूतं सत्। 'श्रेण्यादयः कृतादिभिः' इत्यर्थं कर्मधारयः, 'श्रेण्यादिराकृतिगणः' इति शाकटायनः। कृष्णां विभावरीं कृष्णपक्षरात्रिं ध्वान्तमिव। कृष्णां द्रौपदीं प्रपेदे प्राप ॥ ३९ ॥

(भा०) तानिति। तत् त्यक्तपार्थमशर्म दुःख भूरिधाम्नो बहुतेजस्विनश्चतुरश्चतुःसंख्यकान्, तान् पार्थान् (युधिष्ठिरादीन्) वासरस्य दिवसस्य भूरिधाम्नोऽतितेजस्विनश्चतुरश्चतुःसंख्यकान् यामान् प्रहरानिव दूरं विहाय त्यक्त्वा, एकौघभूतम् एकराशिभूतं सत् कृष्णां विभावरीं कृष्णपक्षरात्रिं ध्वान्तं तम इव कृष्णां द्रौपदीं प्रपेदे प्राप। यथा ध्वान्तमह्नश्चतुरः प्रहरान् विहाय कृष्णपक्षरात्रिमाश्रयति तथा शोकश्चतुरः पार्थान् विहाय द्रौपदीमाशिश्रायेत्यर्थः। अत्रोपमाऽलङ्कारः ॥ ३९ ॥

तुषारलेखाऽऽकुलितोत्पलाभे पर्यश्रुणी मङ्गलभङ्गभीरुः।
अगूढभावाऽपि विलोकने सा न लोचने मीलयितुं विषेहे ॥३६॥

अन्वयः—सा, (द्रौपदी) विलोकने, अगूढभावा, अपि, मङ्गलभङ्गभीरुः, पर्यश्रुणी, तुषारलेखाऽऽकुलितोत्पलाभे, लोचने, मीलयितुं, न, विषेहे ॥ ३६ ॥

(म०) तुषारेति। सा द्रौपदी विलोकनेऽर्जुनावलोकनेऽगूढभावाऽगूढाभिप्रायाऽपि। स्फुटाभिलाषिणीति यावत्। 'भावो लीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुषु' इति वैजयन्ती। मङ्गलभङ्गभीरुर्मङ्गलहानेर्भीता सती। पर्यश्रुणी परिगताश्रुके। *बाष्पावृते—इत्यर्थः। अत एव तुषारलेखाऽऽकुलितोत्पलाभे हिमबिन्दुसहितेन्दीवरसं*नीभे-इत्युपमाऽलङ्कारः। लोचने मीलयितुं न विषेहे न शशाक। अश्रुणो दृष्ट्यावरकत्वेऽपि तन्निपातस्यामङ्गलत्वात्तन्निवर्त्तकं निमीलनं सा न चकारेत्यर्थः ॥ ३६ ॥

(भा०) तुषारलेखेति। सा द्रौपदी विलोकनेऽर्जुनेक्षणे, अगूढभावाऽगुप्ताभिप्रायाऽपि (स्फुटाभिलाषिणी) मङ्गलभङ्गभीरुर्मङ्गलहानिभीता सती पर्यश्रुणी बाष्पावृते—अत एव तुषारलेखाऽऽकुलितोत्पलाभे हिमबिन्दुसहितेन्दीवरसदृशे लोचने नेत्रे मीलयितुं सम्पुटीकर्त्तुं न विषेहे न शशाक। अर्जुनेक्षणेऽश्रुणोऽधिकत्वेऽपि मङ्गलभङ्गभिया तत्पतनोत्पादकनिमीलनं न कृतवतीत्यर्थः। प्रथमपादे लुप्तोपमा। पादत्रये लोचनामीलने मङ्गलभङ्गभीरुरित्यस्य विशेषणगत्या हेतुत्वात्पदार्थहेतुकं काव्यलिङ्गञ्चेति द्वयोः साङ्कर्यम् ॥ ३६ ॥

अकृत्रिमप्रेमरसाभिरामं रामाऽर्पितं दृष्टिविलोभि दृष्टम् ।
मनःप्रसादाञ्जलिना निकामं जग्राह पाथेयमिवेन्द्रसूनुः ॥ ३७ ॥

अन्वयः—इन्द्रसूनुः, अकृत्रिमप्रेमरसाभिरामं, रामाऽर्पितं, दृष्टिविलोभि, दृष्टं, मनःप्रसादाञ्जलिना, पाथेयम्, इव, निकामं, जग्राह ॥ ३७ ॥

(म०) अकृत्रिमेति । इन्द्रसूनुरर्जुनः । क्रियया निर्वृत्तः कृत्रिमः । 'ड्वितः क्त्रिः' इति क्त्रिः । 'क्त्रेर्मम्नित्यम्' इति मम्प्रत्ययः । तद्विरुद्धम् । प्रेमैव रसः । अकृत्रिमेण प्रेमरसेनाभिरामम् । अन्यत्र-प्रेमरसेन मधुरादिना चाभिरामम् । रामया रमण्याऽर्पितम् । दृष्टिं विलोभयतीति दृष्टिविलोभि । दृष्टिप्रियमित्यर्थः । दृष्टं दर्शनं 'नपुंसके भावे क्तः' । मनःप्रसादः । प्रसन्नं मन इत्यर्थः ।। सोऽञ्जलिरिवेत्युपमितसमासः । तेन मनःप्रसादाञ्जलिना । पथि साधु पाथेयं शम्बलमिव । 'पथ्यतिथिवसतिस्वपतेर्ढञ्' निकाममतिशयेन जग्राह । रामाऽर्पितं पाथेयं पथि क्षेमाय भवतीत्यागमः ॥ ३७ ॥

(भा०) अकृत्रिमेति । इन्द्रसूनुः शक्रपुत्रः (अर्जुनः) अकृत्रिमप्रेमरसाभिरामं-नैसर्गिकस्नेहात्मकरसातिमनोज्ञं रामाऽर्पितं रमणीप्रदत्तं दृष्टिविलोभि दृष्टिप्रियं दृष्टं-दर्शनं मनःप्रसादाञ्जलिना प्रसन्नमनोरूपाञ्जलिना (करणेन) अकृत्रिमप्रेमरसाभिरामं-स्वाभाविक मधुराद्यभिरामं रामाऽर्पितं रमणीप्रदत्तं दृष्टिविलोभि दृष्टिप्रियं पाथेयं-शम्बलमिव निकामम् अतिशयेन जग्राहोपाददौ । यथा पथिकः स्वाभाविकस्नेहेन स्त्रीप्रदत्तं सुन्दरं पाथेयमञ्जलिना गृह्णाति तथाऽर्जुनो नैसर्गिकस्नेहमतुलं चक्षुरानन्दजनकं-द्रौपदीदर्शनमञ्जलिसदृशप्रसन्नमनसा गृहीतवानित्यर्थः । तृतीयपादे लुप्तोपमा । चतुर्थपादे-उपमा । द्वयोः संसृष्टिः ॥ ३७ ॥

धैर्यावसादेन हृतप्रसादा वन्यद्विपेनेव निदाघसिन्धुः ।
निरुद्धबाष्पोदयसन्नकण्ठमुवाच कृच्छ्रादिति राजपुत्री ॥ ३८ ॥

अन्वयः—वन्यद्विपेन, हृतप्रसादा, निदाघसिन्धुः, इव, धैर्यावसादेन, (हृतप्रसादा,) राजपुत्री, निरुद्धबाष्पोदयसन्नकण्ठं, (यथा स्यात्तथा) कृच्छ्रात्, इति, उवाच ॥३८॥

(म०) धैर्येति । वन्यद्विपेन । वन्यग्रहणमुच्छृङ्खलत्वद्योतनार्थम् । निदाघसिन्धुर्ग्रीष्मनदीव । निदाघग्रहणं दौर्बल्यद्योतनार्थम् । धैर्यावसादेन धैर्यभ्रंशेन कर्त्रा हृतप्रसादा हृतनैर्मल्या । क्षोभं गमितेत्यर्थः । राजपुत्री क्षत्रियसुता द्रौपदी । अतः क्षात्रयुक्तमेव वक्ष्यतीति भावः । निरुद्धबाष्पोदयं संरुद्धरोदनं सन्नकण्ठं हीनस्वरम् । अथ तयोरुभयोः कृतबहुव्रीह्योः क्रियाविशेषणसमासः । कृच्छ्रात्कथं चिदिति वक्ष्यमाणमुवाच ॥ ३८ ॥

(भा०) धैर्यावसादेनेति । वन्यद्विपेनारण्यगजेन (अत्युच्छृङ्खलेन) हृतप्रसादा नाशितस्वच्छता निदाघसिन्धुर्ग्रीष्मनदी, इव धैर्यावसादेन धैर्यभ्रंशेन (कर्त्रा) हृतप्रसादा

दूरीकृतप्रसन्नता राजपुत्री नृपकन्या ।(द्रौपदी) निरुद्धबाष्पोदयसन्नकण्ठं संरुद्धरोदनहीनकण्ठस्वरं यथा तथा कृच्छ्रात् कष्टाद् इति वक्ष्यमाणं (वचनम्) उवाच जगाद । धैर्यच्युत्या संक्षुभिता द्रौपदी क्लेशाद् वक्ष्यमाणं । वचो जगादेत्यर्थः । अत्रोपमाऽलङ्कारः ॥ ३८ ॥

मग्नां द्विषच्छद्मनि पङ्कभूते सम्भावनां भूतिमिवोद्धरिष्यन् ।
आधिद्विषामा तपसां प्रसिद्धेरस्मद्विना मा भृशमुन्मनीभूः ॥३९॥

अन्वयः—पङ्कभूते , द्विषच्छद्मनि, मग्नां, सम्भावनाम्, भूतिम् , इव, उद्धरिष्यन्, (त्वम्) आधिद्विषां, तपसाम्, आ, (प्रसिद्धेः,)अस्मद्विना, भृशम्, मा, उन्मनीभूः ॥३९॥

(म०) मग्नामिति । पङ्कभूते पङ्कोपमिते । 'भूतं क्ष्माऽऽदौ पिशाचादौ न्याय्ये सत्योपमानयोः' इति विश्व. । द्विषच्छद्मनि शत्रुकपटे मग्नाम् । दुरुद्धरामित्यर्थः । संभावनां योग्यताम् ।'गौरवमिति यावत्। भूतिं संपदमिव । 'भूतिर्भस्मनि संपदि' इत्यमरः । उद्धरिष्यन् । उद्धारकस्त्वमिति शेषः । आधिद्विषां दुःखच्छिदां तपसामा प्रासद्धेः सम्यक्सिद्धिपर्यन्तमस्मद्विना । अस्माभिर्विनेत्यर्थः । 'पृथग्विना–' इत्यादिना विकल्पात्पञ्चमी । भृशं मोन्मनीभूः । अस्मद्विरहाद् दुर्मना मा भूरित्यर्थः । दौर्मनस्यस्य तपःपरिपन्थित्वादिति भाव । 'माङि–'इत्याशीरर्थे लुङ् । 'न माङ्योगे' इत्यडागमप्रतिषेधः । अनुन्मना उन्मनाः संपद्यमान उन्मनी । अभूततद्भावे च्विः । 'अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च' इति सकारलोप. । 'अस्य च्वौ' इतीकार ॥ ३९ ॥

(भा०) मग्नामिति। पङ्कभूते कर्दमसदृशे द्विषच्छद्मनि शत्रुव्याजे मग्नां पतितां-सम्भावनां योग्यतां भूतिं सम्पदमिव उद्धरिष्यन्नुद्धारक (त्वमिति शेषः) आधिद्विषां-मानसदु.खोच्छेतॄणां तपसां तपश्चर्याणाम् आ प्रसिद्धेः सिद्धिपर्यन्तम् अस्मद्विनाऽस्माभिर्विना भृशमतिशयम् मा उन्मनीभू, अन्यमनस्कः (दुर्मना.) न भवः। शत्रुव्याजेन च्युतां योग्यतां सम्पादयितुं कृतस्य तपसः फलोत्पत्तिपर्यन्तं मामन्तरेण न त्वया दुर्मनसा भाव्यमित्यर्थ. । अत्रोपमा ॥ ३९ ॥

अथानौत्सुक्यदार्ढ्यार्थं तस्य सर्वार्थसिद्धिनिदानत्वमाह—

यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्त्तितुं वा ।
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः ॥ ४० ॥

अन्वयः—यशः, अधिगन्तुम्, वा, सुखलिप्सया, (वा) मनुष्यसंख्याम्, अतिवर्त्तितुं, वा, अभियोगभाजां, निरुत्सुकानां , सिद्धि , समुत्सुका, इव, अङ्कम्, उपैति ॥४०॥

(म०) यश इति । यशोऽधिगन्तुम् । कीर्त्तिं लब्धुमित्यर्थः । सुखस्य लिप्सया लब्धुमिच्छया वा । मनुष्यसंख्यां मनुष्यगणनामतिवर्त्तितुमतिक्रमितुं वा । अमानुषंकर्म कर्तुं चेत्यर्थः । अभियोगभाजामभिनिवेशवतां निरुत्सुकानामनुत्सुकानाम् । अनु-

र्मनायमानानामित्यर्थः। सिद्धिः पूर्वोक्तं यशः सुखाद्यर्थसिद्धिश्च। समुत्सुकेवानुरक्त-कान्तेवाङ्कमुत्सङ्गमन्तिकं चोपैति। तस्मादस्मद्विरहदुःखमा तपःसिद्धेः सोढव्यमिति भावः॥ ४०॥

(भा०) यशोऽधिगन्तुमिति। यशोऽधिगन्तुं कीर्त्तिमादातुं वा सुखलिप्सया सुखेच्छया वा मनुष्यसंख्यां मनुष्यगणनाम् अतिवर्त्तितुम् अतिक्रमितुं वा। अभियोगभाजाम् अभिनिवेशवतां निरुत्सुकानाम् अदुर्मनायमानानाम् (पुंसाम्) सिद्धिः कीर्तिसुखाद्यर्थलाभः समुत्सुकाऽनुरागवती (नायिका) इव, अङ्कं क्रोडमुपैति प्राप्नोति। यथाऽनुरागवती नायिकाऽभिनिवेशवतां पुंसामङ्कमुपैति तथा कीर्त्तिसुखाद्यर्थलाभोऽभिनिवेशवतामदुर्मनायमानानामङ्कमुपैतीत्यर्थः। तपःसिद्धिपर्यन्तमस्मद्वियोगस्त्वया सोढव्य एवेति भावः। अत्रोपमाऽलङ्कारः॥ ४०॥

अथास्य मन्यूद्दीपनद्वारा तपःप्रवृत्तिं प्रथयितुमरिनिकारं तावच्चतुर्भिरुद्घाटयति—

लोकं विधात्रा विहितस्य गोप्तुं क्षत्रस्य मुष्णन् वसु जैत्रमोजः।
तेजस्वितायाः विजयैकवृत्तेर्निघ्नन्प्रियं प्राणमिवाभिमानम्॥ ४१॥

अन्वयः—विधात्रा, लोकं, गोप्तुं, विहितस्य, क्षत्रस्य, जैत्रम्, ओजः, वसु, मुष्णन्, विजयैकवृत्तेः, तेजस्वितायाः, प्रियं, प्राणम्, इव, अभिमानं, निघ्नन् (निकारः, त्वद्विना, मे, उपशुष्यद्, हृदयं, नवीकरिष्यति)॥ ४१॥

(म०) लोकमिति। विधात्रा ब्रह्मणा लोकं गोप्तुं विहितस्य सृष्टस्य क्षत्त्रस्य क्षत्त्रियजातेः सम्बन्धि। जयनशीलं जेतृ तदेव जैत्रम्। जेतृशब्दात्तृन्नन्तात् 'प्रज्ञादिभ्यश्च' इति स्वार्थेऽणप्रत्ययः। ओजो बलं दीप्तिर्वा। 'ओजो बले च दीप्तौ च' इति विश्वः। तदेव वसु धनमिति रूपकालङ्कारः। मुष्णन्नपहरन्। अरिनिराकृतस्य कुतः क्षात्त्रं तेज इति भावः। किञ्च विजयैकवृत्तेर्विजयैकजीवितायाः। 'क्षतिर्यस्य विजितव्यम्' इति स्मरणादिति भावः। 'वृत्तिर्वर्त्तनजीवने' इत्यमरः। तेजस्वितायाः, तेजस्विनामित्यर्थः। तेजःप्राधान्यद्योतनार्थं भावप्रधाननिर्देशः। प्रियं प्राणसममित्यर्थः। अभिमानमहंकारं निघ्नन् खण्डयन्। तेजस्विनां प्राणहानिप्राया मानहानिरिति भावः॥ ४१॥

(भा०) लोकमिति। विधात्रा ब्रह्मणा लोकं जनं गोप्तुं रक्षितुं विहितस्य सृष्टस्य क्षत्त्रस्य क्षत्त्रियजातेः (सम्बन्धि) जैत्रं जयनशीलम् ओजः सामर्थ्यं वसु धनम् (ओजोरूपं धनमित्यर्थः) मुष्णन्नपहरन् विजयैकवृत्तेर्विजयैकजीवितायाः, तेजस्वितायाः तेजस्विनाम् प्रियम् इष्टं प्राणम् असुमिव, अभिमानम् अहङ्कारं निघ्नन् खण्डयन् (निकारः) चतुर्थश्लोकस्थनिकारपदस्यैव सर्वमेतद्विशेषणम्। शक्तिमतामसुभङ्ग इव मानभङ्ग इति भावः। अत्रोपमाऽलङ्कारः॥ ४१॥

'अधिक्षेपाद्यसहनं तेजः प्राणात्ययेष्वपि' न त्याज्यमित्याह—

व्रीडानतैराप्तजनोपनीतः संशय्य कृच्छ्रेण नृपैः प्रपन्नः ।
वितानभूतं विततं पृथिव्यां यशः समूहन्निव दिग्विकीर्णम् ॥४२॥

अन्वयः—आप्तजनोपनीतः, संशय्य, व्रीडानतैः, नृपैः, कृच्छ्रेण, प्रपन्नः, (निकारः) पृथिव्यां, वितानभूतं, दिग्विकीर्णं, विततं, यशः, समूहन्, इव, (स निकारः) ॥४२॥

(म०) व्रीडेति । पुनश्च । आप्तजनेनोपनीतः साधितः । प्रापित इत्यर्थः । तथाऽपि संशय्य संदिह्य । असंभावितबुद्ध्येति भावः । व्रीडानतैः । जुगुप्सितवृत्तान्तश्रवणादिति भावः । नृपैर्देशान्तरस्थैः कृच्छ्रेण प्रपन्नः । आप्तोक्तत्वात्कथंचिद्विश्वस्त इत्यर्थः । यः श्रृण्वतामपि दुःसहः किमुतानुभवतामिति भावः । इत्येषां पूर्वेषां व्याख्या । अन्यथा च व्याख्यायते—आप्तजनोपनीतो ज्ञातिकृतः संशय्य कथमिदमन्याय्यमुपेक्ष्यमिति विचार्य व्रीडानतै । जुगुप्सितकर्मदर्शनादिति भावः । नृपैस्तत्रत्यै कृच्छ्रेण प्रपन्नोऽङ्गीकृतः । गोत्रकलहेषु मध्यस्थरुदासितव्यमिति बुद्ध्योपेक्षित इत्यर्थः । पक्षद्वयेऽपि प्रपन्नः । इत्यत्राप्तजनोपनीतत्वस्य पदार्थभूतस्य विशेषणगत्या हेतुत्वोक्त्या काव्यलिङ्गमलंकारः । पृथिव्यां वितानभूतमुल्लोचोपमितम् । यद्वा वितानभूतं वितानसमम् । उल्लोचतुल्यमिति यावत् । 'युक्ते क्ष्माऽऽदावृते भूतं प्राण्यतीते समे त्रिषु' इत्यमरः । 'अस्त्री वितानमुल्लोचः' इत्यमर । दिग्विकीर्णं दिगन्तलग्नम् । वितानमपि दिगन्तलग्नमिति भाव । विततं प्रथितं यशः समूहन्निव संकोचयन्निवेत्युत्प्रेक्षा । अरातिपरिभूतस्य कुत कीर्त्तिरिति भाव ॥ ४२ ॥

(भा०) व्रीडानतैरिति । पुन । आप्तजनोपनीत परिचितलोकप्रापित, तथाऽपि संशय्यासम्भावितबुद्ध्या सन्दिह्य व्रीडानतैर्निन्दितोदन्ताकर्णनाल्लज्जितैः, नृपैर्देशान्तरस्थक्षितीशैः कृच्छ्रेण कष्टेन प्रपन्नः प्राप्त । आप्तजनोपनीतो बन्धुजनकृतः संशय्य कथमनुचितमिदमुपेक्ष्यमिति सम्यग्विचार्य व्रीडानतैर्निन्दितक्रियाऽवेक्षणाल्लज्जितैः, नृपैः सदःस्थै राजभिः कृच्छ्रेण कथञ्चित् प्रपन्नोऽङ्गीकृत. । पृथिव्यां भूमौ वितानभूतम् उल्लोचतुल्यं दिग्विकीर्णं दिगन्तलग्नं विततं विस्तृतं यश कीर्त्ति समूहन्निव संकोचयन्निव । न शत्रुपरिभूताः कीर्तिभाजिनो भवन्तीति भावः । प्रपन्न इत्यत्राप्तजनोपनीत इत्यस्य विशेषणद्वारा हेतुत्वाभिधानात्पदार्थहेतुकं काव्यलिङ्गमलङ्कारः । सङ्कोचयन्निवेत्युत्प्रेक्षा चेत्युभयोः साङ्कर्यम् ॥ ४२ ॥

वीर्यावदानेषु कृतावमर्षस्तन्वन्नभूतामिव सम्प्रतीतिम् ।
कुर्वन्प्रयामक्षयमायतीनामर्कत्विषामह्न इवावशेषः ॥ ४३ ॥

अन्वय.—वीर्यावदानेषु, कृतावमर्ष, सम्प्रतीतिम्, अभूताम्, इव, तन्वन्, अह्नः, अवशेष., अर्कत्विषाम्, इव, आयतीनाम्, प्रयामक्षयं, कुर्वन्, ॥ ४३ ॥

(म०) वीर्येति। पुनश्च। वीर्याण्येवावदानानि तेषु कृतावमर्षः कृतास्कन्दनः। पुराकृतपराक्रमजातान्यपि प्रमृजन्नित्यर्थः। 'अवदानं कर्म वृत्तम्' इत्यमरः। अत एव सम्प्रतीतिं ख्यातिम्। 'प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुता' इत्यमरः। अभूताम-विद्यमानामिवेत्युत्प्रेक्षा। सतोऽप्यसत्त्वमुत्प्रेक्ष्यते। तन्वन्कुर्वन्। पुनश्चाह्नोऽवशेषो-दिनान्तोऽर्कत्विषामिवायतीनामुत्तरकालानां प्रथामक्षयं दैर्घ्यनाशं कुर्वन्निति श्रौती पूर्णोपमा। अरिनिराकृतस्य कुतश्चिरावस्थानमिति भाव॥ ४३॥

(भा०) वीर्यावदानेष्विति। वीर्यावदानेषु पराक्रमात्मककर्मसु कृतावमर्षः कृता-स्कन्दन सम्प्रतीतिं ख्यातिम् अभूताम् अविद्यमानामिव तन्वन्। पुनश्च-अह्नो दिव-सस्य, अवशेष. शेषभागः, अर्कत्विषां सूर्यतेजसामिव, आयतीनाम् उत्तरकालानाम् प्रथामक्षयं दैर्घ्यनाशं कुर्वन् विद्यद्। यथा दिवसावशेषभाग· सूर्यतेजोदैर्घ्यं नाशयन् स्मर्त्तुमशक्यः, तथा निकारः कृतपराक्रमरूपकर्ममार्जनः ख्यातिमपहरन् स्मर्त्तुमशक्य-इत्यर्थः। शत्रुनिराकृतो न चिरावस्थायीति भाव·। पूर्वार्द्धे-उत्प्रेक्षा। उत्तरार्द्धे श्रौती पूर्णोपमा। अनयोः संसृष्टिः॥ ४३॥

प्रसह्य योऽस्मासु परैः प्रयुक्तः स्मर्त्तुं न शक्यः किमुताधिकर्त्तुम्।
नवीकरिष्यत्युपशुष्यदार्द्रः स त्वद्विना मे हृदयं निकारः॥ ४४॥

अन्वयः-परै, अस्मासु, प्रसह्य, प्रयुक्तः, य, (स) स्मर्त्तुं, न, शक्यः, अधिकर्त्तुं, किमु-त। स, निकारः, त्वद्विना, आर्द्रः (सन्) उपशुष्यद्, मे, हृदयं, नवीकरिष्यति॥४४॥

(म०) प्रसह्येति। पुनश्च। पर शत्रुभिरस्मासु प्रसह्य प्रयुक्त आचरितो यो निकारः-परिभव केशाकर्षणरूप स्मर्त्तुं न शक्य.। अधिकर्त्तमनुभवितुं किमुत। यस्य स्मरणम-पि दुःसहमनुभवस्तु दु सह इति किमु वक्तव्यमित्यर्थः। स निकारस्त्वद्विना त्वया विना 'पृथग्विना-' इत्यादिना पञ्चमी। आर्द्र. सन्कुतश्चिदभिभूतात्पुराणप्रहार इव। त्वद्वि-रहद् स्वात्पुनर्नवीकरिष्यति। नवीभविष्यतीत्यर्थः। उपशुष्यत्। त्वया विना शुष्कमि-ति भावः। दुःखस्तम्भनं शोषपदार्थो मे हृदयं नवीकरिष्यत्यार्द्रीकरिष्यति। व्रणमिवेति भावः। दु खितस्य पुनर्दुःखोपचयः प्रशान्तप्रायमपि दु खहेतुं पुनरुद्घाटयतीत्यर्थः। अत्र शोषादिविशेषणसाम्याद् व्रणाद्यप्रस्तुतार्थप्रतीते· समासोक्तिरलंकारः॥ ४४॥

(भा०) प्रसह्येति। पुनश्च। परैः शत्रुभिः, अस्मासु प्रसह्य हठात् प्रयुक्त आचरितो-यो निकारः पराभवः (केशाकर्षणरूपः) (सः) स्मर्त्तुं चिन्तितुं न शक्यो न योग्यः, अधि-कर्त्तुम् अनुभवितुं किमुत किं वक्तव्यम्। स निकारः, त्वद्विना त्वया विना (त्वामन्तरेण) आर्द्र· सन्। क्लिन्नः सन् (पुरातनप्रहार इव) उपशुष्यत् त्वद्विरहेण शुष्कं मे मम हृदयं स्वान्तं (व्रणमिव) नवीकरिष्यत्यार्द्रीकरिष्यति। यदरिनिकारस्य स्मरणमपि दुःसहं तदनुभवस्तु नितरां क्लेशप्रद इति किमु वक्तव्यम्। स निकारस्त्वामन्तरेण

दुःखितस्यापि।मे हृदयस्य दुःखं करिष्यतीत्यर्थः। उपशुष्यदितिशोषादिविशेषणसाम्याद्‌ग्रणाद्यप्रस्तुतार्थप्रतीतेः समासोक्तिः ॥ ४४ ॥

पुनः प्रकारान्तरेण मन्युमुद्दीपयति 'प्राप्तः' इत्यादिभिस्त्रिभि.। तत्र वक्ष्यमाणप्रत्यभिज्ञानहेतुभिर्धनञ्जयं विशिनष्टि—

प्राप्तोऽभिमानव्यसनादसह्यं दन्तीव दन्तव्यसनाद्विकारम्।
द्विषत्प्रतापान्तरितोरुतेजाः शरद्घनाकीर्ण इवादिरह्नः ॥ ४५ ॥

अन्वय.—अभिमानव्यसनाद्, दन्तव्यसनाद्, दन्ती, इव, असह्यं, विकारं, प्राप्तः, द्विषत्प्रतापान्तरितोरुतेजाः, (त्वं) शरद्घनाकीर्ण, अह्न, आदिः, इव, (स्थितः) ॥ ४५ ॥

(म०) प्राप्त इति। अभिमानस्य व्यसनाद् भ्रंशाद् 'व्यसनं विपदि भ्रंशे दोषे कामजकोपजे' इत्यमरः। दन्तव्यसनाद् दन्तभङ्गाद्दन्तीवासह्यं विकारं वैरूप्यं प्राप्तः। अतो न प्रत्यभिज्ञायत इति भाव। एवमुत्तरत्राप्यनुसन्धेयम्। पुनश्च। द्विषत्प्रतापेन शत्रुतेजसाऽन्तरितं तिरस्कृतमुरु तेज प्रतापो यस्य स तथोक्तः। अत एव शरद्घनाकीर्णः शरन्मेघच्छन्नोऽह्न आदि प्रत्यूष इव स्थितः। तद्वदेवाप्रत्यभिज्ञायमान इत्यर्थ। मध्याह्नस्तु मेघावरणेऽपि कथंचित्प्रत्यभिज्ञायत एवेत्याशयेनोक्तमादिरिति ॥ ४५ ॥

(भा०) प्राप्त इति। अभिमानव्यसनाद् अहङ्कारभ्रंशाद् दन्तव्यसनाद् दन्तभङ्गाद् दन्तीव हस्तीव, असह्यं सोढुमनर्हं विकारं वैरूप्यं प्राप्तोऽधिगतः। द्विषत्प्रतापान्तरितोरुतेजाः शत्रुतेजआच्छादितप्रतापः, (त्वम्) अत एव शरद्घनाकीर्णः शरन्मेघच्छन्नोऽह्नो दिवसस्य, आदि प्रत्यूष इव स्थित। यथा दन्तभङ्गाद्दन्ता विकृतो भवति तथा मानभङ्गादर्जुनो विकृतो जात, यथा च मेघान्तरितः प्रत्यूषोऽप्रत्यभिज्ञायमानस्तथा शत्रुप्रतापातिक्रान्तप्रतापोऽर्जुनोऽप्रत्यभिज्ञायमान इत्यर्थः। अत्रोपमाद्वयम् ॥ ४५ ॥

सव्रीडमन्दैरिव निष्क्रियत्वान्नात्यर्थमस्त्रैरवभासमानः।
यशःक्षयक्षीणजलार्णवाभस्त्वमन्यमाकारमिवाभिपन्नः ॥४६॥

अन्वयः—निष्क्रियत्वात्, सव्रीडमन्दै, इव अस्त्रः, अत्यर्थं, न, अवभासमान, यशःक्षयक्षीणजलार्णवाभ, त्वम्, अन्यम्, आकारम्, अभिपन्नः, इव, (स्थित) ॥ ४६ ॥

(म०) सव्रीडेति। पुनश्च। निष्क्रियत्वादर्थक्रियाशून्यत्वात्सव्रीडमन्दैरिव सव्रीडैरत एव मन्दैरपटुभिरिव स्थितैरित्युत्प्रेक्षा। 'मूढाल्पापटुनिर्भाग्या मन्दाः' इत्यमर। अस्त्रैरत्यर्थं नावभासमानो न प्रकाशमानः। पूर्वं तु नैवमिति भाव। किं तु यशःक्षयाद्धेतोः क्षीणजलो योऽर्णवस्तदाभस्तत्सदृशस्त्वमन्यमाकारमभिपन्नः प्राप्त इव स्थित इवेत्युत्प्रेक्षा। तस्य क्षीणजलार्णवाभइत्युपमासंसृष्टिः ॥ ४६ ॥

(भा०) सव्रीडमन्दैरिति। निष्क्रियत्वाद् अर्थक्रियाशून्यत्वात् सव्रीडमन्दैरिव सव्रीडैः सलज्जैः, अत एव मन्दैरपटुभिरिव स्थितैरस्त्रैरायुधैः, अत्यर्थम् अतिशयं नावभासमानो न प्रकाशमान किन्तु यशःक्षयात् कीर्त्तिनाशाद्धेतो. क्षीणजलार्णवाभः शुष्कसमुद्रसदृशः, त्वम् अन्यमाकारं भिन्नाकृतिम् अभिपन्नः प्राप्त इव स्थितः। शत्रुपराभवं प्राप्यास्त्राग्रहणादशोभमानस्त्वं शुष्कार्णव इव (भिन्नाकारं प्राप्त इव) स्थितोऽसीत्यर्थः। यशःक्षयक्षीणजलार्णवाभ इत्यत्र सादृश्यार्थकाभाशब्दस्य सत्त्वादुपमासंसृष्टमुत्प्रेक्षाद्वयम्॥४६॥

दुःशासनामर्षरजोविकीर्णैरेभिर्विनाथैरिव भाग्यनाथैः।
केशैः कदर्थीकृतवीर्यसारः कच्चित्स एवासि धनञ्जयस्त्वम्॥४७॥

अन्वय—दुःशासनामर्षरजोविकीर्णं, विनाथैः, इव, भाग्यनाथैः, एभिः, केशैः, कदर्थीकृतवीर्यसारः, त्वं, स, एव, धनञ्जयः, असि, कच्चित्॥ ४७॥

(म०) दुःशासनेति। पुनश्च। दुःशासनस्य कर्त्तुरामर्षं आमर्षणमाकर्षणं स एव रजो धूलि। मालिन्यहेतुत्वादिति भावः। तेन विकीर्णैर्विक्षिप्तैरत एव विनाथैरिव स्थितवतां युष्माकमसत्त्वप्रायत्वादनाथैरिव स्थितैरित्युत्प्रेक्षा। अन्यथा कथमियं दुर्दशेति भाव। किन्तु भाग्यनाथैर्दैवमात्रशरणैः। अन्यथा स्वरूपमपि लुप्येतेति भावः। एभिःपरिदृश्यमानै। असंयमितैरिति भाव। केशैः शिरोरुहैः कुत्सितोऽर्थो वस्तु कदर्थः। 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यमरः। 'कोः कत्तत्पुरुषेऽचि' इति कुशब्दस्य कदादेशः। कदर्थीकृतौ गर्ह्यार्थीकृतौ वीर्यसारौ शौर्यबले यस्य स तथोक्तः। इत्थं पूर्वविलक्षणस्त्वं स एव धनञ्जयोऽसि कच्चित्। 'कच्चित्कामप्रवेदने' इत्यमर। स एव चेत्त्वं नैवमस्मानुपेक्षस इति भावः॥ ४७॥

(भा०) दुःशासनेति। पुनश्च। दुःशासनामर्षरजोविकीर्णैर्दुर्योधनानुजाकर्षणात्मकधूलिनिक्षिप्तैः, अत एव विनाथैरिव स्थितैः, किन्तु भाग्यनाथैर्दैवमात्रशरणैः, एभिः परिदृश्यमानैः केशैः शिरोरुहैः कदर्थीकृतवीर्यसारस्तिरस्कृतशौर्यबलः, त्वं स एव धनञ्जयोऽर्जुनोऽसि कच्चित्। केशाकर्षणकालिक एव त्वं धनञ्जयनामाऽसि चेत्तदा तदानीमिवेदानीमपि कथं नास्मानुपेक्षस इति भावः। अत्रोत्प्रेक्षाऽलङ्कार॥ ४७॥

अथाप्युपेक्षणे दोषमाह—

स क्षत्रियस्त्राणसहः सतां यस्तत्कार्मुकं कर्मसु यस्य शक्तिः।
वहन् द्वयीं यद्यफलेऽर्थजाते करोत्यसंस्कारहतामिवोक्तिम्॥४८॥

अन्वयः—य, सतां, त्राणसहः, सः, क्षत्रिय, यस्य, कर्मसु, शक्तिः, तद् (एव) कार्मुकम्, यदि, द्वयीम्, उक्तिम्, अफले, अर्थजाते, वहन्, असंस्कारहताम्, इव, करोति॥ ४८॥

(म०) स इति । क्षतात्त्रायत इति क्षत्त्रं क्षत्त्रियकुलम् । 'सुपि' इति योगविभागात्कप्रत्ययः । पृषोदरादित्वात्पूर्वपदस्यान्त्यलोपः । अथवा क्षदिति क्विबन्तोपपदात्कप्रत्ययः । क्षत्त्रे जातः क्षत्त्रियः । 'क्षत्त्राद् घः' इति घप्रत्ययः । कर्मणे प्रभवतीति कार्मुकम् । 'कर्मण उकञ्' इत्युकञ्प्रत्ययः । एवं स्थिते वाक्यार्थः कथ्यते । यः सतांसाधूनाम् । सहत इति सहः । पचाद्यच् । यस्त्राणस्य सहस्त्राणसहो रक्षणक्षमः स एव क्षत्त्रियशब्दवाच्य । तथा यस्य कार्मुकस्य कर्मसु रणक्रियासु शक्ति । अस्तीति शेषः । तदेव कार्मुकशब्दवाच्यम् । अत्रैवैतौ शब्दौ मुख्यौ । नान्यत्रेत्यर्थः । एवं स्थिते द्वयीं द्विविधामुक्तिम् । द्वाविमौ क्षत्त्रियकार्मुकशब्दावित्यर्थः । अफले । पूर्वोक्तावयवार्थशून्ये, अर्थजाते । स्वाभिधेयसामान्यजातिमात्र इत्यर्थः । 'जातं जात्योघजन्मसु, इति विश्वः । वहन्वर्त्तयन् । असंस्कारहतामव्युत्पत्तिदूषितामिव करोतीत्युत्प्रेक्षा। तस्मात्त्वमस्मद्रक्षणेनोक्तदोषादात्मानं मोचयस्वेत्यर्थ ॥ ४८ ॥

(भा०) स इति । यः (पुरुषः) सतां साधूनां (ब्राह्मणादीनां) त्राणसहो रक्षको-(रक्षणक्षमः) स क्षत्त्रियः क्षत्त्रियशब्दवाच्य, यस्य कार्मुकस्य कर्मसु व्यापारेषु (रणक्रियासु) शक्तिः सामर्थ्यम् (अस्ति) तत्कार्मुकं तदेव कार्मुकशब्दवाच्यम् । यदि द्वयीं द्विविधाम् उक्तिम् (इमौ द्वौ क्षत्त्रियकार्मुकशब्दौ) अफले पूर्वोक्तावयवार्थरहितौ, अर्थजाते स्वाभिधेयसामान्यजातिमात्रे वहन् वर्त्तयन् । असंस्कारहताम् अव्युत्पत्तिदूषितामिव करोति विदधाति । त्वं यथार्थत क्षत्त्रियशब्दवाच्यश्चेत्तदाऽस्मत्त्राणादात्मानमदूषितं विधेहीत्यर्थः । अत्रोत्प्रेक्षाऽलङ्कारः ॥ ४८ ॥

अथ त्वद्गुणा अपि नोज्जीवयेयुरित्याह—

वीतौजसः सन्निधिमात्रशेषा भवत्कृतां भूतिमपेक्षमाणाः ।
समानदुःखा इव नस्त्वदीयाः सरूपतां पार्थ ! गुणा भजन्ते ॥४९॥

अन्वयः—हे पार्थ ! वीतौजसः, सन्निधिमात्रशेषाः, भवत्कृतां, भूतिम्, अपेक्षमाणाः, त्वदीयाः, गुणाः, समानदुःखाः, इव, नः, सरूपतां, भजन्ते ॥ ४९ ॥

(म०) वीतेति । हे पार्थ ! वीतौजसो निष्प्रभा. सन्निधिमात्रशेषाः सत्तामात्रावशिष्टा भवत्कृतां वता करिष्यमाणाम् । 'आशंसायां भूतवच्च' इति भूतवत्प्रत्ययः । भूतिमभ्युदयमपेक्षमाणास्त्वदीया गुणाः समानदु.खा. समदु.खभाज इव नोऽस्माकंसरूपतां वीतौजस्त्वादिसाधर्म्यं भजन्त इत्युपमा । सा च समानदुःखा इवेत्युत्प्रेक्षया वीतौजस्त्वादिसम्भावितयाऽनुप्राणितेत्यनुसन्धेयम् ॥ ४९ ॥

(भा०) वीतौजस इति । हे पार्थ ! अर्जुन ! वीतौजसो निष्प्रभाः (हीनद्युतयः) सन्निधिमात्रशेषाः सत्तामात्रावशिष्टाः, भवत्कृतां भवता करिष्यमाणाम् भूतिम् (अभ्युदयम्) अपेक्षमाणा ईहमानाः, त्वदीयास्त्वत्सम्बन्धिनः गुणाः शौर्यादयः

समानदुःखास्तुल्यव्यसनिन इव नोऽस्माकं सरूपतां वीतौजस्त्वादिसाधर्म्यं भजन्ते समाश्रयन्ति । अत्रोत्प्रेक्षाऽनुप्राणितोपमाऽलङ्कारः ॥ ४९ ॥

तथाऽपि ममैव कोऽयं भार इत्यत आह—

आक्षिप्यमाणं रिपुभिः प्रमादान्नागैरिवालूनसटं मृगेन्द्रम् ।
त्वां धूरियं योग्यतयाऽधिरूढा दीप्त्या दिनश्रीरिव तिग्मरश्मिम् ॥५०॥

अन्वयः—प्रमादाद्, रिपुभिः, आक्षिप्यमाणं, नागैः, आलूनसटं, मृगेन्द्रम्, इव, त्वाम्, इयं, धूः, तिग्मरश्मिं, दीप्त्या, दिनश्रीः, इव, योग्यतया, अधिरूढा ॥ ५० ॥

(म०) आक्षिप्येति । प्रमादात्प्रज्ञाहीनत्वाद् । न तु दौर्बल्यादिति भावः । रिपुभराक्षिप्यमाणमभिक्षिप्यमाणमत एव प्रमादाद् । नागैर्गजैः । 'ग्रहेभाहिगजा नागाः' इति वैजयन्ती । आलूनसटमाक्षिप्तकेसरम् । 'सटा जटाकेसरयोः' इत्यमरः । मृगेन्द्रं सिंहमिव स्थितम् । त्वामियं धूः कार्यभारः । तिग्मरश्मिं सूर्यं दीप्त्या दिनश्रीरिव योग्यतया निर्वाहकतयाऽधिरूढाऽऽरूढवती । कर्त्तरि क्तः । त्वदधीनेत्यर्थः ॥ ५० ॥

(भा०) आक्षिप्यमाणमिति । प्रमादात् प्रज्ञाहीनत्वाद् (न तु दौर्बल्याद्) रिपुभिः शत्रुभिः, आक्षिप्यमाणम् अधिक्षिप्यमाणं नागैर्गजैः, आलूनसटम् मृगेन्द्रं सिंहमिव स्थितं त्वां भवन्तम् इयमेषा धूः कार्यभारः, तिग्मरश्मिं सूर्यं दीप्त्या भासा दिनश्रीः दिवसकान्तिरिव योग्यतया निर्वाहकतया, अधिरूढाऽऽरूढवती । यथा गजाक्षिप्तकेसरं मृगेन्द्रं गजविनाशनात्मककार्यभारः समाश्रयति, यथा च सूर्यं दिनश्रीराश्रयति तथा त्वां शत्रुविनाशनात्मककार्यभारः समाश्रयतीति भावः । अत्रोपमाद्वयम् ॥ ५० ॥

पूर्वं निर्व्यवसायस्य 'स क्षत्त्रियः' इत्यादिना दोष उक्तः । संप्रति व्यवसायिनो गुणमाह-

करोति योऽशेषजनातिरिक्तां सम्भावनामर्थवतीं क्रियाभिः ।
संसत्सु जाते पुरुषाधिकारे न पूरणी तं समुपैति संख्या ॥ ५१ ॥

अन्वयः—यः, अशेषजनातिरिक्तां, सम्भावनां, क्रियाभिः, अर्थवतीं, करोति, तं, संसत्सु, पुरुषाधिकारे, जाते, (सति) पूरणी, संख्या, न, समुपैति ॥ ५१ ॥

(म०) करोतीति । यः पुमान् अशेषजनादितरजनादतिरिक्तामधिकाम् । सर्वातिशायिनीमित्यर्थः । सम्भावनां योग्यतां क्रियाभिश्चरितैरर्थवतीं सफलां करोति । तं पुमांसं संसत्सु सभासु 'सभासमितिसंसदः' इत्यमरः । पुरुषाधिकारे योग्यपुरुषगणनाप्रस्तावे जाते सति पूर्यतेऽनयेति पूरणी संख्या । द्वित्वादिसंख्या । न समुपैति न गच्छति । अद्वितीयो भवतीत्यर्थः । तस्मादसाधारणलाभाय त्वयाऽपि महानुत्साह आस्थेय इति भावः ॥५१॥

(भा०) करोतीति । यः (पुरुषः) अशेषजनातिरिक्ताम् इतरजनाधिकाम् (लोकोत्तराम्) सम्भावनां योग्यतां क्रियाभिश्चरितैः (उद्योगैः) अर्थवतीं सफलां करोति विदधाति । तं (पुरुषं) संसत्सु सभासु पुरुषाधिकारे योग्यपुरुषगणनाप्रस्तावे जाते सति पूर-

णी संख्या द्वित्वादिसंख्या न समुपैति न गच्छति। स्वचरितैर्लोकोत्तरयोग्यतासाफल्यकारकः पुरुषोऽद्वितीयो भवतीत्यर्थः। भवताऽपि लोकोत्तरयशोलाभाय यतितव्यमिति भावः। उत्तरार्द्धगतवाक्यार्थं पूर्वार्द्धगतवाक्यार्थो हेतुरिति काव्यलिङ्गम्॥ ५१॥

अथ द्वाभ्यां सुलभविपक्षस्य प्रोषितस्यार्जुनस्य कर्त्तव्यमुपदिशति—

प्रियेषु यैः पार्थ ! विनोपपत्तेर्विचिन्त्यमानैः क्लममेति चेतः।
तव प्रयातस्य जयाय तेषां क्रियादघानां मघवा विघातम् ॥ ५२॥

अन्वयः—(हे) पार्थ ! प्रियेषु, उपपत्तेः, विना, विचिन्त्यमानैः, यैः, चेतः, क्लमम् एति, जयाय, प्रयातस्य, तव, तेषाम्, अघानां, मघवा, विघातं, क्रियात्॥ ५२॥

(म०) प्रियेष्विति। हे पार्थ ! प्रियेष्वस्मासु विषये। उपपत्तेः कारणाद्विनैव विचिन्त्यमानैर्यैरघैश्चेतः क्लमं खेदमेति। जयाय प्रयातस्य तव सम्बन्धिनां तेषामघानां व्यसनानाम्। 'दुःखैनोव्यसनेष्वघम्' इत्यमर। मघवेन्द्र। योऽस्माभिरुपास्यत इति भावः। विघातं निवारणं क्रियात्करोतु। आशिषि लिङ्। तस्मादस्मच्चिन्तया न चेतः खेदयितव्यं जयार्थिना त्वया। अन्यथा तदसंभवादिति भाव ॥ ५२॥

(भा०) प्रियेष्विति। हेपार्थ ! अर्जुन ! प्रियेषु स्निग्धेषु (स्नेहपात्रेषु) (इष्टेषु) अस्मासु विषये, उपपत्तेः कारणाद् विनैव विचिन्त्यमानैरकस्मादेव विशङ्क्यमानैः, यैरघैः पापैः, चेतो मानसं क्लमं खेदम्, एति प्राप्नोति। जयाय जेतुम् (उत्कर्षलाभाय)प्रयातस्य गतस्य तव भवतः सम्बन्धिनां तेषाम् अघानां व्यसनानां मघवेन्द्रः, विघातं निवारणं क्रियात् करोतु। जयार्थिनां चिन्ताजन्यमन खेदाज्जयासम्भवान्न तैश्चिन्तितव्यमिति भाव॥५२॥

मा गाश्चिरायैकचरः प्रमादं वसन्नसम्बाधशिवेऽपि देशे।
मात्सर्यरागोपहतात्मनां हि स्खलन्ति साधुष्वपि मानसानि ॥५३॥

अन्वयः—असम्बाधशिवे, अपि, देशे, चिराय, एकचरः, (त्वम्) वसन्, प्रमादं, मा-गाः, हि, मात्सर्यरागोपहतात्मनां, मानसानि, साधुषु, अपि, स्खलन्ति ॥ ५३॥

(म०) मा गा इति। असंबाधोऽसङ्कट। विजन इत्यर्थः। 'संकटं ना तु सम्बाधः' इत्यमर। शिवो निर्बाधः। द्वयोरन्यतरस्य विशेष्यत्वविवक्षायां विशेषणसमासः। अस्मिन्नसम्बाधशिवेऽपि देशे चिरायचिरमेकश्चासौ चरश्चेत्येकचर एकाकी वसन् प्रमादं-दौर्बल्यं मा गाः। 'इणो गा लुङि' इति गाऽऽदेशः। ननु निःस्पृहस्य ममाकिञ्चित्करः-प्रमाद इति वाच्यमित्याशङ्क्याह—मात्सर्येति। मत्सर एव मात्सर्यं द्वेषो रागः स्नेहस्ताभ्यामुपहतात्मनां रागद्वेषदूषितस्वभावानां मानसानि मनांसि साधुषु सज्जनेष्वपि विषये स्खलन्ति विकुर्वते हि। अत्र प्रमादनिषेधलब्धाप्रमादरूपधारणेनार्थप्राप्तिरूपकार्यस्य व्यतिरेककारणसमर्थनाद्वैधर्म्येण कार्यकारणसमर्थनरूपोऽर्थान्तरन्यासः॥५३॥

(भा०) मा गा इति। (अस्मिन्), असम्बाधशिवे विजननिर्बाधेऽपि देशे स्थाने चिराय चिरकालम्, एकचर एकाकी, असहायः (त्वं) वसन् वासं कुर्वन्(तिष्ठन्) प्रमादं-

दौर्बल्यं मा गा न गमिष्यसि । हि यतः कारणाद् मात्सर्यरागोपहतात्मनां रागद्वेषदूषितस्वभावानां मानसानि मनांसि साधुषु सज्जनेष्वपि विषये स्खलन्ति विकुर्वते। रागद्वेषविशिष्टप्रकृतिकमानसानां साधुष्वपि विकृतत्वाद्विजनेऽसहायेन त्वया प्रमादो नाधिगन्तव्य इत्यर्थः । अत्र वैधर्म्येण कार्यकारणसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५३ ॥

तदाशु कुर्वन्वचनं महर्षेर्मनोरथान्नः सफलीकुरुष्व ।
प्रत्यागतं त्वाऽस्मि कृतार्थमेव स्तनोपपीडं परिरब्धुकामा ॥५४॥

अन्वयः—तद्, आशु, महर्षे, वचनम्, कुर्वन्, (त्वं) नः, मनोरथान्, सफलीकुरुष्व । कृतार्थं, प्रत्यागतम्, एव, त्वां, स्तनोपपीडं, परिरब्धुकामा, अस्मि ॥ ५४ ॥

(म०) तदिति। तत्तस्मात्कारणाद्। आशु शीघ्रं महर्षेर्वचनं कुर्वन्। तपस्यन्नित्यर्थः । नोऽस्माकं मनोरथान्सफलीकुरुष्व । अरिनिर्यातनेनास्मान्प्रतिष्ठापयेत्यर्थः । प्रार्थनायां लोट् । किञ्च-कृतार्थं कृतकृत्यं प्रत्यागतमेव त्वा त्वाम्। 'त्वामौ द्वितीयायाः' इति त्वाऽऽदेशः । स्तनयोरुपपीड्य स्तनोपपीडम्। 'सप्तम्यां चोपपीडरुधोः' इति णमुल्। परिरब्धुं कामो यस्याः सा परिरब्धुकामाऽस्मि । आलिङ्गितुमिच्छामीत्यर्थः । 'तुं काममनसोरपि' इति मकारलोपः । प्राक्कार्यसिद्धेः प्रमदाऽऽलिङ्गनमपि न प्रीतिदमिति भावः॥५४॥

(भा०) तदिति । तत् तस्मात् कारणाद् आशु शीघ्रं महर्षेर्व्यासस्य वचनं वाक्यं कुर्वन्नङ्गीकुर्वन् (त्वम्) नोऽस्माकं मनोरथान् अभिलाषान् सफलीकुरुष्व सफलान् विधेहि । कृतार्थं कृतकार्यं प्रत्यागतं तपःस्थानात्प्रतिनिवृत्तमेव त्वा त्वां भवन्तं स्तनोपपीडं कुचोपमर्दनं यथा तथा परिरब्धुकामाऽस्मि, आलिङ्गितुमिच्छामि । कार्यसिद्धिमन्तरा प्रमदाऽऽलिङ्गनमयुक्तमिति तदुत्तरमेव तदुचितमिति भावः । प्रत्यागतमेव त्वां परिरब्धुकामा न त्वप्रत्यागतमित्यन्यार्थागमादर्थापत्तिरलङ्कारः ॥ ५४ ॥

उदीरितां तामिति याज्ञसेन्या नवीकृतोद्ग्राहितविप्रकाराम् ।
आसाद्य वाचं स भृशं दिदीपे काष्ठामुदीचीमिव तिग्मरश्मिः ॥५५॥

अन्वयः—सः, इति, याज्ञसेन्या, उदीरितां, नवीकृतोद्ग्राहितविप्रकारां, तां, वाचम्, आसाद्य, उदीचीं, काष्ठाम्, (आसाद्य) तिग्मरश्मिः, इव, भृशं, दिदीपे ॥ ५५ ॥

(म०) उदीरितामिति । सोऽर्जुन इतीत्थं यज्ञसेनस्यापत्येन स्त्रिया याज्ञसेन्या द्रौपद्योदीरितामुक्ताम् । नवीकृतः पुनरुद्घाटनेन तथा प्रत्यायितोऽत एवोद्ग्राहितो मनसि निधापितश्च विप्रकारः परिभवो यया सा तां वाचमासाद्य ।, आकर्ण्येत्यर्थः । उदीचीं काष्ठां दिशम् । 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' इत्यमरः । तिग्मरश्मिरिव । भृशं दिदीपे जज्वाल । चुक्रोधेत्यर्थः ॥ ५५ ॥

(भा०) उदीरितामिति । सोऽर्जुनः, इतीत्थं याज्ञसेन्या यज्ञसेननृपकन्यया द्रौपद्या, उदीरिताम् उक्तां नवीकृतोद्ग्राहितविप्रकारां प्रत्यायितनिधापितपरिभवां तां वाचं वाणीम् आसाद्य श्रुत्वा, उदीचीम् उत्तरां काष्ठां दिशम् (आसाद्य) तिग्मरश्मिः सूर्य इव

भृशम् अतिशयं दिदीपे जज्वाल (चुक्रोध)। उत्तरदिशमासाद्य सूर्यो यथाऽतिशयं दीप्यते तथा द्रौपदीवाक्यमाकर्ण्यार्जुनो भृशं चुक्रोधेत्यर्थः। अर्जुनस्यातिशयक्रोधसंविधाने द्रौपद्युक्तवचनाकर्णनपदार्थस्य हेतुत्वात्पदार्थहेतुकं काव्यलिङ्गम्। तच्चोपमासंसृष्टम् ॥५५॥

अथाभिपश्यन्निव विद्विषः पुरः पुरोधसाऽऽरोपितहेतिसंहतिः ।
बभार रम्योऽपि वपुः स भीषणं गतः क्रियां मन्त्र इवाभिचारिकीम् ५६॥

अन्वय.—अथ, विद्विषः, पुरः, अभिपश्यन्, इव, पुरोधसा, आरोपितहेतिसंहतिः, सः, रम्यः, अपि, आभिचारिकीं, क्रियां, गतः, मन्त्रः, इव, भीषणं, वपु., बभार ॥५६॥

(म०) अथेति। अथ विद्विषः शत्रून्पुरोऽभिपश्यन्निव स्थितस्तथा पुरोधसा धौम्येनारोपिता समन्त्रमाहिता हेतिसंहतिरायुधकलापो यस्य स तथोक्तः।'हेतिर्ज्वालाऽङ्कुरायुधे'- इति वैजयन्ती। सोऽर्जुनो रम्यः सौम्यः सन्नपि। अभिचारः परहिंसा प्रयोजनं यस्याः साऽऽभिचारिकी। 'प्रयोजनम्' इति ठञ्। तां क्रियां गत । अभिचारकर्मणि नियुक्त इत्यर्थः। मन्त्र इव रम्य प्रकृत्या रमणीयः। भीषयत इति भीषणम्। नन्द्यादित्वाल्ल्युप्रत्यय। वपुर्बभार। प्रशान्तो मन्त्रः प्रयोगभेदादिव सोऽप्यवस्थाभेदाद्भीषणो बभूवेत्यर्थः ॥५६॥

(भा०) अथेति। अथानन्तरं विद्विषः शत्रून् पुरोऽभिपश्यन्नवलोकमानः, इव (स्थितः) तथा पुरोधसा धौम्येन, आरोपितहेतिसंहतिर्मन्त्रपूर्वकसमाहितायुधकलाप सोऽर्जुनः, रम्यः सौम्यः (मनोज्ञः) सन्नपि, आभिचारिकीं परहिंसाप्रयोजनिकां क्रियां व्यापारं गत प्राप्तः (तत्र नियुक्त इत्यर्थः) मन्त्र इव भीषणं भयानकं वपुः शरीरं बभार दधार। यथाऽभिचारकर्मणि नियुक्तो मन्त्रो भीषणो भवति तथाऽवस्थाभेदादर्जुनो भीषणो बभूवेत्यर्थः। अत्रोपमाऽलङ्कारः ॥ ५६ ॥

उक्तमायुधारोपणं विवृण्वन्प्रस्थानमाह त्रिभिः—

अविलङ्घ्य विकर्षणं परैः प्रथितज्यारवकर्म कार्मुकम् ।
अगतावरिदृष्टिगोचरं शितनिस्त्रिंशयुजौ महेषुधी ॥ ५७ ॥

अन्वय—परैः, अविलङ्घ्यविकर्षणं, प्रथितज्यारवकर्म, कार्मुकम्, अरिदृष्टिगोचरम्, अगतौ, शितनिस्त्रिंशयुजौ, महेषुधी, (उद्वहन्, तपोभृतां हृदयानि समाविवेश) ॥५७॥

(म०) अविलङ्घ्येति। परैः शत्रुभिरविलङ्घ्यमनतिक्रमणीयं विकर्षणं यस्य तद्। अमोघाकर्षणमित्यर्थः। किञ्च प्रथितो ज्यारवो गुणध्वनिः कर्म बाणमोक्षणादिकं च यस्य तत्कार्मुकं चोद्वहन्नित्यन्वयः। तथाऽरीणां दृष्टिगोचरं दृष्टिपथमगतौ। आहवेष्वनिवर्त्तित्वादस्येति भावः। निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः। डप्रत्यये संख्यायास्तत्पुरुषस्योपसंख्यानात्समासान्त.। तेन शितेन तीक्ष्णेन युङ्क्त इति शितनिस्त्रिंशयुजौ। 'सत्सूद्विष-' इत्यादिना क्विप्। महेषुधी महानिषङ्गौ। इषवो धीयन्तेऽनयोरिति विग्रहः। 'कर्मण्यधिकरणे च' इति किप्रत्ययः। 'तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः। तूण्यां खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः'। इत्यमरः ॥ ५७ ॥

(भा०) आवलङ्घ्यति । परैः शत्रुभिः, अविलङ्घ्यविकर्षणम् अनतिक्रमणीयाकर्षणम् (अमोघाकर्षणम्) किञ्च, प्रथितज्यारवकर्म ख्यात (विस्तृत) गुणध्वनिबाणमोक्षादि कार्मुकं धनुः । तथा-अरिदृष्टिगोचरं शत्रुदृष्टिपथम् । अगतावप्राप्तौ शितनिस्त्रिंशयुजौ तीक्ष्णखड्गयुक्तौ महेषुधी महानिषङ्गौ च (उद्वहन्) तपस्विनां हृदयानि समाविवेशेत्यग्रिमतृतीयश्लोकेनान्वयः । उत्कृष्टधनुस्तीक्ष्णखड्गयुक्तं महानिषङ्गद्वयञ्च बिभ्रदर्जुनस्तपस्विनां मन. खेदयामासेत्यर्थः ॥ ५७ ॥

यशसेव तिरोदधन्मुहुर्महसा गोत्रभिदायुधक्षतीः ।
कवचं च सरत्नमुद्वहञ्ज्वलितज्योतिरिवान्तरं दिवः ॥ ५८ ॥

अन्वयः—गोत्रभिदायुधक्षतीः, महसा, यशसा, इव, मुहुः, तिरोदधद्, सरत्नं, ज्वलतज्योतिः, दिवः, अन्तरम्, इव, कवचं, च, उद्वहन् ॥ ५८ ॥

(म०) यशसेति । किञ्च । गोत्रभिद इन्द्रस्यायुधक्षतीर्वज्रप्रहाररन्ध्राणि । खाण्डवदाहसम्भवादिति भावः । महसा स्वकान्त्या यशसेव मूर्त्तया कीर्त्येव मुहुस्तिरोदधदाच्छादयन् । सरत्नं रत्नसहितमत एव ज्वलितज्योतिर्दीप्ततारकम् । 'ज्योतिस्ताराऽग्निभाज्वालादृक्पुत्रात्मधरासु च' इति वैजयन्ती । दिवोऽन्तरं नभो मध्यमिवावस्थितम् । 'अन्तरं परिधानीये बाह्ये स्वीयेऽन्तरात्मनि । क्लीबे मध्ये प्रकाशे च' इति वैजयन्ती । कवचं चोद्वहन् ॥ ५८ ॥

(भा०) यशसेति । किञ्च-गोत्रभिद इन्द्रस्य, आयुधक्षतीर्वज्रप्रहाररन्ध्राणि महसा स्वकान्त्या यशसा मूर्त्तिमत्या कीर्त्त्येव मुहुरसकृत् तिरोदधद् आच्छादयन् । सरत्नं रत्नसहितम् अत एव ज्वलितज्योतिर्दीप्ततारकं दिवोऽन्तरं नभोमध्यमिव, अवस्थितं कवचं वर्म च, उद्वहन् बिभ्रत् । तपोभृतां हृदयानि समाविवेशेत्यग्रिमश्लोकेन सम्बन्धः । इन्द्रकृतवज्रप्रहारजनितव्रणचिह्नानि तेजसाऽन्तर्हितानि कुर्वन् रत्नखचितं देदीप्यमानं वर्म च बिभ्रदर्जुनस्तपस्विनां मनांसि खेदयामासेत्यर्थ । पूर्वार्द्धे-उपमा । उत्तरार्द्धे-उत्प्रेक्षेति संसृष्टिः ॥ ५८ ॥

अलकाऽधिपभृत्यदर्शितं शिवमुर्वीधरवर्त्म संप्रयान् ।
हृदयानि समाविवेश स क्षणमुद्बाष्पदृशां तपोभृताम् ॥ ५९ ॥

अन्वय.—सः, अलकाऽधिपभृत्यदर्शितं, शिवम्, उर्वीधरवर्त्म, सम्प्रयान्, क्षणं, उद्बाष्पदृशां, तपोभृतां, हृदयानि, समाविवेश ॥ ५९ ॥

(म०) अलकेति । सोऽर्जुनोऽलकाऽधिपभृत्येन यक्षेण दर्शितमतः शिवं निर्बाधमुर्वीधरवर्त्म हिमवन्मार्गं प्रति सम्प्रयान् गच्छन् । क्षणमुद्बाष्पदृशां वियोगदुःखात्साश्रुनेत्राणां तपोभृतां द्वैतवननिवासिनां तपस्विनां हृदयानि समाविवेश । खेदयामासेत्यर्थः॥५९॥

(भा०) अलकेति । सोऽर्जुनः, अलकाऽधिपभृत्यदर्शितं यक्षनिर्दिष्टं शिवं भव्यं (निर्बाधम्) उर्वीधरवर्त्म हिमालयमार्गं प्रति सम्प्रयान् गच्छन् क्षणम् उद्बाष्पदृशां वियो-

गदुःखजनिताश्रुविशिष्टनेत्राणां तपोभृतां द्वैतवननिवासिनां तपस्विनां हृदयानि मानसानि समाविवेश खेदयामास । यक्षेण सह हिमालयाध्वानं प्रति गच्छन्नर्जुनो द्वैतवनवासितपस्विमनः खेदयामासेत्यर्थः । उत्तरार्द्धप्रतिपाद्यवाक्यार्थे पूर्वार्द्धप्रतिपाद्यपदार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गम् ॥ ५९ ॥

अनुजगुरथ दिव्यं दुन्दुभिध्वानमाशाः-
सुरकुसुमनिपातैर्व्योम्नि लक्ष्मीर्वितेने ।
प्रियमिव कथयिष्यन्नालिलिङ्ग स्फुरन्तीं-
भुवमनिभृतवेलावीचिबाहुः पयोधिः ॥ ६० ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये तृतीयः सर्गः ।

अन्वयः—अथ, आशाः, दिव्यं, दुन्दुभिध्वानम् , अनुजगुः, व्योम्नि, सुरकुसुमनिपातैः, लक्ष्मीः, वितेने, अनिभृतवेलावीचिबाहुः, पयोधिः, स्फुरन्तीं, भुवम् , प्रियं, कथयिष्यन् , इव आलिलिङ्ग ॥ ६० ॥

(म०) अनुजगुरिति । अथाशा दिशः । दिवि भवं दिव्यम् । 'द्युप्रागपागुदक्प्रतीचो यत्' । दुन्दुभिध्वानमनुजगुरनुदध्वनु । गायतेर्लिट् । व्योम्नि सुरकुसुमनिपातैर्लक्ष्मीर्वितेने । पुष्पवृष्टिश्चाजनिष्टेत्यर्थः । किञ्च । अनिभृताश्चञ्चला वेलायां कूले या वीचयस्ता एव बाहवो यस्य स तथोक्तः । 'वेला कूलविकारयोः' इति शाश्वतः । पयोधिः स्फुरन्तीमुल्लसन्तीं हर्षात्स्पन्दमानां च भुवं प्रियमिष्टं भारावतारणरूपं कथयिष्यन्निव । कथयितुमिवेत्यर्थः । 'लृट् शेषे च' इति चकारात्क्रियाऽर्थायां क्रियायां लृट् । आलिलिङ्ग । सर्वं चेदं शिवं दैवकार्यप्रवृत्तत्वादस्येति भावः । अत्र विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वात्समासोक्तिरलङ्कारः । तत्र चाप्रस्तुतयोर्भूमिसमुद्रयोः प्रतिपन्नाभ्यां नायकाभ्यां भेदेऽभेदलक्षणातिशयोक्तिवशादालिङ्गनोक्तिरिति रहस्यम् । एवमतिशयोक्त्यनुप्राणिता समासोक्तिः । प्रियकथनात्स्नेहमुज्जीवयति तदङ्गभावं भजत इत्युभयोरङ्गाङ्गिभावेन सङ्करः इति विवेचनीयम् ॥ ६० ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां–घण्टापथसमाख्यायां तृतीयः सर्गः समाप्तः ॥

(भा०) अनुजगुरिति । अथार्जुनगमनोत्तरम् आशा दिशः, दिव्यं स्वर्गीयं दुन्दुभिध्वानं दुन्दुभिशब्दम् अनुजगुरनुदध्वनु , व्योम्न्याकाशे सुरकुसुमनिपातैर्देवपुष्पवृष्टिभिः, लक्ष्मीः शोभा वितेने बभूव । किञ्च–अनिभृतवेलावीचिबाहुश्चञ्चलकूलतरङ्गभुजः पयोधिः समुद्रः स्फुरन्तीम् उल्लसन्तीं भुवं पृथिवीं प्रियम् इष्टं भारावतारणरूपं कथयिष्यन्निव कथयितुमिव, आलिलिङ्गाशिश्लेष । इष्टकार्यसाधनाय गतमर्जुनं वीक्ष्य सर्वे हर्षं प्रापुरिति भावः । उत्प्रेक्षाऽतिशयोक्त्यनुप्राणितसमासोक्त्योरङ्गाङ्गिभावेन साङ्कर्यम्॥६०॥

इति तृतीयः सर्गः ॥ ३ ॥

अथ चतुर्थः सर्गः।

ततः स कूजत्कलहंसमेखलां सपाकसस्याहितपाण्डुतागुणाम्।
उपाससादोपजनं जनप्रियः प्रियामिवासादितयौवनां भुवम्॥ १॥

अन्वय.—ततः, जनप्रियः, स, कूजत्कलहंसमेखलाम्, सपाकसस्याहितपाण्डुतागुणाम्, भुवम्, असादितयौवनाम्, प्रियाम्, इव, उपजनम्, आससाद॥ १॥

तत इति॥ ततः प्रस्थानान्तरं जनप्रिय सोऽर्जुनः। कलहंसा मेखला इवेत्युपमितसमास। अन्यत्र कलहंसा इव मेखलेति विशेषणसमास.। कूजन्ती कलहंसमेखला यस्यास्ताम्। सह पाकेन वर्तन्त इति सपाकानि सस्यानि तैः सस्यैराहितः संपादितः पाण्डुतेव गुणो यस्यास्तां भुवमासादितयौवनां प्राप्तयौवनां प्रियामिव। उपजनं जनसमीप। अन्यत्र सखीसमक्षम्। समीपार्थेऽव्ययीभाव। उपाससादोपगतवान्। उपमालङ्कारः॥ १॥

विनम्रशालिप्रसवौघशालिनीरपेतपङ्काः ससरोरुहाम्भसः।
ननन्द पश्यन्नुपसीम स स्थलीरुपायनीभूतशरद्गुणश्रियः॥२॥

अन्वय —सः, विनम्रशालिप्रसवौघशालिनीः, अपेतपङ्का, ससरोरुहाम्भस, उपायनीभूतशरद्गुणश्रियः, उपसीम, स्थली, पश्यन्, ननन्द॥ २॥

विनम्रेति॥ सोऽर्जुनो विनम्रशालिप्रसवौघशालिनीरवनतशालिफलस्तोमशोभिनारपेतपङ्का निष्पङ्काः ससरोरुहाण्यम्भांसि यासु तास्तथोक्ताः उपायनीभूता अर्जुनं प्रत्युपहारीभूताः शरद्गुणश्रियः पूर्वोक्ता शरद्धर्मसंपदो यासु ताः। उपसीम ग्रामसीमासु। विभक्त्यर्थेऽव्ययीभावः। समासान्तविधेरनित्यत्वात् 'अनश्च' इति समासान्तो न भवति। केचित्तु-'अप्यन्येषां कठिनवपुषां दुर्गमे ग्रामसीम्नि' इत्यादौ नपुंसकप्रयोगदर्शनात् 'नपुंसकादन्यतरस्याम्' इति विकल्पात्साधुरित्याहुः। स्थलिरकृत्रिमा भुवः। 'जानपद-' इत्यादिना अकृत्रिमार्थे ङीष्। पश्यन्ननन्द जहर्ष। अत्र शरद्गुणेषु तादात्म्येनारोप्यमाणस्योपायनस्य प्रकृते नन्दनक्रियोपयोगित्वात्परिणामालङ्कार॥ २॥

निरीक्ष्यमाणा इव विस्मयाकुलैः पयोभिरुन्मीलितपद्मलोचनैः।
हृतप्रियादृष्टिविलासविभ्रमा मनोऽस्य जह्रुः शफरीविवृत्तयः॥३॥

अन्वयः—विस्मयाकुलैः, उन्मीलितपद्मलोचनैः, पयोभिः, निरीक्ष्यमाणाः, इव, स्थिताः, हृतप्रियादृष्टिविलासविभ्रमाः, सफरीविवृत्तयः, अस्य, मनः, जह्रुः॥ ३॥

निरीक्ष्यमाणा इति॥ विस्मयाकुलैराश्चर्यरसाविष्टैरतएवोन्मीलितानि पद्मानीव

लोचनानि येषां तैः पयोभिरम्भोभिर्निरीक्ष्यमाणा इव स्थिताः। हृतः प्रियादृष्टिविलासानां विभ्रमः शोभा याभिस्तास्तथोक्ता इति मनोहरणे हेतूक्तिः। 'विभ्रमः संशये भ्रान्तौ शोभायां च' इति वैजयन्ती। शफरीविवृत्तयो मत्स्यीस्फुरितान्यस्यार्जुनस्य मनो जह्रुः॥ ३॥

तुतोष पश्यन्कलमस्य सोऽधिकं सवारिजे वारिणि रामणीयकम्।
सुदुर्लभे नार्हति कोऽभिनन्दितुं प्रकर्षलक्ष्मीमनुरूपसंगमे॥४॥

अन्वयः—सः, सवारिजे, वारिणि, कलमस्य, रामणीयकम्, पश्यन्, अधिकं, तुतोष, (तथाहि) सुदुर्लभे, अनुरूपसङ्गमे, (लब्धे, सति) प्रकर्षलक्ष्मीम्, अभिनन्दितुं, कः, न, अर्हति॥ ४॥

तुतोषेति॥ सोऽर्जुनः सवारिजे साम्बुजे वारिणि कलमस्य शालिविशेषस्य। 'शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमी' इत्यमरः। रमणीयस्य भावो रामणीयकम्। 'योपधाद्गुरूपोत्तमाद्वुञ्'। तत्पश्यन्नधिकं तुतोष। अनुरूपसंगमादिति भावः। तथाहि। सुदुर्लभेऽनुरूपसंगमे योग्यसमागमे लब्धे सतीति शेषः। प्रकर्षलक्ष्मीं योग्यसमागमननिमित्तामुत्कर्षसम्पदमभिनन्दितुं स्तोतुं को नार्हति। सर्वोऽप्यभिनन्दत्येवेत्यर्थः। *सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः॥ ४॥*

नुनोद तस्य स्थलपद्मिनीगतं वितर्कमाविष्कृतफेनसंतति।
अवाप्तकिञ्जल्कविभेदमुच्चकैर्विवृत्तपाठीनपराहतं पयः॥ ५॥

अन्वयः—आविष्कृतफेनसन्तति, अवाप्तकिञ्जल्कविभेदम्, उच्चकैः (यथा तथा) विवृत्तपाठीनपराहतं, पयः तस्य, स्थलपद्मिनीगतम्, वितर्कं, नुनोद॥ ५॥

नुनोदेति॥ आविष्कृता प्रकटीकृता फेनसन्ततिर्डिण्डीरसमूहो यस्य तत्तथोक्तम्। 'डिण्डीरोऽब्धिकफः फेनः' इत्यमरः। अवाप्त किञ्जल्कविभेद केसरोपगमो येन तत्तथोक्तम्। कुतः। उच्चकैरुच्चैः यथा तथा विवृत्तेन लुठितेन पाठीनेन मत्स्यविशेषेण पराहतं ताडितम् 'सहस्रदंष्ट्रः पाठीनः' इत्यमरः। पयः कर्तृ तस्यार्जुनस्य स्थलपद्मिनीगतम्। तद्गोचरमित्यर्थः। वितर्कं संशयं नुनोद चिच्छेद। पाठीनपराहतया किञ्जल्कापायेन जलदर्शनात्स्थलपद्मिनीशङ्का निवृत्तेत्यर्थः। अत्र निश्चयोत्तरसंदेहालङ्कारः॥

कृतोर्मिरेखं शिथिलत्वमायता शनैः शनैः शान्तरयेण वारिणा।
निरीक्ष्य रेमे स समुद्रयोषितां तरङ्गितक्षौमविपाण्डु सैकतम्॥६॥

अन्वयः—सः, शिथिलत्वम्, आयता, शनैः शनैः शान्तरयेण, वारिणा, कृतोर्मिरेखं, तरङ्गितक्षौमविपाण्डु, समुद्रयोषितां, सैकतं, निरीक्ष्य, रेमे॥ ६॥

कृतेति॥ सोऽर्जुनः शिथिलत्वमायता गच्छता। दिने दिने क्षीयमाणेनेत्यर्थः।

अतएव शनैः शनैः शान्तरयेण। अन्यथोर्मिरेखानुदयादिति भावः। वारिणा कृता ऊर्मयः पर्वाण्येव रेखा राजयो यस्य तत्तथोक्तम्। तरङ्गा अस्य संजातास्तरङ्गितं भङ्गितम्। 'तदस्य संजातं-' इतीतच्। यत्क्षौमं दुकूलं तद्वद्विपाण्डु शुभ्रमित्युपमालङ्कारः। समुद्रयोषितां नदीनाम्। सिकतास्यास्तीति सैकतं पुलिनम्। 'सिकताशर्कराभ्यां च' इत्यण्प्रत्ययः। 'तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम्' इत्यमरः। निरीक्ष्य रेमे तुतोष॥ ६॥

ततस्त्रिभिः शालिगोप्त्रीं वर्णयति—

मनोरमं प्रापितमन्तरं भ्रुवोरलंकृतं केसररेणुनाणुना।
अलक्तताम्राधरपल्लवश्रिया समानयन्तीमिव बन्धुजीवकम्॥७॥

अन्वयः—अणुना, केसररेणुना, अलङ्कृतं मनोरमं, भ्रुवो, अन्तरं, प्रापितं, बन्धुजीवकम्, अलक्तताम्राधरपल्लवश्रिया, समानयन्तीम्, इव॥ ७॥

मनोरममिति॥ अणुना सूक्ष्मेण केसरेषु किञ्जल्केषु। 'किञ्जल्कः केसरोऽस्त्रियाम्' इत्यमरः। यो रेणुः परागस्तेनालंकृतमतएव मनो रमयतीति मनोरमम्। 'कर्मण्यण्' इत्यण्। भ्रुवोरन्तरं प्रापितं भ्रूमध्ये निवेशितं बन्धुजीवकं बन्धूकपुष्पम्। 'बन्धूको बन्धुजीवकः' इत्यमरः। अलक्तताम्रस्य लाक्षारागरक्तस्याधरपल्लवस्य श्रिया शोभया समानयन्तीं समीकुर्वतीमिव। साम्यपरीक्षां कुर्वतीमिवेत्यर्थः। उत्प्रेक्षालङ्कारः॥ ७॥

नवातपालोहितमाहितं मुहुर्महानिवेशौ परितः पयोधरौ।
चकासयन्तीमरविन्दजं रजः परिश्रमाम्भःपुलकेन सर्पता॥८॥

अन्वयः—महानिवेशौ पयोधरौ, परितः, मुहुः, आहितं, नवातपालोहितम्, अरविन्दजं, रजः, सर्पता, परिश्रमाम्भःपुलकेन, चकासयन्तीम्॥ ८॥

नवेति॥ महान्निवेशः स्थानं ययोस्तौ महानिवेशौ। पीवरावित्यर्थः। पयोधरौ परितः। स्तनयोः समन्तादित्यर्थः। 'अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि' इति द्वितीया। मुहुराहितं नवातपालोहितं बालातपताम्रमरविन्दजं रजः परागं सर्पता प्रसरता परिश्रमाम्भःपुलकेन स्वेदोद्भेदेन चकासयन्तीं शोभयन्तीम्। चकास्तेर्ण्यन्ताच्छतरि ङीप्। अलङ्करणं कुर्वतीम्। तत्रापि विकृततेति भावः॥ ८॥

कपोलसंश्लेषि विलोचनत्विषा विभूषयन्तीमवतंसकोत्पलम्।
सुतेन पाण्डोः कलमस्य गोपिकां निरीक्ष्य मेने शरदः कृतार्थता॥९॥

अन्वयः—कपोलसंश्लेषि, अवतंसकोत्पलं, विलोचनत्विषा, विभूषन्तीं, कलमस्य, गोपिकां, निरीक्ष्य, पाण्डोः, सुतेन, शरदः, कृतार्थता, मेने॥ ९॥

कपोलेति ॥ पुनः कपोलसंश्लेषि यद्वतंसकोत्पलं कर्णोत्पलं तद्विलोचनत्विषा विभूषयन्तीम् । आभरणस्याप्याभरणमिति भावः । कलमं गोपायतीति गोपिकां शालिगोप्त्रीम् । ण्वुल्प्रत्ययः । निरीक्ष्य पाण्डोः सुतेनार्जुनेन । शरद् कृतार्थाया भावः कृतार्थता साफल्यम् । शरदः स्वगुणसम्पत्सिद्धिनियोगलाभादिति भावः । 'त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः' । मेनेऽमानि । मन्यतेः कर्मणि लिट् ॥ ९ ॥

उपारताः पश्चिमरात्रिगोचरादपारयन्तः पतितुं जवेन गाम् ।
तमुत्सुकाश्चक्रुरवेक्षणोत्सुकं गवां गणाः प्रस्नुतपीवरौधसः ॥१०॥

अन्वयः—पश्चिमरात्रिगोचराद्, उपारताः, जवेन, गां, पतितुम्, अपारयन्तः, प्रस्नुतपीवरौधसः, उत्सुकाः, गवां, गणाः, तम्, अवेक्षणोत्सुकं, चक्रुः ॥ १० ॥

उपारता इति ॥ पश्चिमा चासौ रात्रिश्चेति विशेषणसमासः । अपररात्र इत्यर्थः । 'पूर्वा दिक्पश्चिमं नभः' इत्यादिवदेकदेशिशब्दस्यैकदेशशब्दसमानाधिकरण्यादेकदेशे पर्यवसानम्, ननु पश्चिमं रात्रेरित्येकदेशिसमासः । तद्विधायके पूर्वापरादिसूत्रे पश्चिमशब्दाग्रहणात् । अतएव 'अहः सर्वैकदेश–' इत्यादिना न समासान्तोऽपि । तस्यापि पूर्वापरादिसूत्रोक्तसमासविषयत्वादिति । प्रकाशवर्षस्तु एकदेशिसमासमेवाश्रित्य समासान्तमाह तन्मृग्यम् । गावश्चरन्त्यत्रेति गोचरो गवां जग्धिस्थानं वनम् । पश्चिमरात्रौ यो गोचरस्तस्मादुपारताः संनिवृत्ता जवेन गां भुवं पतितुं धावितुमपारयन्तोऽशक्नुवन्तः प्रस्नुतपीवरौधसो वत्सस्मरणात्स्नवत्पीनापीनाः । 'ऊधस्तु क्लीबमापीनम्' इत्यमरः । 'ऊधसोऽनङ्' इति स्त्रीग्रहणं कर्तव्यमिति नियमान्नानङादेशः । उत्सुका वत्सेषूत्कण्ठिता गवां गणास्तमर्जुनमवेक्षणोत्सुकं दर्शनलालसं चक्रुः । 'स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले । लक्ष्यदृष्ट्या स्त्रियां पुंसि गौः' इत्युभयत्राप्यमरः । अत्र स्वभावोक्तिरलङ्कारः—'स्वभावोक्तिरलङ्कारो यथावद्वस्तुवर्णनम्' इति लक्षणात् ॥

परीतमुक्षावजये जयश्रिया नदन्तमुच्चैः क्षतसिन्धुरोधसम् ।
ददर्श पुष्टिं दधतं स शारदीं सविग्रहं दर्पमिवाधिपं गवाम् ॥११॥

अन्वयः—सः, उक्षावजये, जयश्रिया, परितम्, उच्चैः, नदन्तं, क्षतसिन्धुरोधसं, शारदीं, पुष्टिं, दधतं, गवाम्, अधिपं, सविग्रहं, दर्पम्, इव, ददर्श ॥ ११ ॥

परितमिति ॥ सोऽर्जुन उक्षावजये उक्षान्तरभङ्गे सति जयश्रिया परीतं वेष्टितमुच्चैर्नदन्तं क्षतसिन्धुरोधसं रुग्णसरित्तटं शरदि भवां शारदीं पुष्टिमवयवोपचयं दधतं गवामधिपं महोक्षं सविग्रहं मूर्तिमन्तम् । 'कायो देहः क्लीबपुंसोः शरीरं वर्ष्म विग्रहः' इत्यमरः । दर्पमिवेत्युत्प्रेक्षा । ददर्श ॥ ११ ॥

विमुच्यमानैरपि तस्य मन्थरं गवां हिमानीविशदैः कदम्बकैः ।
शरन्नदीनां पुलिनैः कुतूहलं गलद्दुकूलैर्जघनैरिवादधे ॥१२॥

अन्वय—हिमानीविशदैः, गवां, कदम्बकैः, मन्थरं, विमुच्यमानैः, अपि, शरन्नदीनां, पुलिनैः, गलद्दुकूलैः, जघनैः, इव, तस्य, कुतूहलम्, आदधे ॥ १२ ॥

विमुच्यमानैरिति ॥ हिमानीविशदैर्हिमसंघातशुभ्रैः । 'हिमानी हिमसंहतिः' इत्यमरः । 'इन्द्रवरुण–' इत्यादिनाङीष् । तत्संनियोगादानुगागमश्च । गवां कदम्बकैः कर्तृभिः । 'कदम्बकं समूहे श्रीफले पुष्पविशेषके' इत्यमरः । मन्थरं मन्दं विमुच्यमानैरपि किमुताविमुच्यमानैरिति भावः । शरन्नदीनां सम्बन्धिभिः । शरद्ग्रहणं प्रावृण्निवृत्त्यर्थं तत्र पुलिनादर्शनादिति भावः । पुलिनैः कर्तृभिः गलद्दुकूलैर्जघनैरिव तस्यार्जुनस्य कुतूहलं कौतुकमादधे आहितम् ॥ १२ ॥

गतान्पशूनां सहजन्मबन्धुतां गृहाश्रयं प्रेम वनेषु बिभ्रतः ।
ददर्श गोपानुपधेनु पाण्डवः कृतानुकारानिव गोभिरार्जवे ॥१३॥

अन्वय—पाण्डवः, पशूनां, सहजन्मबन्धुतां, गतान्, गृहाश्रयं, प्रेम, वनेषु, बिभ्रतः, आर्जवे, गोभिः, कृतानुकारान्, इव, (स्थितान्) गोपान्, उपधेनु, ददर्श ॥ १३ ॥

गतानिति ॥ पाण्डवोऽर्जुनः पशूनां गवाम् । सह जन्म येषां ते सहजन्मानः सोदरास्त एव बन्धवस्तेषां भावस्तत्ता तां गतान् । पशुषु सोदराभिमानवत इत्यर्थः । गृहाश्रयं गृहविषयं प्रेम वनेषु बिभ्रतः । वनेषु गृहाभिमानिन इत्यर्थः । आर्जवे विधेयत्वे गोभिः पशुभिः कृतानुकाराननुकृतानिव स्थितानित्युत्प्रेक्षा । ततो विधेयानित्यर्थः । गाः पान्तीति गोपा गोपालकाः । 'आतोऽनुपसर्गे कः' इति कप्रत्ययः । तानुपधेनु धेनुसमीपे । समीपार्थेऽव्ययीभावः ददर्श । अत्रोत्प्रेक्षानुप्राणिता स्वभावोक्तिरलङ्कारः ॥

अथ चतुर्भिर्बल्लवीनर्तकीसाम्येन वर्णयति—

परिभ्रमन्मूर्धजषट्पदाकुलैः स्मितोदयादर्शितदन्तकेसरैः ।
मुखैश्चलत्कुण्डलरश्मिरञ्जितैर्नवातपामृष्टसरोजचारुभिः ॥१४॥

अन्वय—परिभ्रमन् मूर्धजषट्पदाकुलैः, स्मितोदयादर्शितदन्तकेसरैः, चलत्कुण्डलरश्मिरञ्जितैः, नवातपामृष्टसरोजचारुभिः, मुखैः, (उपलक्षिता) ॥ १४ ॥

परिभ्रमदिति ॥ मूर्धजाः षट्पदा इवेत्युपमितसमासः । सरोजचारुभिरित्युपमानुसारात् । परिभ्रमद्भिश्चलद्भिर्मूर्धजैः षट्पदैराकुलानि तैः । दन्ताः केसरा इवेति पूर्ववत्समासः । स्मितोदयेनादर्शिता ईषत्प्रकाशिता दन्तकेसरा येषां तैस्तथोक्तैः । चलत्कु-

ण्डलाश्मरा अतश्चलकनककणत्वष्टनप्रभानुल्लसरत एव नवातपामृष्टं बलातपस्पृष्ट यत्स्परोजं तद्वच्चारुभिर्मुखैरुपलक्षिता ॥ १४ ॥

निबद्धनिःश्वासविकम्पिताधरा लता इव प्रस्फुरितैकपल्लवाः ।
व्यपोढपार्श्वैरपवर्तितत्रिका विकर्षणैः पाणिविहारहारिभिः ॥१५॥

अन्वयः—निबद्धनिःश्वासविकम्पिताधरा, प्रस्फुरितैकपल्लवाः, लताः, इव, व्यपोढपार्श्वैः, पाणिविहारहारिभिः, विकर्षणैः अपवर्तितत्रिकाः ॥ १५ ॥

निबद्धेति ॥ निबद्धेनानुरुद्धेन निःश्वासेन विकम्पिता अधरा यासां तास्तथोक्ताः । अतएव प्रस्फुरितकपल्लवा । प्रचलितैकपल्लवाः इत्यर्थः । 'क्वचित्संख्याशब्दस्य वृत्तिविषये वीप्सार्थत्वं सप्तपर्णादिवत्' इति कैयटः । लता इव स्थिताः । दैवादेकपल्लवस्फुरणस्यापि लोके सम्भवादुपमैवेयं नोत्प्रेक्षा । किच । व्यपोढानि विपरीतानि पार्श्वानि येषु तैः पाणिविहारहारिभि. पाणिविक्षेपमनोहरै. । 'अङ्गहारोऽङ्गविक्षेपः' इत्यमरः । विकर्षणैर्मन्थगुणाकर्षणैरपवर्तितत्रिकाः संचलितनितम्बाः । यद्यपि 'पृष्ठवंशाधरे त्रिकम्' इत्यमर, तथाप्यत्र नितम्बो लक्ष्यते तन्नैकट्यादिति भाव. ॥ १५ ॥

व्रजाजिरेष्वम्बुदनादशङ्किनीः शिखण्डिनामुन्मदयत्सु योषितः ।
मुहुः प्रणुन्नेषु मथां विवर्तनैर्नदत्सु कुम्भेषु मृदङ्गमन्थरम् ॥१६॥

अन्वयः—व्रजाजिरेषु, अम्बुदनादशङ्किनीः, शिखण्डिनाम्, योषित, उन्मदयत्सु, मथाम्, विवर्तनैः, मुहुः, प्रणुन्नेषु, कुम्भेषु, मृदङ्गमन्थरम्, नदत्सु ॥ १६ ॥

व्रजेति ॥ व्रजाजिरेषु गोष्ठप्राङ्गणेषु । अधिकरणे सप्तमी । 'व्रजो गोष्ठाध्ववृन्देषु' इति विश्वः । अम्बुदनादशङ्किनीर्गर्जितभ्रमवतीरिति भ्रान्तिमदलङ्कारः । शिखण्डिनां योषितो मयूराः । योषिद्ग्रहणं मौग्ध्यातिशयार्थम् । उन्मदयत्सून्मदा. कुर्वत्सु । 'तत्करोति–' इति ण्यन्ताच्छतृप्रत्ययः । मथां मन्थनदण्डानाम् । 'वैशाखमन्थमन्थानमन्थानो मन्थदण्डके' इत्यमरः । विवर्तनै परिभ्रमणैर्मुहु. प्रणुन्नेषु कम्पितेष्विति स्वभावोक्तिः । कुम्भेषु कलशेषु मृदङ्गवन्मन्थरं मन्दं नदत्सु सत्स्विति वाद्यसाम्योक्तिः । भावलक्षणे सप्तमीयम् ॥ १६ ॥

स मन्थरावल्गितपीवरस्तनीः परिश्रमक्लान्तविलोचनोत्पलाः ।
निरीक्षितुं नोपरराम बल्लवीरभिप्रनृत्ता इव वारयोषितः ॥१७॥

अन्वयः—स., मन्थरावल्गितपीवरस्तनी., परिश्रमक्लान्तविलोचनोत्पलाः, बल्लवाः अभिप्रनृत्ताः, वारयोषितः, इव, निरीक्षितुम्, न, उपरराम ॥ १७ ॥

स इति ॥ मन्थरं मन्दमावल्गिताश्चञ्चलाः पीवराः स्तना यासां तास्तथोक्ताः ।

'स्वङ्गाच्चोपसर्जनादसंयोगोपधात्' इतिङीष् । परिश्रमेण क्लान्तानि ग्लानानि विलोचनोत्पलानि यासां तास्तथोक्ता बल्लवीर्गोपी । 'गोपे गोपालगोसङ्ख्यगोधुगाभीरबल्लवाः' इत्यमरः । अभिप्रनृत्ता नृत्यन्तीः । 'गत्यर्थाकर्मक-' इत्यादिना कर्तरि क्तः । 'मतिबुद्धिपूजार्थेभ्यश्च' इति चकाराद्वर्तमानार्थत्वम् । वारयोषितो वेश्या इव । 'वारस्त्री गणिका वेश्या' इत्यमरः । सोऽर्जुनो निरीक्षितुम् । ईक्षतेस्तुमुन् । नोपरराम न विरमति स्म । 'उपाच्च' । 'विभाषाकर्मकात्' इति परस्मैपदम् । अत्र चतु श्लोक्यामुपमास्वभावोक्त्योः संसृष्टिः ॥ १७ ॥

पपात पूर्वां जहतो विजिह्मतां वृषोपभुक्तान्तिकसस्यसम्पदः ।
रथाङ्गसीमन्तितसान्द्रकर्दमान्प्रसक्तसंपातपृथक्कृतान्पथः ॥१८॥

अन्वयः—(स) पूर्वाम्, विजिह्मताम्, जहतः, वृषोपभुक्तान्तिकसस्यसंपदः, रथाङ्गसीमन्तितसान्द्रकर्दमान्, प्रसक्तसंपातपृथक्कृतान्, पथ (पपात) ॥ १८ ॥

पपातेति । सोऽर्जुन पूर्वां प्रावृषेण्यां विजिह्मतां वक्रतां जहतस्त्यजत । शरदि निष्पङ्कत्वेन समरेखत्वस्यैव सुगमत्वादिति भाव । जहातेः शतृप्रत्यय । वृषोपभुक्तान्तिकसस्यसंपदो वृषभचर्वितप्रान्तसस्यसमृद्धीन् । 'सुकृते वृषभे वृषः' इत्यमर । सीमन्ता इव सीमन्ताश्चक्राङ्कपद्धतय सीमन्तवन्तः कृताः सीमन्तिताः । मत्वन्तात् 'तत्करोति' इति णिचि क्तः । णाविष्ठवद्भावान्मतुपो लुक् । रथाङ्गैश्चक्रैः सीमन्तिता सान्द्राःकर्दमा घनीभूताः पङ्का येषु तान्प्रसक्तसंपातेन संततसंचारेण पृथक्कृतान्पथो मार्गान्पपात जगामेति स्वभावोक्ति. ॥ १८ ॥

जनैरुपग्राममनिन्द्यकर्मभिर्विविक्तभावेङ्गितभूषणैर्वृताः ।
भृशं ददर्शाश्रममण्डपोपमाः सपुष्पहासाः स निवेशवीरुधः॥१९॥

अन्वयः—स., उपग्रामम्, अनिन्द्यकर्मभिः, विविक्तभावेङ्गितभूषणैः, जनै, वृताः, आश्रममण्डपोपमाः, सपुष्पहासाः, निवेशवीरुध, भृशम्, ददर्श ॥ १९ ॥

जनैरिति । सोऽर्जुन उपग्रामं ग्रामेषु । विभक्त्यर्थेऽव्ययीभावः । अनिन्द्यकर्मभिरनिषिद्धवृत्तिभि. । वृत्तिश्चैकत्र कृष्यादिरन्यत्र शिलोञ्छादि । विविक्तान्येकाग्राणि भावोऽभिप्राय इङ्गितं चेष्टा भूषणमलङ्कारश्च येषां तैस्तथोक्तैर्जनैर्वृताः । अधिष्ठिता इत्यर्थः । अत एवाश्रमेषु मुनिस्थानेषु ये मण्डपास्तदुपमा । 'मण्डपोऽस्त्री जनाश्रय ' इत्यमर. । सपुष्पहासाः पुष्पविकाससहिताः । 'तेन सह-' इत्यादिना बहुव्रीहि । निवेशवीरुधो गृहगुल्मिनीः । 'वीरुधौ वल्लिगुल्मिन्यौ' इति वैजयन्ती । भृशंसादरं ददर्श । उपमाऽलङ्कारः ॥ १९ ॥

ततः स संप्रेक्ष्य शरद्गुणश्रियं शरद्गुणालोकनलोलचक्षुषम् ।

उवाच यक्षस्तमचोदितोऽपि गां न हीङ्गितज्ञोऽवसरेऽवसीदति २०

अन्वयः—ततः, सः, यक्षः, शरद्गुणश्रियम्, संप्रेक्ष्य, शरद्गुणालोकनलोलचक्षुषम्, तम्, अचोदिताः, अपि, गाम्, उवाच, हि, इङ्गितज्ञः, अवसरे, न, अवसीदति ॥२०॥

तत इति। ततः स पूर्वोक्तो यक्षः शरद्गुणश्रियं संप्रेक्ष्य। दर्शनीयां वर्णनीयां च विचार्येत्यर्थः। शरद्गुणालोकने लोलचक्षुषं सतृष्णदृष्टिम्। 'लोलश्चलसतृष्णयोः' इत्यमरः। तमर्जुनमचोदितोऽप्यपृष्टोऽपि गां वाचमुवाच। तथाहि। इङ्गितज्ञा-भावज्ञ.। 'इङ्गितं हृद्गतो भावः' इति विश्वः। अवसर उक्तियोग्ये काले नावसीदति न वाचं यच्छति। 'नापृष्टः कस्यचिद्ब्रूयात्' इति निषेधस्त्वनाकाङ्क्षितोक्तिविषय-इति भावः। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यास ॥ २० ॥

इयं शिवाया नियतेरिवायतिः कृतार्थयन्ती जगतः फलैः क्रियाः।
जयश्रियं पार्थ! पृथूकरोतु ते शरत्प्रसन्नाम्बुरनम्बुवारिदा ॥२१॥

अन्वय —हे पार्थ, शिवाया, नियतेः, आयतिः, इव, जगतः क्रियाः, फलैः, कृतार्थयन्ती, प्रसन्नाम्बु, अनम्बुवारिदा, इयम्, शरत्, ते, जयश्रियम्, पृथूकरोतु ॥ २१ ॥

इयमिति। हे पार्थ, शिवाया कल्याणकारिण्या नियतेः। 'दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः' इत्यमरः। शुभावहदैवस्यायति फलदानकाल सैव जगत. क्रिया कृष्यादिकर्माणि फलैर्लाभैः। 'लाभो निष्पत्तियोगेषु बीजभावे धने फलम्' इति वैजयन्ती। कृतार्थयन्ती सफलयन्ती प्रसन्नाम्बुर्निर्मलोदकाऽनम्बुवारिदा निर्जलमेघा। अनेन विशेषणद्वयेन द्यावापृथिव्योरानुकूल्यं सूचयति। इयं शरत्ते जयश्रियं पृथूकरोतु। आशीरर्थे लोट् ॥ २१ ॥

उपैति सस्यं परिणामरम्यता नदीरनौद्धत्यमपङ्कतां मही।
नवैर्गुणैः संप्रति संस्तवस्थिरं तिरोहितं प्रेम घनागमश्रियः ॥२२॥

अन्वयः—सस्यं, परिणामरम्यता, उपैति, नदीरनौद्धत्यम्, महीम्. अपङ्कताम्, उपैति (तथाहि) संप्रति, नवैर्गुणैः, संस्तवस्थिरम्, घनागमश्रियः, प्रेम, तिरोहितम्, ॥ २२ ॥

उपैतीति। सस्यं व्रीह्यादिकं परिणामेन परिपाकेन या रम्यता सोपैति। नदीरनौद्धत्यं रम्यरूपत्वमुपैति। मही चापङ्कतां निष्पङ्कत्वमुपैति। तथाहि। संप्रति नवैर्गुणैः पूर्वोक्तैः शरद्धर्मैः संस्तवेन परिचयेन स्थिरं दृढमपि घनागमश्रियः प्रावृड्लक्ष्म्याः संबन्धि। तद्विषयमित्यर्थः। प्रेमतिरोहितम्। निरर्थकं कृतमित्यर्थः। गुण-तन्त्राः प्रेमाणो न परिचयतन्त्रा इति भावः। वास्तवालङ्कारः ॥ २२ ॥

पतन्ति नास्मिन्विशदाः पतत्रिणो धृतेन्द्रचापा न पयोदपङ्क्तयः।

तथापि पुष्णाति नभः श्रियं परां न रम्यमाहार्यमपेक्षते गुणम् ॥२३॥

अन्वयः—अस्मिन्, विशदाः पतत्रिणः, न, पतन्ति, धृतेन्द्रचापाः, पयोदपङ्क्तयः, न पतन्ति, तथापि, नभः, पराम्, श्रियम्, पुष्णाति, रम्यम्, आहार्यम्, गुणम्, न, पेक्षते, ॥ २३ ॥

पतन्तीति ॥ अस्मिन्नभसि विशदाः पतत्रिणो बलाका न पतन्ति न प्रसरन्ति। धृतेन्द्रचापाः पयोदपङ्क्तयश्च न पतन्ति। तथापि श्रीकारणाभावेऽपि नभः परां श्रियं शोभां पुष्णाति। तथाहि। रम्यं स्वभावसुन्दरं वस्त्वाहार्यमारोप्यमाणं गुणं नापेक्षते। तत्र स्वभावस्यैव समर्थत्वादिति भावः। अर्थान्तरन्यासः ॥ २३ ॥

विपाण्डुभिर्म्लानतया पयोधरैश्च्युताचिराभागुणहेमदामभिः।
इयं कदम्बानिलभर्तुरत्यये न दिग्वधूनां कृशता न राजते ॥२४॥

अन्वयः—कदम्बभर्तुः, अत्यये, म्लानतया, विपाण्डुभिः, च्युताचिराभागुणहेमदामभिः, पयोधरैः, दिग्वधूनाम्, इयम्, कृशता, न, राजते, न, (किन्तु-राजते एव) ॥ २४ ॥

विपाण्डुभिरिति ॥ कदम्बानिलशब्देन वर्षर्तुरुपलक्ष्यते। स एवं भर्ता तस्यात्यये विरहे म्लानतया निर्जलतया दुर्बलतया च विपाण्डुभिश्च्युतानि रहितान्यचिराभागुणा विद्युलता एव हेमदामानि सुवर्णसूत्राभरणानि येभ्यस्तै पयोधरैरम्भोदैः, अन्यत्र स्तनैः। उपलक्षितानाम्। 'स्तनाम्भोदौ पयोधरौ' इति वैजयन्ती। दिश एव वध्वस्तासामियं कृशता न राजत इति न। किंतु न राजत एव वियुक्तत्वात्। 'आर्तार्ते मुदिते हृष्टा प्रोषिते मलिना कृशा' इति स्मरणादिति भावः। सामान्यतः प्रसक्तमराजनं कार्श्यस्यैकेन नञा संभाव्य द्वितीयेन निषेधति। यथाह वामनः—'संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ' इति। अत्र रूपकालङ्कारः स्फुट एव ॥ २४ ॥

विहाय वाञ्छामुदिते मदात्ययादरक्तकण्ठस्य रुते शिखण्डिनः।
श्रुतिः श्रयत्युन्मदहंसनिःस्वनं गुणाःप्रियत्वेऽधिकृता न संस्तवः॥२५॥

अन्वयः—मदात्ययादरक्तकण्ठस्य, शिखण्डिनः, उदिते, रुते, वाञ्छाम्, विहाय, श्रुतिः, उन्मदहंसनिःस्वनम्, श्रयति, प्रियत्वे, गुणाः, अधिकृताः, संस्तवः, न, ॥२५॥

विहायेति ॥ मदात्ययान्मदक्षयादरक्तकण्ठस्याश्राव्यस्वरस्य। कण्ठशब्देनात्र तद्गतः स्वरो लक्ष्यते। शिखण्डिनो मयूरस्य संबन्धिन्युदित उच्चैस्तरे रुते कूजिते वाञ्छां विहाय। श्रुतिः श्रोत्रम्। 'कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः' इत्यमरः। उन्मदहंसनिःस्वनं मत्तमरालकूजितं श्रयति भजते। नन्वकाण्डे परिचितपरिहारेणापरिचिते कथं प्रीत्युदय इत्याशङ्क्यार्थान्तरं न्यस्यति—गुणा इति।

प्रीणातीति प्रियः । 'इगुपधज्ञाप्रीकिरः कः' इति कप्रत्ययः । प्रियत्वे प्रीतिकरत्वे गुणा अधिकृता नियुक्ताः । संस्तवः परिचयो नाधिकृतो न समर्थः । प्रेमाधाने गुणवत्त्वं प्रयोजकं न परिचय इत्यर्थः ॥ २५ ॥

अमी पृथुस्तम्बभृतः पिशङ्गतां गता विपाकेन फलस्य शालयः ।
विकासि वप्राम्भसि गन्धसूचितं नमन्ति निघ्रातुमिवासितोत्पलम् २६

अन्वयः—अमी, पृथुस्तम्बभृतः, फलस्य, विपाकेन, पिशङ्गताम्, गताः शालयः, वप्राम्भसि, विकासि, गन्धसूचितम्, असितोत्पलम्, निघ्रातुम्, इव, नमन्ति ॥२६॥

अमो इति ॥ अमी पृथून्स्तम्बान्गुच्छान्बिभ्रतीति पृथुस्तम्बभृतः । 'स्तम्बो गुच्छस्तृणादिनः' इत्यमरः । फलस्य प्रसवस्य विपाकेन परिमाणेन पिशङ्गतां गताः शालयो व्रीहिविशेषा । वप्राम्भसि केदारोदके । 'पुंनपुंसकयोर्वप्रः केदारः क्षेत्रम्' इत्यमर । विकसतीति विकासि विकसितं गन्धेन सूचितं ज्ञापितमसितोत्पलं निघ्रातुमाघ्रातुमिव नमन्ति । 'निध्यातुमिव' इति पाठे द्रष्टुमित्यर्थः । निर्वर्णयितुं वा । 'निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्' इत्यमरः । अत्र फलभारान्नमनस्य निघ्राणफलकत्वमुत्प्रेक्ष्यत इति फलोत्प्रेक्षा ॥ २६ ॥

अथ चतुर्भिः कलापकमाह—

मृणालिनीनामनुरञ्जितं त्विषा विभिन्नमम्भोजपलाशशोभया ।
पयः स्फुरच्छालिशिखापिशङ्गितं द्रुतं धनुष्खण्डमिवाहिविद्विषः॥२७

अन्वय—मृणालिनीनाम्, त्विषा, अनुरञ्जितम्, अम्भोजपलाशशोभया विभिन्नम्, स्फुरच्छालिशिखापिशङ्गितम्, द्रुतम्, अहिविद्विष धनुष्खण्डम् इव, पयः ॥ २७ ॥

मृणालिनीनामिति ॥ मृणालिनीनां पद्मिनीनां त्विषा हरिद्वर्णेनानुरञ्जितम् तद्वर्णतामापादितमित्यर्थः । तथाम्भोजपलाशशोभया पद्मदलकान्त्या । आरुण्येनेत्यर्थः विभिन्नं मिश्रितम् । तथा स्फुरच्छालिशिखापिशङ्गित स्फुरद्भि कलमाग्रै पिङ्गलीकृतमित्थं नानावर्णत्वाद् द्रुतं पलायितमहिविद्विषो वृत्रशत्रोरिन्द्रस्य । 'स वृत्रासुरेऽप्यहिः' इति वैजयन्ती । धनुष्खण्डमिव स्थितम् । 'नित्यं समासेऽनुत्तरपदस्थस्य' इति विसर्जनीयस्य षत्वम् । पयो वप्राम्भोऽपदिश्य व्याजीकृत्य धावतामित्यागामिना संबन्धः । अत्र धनुष्खण्डस्य द्रुतस्य लोकेऽप्रसिद्धत्वादुत्प्रेक्षेयं नोपमा

विपाण्डु संव्यानमिवानिलोद्धतं निरुन्धतीः सप्तपलाशजं रजः ।
अनाविलोन्मीलितबाणचक्षुषः सपुष्पहासा वनराजियोषितः॥२८

अन्वयः—विपाण्डु, अनिलोद्धतम्, सप्तपलाशजम्, रजः, संव्यानम्, इ

निरुन्धतीः, अनाविलोन्मीलितबाणचक्षुषः, सपुष्पहासाः, वनराजियोषितः ॥ २८ ॥

विपाण्डुमिति ॥ विपाण्डु शुभ्रमनिलोद्धतमनिलोत्क्षिप्तम् । सप्त सप्त पलाशानि पत्राणि पर्वसु येषां ते वृक्षाः सप्तपलाशाः । 'क्वचित्सङ्ख्याशब्दस्य वृत्तिविषये वीप्सार्थत्वं सप्तपर्णादिव' इत्युक्तम् । तेषां पुष्पाणि सप्तपलाशानि । 'द्विहीनं प्रसवे सर्वम्' इत्यमरः । 'फले लुक्' इत्यणो लुक् । तेषु जातं सप्तपलाशजं रजः परागं संव्यानमुत्तरीयमिव । 'संव्यानमुत्तरीयं च' इत्यमरः । निरुन्धतीर्निवारयन्तीः । प्रावृतवतीरिति यावत् । अनाविलान्यकलुषाण्युन्मीलितानि च बाणानि नीलसैरेयकाणि चक्षूंषीव यासां तास्तथोक्ताः । 'नीलस्त्वर्थगलो दासी बाण ओदनपाक्यपि' इति धन्वन्तरिः । पुष्पाणि हासा इव तैः सह वर्तन्त इति सपुष्पहासाः । वनराजयो योषित इव वनराजियोषितः । ता अपदिश्येत्यन्वयः । अत्र संव्यानमिवेत्युपमैवान्यत्रोपमितसमासे लिङ्गम् । यथा काचित्केनचित्कामुकेनाक्षिप्तं स्तनांशुकं निरुन्धे तद्वदिति भावः ॥२८॥

अदीपितं वैद्युतजातवेदसा सिताम्बुदच्छेदतिरोहितातपम् ।
ततान्तरं सान्तरवारिसीकरैः शिवं नभोवर्त्म सरोजवायुभिः ॥२९॥

अन्वयः—वैद्युतजातवेदसा, अदीपितम्, सिताम्बुदच्छेदतिरोहितातपम्, सान्तरवारिसीकरैः, ततान्तरम्, सरोजवायुभिः, शिवम्, नभोवर्त्म ॥ २९ ॥

अदीपितमिति ॥ वैद्युतजातवेदसा वैद्युताग्निनाऽदीपितमप्रकाशितम् । विद्युत्प्रकाशस्य दृष्टिविघातकत्वात्तद्राहित्यं गुण इति भावः । सिताम्बुदानां छेदैः खण्डैस्तिरोहितातपम् । न दृष्टिबाधो नाप्यातपबाध इति भावः । सान्तरवारिसीकरैर्विरलाम्बुकणैस्ततान्तरं व्याप्तमध्यं सरोजवायुभिः शिवं रम्यं नभोवर्त्म चापदिश्येति । स्वभावोक्तिरलङ्कारः ॥२९ ॥

सितच्छदानामपदिश्य धावतां रुतैरमीषां ग्रथिताः पतत्रिणाम् ।
प्रकुर्वते वारिदरोधनिर्गताः परस्परालापमिवामला दिशः ॥३०॥

अन्वयः—अपदिश्य, धावताम्, अमीषाम्, सितच्छदानाम्, पतत्रिणाम्, रुतैः, ग्रथिताः, वारिदरोधनिर्गताः, अमलाः, दिशः, परस्परालापम्, प्रकुर्वते, इव ॥ ३० ॥

सितेति ॥ अपदिश्य धावतामिति पूर्वश्लोकत्रयोक्तं पयःप्रभृतिकमुद्दिश्य धावताममीषां सितच्छदानां पतत्रिणां हंसानाम् । 'हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः' इत्यमरः । रुतैः शब्दैर्ग्रथिता दृब्धाः । 'ग्रथितं गुम्फितं दृब्धम्' इत्यमरः । वारिदरोधनिर्गता मेघोपरोधनिर्मुक्ता अतएवामलाः प्रसन्ना दिशः परस्परालापं प्रकुर्वत इव । दिष्ट्या मेघोपरोधनिर्मुक्ताश्चिरादुच्छ्वसिता इति हंसकूजितव्याजेन परस्परमालपन्तीवेत्युत्प्रेक्षा ॥ ३० ॥

विहारभूमेरभिघोषमुत्सुकाः शरीरजेभ्यश्च्युतयूथपङ्क्तयः ।
असक्तमूधांसि पयःक्षरन्त्यमूरुपायनानीव नयन्ति धेनवः ॥३१॥

अन्वयः—विहारभूमेः, अभिघोषम्, उत्सुकाः, च्युतयूथपङ्क्तयः, अमूः, धेनवः, असक्तम्, पयः, क्षरन्ति, ऊधांसि, शरीरजेभ्यः उपायनानि, इव, नयन्ति ॥ ३१ ॥

विहारेति ॥ विहारभूमेः । अपराग्रगोचरादित्यर्थः । आगच्छन्त्य इति शेषः । अभिघोषमुत्सुका व्रजं प्रत्युत्कण्ठिताः । वत्सप्रेम्णेति भावः । 'घोष आभीरपल्ली स्यात्' इत्यमरः । च्युता त्रुटिता यूथानां कुलानां पङ्क्तिः श्रेणीबन्धो यासां तास्तथोक्ताः । 'सजातीयैः कुलं यूथम्' इत्यमरः । अमूर्धेनवोऽसक्तमप्रतिबन्धं पयः क्षीरं क्षरन्ति स्रवन्ति । वत्सस्मरणात्प्रस्नवन्तीत्यर्थः । क्षरतेः शतृप्रत्ययः । ऊधांसि शरीरजेभ्योऽपत्येभ्य उपायनानीवातितोषकारीणीवेत्युत्प्रेक्षा । नयन्ति प्रापयन्ति । यथा लोके कुतश्चित्प्रवासादेत्य मातरः किंचित्खाद्यमानयन्ति तद्वदिति भावः ॥ ३१ ॥

जगत्प्रसूतिर्जगदेकपावनी व्रजोपकण्ठं तनयैरुपेयुषी ।
द्युतिं समग्रां समितिर्गवामसावुपैति मन्त्रैरिव संहिताहुतिः ॥३२॥

अन्वयः—जगत्प्रसूतिः, जगदेकपावनी, व्रजोपकण्ठम्, तनयः, उपेयुषी, असौ, गवाम्, समितिः, मन्त्रैः, संहिताहुतिः, इव, समग्राम्, द्युतिम्, उपैति ॥ ३२ ॥

जगदिति ॥ जगत्प्रसूतिर्जगत्कारणम् । आज्यादिहविर्द्वारेणेति भावः । जगतामेकपावनी मुख्यशोधनी व्रजोपकण्ठं गोष्ठान्तिकम् । 'दूरान्तिकार्थेभ्यो द्वितीया च' इति द्वितीया । 'उपकण्ठान्तिकाभ्यर्णाभ्यग्राः' इत्यमरः । तनयैर्वत्सैरुपेयुषी संगता । 'उपेयिवाननाश्वाननूचानश्च' इति क्वसुप्रत्ययान्तो निपातः । 'उगितश्च' इति ङीप् । असौ गवां समितिः संहतिः । मन्त्रैर्ऋग्यजुषादिभिः । 'मन्त्रो ऋगादिगुह्योक्तिः—' इति वैजयन्ती । संहिता योजिताहुतिरिव । समग्रां द्युतिमुपैति । आहुतिरपि जगत्प्रसूतिर्जगदेकपावनी च । 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥' इति स्मरणादिति भावः ॥ ३२ ॥

कृतावधानं जितबर्हिणध्वनौ सुरक्तगोपीजनगीतनिःस्वने ।
इदं जिघत्सामपहाय भूयसीं न सस्यमभ्येति मृगीकदम्बकम् ॥३३॥

अन्वयः—जितबर्हिणध्वनौ, सुरक्तगोपीजनगीतनिःस्वने, कृतावधानम्, इदं, मृगीकदम्बकम्, भूयसीम्, जिघत्साम्, अपहाय, सस्यम्, न, अभ्येति ॥ ३३ ॥

कृतेति ॥ जितबर्हिणध्वनौ । केकानुकारिणीत्यर्थः । एतेन षड्जस्वरप्रायं गायन्तीति गम्यते । यथाह मातङ्गः—'षड्जं मयूरो वदति' इति । गाः पान्तीति गोपास्तेषां भार्या गोप्यः । 'आतोऽनुपसर्गे कः' इति कप्रत्ययः । 'पुंयोगादाख्यायाम्' इति

कीष्। ता एव जनः। सुरक्तो मधुरकण्ठो यो गोपीजनो बल्लवीजनस्तस्य गीतनिःस्वने गाने कृतावधानमेकाग्रचित्तमिदं पुरोवर्ति मृगीकदम्बकं कर्तृ भूयसीमतिमहतीं जिघत्सामत्तुमिच्छाम्। अदेः सन्नन्तादुप्रत्ययः। 'लुङ्सनोर्घस्लृ' इति घस्लादेशः। अपहाय हित्वा सस्यं नाभ्येति नोपैति। गीतासक्त्या क्षुधामपि न गणयतीत्यर्थः॥३३॥

असावनास्थापरयावधीरितः सरोरुहिण्या शिरसा नमन्नपि।
उपैति शुष्यन्कलमः सहाम्भसा मनोभुवा तप्त इवाभिपाण्डुताम्॥३४॥

अन्वयः—शिरसा, नमन्नपि, अनास्थापरया, सरोरुहिण्या, अवधीरितः सहाम्भसा शुष्यन्, असौ, कलमः, मनोभुवा, तप्त, इव, अभिपाण्डुताम्, उपैति॥ ३४॥

असाविति॥ शिरसाग्र्येण मूर्ध्ना च नमन्प्रणमन्नप्यनास्थापरयानादरपरया सरोरुहिण्यावधीरितोऽवज्ञातः। अम्भसा सह। शरभूतेनेति भावः। शुष्यन्नसौ कलमः शालिविशेषः। मनोभुवा तप्त इव कामार्त इव। अभिपाण्डुतामुपैति। अत्रानास्थापरयेति प्रकृतसरोरुहिणीविशेषसामर्थ्यादप्रस्तुतनायिकाप्रतीतेः समासोक्तिः। उत्तिष्ठमानायाः सरोरुहिण्याः प्रतीयमानया नायिकया शुद्धभेदेऽप्यभेदलक्षणातिशयोक्तिमहिम्नावधीरणक्रियासम्बन्धान्निर्वहन्ती मनोभुवा तप्त इवेत्युत्प्रेक्षानिर्वाहिकेत्यतिशयोक्त्यनुप्राणितसमासोक्त्युपमयोरङ्गाङ्गिभावेन सङ्करः॥ ३४॥

अमी समुद्धूतसरोजरेणुना हृता हृतासारकणेन वायुना।
उपागमे दुश्चरिता इवापदां गतिं न निश्चेतुमलं शिलीमुखाः॥३५॥

अन्वयः—समुद्धूतसरोजरेणुना, हृतासारकणेन, वायुना, हृता अमी, शिलीमुखाः, आपदाम्, उपागमे, दुश्चरिताः, इव, गतिम्, निश्चेतुम्, नालम्, ॥ ३५॥

अमी इति॥ समुद्धूतसरोजरेणुनेति सौरभ्योक्तिः। हृतासारकणेनोपात्ताम्बुकणेनेति शैत्योक्तिः। 'धारासम्पात आसारः' इत्यमरः॥ वायुना हृता आकृष्टा अमी शिलीमुखा भृङ्गाः। आपदामुपागमे राजादिभयागमे दुश्चरिता दुष्टकर्माणश्चौरादय इव। गम्यत इति गतिं गन्तव्यदेशम्। 'देशोपायगमे गतिः' इति वैजयन्ती। निश्चेतुं नालं न समर्थाः। एकत्र वायोः सार्वत्रिकत्वेनोपादानादनिश्चयादन्यत्र भयान्धत्वादिति भावः॥ ३५॥

मुखैरसौ विद्रुमभङ्गलोहितैः शिखाः पिशङ्गीः कलमस्य बिभ्रती।
शुकावलिर्व्यक्तशिरीषकोमला धनुःश्रियं गोत्रभिदोऽनुगच्छति॥३६॥

अन्वयः—विद्रुमभङ्गलोहितैः, मुखैः, पिशङ्गीः, कलमस्य, शिखाः बिभ्रती, व्यक्तशिरीषकोमला, असौ, शुकावलिः, गोत्रभिदः, धनुःश्रियम्, अनुगच्छति॥ ३६॥

मुखैरिति॥ विद्रुमभङ्गलोहितैर्मुखैः पिशङ्गीः पिशङ्गवर्णाः कलमस्य शिखाः शाल्य-

माणि बिभ्रती व्यक्तशिरीषकोमला विकसितशिरीषसवर्णासौ शुकावलिर्गोत्रभिद इन्द्रस्य धनुषः श्रियमनुगच्छत्यनुकरोति । नानावर्णत्वादिन्द्रधनुरिवाभातीत्युपमालङ्कारः ॥ ३६ ॥

इति कथयति तत्र नातिदूरादथ ददृशे पिहितोष्णरश्मिबिम्बः ।
विगलितजलभारशुक्लभासां निचय इवाम्बुमुचां नगाधिराजः॥३७॥

अन्वयः—अथ, तत्र, इति, कथयति, (सति) नातिदूरात्, पिहितोष्णरश्मिबिम्बः, नगाधिराज, विगलितजलभारशुक्लभासाम्, अम्बुमुचाम्, निचय, इव, ददृशे ॥ ३७ ॥

इतीति ॥ तत्र तस्मिन्पूर्वोक्ते यक्ष इतीत्थं कथयति सति नातिदूरादनतिदूरात् । ईषद्दूर इत्यर्थः । नञर्थस्य नशब्दस्य सुप्सुपेति समासः । पिहितोष्णरश्मिबिम्बस्तिरोहितार्कमण्डल इत्यौन्नत्योक्तिः । नगाधिराजो हिमाद्रिर्विगलितो जलभारो येषां ते तथोक्ताः । अतएव शुक्लभासः । द्वयोरन्यतरस्य विशेष्यत्वविवक्षया विशेषणसमासः। तेषां विगलितजलभारशुक्लभासां शुभ्राणामम्बुमुचां निचय इव मेघवृन्दमिव ददृशे दृष्टः ॥ ३७ ॥

तमतनुवनराजिश्यामितोपत्यकान्तं
नगमुपरि हिमानीगौरमासाद्य जिष्णुः ।
व्यपगतमदरागस्यानुसस्मार लक्ष्मी-
मसितमधरवासो बिभ्रतः सीरपाणेः ॥ ३८ ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये चतुर्थः सर्गः ।

अन्वयः—जिष्णुः, अतनुवनराजिश्यामितोपत्यकान्तम्, तम्, उपरि, हिमानीगौरम्, नगम्, आसाद्य, व्यपगतमदरागस्य, असितम्, अधरवासः, बिभ्रत, सीरपाणेः, लक्ष्मीम्, अनुसस्मार ॥ ३८ ॥

तमिति ॥ जिष्णुरर्जुनोऽतनुभिर्महतीभिर्वनराजिभिः श्यामिताः श्यामला उपत्यकान्ता आसन्नभूमिप्रदेशा यस्य तं तथोक्तम्। 'उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका' इत्यमरः। 'उपाधिभ्यां त्यकन्नासन्नारूढयोः' इति त्यकन्प्रत्ययः। उपरि हिमानीभिर्हिमसङ्घातैर्गौरं शुभ्रं नगं हिमाद्रिमासाद्य । व्यपगतो निवृत्तो मदरागो यस्य तस्य । असितं नीलमधरं वास उत्तरीयं बिभ्रतो धृतवतः । सीरं हलं पाणौ यस्य तस्य सीरपाणेर्हलायुधस्य । 'हलायुधः । नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली । सङ्कर्षणः सीरपाणिः' इत्यमरः । 'सप्तमीविशेषणे-' इति ज्ञापकाद्व्यधिकरणपदो

बहुव्रीहिः। 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ स्तः' इति सप्तम्याः परनिपातः। लक्ष्मीं शोभामनुसस्मार स्मृतवान्। अत्र सदृशदर्शनेन सदृशान्तरस्य स्मरणात्स्मरणालङ्कारः 'सदृशं सदृशानुभवाद्यत्र स्मर्यते तत्स्मरणम्' इति विद्याधरः॥ ३८॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां–घण्टापथसमाख्यायां चतुर्थः सर्गः समाप्तः।

पञ्चमः सर्गः।

अथ हिमवद्वर्णनमारभते। तत्र पञ्चदशभिः कुलकमाह—

अथ जयाय नु मेरुमहीभृतो रभसया नु दिगन्तदिदृक्षया।
अभिययौ स हिमाचलमुच्छ्रितं समुदितं न विलङ्घयितुं नभः॥१॥

अन्वयः—अथ, स, मेरुमहीभृतः, जयाय, नु, रभसया, दिगन्तदिदृक्षया, नु नभः विलङ्घयितुम्, न, समुदितम्, उच्छ्रितम्, हिमाचलम्, अभिययौ॥ १॥

अथेति॥ अथानन्तरं सोऽर्जुनो मेरुमहीभृतो हेमाद्रेर्जयाय नु जयार्थं वा। नुशब्दोऽत्र वितर्के। 'नु पृच्छायां वितर्के च' इत्यमरः। रभसो वेगः। 'रभसो वेगहर्षयोः' इति वैजयन्तीविश्वप्रकाशौ तद्वत्या रभसया। अतीवोत्कण्ठतयेति यावत्। अर्शआदित्वादच्प्रत्ययः। दिगन्तानां दिदृक्षया नु द्रष्टुमिच्छया वा। नभोऽन्तरिक्षं विलङ्घयितुं व्यतिक्रमितुं वा। समुदितम्। समुत्पतितमिव स्थितमित्यर्थः। कुतः। उच्छ्रितमुन्नतं हिमस्याचलं हिमाचलमभिययौ। अत्र निर्धारितानेकफल औन्नत्यगुणनिमित्तोदितादिक्रियोत्प्रेक्षा। सा च व्यञ्जकाप्रयोगात्प्रतीयमानेति सङ्क्षेपः। द्रुतविलम्बितं वृत्तम्—'द्रुतविलम्बितमाह नभौ भरौ' इति लक्षणात्॥ १॥

तपनमण्डलदीपितमेकतः सततनैशतमोवृतमन्यतः।
हसितभिन्नतमिस्रचयं पुरः शिवमिवानुगतं गजचर्मणा॥ २॥

अन्वयः—एकतः, तपनमण्डलदीपितम्, अन्यतः सततनैशतमोवृतम्, पुरः, हसितभिन्नतमिस्रचयम्, गजचर्मणा, अनुगतम्, शिवम्, इव स्थितम्॥ २॥

तपनेति॥ पुनः एकत एकस्मिन्भागे। सार्वविभक्तिकस्तसिः। तपनमण्डलेन दीपितं प्रकाशितम्। अन्यतोऽन्यस्मिन्भागे सततेनानिषिद्धेन नैशेन निशिभवेन तमसा वृतम्। एकत्राह्ना रात्र्या चान्यत्र सङ्गतमित्यर्थः। अत एव पुरोऽग्रे हसितेनाट्टहासेन भिन्नतमिस्रचयं निरस्ततमस्तोमं तथा गजचर्मणानुगतं पश्चाद्व्याप्तम्। 'पश्चात्साह-

श्रयोरनु' इत्यमरः । शिवमिव स्थितम् । तपनतेजःप्रसारोऽप्यस्य क्वा इव कुत्रचित्प-रिसमाप्यत इति महत्त्वातिशयोक्तिः ॥ २ ॥

क्षितिनभःसुरलोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैः ।
प्रथयितुं विभुतामभिनिर्मितं प्रतिनिधिं जगतामिव शम्भुना ॥३॥

अन्वयः—अदृष्टपरस्परैः, क्षितिनभःसुरलोकनिवासिभिः, कृतनिकेतम्, शम्भुना, विभुताम्, प्रथयितुम्, अभिनिर्मितम्, जगताम्, प्रतिनिधिम्, इव ॥ ३ ॥

क्षितीति ॥ परस्परेऽन्योन्ये । 'कर्मव्यतिहारे सर्वनाम्नो द्वे. भवतः' इति वक्त-व्यात्परशब्दस्य द्विर्भावः । 'समासवच्च बहुलं यदा न समासवत्प्रथमैकवचनं तदा पूर्वपदस्य' इति वक्तव्यात्प्रथमैकवचनम् । सुट् । कस्कादित्वाद्विसर्जनीयस्य सत्वं बहुवचनं चान्योन्यशब्दवत् । यथा माघे—'अन्योन्येषां पुष्करैरामृशन्तः' इति । अदृष्टाः परस्परे यैस्तेऽदृष्टपरस्परास्तैस्तथोक्तैः । क्षितौ नभसि सुरलोके च निवस-न्तीति तैस्तथोक्तैः । भूर्भुवःस्वर्लोकवासिभिरित्यर्थः । कृतनिकेतं कृतास्पदम् । अतएव शम्भुना विभुतां स्वसामर्थ्यं प्रथयितुमभिनिर्मितं जगतां प्रतिनिधिं प्रतिकृ-तिमिव स्थितमित्युत्प्रेक्षा । 'प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात्' इत्य-मरः । त्रैलोक्यवलाक्योपममपरिच्छेद्यं चेति भावः ॥ ३ ॥

भुजगराजसितेन नभःश्रिता कनकराजिविराजितसानुना ।
समुदितं निचयेन तडित्वतीं लघयता शरदम्बुदसंहतिम् ॥ ४ ॥

अन्वयः—भुजगराजसितेन, नभःश्रिता, कनकराजिविराजितसानुना, तडित्वतीम्, शरदम्बुसंहितम्, लघयता, निचयेन, समुदितम् ॥ ४ ॥

भुजगेति ॥ पुनश्च । भुजगराजसितेन शेषाहिधवलेन नभःश्रिता गगनस्पृशा कन-कस्य राजिभी रेखाभिर्विराजिताः सानवो यस्य तेन तथोक्तेन । अतएव तडित्वतीं शरदम्बुदसंहतिं शरन्मेघचयं लघयता लघूकुर्वता । तत्तुल्येनेत्यर्थः। अत एवोपमालङ्कारः। निचयेन शिखरसमूहेन समुदितं समुन्नतम् । निचयेनेति । यद्यपि निचयशब्दः शिखर-स्यावाचकस्तथापि पर्वतवर्णनप्रकरणोक्तत्वात्पाषाणनिचयः शृङ्गवाची भवितुमर्हति । यथा—'कूटोऽस्त्री शिखरं शृङ्गम्' इति कूटशब्दः समूहापरपर्यायः । अतएव लक्षणाश्रय-णीया । अतएवावाच्यवचनं न दोषः ॥ ४ ॥

मणिमयूखचयांशुकभासुराः सुरवधूपरिभुक्तलतागृहाः ।
दधतमुच्चशिलान्तरगोपुराः पुर इवोदितपुष्पवना भुवः ॥ ५ ॥

अन्वयः—मणिमयूखचयांशुकभासुराः, सुरवधूपरिभुक्तलतागृहाः, उच्चशिला-न्तरगोपुराः, उदितपुष्पवनाः, पुरः, इव, भुवः, दधतम् ॥ ५ ॥

मणीति ॥ पुनः। मणिमयूखचया अंशुकानीव पटकादीनीव तैर्भासुराः। सुरभूमिः परिभुक्ता लता गृहा इव यासु तास्तथोक्ताः। उच्चानि शिलान्तराणि गोपुराणीव शिलान्तराणि शिलामध्यानि पुरद्वाराणि यासु ताः। उदितान्यूर्जितानि पुष्पाणि वनानि यासु ताः। अतएव पुर इव नगराणीव स्थिताः। भुवो दधतम् ॥ ५ ॥

अविरतोज्झितवारिविपाण्डुभिर्विरहितैरचिरद्युतितेजसा।
उदितपक्षमिवारतनिःस्वनैः पृथुनितम्बविलम्बिभिरम्बुदैः ॥६॥

अन्वयः—अविरतोज्झितवारिविपाण्डुभिः, अचिरद्युतितेजसा, विरहितैः, आरतनिःस्वनैः, पृथुनितम्बविलम्बिभिः, अम्बुदैः, उदितपक्षम्, इव ॥ ६ ॥

अविरतेति ॥ पुनश्च। अविरतमविच्छिन्नमुज्झितवारयः। अवृष्टिमन्त इत्यर्थः। अतएव विपाण्डवश्च तैरविरतोज्झितवारिविपाण्डुभिः। अतएव हिमवत्पक्षत्वं सम्भवतीति भावः। अचिरद्युतितेजसा विरहितैर्विद्युत्तेजोरहितैः। आरतनिःस्वनैः प्रशान्तगर्जितैश्च। अन्यथा पक्षत्वहानिः स्यादिति भावः। पृथुनितम्बविलम्बिभिः महाकटकसङ्गिभिः। 'कटकोऽस्त्री नितम्बोऽद्रेः' इत्यमरः। अम्बुदैरुदितपक्षं सञ्जातपक्षमिव स्थितम्। प्राक्छिन्नपक्षस्यापि हिमाद्रेर्धवलाम्बुदसम्बन्धात्पुनः पक्षोत्थानमुत्प्रेक्ष्यते ॥ ६ ॥

दधतमाकरिभिः करिभिः क्षतैः समवतारसमैरसमैस्तटैः।
विविधकामहिता महिताम्भसः स्फुटसरोजवना जवना नदीः ॥७॥

अन्वयः—आकरिभिः, करिभिः क्षतैः, समवतारसमैः, असमैः, तटैः, महिताम्भसः, विविधकामहिताः, स्फुटसरोजवनाः, जवनाः नदीः दधतम् ॥ ७ ॥

दधतमिति ॥ पुनश्च। आकरः खनिरेषामस्ति योनित्वेनेत्याकरिभिराकरजैः। 'खनिः स्त्रियामाकरः स्यात्' इत्यमरः। करिभिर्गजैः कर्तृभिः। क्षतैः रुग्णैः समवतारेषु तीर्थेषु समैरविषमैरसमैरसदृशैः। अनुपमैरित्यर्थः। तटैरुपलक्षिताः। तथा महिताम्भसः श्लाघ्योदका अतएव विविधेभ्यः कामेभ्योऽवगाहनाद्युपभोगेभ्यो हिता अनुकूलाः। 'चतुर्थी तदर्थ—' इत्यादिना समासः। स्फुटानि विकसितानि सरोजवनानि यासु ताः। जवना वेगवतीः। 'जुचङ्क्रम्य—' इत्यादिना युच्। नदीर्दधतम्। यमकवृत्त्यनुप्रासभेदत्वात्स्वयमेवालङ्कारः। अर्थालङ्कारस्त्वभ्युच्चयः। तस्यातिदुष्करत्वाद्रसपोषोऽपि नाद्रियते। तदुक्तम्—'प्रायशो यमके चित्रे रसवृद्धिर्न मृग्यते' ॥ ७ ॥

नवविनिद्रजपाकुसुमत्विषां द्युतिमतां निकरेण महाश्मनाम्।
विहितसान्ध्यमयूखमिव क्वचिन्निचितकाञ्चनभित्तिषु सानुषु ॥८॥

अन्वयः—नवविनिद्रजपाकुसुमत्विषाम्, द्युतिमताम्, महाश्मनाम्, निकरेण,

क्वचित्, निचितकाञ्चनभित्तिषु, सानुषु, विहितसान्ध्यमयूखम्, इव ॥ ८ ॥

नवेति ॥ पुनश्च । नवानि विनिद्राणि विकसितानि च यानि जपाकुसुमानि ताम्रपुष्पिकाकुसुमानि तेषां त्विष इव त्विषो येषां ते तेषाम्। 'ओण्ड्रपुष्पं जपापुष्पं रूपिका ताम्रपुष्पिका' इति वाग्भट.। द्युतिमतां महाश्मनां मणीनाम्। पद्मरागाणामित्यर्थः। विशेषणसामर्थ्यात्। निकरेण समूहेन हेतुना क्वचिन्निचिताः सङ्घटिताः काञ्चनभित्तयो येषु तेषु सानुषु विहिताः सान्ध्याः सन्ध्यायां भवा मयूखा यस्मिंस्तमिव स्थितम्। काञ्चनभित्तिषु पद्मरागप्रभाप्रसरादुदितसन्ध्याराग इव भातीत्युत्प्रेक्षा ॥ ८ ॥

पृथुकदम्बकदम्बकराजितं ग्रथितमालतमालवनाकुलम्।
लघुतुषारतुषारजलश्च्युतं धृतसदानसदाननदन्तिनम् ॥ ९ ॥

अन्वयः—पृथुकदम्बकदम्बकराजितम्, ग्रथितमालतमालवनाकुलम्, लघुतुषारतुषारजलश्च्युतम्, धृतसदानसदाननदन्तिनम् ॥ ९ ॥

पृथ्विति ॥ पुनश्च। पृथुभिः कदम्बवतां कदम्बकैर्नीपकुसुमसमूहै राजितम्। 'कदम्बमाहुः सिद्धार्थे नीपे च निकुरम्बके' इत्युभयत्रापि विश्वः। ग्रथितमालैर्बद्धपङ्क्तिभिस्तमालवनैस्तापिच्छवनैराकुलमाकीर्णम्। 'कालस्कन्धस्तमालः स्यात्तापिच्छोऽपि' इत्यमरः। लघुतुषारमल्पशीकरं यत्तुषारजलं हिमोदकं श्च्योतति वर्षति तं तथोक्तम्। 'तुषारौ हिमसीकरौ' इति शाश्वत.। 'अन्येभ्योऽपि दृश्यते' इति क्विप। सदानाः समदाः सदाननाः शोभनाननाश्च ये दन्तिनस्ते धृता येन तं तथोक्तम् ॥ ९ ॥

रहितरत्नचयान्न शिलोच्चयानपलताभवना न दरीभुवः।
विपुलिनाम्बुरुहा न सरिद्वधूरकुसुमान्दधतं न महीरुहः ॥ १० ॥

अन्वयः—रहितरत्नचयान्, शिलोच्चयान्, न, दधतम्, अपलताभवना, दरीभुवः, न, (दधतम्) विपुलिनाम्बुरुहाः, सरिद्वधूः, न, (दधतम्) अकुसुमान्, महीरुहः, न, (दधतम्) ॥ १० ॥

रहितेति। पुनश्च। रहितरत्नचयान्रहितः परित्यक्तो रत्नचयो यैस्तान्रत्नराशिरहिताञ्छिलोच्चयाञ्छिखराणि न दधतम्। अपलताभवना लतागृहरहिता दरीभुवो गुहाप्रदेशान्न दधतम्। 'दरी तु कन्दरो वा स्त्री देवखातबिले गुहा' इत्यमरः। विगतानि पुलिनान्यम्बुरुहाणि च यासां ताः। सरितो वध्व इव ताः सरिद्वधूर्न दधतम्। अत्र सरितां वध्वौपम्यात्पुलिनानामम्बुरुहाणां च वदनजघनौपम्यं गम्यते। अकुसुमान्महीरुहो वृक्षान्न दधतम्, किन्तु रत्नादिसम्पन्नानेव शिलोच्चयादीन्दधतमित्यर्थः। महाविभाषया नात्र नञ्समासः ॥ १० ॥

व्यथितसिन्धुमनीरशनैः शनैरमरलोकवधूजघनैर्घनैः।
फणभृतामभितो विततं ततं दयितरम्यलताबकुलैः कुलैः ॥११॥

अन्वयः—अनीरशनैः घनैः, अमरलोकवधूजघनैः, शनैः, व्यथितसिन्धुम्, दयितरम्यलताबकुलैः, फणभृताम्, कुलैः अभितः ततम्, विततम् ॥ ११ ॥

व्यथितेति ॥ पुनश्च। अनीरशनैरनिर्मेखलैः। सरशनैरित्यर्थः। घनैर्निबिडैरमरलोकवधूजघनैः शनैर्मन्दं व्यथितसिन्धुं क्षोभितनदीकम्। अयमपरः स्वर्ग इति भावः। ये रम्या लताश्च बकुलाः केशराश्च ते दयिताः प्रिया येषां तैस्तथोक्तैः। 'विशारदो मद्यगन्धो बकुलः स च केसरः' इति वैद्यके। फणभृतां सर्पाणां कुलैरभितस्ततं व्याप्तं तथा विततं विस्तृतम् ॥ ११ ॥

ससुरचापमनेकमणिप्रभैरपपयोविशदं हिमपाण्डुभिः।
अविचलं शिखरैरुपबिभ्रतं ध्वनितसूचितमम्बुमुचां चयम् ॥१२॥

अन्वयः—अनेकमणिप्रभैः, हिमपाण्डुभिः, शिखरैः, ससुरचापम्, अपपयोविशदम्, अविचलम्, ध्वनितसूचितम्, अम्बुमुचाम्, चयम्, उपबिभ्रतम् ॥ १२ ॥

ससुरेति ॥ अनेका विचित्रा मणिप्रभा येषां तैस्तथोक्तैः। हिमेन पाण्डुभिः शिखरैः कृत्वा ससुरचापं सेन्द्रचापम्। अपपया निर्जलाऽतएव विशदश्च तमपपयोविशदम्। अविचलं दैवान्निश्चलम्। अतः शिखरशङ्कास्याभूदित्यर्थः। किन्तु ध्वनितेन गर्जितेन सूचितं ज्ञापितमम्बुमुचां चयमविरतमुपबिभ्रतम्। अत्र किल कल्पितमाहत्याच्छिखरमेघसन्देहो मेघनिश्चयान्तः सन्देहालङ्कारः ॥ १२ ॥

विकचवारिरुहं दधतं सरः सकलहंसगणं शुचि मानसम्।
शिवमगात्मजया च कृतेर्ष्यया सकलहं सगणं शुचिमानसम् ॥१३॥

(अ०) विकचवारिरुहम्, सकलहंसगणम्, शुचि, मानसम्, सरः, दधतम्, कृतेर्ष्यया, अगात्मजया, सकलहम्, सगणम्, शुचिमानसम्, शिवम्, च (दधतम्) ॥१३॥

विकचेति ॥ पुनश्च। विकचवारिरुहम्। नित्यविकसितारविन्दमित्यर्थः। वृत्तिसामर्थ्यात्। कलहंसगणैः सह वर्तत इति सकलहंसगणम्। 'कादम्बः कलहंसः स्यात्' इत्यमरः। यद्वा। सकलाः सर्वे हंसगणा यस्मिंस्तत्तथोक्तम्। शुचि नित्यनिर्मलं मानसं मानसाख्यं सरो दधतम्। किञ्च। कृतेर्ष्यया। कुतश्चिन्निमित्तात्कुपितयेत्यर्थः। अगात्मजया पार्वत्या सकलहं सविवादम्। सगणं सप्रमथम्। 'गणाः प्रमथसंख्यौघाः' इति वैजयन्ती। शुचिमानसमविद्याविनिर्मुक्तचित्तं शिवं च दधतम्। एतेन सकलशैलवैलक्षण्यमस्योक्तम् ॥ १३ ॥

ग्रहविमानगणानभितो दिवं ज्वलयतौषधिजेन कृशानुना ।
मुहुरनुस्मरयन्तमनुक्षपं त्रिपुरदाहमुमापतिसेविनः ॥ १४ ॥

(अ०) दिवम्, अभितः, ग्रहविमानगणान्, ज्वलयता, ओषधिजेन, कृशानुना, अनुक्षपम्, उमापतिसेविनः, त्रिपुरदाहम्, मुहुः, अनुस्मरयन्तम् ॥ १४ ॥

ग्रहेति ॥ दिवमभितो दिवोऽभिमुखम् । 'अभितः परितः–' इत्यादिना द्वितीया । ग्रहाश्चन्द्रादयो विमानानि देवयानानि च । 'व्योमयानं विमानोऽस्त्री' इत्यमरः । तेषां गणाञ्ज्वलयता प्रदीपयता । 'मितां ह्रस्वः' इति ह्रस्वः । ओषधिजेन तृणविशेषजन्येन कृशानुना वह्निना कृत्वानुक्षपं प्रतिक्षपम् । वीप्सायामव्ययीभावः । उमापतिसेविनः प्रमथादीन् । 'गतिबुद्धि–' इत्यादिना द्विकर्मकत्वम् । त्रयाणां पुराणां समाहारस्त्रिपुरम् । 'तद्धितार्थ–' इत्यादिना समासः । 'पात्रादिभ्यः प्रतिषेधो वक्तव्यः' इति स्त्रीलिङ्गप्रतिषेधः । तस्य दाहं त्रिपुरदाहं मुहुरनुस्मरयन्तम् । ननु 'अधीगर्थ–' इत्यादिना दाहमित्यत्र षष्ठी किं न स्यात् । तस्याः शेषार्थे विधानाच्छेषत्वस्याविवक्षितत्वात् । अत्र 'कविसम्मतसादृश्यात्स्मृतिः' इति स्मरणालङ्कारः ॥ १४ ॥

विततशीकरराशिभिरुच्छ्रितैरुपलरोधविवर्तिभिरम्बुभिः ।
दधतमुन्नतसानुसमुद्धतां धृतसितव्यजनामिव जाह्नवीम् ॥१५॥

अन्वयः—विततशीकरराशिभिः, उच्छ्रितैः, उपलरोधविवर्तिभिः, अम्बुभिः, धृतसितव्यजनाम्, इव, उन्नतसानुसमुद्धताम्, जाह्नवीम्, दधतम् ॥ १५ ॥

विततेति ॥ विततशीकरराशिभिर्विस्तृतशीकरपुञ्जैरुच्छ्रितैरुत्पतितैः । कुतः । उपलरोधेन विवर्तिभिरम्बुभिर्हेतुभिर्धृतसितव्यजनामिव गृहीतामलचामरामिव स्थितामित्युत्प्रेक्षा । उन्नतसानुषु समुद्धतां वहन्तीं जाह्नवीं गङ्गां दधतम् ॥ १५ ॥

अनुचरेण धनाधिपतेरथो नगविलोकनविस्मितमानसः ।
स जगदे वचनं प्रियमादरान्मुखरताऽवसरे हि विराजते ॥ १६ ॥

अन्वयः—अथः, धनाधिपतेः, अनुचरेण, नगविलोकनविस्मितमानसः, सः, आदरात्, प्रियम्, वचनम्, जगदे । हि, मुखरता, अवसरे, विराजते ॥ १६ ॥

अनुचरेणेति ॥ अथोऽनन्तरम् । 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ' इत्यमरः । धनाधिपतेरनुचरेण यक्षेण नगविलोकनेन विस्मितमानसः । सोऽर्जुनः । आदरात्प्रियं वचनं जगदे गदितः । गदतेर्गत्यर्थस्य दुहादित्वात्प्रधाने कर्मणि लिट् । अपृष्टपरिभाषणदोषं परिहरति—मुखरतेति । मुखरता वाचालत्वम् । अपृष्टपरिभाषित्वमिति यावत् । अवसरे श्रोतुराकाङ्क्षासमये विराजते हि । आकाङ्क्षितमपृष्टोऽपि ब्रूयादिति भावः ॥ १६ ॥

मेष विलोकितः प्रजानां सहसा संहतिमंहसां विहन्तुम् ।
नवर्त्म सहस्रधेव कुर्वन्हिमगौरैरचलाधिपः शिरोभिः ॥ १७ ॥

अन्वयः—हिमगौरैः, शिरोभिः, घनवर्त्म, सहस्रधा, कुर्वन्, इव, एषः, अचलाधिपः, विलोकितः, प्रजानाम्, अंहसाम्, संहतिम्, सहसा, विहन्तुम्, अलम्, ॥१७॥

अलमिति ॥ हिमेन गौरैः शुभ्रैः शिरोभिः शिखरैर्घनवर्त्म खं सहस्रधा कुर्वन्विपाटयन्निवेत्युत्प्रेक्षा । एषोऽचलाधिपो हिमवान्विलोकितो दृष्टमात्र एव प्रजानामंहसां संहतिं पापसङ्घातं सहसा विहन्तुमलं समर्थः। 'पर्याप्तिवचनेष्वलमर्थेषु' इति तुमुन् । औपच्छन्दसिकं वृत्तम्—'पर्यन्तेर्यौ तथैव शेषं चौपच्छन्दसिकं सुधीभिरुक्तम्' इति स्मरणात् ॥ १७ ॥

इह दुरधिगमैः किञ्चिदेवागमैः सततमसुतरं वर्णयन्त्यन्तरम् ।
अमुमतिविपिनं वेद दिग्व्यापिनं पुरुषमिव परं पद्मयोनिः परम् ॥१८॥

अन्वयः—इह, असुतरम्, अन्तरम्, दुरधिगमैः, आगमैः, किञ्चिदेव, सततम्, वर्णयन्ति । (किन्तु) अतिविपिनम्, दिग्व्यापिनम्, अमुम्, परम्, पुरुषम्, इव, पद्मयोनिः, एव, वेद, ॥ १८ ॥

इहेति ॥ इहास्मिन्पर्वते । सुतरं न भवतीत्यसुतरम् । दुस्तरमित्यर्थः । तरतेः खल्प्रत्ययः । अन्तरं मध्यभागम् । पुरुषे त्वन्तरं तत्त्वम् । दुरधिगमैर्दुरारोहैरन्यत्र दुर्ग्रहैरागमैर्वृक्षैरन्यत्र पुराणादिभिः । 'पुराणेऽप्यागमो वृक्षे' इति रुद्रः । किञ्चिदेव सततं वर्णयन्ति न तु कदाचित्प्रत्यक्षेणापि निःशेषं ज्ञातुमशक्यत्वादिति भावः । किंत्वतिविपिनमतिगहनं दिग्व्यापिनमुभयत्रापि समम् । अमुं गिरिं परं पुरुषं परमात्मानमिव परं केवलम् । 'परमव्ययमिच्छन्ति केवले' इति विश्वः । पद्मयोनिर्ब्रह्मैव वेद नान्य इत्यर्थः । 'विदो लटो वा' इति णलादेशः । अत्रोपमायमकयोः संसृष्टिः । क्षमावृत्तम्—'तुरगरसयतिर्नौ मरौ गः क्षमा' इति लक्षणात् ॥ १८ ॥

रुचिरपल्लवपुष्पलतागृहैरुपलसज्जलजैर्जलराशिभिः ।
नयति सन्ततमुत्सुकतामयं धृतिमतीरुपकान्तमपि स्त्रियः ॥१९॥

अन्वयः—अयम्, रुचिरपल्लवपुष्पलतागृहैः, उपलसज्जलजैः, जलराशिभिः, उपकान्तम्, धृतिमतीः, अपि, स्त्रियः, सन्ततम्, उत्सुकताम्, नयति ॥ १९ ॥

रुचिरपल्लवेति ॥ अयं गिरिः । रुचिराणि पल्लवानि पुष्पाणि च येषां ते तथाभूता लतागृहा येषु तैस्तथोक्तैरुपलसज्जलजैः शोभितकमलैर्जलराशिभिः सरोभिः करणैः उपकान्तं कान्तसमीपे धृतिमतीर्धैर्यवतीरपि समीपस्थानपि प्रियान्न गणयन्तीः । मानिनीरित्यर्थः । स्त्रियः सन्ततमुत्सुकतां नयति । तासां मानग्रन्थिं शिथिलयतीत्यर्थः ।

अथवा । उपक्रान्तं धृतिमतीस्तुष्टिमतीरपि सुरततृप्ता अपि पुनरप्युत्सुकतां नयतीत्यर्थः । उभयत्राप्युद्दीपकत्वादतिशयोक्ति । वृत्तमुक्तम् ॥ १९ ॥

सुलभैः सदा नयवताऽयवता निधिगुह्यकाधिपरमैः परमैः ।
अमुना धनैः क्षितिभृतातिभृता समतीत्य भाति जगती जगती॥२०॥

अन्वयः—नयवता, अयवता, सदा, सुलभैः, निधिगुह्यकाधिपरमैः, परमैः, धनैः, अमुना, क्षितिभृता, अतिभृता, जगती, जगती, समतीत्य, भाति ॥ २० ॥

सुलभैरिति ॥ नयवता नीतिमताऽयवता भाग्यवता च सदा सुलभैः । नान्यैरित्यर्थः । 'अय शुभावहो विधिः' इत्यमर निधीनां महापद्मादीनाम् । 'अथो पद्मो महापद्मः शङ्खो मकरकच्छपौ । मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव ॥' इत्यमरः । गुह्यकानां चाधिपं कुबेरं रमयन्तीति तथोक्तैः । 'कर्मण्यण्' । परमैरुत्कृष्टैर्धनैः करणैः । अमुना क्षितिभृता हिमाद्रिणातिभृता पूर्णा सती जगती मही जगती स्वर्गपाताललोकौ समतीत्यातिक्रम्य भाति । अमानुषैरपि दुर्लभाः सम्पदोऽत्र सम्भवन्तीति भाव । अत्र धनातिभृतेति पदार्थस्य विशेषणगत्या जगदतिक्रमणहेतुत्वोक्त्या काव्यलिङ्गम् । तस्य यमकेन संसृष्टि । प्रमिताक्षरावृत्तम्—'प्रमिताक्षरा सजससैरुदिता' इति लक्षणात् ॥ २० ॥

अखिलमिदममुष्य गौरीगुरोस्त्रिभुवनमपि नैति मन्ये तुलाम् ।
अधिवसति सदा यदेनं जनैरविदितविभवो भवानीपतिः ॥२१॥

अन्वयः—अमुष्य, गौरीगुरोः, इदम्, अखिलम्, त्रिभुवनम्, अपि, तुलाम्, नैति, मन्ये । यत्, जनैः, अविदितविभवः, भवानीपतिः, सदा, एनम्, अधिवसति ॥२१॥

अखिलमिति ॥ अमुष्य गौरीगुरोर्हिमवत इदमखिलम् । त्रयाणां भुवनानां समाहारस्त्रिभुवनमपि । 'तद्धितार्थ—' इत्यादिना समासः । पात्रादित्वात्स्त्रीत्वप्रतिषेधः । तुलां साम्यं नैतीति मन्ये । यतो जनैरविदितविभवोऽज्ञातमहिमा भवानीपतिः शिवः सदैनं गिरिमधिवसति । अस्मिन्वसतीत्यर्थ । 'उपान्वध्याङ्वसः' इति कर्मत्वम् । अतोऽयं धर्मक्षेत्रमिति भावः । प्रभावृत्तम्—'स्वरशरविरतिर्नौ सरौ प्रभा' इति लक्षणात् ॥ २१ ॥

वीतजन्मजरसं परं शुचि ब्रह्मणः पदमुपैतुमिच्छताम् ।
आगमादिव तमोपहादितः सम्भवन्ति मतयो भवच्छिदः ॥२२॥

अन्वयः—वीतजन्मजरसम्, ब्रह्मणः, परम्, शुचि, पदम्, उपैतुम्, इच्छताम्, आगमात्, इव, तमोपहात्, इतः, भवच्छिदः, मतयः, सम्भवन्ति ॥ २२ ॥

वीतेति ॥ विते निवृत्ते जन्मजरसौ यस्य तद्वीतजन्मजरसम् । 'जराया जरसन्य-

तीरस्याम्' इति जरसादेशः । अत्र तदन्तविधेरिष्टत्वात्परत्वेन स्यादेशबाधकत्वाच्च । तथाहि—'टाङसिङसामिनात्स्या' इति स्यादेशबाधनात् । परत्वाज्जरसादेशं बभाषे भाष्यकृत्स्वयम् ॥ सूत्रकारमते यत्तु ज्ञापकात्परबाधनम् । भवेत्तदपि टाङस्योर्न पुनर्ङसि संभवि ॥ मतद्वयेऽपि तत्तुल्यं ङसि यत्पूर्वबाधनम् । परत्वाज्जरसादेशस्तत्स्या-त्स्यादेशबाधनात् ॥ ज्ञापकं यच्च टाङस्योर्यावादेशाविनादिति । ईकारदीर्घयोस्तत्र वैयर्थ्यं तत्तु तौ विना ॥ एते सवर्णे दीर्घे च रूपसिद्धिर्भवेद्यतः । व्यर्थसूत्राक्षरत्यागा-द्वक्तृत्वैतज्ज्ञापकं फणी ॥ स्वातन्त्र्याज्जरसादेशं जगौ पूर्वस्य बाधनात् । समर्थनप्र-पञ्चस्तु भाष्यकैयटयोः स्फुटः ॥' एवं च यदत्र जरस इति केषांचित्पाठान्तरकल्पनं तदज्ञानविजृम्भितमेव । ब्रह्मणः परमात्मन सम्बन्धि परमुत्कृष्टं शुचि निष्कलङ्कम् । पद्यत इति पदं स्थानं तादात्म्यलक्षणम् । मुक्तिमित्यर्थः । उपैतुं प्राप्तुमिच्छतां मुमुक्षू-णामागमाच्छास्त्रादिव । तमोपहन्तीति तमोपहादविद्यानिवर्तकात् । 'अपे क्लेशतम-सोः' इति डप्रत्ययः । इतोऽस्माद्गिरेः । भवं छिन्दन्तीति भवच्छिदः संसारनिवर्तकाः । 'सत्सूद्विष—' इत्यादिना क्विप् । मतयस्तत्त्वज्ञानानि सम्भवन्त्युत्पद्यन्ते । क्षेत्रवि-शेषस्यापि ज्ञानोपायत्वादित्याशय । न केवलमियं भोगभूमि. किन्तु मुक्तिक्षेत्रमपी-ति तात्पर्यार्थः । रथोद्धतावृत्तम् । तल्लक्षणम्—'रान्नराविह रथोद्धता लगौ'इति ॥२२॥

दिव्यस्त्रीणां सचरणलाक्षारागा रागायाते निपतितपुष्पापीडाः ।
पीडाभाजःकुसुमचिताः साशंसं शंसन्त्यस्मिन्सुरतविशेषं शय्याः॥२३॥

अन्वयः—अस्मिन्, सचरणलाक्षारागाः, निपतितपुष्पापीडाः, पीडाभाजः, कुसुमचिताः, दिव्यस्त्रीणाम्, शय्याः, रागायाते, साशंसम्, सुरतविशेषम्, शंसन्ति ॥ २३ ॥

दिव्येति ॥ अस्मिन्गिरौ । चरणलाक्षारागैः सह वर्तन्ते तास्तथोक्ताः । धेनुक-पुरुषायितादिबन्धेषु स्त्रियाः पादतलस्याधः स्पर्शात्तद्रागाङ्किता इत्यर्थः । निपतिता व्यानतकरणे स्त्रीणामधोमुखत्वाद्भ्रष्टाः पुष्पापीडाः कुसुमशेखरा यासु तास्तथोक्ताः । 'शिखास्वापीडशेखरौ' इत्यमरः । पीडाभाजो विमर्दभाजः । भङ्गिमत्य इत्यर्थः । भ्रमरप्रेङ्खोलितादौ सर्वतः कटीपरिभ्रमणसम्भवादिति भावः । कुसुमैश्चिताः कुसुम-व्याप्ताः । इभमार्जारादिकरणेषु स्तनभुजाद्यवयवानां शय्यातलस्थायित्वान्मर्दनाय कुसुमाचिता इत्यर्थ. । दिव्यस्त्रीणां सम्बन्धिन्यः । शेरत आस्विति शय्यास्तल्पानि । 'संज्ञायां समजनिषद्—' इत्यादिना क्यप् । रागायाते रागोद्रेके सति यः साशंस सतृष्णः सुरतविशेषस्तम् । जातावेकवचनम् । सुरतविशेषानित्यर्थः । शंसन्ति सूच-यन्ति । विवृण्वन्तीत्यर्थः । अत्र लाक्षारागादिपदार्थानां सुरतविशेषशंसनं प्रति विशे-षणगत्या हेतुत्वोक्त्या काव्यलिङ्गमलङ्कारो यमकेन संसृज्यते । जलधरमालावृत्तम्-'म्भौ स्मौ चेत्स्याज्जलधरमाला ख्याता' इति लक्षणात् । धेनुकादिबन्धलक्षणं तु

रतिरहस्ये—'न्यस्तहस्तयुगला निजे पदे योषिदेति कटिरुद्धवल्लभा। अग्रतो यदि शनैरधोमुखी धेनुकं वृषवदुन्नते प्रिये॥ स्वेच्छया भ्रमति वल्लभेऽपि या योषिदाचरति वल्लभायितम्। न्यानतं रतमिदं यदि प्रिया स्यादधोमुखचतुष्पदाकृतिः॥ तत्कटि समधिरुह्य। वल्लभः स्याद्वृषादिपशुसंस्थितिस्थितः। चक्रवद्भ्रमति कुञ्चिताङ्घ्रिका भ्रामरं न जघने समुन्नते॥ पर्वतः कटिपारभ्रमो यदि प्रेङ्खपूर्वमिदमुक्तमूल्लितम्। भूगतस्तनयुगास्यमस्तकामुन्नतस्फिजमधोमुखीं स्त्रियम्। क्रामति स्वकरकृष्टमेहने वल्लभे करिरतं तदुच्यते॥' 'प्रसारिते पाणिपादे शय्यास्पृशि मुखोरसि। उन्नतायाः स्त्रियाः कट्यां मार्जारकरणं विदुः॥' इति ग्रन्थान्तरे। 'कान्तोत्पीडा म्भौ स्मौ' इति वृत्तम्॥ २३॥

गुणसम्पदा समधिगम्य परं महिमानमत्र महिते जगताम्।
नयशालिनि श्रिय इवाधिपतौ विरमन्ति न ज्वलितुमौषधयः॥२४॥

अन्वयः—जगताम्, महिते, अत्र, औषधयः, नयशालिनि, अधिपतौ, श्रियः, इव, गुणसम्पदा, परम्, महिमानम्, समधिगम्य ज्वलितुम्, न, विरमन्ति॥२४॥

गुणेति॥ जगता महिते जगद्भिः पूजिते पूज्यमाने। 'मतिबुद्धि—' इत्यादिना वर्तमाने क्तः। 'क्तस्य च वर्तमाने' इति षष्ठी। अत्र हिमवत्यौषधयस्तृणज्योतींषि नयशालिन्यधिपतौ नीतिसम्पन्ने राज्ञि श्रियः सम्पद इव गुणसम्पदा क्षेत्रगुणसम्पत्त्या। अन्यत्र सन्ध्यादिगुणसम्पदा। परं महिमानम्। उभयत्रापि प्रकाशसामर्थ्यम्। समधिगम्य ज्वलितुं प्रकाशितुं न विरमन्ति। अविरतं ज्वलन्तीत्यर्थः। अन्यत्र रात्रावेवेति भावः॥ २४॥

कुररीगणः कृतरवस्तरवः कुसुमानताः सकमलं कमलम्।
इह सिन्धवश्च वरणावरणाः करिणां मुदे सनलदानलदाः॥ २५॥

अन्वयः—इह, कुररीगणः, कृतरवः, तरवः, कुसुमानताः, कमलम्, सकमलम्, वारणावरणाः, सनलदानलदाः, सिन्धवः, करिणाम्, मुदे, "भवन्ति"॥ २५॥

कुररीति॥ इहाद्रौ कुररीगण उत्क्रोशसङ्घः। 'उत्क्रोशकुररौ समौ' इत्यमरः। कृतरवः कृतारवः। तरवः कुसुमैरानताः। कमलं जलं सकमलं सपद्मम्। 'कमलं जलपद्मयोः' इति विश्वः। यद्वा कं जलममलमत्यन्तं सपद्मं वर्तते। 'कं जले शिरसि च' इत्यमरः। किञ्च। वरणा द्रुमा आवरणं यासां ता वरणावरणाः। 'वरणो वरुणः सेतुस्तिक्तशाकः कुमारकः' इत्यमरः। सनलदाः सोशीराः। 'मूलेऽस्योशीरमस्त्रियाम्। अभयं नलदं सेव्यम्' इत्यमरः। अनलं सन्तापं द्यन्ति खण्डयन्ति शमयन्तीत्यनलदाः। सनलदाश्च ता अनलदाः सिन्धवो नद्यः करिणां मुदे। भवन्तीति शेषः। न कुत्राप्युक्तवैपरीत्यमिति भावः॥ २५॥

साहश्यं गतमपनिद्रचूतगन्धै-
रामोदं मदजलसेकजं दधानः ।
एतस्मिन्मदयति कोकिलानकाले
लीनालिः सुरकरिणां कपोलकाषः ॥ २६ ॥

अन्वयः—एतस्मिन्, अपनिद्रचूतगन्धैः, सादृश्यम्, गतम्, मदजलसेकजम्, आमोदम्, दधानः, लीनालिः, सुरकरिणाम्, कपोलकाषः, अकाले, कोकिलान्, मदयति॥२६॥

सादृश्यमिति ॥ एतस्मिन्पर्वतेऽपनिद्रचूतगन्धैः सादृश्यं गतं फुल्लाम्रपुष्पगन्धसदृशं मदजलसेकजमामोदं परिमलं दधानो बिभ्राणः । अतएव लीनालिः संसक्तभृङ्गः सुरकरिणाम् । कष्यतेऽनेनेति काषः । कपोलानां काषः कषणस्थानं द्रुमस्कन्धादि । अकाले वसन्तातिरिक्ते कालेऽपि कोकिलान्मदयति । 'मितां ह्रस्वः' इति ह्रस्वः । अत्र वसन्तरूपकारणाभावेऽपि मदाख्यकार्योत्पत्तिकथनाद्विभावनालङ्कारः । तदुक्तम्—'कारणेन विना कार्यस्योत्पत्तिः स्याद्विभावना' इति । सा च चूतगन्धैः सादृश्यमित्युपमया वामोदं दधान इति पदार्थहेतुककाव्यलिङ्गेन चाङ्गाङ्गिभावेन सङ्कीर्यते । किञ्च कोकिलानां मदगन्धे चूतगन्धभ्रान्त्या भ्रान्तिमदलङ्कारो व्यज्यते । प्रहर्षिणीवृत्तम्—'म्नौज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्' इति लक्षणात् ॥ २६ ॥

सनाकवनितं नितम्बरुचिरं चिरं सुनिनदैर्नदैर्वृतममुम् ।
मता फणवतोऽवतो रसपरापरास्तवसुधा सुधाधिवसति ॥ २७ ॥

अन्वयः—सनाकवनितम्, नितम्बरुचिरम् सुनिनदैः, नदैः, वृतम्, अमुम्, अवतः, फणवतः, मता, रसपरा, परास्तवसुधा, सुधा, चिरम्, अधिवसति ॥२७

सनाकेति ॥ पुनश्च । सनाकवनितं साप्सरस्कं नितम्बैः कटकै रुचिरं सुनिनदैः सुघोषैर्नदैः प्रवाहैर्वृतममुम् । अमुष्मिन्गिरावित्यर्थः । 'उपान्वध्याङ्वसः' इति कर्मत्वम् । अवतोऽधोलोकरक्षकस्य फणवतो नागराजस्य मतेष्टा । 'मतिबुद्धि-' इत्यादिना वर्तमाने क्तः । तद्योगात्षष्ठी । रसेन स्वादेन परोत्कृष्टा परास्तवसुधा त्यक्तभूलोका सुधामृतं चिरमधिवसति । अतोऽन्यत्र भूमण्डले कुत्रापि सुधा नास्तीत्यर्थः । मेरुप्रतिभटोऽयं गिरिरिति भावः । अत्र प्रस्तुतविशेषणसामर्थ्यादप्रस्तुतमेरुप्रतीतेः समासोक्तिरलङ्कारः । स च यमकेन संसृज्यते । जलोद्धतगतिर्वृत्तम्—'रसैर्जसजसा जलोद्धतगतिः' इति लक्षणात् ॥ २७ ॥

श्रीमल्लताभवनमोषधयः प्रदीपाः ।
शय्या नवानि हरिचन्दनपल्लवानि ।

अस्मिन्रतिश्रमनुदश्च सरोजवाताः
स्मर्तुं दिशन्ति न दिवः सुरसुन्दरीभ्यः ॥२८॥

अन्वयः—अस्मिन्, श्रीमत्, लताभवनम्, ओषधयः, प्रदीपाः, नवानि, हरिचन्दनपल्लवानि, शय्याः, रतिश्रमनुदः, सरोजवाताश्च, सुरसुन्दरीभ्यः, दिवः, स्मर्तुम्, न दिशन्ति ॥ २८ ॥

श्रीमदिति ॥ अस्मिन्नद्रौ श्रीमत्समृद्धिमल्लता एव भवनम् । ओषधयस्तृणज्योतींष्येव प्रदीपाः । नवानि हरिचन्दनपल्लवानि सुरतरुकिसलयान्येव शय्याः । 'हरिचन्दनमाख्यातं गोर्शीर्षे सुरपादपे' इति विश्वः । रतिश्रमनुदः सुरतश्रमहारिणः सरोजवाताश्च । सुरसुन्दरीभ्यः । क्रियाग्रहणाच्चतुर्थी । दिवो दिवम् । 'अधीगर्थ—' इत्यादिना कर्मणि षष्ठी । स्मर्तुं न दिशन्ति । विस्मारयन्तीत्यर्थः । स्वर्गादप्यतिरिच्यतेऽसाविति भावः । अत्र पूर्वार्धे।रूपकत्रयं स्फुटमेव ॥ २८ ॥

ईशार्थमम्भसि चिराय तपश्चरन्त्या
यादोविलङ्घनविलोलविलोचनायाः ।
आलम्बताग्रकरमत्र भवो भवान्याः
श्च्योतन्निदाघसलिलाङ्गुलिना करेण ॥ २९ ॥

अन्वयः—ईशार्थम्, चिराय, अम्भसि, तपश्चरन्त्या, यादोविलङ्घनविलोलविलोचनायाः, भवान्याः, अग्रकरम्, भवः, श्च्योतन्निदाघसलिलाङ्गुलिना, करेण, अत्र, आलम्बत् ॥ २९ ॥

ईशार्थमिति ॥ ईशायेतीशार्थं यथा तथेति क्रियाविशेषणम् । 'अर्थेन सह नित्यसमासः सर्वलिङ्गता च वक्तव्या' । चिराय चिरमम्भसि तपश्चरन्त्या अतएव यादोविलङ्घनविलोलविलोचनाया जलजन्तुविघट्टितचकितेक्षणायाः । तपसोऽप्यधिकं दृष्ट्वैव विलोभयन्त्येति भावः । 'यादांसि जलजन्तवः' इत्यमरः । भवान्या भवपत्न्या. । प्रयोगकालापेक्षोऽयं निर्देशः । 'इन्द्रवरुणभव-' इत्यादिना ङीप् । आनुगागमश्च । करैकदेशस्यापि करत्वादग्रश्चासौ करश्चेति समानाधिकरणे समासः । अतएव वामनः—'हस्ताग्राग्रहस्तयोर्गुणगुणिनोर्भेदाभेदौ' इति । तमग्रकरं भवः शिवः श्च्योतन्निदाघसलिलाङ्गुलिना स्रवत्स्वेदाङ्गुलिनेति सात्त्विकोदयोक्तिः । करेणात्र गिरावालम्बत गृहीतवान् । अत्राद्भुतातीतवृत्तान्तस्य प्रत्यक्षवदभिधानाद्भाविकालङ्कारः—'अतीतानागते यत्र प्रत्यक्षवदलक्षिते । अत्यद्भुतार्थकार्यत्वाद्भाविकं तदुदाहृतम् ॥' इति लक्षणात् । वसन्ततिलकावृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति तल्लक्षणात् ॥२९॥

येनापविद्धसलिलः स्फुटनागसद्मा
देवासुरैरमृतमम्बुनिधिर्ममन्थे ।
व्यावर्तनैरहिपतेरयमाहिताङ्कः
खं व्यालिखन्निव विभाति स मन्दराद्रिः ॥ ३० ॥

अन्वयः—देवासुरैः, येन, अपविद्धसलिलः, स्फुटनागसद्मा, अम्बुनिधिः, अमृतम्, ममन्थे । अहिपतेः व्यावर्तनैः, आहिताङ्कः, सः, अयम्, मन्दराद्रिः, खम्, व्यालिखन्, इव, विभाति ॥ ३० ॥

येनेति ॥ देवाश्चासुराश्च तैर्देवासुरैः । 'येषां च विरोधः शाश्वतिकः' इति नैकवद्भावः । येषां यतः कार्यत एव विरोधो न गोव्याघ्रादिवच्छाश्वतिक इत्याहुः । येन मन्दराद्रिणा । मन्थदण्डीकृतेनेति भावः । अपविद्धसलिलः क्षिप्तजलोऽत एव स्फुटं नागसद्म पातालं यस्मिन्सोऽम्बुनिधिरमृतं ममन्थे मथितः । मथ्नातेर्द्विकर्मकत्वादुहादित्वादप्रधाने कर्मणि लिट् । अहिपतेः । मन्थगुणीकृतस्य वासुकेरित्यर्थः । 'मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम्' इति भारतवचनात् । व्यावर्तनैर्वेष्टनैराहिताङ्कः कृतचिह्नः सोऽयं मन्दाराद्रिः खमाकाशं व्यालिखन्व्यापाटयन्निव विभाति । अत्रोन्नत्यानुपादानेनैव खलेखनात्प्रेक्षणादनुपात्तगुणनिमित्ता क्रियास्वरूपोत्प्रेक्षा ॥ ३० ॥

नीतोच्छ्रायं मुहुरशिशिररश्मेरुस्त्रै-
रानीलाभैर्विरचितपरभागा रत्नैः ।
ज्योत्स्नाशङ्कामिह वितरति हंसश्येनी
मध्येऽप्यह्नः स्फटिकरजतभित्तिच्छाया ॥ ३१ ॥

अन्वय—इह, अशिशिररश्मेः, उस्त्रैः, नीतोच्छ्रायम्, आनीलाभैः, रत्नैः, विरचितपरभागा, हंसश्येनी, स्फटिकरजतभित्तिच्छाया, अह्नः, मध्येऽपि, मुहुः, ज्योत्स्नाशङ्काम्, वितरति ॥ ३१ ॥

नीतेति ॥ इहाद्रावशिशिररश्मेरुष्णांशोरुस्त्रैर्मयूखैः । संक्रान्तैरित्यर्थः । नीतोच्छ्रायमुच्छ्रायं नीता । विस्तारितेत्यर्थः । तथानीलाभैरसितप्रभै रत्नैरिन्द्रनीलैर्विरचितपरभागा । तत्संनिधानाल्लब्धोत्कर्षेत्यर्थः । हंस इव श्येनी श्वेतवर्णा । 'विशदश्वेतपाण्डराः' इत्यमरः । 'वर्णादनुदात्तात्तोपधात्तो नः' इति श्वेतशब्दान्ङीप् । तकारस्य च नकारः । स्फटिकानां रजतानां च भित्तयस्तासां छाया कान्तिः । अह्नो मध्ये । मध्याह्नेऽपीत्यर्थः । मुहुर्ज्योत्स्नाशङ्कां ज्योत्स्नाभ्रान्तिं वितरति जनयतीति भ्रान्तिमदलङ्कारः ॥ ३१ ॥

दधत इव विलासशालि नृत्यं मृदु पतता पवनेन कम्पितानि ।
इह ललितविलासिनीजनभ्रूगतिकुटिलेषु पयःसु पङ्कजानि ॥३२॥

अन्वयः—इह, मृदु, पतता, पवनेन, कम्पितानि, पङ्कजानि, ललितविलासिनीजनभ्रूगतिकुटिलेषु, पयःसुः, विलासशालि, नृत्यम्, दधत, इव, ॥ ३२ ॥

दधत इति ॥ इहाद्रौ मृदु पतता मन्दं वहता पवनेन कम्पितानि पङ्कजानि ललितविलासिनीजनस्य भ्रूगतिवत्कुटिलेषु । ईषत्तरङ्गितेष्वित्यर्थः । पयःसु विलासशालि नृत्यं दधत इव । सविलासं नृत्यन्तीवेत्युत्प्रेक्षा । पुष्पिताग्रावृत्तम् ॥ ३२ ॥

अस्मिन्नगृह्यत पिनाकभृता सलील-
मावद्धवेपथुरधीरविलोचनायाः ।
विन्यस्तमङ्गलमहौषधिरीश्वरायाः
स्रस्तोरगप्रतिसरेण करेण पाणिः ॥ ३३ ॥

अन्वयः—अस्मिन्, पिनाकभृता, अधीरविलोचनायाः, ईश्वरायाः, आबद्धवेपथुः, विन्यस्तमङ्गलमहौषधिः, पाणिः, स्रस्तोरगप्रतिसरेण, करेण, सलीलम्, अगृह्यत ॥३३॥

अस्मिन्निति ॥ अस्मिन्नद्रौ पिनाकभृता शिवेनाधीरविलोचनायाश्चकितदृष्टेः । उरगदर्शनादिति भावः । ईश्वराया गौर्या । 'स्थेशभास-' इत्यादिना वरच् । पुंयोगविवक्षाभावान्न ङीप् । आबद्धवेपथुः प्राप्तकम्प इति सात्त्विकोक्तिः । 'ट्वितोऽथुच्' इत्यथुच्प्रत्ययः । विन्यस्ता मङ्गलमहौषधिर्यवाङ्कुरादिर्यस्मिन्स पाणिः । स्रस्तो गलित उरग एव प्रतिसरः कौतुकसूत्रं यस्य तेन । 'आहुः प्रतिसरो हस्तसूत्रे माल्ये च मण्डने' इति विश्वः । करेण सलीलमगृह्यतेति देवस्य पार्वतीपरिणयनवर्णनम् । ईषार्थेमित्यत्र त्वनुग्रहमात्रोक्तिरित्यपौनरुक्त्यम् । भाविकमेवालङ्कारः ॥ ३३ ॥

क्रामद्भिर्घनपदवीमनेकसंख्यै-
स्तेजोभिः शुचिमणिजन्मभिर्विभिन्नः ।
उस्राणां व्यभिचरतीव सप्तसप्तेः
पर्यस्यन्निव निचयः सहस्रसंख्याम् ॥ ३४ ॥

अन्वयः—घनपदवीम्, क्रामद्भिः, अनेकसंख्यैः, शुचिमणिजन्मभिः, तेजोभिः, विभिन्नः, पर्यस्यन्, इह, सप्तसप्तेः, उस्राणाम्, निचयः सहस्रसंख्याम्, व्यभिचरति, इव, ॥ ३४ ॥

क्रामद्भिरिति ॥ घनपदवीमाकाशं क्रामद्भिर्व्यश्नुवानैरनेकसंख्यैः । परःसहस्रैरि-

त्यर्थः । क्वचित् 'अनेकवर्णैः' इति पाठस्तु प्रामादिक एव । वैयर्थ्याद्व्याघाताच्चेति । शुचिमणिभ्यः स्फटिकेभ्यो जन्म येषां तैः । 'जन्माद्युत्तरपदो बहुव्रीहिर्व्यधिकरणोऽपीष्यते' इति वामनः । तेजोभिर्विभिन्नो मिश्रोऽतएव पर्यस्यन्प्रसर्पन्निहाद्रौ सहस्रसंख्याणां किरणानां निचयो निकरः । सहस्रमिति संख्या सहस्रसंख्या ताम् । स्वनियतामिति शेषः । व्यभिचरत्यतिक्रामतीवेत्युत्प्रेक्षा ॥ ३४ ॥

व्यधत्त यस्मिन्पुरमुच्चगोपुरं पुरां विजेतुर्धृतये धनाधिपः ।
स एष कैलास उपान्तसर्पिणः करोत्यकालास्तमयं विवस्वतः॥३५॥

अन्वयः—यस्मिन्, धनाधिपः, पुराम्, विजेतुः, धृतये, उच्चगोपुरम्, पुरम्, व्यधत्त । सः, एषः, कैलासः, उपान्तसर्पिणः, विवस्वतः, अकाले, अस्तमयम्, करोति॥३५॥

व्यधत्तेति ॥ यस्मिन्कैलासे धनाधिपः कुबेरः पुरां विजेतुः शिवस्य धृतये सन्तोषायोच्चगोपुरमुन्नतपुरद्वारम् । 'पुरद्वारं तु गोपुरम्' इत्यमरः । पुरमलकाख्यां पुरीं व्यधत्त निर्मितवान् । तत्सखित्वादिति भावः । स एष कैलास उपान्तसर्पिणः प्रान्तचारिणो विवस्वतः सूर्यस्याकाले प्रसिद्धेतरकालेऽस्तमयं करोतीवेत्युत्प्रेक्षा । वस्तुतस्तु तत्कारणाभावाद्व्यञ्जकाप्रयोगाद्गम्योत्प्रेक्षा । सायोपान्तवर्तितयाऽसम्बन्धे सम्बन्धलक्षणातिशयोक्त्युत्थापितेति विवेकः । अस्तमिति मकारान्तमव्ययम् । तस्य पचाद्यजन्तेनायशब्देन षष्ठीसमासः । वृत्तमुक्तम् ॥ ३५ ॥

नानारत्नज्योतिषां सन्निपातैश्छन्नेष्वन्तःसानु वप्रान्तरेषु ।
बद्धांबद्धां भित्तिशङ्कामुष्मिन्नावानावान्मातरिश्वा निहन्ति ॥३६॥

अन्वयः—अमुष्मिन्, अन्तःसानु, नानारत्नज्योतिषाम्, सन्निपातैः, छन्नेषु, वप्रान्तरेषु, बद्धांबद्धाम्, भित्तिशङ्काम्, आवान् आवान् मातरिश्वा, निहन्ति ॥३६॥

नानेति ॥ अमुष्मिन्कैलासेऽन्तःसानु । सानुष्वित्यर्थः । विभक्त्यर्थेऽव्ययीभावः । नानारत्नज्योतिषां अनेकमणिकान्तीनां सन्निपातैर्व्यतिकरैश्छन्नेषु छादितेषु । 'वा दान्तशान्त—' इत्यादिना निपातः । वप्रान्तरेषु कटकान्तरेषु बद्धांबद्धामभीक्ष्णबद्धाम् । दृढोत्पादितामित्यर्थः । 'नित्यवीप्सयो.' इति नित्यार्थे द्विर्भावः । 'नित्यमभीक्ष्णम्' इति काशिका । एकपदं चैतत् । भित्तिशङ्कां भित्तिरिति सन्देहमावानावानभीक्ष्णमापतन् । आङ्पूर्वाद्वाधातोः शतृप्रत्ययः । द्विर्भावादि पूर्ववत् । मातर्यन्तरिक्षे श्वयति गच्छतीति मातरिश्वा वायुः । कनिन्प्रत्ययः । 'तत्पुरुषे कृति बहुलम्' इत्यलुक् । निहन्ति निवर्तयति वायुसञ्चारान्भित्त्यभावोऽवधार्यत इत्यर्थः । अतो निश्चयान्तः सन्देहालङ्कारः । शालिनीवृत्तम् ॥ ३६ ॥

रम्या नवद्युतिरपैति न शाद्वलेभ्यः
श्यामीभवन्त्यनुदिनं नलिनीवनानि ।
अस्मिन्विचित्रकुसुमस्तबकाचितानां
शाखाभृतां परिणमन्ति न पल्लवानि ॥ ३७ ॥

अन्वयः—अस्मिन्, शाद्वलेभ्यः, रम्या, नवद्युतिः, न अपैति । नलिनीवनानि, अनुदिनम्, श्यामी भवन्ति । विचित्रकुसुमस्तबकाचितानाम्, शाखाभृताम्, पल्लवानि, न परिणमन्ति ॥ ३७ ॥

रम्येति ॥ अस्मिन्नद्रौ । शादाः शष्पाणि सन्त्येष्विति शाद्वलास्तैः । 'शाद्वल शादहरिते' इत्यमरः । 'नडशादाड्ड्वलच्' । रम्या नवा द्युतिर्नापैति । किन्तु नित्येत्यर्थः । नलिनीवनान्यनुदिनं सर्वदा श्यामीभवन्ति । न कदाचित्पाण्डुरीभवन्तीत्यर्थः । विचित्रकुसुमस्तबकैराचितानां व्याप्तानां शाखाभृतां तरूणां पल्लवानि न परिणमन्ति । न जीर्णानि भवन्तीत्यर्थः । सर्वदा नूतनमेव सर्वं वर्तत इत्यर्थः । अत्र प्रस्तुतस्यैव तत्तद्वस्तुगतकान्तिस्थैर्यरूपकार्यस्य वर्णनात्प्रस्तुतमिव कारणं कश्चिदसाधारणः कैलासस्य महिमावगम्यत इति पर्यायोक्तिरलङ्कारः । तदुक्तम्—'कारणं गम्यते यत्र प्रस्तुतं कार्यवर्णनात् । प्रस्तुतत्वेन सम्बन्धस्तत्पर्यायोक्तमुच्यते ॥' इति ॥ ३७ ॥

परिसरविषयेषु लीढमुक्ता हरिततृणोद्गमशङ्कया मृगीभिः ।
इह नवशुककोमला मणीनां रविकरसंवलिताः फलन्ति भासः ॥ ३८ ॥

अन्वयः—इह, परिसरविषयेषु, मृगीभिः, हरिततृणोद्गमशङ्कया, लीढमुक्ता, नवशुककोमलाः, मणीनाम्, भासः, रविकरसंवलिताः फलन्ति ॥ ३८ ॥

परिसरेति ॥ इहाद्रौ परिसरविषयेषु पर्यन्तदेशेषु । 'विषयो देशे' इति निपातः । मृगीभिर्हरिततृणोद्गमशङ्कया नीलतृणाङ्कुरभ्रान्त्येति भ्रान्तिमदलङ्कारः । लीढाः पूर्वमास्वादिताः पश्चान्मुक्ताः लीढमुक्ताः । दग्धप्ररूढ इत्यादिवत् 'पूर्वकाल—' इत्यादिना समानाधिकरणसमासः । नवशुककोमलाः शुकसवर्णाः मणीनां मरकतमणीनां भासो रविकरैः संवलिता मिश्रिताः सत्यः फलन्ति सम्मूर्छन्ते । वर्धन्त इति यावत् ॥ ३८ ॥

उत्फुल्लस्थलनलिनीवनादमुष्मा-
दुद्धूतः सरसिजसम्भवः परागः ।

वात्याभिर्वियति विवर्तितः समन्ता-
दाधत्ते कनकमयातपत्रलक्ष्मीम् ॥ ३९ ॥

अन्वयः—(अस्मिन्) वात्याभिः, अमुष्मात्, उत्फुल्लस्थलनलिनीवनात्, उद्धूतः वियति, समन्तात्, विवर्तितः, सरसिजसम्भवः, परागः, कनकमयातपत्रलक्ष्मीम्, आधत्ते ॥ ३९ ॥

उत्फुल्लेति ॥ अस्मिन्नद्रौ वात्याभिर्वातसमूहैः । 'पाशादिभ्यो यः' इति यप्रत्ययः । अमुष्माद्दृश्यमानादुत्फुल्लस्थलनलिनीवनात् । जलजनितस्य परागस्योत्थानासम्भवात्स्थलग्रहणम् । उत्फुल्लसंकुल्लयोरसंख्यानान्निष्ठानत्वम् । उद्धूत उत्थापितो वियति समन्ताद्विवर्तितः परिमण्डलितः । अन्तराले तु दण्डायमान एवेति भावः । सरसिजसम्भवः पद्मोद्भवः परागः । रूढ्यभिप्रायेणात्र सरसिजशब्दप्रयोगो द्रष्टव्यः । कनकमयातपत्रलक्ष्मीमाधत्तेऽनुकरोति । अत्र परागस्यातपत्रलक्ष्मीसम्बन्धासम्भवात्तत्सदृशीं लक्ष्मीमिति प्रतिबिम्बेनाक्षेपादसम्भवद्वस्तुसम्बन्धेयं निदर्शना । तदुक्तम्—'असम्भवद्धर्मयोगादुपमानोपमेययोः । प्रतिबिम्बक्रिया गम्या यत्र सा स्यान्निदर्शना ॥' इति ॥ ३९ ॥

इह सनियमयोः सुरापगायामुषसि सयावकसव्यपादरेखा ।
कथयति शिवयोः शरीरयोगं विषमपदा पदवी विवर्तनेषु ॥४०॥

अन्वयः—इह, उषसि, सुरापगायाम्, सयावकसव्यपादरेखा, विषमपदा, पदवी विवर्तनेषु, सनियमयोः, शिवयोः, शरीरयोगम्, कथयति ॥ ४० ॥

इहेति ॥ इहाद्रावुषसि प्रभाते सुरापगायां लक्षणया तत्कूले सयावका सालक्तका सव्यपादस्य रेखा वामचरणमुद्रा यस्यां सा । 'यावोऽलक्तो द्रुमामयः' इत्यमरः । तथा विषमाणि महदल्पानि पदानि यस्यां सा विवर्तनेषु प्रदक्षिणक्रियासु पदवी । शिवयोः प्रदक्षिणपद्धतिरित्यर्थः । सनियमयोः । सन्ध्यायां प्रणमतोरित्यर्थः । शिवा च शिवश्च तयोः शिवयोरुमाशङ्करयोः । 'पुमान्स्त्रिया' इत्येकशेषः । शरीरयोगमर्धाङ्गसङ्घटनारूपं कथयति । सनियमयोरिति नियमविषयेऽपि विरहासहाविह विरहतः शिवाविति भावः । अत्र पदवीविशेषणपदार्थयोः कथनं प्रति हेतुत्वोक्त्या काव्यलिङ्गमलङ्कारः ॥ ४० ॥

सम्मूर्च्छतां रजतभित्तिमयूखजालै-
रालोलपादपलतान्तरनिर्गतानाम् ।

घर्मद्युतेरिह मुहुः पटलानि धाम्ना-
मादर्शमण्डलनिभानि समुल्लसन्ति ॥ ४१ ॥

अन्वयः—इह, रजतभित्तिमयूखजालैः, सम्मूर्च्छताम्, आलोलपादपलतान्तरनिर्गतानाम्, घर्मद्युतेः धाम्नाम्, आदर्शमण्डलनिभानि, पटलानि, मुहुः, समुल्लसन्ति ॥ ४१ ॥

संमूर्च्छतामिति ॥ इहाद्रौ रजतभित्तिमयूखजालैः संमूर्च्छतां बहुलीभवतामालोलानां पादपलतानां तरुशाखानामन्तरेषु रन्ध्रेषु निर्गतानां प्रसृतानां घर्मद्युतेरुष्णांशोर्धाम्नां तेजसामादर्शमण्डलनिभानि दर्पणबिम्बसदृशानीत्युपमालङ्कारः। पटलानि मण्डलानि मुहुर्वारम्वारं समुल्लसन्ति पुनःपुनः स्फुरन्ति न तु सातत्येन। लतानामालोलत्वाभावात्। तच्च नान्यत्र मृत्पाषाणादिप्राये सम्भवतीति भावः॥४१॥

शुक्लैर्मयूखनिचयैः परिवीतमूर्ति-
र्वप्राभिघातपरिमण्डलितोरुदेहः।
शृङ्गाण्यमुष्य भजते गणभर्तुरुक्षा
कुर्वन्वधूजनमनःसु शशाङ्कशङ्काम् ॥ ४२ ॥

अन्वयः—शुक्लैः, मयूखनिचयैः, परिवीतमूर्तिः, वप्राभिघातपरिमण्डलितोरुदेहः, गणभर्तुः, उक्षा, वधूजनमनःसु, शशाङ्कशङ्कां, कुर्वन्, अमुष्य, शृङ्गाणि, भजते ॥४२॥

शुक्लैरिति ॥ शुक्लैर्मयूखनिचयैः शुभ्रकिरणसमूहैः परिवीतमूर्तिर्व्याप्तदेहः। वप्राभिघातेन वप्रक्रीडया परिमण्डलितो वर्तुलीकृत उरुर्देहो बृहच्छरीरं यस्य तथोक्तो गणभर्तुः प्रमथनाथस्योक्षा वृषभः। 'उक्षानड्वान्बलीवर्द ऋषभो वृषभो वृषः' इत्यमरः। वधूजनमनःसु शशाङ्कशङ्कां चन्द्रभ्रान्तिं कुर्वन्। तेषां मौग्ध्यादिति भावः। मनुष्याद्रेः शृङ्गाणि भजते सेवते। अत्र शङ्काशब्दस्य सन्देहार्थत्वे सन्देहालङ्कारः। भ्रान्तिपरत्वे भ्रान्तिमदलङ्कारः। यथेच्छसि तथास्तु। नवोक्षविशेषणात्वेन काव्यलिङ्गेनाङ्गाङ्गिभावेन सङ्कीर्यते ॥ ४२ ॥

सम्प्रति लब्धजन्म शनकैः कथमपि लघुनि
क्षीणपयस्युपेयुषि भिदां जलधरपटले।
खण्डितविग्रहं बलभिदो धनुरिह विविधाः
पूरयितुं भवन्ति विभवः शिखरमणिरुचः ॥ ४३ ॥

अन्वयः—इह, विविधाः, शिखरमणिरुचः, सम्प्रति, लघुनि, क्षीणपयसि, (अत

एव) भिदां, उपेयुषि, जलधरपटले, शनकैः, लब्धजन्म, (अत एव) खण्डितविग्रहम्' बलभिदः, धनुः पूरयितुं, विभवः, भवन्ति ॥ ४३ ॥

सम्प्रतीति ॥ इहाद्रौ विविधा नानावर्णाः शिखरमणिरुचः सम्प्रति । शरदीत्यर्थः । लघुन्यगुरूणि । कुतः । क्षीणपयस्यत एव भिदां भेदम् । 'षिद्भिदादिभ्योऽङ्' इत्यङ्-प्रत्ययः । उपेयुषि गते जलधरपटले मेघमण्डले कथमपि शनकैर्लब्धजन्म । उत्पन्नमित्यर्थः । अत एव खण्डितविग्रहं छिन्नस्वरूपं बलभिद इन्द्रस्य धनुः पूरयितुं विभवः समर्था भवन्ति । अत्रेन्द्रधनुषो मणिरुचानामसम्बन्धे सम्बन्धकथनादतिशयोक्तिरलङ्कारः । वंशपत्रपतितं वृत्तम्—'दिङ्मुनि वंशपत्रपतितं भरनभरलगैः' इति लक्षणात् ॥ ४३ ॥

स्नपितनवलतातरुप्रवालैरमृतलवस्रुतिशालिभिर्मयूखैः ।
सततमसितयामिनीषु शम्भोरमलयतीह वनान्तमिन्दुलेखा ॥४४॥

अन्वयः—इह, शम्भोः, इन्दुलेखा, स्नपितनवलतातरुप्रवालैः, अमृतलवस्रुतिशालिभिः, मयूखैः, सततम्, असितयामिनीषु, वनान्तम्, अमलयति ॥ ४४ ॥

स्नपितेति ॥ इहाद्रौ शम्भोरिन्दुलेखा । स्नपितानि सिक्तानि नवानि लतानां तरूणां च प्रवालानि यैस्तैः । अमृतलवस्रुत्यामृतबिन्दुनिःस्यन्देन शालन्ते ये तैर्मयूखैः सततं सर्वकालमसितयामिनीषु कृष्णपक्षरात्रिष्वपि वनान्तममलयति धवलयति । अन्यत्र नैतदस्तीति व्यतिरेको व्यज्यते ॥ ४४ ॥

क्षिपति योऽनुवनं विततां बृहद्बृहतिकामिव रौचनिकीं रुचम् ।
अयमनेकहिरण्मयकन्दरस्तव पितुर्दयितो जगतीधरः ॥ ४५ ॥

अन्वयः—यः, अनुवनं, विततां, रोचनकीं, रुचम् बृहद्बृहतिकां, इव, क्षिपति । अनेकहिरण्मयकन्दरः, अयम्, तव, पितुः, दयितः, जगतीधरः ॥ ४५ ॥

क्षिपतीति ॥ अथ योऽद्रिरनुवनं विततां रौचनिकीं रुचम् । सौवर्णीं कान्तिमित्यर्थः । रोचनया रक्तां रौचनिकीम् । 'लाक्षारोचनशकलकर्दमाट्ठक्' इति ठक् । 'टिड्ढाणञ्–' इत्यादिना ङीप् । उत्प्रेक्षते–बृहती चासौ बृहतिका च तां महोत्तरासङ्गमिव । 'द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा' इत्यमरः । क्षिपति प्रसारयति । अनेका हिरण्मय्यः कन्दरा यस्य सः । हिरण्मयशब्दो 'दाण्डिनायन–' इत्यादिना निपातनात्साधुः । अयम् । पुरोवर्ती गिरिरित्यर्थः । तव पितुरिन्द्रस्य दयितः प्रियः । जगत्या धरो जगतीधरः । यस्ते गन्तव्य इन्द्रकीलाख्य इत्यर्थः ॥ ४५ ॥

सक्तिं जवादपनयत्यनिले लतानां
वैरोचनैर्द्विगुणिताः सहसा मयूखैः ।

रोधोभुवां मुहुरमुत्र हिरण्मयीनां
भासस्तडिद्विलसितानि विडम्बयन्ति ॥ ४६ ॥

अन्वयः—अमुत्र, अनिले, जवात्, लतानां, सक्तिं, अपनयति सति, सहसा, वैरोचनैः, मयूखैः, द्विगुणिताः, हिरण्यमयीनाम्, रोधोभुवां, भासः, मुहुः, तडिद्विलसितानि, विडम्बयन्ति ॥ ४६ ॥

सक्तिमिति ॥ अमुत्रामुष्मिन्नद्रावनिले जवाज्झटिति लतानां सक्तिमन्योन्यसङ्गमपनयति सति । सहसा हठाद्वैरोचनैः साविन्नैर्मयूखैर्द्विगुणा द्विरावृत्ताः कृता इति द्विगुणिताः । 'गुणस्त्वावृत्तिशब्दादिष्विन्द्रियामुख्यतन्तुषु' इति वैजयन्ती । हिरण्मयीनां हिरण्यविकाराणाम् । 'दाण्डिनायन-' इत्यादिना निपातनात्साधुः । रोधोभुवां तटभुवां भासो मुहुस्तडिद्विलसितानि विडम्बयन्ति । अनुकुर्वन्तीत्यर्थः । उपमालङ्कारः ॥ ४६ ॥

कषणकम्पनिरस्तमहाहिभिः क्षणविमत्तमतङ्गजवर्जितैः ।
इह मदस्नपितैरनुमीयते सुरगजस्य गतं हरिचन्दनैः ॥ ४७ ॥

अन्वयः—इह, कषणकम्पनिरस्तमहाहिभिः, क्षणविमत्तमतङ्गजवर्जितैः, मदस्नपितैः, हरिचन्दनैः, सुरगजस्य, गतं अनुमीयते ॥ ४७ ॥

कषणेति ॥ इहाद्रौ कषणेन कण्डूयनेन यः कम्पस्तेन निरस्ता महाहयो महासर्पा येभ्यस्तैः । क्षणं विमत्तमतङ्गजवर्जितैर्मत्तमतङ्गजरहितैः । कुतः । मदस्नपितैः । ऐरावतमदसिक्तैरित्यर्थः । 'मितां ह्रस्वः' इति ह्रस्वः । हरिचन्दनैश्चन्दनद्रुमैः सुरगजस्यैरावतस्य गतं प्राप्तिरनुमीयते । हरिचन्दनविशेषणैः काव्यलिङ्गमुन्नेयम् ॥ ४७ ॥

जलदजालघनैरसिताश्मनामुपहतप्रचयेह मरीचिभिः ।
भवति दीप्तिरदीपितकन्दरा तिमिरसंवलितेव विवस्वतः ॥ ४८ ॥

अन्वयः—इह, जलदजालघनैः, असिताश्मनाम्, मरीचिभिः, उपहतप्रचया, अदीपितकन्दरा विवस्वतः, दीप्तिः, तिमिरसंवलिता, इव, भवति ॥ ४८ ॥

जलदेति ॥ इहास्मिन्नद्रौ जलदजालघनैर्मेघवृन्दसान्द्रैरसिताश्मनामिन्द्रनीलानां मरीचिभिर्दीधितिभिः । 'भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्' इत्यमरः । उपहतप्रचया विघट्टितसङ्घाता अतएवादीपितकन्दरा अप्रकाशितगह्वरा विवस्वतो दीप्तिस्तिमिरैः संवलिता संहता व्यामिश्रितेव भवतीत्युत्प्रेक्षा ॥ ४८ ॥

भव्यो भवन्नपि मुनेरिह शासनेन
क्षात्रे स्थितः पथि तपस्यहतप्रमादः ।

प्रायेण सत्यपिहितार्थकरे विधौ हि
श्रेयांसि लब्धुमसुखानि विनान्तरायैः ॥ ४९ ॥

अन्वयः—इह, भव्यः, भवन्नपि, मुनेः, शासनेन, क्षात्रे, पथि, स्थितः, हतप्रमादः सन्, तपस्य, हि, प्रायेण, हितार्थकरे, विधौ सति, अन्तरायैः विना, श्रेयांसि, लब्धुमसुखानि ॥ ४९ ॥

भव्य इति ॥ इहाद्रौ भव्यः शान्तो भवन्नपि मुनेर्व्यासस्य शासनेनेन्द्राराधनरूपेण क्षात्रे पथि क्षत्रियमार्गे स्थितः । गृहीतशस्त्र एवेत्यर्थः । हतप्रमादोऽप्रमत्तः सन् । तपस्य तपश्चर्यां कुरु । तपस्येति 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः' इति क्यङ् । तदन्ताद्धातोर्लोट् । न च सर्वभूतहितकारिणो मे प्रमादः किं करिष्यतीति विश्वसितव्यमित्यर्थान्तरन्यासेनाह—हि यस्मात्प्रायेण बाहुल्येन । 'प्रायो वयस्यनशने मृतौ बाहुल्यतुल्ययोः' इति हेमचन्द्रः । हितमर्थं करोतीति हितार्थकरे विधौ व्यापारे सति । अन्तरायैर्विघ्नैर्विना श्रेयांसि लब्धुमसुखानि । अशक्यानीत्यर्थः । अतएव 'शकधृष-' इत्यादिना समानकर्तृकेषु तुमुन् । अकारणवैरिणः सर्वत्र सर्वस्यापि सन्तीति भावः ॥ ४९ ॥

मा भूवन्नपथहृतस्तवेन्द्रियाश्वाः
सन्तापे दिशतु शिवः शिवां प्रसक्तिम् ।
रक्षन्तस्तपसि बलं च लोकपालाः
कल्याणीमधिकफलां क्रियां क्रियासुः ॥ ५० ॥

अन्वयः—तव, इन्द्रियाश्वाः, अपथहृतः, मा, भूवन् । सन्तापे, (सति) शिवः शिवाम्, प्रसक्तिम्, दिशतु । (किञ्चेति) लोकपालाः, तपसि, बलम्, रक्षन्तः, कल्याणीम्, क्रियाम्, अधिकफलाम्, क्रियासुः, ॥ ५० ॥

मा भूवन्निति ॥ तवेन्द्रियाण्येवाश्वास्ते । अपथेन हरन्तीत्यपथहृतो मा भूवन् । त्वामपथं मा निनीषुरित्यर्थः । 'माङि लुङ्'इत्याशीरर्थे लुङ् । सन्तापे तपःक्लेशे सति शिवः शिवां साधीयसीं प्रसक्तिं प्रवृत्तिमुत्साहं दिशतु । किञ्चेति चार्थः । लोकपाला इन्द्रादयस्तपसि विषये बलं शक्तिं रक्षन्तो वर्धयन्तः सन्तः कल्याणीं साध्वीं क्रियामनुष्ठानमधिकफलां क्रियासुः कुर्वन्तु । करोतेराशिषि लोट् ॥ ५० ॥

इत्युक्त्वा सपदि हितं प्रियं प्रियार्हे
धाम स्वं गतवति राजराजभृत्ये ।

सोत्कण्ठं किमपि पृथासुतः प्रदध्यौ
संधत्ते भृशमरतिं हि सद्वियोगः ॥ ५१ ॥

अन्वयः—प्रियार्हं, राजराजभृत्ये, हितम्, प्रियम्, इति, उक्त्वा, सपदि, स्वम्, धाम, गतवति, पृथासुतः, सोत्कण्ठम्, किमपि, प्रदध्यौ। तथाहि, सद्वियोगः, भृशम्, अरतिम्, सन्धत्ते ॥ ५१ ॥

इतीति ॥ प्रियार्हे राजराजभृत्य इति पूर्वोक्तम्। हितं प्रियं वचनमिति शेषः। उक्त्वा सपदि स्वं स्वकीयं धाम स्थानं गतवति सति। पृथासुतोऽर्जुनः सोत्कण्ठं सौत्सुक्यं किमपि प्रदध्यौ चिन्तयामास। तथाहि। सद्वियोग. सुजनवियोगो भृशम रतिं व्यथां सन्धत्ते। करोतीत्यर्थः। अर्थान्तरन्यासः ॥ ५१ ॥

तमनतिशयनीयं सर्वतः सारयोगा-
दविरहितमनेकेनाङ्कभाजा फलेन।
अकृशमकृशलक्ष्मीश्चेतसाशंसितं स
स्वमिव पुरुषकारं शैलमभ्याससाद ॥ ५२ ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये पञ्चमः सर्गः।

अन्वयः—अकृशलक्ष्मीः, सः, सर्वतः, सारयोगात्, अनतिशयनीयम्, अनेकेनाङ्कभाजा, फलेन, इव, अविरहितम्, अकृशम्, चेतसाशंसितम्, शैलम्, स्वम्, पुरुषकारम्, इव, अभ्याससाद ॥ ५२ ॥

तमिति ॥ अकृशाः पूर्णा लक्ष्म्यः शोभा यस्य सोऽकृशलक्ष्मीरिति बहुवचनाश्रितो बहुव्रीहिः। एवं च 'उर.प्रभृतिभ्य.-' इति कप्प्रत्ययानवकाश। तत्र लक्ष्मीशब्दस्यैकवचनान्तस्यैव पाठात्। नापि 'नद्यृतश्च' इत्यस्यावकाशः। उरः प्रभृतिपाठसामर्थ्यादेव शैषिकस्तु वैभाषिक इत्यविरोधः। सोऽर्जुनः सर्वतः सर्वत्र सारयोगादुत्कृष्टबलप्रयोगात्। 'सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु' इत्युभयत्राप्यमरः। अनतिशयनीयमनतिक्रमणीयमनेकेन बहुनाङ्कभाजा समीपं गतेन। शीघ्रभाविनेति यावत्। फलेन कार्यसिद्ध्याऽविरहितमशून्यम्। कार्यसिद्धेरवश्यं साधकमित्यर्थ.। अकृशमतनुं चेतसाशंसितं प्राप्तुमिष्टं शैलमिन्द्रकीलं स्वमात्मीयम्। पुरुषस्य कारः कर्म तं पुरुषकारमुक्तविशेषणविशिष्टं पौरुषमिवाभ्याससाद प्राप्तवान्। मालिनीवृत्तम् ॥ ५२ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां पञ्चमः सर्गः समाप्तः।

षष्ठः सर्गः ।

रुचिराकृतिः कनकसानुमथो परमः पुमानिव पतिं पतताम् ।
धृतसत्पथस्त्रिपथगामभितः स तमारुरोह पुरुहूतसुतः ॥ १ ॥

अन्वयः—अथ रुचिराकृतिः, धृतसत्पथः सः, पुरुहूतसुतः कनकसानुम् तम्, परमः, पुमान्, पतताम्, पतिम्, इव, त्रिपथगाम्, अभितः, आरुरोह ॥ १ ॥

रुचिराकृतिरिति ॥ अथो आसादनानन्तरं रुचिराकृतिः सौम्यविग्रहो धृतसत्पथोऽवलम्बितसन्मार्गः । आकारानुरूपगुणवानित्यर्थः । 'यत्राकृतिस्तत्र गुणा वसन्ति' इति सामुद्रिकाः । उपमानेऽपि समानमेतत् । स पुरुहूतसुतोऽर्जुनः । कनकस्य विकाराः सानवो यस्य तं कनकसानुम् । गरुडसावर्ण्यार्थं विशेषणमेतत् । 'समुदाये विकारषष्ठ्याश्च' इति बहुव्रीहिरुत्तरपदलोपश्च । तमिन्द्रकीलम् । परमः पुमान्विष्णुः पततां पक्षिणां पतिं गरुडमिव । त्रिभिः पथिभिर्गच्छतीति त्रिपथगा भागीरथी । 'अन्येष्वपि दृश्यते' इति डप्रत्ययः । उपपदसमास उत्तरपदसमासश्च । तामभितोऽभिमुखमारुरोह । 'समीपोभयतःशीघ्रसाकल्याभिमुखेऽभितः' इत्यमरः । प्रमिताक्षरावृत्तम्—'प्रमिताक्षरा सजससैरुदिता' इति लक्षणात् ॥ १ ॥

अथास्य कार्यसिद्धिनिमित्तानि सूचयन्मार्गं वर्णयति—

तमनिन्द्यबन्दिन इवेन्द्रसुतं विहितालिनिक्वणजयध्वनयः ।
पवनेरिताकुलविजिह्मशिखा जगतीरुहोऽवचकरुः कुसुमैः ॥ २ ॥

अन्वयः—विहितालिनिक्वणजयध्वनयः, पवनेरिताकुलविजिह्मशिखाः, जगतीरुहः, अनिन्द्यबन्दिनः, इव, तम्, इन्द्रसुतम्, कुसुमैः, अवचकरुः ॥ २ ॥

तमिति ॥ विहिता अलिनिक्वणा जयध्वनय इव यैस्ते तथोक्ताः पवनेन वायुनेरिता नुन्ना अतएवाकुला लोला विजिह्मा वक्राश्च शिखाः शाखाग्राणि येषां ते तथोक्ताः । 'शिखा ज्वाला केकिमौल्योः शिखाशाखाग्रमौलिषु' इति वैजयन्ती । जगतीरुहो भूरुहः क्विप् । अनिन्द्या अनवद्या ये बन्दिनः स्तुतिपाठकास्त इव । तमिन्द्रसुतमर्जुनं कुसुमैरवचकरुः । अभिववृषुरित्यर्थः । 'ऋच्छत्यॄताम्' इति गुणः । अत्र किरतेर्वृष्ट्यर्थत्वात्कुसुमानां करणत्वम् । विक्षेपार्थत्वे तु कर्मत्वमेव । यथा 'कटाक्षान्वामा किरति' इति । दृश्यते च धातूनामर्थभेदात्कारकव्यत्ययः । यथा सिञ्चतेः क्षरणार्द्रीकरणयोरर्थयोर्द्रवद्रव्यस्य कर्मत्वकरणत्वे । यथा—'मेघोऽमृतं सिञ्चति गौः पयश्च' सिञ्चतीवामृतैर्वपुः' इति च । अत्र वाक्ये समासगतयोरुपमयोः साध्यसाधनभावादङ्गाङ्गिभावेन सङ्करः ॥ २ ॥

अवधूतपङ्कजपरागकणास्तनुजाह्नवीसलिलवीचिभिदः ।
परिरेभिरेऽभिमुखमेत्य सुखाः सुहृदः सखायमिव तं मरुतः ॥३॥

अन्वयः—अवधूतपङ्कजपरागकणाः, तनुजाह्नवीसलिलवीचिभिदः, सुखाः, मरुतः, तम् , सुहृदः, सखायम् , इव, अभिमुखम् , एत्य, परिरेभिरे, ॥ ३ ॥

अवधूतेति ॥ अवधूता पङ्कजपरागकणा यैस्ते तथोक्ता इति सौरभ्योक्तिः । तनुजाह्नव्याः सलिलवीचीर्भिन्दन्तीति तथोक्ता इति शैत्योक्तिः । सुखयन्तीति सुखाः । पचाद्यच् । सुखस्पर्शा इति मान्द्योक्तिः । मरुतो वातास्तमर्जुनं सुहृदः सखायमिवाभिमुखमेत्यागत्य परिरेभिरे आलिङ्गितवन्तः ॥ ३ ॥

उदितोपलस्खलनसंवलिताः स्फुटहंससारसविरावयुजः ।
मुदमस्य माङ्गलिकतूर्यकृतां ध्वनयः प्रतेनुरनुवप्रमपाम् ॥ ४ ॥

अन्वयः—उदितोपलस्खलनसंवलिताः, स्फुटहंससारसविरावयुजः, अनुवप्रमपाम् , ध्वनयः, अस्य, माङ्गलिकतूर्यकृताम् , मुदम् , प्रतेनुः ॥ ४ ॥

उदितेति ॥ उदितोपलेषून्नतपाषाणेषु स्खलनेन प्रतिघातेन संवलिताश्चूर्णिताः । अतस्तूर्यघोष इव घुमघुमायमाना इत्यर्थः । स्फुटैर्हंसानां सारसानां च विरावैर्युज्यन्त इति तथोक्ताः । क्विप् । अनुवप्रमपाम् । अन्तः पतन्तीनामिति शेषः । ध्वनयोऽस्यार्जुनस्य मङ्गलं प्रयोजनमेषां ते माङ्गलिकाः । 'प्रयोजनम्' इति ठञ् । तैस्तूर्यैः कृतां मुदं हर्षं प्रतेनुः । अत्रान्यस्यान्यकार्यकारणसम्भवात्तूर्यकृतमुत्सदृशीं मुदमिति प्रतिबिम्बेनाक्षेपान्निदर्शनालङ्कारः ॥ ४ ॥

अवरुग्णतुङ्गसुरदारुतरौ निचये पुरः सुरसरित्पयसाम् ।
स ददर्श वेतसवनाचरितां प्रणतिं बलीयसि समृद्धिकरीम् ॥५॥

अन्वयः—सः, पुरः, अवरुग्णतुङ्गसुरदारुतरौ, बलीयसि, सुरसरित्पयसाम्, निचये, वेतसवनाचरिताम् समृद्धिकरीम् , प्रणतिम् , ददर्श, ॥ ५ ॥

अवरुग्णेति ॥ सोऽर्जुनः पुरोऽग्रेऽवरुग्णतुङ्गसुरदारुतरौ भग्नोन्नतदेवदारुद्रुमे बलीयसि बलवत्तरे । मत्वन्तादीयसुनि मतुपो लुक् । सुरसरित्पयसां निचये पूरे विषये वेतसवनेन वानीरवनेनाचरिताम् । 'अथ वेतसे । रथाभ्रपुष्पविदुलशीतवानीरवञ्जुलाः' इत्यमरः । समृद्धिकरीं श्रेयस्करीम् । लोके यथादृष्टामित्यर्थः । प्रणतिं ददर्श । या सर्वलोकदृष्टान्तभूतेति भाव ॥ ५ ॥

प्रबभूव नालमवलोकयितुं परितः सरोजरजसारुणितम् ।
सरिदुत्तरीयमिव संहतिमत्स तरङ्गरङ्गि कलहंसकुलम् ॥ ६ ॥

अन्वयः—सः, परितः, सरोजरजसा, रुणितम्, संहतिमत्, तरङ्गरङ्गि, सरिदुत्तरीयम्, इव, कलहंसकुलम्, अवलोकयितुम्, अलम्, न, प्रबभूव, ॥ ६ ॥

प्रबभूवेति ॥ सोऽर्जुनः परितः सरोजरजसा कमलरेणुनारुणितं पाटलितम्। उत्तरीयं च कुसुमादिनारुणितं भवति । संहतिमन्निरन्ध्रं तरङ्गरङ्गि वारितरङ्गशोभि सरिदुत्तरीयं स्तनांशुकमिव स्थितं कलहंसकुलं कादम्बकुलमवलोकयितुमलमत्यर्थं न प्रबभूव न शशाक । तत्सौन्दर्योद्वेलत्वादिति भावः ॥ ॥ ६ ॥

दधति क्षतीः परिणताद्विरदे मुदितालियोषिति मदस्रुतिभिः ।
अधिकां स रोधसि बबन्ध धृतिं महते रुजन्नपि गुणाय महान् ॥७॥

अन्वयः—सः, क्षतीः, दधति, परिणतद्विरदे, मदस्रुतिभिः, मुदितालियोषिति, रोधसि, अधिकाम्, धृतिम्, बबन्ध । तथाहि, महान्, रुजन्नपि, महते, गुणाय ॥७॥

दधतीति ॥ सोऽर्जुनः क्षतीः क्षतानि दधति धारयति । कुतः । परिणतास्तिर्यग्दन्तप्रहारिणो द्विरदा यस्मिंस्तस्मिन् । 'तिर्यग्दन्तप्रहारस्तु गजः परिणतो मतः' इति हलायुधः । मदस्रुतिभिर्मुदितालियोषिति रोधस्यधिकां धृतिं प्रीतिं बबन्ध । निश्चलीकृतवानित्यर्थः । तथाहि । महान्रुजन्पीडयन्नपि महते गुणायोत्कर्षाय भवति । महत्कृता पीडापि शुभावहैवेत्यर्थः । तद्युक्तं गजरुग्णस्यापि रोधसः प्रीतिकरत्वमिति भावः॥७॥

अनुहेमवप्रमरुणैः समतां गतमूर्मिभिः सहचरं पृथुभिः ।
स रथाङ्गनामवनितां करुणैरनुबध्नतीमभिननन्द रुतैः ॥ ८ ॥

अन्वयः—अनुहेमवप्रम्, अरुणैः, पृथुभिः, ऊर्मिभिः, समताम्, गतम्, सहचरम्, करुणैः, रुतैः, अनुबध्नतीम्, रथाङ्गनामवनिताम्, अभिननन्द, ॥ ८ ॥

अन्विति ॥ सोऽर्जुनोऽनुहेमवप्रं कनकसानुसमीपे । समीपार्थेऽव्ययीभावः । अरुणैः । कनककान्त्युपरञ्जनादिति भावः । पृथुभिरूर्मिभिः समतां तुल्यरूपतां गतम् । सादृश्याद्दुर्विवेच्यमित्यर्थः । सह भूतं सहचरं प्रियम् । सहशब्दस्य पचाद्यजन्तेन चरशब्देन समासः । करुणैर्दीनै रुतैः कूजितैरनुबध्नतीमन्विष्यन्तीं रथाङ्गनामवनितां चक्रवाकीमभिननन्द । प्रकृष्टप्रेमदर्शनात्कस्य नानन्द इति भावः । अत्र तावदूर्मीणां स्वधावल्यत्यागेनारुण्यस्वीकारात्तद्गुणालङ्कारः—'तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाश्रयात्' इति लक्षणात् । तन्मूला चेयं चक्रवाक्याः स्वकान्ते तरङ्गभ्रान्तिरिति तद्गुणभ्रान्तिमतोरङ्गाङ्गिभावेन सङ्करः ॥ ८ ॥

सितवाजिने निजगदू रुचयश्चलवीचिरागरचनापटवः ।
मणिजालमम्भसि निमग्नमपि स्फुरितं मनोगतमिवाकृतयः ॥९॥

अन्वयः—चलवीचिरागरचनापटवः, रुचयः, अम्भसि, निमग्नमपि मणिजालम्, मनोगतम्, स्फुरितम्, इव, आकृतयः, सितवाजिने, निजगदुः ॥ ९ ॥

सितवाजिन इति ॥ चलवीचिनां रागो रञ्जनं वर्णान्तरापादनं तस्य रचना क्रिया तत्र पटवः समर्था रुचयः प्रभाः। अम्भसि निमग्नमपि मणिजालम्। स्वाश्रयभूतमिति भावः। मनोगतं स्फुरितं रोषादिविकारमाकृतयो भ्रूभङ्गादिबाह्यविकारा इव। सितवाजिनेऽर्जुनाय निजगदुः। ज्ञापयामासुरित्यर्थः। आकृत्या हि मनोगतं विचक्षणा जानन्तीति भावः ॥ ९ ॥

उपलाहतोद्धततरङ्गधृतं जविना विधूतविततं मरुता।
स ददर्श केतकशिखाविशदं सरितः प्रहासमिव फेनमपाम् ॥१०॥

अन्वयः—उपलाहतोद्धततरङ्गधृतम्, जविना, मरुता, विधूतविततम्, केतकशिखाविशदम्, अपाम्, फेनम्, सरितः, प्रहासम्, इव, सः, ददर्श, ॥ १० ॥

उपलेति ॥ उपलैराहता अतएवोद्धताश्च ये तरङ्गास्तैर्धृतम्। निर्गमरोधादित्यर्थः। जविना वेगवता मरुता वातेन विधूतं विततं च केतकस्य शिखाग्रं तद्वद्विशदमपां फेनं हिण्डीरम्। 'हिण्डीरोऽब्धिकफः फेनः' इत्यमरः। सरितः प्रहासमट्टहासमिवेत्युत्प्रेक्षा। सोऽर्जुनो ददर्श ॥ १० ॥

बहु बर्हिचन्द्रकनिभं विदधे धृतिमस्य दानपयसां पटलम्।
अवगाढमीक्षितुमिवेभपतिं विकसद्विलोचनशतं सरितः ॥ ११ ॥

अन्वयः—बर्हिचन्द्रकनिभम्, बहु, दानपयसाम्, पटलम्, अवगाढम्, इभपतिम्, ईक्षितुम्, विकसत्, सरितः, विलोचनशतम्, अस्य, धृतिम्, विदधे, ॥ ११ ॥

बर्हीति ॥ बर्हिचन्द्रकनिभं मयूरमेचकसदृशम्। 'समौ चन्द्रकमेचकौ' इत्यमरः। बह्वनेकधा दानपयसां पटलम्। जातावेकवचनम्। बहवो मदाम्बुबिन्दव इत्यर्थः। अवगाढमन्तःप्रविष्टम्। गाहेः कर्तरि क्तः। इभपतिमीक्षितुं विकसदुन्मिषत्सरितो विलोचनशतमिवेत्युत्प्रेक्षा। अस्यार्जुनस्य धृतिं प्रीतिं विदधे चकार ॥ ११ ॥

प्रतिबोधजृम्भणविभिन्नमुखी पुलिने सरोरुहदृशा ददृशे।
पतदच्छमौक्तिकमणिप्रकरा गलदश्रुबिन्दुरिव शुक्तिवधूः ॥१२॥

अन्वयः—प्रतिबोधजृम्भणविभिन्नमुखी, पतदच्छमौक्तिकमणिप्रकराः गलदश्रुबिन्दुः, इव शुक्तिवधूः, पुलिने, सरोरुहदृशा, ददृशे ॥ १२ ॥

प्रतिबोधेति ॥ प्रतिबोधः स्फुटनं निद्रापगमश्च तत्र यज्जृम्भणमुच्छूनता जृम्भा च तेन विभिन्नमुखी विश्लिष्टाग्रा विवृतास्या च। अतएव पतन्प्रसरन्नच्छो मौक्तिकम-

णीनां प्रकरः स्तोमो यस्याः सा तथोक्ता। अतएव गलदश्रुबिन्दुरिव स्थितेत्यु-त्प्रेक्षा। शुक्तिर्वधूरिव शुक्तिवधूः। पुलिने। शयनीय इवेति भावः। सरोरुह-शार्जुनेन ददृशे दृष्टा। अत्र प्रतिबोधादिश्लिष्टपदोपात्तानां प्रकृतानां शुक्तवध्वो-श्चोपमारूपकयोः साधकबाधकाभावात्सन्देहालङ्कारः। तत्सापेक्षा चाश्रुगलनोत्प्रेक्षेति तयोरङ्गाङ्गिभावः॥ १२॥

शुचिरप्सु विद्रुमलताविटपस्तनुसान्द्रफेनलवसंवलितः।
स्मरदायिनः स्मरयति स्म भृशं दयिताधरस्य दशनांशुभृतः॥१३॥

अन्वयः—अप्सु, शुचिः, तनुसान्द्रफेनलवसंवलितः, विद्रुमलताविटपः, स्मरदा-यिनः, दशनांशुभृतः, दयिताधरस्य, भृशम्, स्मरयति स्म॥ १३॥

शुचिरिति॥ अप्सु शुचिः स्वच्छस्तनुना सान्द्रेण च फेनस्य लवेन शकलेन संव-लितः सङ्गतो विद्रुमलताया विटपः पल्लवः। 'विटपः पल्लवे षिड्गे विस्तारे स्तम्ब-शाखयोः' इति विश्वः। स्मरदायिनः कामोद्दीपकस्य दशनांशुभृतो दन्तकान्तिकलि-तस्य। दयिताधरस्य। 'अधीगर्थ-' इत्यादिना षष्ठी। भृशं स्मरयति स्म। 'लट् स्मे' इति भूतार्थे लट्। 'मितां ह्रस्वः' इति ह्रस्वः। स्मरणालङ्कारः॥ १३॥

उपलभ्य चञ्चलतरङ्गधृतं मदगन्धमुत्थितवतां पयसः।
प्रतिदन्तिनामिव स सम्बुबुधे करियादसामभिमुखान्करिणः॥१४॥

अन्वयः—सः, चञ्चलतरङ्गधृतम्, मदगन्धम्, पयसः, उत्थितवताम्, करियाद-साम्, प्रतिदन्तिनाम्, इव, अभिमुखान्, करिणः सम्बुबुधे॥ १४॥

उपलभ्येति॥ सोऽर्जुनश्चञ्चलतरङ्गैर्धृतम्। तत्सङ्क्रान्तमित्यर्थः। मदगन्धमु-पलभ्याघ्राय पयस उत्थितवताम्। रोषादिति शेषः। कर्याकाराणां यादसाम्। शाकपार्थिवादिषु द्रष्टव्यः। प्रतिदन्तिनामिवाभिमुखान्। अभियातानित्यर्थः। करिणो गजान्सम्बुबुधे। ददर्शेत्यर्थः॥ १४॥

स जगाम विस्मयमुदीक्ष्य पुरः सहसा समुत्पिपतिषोः फणिनः।
प्रहितं दिवि प्रजविभिः श्वसितैः शरदभ्रविभ्रममपां पटलम्॥१५॥

अन्वयः—सः, पुरः, सहसा, समुत्पिपतिषः, फणिनः, प्रजविभिः, श्वसितैः, दिवि, प्रहितम्, शरदभ्रविभ्रमम्, अपाम्, पटलम्, पुरः, उदीक्ष्य, विस्मयम्, जगाम॥१५॥

स इति॥ सोऽर्जुनः पुरोऽग्रे सहसा समुत्पिपतिषोः समुत्पतितुमिच्छोः। पतेः सन्नन्तादुप्रत्ययः। 'तनिपतिदरिद्रातिभ्यः सन इड्वा वक्तव्यः' इति विकल्पा-दिडागमः। फणिनः सर्पस्य प्रजविभिरतिवेगवद्भिः श्वसितैः फूत्कारैर्दिव्याकाशे

प्रहितं प्रेरितं शरदभ्रस्य विभ्रम इव विभ्रमः सौन्दर्यं यस्य तत्। शुभ्रमभ्रव्यापकं चेत्यर्थः। अपां पटलं पुर उदीक्ष्य विस्मयं जगाम। अत्रोपमानुप्राणिता स्वभावोक्तिरलङ्कारः ॥ १५ ॥

स ततार सैकतवतीरभितः शफरीपरिस्फुरितचारुदृशः।
ललिताः सखीरिव बृहज्जघनाः सुरनिम्नगामुपयतीः सरितः ॥१६॥

अन्वयः—स., सैकतवतीरभितः, शफरीपरिस्फुरितचारुदृशः, सुरनिम्नगाम्, उपयतीः, बृहज्जघनाः, ललिताः, सखीः, इव, सरितः, ततार ॥ १६ ॥

स इति ॥ सोऽर्जुनः सैकतवतीः पुलिनवतीरभितः शफरीणां मत्स्यीनां परिस्फुरितान्येव चारवो दृशो यासां ताः। सुरनिम्नगां गङ्गामुपयतीर्भजन्तीः। इणः शतुरुगित्त्वान्ङीप्। अतएव बृहज्जघना ललिताः सखीरिव स्थिताः सरितस्ततारातिचक्रमे ॥ १६ ॥

अधिरुह्य पुष्पभरनम्रशिखैः परितः परिष्कृततलां तरुभिः।
मनसः प्रसत्तिमिव मूर्ध्नि गिरेः शुचिमाससाद स वनान्तभुवम् ॥१७॥

अन्वयः—स., अधिरुह्य, पुष्पभरनम्रशिखैः, तरुभिः, परितः परिष्कृततलाम्, शुचिम्, (अतएव) मनसः, प्रसत्तिम्, इव, गिरेः, मूर्ध्नि, वनान्तभुवम् आससाद ॥१७॥

अधिरुह्येति ॥ सोऽर्जुनोऽधिरुह्य। अर्थाद्गिरिमिति शेषः। पुष्पभरेण नम्रशिखैर्नताग्रैस्तरुभिः परितः परिष्कृततलां भूषितस्वरूपाम्। 'अधःस्वरूपयोरस्त्री तलम्' इत्यमरः। 'सम्परिभ्यां करोतौ भूषणे' इति सुडागमः। शुचिं शुद्धाम्। अतएव मनसः प्रसत्तिमिव मूर्तं मनःप्रसादमिव स्थिताम्। तद्धेतौ तद्भावोत्प्रेक्षा। गिरेर्मूर्ध्नि वनान्तभुवमाससाद। अन्तशब्दः स्वरूपवचनः। 'अन्तोऽध्यवसिते मृत्यौ स्वरूपे निश्चयेऽन्तिके' इति वैजयन्ती ॥ १७ ॥

अनुसानु पुष्पितलताविततिः फलितोरुभूरुहविविक्तवनः।
धृतिमाततान तनयस्य हरेस्तपसेऽधिवस्तुमचलामचलः ॥ १८ ॥

अन्वयः—अनुसानु, पुष्पितलताविततिः, फलितोरुभूरुहविविक्तवनः, अचलः, हरेः, तनयस्य, तपसे, अधिवस्तुम्, अचलाम्, धृतिम्, आततान ॥ १८ ॥

अनुसान्विति ॥ अनुसानु प्रतिसानु। वीप्सार्थेऽव्ययीभावः। पुष्पिताः सञ्जातपुष्पा लताविततयो यस्मिन्सः। फलिता उरवो भूरुहा येषु तानि विविक्तानि विजनानि पूतानि वा वनानि यस्मिन्स तथोक्तः। 'विविक्तौ पूतविजनौ' इत्यमरः। अचल इन्द्रकीलो हरेस्तनयस्यार्जुनस्य तपसे तपश्चर्यार्थमधिवस्तुमधिष्ठातुम्। तन्निक्रियाप-

क्षया समानकर्तृकत्वात्तुमुन् । अचलां धृतिमुत्साहमाततान । अत्राचलविशेषणपदार्थ-
स्य धृतिकरणहेतुत्वात्काव्यलिङ्गमलङ्कारः ॥ १८ ॥

प्रणिधाय तत्र विधिनाथ धियं दधतः पुरातनमुनेर्मुनिताम् ।
श्रममादधावसुकरं न तपः किमिवावसादकरमात्मवताम् ॥१९॥

अन्वयः—अथ, तत्र, विधिना, धियम् , प्रणिधाय, मुनिताम् , दधतः, पुरातन-मुनेः, असुकरम् , तपः, श्रमम् , न, आदधौ । आत्मवताम् , अवसादकरम् , किमिव,॥१९॥

प्रणिधायेति ॥ अथ तत्रादौ विधिना योगशास्त्रानुसारेण धियं चित्तवृत्तिं प्रणिधाय ध्येयविषये धियं नियम्य । 'नेर्गद-' इत्यादिना णत्वम् । मुनितां दधतः । तपस्यत इत्यर्थः । पुरातनमुनेः । अर्जुनस्येत्यर्थः । असुकरं दुष्करं तपःश्रमं खेदं नादधौ न चकार । तथाहि आत्मवतां मनस्विनामवसादकरमशान्तिजनकं किमिव । न किञ्चिदित्यर्थः । इवशब्दो वाक्यालङ्कारे ॥ १९ ॥

शमयन्धृतेन्द्रियशमैकसुखः शुचिभिर्गुणैरघमयं स तमः ।
प्रतिवासरं सुकृतिभिर्ववृधे विमलः कलाभिरिव शीतरुचिः ॥२०॥

अन्वयः—धृतेन्द्रियशमैकसुखः, शुचिभिः, गुणैः, अघमयम् , तमः, शमयन्, विमलः, सः, प्रतिवासरम् , सुकृतिभिः, कलाभिः, शीतरुचिः इव, ववृधे ॥ २० ॥

शमयन्निति ॥ धृतमिन्द्रियशमो विषयव्यावृत्तिरेवैकं मुख्यं सुखं येन स तथोक्तः । आत्माराम इत्यर्थः । अन्यत्र धृत इन्द्रियाणां शमः सन्तापनिवर्तनमेकमद्वितीयं सुखमाह्लादश्च येन स तथोक्तः । शुचिभिर्निर्मलैर्गुणैर्मैत्र्यादिभिः । अन्यत्र कान्त्यादिभिः । अघमयं पापरूपं तमोऽज्ञानम् । अन्यत्रान्धकारं च शमयन्निवर्तयन् । विमलोऽमलिनः पापरहितः शुभ्रोऽन्यत्र । सोऽर्जुनः प्रतिवासरं सुकृतिभिः सुकृतैः । तपोभिरित्यर्थः । स्त्रियां क्तिन् । कलाभिः शीतरुचिश्चन्द्र इव । ववृधे ॥ २० ॥

अधरीचकार च विवेकगुणादगुणेषु तस्य धियमस्तवतः ।
प्रतिघातिनीं विषयसङ्गरतिं निरुपप्लवः शमसुखानुभवः ॥२१॥

अन्वयः—किञ्च, विवेकगुणात् , अगुणेषु, धियम् , अस्तवतः, तस्य, निरुपप्लवः, शमसुखानुभवः, प्रतिघातिनीम् , विषयसङ्गरतिम् , अधरीचकार ॥ २१ ॥

अधरीचकारेति ॥ किञ्चेति चार्थः । विवेकस्तत्त्वावधारणं स एव गुणस्तस्मात् । तेन हेतुनेत्यर्थः । 'विभाषा गुणेऽस्त्रियाम्' इति पञ्चमी । अगुणेषु कामक्रोधादिदोषेषु, विषये । तद्विरोधेन नञ्समासः । धियं चित्तवृत्तिमस्तवतो निवारितवतस्तस्यार्जुनस्य निरुपप्लवो निर्बाधः शमसुखानुभवः शान्त्यानन्दानुभवः प्रतिघातिनीं सोपप्लवां विषय-

सद्वृत्तिं शब्दादुपभोगरुचिमधरीचकार। विषयनिःस्पृहं चकारेत्यर्थः। उत्कृष्टसुखलाभस्य प्रकृष्टवैराग्यहेतुत्वादिति भावः ॥ २१ ॥

मनसा जपैः प्रणतिभिः प्रयतः समुपेयिवानधिपतिं स दिवः।
सहजेतरौ जयशमौ दधती बिभराम्बभूव युगपन्महसी॥ २२ ॥

अन्वयः—प्रयतः, मनसा, जपैः प्रणतिभिः, दिवः, अधिपतिम्, समुपेयिवान्, सः, सहजेतरौ, जयशमौ, दधती, महसी, युगपत्, बिभराम्बभूव ॥ २२ ॥

मनसेति ॥ प्रयतोऽहिंसादिनिरतो मनसा ध्यानेन जपैर्विशिष्टमन्त्राभ्यासैः प्रणतिभिर्नमस्कारैः। एवं मनोवाक्कायकर्मभिर्दिवोऽधिपतिमिन्द्रं समुपेयिवानुपसेदिवान्सोऽर्जुनः सहजेतरौ नैसर्गिकागन्तुकौ। जीयतेऽनेनेति जयो वीररसः। 'एरच्' इत्यच्। शम्यतेऽनेनेति शमः। जयशमौ वीरशान्तिरसौ दधती पुष्णती महसी तेजसी युगपद्बिभराम्बभूव दभार। 'भीह्रीभृहुवाम्-' इति विकल्पादाम्प्रत्ययः। अत्र युगपद्वीरशान्ताधिकरणत्वाभिधानादस्य लोकाद्भुतमहिमत्वं व्यज्यते ॥ २२ ॥

शिरसा हरिन्मणिनिभः स वहन्कृतजन्मनोऽभिषवणेन जटाः।
उपमां ययावरुणदीधितिभिः परिमृष्टमूर्धनि तमालतरौ ॥२३॥

अन्वयः—हरिन्मणिनिभः, अभिषवणेन, कृतजन्मनः, जटाः, शिरसा, वहन्, सः, अरुणदीधितिभिः, परिमृष्टमूर्धनि, तमालतरौ, उपमाम्, ययौ ॥ २३ ॥

शिरसेति ॥ हरिन्मणिनिभो मरकतमणिश्यामोऽभिषवणेन स्नानेन कृतजन्मनो जनिताः। अतः पिशङ्गीरिति भावः। जटाः शिरसा वहन्सोऽर्जुनोऽरुणस्यानूरोर्दीधितिभिः परिमृष्टमूर्धनि व्याप्तशिरसि तमालतरावुपमां तमालतरोः सादृश्यं ययौ। तस्यौपम्यमुपमा। तरोरौपम्याधिकरणत्वात्तदपेक्षया सप्तमी ॥ २३ ॥

धृतहेतिरप्यधृतजिह्ममतिश्चरितैर्मुनीनधरयञ्शुचिभिः।
रचयाञ्चकार विरजाः स मृगान्कमिवेशते रमयितुं न गुणाः॥२४॥

अन्वयः—धृतहेतिः, अप्यधृतजिह्ममतिः, शुचिभिः, चरितैः, मुनीनधरयन्, विरजाः, सः, मृगान्, रचयाञ्चकार। (तथाहि) गुणाः, कमिव, रमयितुम्, न ईशते ॥ २४ ॥

धृतेति ॥ धृतहेतिर्धृतायुधोऽप्यधृता जिह्मा मतिः कुटिलमतिर्येन सः। शुचिभिश्चरितैर्मुनीनधरयंस्तिरस्कुर्वन्। वेषेणैव भीषणो न तु कर्मणेति भावः। कुतः। विरजा रजोगुणरहितः सोऽर्जुनो मृगान्रचयाञ्चकार रमयामास। 'रञ्जेर्णौ मृगरमणे नलोपो वक्तव्यः' इति नलोपः। तथाहि। गुणा दयादयः कमिव रमयितुं नेशते। कं वा वशीकर्तुं न शक्नुवन्तीति भावः। शुद्धिरेव हि परं विश्वासबीजं परस्य न वेषो नापि संस्तव इति भावः ॥ २४ ॥

अथास्य त्रिभिस्तपः सिद्धिमाह—अनुकूलेत्यादिना ॥

अनुकूलपातिनमचण्डगतिं किरता सुगन्धिमभितः पवनम् ।
अवधीरितार्तवगुणं सुखतां नयता रुचां निचयमंशुमतः ॥२५॥

अन्वयः—अनुकूलपातिनम्, अचण्डगतिम्, सुगन्धिम्, पवनम्, अभितः, किराताः, अवधीरितार्तवगुणम्, अंशुमतः, रुचाम्, निचयम् सुखताम्, नयता ॥२५॥

अनुकूलेति ॥ अनुकूलपातिनं न तु प्रतिकूलपातिनमचण्डगतिं मन्दगामिनं सुगन्धिम् । गन्धस्यैकत्वे तदेकान्तग्रहणेऽपि कवीनां निरङ्कुशत्वात्समासान्तः । अथवा केचिदागन्तुकत्वेऽप्येकवचनेन समासान्तमिच्छन्ति । पवनमभितः किरता । प्रवर्तयतेत्यर्थः । ऋतुरस्य प्राप्त आर्तवः । 'ऋतोरण्' इत्यण्प्रत्ययः । स चासौ गुणस्तिग्मत्वरूपः सोऽवधीरितस्तिरस्कृतो यस्य तमंशुमतो रुचां निचयं सुखतां सुखस्पर्शतां नयता प्रापयता । नयतेर्द्विकर्मकत्वम् ॥ २५ ॥

नवपल्लवाञ्जलिभृतः प्रचये बृहतस्तरून्गमयतावनतिम् ।
स्तृणता तृणैः प्रतिनिशं मृदुभिः शयनीयतामुपयतीं वसुधाम् ॥२६॥

अन्वयः—प्रचये, नवपल्लवाञ्जलिभृतः, बृहतः, तरून्, अवनतिम्, गमयता, प्रतिनिशम्, शयनीयताम्, उपयतीम्, वसुधाम्, मृदुभिः, तृणैः, स्तृणता ॥ २६ ॥

नवेति ॥ प्रचये पुष्पावचयप्रसङ्गे नवपल्लवा एवाञ्जलयस्तान्बिभ्रतीति तथोक्तान्बृहत उच्चांस्तरूनवनतिं नम्रतां गमयता । 'गतिबुद्धि-' इत्यादिना तरूणां कर्मत्वम् । प्रतिनिशं निशि शयनीयतामुपयतीम् । शयनस्थानभूतामित्यर्थः । वसुधां मृदुभिस्तृणैः स्तृणताच्छादयता ॥ २६ ॥

पतितैरपेतजलदान्नभसः पृषतैरपां शमयता च रजः ।
स दयालुनेव परिगाढकृशः परिचर्ययानुजगृहे तपसा ॥ २७ ॥

अन्वयः—अपेतजलदान्नभसः, पतितैः, अपाम्, पृषतैः, रजः च, शमयता, तपसा, दयालुना एव, परिगाढकृशः, सः, परिचर्यया, अनुजगृहे ॥ २७ ॥

पतितैरिति ॥ अपेतजलदान्निरभ्रान्नभसः पतितैरपां पृषतैर्जलबिन्दुभी रजश्च शमयता तपसा कर्त्रा दयालुनेवेत्युत्प्रेक्षा । दयालुत्वे हेतुं सूचयति—परिगाढः कृशोऽतिक्षीणः सोऽर्जुनः परिचर्ययोक्तविधया शुश्रूषयानुजगृहेऽनुगृहीतः । अनुग्रहोऽत्र सहकारित्वमेव सर्वभूतानुकूल्यलिङ्गात्पचेलिमं तपोऽस्येति भावः । अस्य श्लोकत्रयस्याप्येकवाक्यत्वादुत्प्रेक्षैव प्रधानालङ्कारः ॥ २७ ॥

महते फलाय तदवेक्ष्य शिवं विकसन्निमित्तकुसुमं स पुरः ।
न जगाम विस्मयवशं वशिनां न निहन्ति धैर्यमनुभावगुणः २८

अन्वयः—सः, महते, फलाय, विकसत्, शिवम्, तत्, निमित्तकुसुमम्, पुरः, अवेक्ष्य, विस्मयवशम्, न जगाम। (तथाहि) वशिनाम्, अनुभावगुणः, धैर्यम्, न निहन्ति ॥ २८ ॥

महत इति ॥ सोऽर्जुनो महते फलाय श्रेयसे सस्याय च विकसत्पूर्वोक्तं शिवं सुखदं तन्निमित्तमेव कुसुमं पुरोऽग्रेऽवेक्ष्य विस्मयवशं न जगाम। तथाहि। वशिनामनुभाव एव गुणः स च धैर्यं न निहन्ति। विस्मयादिविकारं न जनयतीत्यर्थः। जनने वा तपः क्षीयेत। 'तपः क्षरति विस्मयात्' इति स्मरणादिति भावः ॥ २८ ॥

तदभूरिवासरकृतं सुकृतैरुपलभ्य वैभवमनन्यभवम्।
उपतस्थुरास्थितविषादधियः शतयज्वनो वनचरा वसतिम् ॥२९॥

अन्वयः—सुकृतैः, अभूरिवासरकृतम्, तत्, वैभवम्, अनन्यभवम्, उपलभ्य, अस्थितविषादधियः, वनचराः, शतयज्वनः, वसतिम्, उपतस्थुः ॥ २९ ॥

तदिति ॥ सुकृतैस्तपोभिः करणैः अभूरिभिः कतिपयैरेव वासरैः कृतं तत्पूर्वोक्तं वैभवमतोऽन्यस्य न भवतीत्यनन्यभवम्। अन्यस्यासम्भवतीत्यर्थः। पचाद्यजन्तोत्तरपदेन नञ्समासः। उपलभ्य निश्चित्यास्थितविषादाः प्राप्तखेदा धियो येषां ते वनचराः। 'तत्पुरुषे कृति बहुलम्' इति बहुलग्रहणाल्लुक्। शतेन शतस्य वा मखानां यज्वनः शतक्रतोः। अत्र सङ्ख्येयविशेषलाभो यजिसन्निधानादवगन्तव्यः। 'यज्वा तु विधिनेष्टवान्' इत्यमरः। 'सुयजोर्ङ्वनिप्'। वसतिमुपतस्थुः प्रापुः ॥ २९ ॥

विदिताः प्रविश्य विहितानतयः शिथिलीकृतेऽधिकृतकृत्यविधौ।
अनपेतकालमभिरामकथाः कथयाम्बभूवुरिति गोत्रभिदे ॥ ३० ॥

अन्वयः—विदिताः, प्रविश्य, विहितानतयः, अधिकृतकृत्यविधौ, शिथिलीकृते, अनपेतकालम्, गोत्रभिदे, इति, अभिरामकथाः, कथयाम्बभूवुः ॥ ३० ॥

विदिता इति ॥ वनचरा इत्यनुवर्तनीयम्। विदिता ज्ञाताः। अनुमतप्रवेशाः सन्त इत्यर्थः। प्रविश्य विहितानतयः कृतप्रणामा अधिकृतकृत्यस्य नियुक्तकर्मणः शैलरक्षणात्मकस्य विधावनुष्ठाने शिथिलीकृते सति। अनपेतकालमनतिक्रान्तकालं यथा तथा गोत्रभिदे शक्रायेति वक्ष्यमाणप्रकारेणाभिरामकथाः श्राव्यवाचः। 'चिन्तिपूजाकथिकुम्बिचर्चश्च' इत्यङ्प्रत्ययः। कथयाम्बभूवुः ॥ ३० ॥

शुचिवल्कवीततनुरन्यतमस्तिमिरच्छिदामिव गिरौ भवतः।
महते जयाय मघवन्ननघः पुरुषस्तपस्यति तपञ्जगतीम् ॥ ३१ ॥

अन्वयः—शुचिवल्कवीततनुः, तिमिरच्छिदाम्, अन्यतमः इव, अनघः, पुरुषः, हे मघवन्, भवतः, गिरौ, जगतीम्, तपम्, महते जयाय, तपस्यति ॥ ३१ ॥

शुचीति ॥ शुचिना वल्केन वल्कलेन वीताच्छादिता तनुर्यस्य सः । तिमिरच्छिदां सूर्यादीनामन्यतम इव स्थित इत्युत्प्रेक्षा । अनघः पुरुषः । मघवन्, भवतो गिराविन्द्रकीले जगतीं भुवं तपंस्तापयन्महते जयाय तपस्यति तपश्चरति । 'कर्मणो रोमन्थ-' इत्यादिना क्यङि लट् ॥ ३१ ॥

जयाय तपस्यतीत्युक्तम् । तत्र हेतुमाहुः—

स बिभर्ति भीषणभुजङ्गभुजः पृथु विद्विषां भयविधायि धनुः ।
अमलेन तस्य धृतसच्चरिताश्चरितेन चातिशयिता मुनयः ॥ ३२ ॥

अन्वयः—भीषणभुजङ्गभुजः, विद्विषाम्, भयविधायि, पृथुः, धनुः, बिभर्ति । अमलेन, तस्य, चरितेन, धृतसच्चरिताः च, मुनयः, अतिशयिताः ॥ ३२ ॥

स इति ॥ भीषयेते इति भीषणौ । नन्द्यादित्वाल्ल्युप्रत्ययः । तौ च तौ भुजङ्गौ च ताविव भुजौ यस्य स तथोक्तः । पुरुषो विद्विषां भयविधायि पृथु धनुर्बिभर्ति । अतो जयार्थीत्यर्थः । अमलेन तस्य पुरुषस्य चरितेन धृतानि सच्चरितानि यैस्ते मुनयोऽतिशयिता अतिक्रान्ताः ॥ ३२ ॥

अथास्य तपःसिद्धिं वर्णयति—

मरुतः शिवा नवतृणा जगती विमलं नभो रजसि वृष्टिरपाम् ।
गुणसम्पदानुगुणतां गमितः कुरुतेऽस्य भक्तिमिव भूतगणः ॥ ३३ ॥

अन्वयः—मरुतः, शिवाः, जगती, नवतृणाः, नभः, विमलम्, रजसि, अपाम्, वृष्टिः अस्य, गुणसम्पदः, अनुगुणताम्, गमितः, भूतगणः, भक्तिम्, कुरुते इव ॥ ३३ ॥

मरुत इत्यादिना ॥ मरुतो वाताः शिवाः सुखाः । जगती पृथ्वी नवतृणा । शयनासनाद्यनुकूलेत्यर्थः । नभो विमलं नीहारादिरहितम् । रजसि सत्यपां वृष्टिर्भवतीति शेषः । किं बहुना । अस्य पुरुषस्य गुणसम्पदा भूतहितादिगुणसम्पत्त्यानुकूलतां गमितः । वशीकृत इत्यर्थः । भूतगणः पृथिव्यादिपञ्चकं भक्तिं सेवां कुरुत इत्युत्प्रेक्षा ॥ ३३ ॥

इतरेतरानभिभवेन मृगास्तमुपासते गुरुमिवान्तसदः ।
विनमन्ति चास्य तरवः प्रचये परवान्स तेन भवतेव नगः ॥ ३४ ॥

अन्वयः—मृगाः, तम्, अन्तसदः, गुरुम् इव, इतरेतरानभिभवेन, उपासते । प्रचये, तरवः, अस्य, विनमन्ति । सः, नगः, भवतेव, तेन, परवान् ॥ ३४ ॥

इतरेतरेति ॥ किं च । मृगाः पशवस्तम् । अन्तेऽन्तिके सीदन्तीत्यन्तसदोऽन्तेवासिनः । 'सत्सूद्विष-' इति क्विप् । गुरुमिवेतरेतरेषामनभिभवेनाद्रोहेणोपासते सेवन्ते ।

प्रचये पुष्पावचये तरवोऽस्य विनमन्ति । करप्रचेया भवन्तीत्यर्थः । तस्येति सम्बन्धसामान्ये षष्ठी । किं बहुना । स नग इन्द्रकीलो भवतेव तेन पुरुषेण परवान्पराधीनः । सात्त्विकस्यापि तवैव तस्यातिशयो वर्तत इत्यर्थः ॥ ३४ ॥

उरु सत्त्वमाह विपरिश्रमता परमं वपुः प्रथयतीव जयम् ।
शमिनोऽपि तस्य नवसङ्गमने विभुतानुषङ्गि भयमेति जनः ॥३५॥

अन्वयः—विपरिश्रमता, उरु, सत्वम् , आह । परमं , वपुः, जयम् , प्रथयति इव, शमिनः अपि, तस्य, नवसङ्गमने, जनः, विभुतानुषङ्गि, भयम् , एति ॥ ३५ ॥

उर्विति ॥ किं च । विपरिश्रमतायासेऽपि श्रमराहित्यमुरु महत्सत्त्वमन्तःसारमाह । दुर्बलस्य श्रमजयासम्भवादिति भावः । परममुत्तमं वपुर्जयं प्रथयति च । आकारेणैव जिष्णुत्वं गम्यत इत्यर्थः । शमिनः शान्तस्यापि तस्य नवसङ्गमनेऽपूर्वप्राप्तौ जनो विभुतायाः प्रभावस्यानुषङ्गि व्यापकम् । न तु हिंसकत्वानुषङ्गीति भावः । भयमेति । शान्तोऽद्भवं प्रभावं गमयतीति भावः ॥ ३५ ॥

अथेदृशोऽसौ क इति चेत्तन्न विद्म इत्याहुः—

ऋषिवंशजः स यदि दैत्यकुले यदि वान्वये महति भूमिभृताम् ।
चरतस्तपस्तव वनेषु सदा न वयं निरूपयितुमस्य गतिम् ॥३६॥

अन्वयः—सः, ऋषिवंशजः, यदि, वा, दैत्यकुले, यदि वा, महति, भूमिभृताम्, अन्वये, तव, वनेषु तपः, चरतः, अस्य, गतिम् , निरूपयितुम्, वयम्, न, सहाः ॥३६॥

ऋषीति ॥ स पुरुषः । ऋषिवंशजा वेति शेषः । काकुर्वा । यदि वा दैत्यकुले । जात इति शेषः । यदि वा महति भूमिभृतामन्वये जातः । तव वनेषु तपश्चरतोऽस्य गतिं स्वरूपं निरूपयितुं वयम् । सहन्त इति सहाः । पचाद्यच् । न सहाः स्म इति शेषः ॥ ३६ ॥

अपृष्टपरिभाषणापराधं परिहरन्ति—

विगणय्य कारणमनेकगुणं निजयाथवा कथितमल्पतया ।
असदप्यदः सहितुमर्हसि नः क वनेचराः क निपुणा यतयः ॥३७॥

अन्वयः—अनेकगुण, कारणम् , विगणय्य, अथवा, निजया, अल्पतया, कथितम्, नः, अदः, असत् अपि, सहितुम् , अर्हसि । वनेचराः, क । निपुणाः यतयः, क ॥३७॥

विगणय्येति ॥ अनेकगुणं बहुफलम् । इन्द्रत्वाद्यनेकफलसाधकत्वेन योग्यमित्यर्थः । कारणं तपोरूपं विगणय्य विचार्य । अथवा निजया नैसर्गिक्याल्पतया बालिश्येनाज्ञानत्वेन वा कथितं नोऽस्माकमद इदम् । वचनमित्यर्थः । असदसाध्वपि सहितुं सोढुम् । 'तीषसह—' इत्यादिना विकल्पादिडागमः । अर्हसि योग्योऽसि ।

तर्हि सदैव किं नोक्तं तत्राहुः। वनेचराः क। निपुणा यतयो विवेकबुद्धयः क। नोभयं सङ्गच्छत इत्यर्थः। अज्ञानं नापराध्यतीति भावः। अर्थान्तरन्यासोऽलङ्कारः॥ ३७॥

अधिगम्य गुह्यकगणादिति तन्मनसः प्रियं प्रियसुतस्य तपः।
निजुगोप हर्षमुदितं मघवा नयवर्त्मगाः प्रभवतां हि धियः॥३८॥

अन्वयः—मघवा, इति, गुह्यकगणात्, तत्, मनसः, प्रियम्, प्रियसुतस्य, तपः, अधिगम्य, उदितम्, हर्षम्, निजुगोप। तथा हि, प्रभवताम्, धियः, नयवर्त्मगाः॥३८॥

अधिगम्येति॥ मघवेन्द्र इति पूर्वोक्तं गुह्यकगणात्तन्मनसः प्रियं प्रियसुतस्यार्जुनस्य तपोऽधिगम्य ज्ञात्वा। गुप्त्यपेक्षया समानकर्तृकत्वात्क्त्वानिर्देशः। उदितं तत्तपसो देवकार्यार्थत्वादुत्पन्नं हर्षं निजुगोप गोपयामास। तथा हि। प्रभवतां प्रभूणां धियो नयवर्त्मगा नीतिमार्गानुसारिण्यो हि। अन्यथा मन्त्रभेदे कार्यहानिः स्यादिति भावः॥ ३८॥

प्रणिधाय चित्तमथ भक्ततया विदितेऽप्यपूर्व इव तत्र हरिः।
उपलब्धुमस्य नियमस्थिरतां सुरसुन्दरीरिति वचोऽभिदधे॥३९॥

अन्वयः—अथ, हरिः, चित्तम्, प्रणिधाय, तत्र, भक्ततया, विदिते अपि, अपूर्वः इव, अस्य, नियमस्थिरताम्, उपलब्धुम्, सुरसुन्दरीः, इति, वचः, अभिदधे॥ ३९॥

प्रणिधायेति॥ अथ हरिरिन्द्रश्चित्तं प्रणिधाय विषयान्तरपरिहारेणात्मन्यवस्थाप्य तत्र तस्मिन्नर्जुने भक्ततया विदिते सत्यपि। उपलक्षणे तृतीया। अपूर्व इव। अविदित इवेत्यर्थः। 'पूर्वादिभ्यो नवभ्यो वा' इति विकल्पान्न स्मिन्नादेशः। अस्यार्जुनस्य नियमस्थिरतां दार्ढ्यमुपलब्धुम्। परीक्षितुमित्यर्थः। लोकप्रतीत्यर्थमिति भावः। सुरसुन्दरीरिति वक्ष्यमाणप्रकारं वचोऽभिदधे॥ ३९॥

सुकुमारमेकमणु मर्मभिदामतिदूरगं युतममोघतया।
अविपक्षमस्त्रमपरं कतमद्विजयाय यूयमिव चित्तभुवः॥ ४०॥

अन्वयः—मर्मभिदाम्, अस्त्रम्, अपरम्, कतमत्, यूयम् इव, सुकुमारम्, एकम्, अणु, अतिदूरगम्, अमोघतया, युतम्, तथा, अविपक्षम्, चित्तभुवः, विजयाय॥४०॥

सुकुमारमिति॥ मर्मभिदां मर्मच्छेदिनाम्। अस्त्रान्तराणां मध्य इत्यर्थः। 'यतश्च निर्धारणम्' इति षष्ठी। अमरमन्यत्कतमत्। 'वा बहूनां जातिपरिप्रश्ने डतमच्'। यूयमिव सुकुमारं कोमलं न तु कठिनम्। अन्यत्तु कठिनं भवति। तथैकं न बहु। तत्त्वनेकं भवति। तथाणु सूक्ष्मं न स्थूलम्। अलक्ष्यलक्ष्यप्रवेशित्वादिति भावः। तत्तु लक्ष्यलक्ष्यप्रवेशि तथातिदूरगं दूरलक्ष्यभेदि। तत्तु सीमपलक्ष्यभेदि। तथाऽमोघतयाऽमोघत्वगुणेन युतं युक्तम्। न कदाचिद्व्यभिचरतीति भावः। अन्यत्तु कदाचि-

दपि लक्ष्यादपराध्यति । तथा विपक्षमसत्प्रतीकारम् । अन्यत्तु विद्यमानप्रतीकारम् । चित्तभुवः कामस्य । कर्तरि षष्ठी । विजयाय । एतद्विशेषणविशिष्टमस्त्रमस्तीति शेषः । न किंचिदस्तीत्यर्थः । अत्रोपमालङ्कारः । साभिप्रायविशेषणत्वात्परिकरालङ्कारश्च । तयोरुभयोरङ्गाङ्गिभावेन सङ्करः ॥ ४० ॥

असामर्थ्यशङ्कां परिहरति—

भववीतये हतबृहत्तमसामवबोधवारि रजसः शमनम् ।
परिपीयमाणमिव वोऽसकलैरवसादमेति नयनाञ्जलिभिः ॥ ४१ ॥

अन्वयः—भववीतये, हतबृहत्तमसाम्, रजसः, शमनम् अवबोधवारि, वः, असकलैः, नयनाञ्जलिभिः, परिपीयमाणम् इव, अवसादम् इति ॥ ४१ ॥

भवेति ॥ भववीतये संसारनिवृत्तये हतबृहत्तमसां निरस्तमहामोहानां योगिनां सम्बन्धि रजो गुणः । रजो धूलिरिति श्लिष्टरूपकम् । तस्य शमनं निवर्तकमवबोधस्तत्त्वज्ञानमेव वारि तद्वो युष्माकमसकलैरसमग्रैर्नयनान्येवाञ्जलयस्तैः परिपीयमाणमिवेत्युत्प्रेक्षा । अवसादं क्षयमेति । मुक्तानपि बध्नन्तीनां व कथमसामर्थ्यमिति भावः । अत्रोत्प्रेक्षारूपकयोः सङ्करः ॥ ४१ ॥

बहुधा गतां जगति भूतसृजा कमनीयतां समभिहृत्य पुरा ।
उपपादिता विदधता भवतीः सुरसद्मयानसुमुखी जनता ॥४२॥

अन्वयः—पुरा, जगति, बहुधा, गतां, कमनीयताम्, समभिहृत्य, भवतीः, विदधता, भूतसृजा, जनता, सुरसद्मयानसुमुखी, उपपादिता, ॥ ४२ ॥

बहुधेति ॥ किं च । पुरा जगति बहुधा गतां नानामुखेन विप्रकीर्णां कमनीयतां चन्द्राद्युपमानद्रव्यगतलावण्यं समभिहृत्य संगृह्य भवतीर्विदधता सृजता भूतसृजा ब्रह्मणा जनता जनसमूहः । 'ग्रामजन-' इत्यादिना तल् । सुरसद्मयानसुमुखी स्वर्लोकयात्राप्रवणोपपादिता कृता । स्वर्गस्यापि यत्प्रसादात्सर्वलोकश्लाघ्यत्वम्, तासां वः कथमसामर्थ्यमिति भावः । अत्राप्सरसां प्रकीर्णलावण्यसंग्रहासम्बन्धेऽपि तत्सम्बन्धाभिधानादतिशयोक्तिः ॥ ४२ ॥

अथ कार्यांशमाह—

तदुपेत्य विघ्नयत तस्य तपः कृतिभिः कलासु सहिताः सचिवैः ।
हृतवीतरागमनसां ननु वः सुखसङ्गिनं प्रति सुखावजितिः ॥४३॥

अन्वयः—तत्, कलासु, कृतिभिः, सचिवैः, सहिताः, उपेत्य, तस्य, तपः, विघ्नयत, ननु, हृतवीतरागमनसाम्, वः, सुखसङ्गिनम्, प्रति, सुखावजितिः ॥ ४३ ॥

तदिति ॥ तत्तस्मात्समर्थत्वात्कलासु गीतवाद्यादिषु कृतिभिः कुशलैः सचिवै-

गन्धर्वैः सहिता उपेत्य गत्वा तस्य तपो विघ्नयत विघ्नवत्कुरुत। विहतेत्यर्थः। विघ्नवच्छब्दान्मत्वन्तात् 'तत्करोति-' इति णिचि लोट्। णाविष्ठवद्भावान्मतुपो लुक्। न चात्रासामर्थ्यशङ्का कार्येत्यर्थान्तरन्यासेनाह—हृतेति। ननु सम्बोधने। हे अप्सरसः, हृतानि वशीकृतानि वीतरागाणां निस्पृहाणां मुमुक्षूणां मनांसि चित्तानि याभिस्तासां वो युष्माकमप्सरसां सुखसङ्गिनं पुरुषं प्रति सुखाभिलाषिणं प्रत्यवजितिर्विजयः सुखा सुखसाध्या न तु दुष्करा खलु। एतेनायं सुखार्थी न मुमुक्षुरित्युक्तम्। अर्थान्तरन्यासः॥ ४३॥

अथ सुखसङ्गित्वलिङ्गमाह—

अविमृष्यमेतदभिलष्यति स द्विषतां वधेन विषयाभिरतिम्।
भववीतये न हि तथा स विधिः क्व शरासनं क्व च विमुक्तिपथः॥४४॥

अन्वयः—(हे अप्सरसः) सः, द्विषताम्, वधेन, विषयाभिरतिम्, अभिलष्यति, एतत्, अविमृष्यम्, हि, सः, विधिः, भववीतये, न, (कुतः) शरासनम्, क्व, विमुक्तपथश्च क्व॥४४॥

अविमृष्येति॥ हे अप्सरसः, स पुरुषो द्विषतां शत्रूणां वधेन शत्रुहननद्वारा विषयाभिरतिं विषयसुखमभिलष्यति वाञ्छति। 'वा भ्राश-' इत्यादिना श्यन्प्रत्ययः। एतद्विषयासक्तत्वमविमृष्यमविचार्यम्। अविमृष्यमसंदिग्धव्यमिति। 'ऋदुपधाच्चाक्लृपिचृतेः' इति क्यप्। भवतीभिर्न संदिग्धव्यमित्यर्थः। हि यस्मात्स विधिः 'स बिभर्ति भीषणभुजङ्गभुजः' इत्यादिश्लोकोक्तोऽनुष्ठानप्रकारो भववीतये संसारमुक्तये न भवति। कुत इत्याह—शरासनं धनुः क्व, विमुक्तेः पन्थाश्च क्व। द्वयं परस्परं विरुद्धमित्यर्थः। न खलु हिंसासाध्या मुक्तिरिति भावः। अर्थान्तरन्यासोऽलङ्कारः॥ ४४॥

न च शापभयमपि सम्भाव्यमस्मादित्याह—

पृथुधाम्नि तत्र परिबोधि च मा भवतीभिरन्यमुनिवद्विकृतिः।
स्वयशांसि विक्रमवतामवतां न वधूष्वघानि विमृषन्ति धियः॥४५॥

अन्वयः—पृथुधाम्नि, तत्र, अन्यमुनिवद्, विकृतिः च, भवतीभिः, मा परिबोधि, स्वयशांसि, अवताम्, विक्रमवताम्, धियः, वधूषु, अघानि, न विमृषन्ति॥४५॥

पृथ्विति॥ पृथुधाम्नि महातेजसि तत्र तस्मिन्पुरुषविषयेऽन्यमुनिवदन्यस्मिन्मुनाविव। 'तत्र तस्येव' इति वतिप्रत्ययः। विकृतिः कोपविकारश्च भवतीभिर्मापरिबोधि मा विज्ञायि। मा शङ्कीति यावत्। बुध्यतेः कर्मणि लुङ्। माङ्योगादाशीरर्थेऽडागमाभावश्च। तथा हि। स्वयशांस्यवतां रक्षताम्। यशोधनानामित्यर्थः। विक्रमवतां धियश्चित्तानि वधूषु स्त्रीविषयेष्वघानि व्यसनानि। 'दुःखैनोव्यसनेष्वघम्' इति वैजयन्ती। न विमृषन्ति। अर्थान्तरन्यासः। स्त्रीहिंसायाः शूराणां यशोहानिकरत्वान्न सर्वथा वो हिनस्ति स इत्यर्थः॥ ४५॥

आशंसितापचितिचारु पुरः सुराणा-
मादेशमित्यभिमुखं समवाप्य भर्तुः ।
लेभे परां द्युतिममर्त्यवधूसमूहः
सम्भावना ह्यधिकृतस्य तनोति तेजः ॥ ४६ ॥

अन्वयः—अमर्त्यवधूसमूहः, सुराणाम्, पुरः, आशंसितापचितिचारु, अभिमुखम्, भर्तुः, इति, आदेशम्, समवाप्य, पराम्, द्युतिम्, लेभे। तथाहि, अधिकृतस्य, सम्भावना, तेजः, तनोति, ॥ ४६ ॥

आशंसितेति ॥ अमर्त्यवधूसमूहोऽप्सरसां गणः सुराणां पुरोऽग्र आशंसितापचितिभिरपेक्षितसम्भावनाभिश्चारु यथा तथा। 'क्षयार्चयोरपचितिः' इत्यमरः। अभिमुखं समक्षं भर्तुः स्वामिन इति पूर्वोक्तमादेशं नियोगं समवाप्य परां द्युतिं लेभे। तथा हि। अधिकृतस्य क्वचिदधिकारे नियुक्तस्य सम्भावना स्वामिकृता पूजा तेजः कान्ति तनोति ॥ ४६ ॥

प्रणतिमथ विधाय प्रस्थिताः सद्मनस्ताः
स्तनभरनमिताङ्गीरङ्गनाः प्रीतिभाजः ।
अचलनलिनलक्ष्मीहारि नालं बभूव
स्तिमितममरभर्तुर्द्रष्टुमक्ष्णां सहस्रम् ॥ ४७ ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये षष्ठः सर्गः ।

अन्वयः—अथ, प्रणतिम्, विधाय, सद्मनः, प्रस्थिताः, स्तनभरनमिताङ्गीः, प्रीतिभाजः, ताः, अङ्गनाः, अचलनलिनलक्ष्मीहारि, स्तिमितम्, अमरभर्तुः, अक्ष्णाम्, सहस्रम्, द्रष्टुम्, अलम्, न बभूव ॥ ४७ ॥

प्रणतिमिति ॥ अथ प्रणतिं विधाय सद्मन इन्द्रभवनात्प्रस्थिताः प्रचलिताः स्तनभरैर्नमितान्यङ्गानि यासां ताः। 'अङ्गगात्रकण्ठेभ्यो वक्तव्यम्' इति ङीष्। प्रीतिभाजः स्वामिसम्भावनया सन्तुष्टास्ता अङ्गना अचलनलिनानां स्थिरकमलानां लक्ष्मीर्हरतीति तत्तथोक्तम्। तद्वन्मनोहरमित्यर्थः। कुतः। स्तिमितं विस्मयनिश्चलममरभर्तुरक्ष्णां सहस्रं कर्तृ द्रष्टुमलं समर्थं न बभूव। तासां सौन्दर्यसागरस्योद्वेलत्वादिति भावः। अत्रोपमालङ्कारः ॥ ४७ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां षष्ठः सर्गः समाप्तः ।

सप्तमः सर्गः ।

श्रीमद्भिः सरथगजैः सुराङ्गनानां गुप्तानामथ सचिवैस्त्रिलोकभर्तुः ।
संमूर्च्छन्नलघुविमानरन्ध्रभिन्नः प्रस्थानं समभिदधे मृदङ्गनादः ॥ १ ॥

अन्वयः—अथ, श्रीमद्भिः, सरथगजैः, त्रिलोकभर्तुः, सचिवैः, गुप्तानाम्, सुराङ्गनानाम्, प्रस्थानम्, अलघुविमानरन्ध्रभिन्नः, संमूर्च्छन्, मृदङ्गनादः, समभिदधे ॥ १ ॥

श्रीमद्भिरिति ॥ अथ प्रस्थानानन्तरं श्रीमद्भिः शोभावद्भिः । सह रथगजेन सरथगजास्तैः । 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः । त्रयाणां लोकानां भर्तुस्त्रिलोकभर्तुरिन्द्रस्य । 'तद्धितार्थ–' इत्यादिनोत्तरपदसमासः । सचिवैर्गन्धर्वैर्गुप्तानां सुराङ्गनानां प्रस्थानं गमनमलघुषु महत्सु विमानरन्ध्रेषु विमानानां कुक्षिकुहरेषु भिन्नः प्रतिध्वानैरनेकीभूतोऽतएव संमूर्च्छन्व्याप्नुवन्मृदङ्गनादः समभिदधे आचख्यौ । पौरेभ्य इति शेषः । अस्मिन्सर्गे प्रहर्षिणीवृत्तम्—'म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्' इति लक्षणात् ॥ १ ॥

सोत्कण्ठैरमरगणैरनुप्रकीर्णान्निर्याय ज्वलितरुचः पुरान्मघोनः ।
रामाणामुपरि विवस्वतः स्थितानां नासेदे चरितगुणत्वमातपत्रैः ॥ २ ॥

अन्वयः—सोत्कण्ठैः, अमरगणैः, अनुप्रकीर्णान्, ज्वलितरुचः, मघोनः, पुरात्, निर्याय, विवस्वतः, उपरि, स्थितानाम्, रामाणाम्, आतपत्रैः चरितगुणत्वम्, नासेदे ॥ २ ॥

सोत्कण्ठैरिति ॥ सोत्कण्ठैः । अवेक्षणोत्सुकैरित्यर्थः । अमरगणैरनुप्रकीर्णादाकीर्णाज्ज्वलितरुचो दीप्तप्रभान्मघोन इन्द्रस्य पुरादमरावत्या निर्याय निर्गत्य । यातेः क्त्वो ल्यप् । विवस्वत उपरि स्थितानां रामाणाम् । आतपात्त्रायन्त इत्यातपत्रैः । 'सुपि–' इति योगविभागात्कप्रत्ययः । चरितगुणत्वं सार्थकत्वं नासेदे न प्रापे । तासां सूर्योपरिस्थितत्वादातपासम्भवादिति भावः ॥ २ ॥

धूतानामभिमुखपातिभिः समीरैरायासादविशदलोचनोत्पलानाम् ।
आनिन्ये मदजनितां श्रियं वधूनामुष्णांशुद्युतिजनितः कपोलरागः ॥ ३ ॥

अन्वयः—अभिमुखपातिभिः, समीरैः, धूतानाम्, आयासात्, अविशदलोचनोत्पलानाम्, वधूनाम्, उष्णांशुद्युतिजनितः, कपोलरागः, मदजनिताम्, श्रियम्, आनिन्ये ॥ ३ ॥

धूतानामिति ॥ अभिमुखपातिभिः समीरैः प्रतिकूलवायुभिर्धूतानामिति दुर्निमित्तसूचनम् । आयासाद्गतिप्रयासादविशदलोचनोत्पलानां वधूनामुष्णांशुद्युतिजनित आतपकृतः कपोलानां रागः पाटलत्वम् । मदेन जनितां श्रियम् । तत्सदृशीं श्रियमि-

स्यर्थः । अत एव निदर्शनालङ्कारः । आनिन्य आनीतवान् । वधूरिति शेषः । आङ्पूर्वान्नयतेः कर्तरि लिट् । ञकारानुबन्धत्वादात्मनेपदम् ॥ ३ ॥

तिष्ठद्भिः कथमपि देवतानुभावादाकृष्टैः प्रजविभिरायतं तुरङ्गैः ।
नेमीनामसति विवर्तने रथौघैरासेदे वियति विमानवत्प्रवृत्तिः ॥४॥

अन्वय.—कथमपि, देवतानुभावात्, तिष्ठद्भिः, प्रजविभिः, तुरङ्गैः, आयतम्, आकृष्टैः, रथौघैः, वियति, नेमीनाम्, विवर्तने, असति, विमानवत्प्रवृत्तिः, आसेदे॥४॥

तिष्ठद्भिरिति ॥ कथमपि बाढम् । 'कथमादि तथाप्यन्ते यत्ने गौरवबाढयोः' इति वैजयन्ती । देवतानामनुभावात्तिष्ठद्भि । अपतद्भिरित्यर्थः । रथविशेषणमेतत् । प्रजविभिर्वेगवद्भिस्तुरङ्गैरायतं दूरमाकृष्टै रथौघैर्वियत्याकाशे नेमीनां चक्रधाराणाम् । 'चक्रधारा प्रधिर्नेमिः' इति यादवः । विवर्तने भ्रमणेऽसति विमानवद्विमानानामिवेत्युपमा । 'तत्र तस्येव' इति वतिप्रत्ययः । प्रवृत्तिर्गतिरासेदे प्राप्ता । सदेः कर्मणि लिट् ॥ ४ ॥

कान्तानां कृतपुलकः स्तनाङ्गरागे वक्त्रेषु च्युततिलकेषु मौक्तिकाभः ।
सम्पेदे श्रमसलिलोद्गमो विभूषां रम्याणां विकृतिरपि श्रियं तनोति ५।

अन्वय —कान्तानाम्, स्तनाङ्गरागे, कृतपुलकः, च्युततिलकेषु, वक्त्रेषु, मौक्तिकाभः, श्रमसलिलोद्गमः, विभूषाम्, सम्पेदे । (तथाहि) रम्याणाम्, विकृतिः अपि, श्रियम्, तनोति ॥ ५ ॥

कान्तानामिति ॥ कान्तानां स्तनानामङ्गरागे कृतपुलको जनितोद्भेदः । कृतरोमाञ्च इत्यर्थः । च्युता प्रमृष्टास्तिलका येषां तेषु वक्त्रेषु मौक्तिकाभः श्रमसलिलोद्गमः स्वेदोद्भेदो विभूषां भूषणं सम्पेदे सम्पन्नः । कर्तरि लिट् । तथाहि । रम्याणां स्वभावसुन्दराणां विकृतिरपि श्रियं तनोति । अतः स्वेदस्यापि विभूषणत्वमुपपद्यत इति भावः ॥ ५ ॥

राजद्भिः पथि मरुतामभिन्नरूपैरुल्कार्चिःस्फुटगतिभिर्ध्वजांशुकानाम्
तेजोभिः कनकनिकापराजिगौरैरायाम क्रियत इव स्म सातिरेकः ॥६॥

अन्वयः—मरुताम्, पथि, राजद्भिः, अभिन्नरूपैः, उल्कार्चिः स्फुटगतिभिः कनकनिकाषराजिगौरैः, ध्वजाङ्कुशानाम्, तेजोभिः, आयमः, सातिरेकः, क्रियतेस्म इव ॥६॥

राजद्भिरिति ॥ मरुतां पथ्याकाशे राजद्भिर्दीप्यमानैरभिन्नरूपैरविच्छिन्नाकारैरतएवोल्कानामर्चीषीव स्फुटगतीनि दीप्तमार्गाणि येषां तैः । कनकस्य निकाषः कषणं तस्य राजी रेखा तद्वद्गौरैररुणैः । 'गौरः पीतेऽरुणे श्वेते' इति विश्वः । ध्वजांशुकानां तेजोभिः पताकाकान्तिभिरायामस्तेषामेव दैर्घ्यं सातिरेकः सातिशयः क्रियते स्मेव

कृत इव । दीर्घा ध्वजपटाः स्वतेजःप्रसारेण दीर्घतमा इव लक्ष्यन्त इवेत्युत्प्रेक्षा । सा चोल्काद्युपमानुप्राणिता ॥ ६ ॥

रामाणामवजितमाल्यसौकुमार्ये सम्प्राप्ते वपुषि सहत्वमातपस्य ।
गन्धर्वैरधिगतविस्मयैःप्रतीये कल्याणी विधिषु विचित्रता विधातुः॥७॥

अन्वयः—माल्यसौकुमार्ये, रामाणाम्, वपुषि, आतपस्य, सहत्वम्, सम्प्राप्ते, अधिगतविस्मयैः, गन्धर्वैः, विधातुः, विधिषु, कल्याणी, विचित्रता, प्रतीये ॥ ७ ॥

रामाणामिति ॥ मालैव माल्यं तस्य सौकुमार्यमवजितं येन तस्मिन् । कुसुमादपि सुकुमार इत्यर्थः । रामाणां वपुष्यातपस्य । कृद्योगे कर्मणि षष्ठी । सहत इति सहः क्षमः पचाद्यच् । तस्य भावः सहत्वम् । तत्सम्प्राप्ते सत्यधिगतविस्मयैः सम्प्राप्ताश्चर्यैर्गन्धर्वविधातुर्विधिषु सृष्टिषु कल्याणी साधीयसी । उपकारकत्वादिति भावः । विचित्रता नानाविधत्वं प्रतीयेऽवगता ज्ञाता । प्रतिपूर्वादिणः कर्मणि लिट् ॥ ७ ॥

सिन्दूरैः कृतरुचयः सहेमकक्ष्याः स्रोतोभिस्त्रिदशगजा मदं क्षरन्तः।
सादृश्यं ययुररुणांशुरागभिन्नैर्वर्षद्भिः स्फुरितशतह्रदैः पयोदैः ॥८॥

अन्वयः—सिन्दूरैः, कृतरुचयः, सहेमकक्ष्याः, स्रोतोभिः, मदम्, क्षरन्तः, त्रिदशगजाः, अरुणांशुरागभिन्नैः, वर्षद्भिः, स्फुरितशतह्रदैः पयोदैः, सादृश्यम्, ययुः, ॥ ८ ॥

सिन्दूरैरिति ॥ सिन्दूरैर्नागसंभवाख्यै रागद्रव्यैः । 'सिन्दूरं नागसम्भवम्' इत्यमरः । कृतरुचयः । अलङ्कृता इत्यर्थः । सह हेम्नः कक्ष्याभिर्मध्येभबन्धनैः सहेमकक्ष्याः । 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः । 'कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने' इत्यमरः । स्रोतोभिः सप्तभिर्मदनाडीभिः । 'करात्कटाभ्यां मेढ्राच्च नेत्राभ्यां च मदच्युतिः' इति पालकाप्ये । करान्नासारन्ध्राभ्यामित्यर्थः । मदं क्षरन्तो वर्षन्तस्त्रिदशगजा अरुणस्यार्कस्यांशूनां रागेणारुण्येन भिन्नैः संसृष्टैर्वर्षद्भिः स्फुरितशतह्रदैः स्फुरिततडित्कैः पयोदैः सादृश्यं ययुरित्युपमालङ्कारः ॥ ८ ॥

अत्यर्थं दुरुपसदादुपेत्य दूरं पर्यन्तादहिममयूखमण्डलस्य ।
आशानामुपरचितामिवैकवेणीं रम्योर्मिं त्रिदशनदीं ययुर्बलानि॥९॥

अन्वयः—बलानि, अत्यर्थम्, दुरुपसदात्, अहिममयूखमण्डलस्य, पर्यन्तात्, दूरम्, उपेत्य, आशानाम्, अपरचिताम्, एकवेणीम् इव, रम्योर्मिम्, त्रिदशनदीम्, ययुः ॥ ९ ॥

अत्यर्थमिति ॥ बलानि सैन्यान्यत्यर्थं दुरुपसदाद्दुःसहादहिममयूखमण्डलस्य सूर्यबिम्बस्य पर्यन्तात्समीपाद्दूरमुपेत्यागत्याशानामुपरचितां गुम्फितामेकवेणीमिव स्थि-

तामिवेत्युत्प्रेक्षा । रम्या ऊर्मयस्तरङ्गा भङ्गयश्च यस्यास्तां त्रिदशनदीं मन्दाकिनीं ययुः प्रापुः ॥ ९ ॥

आमत्तभ्रमरकुलाकुलानि धुन्वन्नुद्धूतग्रथितरजांसि पङ्कजानि ।
कान्तानां गगननदीतरङ्गशीतः सन्तापं विरमयति स्म मातरिश्वा ॥

अन्वयः—आमत्तभ्रमरकुलाकुलानि, उद्धूतग्रथितरजांसि, पङ्कजानि, धुन्वन्, गगननदीतरङ्गशीतः, मातरिश्वा, कान्तानाम्, सन्तापम्, विरमयति स्म ॥ १० ॥

आमत्तेति ॥ आमत्तैर्भ्रमरकुलैराकुलान्युद्धूतान्युत्थापितानि ग्रथितान्यन्योन्यसम्बद्धानि च रजांसि येषु तानि पङ्कजानि धुन्वन्कम्पयन् । सुरभिरित्यर्थः । गगननदीतरङ्गैः शीतो मातरिश्वा वायुः । कान्तानां सन्तापं विरमयति स्म शमयामास । मातर्यन्तरिक्षे श्वयतीति मातर्या श्वयतीति वेति नैरुक्ताः ॥ १० ॥

सम्भिन्नैरिभतुरगावगाहनेन प्राप्योर्वीरनुपदवीं विमानपङ्क्तीः ।
तत्पूर्वं प्रतिविदधे सुरापगाया वप्रान्तस्खलितविवर्तनं पयोभिः ॥११॥

अन्वयः—इभतुरगावगाहनेन, सम्भिन्नैः, सुरापगायाः, पयोभिः, पदवीम् अनु, उर्वीः, विमानपङ्क्तीः, प्राप्य, तत्पूर्वम्, वप्रान्तस्खलितविवर्तनम्, प्रतिविदधे ॥ ११ ॥

*सम्भिन्नैरिति ॥ इभतुरगावगाहनेन हस्त्यश्वावलोडनेन सम्भिन्नैः संक्षुभितैः सुरा*पगायाः पयोभिः कर्तृभिः । पदवीमनु । पदव्यामित्यर्थः । 'लक्षणेत्थंभूत–' इत्यादिना कर्मप्रवचनीयत्वाद्द्वितीया । उर्वीर्विपुला विमानपङ्क्तीः प्राप्य । तदेव पूर्वं तत्पूर्वमिदं प्रथमं यथा तथाकाशगङ्गायास्तटाभावादिति भावः । वप्रान्तेषु रोधोभूमिषु स्खलितानि तैर्विवर्तनं प्रत्यावृत्तिर्वप्रान्तस्खलितविवर्तनं तटान्तरस्खलनप्रतिवर्तनम् । 'वप्रः पितरि केदारे वप्रः प्राकाररोधसोः' इति वैजयन्ती । प्रतिविदधे चक्र इत्यतिशयोक्तिः ॥११॥

क्रान्तानां ग्रहचरितात्पथो रथानामक्षाग्रक्षतसुरवेश्मवेदिकानाम् ।
निःसङ्गं प्रधिभिरुपाददे विवृत्तिः संपीडक्षुभितजलेषु तोयदेषु ॥१२॥

अन्वयः—ग्रहचरितात्, पथः, क्रान्तानाम्, अक्षाग्रक्षतसुरवेश्मवेदिकानाम्, रथानाम्, प्रधिभिः, संपीडक्षुभितजलेषु, तोयदेषु, निःसङ्गम्, विवृत्तिः, उपाददे ॥१२॥

क्रान्तानामिति ॥ ग्रहैः सूर्यादिभिश्चरिताद्दाश्रितात् । कर्मणि क्तः । पथो मार्गात्क्रान्तानां निष्क्रान्तानामक्षाश्चक्राधारा दारुविशेषास्तेषामग्रैः क्षता दारिताः सुरवेश्मवेदिका यैस्तेषां रथानां प्रधिभिर्नेमिभिश्चक्रान्तैः । 'चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमान्' इत्यमरः । संपीडेन नोदनेन क्षुभितानि जलानि येषां तेषु तोयदेषु निःसङ्गमप्रतिघातं यथा तथा विवृत्तिः परिभ्रमणमुपाददे स्वीकृतेत्यतिशयोक्तिः स्वभावोक्त्या संसृज्यते ॥ १२ ॥

तप्तानामुपदधिरे विषाणभिन्नाः प्रह्लादं सुरकरिणां घनाः क्षरन्तः।
युक्तानां खलु महतां परोपकारे कल्याणी भवति रुजत्स्वपि प्रवृत्तिः॥१३॥

अन्वयः—विषाणभिन्नाः, क्षरन्तः, घनाः, तप्तानाम्, सुरकरिणाम्, प्रह्लादम् उपदधिरे। (तथाहि) परोपकारे, युक्तानाम्, महताम्, रुजत्स्वपि, कल्याणी, खलु। प्रवृत्तिः, भवति॥ १३॥

तप्तानामिति॥ विषाणभिन्ना गजदन्तक्षताः। 'विषाणं दन्तश्रृङ्गयोः' इति हलायुधः। अतएव क्षरन्तः स्रवन्तो घनास्तप्तानां सुरकरिणां प्रह्लादमुपदधिरे चक्रिरे। तथाहि। परोपकारे युक्तानामासक्तानां महतां सतां रुजत्स्वपि पीडयत्स्वपि विषये कल्याणी हितकारिणी खलु प्रवृत्तिर्व्यापारो भवतीत्यर्थान्तरन्यासोऽलङ्कारः। ततो युक्तं मेघानां गजदन्तक्षतानामपि तदाह्लादकत्वमिति भावः॥ १३॥

संवाता मुहुरनिलेन नीयमाने दिव्यस्त्रीजघनवरांशुके विवृत्तिम्।
पर्यस्यत्पृथुमणिमेखलांशुजालं सञ्जज्ञे युतकमिवान्तरीयमूर्वोः॥१४॥

अन्वयः—संवाता, अनिलेन, दिव्यस्त्रीजघनवरांशुके, विवृत्तिम्, मुहुः, नीयमाने, पर्यस्यत्पृथुमणिमेखलांशुजालम्, ऊर्वोः, युतकम् इव, अन्तरीयम्, सञ्जज्ञे॥१४॥

सम्वातेति॥ संवाता संवहता। वातेर्गत्यर्थाच्छतृप्रत्ययः। अनिलेन। कामिनेवेति भावः। दिव्यस्त्रीणां जघनेषु वरं श्रेष्ठं यदंशुकं तस्मिन्विवृत्तिमपसारं मुहुर्नीयमाने सति पर्यस्यत्प्रसर्पत्पृथु विशालं मणिमेखलांशुजालमूर्वोर्युतकं चलनाख्यमिव। 'युतकं संश्रये युग्मे यौतके चलनेऽपि च' इति विश्वः। अन्तरे भवमन्तरीयमधोंशुकम्। 'गहादिभ्यश्च' छप्रत्ययः। 'अन्तरीयोपसंव्यानपरिधानान्यधोंशुके' इत्यमरः। सञ्जज्ञे सञ्जातम्। जनिधातोः कर्तरि लिट्। उत्प्रेक्षालङ्कारः॥ १४॥

प्रत्यार्द्रीकृततिलकास्तुषारपातैः प्रह्लादं शमितपरिश्रमा दिशन्तः।
कान्तानां बहुमतिमाययुः पयोदा नाल्पीयान्बहुसुकृतं हिनस्ति दोषः॥

अन्वयः—तुषारपातैः, प्रत्यार्द्रीकृततिलकाः, शमितपरिश्रमाः, प्रह्लादम्, दिशन्तः, पयोदाः, कान्तानाम्, बहुमतिम्, आययुः। (तथाहि) अल्पीयान्, दोषः, बहुसुकृतम्, न हिनस्ति,॥ १५॥

प्रत्येति॥ तुषारपातैः शीकरवर्षैः। 'तुषारौ हिमशीकरौ' इति विश्वः। प्रत्यार्द्रीकृततिलका मार्जितविशेषका अपि शमितपरिश्रमाः प्रह्लादमानन्दं दिशन्तः पयोदाः कान्तानाम्। कर्तरि षष्ठी। बहुमतिं सम्मानमाययुः। तथाहि। अल्पीयानल्पो दोषो बहु प्रभूतं सुकृतमुपकारं न हिनस्ति न हन्ति। अर्थान्तरन्यासोऽलङ्कारः॥ १५॥

यातस्य ग्रथिततरङ्गसैकताभे विच्छेदं विपयसि वारिवाहजाले ।
आतेनुस्त्रिदशवधूजनाङ्गभाजां संधानं सुरधनुषः प्रभा मणीनाम् ॥ १६ ॥

अन्वयः—ग्रथिततरङ्गसैकताभे, विपयसि, वारिवाहजाले, विच्छेदम्, यातस्य, सुरधनुषः, त्रिदशवधूजनाङ्गभाजाम्, मणीनाम्, प्रभाः, संधानम्, आतेनुः ॥ १६ ॥

यातस्येति ॥ ग्रथिततरङ्गं बद्धोर्मि यत्सैकतं तस्याभेवाभा यस्य तस्मिन्विगतानि पयांसि यस्मात्तस्मिन्विपयसि निर्जले । 'शेषाद्विभाषा' इत्यादिना विकल्पान्न समासान्तः । उरःप्रभृतिपाठस्तु पयःशब्दस्यैकवचनान्तस्यैवेति न कश्चिद्विरोधः । वारिवाहजाले मेघबृन्दे विच्छेदं त्रुटिं यातस्य सुरधनुष इन्द्रचापस्य त्रिदशवधूजनाङ्गभाजां मणीनाम् । तरङ्गसङ्गिविभूषामणीनामित्यर्थः । प्रभाः कान्तयः सन्धानमातेनुश्चक्रुः । अत्राभरणप्रभाणामिन्द्रधनुःसन्धानासम्बन्धेऽपि सम्बन्धाभिधानादतिशयोक्तिरलङ्कारः ॥

संसिद्धाविति करणीयसंनिबद्धैरालापैः पिपतिषतां विलङ्घ्य वीथीम् ।
आसेदे दशशतलोचनध्वजिन्या जीमूतैरपिहितसानुरिन्द्रकीलः ॥ १७ ॥

अन्वयः—संसिद्धौ, इति, करणीयसंनिबद्धैः, आलापैः, दशशतलोचनध्वजिन्या, पिपतिषताम्, वीथीम्, विलङ्घ्य, जीमूतैः, अपिहितसानुरिन्द्रकीलः, आसेदे ॥ १७ ॥

संसिद्धाविति ॥ संसिद्धौ कार्यसिद्धिविषय इतीत्थम्भाविना प्रकारेण । कर्तव्यमिति करणीयं तेन संनिबद्धैः । संयोजितैरित्यर्थः । आलापैराभाषणैरुपलक्षितया । 'स्यादाभाषणमालापः' इत्यमरः । दशशतानि संख्या येषु तानि लोचनानि यस्य सः । सहस्रलोचन इत्यर्थः । तस्य ध्वजिन्या सेनया पिपतिषतां पक्षिणां वीथीं मार्गम् । 'पित्सन्तो नभसङ्गमाः' इत्यमरः । 'तनिपति–' इत्यादिना विकल्पादिडागमः । विलङ्घ्य जीमूतैर्जीवस्योदकस्य मूतः पटबन्धो येषां तैः । पृषोदरादित्वात्साधुः । अपिहितसानुराच्छादिततटः । उन्नत इत्यर्थः । इन्द्रकील आसेदे प्राप्तः । सीदतेः कर्मणि लिट् ॥ १७ ॥

आकीर्णा मुखनलिनैर्विलासिनीनामुद्धूतस्फुटविशदातपत्रफेना ।
सा तूर्यध्वनितगभीरमापतन्ती भूभर्तुः शिरसि नभोनदीव रेजे ॥ १८ ॥

अन्वयः—विलासिनीनाम्, मुखनलिनैः, आकीर्णा, उद्धूतस्फुटविशदातपत्रफेना, तूर्यध्वनितगभीरम्, भूभर्तुः, शिरसि, आपतन्ती, सा, नभोनदि इव, रेजे ॥ १८ ॥

आकीर्णेति ॥ विलासिनीनां मुखनलिनैः । उपमितसमासः । आकीर्णा व्याप्ता उद्धूतान्यूर्ध्वमुत्क्षिप्तानि स्फुटान्यसङ्कुचितानि विशदातपत्राणि श्वेतच्छत्राणि फेना इव यस्यास्तथोक्ता तूर्यध्वनितैर्वाद्यघोषैर्गभीरं यथा तथा भूभर्तुरिन्द्रकीलस्य शिरस्यापतन्ती सा सेना नभोनदीव रेजे ॥ १८ ॥

तुत्वं दधति पयोमुचां विताने संरम्भादभिपततो रथाञ्जवेन ।
आनिन्युर्नियमितरश्मिभुग्नघोणाः कृच्छ्रेण क्षितिमवनामिनस्तुरङ्गाः॥१९॥

अन्वयः—पयोमुचाम्, विताने, सेतुत्वम्, दधति, संरम्भाद्, जवेन, अभिपततः, रथान्, नियमितरश्मिभुग्नघोणाः अवनामिनः, तुरङ्गाः, कृच्छ्रेण, क्षितिम्, आनिन्युः॥१९॥

सेतुत्वमिति ॥ पयोमुचां विताने सेतुत्वं दधति सति संरम्भादाटोपाज्जवेनाभिपततः । मेघवृन्दमधरीकृत्य धावत इत्यर्थः । तथाभूतान्रथान्नियामितैराकृष्टै रश्मिभिः प्रग्रहैर्भुग्ना आकुञ्चिता घोणाः प्रोथा येषां तैः । 'कुञ्चितं नतम् । आविद्धं कुटिलं भुग्नं वेल्लितं वक्रम्' इत्यमरः । 'किरणप्रग्रहौ रश्मी' इत्यमरः । 'घोणा तु प्रोथमस्त्रियाम्' इत्यमरः । अवनमन्तीत्यवनामिनोऽवनतपूर्वकायास्तुरङ्गाः कृच्छ्रेण महता प्रयत्नेन क्षितिमानिन्युरिति स्वभावोक्तिः॥ १९ ॥

माहेन्द्रं नगमभितः करेणुवर्याः पर्यन्तस्थितजलदा दिवः पतन्तः ।
सादृश्यं निलयननिष्प्रकम्पपक्षैराजग्मुर्जलनिधिशायिभिर्नगेन्द्रैः॥२०॥

अन्वयः—माहेन्द्रम्, नगम्, अभितः, दिवः, पतन्तः, पर्यन्तस्थितजलदाः, करेणुवर्याः, निलयननिष्प्रकम्पपक्षैः, जलनिधिशायिभिः, नगेन्द्रैः, सादृश्यम् आजग्मुः ॥२०॥

माहेन्द्रमिति ॥ माहेन्द्रं नगमभित इन्द्रकीलाभिमुखम् । 'अभितःपरितः–' इत्यादिना द्वितीया । दिवोऽन्तरिक्षात्पतन्तोऽवतरन्तः पर्यन्तस्थिताः पार्श्वस्था जलदा येषां ते करेणुवर्याः करेणुषु वर्याः । श्रेष्ठा इत्यर्थः । 'न निर्धारणे' इति षष्ठीसमासनिषेधात् 'सप्तमी' इति योगविभागात्सप्तमीसमासः । निलयेन स्थाने निष्प्रकम्पपक्षैर्निश्चलपक्षैर्जलनिधिशायिभिर्नगेन्द्रैर्मैनाकादिभिः सादृश्यमाजग्मुरित्युपमा ॥ २० ॥

उत्सङ्गे समविषमे समं महाद्रेः क्रान्तानां वियदभिपातलाघवेन ।
आमूलादुपनदि सैकतेषु लेभे सामग्रीं खुरपदवी तुरङ्गमाणाम् ॥२१॥

अन्वयः—महाद्रेः, उत्सङ्गे, समविषमे, वियदभिपातलाघवेन, समम्, क्रान्तानाम् तुरङ्गमाणाम्, खुरपदवी, उपनदि, सैकतेषु, आमूलात्, सामग्रीं, लेभे ॥ २१ ॥

उत्सङ्ग इति ॥ महाद्रेरुत्सङ्गे मूर्ध्नि यत्समविषमं समं च विषमं च निम्नोन्नतं तस्मिन् । द्वन्द्वैकवद्भावः । वियदभिपातलाघवेन गगनसञ्चारपाटवेन सममेकरूपम् । आरोहावरोहरहितमित्यर्थः । क्रान्तानां गच्छतां तुरङ्गमाणां खुरपदवी खुरपङ्क्तिरुपनदि नदीसमीपे । 'अव्ययीभावश्च' इति नपुंसकत्वाद्ध्रस्वत्वम् । सैकतेष्वामूलान्मूलमारभ्य । आदित आरभ्येति यावत् । समग्रस्य भावः सामग्री साकल्यम् । भावे ष्यञ् । ङीप् । लेभे । सैकतादन्यत्र निम्नेषु गगनचारेण समखुरस्पर्शाभावाद्विच्छिन्ना खुरसरणिः । सैकतेषु तु सर्वत्र समत्वादविच्छिन्नेत्यर्थः ॥ २१ ॥

सध्वानं निपतितनिर्झरासु मन्द्रैः सम्मूर्च्छन्प्रतिनिनदैरधित्यकासु।
उद्ग्रीवैर्घनरवशङ्कया मयूरैः सोत्कण्ठं ध्वनिरुपशुश्रुवे रथानाम्॥२२॥

अन्वयः—सध्वानम्, निपतितनिर्झरासु, अधित्यकासु, मन्द्रैः, प्रतिनिनदैः, संमूर्च्छन्, रथानां, ध्वनिः, घनरवशङ्कया, उद्ग्रीवैः, मयूरैः, सोत्कण्ठम्, उपशुश्रुवे ॥२२॥

सध्वानमिति ॥ सध्वानं सशब्दं निपतिता निर्झराः प्रवाहा यासु तासु। 'प्रवाहो निर्झरो झरः' इत्यमरः। अधित्यकासु नगोर्ध्वभूमिषु। 'भूमिरूर्ध्वमधित्यका' इत्यमरः। 'उपाधिभ्यां–' इत्यादिना त्यकन्प्रत्ययः। मन्द्रैर्गम्भीरैः। 'मन्द्रस्तु गम्भीरे' इत्यमरः। प्रतिनिनदैः प्रतिध्वानैः सम्मूर्च्छन्वर्धमानो रथानां ध्वनिर्घनरवशङ्कया मेघगर्जितभ्रमेणेति भ्रान्तिमदलङ्कारः। उद्ग्रीवैर्मयूरैः सोत्कण्ठमुपशुश्रुवे उपश्रुतः। शृणोतेः कर्मणि लिट्॥ २२ ॥

संभिन्नामविरलपातिभिर्मयूखैर्नीलानां भृशमुपमेखलं मणीनाम्।
विच्छिन्नामिव वनिता नभोन्तराले वप्राम्भःस्रुतिमवलोकयांबभूवुः २३

अन्वयः—अविरलपातिभिः, उपमेखलं। नीलानां, मणीनां, मयूखैः, भृशं, सम्भिन्नां, नभोन्तराले, विच्छिन्नाम् इव, वप्राम्भःस्रुतिम्, वनिताः, अवलोकयाम्बभूवुः ॥ २३ ॥

सम्भिन्नामिति ॥ अविरलपातिभिर्निरन्तरप्रसारिभिरुपमेखलम्। तटेष्वित्यर्थः। 'अथ मेखला। श्रोणिस्थानेऽद्रिकटके कटिबन्धेऽसिबन्धने' इति यादवः। नीलानां मणीनां मयूखैर्भृशं सम्भिन्नामेकीभूतामतएव नभोन्तराले विच्छिन्नामिव स्थितामित्युत्प्रेक्षा। वप्राम्भःस्रुतिं वप्रोदकधारां वनिता अवलोकयाम्बभूवुः। वप्राम्भःस्रुतेः स्वधवलिमत्यागेनेन्द्रनीलानां नीलिमस्वीकाररूपतद्गुणोत्थापिता विच्छेदोत्प्रेक्षेति तयोरङ्गाङ्गिभावेन सङ्करः। तेन च नैल्यविच्छेदभ्रमरूपो भ्रान्तिमान्व्यज्यते ॥२३॥

आसन्नद्विपपदवीमदानिलाय क्रुध्यन्तो धियमवमत्य धूर्गतानाम्।
सव्याजं निजकरिणीभिरात्तचित्ताः प्रस्थानं सुरकरिणः कथञ्चिदीषुः२४

अन्वयः—धूर्गतानाम्, धियम्, अवमत्य, आसन्नद्विपपदवीमदानिलाय, क्रुध्यन्तः, सव्याजम्, निजकरणीभिः, आत्तचित्ताः, सुरकरिणः, प्रस्थानम्, कथञ्चित्, ईषुः ॥२४॥

आसन्नेति ॥ धुरं गतास्तेषां धूर्गतानां नियन्तॄणां धियमवमत्यावज्ञायासन्नायां द्विपपदव्यां वनगजमार्गे यो मदानिलस्तस्मै क्रुध्यन्तस्तं प्रति कुप्यन्तः। 'क्रुधद्रुह—' इत्यादिना सम्प्रदानत्वाच्चतुर्थी। सव्याजं सकपटं निजकरिणीभिरात्तचित्ता आकृष्टचित्ताः सुरकरिणो देवनागाः प्रस्थानं गमनं कथञ्चित्कष्टेनेषुरभिलेषुः ॥ २४ ॥

नीरन्ध्रं पथिषु रजो रथाङ्गनुन्नं पर्यस्यन्नवसलिलारुणं वहन्ती ।
आतेने वनगहनानि वाहिनी सा घर्मान्तक्षुभितजलेव जह्नुकन्या॥२५॥

अन्वयः—नीरन्ध्रम्, पथिषु, रथाङ्गनुन्नम्, पर्यस्यन्नवसलिलारुणम्, रजः, वहन्ती, सा, वाहिनी, घर्मान्तक्षुभितजला, जह्नुकन्या इव, वनगहनानि, आतेने ॥ २५ ॥

नीरन्ध्रमिति ॥ नीरन्ध्रं सान्द्रं पथिषु रथाङ्गैश्चक्रैर्नुन्नं प्रेरितम्। 'नुत्तनुन्नास्तनिष्ठ्यूताविद्धक्षिप्तेरिताः समाः' इत्यमरः । पर्यस्यत्प्रसर्पन्नवसलिलमिवारुणं रजो वहन्ती सा वाहिनी सेना । घर्मान्ते प्रावृषि क्षुभितजला । कलुषोदकेत्यर्थः । जह्नुकन्या गङ्गेव । वनानि फलकुसुमप्रधानानि, गहनानि जीर्णारण्यानि च तानि वनगहनान्यातेने व्यानशे । अत्र समासगतवाक्यगतोपमयोः सजातीययोरङ्गाङ्गिभावेन सङ्करः ॥ २५ ॥

सम्भोगक्षमगहनामथोपगङ्गं बिभ्राणां ज्वलितमणीनि सैकतानि ।
अध्यूषुश्च्युतकुसुमाचितां सहाया वृत्रारेरविरलशाद्वलां धरित्रीम्॥२६॥

अन्वयः—अथ, वृत्रारेः, सहायाः, उपगङ्गम्, सम्भोगक्षमगहनाम्, ज्वलितमणीनि, सैकतानि, बिभ्राणाम्, च्युतकुसुमाचिताम्, अविरलशाद्वलाम्, धरित्रीम्, अध्यूषुः ॥ २६ ॥

सम्भोगेति ॥ अथ वृत्रारेः शक्रस्य सहायाः सचिवा गन्धर्वा उपगङ्गं गङ्गासमीपे। अव्ययीभावस्य नपुंसकत्वाद्ध्रस्वत्वम् । सम्भोगक्षमगहनामुपभोगयोग्यवनां ज्वलिता मणयो येषु तानि सैकतानि बिभ्राणाम् । भृञः कर्तरि लटः शानच् । च्युतैः स्वयं पतितैः कुसुमैराचितां व्याप्तामविरलाः सान्द्राः शाद्वलाः शादप्रायप्रदेशा यस्यां सा तां धरित्रीमध्यूषुरधितस्थुः । वसतेर्यजादित्वात्सम्प्रसारणम् । अत्र धरित्रीविशेषणार्थानामधिवासहेतुत्वादनेकपदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ २६ ॥

भूभर्तुःसमधिकमादधे तदोर्व्याः श्रीमत्तां हरिसखवाहिनीनिवेशः ।
संसक्तौ किमसुलभं महोदयानामुच्छ्रायं नयति यदृच्छयापि योगः॥२७

अन्वयः—तदा, हरिसखवाहिनीनिवेशः, भूभर्तुः, उर्व्याः, समधिकम्, श्रीमत्ताम्, आदधे । (तथाहि) महोदयानाम्, संसक्तौ, किमसुलभम्, यदृच्छया, योगः, अपि, उच्छ्रायम्, नयति ॥ २७ ॥

भूभर्तुरिति ॥ तदा हरिसखवाहिनीनिवेशो गन्धर्वसेनाशिबिरम् । 'निवेशः शिबिरोद्वाहविन्यासेषु प्रकीर्तितः' इति शाश्वतः । भूभर्तुः पर्वतस्योर्व्याः समधिकं पूर्वस्मादभ्यधिकं यथा तथा श्रीमत्ताम् । श्रियमित्यर्थः । आदधे जनयामास । तथाहि । महोदयानां महात्मनां संसक्तौ सम्यक्सम्बन्धे । 'सम्भक्तौ' इति पाठे तु सम्यक्से-

चायाम् । किमसुलभम् । न किञ्चिद्दुर्लभमित्यर्थः । यतः । यदृच्छया दैवायोगोऽप्यु च्छ्रायमुत्कर्षं नयति । अत्र प्रकृतयदृच्छया योगस्योत्कर्षाभिधानादप्रकृतसत्क्रियोगस्योत्कर्षाधायकत्वे कैमुतिकन्यायेनार्थापत्तिरिति प्राकरणिकादप्राकरणिकरूपार्थापत्तिरलङ्कारः । तदुक्तम्—'एकस्य वस्तुनो भावाद्यत्र वस्त्वन्यथा पतेत् । कैमुत्येन यतः सा स्यादर्थापत्तिरलङ्क्रिया ॥' इति ॥ २७ ॥

सामोदाः कुसुमतरुश्रियो विविक्ताः सम्पत्तिः किसलयशालिनी लतानाम् ।
साफल्यं ययुरमराङ्गनोपभुक्ताः सा लक्ष्मीरुपकुरुते यया परेषाम् ॥ २८ ॥

अन्वयः—सामोदाः, कुसुमतरुश्रियः विविक्ताः, किसलयशालिनी लतानाम्, सम्पत्तिः, अमराङ्गनोपभुक्ताः, साफल्यम्, ययुः । (तथाहि) यया, परेषाम्, उपकुरुते, सा लक्ष्मी. ॥ २८ ॥

सामोदा इति ॥ सामोदाः ससौरभाः कुसुमप्रधानास्तरवः । शाकपार्थिवादिषु द्रष्टव्यः । तेषां श्रियः समृद्धयो विविक्ता विजनप्रदेशा । 'विविक्तविजनच्छन्ननिःशलाकास्तथा रहः' इत्यमरः । किसलयशालिनी लतानां नवपल्लवयुतवल्लीनां सम्पत्तिरेता अमराङ्गनोपभुक्ताः सत्यः साफल्यं ययु. । तथाहि । यया लक्ष्म्या करणेन परेषामुपकुरुते । लक्ष्मीवानिति शेषः । सा लक्ष्मीर्नान्येति भावः । परेषामित्यत्र 'अनुकरोति भगवतो नारायणस्य' इत्यादिवत्क्रियायोगे हि सम्बन्धसामान्ये षष्ठी ॥ २८ ॥

क्लान्तोऽपि त्रिदशवधूजनः पुरस्ताल्लीनाहिश्वसितविलोलपल्लवानाम् ।
सेव्यानां हतविनयैरिवावृतानां सम्पर्कं परिहरति स्म चन्दनानाम् ॥ २९ ॥

अन्वयः—क्लान्तोऽपि, त्रिदशवधूजनः, पुरस्तात्, लीनाहिश्वसितविलोलपल्लवानाम्, चन्दनानाम्, सम्पर्कम्, हतविनयः, आवृतानाम्, सेव्यानाम् इव, परिहरति स्म ॥ २९ ॥

क्लान्त इति ॥ क्लान्तोऽपि त्रिदशवधूजनः पुरस्तादग्रे लीनानां संश्रितानामहीनां श्वसितैर्निश्वासैर्विलोला. पल्लवा येषां तेषां चन्दनानां सम्पर्कं हतविनयैर्दुर्जनैः खलैरावृतानां संवृतानां सेव्यानां प्रभूणां सम्पर्कमिव परिहरति स्म । दुष्टवद्दुष्टसंसृष्टा गुणाढ्या अपि त्याज्या इति भावः ॥ २९ ॥

उत्सृष्टध्वजकुथकङ्कटा धरित्रीमानीता विदितनयैः श्रमं विनेतुम् ।
आक्षिप्तद्रुमगहना युगान्तवातैः पर्यस्ता गिरय इव द्विपा विरेजुः ॥ ३० ॥

अन्वयः—उत्सृष्टध्वजकुथकङ्कटाः, विदितनयैः, श्रमम्, विनेतुम्, धरित्रीम्, आनीताः, द्विपाः, युगान्तवातैः, आक्षिप्तद्रुमगहनाः, पर्यस्ताः, गिरयः इव, विरेजुः ॥ ३० ॥

उत्सृष्टेति ॥ उत्सृष्टा आक्षिप्ता ध्वजाः कुथा आस्तरणानि कङ्कटास्तनुत्राणानि च येभ्यस्ते । 'प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः' इत्यमरः । विदितनयैः शि-

क्षाभिशैर्यन्तृभिः श्रमं विनेतुं क्लममपनेतुं धरित्रीमानीताः। निवेश्यमाना इत्यर्थः। द्विपा युगान्तवातैराक्षिप्तान्युद्धृतानि द्रुमाणां गहनानि वनानि येभ्यस्ते पर्यस्ता विपर्यासिता गिरय इव विरेजुः शुशुभिरे ॥ ३० ॥

प्रस्थानश्रमजनितां विहाय निद्रामामुक्ते गजपतिना सदानपङ्के।
शय्यान्ते कुलमलिनां क्षणं विलीनं संरम्भच्युतमिव शृङ्खलं चकाशे॥३१॥

अन्वयः—गजपतिना, प्रस्थानश्रमजनिताम्, निद्राम्, विहाय, आमुक्ते, सदानपङ्के, शय्यान्ते, क्षणम्, विलीनम्, अलिनाम्, कुलम्, संरम्भच्युतम्, शृङ्खलम्, इव, चकाशे॥ ३१ ॥

प्रस्थानेति ॥ गजपतिना प्रस्थानश्रमेण गमनक्लेशेन जनितां निद्रां विहायामुक्तेऽतएव सदानपङ्के गजमदयुक्ते शय्यान्ते शयनीयप्रदेशे क्षणं विलीनं लग्नमलिनां कुलं संरम्भेणोत्थानसम्भ्रमेण च्युतं भ्रष्टं शृङ्खलं निगडमिवेत्युत्प्रेक्षा। 'अथ शृङ्खले। अन्दुको निगडोऽस्त्री स्यात्' इत्यमरः। चकाशे शुशुभे ॥ ३१ ॥

आयस्तः सुरसरिदोघरुद्धवर्त्मा सम्प्राप्तं वनगजदानगन्धि रोधः।
मूर्धानं निहितशिताङ्कुशं विधुन्वन्यन्तारं न विगणयाञ्चकार नागः।३२।

अन्वयः—वनगजदानगन्धि, रोधः, सम्प्राप्तम्, आयस्तः, सुरसरिदोघरुद्धवर्त्मा, नागः, निहितशिताङ्कुशम्, मूर्धानम्, विधुन्वन्, यन्तारम्, न विगणयाञ्चकार ॥३२॥

आयस्त इति ॥ वनगजदानस्य गन्धोऽस्यास्तीति तथोक्तं रोधः। परकूलमित्यर्थः। सम्प्राप्तुं गन्तुमायस्त उत्सुकः। प्रयत्नं कुर्वाण इत्यर्थः। 'यसु प्रयत्ने' इति धातोः कर्तरि क्तः। किन्तु सुरसरिदोघेन गङ्गाप्रवाहेण रुद्धं वर्त्म यस्य स.। नागो गजो निहितो दत्तः शितस्तीक्ष्णोऽङ्कुशो यस्मिन्। 'अङ्कुशोऽस्त्री सृणिः स्त्रियाम्' इत्यमरः। तं मूर्धानं विधुन्वन्। रोषादिति भावः। यन्तारं न विगणयाञ्चकार न विगणयामास ॥ ३२ ॥

आरोढुः समवनतस्य पीतशेषे साशङ्कं पयसि समीरिते करेण।
संमार्जन्नरुणमदस्रुती कपोलौ सस्यन्दे मद इव शीकरः करेणोः॥३३॥

अन्वयः—समवनतस्य, करेणोः करेण, पीतशेषे, पयसि, आरोढुः, साशङ्कम्, समीरिते, शीकरः, अरुणमदस्रुती, कपोलौ, संमार्जन्, मद इव, सस्यन्दे, ॥ ३३ ॥

आरोढुरिति ॥ समवनतस्य जलपानार्थमानतपूर्वकायस्य करेणोर्गजस्य। 'करेणुरिभ्यां स्त्री नेभे' इत्यमरः। करेण पीतस्य शेषे पयस्यारोढुर्हस्तिपकात्साशङ्कं सभयं समीरिते। क्षिप्ते सतीत्यर्थः। शीकरोऽम्बुकणः। अरुणे मदस्रुती मदधारे ययोस्तौ।

कपोलौ संमार्जन् प्रमृजन्। 'मृजेरजादौ सङ्क्रमे विभाषावृद्धिर्वक्तव्या' इति वृद्धिः। मद इव सस्यन्दे सुस्राव। मदसम्पृक्तस्य मदसादृश्यान्मदोपमा ॥ ३३ ॥

आघ्राय क्षणमतितृष्यतापि रोषादुत्तीरं निहितविवृत्तलोचनेन।
सम्पृक्तं वनकरिणां मदाम्बुसेकैर्नाचेमे हिममपि वारि वारणेन॥३४॥

अन्वयः—अतितृष्यतापि, क्षणम्, आघ्राय, रोषादुत्तीरम्, निहितविवृत्तलोचनेन, वारणेन, हिमम्, अपि, वनकरिणाम्, मदाम्बुसेकैः, सम्पृक्तम्, वारि, नाचेमे॥३४॥

आघ्रायेति॥ अतितृष्यताप्यतिपिपासतापि क्षणमाघ्राय रोषादुत्तीरं परतीरे। विभक्त्यर्थेऽव्ययीभावः। निहिते विवृत्ते घूर्णिते-लोचने यस्य तेन। प्रतिगजदिदृक्षयेति भावः। वारणेन हिमं शीतलमपि वनकरिणां मदाम्बुसेकैर्दानधाराभिः सम्पृक्तं वारि नाचेमे न पीतम्। 'चमु अदने' इति धातोः कर्मणि लिट् ॥ ३४ ॥

प्रश्च्योतन्मदसुरभीणि निम्नगायाः क्रीडन्तो गजपतयः पयांसि कृत्वा
किञ्जल्कव्यवहितताम्रदानलेखैरुत्तेरुः सरसिजगन्धिभिः कपोलैः॥३५॥

अन्वयः—क्रीडन्तः, गजपतयः, निम्नगायाः, पयांसि, प्रश्च्योतन्मदसुरभीणि, कृत्वा, किञ्जल्कव्यवहितताम्रदानलेखैः, सरसिजगन्धिभिः, कपोलैः, उत्तेरुः॥ ३५ ॥

प्रश्च्योतदिति॥ क्रीडन्तो विहरन्तो गजपतयो निम्नगाया गङ्गायाः पयांसि प्रश्च्योतद्भिः क्षरद्भिर्मदैः सुरभीणि कृत्वा किञ्जल्कैः केसरैर्व्यवहितास्तिरोहितास्ताम्रास्ताम्रवर्णा दानलेखा मदराजयो येषु तैरत एव सरसिजगन्धिभिः कपोलैरुपलक्षिताः सन्त उत्तेरुर्निर्जग्मुः। अत्र मदसरसिजगन्धयोः समयोर्विनिमयोक्त्या समपरिवृत्तिरलङ्कारः। तेन च गजानां निम्नगायाश्च परिमलव्यत्ययान्तरसंरम्भो व्यज्यते॥ ३५ ॥

आकीर्णं बलरजसा घनारुणेन प्रक्षोभैः सपदि तरङ्गितं तटेषु।
मातङ्गोन्मथितसरोजरेणुपिङ्गं माञ्जिष्ठं वसनमिवाम्बु निर्बभासे॥३६॥

अन्वयः—घनारुणेन, बलरजसा, आकीर्णम्, सपदि, प्रक्षोभैः तटेषु, तरङ्गितम्, मातङ्गोन्मथितसरोजरेणुपिङ्गम्, अम्बु, माञ्जिष्ठम्, वसनम् इव, निर्बभासे॥ ३६ ॥

आकीर्णमिति॥ घनारुणेन सान्द्रलोहितेन। विशेषणसमासः। बलरजसा सेनापरागेणाकीर्णं सपदि प्रक्षोभैरालोडनैस्तटेषु तीरेषु तरङ्गितं सञ्जाततरङ्गम्। तारकादित्वादितच्। यद्वा 'तरङ्गवत्कृतम्। मत्वन्तात् 'तत्करोति—' इति णिचि कर्मणि क्तः। णाविष्ठवद्भावान्मतुपो लुक्। तथा मातङ्गैरुन्मथितानां लुलितानां सरोजानां रेणुभिः पिङ्गं पिशङ्गमम्बु माञ्जिष्ठेन महारजनेनारक्तं माञ्जिष्ठं वसनमिव निर्बभासे। 'तेन रक्तं—' इत्यण्। 'कौशेयम्' इति वा पाठे 'कोशाड्ढञ्'। 'कौशेयं कृमिकोशोत्थम्' इत्यमरः॥ ३६ ॥

श्रीमद्भिर्नियमितकन्धरापरान्तैः संसक्तैरगुरुवनेषु साङ्गहारम् ।
सम्प्रापे निसृतमदाम्बुभिर्गजेन्द्रैः प्रस्यन्दिप्रचलितगण्डशैलशोभा ॥३७॥

अन्वयः—श्रीमद्भिः, नियमितकन्धरापरान्तैः, अगुरुवनेषु, साङ्गहारम्, संसक्तैः, निसृतमदाम्बुभिः, गजेन्द्रैः, प्रस्यन्दिप्रचलितगण्डशैलशोभा, सम्प्रापे ॥ ३७ ॥

श्रीमद्भिरिति ॥ श्रीमद्भिः शोभावद्भिर्नियमिताः कन्धरा अपरान्ताश्चरमपादाग्राणि च येषां तैः । 'अपरः पश्चिमः पादः' इति वैजयन्ती । अगुरुवनेषु साङ्गहारं साङ्गविक्षेपं यथा तथा संसक्तैर्निसृतानि प्रसृतानि मदाम्बूनि येषां तैर्गजेन्द्रैः प्रस्यन्दिनो जलस्राविणः प्रचलिता ये गण्डशैलाश्च्युतोपलास्तेषां शोभा सम्प्रापे प्राप्ता । कर्मणि लिट् । 'गण्डशैलास्तु च्युताः स्थूलोपला गिरेः' इत्यमर । अत्रान्यशोभाप्राप्त्यसम्भवात्तत्सदृशी शोभेति प्रतिबिम्बत्वाक्षेपान्निदर्शनालङ्कारः ॥ ३७ ॥

निःशेषं प्रशमितरेणु वारणानां स्रोतोभिर्मदजलमुज्झतामजस्रम् ।
आमोदं व्यवहितभूरिपुष्पगन्धो भिन्नैलासुरभिमुवाह गन्धवाहः ॥३८॥

अन्वयः—गन्धवाहः, निःशेषम्, प्रशमितरेणु, मदजलम्, स्रोतोभिः, अजस्रम्, उज्झताम्, वारणानाम्, व्यवहितभूरिपुष्पगन्धः, भिन्नैलासुरभिम्, आमोदम्, उवाह ॥ ३८ ॥

निःशेषमिति ॥ गन्धं वहतीति गन्धवाहो वायुः । कर्मण्यण् । निःशेषं यथा तथा प्रशमितो रेणुर्येन तन्मदजलं स्रोतोभिर्मदनाडीभिरजस्रमुज्झतां वर्षतां वारणानां सम्बन्धिनं व्यवहितस्तिरस्कृतो भूरिर्बहुलः पुष्पगन्धो येन सः । भिन्नाः फुल्ला एला लताविशेषाः । 'पृथ्वीका चन्द्रबालैला' इत्यमरः । तत्पुष्पाणि चैलाः । 'पुष्पे जातीप्रभृतयः स्वलिङ्गा व्रीहयः फले' इत्यमरः । भिन्नैलावत्सुरभि घ्राणेन्द्रियतर्पणमित्युपमा । आमोदं परिमलमुवाह वहति स्म ॥ ३८ ॥

सादृश्यं दधति गभीरमेघघोषैरुन्निद्रक्षुभितमृगाधिपश्रुतानि ।
आतेनुश्चकितचकोरनीलकण्ठान्कच्छान्तानमरमहेभबृंहितानि ॥३९॥

अन्वयः—गभीरमेघघोषैः, सादृश्यम्, दधति, उन्निद्रक्षुभितमृगाधिपश्रुतानि, अमरमहेभबृंहितानि, कच्छान्तान्, चकितचकोरनीलकण्ठान्, आतेनुः ॥ ३९ ॥

सादृश्यमिति ॥ गभीरमेघघोषैः, सान्द्रगर्जितैः सादृश्यं दधतीत्युपमा । दधातेः शतृप्रत्ययः । 'वा नपुंसकस्य' इति विकल्पान्नुमभावः । उन्निद्रा बृंहितश्रवणादेव प्रबुद्धाः क्षुभिताः संरब्धाश्च ये मृगाधिपास्तैः श्रुतान्याकर्णितानि । न तु प्रतिबुद्धानीति भावः । अमरमहेभबृंहितानि सुरगजगर्जितानि कच्छान्ताननूपप्रदेशान् ।

'जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधः' इत्यमरः। चकिता गर्जितशङ्कया सम्भ्रान्ताश्चकोराः पक्षिविशेषा नीलकण्ठा मयूराश्च येषु तांस्तथाभूतानातेनुः। भ्रान्तिमदलङ्कारः ॥ ३९ ॥

शाखावसक्तकमनीयपरिच्छदानामध्वश्रमातुरवधूजनसेवितानाम्।
जज्ञे निवेशनविभागपरिष्कृतानां लक्ष्मीः पुरोपवनजा वनपादपानाम् ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये सप्तमः सर्गः।

अन्वयः—शाखावसक्तकमनीयपरिच्छदानाम्, अध्वश्रमातुरवधूजनसेवितानाम्, निवेशनविभागपरिष्कृतानाम्, वनपादपानाम्, पुरोपवनजा, लक्ष्मीः जज्ञे ॥ ४० ॥

शाखेति ॥ परिच्छाद्यतेऽनेनेति परिच्छदः परिकरो वसनाभरणादिः। 'पुंसि संज्ञायां घः प्रायेण' इति घप्रत्ययः। 'छादेर्घेऽद्व्युपसर्गस्य' इति ह्रस्वत्वम्। शाखास्ववसक्ताः कमनीयाः परिच्छदा येषां तेषामध्वनि श्रमस्तेनातुरैः पीडितैर्वधूजनैः सेवितानां निवेशनविभागैरावसतिकावच्छेदैः परिष्कृतानामलंकृतानाम्। 'संपर्युपेभ्यः-' इत्यादिना सुट्। वनपादपानामरण्यवृक्षाणां पुरे यदुपवनं कृत्रिमवनं तत्र जाता पुरोपवनजा लक्ष्मीः शोभा जज्ञे जाता। अत्रान्योन्यलक्ष्मीसंबन्धासम्भवात्तत्सदृशीति सादृश्याक्षेपादसंभवे तद्वस्तुसंबन्धेयं निदर्शना। वसन्ततिलकावृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ ग' इति लक्षणात् ॥ ४० ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां सप्तमः सर्गः समाप्तः ॥

अष्टमः सर्गः।

अथ स्वमायाकृतमन्दिरोज्ज्वलं ज्वलन्मणि व्योमसदां सनातनम्।
सुराङ्गना गोपतिचापगोपुरं पुरं वनानां विजिहीर्षया जहुः ॥ १ ॥

अन्वयः—अथ, सुराङ्गनाः, स्वमायाकृतमन्दिरोज्ज्वलं, ज्वलन्मणि व्योमसदां सनातनं, गोपतिचापगोपुरं, पुरं, वनानां, विजिहीर्षया, जहुः ॥ १ ॥

अथेति ॥ अथ निवेशनानन्तरं सुराङ्गना अप्सरसः स्वमायया स्वेच्छाविशेषेण कृतैर्निर्मितैर्मन्दिरैरुज्ज्वलं दीप्तम्। ज्वलन्तो मणयो यस्मिंस्तद्व्योमसदां गन्धर्वाणां सनातनं सदातनम्। 'सायंचिरं-' इत्यादिना भावार्थे ट्युप्रत्ययः। गोर्वज्रं तत्पतिरिन्द्रस्तच्चापवर्णानि गोपुराणि यस्य तत्तथोक्तमित्युपमा। पुरं नगरं वनानां विजिहीर्षया वनानि विहर्तुमिच्छया। कर्मणि षष्ठी। जहुस्तत्यजुः॥ जहातेर्लिट्। अत्र ज्वल-

ज्वलदिति पुरंपुरमिति चासकृद्व्यञ्जनद्वयावृत्त्या छेकानुप्रासः। अन्यत्र तद्विपरीत्या- द्वृत्त्यनुप्रास इति तयोपमायाश्च संसृष्टिः । अस्मिन्सर्गे वंशस्थं वृत्तम्—'जतौ तु वंशस्थमुदीरितं जरौ' इति लक्षणात् ॥ १ ॥

यथायथं ताः सहिता नभश्चरैः प्रभाभिरुद्भासितशैलवीरुधः ।
वनं विशन्त्यो वनजायतेक्षणाः क्षणद्युतीनां दधुरेकरूपताम् ॥२॥

अन्वयः—यथायथं, नभश्चरैः, सहिताः, प्रभाभिः, उद्भासितशैलवीरुधः, ताः, वनजायतेक्षणाः, वनं, विशन्त्यः, क्षणद्युतीनाम्, एकरूपतां, दधुः ॥ २ ॥

यथायथमिति ॥ यथायथं यथास्वम् । स्वकीयमनतिक्रम्येत्यर्थः । 'यथास्वं तु यथायथम्' इत्यमरः । नपुंसकनिपातनं तु ह्रस्वार्थम् । नभश्चरैर्गन्धर्वैर्मेघैश्च सहिताः प्रभाभिः स्वदीप्तिभिरुद्भासिताः शैलवीरुधो याभिस्ताः पूर्वोक्ता वनजायतेक्षणाः पद्म- लोचनाः स्त्रियो वनं विशन्त्यः । क्षणं द्युतिर्यासां तासां क्षणद्युतीनां विद्युतामेकरू- पतां समानरूपतां दधुः । मुहुर्द्रुमान्तराले तासां स्फुरणस्य क्षणिकत्वादिति भावः । श्लेषानुप्राणितेयमुपमा । श्लेषत्वमिति केचित् । उभयथाप्यनुप्रासेन संसर्गः ॥ २ ॥

निवृत्तवृत्तोरुपयोधरक्रमः प्रवृत्तनिर्हादिविभूषणारवः ।
नितम्बिनीनां भृशमादधे धृतिं नभःप्रयाणादवनौ परिक्रमः ॥३॥

अन्वयः—निवृत्तवृत्तोरुपयोधरक्रमः, प्रवृत्तनिर्हादिविभूषणारवः, अवनौ, परिक्रमः, नितम्बिनीनां, नभःप्रयाणात्, भृशं, धृतिं, आदधे ॥ ३ ॥

निवृत्तेति ॥ निवृत्तो गतो वृत्तस्य वर्तुलस्योरुपयोधरस्य क्रमो यस्मिन्स्सः। पादप्र- क्षेपेषु विश्रान्तिसंभवादिति भावः । किञ्च । प्रवृत्तो जातो निर्हादिविभूषणानां नूपुरा- दीनामारवो यस्मिन्स्सः । अवनौ पृथिव्यां परिक्रमः सञ्चारो नितम्बिनीनां नभःप्रया- णाद्भृशमधिकम् । 'पञ्चमी विभक्ते' इति पञ्चमी । धृतिं सन्तोषमादधे । अत्र विशिष्ट- परिक्रमस्य धृत्यादानहेतुत्वात्काव्यलिङ्गमलङ्कारः ॥ ३ ॥

घनानि कामं कुसुमानि बिभ्रतः करप्रचेयान्यपहाय शाखिनः ।
पुरोऽभिसस्रे सुरसुन्दरीजनैर्यथोत्तरेच्छा हि गुणेषु कामिनः ॥४॥

अन्वयः—घनानि, करप्रचेयानि, कामं, कुसुमानि, बिभ्रतः शाखिनः, अपहाय, सुरसुन्दरीजनैः, पुरः, अभिसस्रे । हि, कामिनः, गुणेषु, यथोत्तरेच्छा ॥ ४ ॥

घनानीति ॥ घनानि सान्द्राणि । न तु विरलानि । करप्रचेयानि हस्तग्राह्याण्य- नुच्चानि । 'कृत्यैरधिकार्थवचने' इति तृतीयासमासः । कामं कुसुमानि बिभ्रतो नव- कुसुमिताञ्छाखिनस्तरूनपहाय सुरसुन्दरीजनैः पुरोऽग्रेऽभिसस्रेऽभिसृतम् । भावे लिट् । तथा हि । कामिनो गुणेष्वतिशयेषु विषय उत्तरमुत्तरम् । वीप्सार्थेऽव्ययीभावः । यथो-

त्तरमिच्छा येषां ते यथोत्तरेच्छा उत्तरोत्तराभिलाषुका हि। अत्र परिकरोत्थापितोऽर्थान्तरन्यासोऽलङ्कारः ॥ ४ ॥

तनूरलक्तारुणपाणिपल्लवाः स्फुरन्नखांशूत्करमञ्जरीभृतः।
विलासिनीबाहुलता वनालयो विलेपनामोदहृताः सिषेविरे ॥५॥

अन्वयः—विलेपनामोदहृताः, वनालयः, तनूः, अलक्तारुणपाणिपल्लवाः, स्फुरन्नखांशूत्करमञ्जरीभृतः, विलासिनीबाहुलताः, सिषेविरे ॥ ५ ॥

तनूरिति ॥ विलेपनामोदैर्हृता आकृष्टा वनालयो वनभृङ्गास्तनूः कृशा अलक्तैरुणाः पाणय एव पल्लवा यासां ताः स्फुरन्तो नखांशूनामुत्कराः पुञ्जा एव मञ्जर्यस्ता बिभ्रतीति तथोक्ताः। क्विप्। विलासिनीनां बाहव एव लतास्ताः सिषेविरे। अत्र समस्तवस्तुविषयरूपकालङ्कारः। बाह्ववयवानां लतावयवानां पल्लवादीनामपि निरूपणादिति ॥ ५ ॥

निपीयमानस्तबका शिलीमुखैरशोकयष्टिश्चलबालपल्लवा।
विडम्बयन्ती ददृशे वधूजनैरमन्ददष्टौष्ठकरावधूननम् ॥ ६ ॥

अन्वयः—शिलीमुखैः, निपीयमानस्तबकाः, चलबालपल्लवाः, (अत एव) अमन्ददष्टौष्ठकरावधूननं, विडम्बयन्ती, अशोकयष्टिः, वधूजनैः, ददृशे ॥ ६ ॥

निपीयमानेति ॥ शिलीमुखैरलिभिः। 'अलिबाणौ शिलीमुखौ' इत्यमरः। निपीयमानः स्तबको गुच्छो यस्याः सा चला बालपल्लवा यस्याः सा। अतएवामन्दं दृढं दष्ट ओष्ठो यस्मिंस्तत्करावधूननं करकम्पनं तद्विडम्बयन्ती। स्तबकपानेनौष्ठदंशन पल्लवचलनेन करावधूननं चानुकुर्वतीत्यर्थः। धूञो ण्यन्ताल्ल्युट्। णिचि धूञ्प्रीञोर्नुग्वक्तव्यः। अशोकयष्टिः अशोकशाखेत्यर्थः। वधूजनैर्ददृशे दृष्टा। अत्र विडम्बयन्तीति प्रस्तुताशोकशाखाविशेषणभूतोपमामहिम्नाप्रस्तुतनायिकाप्रतीते· समासोक्तिरुत्तिष्ठमानतयैवोपमयाङ्गाङ्गिभावेन संकीर्यते ॥ ६ ॥

अथ कश्चिन्मधुकराक्रान्तां काञ्चिदाह—

करौ धुनाना नवपल्लवाकृती वृथा कृथा मानिनि मा परिश्रमम्।
उपेयुषी कल्पलताभिशङ्कया कथं न्वितस्त्रस्यति षट्पदावलिः ॥७॥

अन्वयः—हेमानिनि ?, नवपल्लवाकृती, करौ, धुनाना, वृथा, परिश्रमं, मा, कृथाः। कल्पलताभिशङ्कया, उपेयुषी, षट्पदावलिः, कथं, । न्वितस्त्रस्यति ॥ ७ ॥

कराविति ॥ मानपरिहारेण मधुपाश्रयणे तु न कश्चिद्बाध इत्याशयेन संबोधयति—हे मानिनीति। नवपल्लवस्याकृतिरिवाकृतिर्ययोरित्युपमा। तौ करौ धुनाना। धूञः

श्रैयादिकात्कर्तरि लटः शानच् । वृथा व्यर्थं परिश्रमं मा कृथा मा कुरुष्व । करोतेराशीरर्थे माङि लुङ् । वृथात्वे हेतुमाह–कल्पलताभिशङ्कया कल्पवल्लिभ्रमेणेति भ्रान्तिमदलङ्कारः । उपयुष्युपगता षट्पदावलिः कथं निवर्तयिष्यति बिभेति । न त्रस्यत्येवेत्यर्थः । 'वा भ्राश–' इत्यादिना विकल्पेन श्यन्प्रत्ययः । अत्र कान्तापरिश्रमवैयर्थ्यरूपकार्यस्य षट्पदावलेः कल्पवल्लीभ्रमनिबन्धनविन्नासरूपकारणसमर्थनात्कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासो भ्रान्तिमताङ्गाङ्गिभावेन संकीर्णः । स तूपमया संसृज्यते॥७॥

अथ काचित्सखी काञ्चित्प्रणयकुपितामाह—

जहीहि कोपं दयितोऽनुगम्यतां पुरानुशेते तव चञ्चलं मनः ।
इति प्रियं काञ्चिदुपैतुमिच्छतीं पुरोऽनुनिन्ये निपुणः सखीजनः॥८॥

अन्वयः—प्रियम्, उपैतुम्, इच्छतीं, काञ्चित्, निपुणः, सखीजनः, कोपं, जहीहि। दयितः, अनुगम्यताम् । चञ्चलं, तव, मनः, पुरा, अनुशेते । इति, पुरः, अनुनिन्ये॥८॥

जहीहीति ॥ प्रियमुपैतुं स्वयमेवानुसर्तुमिच्छतीम् । 'आच्छीनद्योर्नुम्' इति विकल्पान्नुमभावः । कांचिन्नायिकां निपुणश्चित्तज्ञः सखीजन । कोपं जहीहि त्यज । 'आ च हौ' इति विकल्पादीकारादेश । दयितोऽनुगम्यतामनुस्त्रियताम्। उभयथापि प्रार्थनायां लोट् । अन्यथा चञ्चलमस्थिरं तव मनः पुरानुशेतेऽग्रेनुशयिष्यते । अनुतप्स्यत इत्यर्थः । 'यावत्पुरानिपातयोर्लट्' इति लट् । इत्यनेन प्रकारेण पुरः पूर्वमेवानुनिन्ये प्रसादयामास ॥ ८ ॥

अथ चतुर्भिः श्लोकैः कलापकमाह—

समुन्नतैः काशदुकूलशालिभिः परिक्वणत्सारसपङ्क्तिमेखलैः ।
प्रतीरदेशैः स्वकलत्रचारुभिर्विभूषिताः कुञ्जसमुद्रयोषितः ॥ ९ ॥

अन्वयः—समुन्नतैः, काशदुकूलशालिभिः, परिक्वणत्सारसपङ्क्तिमेखलैः, स्वकलत्रचारुभिः, प्रतीरदेशैः, विभूषिताः, कुञ्जसमुद्रयोषितः ॥ ९ ॥

समुन्नतैरिति ॥ समुन्नतैः काशान्यश्वबालकुसुमानि तानि दुकूलानीव तैः शालन्त इति तथोक्तैः । सारसपङ्क्तयो मेखला इव ताः परिक्वणन्त्यो येषु ते तैः स्वेषां कलत्राणि श्रोण्यास्तद्वच्चारवस्तैः। 'कलत्रं श्रोणिभार्ययो.' इत्यमरः । प्रतीरदेशैर्विभूषितास्तटप्रदेशैर्भूषिताः । कुञ्जसमुद्रयोषितः । वननद्य इत्यर्थः । अत्र तीरादीनां कलत्राद्यौपम्योपमेयस्वाद्योषिच्छब्दसामर्थ्याच्च नदीनां योषदौपम्यं गम्यते ॥ ९ ॥

विदूरपातेन भिदामुपेयुषश्च्युताः प्रवाहादभितः प्रसारिणः ।
प्रियाङ्कशीताः शुचिमौक्तिकत्विषो वनप्रहासा इव वारिबिन्दवः॥१०॥

अन्वयः—विदूरपातेन, भिदां, उपेयुषः, प्रवाहात्, च्युताः, अभितः प्रसारिणः, प्रियाङ्कशीताः, शुचिमौक्तिकत्विषः, वनप्रहासा, इव, वारिबिन्दवः ॥ १० ॥

विदूरेति ॥ विदूरपातेन भिदां भेदम्। 'षिद्भिदादिभ्योऽङ्'। उपेयुष उपगतास्प्रवाहाच्च्युता अतएवाभितः प्रसारिणः प्रसर्पन्त इति प्रियाया अङ्क उत्सङ्ग इव शीताः शीतलाः शुचीनां मौक्तिकानां त्विष इव त्विषो येषां ते । किञ्च वनस्य प्रहासा इव स्थिता इत्युत्प्रेक्षा। वारिबिन्दवश्च । अत्रोपमयोरुभयोरुत्प्रेक्षायाश्च संसृष्टिः ॥ १० ॥

सखीजनं प्रेम गुरूकृतादरं निरीक्षमाणा इव नम्रमूर्तयः ।
स्थिरद्विरेफाञ्जनशारितोदरैर्विसारिभिः पुष्पविलोचनैर्लताः ॥११॥

अन्वयः—स्थिरद्विरेफाञ्जनशारितोदरैः, विसारिभिः, पुष्पविलोचनैः, गुरूकृतादरं, प्रेम, सखीजनं, निरीक्षमाणाः, इव, नम्रमूर्तयः, लताः ॥ ११ ॥

सखीति ॥ द्वौ रेफौ वर्णविशेषौ येषां ते द्विरेफाः । भ्रमरशब्देन तदर्थो लक्ष्यते । 'अक्षरं मासमिति विदधाति' इति भाष्यकारः । स्थिरा निश्चला द्विरेफा एवाञ्जनानि तैः शारितानि शबलीकृतान्युदराणि येषां तैः । 'शारः शबलवातयोः' इति विश्वः । विसारिभिर्विस्तृतैः पुष्पाण्येव विलोचनानि तैः प्रेम्णा गुरूकृतः आदरो यस्मिन्कर्मणि तत्तथा सखीजनं नीरीक्षमाणाः पश्यन्त्य इव स्थिताः । कुतः । नम्रमूर्तयोऽवनताङ्ग्यो लताश्च । अत्र रूपकोत्प्रेक्षयोः संकरः ॥ ११ ॥

उपेयुषीणां बृहतीरधित्यका मनांसि जह्रुः सुरराजयोषिताम् ।
कपोलकाषैः करिणां मदारुणैरुपाहितश्यामरुचश्च चन्दनाः ॥१२॥

अन्वयः—मदारुणैः, करिणाम्, कपोलकाषैः, उपाहितश्यामरुचः, चन्दनाः, च, बृहतीः, अधित्यकाः, उपेयुषीणाम्, सुरराजयोषितां, मनांसि, जह्रुः ॥ १२ ॥

उपेयुषीणामिति ॥ मदेनारुणैरव्यक्तरागैः । 'अव्यक्तरागस्त्वरुणः' इत्यमरः । करिणां कपोलानां काषैः कषणैरुपाहितश्यामरुचो जनितकृष्णवर्णा इति तद्भूषणालङ्कारः । चन्दना मलयजाः । 'गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्' इत्यमरः । बृहतीरधित्यका ऊर्ध्वभूमीरुपेयुषीणां सुरराजयोषितां मनांसि जह्रुः । अत्र चतुःश्लोक्या नद्यादीनां विशिष्टानामेवाप्सरोमनोहरणहेतुत्वोक्त्या काव्यलिङ्गमुन्नेयम् ॥ १२ ॥

स्वगोचरे सत्यपि चित्तहारिणा विलोभ्यमानाः प्रसवेन शाखिनाम् ।
नभश्चराणामुपकर्तुमिच्छतां प्रियाणि चक्रुः प्रणयेन योषितः ॥१३॥

अन्वयः—चित्तहारिणा, शाखिनां, प्रसवेन, विलोभ्यमानाः, योषितः, स्वगोचरे, सत्यपि, उपकर्तुं, इच्छतां नभश्चराणां, प्रणयेन, प्रियाणि, चक्रुः ॥ १३ ॥

स्वगोचर इति ॥ चित्तहारिणा मनोहरेण शाखिनां प्रसवेन पुष्पजातेन विलोभ्य-

माना आकृष्यमाणा योषितः स्वगोचरे स्वविषये। स्वकरप्रचये सत्यपीत्यर्थः। प्रसव इति शेषः। उपकर्तुं परिचरितुमिच्छतां नभश्चराणां गन्धर्वाणां प्रणयेन सहायहेतुना प्रियाणि चक्रुः। स्वकरग्राह्यमपि प्रसवं स्वकान्तप्रियार्थं तद्दीयमानमेवाग्रहीषुरित्यर्थः॥१३॥

प्रयच्छतोच्चैः कुसुमानि मानिनी विपक्षगोत्रं दयितेन लम्भिता।
न किञ्चिदूचे चरणेन केवलं लिलेख बाष्पाकुललोचना भुवम्॥१४॥

अन्वयः—कुसुमानि, प्रयच्छता, दयितेन, उच्चैः, विपक्षगोत्रम्, लम्भिता, मानिनी, न, किञ्चित्, ऊचे। केवलं, बाष्पाकुललोचना सती, चरणेन, भुवं, लिलेख॥ १४॥

प्रयच्छतेति॥ कुसुमानि प्रयच्छता ददता दयितेनोच्चैरुच्चैस्तरां विपक्षगोत्रं सपत्नीनामधेयं लम्भिता प्रापिता। तन्नाम्नाहूतेत्यर्थः। 'नाम गोत्रं कुलं गोत्रम्' इति शाश्वतः। मानिन्यत एव न किंचिदूचे। कर्तरि लिट्। किन्तु केवलं बाष्पाकुललोचना सती चरणेन भुवं लिलेख। गोत्रस्खलनजनितेर्ष्यानिमित्तनिर्वेदादिति भावः। मानिन्यत एव न किञ्चिदूच इत्युक्तम्। तदुक्तं दशरूपके—'तत्त्वाज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमानना। तत्र चिन्ताश्रुतिः श्वासवैवर्ण्योच्छ्वासदीनताः॥' इति॥ १४॥

प्रियेऽपरा यच्छति वाचमुन्मुखी निबद्धदृष्टिः शिथिलाकुलोच्चया।
समादधे नांशुकमाहितं वृथा विवेद पुष्पेषु न पाणिपल्लवम्॥१५॥

अन्वयः—वाचं, यच्छति, प्रिये, निबद्धदृष्टिः, अत एव, उन्मुखी, शिथिलाकुलोच्चया, अपरा, अंशुकं, न समादधे। पुष्पेषु, वृथा, आहितं, पाणिपल्लवं, न विवेद॥१५॥

प्रिय इति॥ वाचं यच्छति ददाति। समालपतीत्यर्थः। दाञः शतृप्रत्ययः। 'पाघ्रा—' इत्यादिना यच्छादेशः। प्रिये निबद्धदृष्टिरत एवोन्मुखी। शिथिलः श्लथ आकुलश्चलितश्च तादृश उच्चयो नीवीबन्धो यस्याः सा। 'नारीकट्यंशुकग्रन्थौ नीवी स्यादुच्चयोऽप्यथ' इति मार्तण्डः। अपरान्या स्त्र्यंशुकं न समादधे न बबन्ध। रागपारवश्यादिति भावः। पुष्पेषु वृथा व्यर्थमाहितमारोपितम्। अस्थाने प्रसारितमित्यर्थः। पाणिपल्लवं च न विवेद। प्रियासक्तचित्तत्वादिति भावः। एषा च प्रगल्भा नायिका। 'पाणिपल्लवम्' इत्यत्रान्यतरसाधकबाधकप्रमाणाभावादुपमारूपकयोः सन्देहसङ्करः॥ १५॥

सलीलमासक्तलतान्तभूषणं समासजन्त्या कुसुमावतंसकम्।
स्तनोपपीडं नुनुदे नितम्बिना घनेन कश्चिज्जघनेन कान्तया॥१६॥

अन्वयः—आसक्तलतान्तभूषणं, कुसुमावतंसकं, सलीलं, समासजन्त्या, कान्तया, कश्चित्, स्तनोपपीडं, नितम्बिना, घनेन, जघनेन, नुनुदे॥ १६॥

सलीलमिति॥ आसक्ता लतान्ताः पल्लवा भूषणं यस्य तत्। पल्लवैः सह ग्रथित-

मित्यर्थः। कुसुमावतंसकं पुष्पशेखरम्। कान्तदत्तमिति भावः। सलीलं सविलासं समासजन्त्या शिरसि प्रतिदधत्या। 'दंशसञ्जस्वञ्जां शपि' इति नलोपः। कान्तया कश्चित्स्तनाभ्यामुपपीड्येति स्तनोपपीडम्। 'सप्तम्यां च—' इत्यादिना णमुल्प्रत्ययः। नितम्बिना। प्रशंसायामिनिः। घनेन निबिडेन जघनेन। 'पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः' इत्यमरः। नुनुदे नुन्नः। अंशुकातिरेकादिति भावः। एषा च प्रगल्भैव ॥ १६ ॥

अथ युग्मेनाह—

कलत्रभारेण विलोलनीविना गलद्दुकूलस्तनशालिनोरसा।
वलिव्यपायस्फुटरोमराजिना निरायतत्वादुदरेण ताम्यता ॥१७॥

अन्वयः—विलोलनीविना, कलत्रभारेण, गलद्दुकूलस्तनशालिनोरसा, वलिव्यपायस्फुटरोमराजिना, निरायतत्वात्, ताम्यता, उदरेण ॥ १७ ॥

कलत्रेति॥ विलोलनीविना गात्रोन्नमनाद्विश्लिष्टवस्त्रग्रन्थिना कलत्रभारेण श्रोणिभारेण। 'कलत्रं श्रोणिभार्ययोः' इत्यमरः। तथा गलत्स्रंसमानं दुकूलं याभ्यां ताभ्यां स्तनाभ्यां शालत इति तथोक्तेनोरसा तथा वलिव्यपायेन भङ्गिनिवृत्त्या स्फुटा रोमराजिर्यस्मिंस्तेन निरायतत्वादप्रसारितत्वात्ताम्यता तनुभवतोदरेण चोपलक्षितया। स्वभावोक्तिरलङ्कारः ॥ १७ ॥

विलम्बमानाकुलकेशपाशया कयाचिदाविष्कृतबाहुमूलया।
तरुप्रसूनान्यपदिश्य सादरं मनोधिनाथस्य मनः समाददे ॥१८॥

अन्वयः—विलम्बमानाकुलकेशपाशया, आविष्कृतबाहुमूलया, कयाचित्, तरुप्रसूनानि, अपदिश्य, सादरं, मनोधिनाथस्य, मनः, समाददे ॥ १८ ॥

विलम्बमानेति॥ विलम्बमानो विस्रंसमान आकुलो विलुलितश्च केशपाशो यस्यास्तयाविष्कृतबाहुमूलया दर्शितकक्षप्रदेशया कयाचित्कान्तया तरुप्रसूनान्यपदिश्य। प्रसूनग्रहणं व्याजीकृत्येत्यर्थः। 'व्याजोऽपदेशो लक्ष्यं च' इत्यमरः। सादरं साभिलाषं मनोधिनाथस्य प्रियस्य मनः समाददे आचकृषे। कर्मणि लिट्। सर्वाङ्गसौष्ठवदर्शनारसज्ञो लग्नं प्रियमनस्तत्रेति भावः। अत्र प्रियमनोहरणहेतुभिः कान्ताविशेषणपदार्थैः काव्यलिङ्गमुत्तिष्ठमानं स्वभावोक्त्या सहाङ्गाङ्गिभावेन सङ्कीर्यते ॥ १८ ॥

व्यपोहितुं लोचनतो मुखानिलैरपारयन्तं किल पुष्पजं रजः।
पयोधरेणोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तनी ॥१९॥

अन्वयः—उन्नतपीवरस्तनी, काचित् लोचनतः, पुष्पजं, रजः, मुखानिलैः, व्यपोहितुम्, अपारयन्तं, किल। प्रियम्, उन्मनाः, पयोधरेण, उरसि, जघान ॥ १९ ॥

व्यपोहितुमिति ॥ उन्नतौ च पीवरौ च स्तनौ यस्याः सोन्नतपीवरस्तनी। 'स्वाङ्गाच—' इत्यादिना ङीप्। काचिल्लोचनतः स्वनेत्रात्पुष्पजं रजः परागं मुखानिलैः फूत्कारमारुतैर्व्यपोहितुमपनेतुमपारयन्तं किलाशक्नुवन्तं। किलेत्यलीके। वस्तुतस्तदास्यस्पर्शलोभादपारयन्तमित्यर्थः। प्रियमुन्मुना उत्सुका सत्यन एव पयोधरेणोरसि जघान। तत्कपटपरिज्ञानजन्यादौत्सुक्यादिति भावः। हननस्थानत्वादुरसीति सप्तमी। इयं च प्रगल्भैव ॥ १९ ॥

इमान्यमूनीत्यपवर्जिते शनैर्यथाभिरामं कुसुमाग्रपल्लवे।
विहाय निःसारतयेव भूरुहान्पदं वनश्रीर्वनितासु सन्दधे ॥२०॥

अन्वयः—यथाभिरामम्, कुसुमाग्रपल्लवे, इमानि, अमूनि, इति, शनैः, अपवर्जिते, वनश्रीः, निःसारतया इव, भूरुहान्, विहाय, वनितासु, पदं, सन्दधे ॥ २० ॥

इमानीति ॥ यथाभिरामम्। वीप्सायामव्ययीभावः। कुसुमान्यग्रपल्लवानि च कुसुमाग्रपल्लवं तस्मिन्। 'जातिरप्राणिनाम्' इत्येकवद्भावान्नपुंसकत्वम्। इमान्यमूनीतीत्यम्। निर्देशपूर्वकमित्यर्थः। इदमदसी संनिकृष्टविप्रकृष्टार्थे। शनैरपवर्जितेऽपचिते सति वनश्रीर्निःसारतयेवेति हेतूत्प्रेक्षा। भूरुहांस्तरून्विहाय वनितासु पदं सन्दधे। अत्र वनितागतायाः पुष्पप्रसाधनसम्भवाया लक्ष्म्या विषयभूताया निगरणेन विषयेण वनश्रियो वनितागमनत्वोक्त्याऽसम्बन्धे सम्बन्धरूपाऽभेदे भेदरूपा वातिशयोक्तिरलङ्कारः। 'विषयस्यानुपादानाद्विषय्युपनिबध्यते। यत्र सातिशयोक्तिः स्यात्कविप्रौढोक्तिजीविता ॥' इति लक्षणादुत्प्रेक्षाङ्गत्वमस्याः ॥ २० ॥

प्रवालभङ्गारुणपाणिपल्लवः परागपाण्डूकृतपीवरस्तनः।
महीरुहः पुष्पसुगन्धिराददे वपुर्गुणोच्छ्रायमिवाङ्गनाजनः ॥२१॥

अन्वयः—प्रवालभङ्गारुणपाणिपल्लवः, परागपाण्डूकृतपीवरस्तनः, पुष्पसुगन्धिः, अङ्गनाजनः, महीरुहः, वपुः, गुणोच्छ्रायं, आददे इव ॥ २१ ॥

प्रवालेति ॥ प्रवालभङ्गेन पल्लववलयेनारुणः पाणिपल्लवो यस्य। तद्रसरञ्जनादित्यर्थः। परागेण पुष्परजसा पाण्डूकृतौ पीवरौ स्तनौ यस्य स.। पुष्पैः सुगन्धिः सुरभिरङ्गनाजनो महीरुहो वृक्षजाताद्वपुर्गुणस्य स्वदेहगुणस्योच्छ्रायः पाणिपल्लवारुण्यादेर्य उत्कर्षस्तमाददे लब्धवानिवेत्युत्प्रेक्षा। वस्तुतस्तु स्वाभाविक एव प्रवालभङ्गादिभिरभिव्यज्यत इति भावः। उत्कृष्टः श्राय उच्छ्राय इति घञन्तेन प्रादिसमासः। न तूपसृष्टादच्प्रत्ययः। 'श्रिणीभुवोऽनुपसर्गे' इति प्रतिषेधात् ॥ २१ ॥

पञ्चभिः कुलकमाह—

वरोरुभिर्वारणहस्तपीवरैश्चिराय खिन्नान्नवपल्लवश्रियः।

समेऽपि यातुं चरणाननीश्वरान्मदादिव प्रस्खलतः पदे पदे ॥२२॥

अन्वयः—वारणहस्तपीवरैः, वरोरुभिः, चिराय, खिन्नान्, नवपल्लवश्रियः, समे, अपि, यातुम्, अनीश्वरान्, मदात्, इव, पदे, पदे, प्रस्खलतः, चरणान् ॥ २२ ॥

वरोरुभिरिति ॥ अनुसानु सानुषु यद्वर्त्म ततः सकाशाद्गुरुणा खेदेन मन्थरमलसं विनिर्यतीनां निर्गच्छन्तीनां सुराङ्गनानां संबन्धिभिर्वारणहस्तपीवरैः करिकरस्थूलैः। वराश्च त उरवश्चेति तैः। चिराय खिन्नान्। किंच नवपल्लवानां श्रीरिव श्रीर्येषां तान्। तद्वन्मृदूनित्यर्थः। अत एव समे समस्थलेऽपि। किं पुनर्विषम् इति भावः। यातुं गन्तुमनीश्वरानशक्तानत एव मदादिव पदे पदे। वीप्सायां द्विर्भावः। प्रस्खलतश्चरणान्। मदादिवेत्युपमा ॥ २२ ॥

विसारिकाञ्चीमणिरश्मिलब्धया मनोहरोच्छ्रायनितम्बशोभया।
स्थितानि जित्वा नवसैकतद्युतिं श्रमातिरिक्तैर्जघनानि गौरवैः ॥२३॥

अन्वयः—विसारिकाञ्चीमणिरश्मिलब्धया, मनोहरोच्छ्रायनितम्बशोभया, नवसैकतद्युतिं, जित्वा, स्थितानि, श्रमातिरिक्तैः, गौरवैः, जघनानि ॥ २३ ॥

विसारीति ॥ विसारिभिः काञ्चीमणिरश्मिभिर्लब्धया। तज्जनितयेत्यर्थः। मनोहर उच्छ्राय उत्सेधो येषां तेषां नितम्बानां शोभया करणेन नवसैकतानां द्युतिं शोभां जित्वा स्थितानि। तत्तुल्यानीत्यर्थः। अत एवोपमालङ्कारः। श्रमेणातिरिक्तैरतिशयितैर्गौरवैर्गुरुत्वैरुपलक्षितानि। नितरां भारायमाणानीत्यर्थः। जघनानि च उच्छ्रायो व्याख्यातः ॥ २३ ॥

समुच्छ्वसत्पङ्कजकोशकोमलैरुपाहितश्रीण्युपनीवि नाभिभिः।
दधन्ति मध्येषु वलीविभङ्गिषु स्तनातिभारादुदराणि नम्रताम् ॥२४॥

अन्वयः—समुच्छ्वसत्पङ्कजकोशकोमलैः, नाभिभि, उपनीवि, उपाहितश्रीणि, वलीविभङ्गिषु, मध्येषु, स्तनातिभारात्, नम्रतां, दधन्ति, उदराणि, ॥ २४ ॥

समुच्छ्वसदिति ॥ समुच्छ्वसत्पङ्कजकोशकोमलैर्दलत्कमलमुकुलमुग्धैरित्युपमा। नाभिभिः प्रतारिकाख्यैः। 'अथ नाभिस्तु जन्त्वङ्गे यस्य संज्ञा प्रतारिका' इति केशवः। पुंलिङ्गतायां तु कविरेव प्रमाणम्। उपनीवि नीवीसमीपे। उपाहितश्रीणि जनितशोभानि तथा वलीविभङ्गिषूर्मिमत्सु मध्येषु जघनस्थलेषु स्तनातिभारान्नम्रतां दधन्ति बिभ्राणानि। 'वा नपुंसकस्य' इति विकल्पाच्छतुर्नुमागमः। उदराणि च ॥२४॥

समानकान्तीनि तुषारभूषणैः सरोरुहैरस्फुटपत्रपङ्क्तिभिः।
चितानि घर्माम्बुकणैः समन्ततो मुखान्यनुत्फुल्लविलोचनानि च ॥२५॥

अन्वयः—घर्माम्बुकणैः, समन्ततः, चितानि, अनुत्फुल्लविलोचनानि, तुषारभूषणैः, अस्फुटपत्रपङ्क्तिभिः, सरोरुहैः, समानकान्तीनि, मुखानि, च, ॥ २९ ॥

समानेति ॥ किंच । घर्माम्बुकणैः स्वेदोदकबिन्दुभिः समन्ततश्चितानि व्याप्तान्यनुत्फुल्लविलोचनान्यविकसदक्षीण्यत एव तुषारभूषणैः शीकरपरिवृतैः । 'तुषारौ हिमशीकरौ' इति शाश्वतः । अस्फुटपत्रपङ्क्तिभिरविकचदलावलिभिः । 'व्याकोशविकचस्फुटाः' इत्यमरः । सरोरुहैः समानकान्तीनीत्युपमा । मुखानि च ॥ २९ ॥

विनिर्यतीनां गुरुखेदमन्थरं सुराङ्गनानामनुसानु वर्त्मनः ।
सविस्मयं रूपयतो नभश्चरान्विवेश तत्पूर्वमिवेक्षणादरः ॥ २६ ॥

अन्वयः—अनुसानु, वर्त्मनः, गुरुखेदमन्थरं, विनिर्यतीनां, सुराङ्गनानां, सविस्मयं, रूपयतः, नभश्चरान्, तत्पूर्वम्, इव ईक्षणादरः, विवेश, ॥ २६ ॥

विनिर्यतीनामिति ॥ सविस्मयं रूपयतः पूर्वोक्तचरणादीनि वर्णयतो नभश्चरान्गन्धर्वांस्तत्पूर्वमिव तदेव प्रथमं यथा तथेत्युत्प्रेक्षा । ईक्षणादर आलोकनकौतुकं विवेश । पूर्वार्धं व्याख्यातम् । अत्र कुलके स्वभावोक्तिरुत्प्रेक्षाङ्गम् ॥ २६ ॥

सम्प्रति सलिलक्रीडावर्णनमारभते—

अथ स्फुरन्मीनविधूतपङ्कजा विपङ्कतीरस्खलितोर्मिसंहतिः ।
पयोऽवगाढुं कलहंसनादिनी समाजुहावेव वधूः सुरापगा ॥ २७ ॥

अन्वयः—अथ, स्फुरन्मीनविधूतपङ्कजा, विपङ्कतीरस्खलितोर्मिसंहतिः, कलहंसनादिनी, सुरापगा, वधूः, पयः, अवगाढुं, समाजुहाव, इव, ॥ २७ ॥

अथेति ॥ अथ पुष्पावचयानन्तरं स्फुरद्भिश्चलद्भिर्मीनैर्विधूतपङ्कजेति । सहस्तमुखवीक्षणोक्तिः । विपङ्कं पङ्करहितम् । विहारयोग्यमिति यावत् । तत्र तीरे स्खलिता विचलितोर्मिसंहतिर्यस्याः सेति हस्तसंज्ञोक्तिः । कलहंसनादिनी कादम्बशब्दवतीति वाग्व्यापारोक्तिः । अत एव सुरापगा गङ्गा वधूरप्सरसः पयोऽवगाढुमवगाहितुम् । गाहेरूदित्त्वादिड्विकल्पः । समाजुहावेवाकारयामासेवेत्युत्प्रेक्षा । 'हूतिराकारणाह्वानम्' इत्यमरः । ह्वयतेर्लिट् । 'अभ्यस्तस्य च' इति सम्प्रसारणम् ॥ २७ ॥

प्रशान्तघर्माभिभवः शनैर्विवान्विलासिनीभ्यः परिमृष्टपङ्कजः ।
ददौ भुजालम्बमिवात्तशीकरस्तरङ्गमालान्तरगोचरोऽनिलः ॥२८॥

अन्वयः—प्रशान्तघर्माभिभवः, शनैः, विवान्, परिमृष्टपङ्कजः, आत्तशीकरः, तरङ्गमालान्तरगोचरः, अनिलः, विलासिनीभ्यः, भुजालम्बं, ददौ, इव, ॥ २८ ॥

प्रशान्तेति ॥ प्रशान्तघर्माभिभवः प्रशान्तोष्णबाधः । 'वा दान्तशान्त—' इत्यादिना निपातनात्साधुः । शनैर्विवान्मन्दं वहन् । वातेः शतृप्रत्ययः । परिमृष्टपङ्कजः ।

पद्मगन्धीत्यर्थः । आर शीकरः । कुतः । तरङ्गमालानामन्तरे मध्ये गोचरः स्थानं यस्य सोऽनिलो विलासिनीभ्यो भुजालम्बं ददाविवेत्युत्प्रेक्षा । विशिष्टवायुसम्पर्कात्तयो च्छ्वसुरित्यर्थः ॥ २८ ॥

गतैः सहावैः कलहंसविक्रमं कलत्रभारैः पुलिनं नितम्बिभिः ।
मुखैः सरोजानि च दीर्घलोचनैः सुरस्त्रियः साम्यगुणान्निरासिरे ॥२९॥

अन्वयः—सुरस्त्रियः, सहावैः, गतैः, कलहंसविक्रमं, नितम्बिभिः, कलत्रभारैः, पुलिनं, दीर्घलोचनैः, मुखैः, सरोजानि च, साम्यगुणात्, निरासिरे ॥ २९ ॥

गतैरिति । सुरस्त्रियोऽप्सरसः सहावैः सविलासैर्गतैर्गतिभिः । नपुंसके भावे क्तः । कलहंसानां विक्रमं गतिम् । विलासविधुरमिति शेषः । तथा नितम्बिभिः प्रशस्तनितम्बैः कलत्रभारैर्जघनभारैः पुलिनम् । नितम्बभारशून्यमित्यर्थः । तथा दीर्घलोचनैर्मुखैः सरोजानि च । अलोचनानीति शेषः । साम्यगुणात्समानगुणत्वान्निरासिरे निरस्तवत्यः । गुणवदगुणयोः कुतः साम्यमिति भावः । अस्यतेः कर्तरि लिट् । 'उपसर्गादस्यत्यूह्योर्वा–' इति विकल्पादात्मनेपदम् ॥ २९ ॥

विभिन्नपर्यन्तगमीनपङ्क्तयः पुरो विगाढाः सखिभिर्मरुत्वतः ।
कथञ्चिदापः सुरसुन्दरीजनैः सभीतिभिस्तत्प्रथमं प्रपेदिरे ॥३०॥

अन्वयः—विभिन्नपर्यन्तगमीनपङ्क्तयः, मरुत्वतः, सखिभिः, पुरः, विगाढाः, सभीतिभिः, सुरसुन्दरीजनैः, तत्प्रथमं कथञ्चित्, आपः, प्रपेदिरे ॥ ३० ॥

विभिन्नेति ॥ विभिन्ना विच्युतसङ्घाताः पर्यन्तगाः प्रान्तगता मीनानां पङ्क्तयो यासां ताः । कुतः । मरुत्वतः सखिभिरिन्द्रस्य सचिवैर्गन्धर्वैः पुरः पूर्वं विगाढाः प्रविष्टाः । तासां विश्वासार्थं गर्तग्राहादिपरीक्षार्थं चेति भावः । सभीतिभिरप्रविष्टविषयत्वात्सभयैः । 'विषादिभिः' इति पाठेऽप्ययमेवार्थः । सुरसुन्दरीजनैस्तदेवावगाहनं प्रथमं यथा तथात एव कथंचिद्भयात्कृच्छ्रेणापः प्रपेदिरे जगाहिरे ॥ ३० ॥

विगाढमात्रे रमणीभिरम्भसि प्रयत्नसंवाहितपीवरोरुभिः ।
विभिद्यमाना विससार सारसानुदस्य तीरेषु तरङ्गसंहतिः ॥३१॥

अन्वयः—प्रयत्नसंवाहितपीवरोरुभिः, रमणीभिः, अम्भसि, विगाढमात्रे, विभिद्यमाना, तरङ्गसंहतिः, तीरेषु, सारसान्, उदस्य, विससार ॥ ३१ ॥

विगाढेति ॥ प्रयत्नेन संवाहिताः संचारिताः पीवराः स्थूला ऊरवो याभिस्ताभी रमणीभिरम्भसि विगाढमात्रे प्रविष्ट एव सति । सुप्सुपेति समासः । 'मात्रं कार्त्स्न्येऽवधारणे' इत्यमरः । विभिद्यमाना स्वयं विशीर्यमाणा । कर्मकर्तरि शानच् । तरङ्गसंहतिस्तीरेषु सारसान्पक्षिविशेषान् । 'सारसो मैथुनी कामी गोनर्दः पुष्कराह्वयः' इति

यादवः । यद्वा । सारसान्हंसान् । 'चक्राङ्गः सारसो हंसः' इति शब्दार्णवे । उदस्योत्सार्य विससार वितस्तार ॥ ३१ ॥

शिलाघनैर्नाकसदामुरःस्थलैर्बृहन्निवेशैश्च वधूपयोधरैः ।
तटाभिनीतेन विभिन्नवीचिना रुषेव भेजे कलुषत्वमम्भसा ॥३२॥

अन्वयः—शिलाघनैः, नाकसदां, उरःस्थलैः बृहन्निवेशैः, वधूपयोधरैश्च, तटाभिनीतेन, विभिन्नवीचिना, अम्भसा, रुषा, इव, कलुषत्वं, भेजे ॥ ३२ ॥

शिलेति ॥ शिलावद्घनैः कठिनैर्नाकसदां गन्धर्वाणामुरःस्थलैर्बृहन्निवेशैर्महासंस्थानैः। अतिस्थूलैरित्यर्थः । वधूपयोधरैश्च तटमभितो नीतेन प्रापितेनात एव विभिन्नवीचिना भग्नोर्मिणाम्भसा कर्त्रा । रुषेवेति हेतूत्प्रेक्षा । कलुषत्वमाविलत्वम्, मनःक्षोभश्च ध्वन्यते । भेजे कर्मणि लिट् । यथा कश्चिन्मृदुस्वभावः केनचित्कठिनादिना साङ्गभङ्गं ताडयित्वा निष्कासितः क्षुभ्यति तद्वदिति भावः । कलुषत्वमित्यत्र वाच्यप्रतीयमानयोरभेदाध्यवसायः। अन्यथा शुद्धवाच्यस्याविलत्वस्य रोषहेतुकत्वादुत्प्रेक्षानुविधानादिति ॥

विधूतकेशाः परिलोलितस्रजः सुराङ्गनानां प्रविलुप्तचन्दनाः ।
अतिप्रसङ्गाद्विहितागसो मुहुः प्रकम्पमीयुः सभया इवोर्मयः ॥३३॥

अन्वयः—विधूतकेशाः, परिलोलितस्रजः, प्रविलुप्तचन्दनाः, अतिप्रसङ्गात्, सुराङ्गनानां विहितागसः, ऊर्मयः, सभया, इव, मुहुः, प्रकम्पम्, ईयुः ॥ ३३ ॥

विधूतेति ॥ विधूता विक्षिप्ताः केशा यैस्ते परिलोलिता विलोलिताः स्रजो यैस्ते प्रविलुप्तचन्दनाः प्रमृष्टाङ्गरागा अतिप्रसङ्गादविच्छेदात्सुराङ्गनानां विहितागसः कृतमण्डनखण्डनरूपापराधा अत एवोर्मयस्तरङ्गाः । सभया इव क्षोभ्या भीता इव मुहुः प्रकम्पमीयुः । स्वभाविकस्य कम्पस्य भयहेतुकत्वमुत्प्रेक्ष्यते । यद्वा सुराङ्गनानां विधूतकेशा इत्यादियोजना । सापेक्षत्वेऽपि गमकत्वात्समासः । स्त्रीसंग्रहणसाहसमपराधः । भयं तु राजादिभ्य इति ॥ ३३ ॥

विपक्षचित्तोन्मथना नखव्रणास्तिरोहिता विभ्रममण्डनेन ये ।
हृतस्य शेषानिव कुङ्कुमस्य तान्विकत्थनीयान्दधुरन्यथा स्त्रियः ॥३४॥

अन्वयः—विपक्षचित्तोन्मथनाः, ये, नखव्रणाः, विभ्रममण्डनेन, तिरोहिताः, हृतस्य, कुङ्कुमस्य, शेषान्, इव, विकत्थनीयान्, तान्, स्त्रियः, अन्यथा, दधुः ॥ ३४ ॥

विपक्षेति ॥ विपक्षस्य सपत्नीजनस्य चित्तानामुन्मनाः । व्यथका इत्यर्थः । बहुलग्रहणात्कर्तरि ल्युट् । ये नखव्रणा नखक्षतानि । 'व्रणोऽस्त्रियाम्' इत्यमरः । विभ्रमस्य सौन्दर्यस्य मण्डनम् । तादर्थ्येऽप्यश्वघासादिवत्षष्ठीसमासः । न तु चतुर्थीसमासो यूपदार्वादिवत्प्रकृतिविकाराभावादिति । तेन कुङ्कुमलेपादिना तिरोहिताश्छन्ना हृतस्य

क्षालितस्य कुङ्कुमस्य व्यञ्जकत्वेन शेषानिवावशिष्टलेशानिव स्थितानित्युत्प्रेक्षा। विकत्थनीयान्भर्तृत्वाल्लभ्यस्य व्यञ्जकत्वेन श्लाघनीयांस्ताम्नखव्रणानिस्त्रियोऽन्यथा दधुः। प्रकाशं दधुरित्यर्थः ॥ ३४ ॥

अथ युग्मेनाह—सरोजेत्यादिना ॥

सरोजपत्रे नु विलीनषट्पदे विलोलदृष्टेः स्विदमू विलोचने।
शिरोरुहः स्विन्नतपक्ष्मसन्ततेर्द्विरेफवृन्दं नु निशब्दनिश्चलम् ॥३५॥

अन्वयः—अमू, विलीनषट्पदे, सरोजपत्रे, नु, (यद्वा) विलोलदृष्टेः, विलोचने, स्वित्, नतपक्ष्मसन्ततेः, शिरोरुहाः, स्वित् निशब्दनिश्चलम्, द्विरेफवृन्दं, नु ॥ ३५ ॥

सरोजेति ॥ अमू पुरोवर्तिनी विलीनषट्पदे संसक्तभृङ्गे। सक्तौनिकत्वमक्ष्णोरर्थसिद्धमित्युपमानं विशिष्यते। सरोजपत्रे नुव। यद्वा। विलोलदृष्टेश्चञ्चलाक्ष्या विलोचने स्वित्। नुस्विच्छब्दौ वितर्के। किञ्च। नतपक्ष्मसंततेश्चञ्चलाक्ष्याः शिरोरुहाः स्विन्निशब्दं नीरवं च तन्निश्चलं च तद्द्विरेफवृन्दं नु ॥ ३५ ॥

अगूढहासस्फुटदन्तकेसरं मुखं स्विदेतद्विकसन्नु पङ्कजम्।
इति प्रलीनां नलिनीवने सखीं विदाम्बभूवुः सुचिरेण योषितः॥३६॥

अन्वयः—अगूढहासस्फुटदन्तकेसरं, मुखं, स्वित्, विकसत्, एतत्, पङ्कजं, नु, इति, नलिनीवने, प्रलीनां सखीं, योषितः, सुचिरेण, विदाम्बभूवतुः ॥ ३६ ॥

अगूढेति॥ किञ्च अगूढहासो व्यक्तस्मितं तेन स्फुटा दन्ताः केसरा इव दन्तकेसरा यस्य तन्मुखं स्वित्। यद्वा। विकसत्पङ्कजं न्वितीत्थम्। संशयेनेति शेषः। नलिनीवने प्रलीनां निगूढां सखीं योषितः सुचिरेणातिविलम्ब्य। विकल्पादाम्प्रत्ययः। अत्र युग्मे निश्चयान्तसन्देहालङ्कारः ॥ ३६ ॥

प्रियेण सङ्ग्रथ्य विपक्षसंनिधावुपाहितां वक्षसि पीवरस्तने।
स्रजं न काचिद्विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तुनि३७

अन्वयः—काचित्, प्रियेण, सङ्ग्रथ्य, विपक्षसन्निधौ, पीवरस्तने, वक्षसि, उपाहितां स्रजं जलाविलां, तां, न, विजहौ। गुणाः, प्रेम्णि, वसन्ति वस्तुनि, न, हि, ॥ ३७ ॥

प्रियेणेति ॥ काचित्प्रियेण संग्रथ्य स्वयमेव रचयित्वा विपक्षसंनिधौ सपत्नीजनसमक्षं पीवरस्तने वक्षस्युपाहितां स्रजं मालां जलाविलाम्। मृदितामपीत्यर्थः। तां न विजहौ न तत्याज। न च निर्गुणायां तत्र का प्रीतिरिति वाच्यमित्यर्थान्तरन्यासेनाह–गुणाः प्रेम्णि वसन्ति। वस्तुनि न वसन्ति हि। यत्प्रेमास्पदं तदेव गुणवत्। अन्यत्तु गुणवदपि निर्गुणमेव। प्रेम तु न वस्तुपरिक्षामपेक्षत इति भावः ॥ ३७ ॥

असंशयं न्यस्तमुपान्तरक्ततां यदेव रोद्धुं रमणीभिरञ्जनम्।
हृतेऽपि तस्मिन्सलिलेन शुक्लतां निरास रागो नयनेषु न श्रियम् ॥३८॥

अन्वयः—रमणीभिः, यत्, अञ्जनम्, न्यस्तम्। (तदञ्जनम्) उपान्तरक्ततां, रोद्धुं, एव, असंशयं, तस्मिन्, सलिलेन, हृते, अपि, रागः, नयनेषु, शुक्लतां, निरास, श्रियम्, न, निरास ॥ ३८ ॥

असंशयमिति ॥ स्त्रीणां नेत्रशोभार्थमञ्जनधारणमम्बुविहारोपगमाद्रक्तवर्णत्वं चाक्ष्णां ततः शुक्लत्वतिरोधानं च निश्चितमित्युत्प्रेक्ष्यते। रमणीभिर्यदञ्जनं न्यस्तम्। तदिति शेषः। यत्तदोर्नित्यसंबन्धात्। तदञ्जनमुपान्तयो रक्ततां रोद्धुं प्रतिबद्धुमेव न्यस्तम्। न तु शोभार्थमित्यर्थः। अन्यथा रागाभिव्याप्त्या शुक्लत्वतिरोधानं स्यादित्यर्थः। असंशयमित्युत्प्रेक्षाव्यञ्जकम्। संशयस्याप्यभावः। नात्र संशयोऽस्तीत्यर्थः। अर्थाभावेऽव्ययीभावः। कुत एतदिति चेद्यतस्तस्मिन्नञ्जने सलिलेन हृते क्षालिते सत्यपि रागः पूर्वोक्त एवोपान्तरक्तता किन्तु प्रतिबन्धाभावादभितो व्याप्त्येत्याशयः। नयनेषु शुक्लतां निरास निरस्तवान्। अस्यतेर्लिट्। श्रियं शोभां तु न निरास। अतः शुक्लत्वविरोधिरागनिरोधार्थमेवेदमञ्जनं स्यात् न तु शोभार्थम्। तस्यास्तदभावेऽपि सत्त्वादित्यर्थः। अञ्जनापगमेऽपि तन्नयनानां राग एवालङ्कारोऽभूदिति भावः। अत्राञ्जनन्यासमनूद्य तस्य शोभार्थत्वनिषेधेन रागरोधार्थत्वोत्प्रेक्षणमुदितम्। उत्तरार्धं तस्यैव समर्थनात्। एवमुपान्तरक्ततां रोद्धुं यदञ्जनं न्यस्तमित्येकान्वये विध्यनुवादविरोधः स्यात् ॥ ३८ ॥

द्युतिं वहन्तो वनितावतंसका हृताः प्रलोभादिव वेगिभिर्जलैः।
उपप्लुतास्तत्क्षणशोचनीयतां च्युताधिकाराः सचिवा इवाययुः ॥३९॥

अन्वयः—द्युतिं, वहन्तः, वेगिभिः, जलैः, प्रलोभात्, हृताः, उपप्लुताः, वनितावतंसकाः, च्युताऽधिकाराः, सचिवाः, इव, तत्क्षणं, शोचनीयतां, आययुः ॥ ३९ ॥

द्युतिमिति ॥ द्युतिं शोभां तेजश्च वहन्तो वेगिभिर्जविभिर्जलैर्जडैश्च। डलयोरभेदात्। 'जलं गोकले नीरे ह्रीवेरे च जडेऽन्यवत्' इति विश्वः। प्रलोभान्मोहाद्धृता गृहीता उपप्लुता मृदिताः। यद्वा कर्तरि क्तः। प्लवमाना इत्यर्थः। अन्यत्र। धनग्रहणबन्धनादिना पीडिता वनितावतंसकाश्च्युताधिकारा भ्रष्टाधिकाराः सचिवा इव तत्क्षणं शोचनीयतामाययुः प्रापुः ॥ ३९ ॥

विपत्त्रलेखा निरलक्तकाधरा निरञ्जनाक्षीरपि बिभ्रतीः श्रियम्।
निरीक्ष्य रामा बुबुधे नभश्चरैरलङ्कृतं तद्वपुषैव मण्डनम् ॥ ४० ॥

अन्वयः—विपत्त्रलेखाः, निरलक्तकाधराः, निरञ्जनाक्षीः, अपि, श्रियं, बिभ्रतीः, रामा, निरीक्ष्य, नभश्चरैः, तद्वपुषा, एव, मण्डनम् , अलङ्कृतम् ॥ ४० ॥

विपत्त्रेति ॥ विगताः पत्त्रलेखास्तिलकविशेषाः यासां ता विपत्त्रलेखाः । निरलक्तकाः क्षालितरागा अधरा यासां ताः । निरञ्जनान्यक्षीणि यासां ता निरञ्जनाक्षीरपि । 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्' । 'षिद्गौरादिभ्यश्च' इति ङीष् । तथापि श्रियं बिभ्रती शोभाकारणाभावेऽपि शोभमाना इति विभावनालङ्कारः । रामा निरीक्ष्य नभश्चरैर्गन्धर्वैस्तासां वपुषैव मण्डनमलङ्कृतम् । न तु मण्डनेन तद्वपुरित्यक्षरार्थः। इति बुबुधे ज्ञातम् । कर्मणि लिट् । स्वभावरमणीयानां किमलङ्करणैरिति भावः । ॥ ४० ॥

तथा न पूर्वं कृतभूषणादरः प्रियानुरागेण विलासिनीजनः ।
यथा जलार्द्रो नखमण्डनश्रिया ददाह दृष्टीश्च विपक्षयोषिताम् ॥४१॥

अन्वयः—विलासिनीजनः, पूर्वं, प्रियानुरागेण, कृतभूषणादरः, च, विपक्षयोषितां, दृष्टीः, तथा, न, ददाह । यथा, जलार्द्रः, नखमण्डनश्रिया, ददाह ॥ ४१ ॥

तथेति ॥ विलासिनीजन· पूर्वं जलविहारात्प्राक्प्रियानुरागेण कृतो भूषणेष्वादर आसक्तिर्येन सः । अनुरक्तप्रियत्वात्सम्यक्प्रसाधितः सन्नपीत्यर्थः । प्रियस्यानुरागेण च विपक्षयोषितां सपत्नीनां दृष्टीश्चक्षूंषि तथा न ददाह न तु खीचकार । यथा जलार्द्रः सन् । नखशब्देन नखक्षतानि लक्ष्यन्ते । तान्येव मण्डनं तस्य श्रिया । तत्कृतशोभयेत्यर्थः । विपक्षयोषितां सपत्नीनां दृष्टीश्चक्षूंषि यथा ददाह तापयामास । मण्डनान्तरादपि नखमण्डनानुरागादपि तदनुभाव एव सपत्नीनां दुःखहेतुरिति भावः । जलार्द्रो ददाहेति विरुद्धकार्योत्पत्तिरूपो विषमालङ्कारः । 'विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत् । विरूपघटना वा स्याद्विषमालंकृतिस्त्रिधा ॥' इति लक्षणात् ॥ ४१ ॥

शुभाननाः साम्बुरुहेषु भीरवो विलोलहाराश्चलफेनपङ्क्तिषु ।
नितान्तगौर्यो हृतकुङ्कुमेष्वलं न लेभिरे ताः परभागमूर्मिषु ॥४२॥

अन्वयः—शुभाननाः, विलोलहाराः, नितान्तगौर्यः, भीरवः, ताः, साम्बुरुहेषु, चलफेनपङ्क्तिषु, हृतकुङ्कुमेषु, ऊर्मिषु, अलं, परभागम् , न, लेभिरे ॥ ४२ ॥

शुभेति ॥ शुभानना विलोलहारा नितान्तगौर्योऽरुणाङ्ग्यः । 'गौरोऽरुणे सिते पीते' इति वैजयन्ती । भीरवस्ताः स्त्रियः साम्बुरुहेषु चलाः फेनपङ्क्तयो येषु तेषु हृतानि कुङ्कुमानि यैस्तेषु । कुङ्कुमसंक्रमारुणेष्वित्यर्थः । ऊर्मिषु विषयेष्वलमत्यर्थं परभागं गुणोत्कर्षं न लेभिरे । 'परभागो गुणोत्कर्षः' इति यादवः । तासामूर्मीणां चारुणत्वादिगुणसाम्याच्च कश्चिद्विशेषो लक्ष्यत इत्यर्थः । अत एव सामान्यालङ्कारः—'सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता' इति लक्षणात् । शुभाननत्वसाम्बुरुहत्वादुभयविशेष-

णानां क्रमेणोभयस्मिन्समन्वयाद्यथासंख्यालङ्कारश्च । 'यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयात्' इति काव्यप्रकाशे लक्षणात् । अनयोरङ्गाङ्गिभावेन संकरः ॥ ४२ ॥

ह्रदाम्भसि व्यस्तवधूकराहते रवं मृदङ्गध्वनिधीरमुज्झति ।
मुहुः स्तनैस्तालसमं समाददे मनोरमं नृत्यमिव प्रवेपितम् ॥४३॥

अन्वयः—व्यस्तवधूकराहते, ह्रदाम्भसि, मृदङ्गध्वनिधीरं, रवम् , उज्झति, मुहुः, स्तनैस्तालसमं, मनोरमम् , नृत्यम् , इव, प्रवेपितम् , समाददे ॥ ४३ ॥

ह्रदेति ॥ व्यस्ताभ्यां विपर्यासिताभ्यां वधूकराभ्यामाहते । एकेन करेणोत्सार्यान्येन ताडित इत्यर्थः । ह्रदाम्भसि मृदङ्गध्वनिवद्धीरं गम्भीरं रवमुज्झति सति । तथा ध्वनति सतीत्यर्थः । मुहुः स्तनैस्तालो गीतवाद्यनृत्यानां कालपरिच्छेदः । 'तालः कालक्रियामानम्' इत्यमरः। तस्य सममनुरूपं मनोरमं नृत्यमिव प्रवेपितं प्रकम्पः। भावे क्तः। समाददे स्वीकृतम् । उपमालङ्कारः ॥ ४३ ॥

श्रिया हसद्भिः कमलानि सस्मितैरलङ्कृताम्बुः प्रतिमागतैर्मुखैः ।
कृतानुकूल्या सुरराजयोषितां प्रसादसाफल्यमवाप जाह्नवी॥४४॥

अन्वयः—श्रिया, कमलानि, हसद्भि , सस्मितैः, प्रतिमागतैः, मुखैः, अलङ्कृताम्बुः, सुरराजयोषितां, कृतानुकूल्या, जाह्नवी, प्रसादसाफल्यम् , अवाप ॥ ४४ ॥

श्रियेति ॥ श्रिया शोभया कमलानि हसद्भिः । कमलसदृशैरित्यर्थः । 'हसतीर्ष्यत्यसूयति' इति दण्डिना सदृशपर्यायपरा उक्ताः । सस्मितैः प्रतिमागतैः । प्रतिबिम्बगतैरित्यर्थः । 'प्रतिमानं प्रतिबिम्बं प्रतिमा' इत्यमरः । मुखैरलंकृतान्यम्बूनि यस्याः सा । किञ्च सुरराजयोषितां कृतमानुकूल्यं विहाराद्युपकारो यया सा । इत्थं योषिद्भिरुपकृता स्वयं च तासामुपचिकीर्षुर्जाह्नवी गङ्गा प्रसादस्य स्वच्छत्वस्य साफल्यम् । अर्थगौरववत्षष्ठीसमासनिर्वाहः । अवाप । अप्रसन्नाम्भसि विहारबिम्बग्रहणयोरसम्भवादित्यर्थः । स्वच्छा एव हि परैरुपक्रियन्ते स्वयं चोपकुर्वते तेषामिति भावः । 'कृतानुकारा' इति पाठेऽनुकारोऽनुकूलकरणमुपकार इत्येवं व्याख्येयम् । अत्र जाह्नवीविशेषणपदार्थस्य साफल्यं प्रति हेतुत्वात्काव्यलिङ्गमलङ्कारः ॥ ४४ ॥

परिस्फुरन्मीनविघट्टितोरवः सुराङ्गनास्त्रासविलोलदृष्टयः ।
उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम् ॥४५॥

अन्वयः—परिस्फुरन्मीनविघट्टितोरवः, त्रासविलोलदृष्टयः, कम्पितपाणिपल्लवाः, सुराङ्गनाः, सखीजनस्य, अपि, विलोकनीयताम् , उपाययुः ॥ ४५ ॥

परीति ॥ परितः स्फुरद्भिर्विवर्तमानैर्मीनैर्विघट्टिता ऊरवो यासां ता अत एव त्रास-

विलोलदृष्टयो भयविकस्तकेशाः कम्पितपाणिपल्लवाश्च सुराङ्गनाः सखीजनस्यापि विलोकनीयतामुपाययुः । किमुत प्रियजनस्येति भावः । स्वभावोक्तिरलङ्कारः ॥ ४५ ॥

भयादिवाश्लिष्य झषाहतेऽम्भसि प्रियं मुदानन्दयति स्म मानिनी ।
अकृत्रिमप्रेमरसाहितैर्मनो हरन्ति रामाः कृतकैरपीहितैः ॥ ४६ ॥

अन्वयः—मानिनी, अम्भसि, झषाहते, भयात्, इव, मुदा, आश्लिष्य, प्रियं, आनन्दयतिस्म, रामाः, अकृत्रिमप्रेमरसाहितैः, कृतकैः, अपि, ईहितैः, मनः, हरन्ति॥४६॥

भयादिति ॥ मानिनी । दुर्लभस्वयंग्रहणेति भावः । अम्भसि जले झषेण मत्स्येनाहते सति । 'पृथुरोमा झषो मत्स्यः' इत्यमरः । भयादिव । वस्तुतस्तु न तथेति भावः । किन्तु मुदौत्सुक्येनैवाश्लिष्य प्रियमानन्दयति स्म । तथाहि । रामाः स्त्रियोऽकृत्रिमोऽनारोपितो यः प्रेमरसस्तेनाहितैर्जनितैः कृतकैः । कृत्रिमैरपीत्यर्थः । ईहितैश्चेष्टितैर्मनो हरन्ति आरोपितमपि भयं प्रेममूलत्वान्मनोहरं बभूवेत्यर्थः । अत्राल्पानुभावेन भयेन सहजरागनिगूहनान्मीलनालङ्कारः—'मीलनं वस्तुना यत्र वस्त्वन्तरनिगूहनम्' इति लक्षणान्तरसम्भवादर्थान्तरन्यासेन संसृज्यते ॥ ४६ ॥

तिरोहितान्तानि नितान्तमाकुलैरपां विगाहादलकैः प्रसारिभिः ।
ययुर्वधूनां वदनानि तुल्यतां द्विरेफवृन्दान्तरितैः सरोरुहैः ॥४७॥

अन्वयः—अपां, विगाहात्, नितान्तम्, आकुलैः, प्रसारिभिः, अलकैः, तिरोहितान्तानि, वधूनां, वदनानि, द्विरेफवृन्दान्तरितैः, सरोरुहैः तुल्यतां, ययुः ॥ ४७ ॥

तिरोहितेति ॥ अपां विगाहान्नितान्तमाकुलैर्विकीर्णैः प्रसारिभिरायतैरलकैः केशैस्तिरोहितान्तानि छन्नप्रान्तानि वधूनां वदनानि द्विरेफवृन्दैरन्तरितानि छन्नानि सरोरुहाणि तैः सरोरुहैस्तुल्यतां ययुरित्युपमालङ्कारः ॥ ४७ ॥

करौ धुनाना नवपल्लवाकृती पयस्यगाधे किल जातसम्भ्रमा ।
सखीषु निर्वाच्यमधाष्टर्यदूषितं प्रियाङ्गसंश्लेषमवाप मानिनी ॥४८॥

अन्वयः—मानिनी, पयसि, अगाधे, किल, जातसम्भ्रमा, नवपल्लवाकृती, करौ, धुनाना, सखीषु, निर्वाच्यम्, अधाष्टर्यदूषितं, प्रियाङ्गसंश्लेषं, अवाप ॥ ४८ ॥

करावीति ॥ मानिनी पयस्यगाधे सति । किलेत्यलीके । मज्जनभयादिवेत्यर्थः । जातसम्भ्रमोत्पन्नभयात एव नवपल्लवाकृती करौ धुनाना कम्पयन्ती । धूनोतेः क्र्यादिकात्कर्तरि लटः शानच् । सखीषु विषये निर्वाच्यमवाच्यम् । अनिन्द्यमित्यर्थः । धाष्टर्यदूषितश्च न भवतीत्यधाष्टर्यदूषितस्तम् । वस्तुतो रागमूलमपि भयमूलत्वारोपादिति भावः । प्रियाङ्गसंश्लेषमवाप । अत्रापि तुल्याङ्गेन भयेनागन्तुकेन सहजानुराग-

निगूहनान्मीलनालङ्कारः। तदुक्तं काव्यप्रकाशे—'समानलक्षणं वस्तु वस्तुना यन्निगूह्यते। निजेनागन्तुना वापि तन्मीलनमुदाहृतम्॥' इति॥ ४८॥

प्रियैः सलीलं करवारिवारितः प्रवृद्धनिःश्वासविकम्पितस्तनः।
सविभ्रमाधूतकराग्रपल्लवो यथार्थतामाप विलासिनीजनः॥४९॥

अन्वयः—प्रियैः, सलीलं, करवारिवारितः, प्रवृद्धनिःश्वासविकम्पितस्तनः, सविभ्रमं, आधूतकराग्रपल्लवः विलासिनीजनः, यथार्थताम्, आप॥ ४९॥

प्रियैरिति। प्रियैः कामिभिः सलीलं करवारिभिरञ्जलिजलैर्वारितोऽवरुद्धः। सिक्त इत्यर्थः। प्रवृद्धैः सन्ततैर्निःश्वासैर्विकम्पितौ स्तनौ यस्य सः। सविभ्रमं सविलासमाधूतानि कराग्रपल्लवानि पाणिपल्लवानि येन सः। विलसनशीला विलासिनी। 'वौ कषलसकत्थस्रम्भः' इति घिनुण्प्रत्ययः। सैव जनः। जातावेकवचनम्। यथार्थतामाप। उक्तरीत्यानेकविलासवत्तया यथार्थनामकत्वमवापेत्यर्थः। 'क्वचिद्गम्यमानार्थस्याप्रयोगः' इति नाम्नो न प्रयोगः। यथा माघे-'चिराय याथार्थ्यमलम्भि दिग्गजैः' इति। क्वचित्प्रयुज्यते च। यथा रघुवंशे—'परन्तपो नाम यथार्थनामा' इति। नैषधेऽपि—'स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः' इति। स्वभावोक्तिरलङ्कारः॥ ४९॥

उदस्य धैर्यं दयितेन सादरं प्रसादितायाः करवारिवारितम्।
मुखं निमीलन्नयनं नतभ्रुवः श्रियं सपत्नीवदनादिवाददे॥ ५०॥

अन्वयः—दयितेन, धैर्यं, उदस्य, सादरं, प्रसादितायाः, नतभ्रुवः, करवारिवारितम्, निमीलन्, नयनं, मुखं, सपत्नीवदनात्, इव, श्रियम्, आददे॥ ५०॥

उदस्येति। दयितेन धैर्यं काठिन्यमुदस्यापनीय। अनुनीयेत्यर्थः। सादरं यथातथा प्रसादितायाः सौमनस्यं गमिताया नतभ्रुवः स्त्रियः सम्बन्धि करवारिभिर्वारितमवरुद्धमत एव निमीलती नयने यस्य तन्मुखं सपत्नीवदनादिव श्रियमाददे जग्राह। तदानीं तद्वदनस्य निःश्रीकत्वात्तदीयश्रीग्रहणमुत्प्रेक्ष्यते॥ ५०॥

विहस्य पाणौ विधृते धृताम्भसि प्रियेण वध्वा मदनार्द्रचेतसः।
सखीव काञ्ची पयसा घनीकृता बभार वीतोच्चयबन्धमंशुकम्॥५१॥

अन्वयः—धृताम्भसि, पाणौ, प्रियेण, विहस्य, विधृते सति, मदनार्द्रचेतसः, वध्वाः, वीतोच्चयबन्धं, अंशुकं, पयसा, घनीकृता, काञ्ची, सखी, इव, बभार॥ ५१॥

विहस्येति॥ धृताम्भसि प्रियसेचनार्थं गृहीतजले पाणौ। अञ्जलावित्यर्थः। प्रियेण विहस्य विधृतेऽवलम्बिते सति। अत एव मदनार्द्रचेतसो मदनपरवशाया वध्वाः स-

ग्रन्थि वीतोच्चयबन्धं मुक्तनीविग्रन्थि । स्रंसमानमित्यर्थः । अंशुकं पयसा घनीकृता काञ्ची सखीव बभार जग्राह । स्त्रीणां किल स्त्रीष्वेवायत्तं लज्जारक्षणमिति भावः॥५१॥

निरञ्जने साचिविलोकितं दृशावयावकं वेपथुरोष्ठपल्लवम् ।
नतभ्रुवो मण्डयति स्म विग्रहे बलिक्रिया चातिलकं तदास्पदम्॥५२॥

अन्वयः—नतभ्रुवः, विग्रहे, निरञ्जने, दृशौ, साचिविलोकितं, मण्डयति स्म। अयावकं, ओष्ठपल्लवं वेपथुः, अतिलकं, तदास्पदं, बलिक्रिया, च मण्डयति स्म. ॥ ५२ ॥

निरञ्जन इति ॥ नतभ्रुवोऽङ्गनाया विग्रहे वपुषि निरञ्जने निर्धौतकज्जले दृशौ विलोचने कर्म साचिविलोकितं तिर्यगीक्षणं कर्तृ मण्डयति स्म। 'तिर्यगर्थे साचि तिरः' इत्यमरः। अयावकं क्षालितलाक्षारागमोष्ठपल्लवं वेपथुः कम्पो मण्डयति स्म । 'ट्वितोऽथुच्' इत्यथुच्प्रत्ययः । अतिलकं तिलकरहितं तदास्पदं तिलकस्थानं ललाटम् । 'आस्पदं प्रतिष्ठायाम्' इति निपातः । बलिक्रिया रेखा बन्धश्च मण्डयति स्म । तदा निरलङ्कारस्याङ्गनाशरीरस्य तच्छरीरविकारैरेवालङ्कार. समजनीत्यर्थः ॥ ५२ ॥

निमीलदाकेकरलोलचक्षुषां प्रियोपकण्ठं कृतगात्रवेपथुः ।
निमज्जतीनां श्वसितोद्धतस्तनः श्रमो नु तासां मदनो नु पप्रथे॥५३॥

अन्वयः—प्रियोपकण्ठं, निमज्जतीनां, निमीलदाकेकरलोलचक्षुषां, तासां, कृतगात्रवेपथुः, श्वसितोद्धतस्तनः, श्रमः, नु, मदनः, नु, पप्रथे ॥ ५३ ॥

निमीलदिति ॥ प्रियोपकण्ठं प्रियसमीपं । अत्यन्तसंयोगे द्वितीया । निमज्जतीनां विगाहमानानामत एव निमीलन्ति निमिषन्त्याकेकराण्याकेकरवन्ति लोलानि चक्षूंषि यासां तासाम् । आकेकरलक्षणं तु नृत्यविलासे—'दृष्टिराकेकरा किञ्चित्स्फुटापाङ्गे प्रसारिता । मीलितार्धपुटा लोके ताराव्यावर्तनोत्तरा ॥' इति । तासां स्त्रीणाम् । कृतो गात्राणां वेपथुः कम्पो येन सः । श्वसितैर्निःश्वासैरुद्धतावुत्पतितौ स्तनौ येन सः । श्रमः खेदो नु मदनो नु पप्रथे प्रादुर्बभूव । निमज्जनप्रियसन्निधानरूपोभयकारणसम्भवान्नेत्रनिमीलनगात्रकम्पनिश्वासधारणाच्च सन्देहः । स एवालङ्कारः ॥ ५३ ॥

प्रियेण सिक्ता चरमं विपक्षतश्चुकोप काचिन्न तुतोष सान्त्वनैः ।
जनस्य रूढप्रणयस्य चेतसः किमप्यमर्षोऽनुनये भृशायते ॥५४॥

अन्वयः—काचित् , प्रियेण, विपक्षतः, चरमं, सिक्ता, चुकोप । सान्त्वनैः, न, तुतोष । रूढप्रणयस्य, जनस्य, चेतस., अमर्षः, किमपि, अनुनये, भृशायते ॥ ५४ ॥

प्रियेणेति ॥ काचित्प्रियेण विपक्षतः सपत्नीतश्चरमं पश्चात्सिक्ता सती चुकोप । सान्त्वनैरनुनयैर्न तुतोष । तथाहि । रूढप्रणयस्य गाढप्रेम्णो जनस्य सम्बन्धी चेतसो

मनसोऽमर्षः प्रकोपः किमपि कुतोऽपि हेतोरनुनये सति भृशायते गाढो भवति। 'भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः' इति क्यङ्। अन्यत्र शान्तिहेतुरनुनयोऽत्र प्रकोपायैव भवति। तत्र कारणं तु न ज्ञायत इत्यर्थः ॥ ५४ ॥

इत्थं विहृत्य वनिताभिरुदस्यमानं
पीनस्तनोरुजघनस्थलशालिनीभिः ।
उत्सर्पितोर्मिचयलङ्घिततीरदेश-
मौत्सुक्यनुन्नमिव वारि पुरः प्रतस्थे ॥ ५५ ॥

अन्वयः—पीनस्तनोरुजघनस्थलशालिनीभिः, वनिताभिः, इत्थं, विहृत्य, उदस्यमानं, उत्सर्पितोर्मिचयलङ्घिततीरदेशम्, वारि, औत्सुक्यनुन्नम्, इव, पुरः, प्रतस्थे ॥५५॥

इत्थमिति ॥ पीनैः स्तनैरूरुभिर्जघनस्थलैश्च शालन्त इति तथोक्ताभिरिति सलिलनोदनसामर्थ्योक्तिः। स्थलस्य साक्षादप्राण्यङ्गत्वान्न द्वन्द्वैकवद्भावः। वनिताभिरित्थं विहृत्योदस्यमानं नुद्यमानमुत्सर्पितैरुपरिभावं प्रापितैरूर्मिचयैर्लङ्घितस्तीरदेशो येन तद्वारि। औत्सुक्यं विहारासहिष्णुत्वं तेन नुन्नं प्रेरितमिवेत्युत्प्रेक्षा। 'नुदविद—'इत्यादिना निष्ठानत्वम्। पुरोऽग्रे प्रतस्थे। स्वजनवदिति भावः ॥ ५५ ॥

तीरान्तराणि मिथुनानि रथाङ्गनाम्नां
नीत्वा विलोलितसरोजवनश्रियस्ताः ।
संरेजिरे सुरसरिज्जलधौतहारा-
स्तारावितानतरला इव यामवत्यः ॥ ५६ ॥

अन्वयः—रथाङ्गनाम्नां, मिथुनानि, तीरान्तराणि, नीत्वा, विलोलितसरोजवनश्रियः सुरसरिज्जलधौतहाराः, ताः, तारावितानतरलाः, यामवत्यः, इव, संरेजिरे ॥५६॥

तीरान्तराणीति ॥ रथाङ्गनाम्नां मिथुनानि चक्रवाकद्वन्द्वान्यन्यानि तीराणि तीरान्तराणि नीत्वा। नियोज्येत्यर्थः। अविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः। विलोलिता विलुलिताः सरोजवनश्रियो याभिस्ताः सुरसरिज्जलैर्धौतहाराः क्षालितमुक्तावलयस्ताः स्त्रियस्तारावितानैरुडुगणैस्तरला भासुराः। 'तरलो भासुरे हारे चञ्चलेऽपि' इति वैजयन्ती। यामवत्यो रात्रय इव। संरेजिरे शुशुभिरे ॥ ५६ ॥

सङ्क्रान्तचन्दनरसाहितवर्णभेदं
विच्छिन्नभूषणमणिप्रकरांशुचित्रम् ।

बद्धोर्मि नाकवनितापरिभुक्तमुक्तं
सिन्धोर्बभार सलिलं शयनीयलक्ष्मीम् ॥ ५७ ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये अष्टमः सर्गः ।

अन्वयः—सङ्क्रान्तचन्दनरसाहितवर्णभेदं, विच्छिन्नभूषणमणिप्रकरांशुचित्रम्, बद्धोर्मि, नाकवनितापरिभुक्तमुक्तं, सिन्धोः, सलिलम्, शयनीयलक्ष्मीम्, बभार॥५७॥

सङ्क्रान्तेति ॥ सङ्क्रान्तैश्चन्दनरसैर्मलयजद्रवैराहितो वर्णभेदो रूपान्तरं यस्य तत् । विच्छिन्नानि त्रुटितानि यानि भूषणानि तेषां ये मणिप्रकरा मणिगणास्तेषामंशुभिश्चित्रं नानावर्णम् । बद्धोर्मि तरलं तरङ्गितं नाकवनिताभिः परिभुक्तमुक्तं पूर्वं परिभुक्तं पश्चान्मुक्तम् । 'पूर्वकाल-' इत्यादिना तत्पुरुषः । सिन्धोर्गङ्गायाः सलिलम् । शेरतेऽस्मिन्निति शयनीयं तल्पम् । बहुलग्रहणात्साधुः । तस्य लक्ष्मीं बभार । अत एव निदर्शनालङ्कारः । लक्षणं तूक्तम् ॥ ५७ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायामष्टमः सर्गः समाप्तः ॥ ८ ॥

नवमः सर्गः ।

वीक्ष्य रन्तुमनसः सुरनारीरात्तचित्रपरिधानविभूषाः ।
तत्प्रियार्थमिव यातुमथास्तं भानुमानुपपयोधि ललम्बे ॥ १ ॥

अन्वयः—अथ, भानुमान्, आत्तचित्रपरिधानविभूषाः, रन्तुमनसः, सुरनारीः, वीक्ष्य, तत्प्रियार्थम्, इव, अस्तं, यातुम्, उपपयोधि, ललम्बे ॥ १ ॥

वीक्ष्येति ॥ अथ जलक्रीडानन्तरं भानुमानंशुमानात्तचित्रपरिधानविभूषाः स्वीकृतविविधवस्त्राभरणाः । सुरतसन्नाहवतीरित्यर्थः । अत एव रन्तुमनसः । 'समानकर्तृकेषु तुमुन्' । 'लुम्पेदवश्यमः कृत्ये तुं काममनसोरपि' इति मकारलोपः । सुरनारीः वीक्ष्य तासां प्रियार्थं तत्प्रियार्थमिव । अवसरदानरूपं प्रियं कर्तुमिवेत्यर्थः । फलोत्प्रेक्षेयम् । अस्तमदर्शनम् । मकारान्तमव्ययमेतत् । यातुं प्राप्तुमुपपयोधि पयोधिसमीपं ललम्बे स्रंसे । अस्मिन्सर्गे स्वागतावृत्तम्-'स्वागतेति रनभाद्गुरुयुग्मम्' इति लक्षणात् ॥१॥

मध्यमोपलनिभे लसदंशावेकतश्च्युतिमुपेयुषि भानौ ।
द्यौरुवाह परिवृत्तिविलोलां हारयष्टिमिव वासरलक्ष्मीम् ॥ २ ॥

अन्वयः—मध्यमोपलनिभे, लसदंशौ, भानौ, एकतः, च्युतिम्, उपेयुषि, द्यौः, परिवृत्तिविलोलां, वासरलक्ष्मीं, हारयष्टिम् इव, उवाह ॥ २ ॥

मध्येति ॥ मध्यमोपलनिभे नायकमणिसदृशे। 'निभसङ्काशनीकाशप्रतीकाशोपमादयः' इत्यमरः। 'शर्करायां स्त्रियां प्रोक्तः पुंस्यश्मन्युपलो मणौ' इति वैजयन्ती। लसदंशौ प्रसरद्रश्मौ भानावेकत एकस्मिन्भागे च्युतिं स्रस्ततामुपेयुषि प्राप्ते सति द्यौः परिवृत्त्या मध्याह्नातिक्रमेण विलोलां गत्वरीम्। अन्यत्र गात्रस्य तिर्यगावृत्त्या मुहुश्चलन्तीम्। वासरलक्ष्मीं हारयष्टिं मुक्तावलीमिवावाह वहति स्म ॥ २ ॥

अंशुपाणिभिरतीव पिपासुः पद्मजं मधु भृशं रसयित्वा।
क्षीबतामिव गतः क्षितिमेष्यंल्लोहितं वपुरुवाह पतङ्गः ॥ ३ ॥

अन्वयः—पतङ्गः, अतीव, पिपासुः, अंशुपाणिभिः, पद्मजं, मधु, भृशं, रसयित्वा, क्षीबतां, गत, इव, क्षितिम्, एष्यन्, लोहितं, वपुः, उवाह ॥ ३ ॥

अंशुपाणिभिरिति ॥ पतङ्गः सूर्यः। 'पतङ्गः पक्षिसूर्ययोः' इत्यमरः। अतीव निर्भरम्। 'अत्यतीव च निर्भरे' इत्यमरः। पातुमिच्छुः पिपासुस्तृषितः सन्। पिबतेः सन्नन्तादुप्रत्ययः। अंशव एव पाणयस्तैः पद्मेषु जातं पद्मजं मधु मद्येव। मधिवति श्लिष्टं रूपकम्। मकरन्दमद्यमित्यर्थः। 'मधु मद्ये पुष्परसे' इत्यमरः। भृशमत्यन्तं रसयित्वास्वाद्य क्षीबतां मत्तत्वं गत इवेत्युत्प्रेक्षा। 'मत्ते शौण्डोत्कटक्षीबाः' इत्यमरः। क्षितिमेष्यन्गमिष्यंल्लोहितं रक्तं वपुरुवाह। यथा मत्तः क्षीबतया क्षितौ लुठति रज्यते च तद्वदिति भावः। सूर्यस्य क्षितिप्रवेशनमस्तमय इत्यागमः। अत्र रूपकोत्प्रेक्षयोः सापेक्षत्वादङ्गाङ्गिभावेन सङ्करः ॥ ३ ॥

गम्यतामुपगते नयनानां लोहितायति सहस्रमरीचौ।
आससाद विरहय्य धरित्रीं चक्रवाकहृदयान्यभितापः ॥ ४ ॥

अन्वयः—सहस्रमरीचौ, लोहितायति, नयनानां, गम्यतां, उपगते, अभितापः, धरित्रीम्, विरहय्य, चक्रवाकहृदयानि, आससाद ॥ ४ ॥

गम्यतामिति ॥ सहस्रमरीचौ सूर्ये। लोहितो भवतीति लोहितायति। 'लोहितादिडाज्भ्यः क्यष्' इति क्यष्। 'वा क्यषः' इति परस्मैपदे शतृप्रत्ययः। अत एव नयनानां गम्यतामुपगते दर्शनीयतां प्राप्ते सत्यभितापो धरित्रीं विरहय्य विहाय। 'ल्यपि लघुपूर्वात्' इत्ययादेशः। चक्रवाकहृदयान्याससाद प्राप। अत्र धरित्र्या यादृशस्तीव्रार्ककरकृतसन्तापस्तादृक्चक्रवाकहृदयेषु विरहसन्तापः सञ्जात इति परमार्थः। परन्तु तदुपक्रमानन्तरमेतस्याविर्भावात्स एवात्र संक्रान्त इत्यभेदाध्यवसायेनोपदेशः। अत एव भेदेऽभेदरूपातिशयोक्तिरलङ्कारः ॥ ४ ॥

मुक्तमूललघुरुज्झितपूर्वः पश्चिमे नभसि सम्भृतसान्द्रः ।
सामि मज्जति रवौ न विरेजे खिन्नजिह्म इव रश्मिसमूहः ॥५॥

अन्वयः—रवौ, सामि, मज्जति, मुक्तमूललघुरुज्झितपूर्वः, पश्चिमे, नभसि, सम्भृतसान्द्रः, रश्मिसमूहः, खिन्नजिह्म, इव, न, विरेजे, ॥ ५ ॥

मुक्तेति ॥ रवौ सामि मज्जत्यर्धास्तमिते सति । 'सामि त्वर्धे जुगुप्सायाम्' इत्यमरः । मुक्तं त्यक्तप्रायं मूलमाश्रयभूतो रविः । अन्यत्र स्वामी । येन सोऽत एव लघुरल्पकश्च मुक्तमूललघुरुज्झितपूर्वस्त्यक्तपूर्वदिक्कः । अन्यत्र त्यक्तपूर्वजनः । पश्चिमे नभसि नभोभागम्। अन्यत्र कचिन्नीचस्थले । सम्भृतः संहतः सन्। अत एव सान्द्रश्च रश्मिसमूहः । आश्रितजनश्च ध्वन्यते । खिन्नश्चासौ जिह्मश्च, खिन्नेन दुःखेन जिह्मो वा, दीन इव न विरेजे । अत्र मुक्तमूलत्वादिप्रस्तुतविशेषणसाम्यादप्रस्तुताश्रितजनप्रतीतेः समासोक्तिः । तत्र वाच्यस्य रश्मिसमूहस्याचेतनस्यापि प्रतीयमानेन चेतनेनाभेदाभिधानाद्दुःखितत्वाद्युत्प्रेक्षेति तयोरङ्गाङ्गिभावेन सङ्करः ॥ ५ ॥

कान्तदूत्य इव कुङ्कुमताम्राः सायमण्डलमभि त्वरयन्त्यः ।
सादरं ददृशिरे वनिताभिः सौधजालपतिता रविभासः ॥ ६ ॥

अन्वयः—कुङ्कुमताम्राः, सायमण्डलमभि, त्वरयन्त्यः, सौधजालपतिताः, रविभासः, कान्तदूत्य इव, वनिताभिः, सादरं, ददृशिरे ॥ ६ ॥

कान्तेति ॥ कुङ्कुमवत्कुङ्कुमेन वा ताम्राः । सायस्य सायङ्कालस्य । 'सायं साये प्रगे प्रातः' इत्यमरः । यन्मण्डलं तदभि तदुद्दिश्य त्वरयन्त्यस्त्वरां कारयन्त्यः सौधानां जालैर्गवाक्षैः पतिताः प्रविष्टाः । 'जालं गवाक्ष आनाये' इति वैजयन्ती । रविभासः सूर्यरश्मयः कान्तानां प्रेयसां दूत्य इव वनिताभिः सादरं यथा तथा ददृशिरे दृष्टाः । सायन्तनार्कभासां प्रियसमागमसूचकत्वादेव तासु स्त्रीणामादरोऽभवदित्यर्थः ॥ ६ ॥

अग्रसानुषु नितान्तपिशङ्गैर्भूरुहान्मृदुकरैरवलम्ब्य ।
अस्तशैलगहनं नु विवस्वानाविवेश जलधिं नु महीं नु ॥७॥

अन्वयः—विवस्वान्, अग्रसानुषु, भूरुहान्, नितान्तपिशङ्गैः, मृदुकरैः, अवलम्ब्य, अस्तशैलगहनं, नु, जलधिं, नु, महीं, नु, आविवेश ॥ ७ ॥

अग्रेति ॥ विवस्वान्सूर्योऽग्रेऽस्तशैलशिखरे ये सानवस्तेषु ये भूरुहास्तान्नितान्तपिशङ्गैरत्यन्तारुणैर्मृदुभिः करैरिव करैरंशुहस्तैरिति श्लिष्टरूपकम् । 'बलिहस्तांशवः कराः' इत्यमरः । यद्वा । करैर्मृदु श्लथमवलम्ब्य । अस्त इति शैलोऽस्तशैलः। 'अस्तस्तु चरमक्ष्माभृत्' इत्यमरः । तस्य गहनं काननं नु जलधिं नु महीं न्वाविवेश । तपनस्य पतनसन्देह एव दृष्टः । पतनं तु क्व चास्य तन्न ज्ञायते । शीघ्रभावादिति भावः ।

अत्र तपने तपनस्यारोप्यमाणस्य गहनाद्यनेकविषयत्वेन सन्देहात्सन्देहालङ्कारः ॥७॥

आकुलश्चलपतत्रिकुलानामारवैरनुदितौषसरागः।
आययावहरिदश्वविपाण्डुस्तुल्यतां दिनमुखेन दिनान्तः ॥८॥

अन्वयः—चलपतत्रिकुलानाम्, आरवैः, आकुलः, अनुदितौपसरागः, अहरिदश्व-विपाण्डुः, दिनान्तः, दिनमुखेन, तुल्यताम्, आययौ ॥ ८ ॥

आकुल इति ॥ चलानां कुलायेभ्यः कुलान्प्रति चलतां पतत्रिकुलानां पक्षिसमूहानामारवैः शब्दैराकुलो व्याप्तः। अनुदितशब्देनाभावमात्रमुषःशब्देन सन्ध्यामात्रं च विवक्ष्यते। उषसि भव औषसः। 'सन्धिवेला-' इत्यादिना योगविभागादण्प्रत्ययः। अन्यथा कालाट्ठञ्स्यात्। तथा चानुदितौषसरागोऽविद्यमानसन्ध्याराग इत्यर्थः। एकत्रापगमादन्यत्रानुदयाच्चेति भावः। अहरिदश्वोऽविद्यमानसूर्यः। एकत्रानुदयादन्यत्रास्तमयाच्चेति भावः। अत एव विपाण्डुः। तिमिरानुदयादिति शेषः। दिनान्तः सायङ्कालो दिनमुखेन प्रातःकालेन तुल्यतामाययौ। तद्वद्बभूवेत्यर्थः। अत एवोपमालङ्कारः ॥ ८ ॥

आस्थितः स्थगितवारिदपङ्क्त्या सन्ध्यया गगनपश्चिमभागः।
सोर्मिविद्रुमवितानविभासा रञ्जितस्य जलधेः श्रियमूहे ॥९॥

अन्वयः—स्थगितवारिदपङ्क्त्या, सन्ध्यया, आस्थितः, गगनपश्चिमभागः, सोर्मिविद्रुमवितानविभासा, रञ्जितस्य, जलधेः, श्रियम्, ऊहे ॥ ९ ॥

आस्थित इति ॥ स्थगितवारिदपङ्क्त्या पिहितमेघबृन्दया सन्ध्ययास्थित आक्रान्तो व्याप्तो गगनपश्चिमभागः। सोर्मिः। ऊर्मिसंक्रान्त इत्यर्थः। तया विद्रुमवितानविभासा प्रवालप्रकरकान्त्या रञ्जितस्य स्वसावर्ण्यमापादितस्य जलधेः श्रियमूहे। सन्ध्याया रक्तवर्णत्वादिति भावः। वहतेः कर्तरि लिट्। तत्सदृशीं श्रियमुवाहेत्यर्थः। अत एव निदर्शनालङ्कारः ॥ ९ ॥

प्राञ्जलावपि जने नतमूर्ध्नि प्रेम तत्प्रवणचेतसि हित्वा।
सन्ध्ययानुविदधे विरमन्त्या चापलेन सुजनेतरमैत्री ॥१०॥

अन्वयः—प्राञ्जलौ, नतमूर्ध्नि, तत्प्रवणचेतसि, जने, प्रेम, हित्वा, विरमन्त्या, सन्ध्यया, चापलेन, सुजनेतरमैत्री, अनुविदधे ॥ १० ॥

प्राञ्जलाविति ॥ प्रबद्धोऽञ्जलिर्येन तस्मिन्प्राञ्जलौ बद्धाञ्जलौ 'तौ युतावञ्जलिः पुमान्' इत्यमरः। प्रादिभ्यो धातुजस्य बहुव्रीहिर्वाच्यो वोत्तरपदलोपश्च। नतमूर्ध्नि नमस्कुर्वाणे तत्प्रवणं तत्र सन्ध्यायामेवाहितं चेतो यस्य तस्मिन्नेवंविधेऽपि जने विषये प्रेम

हित्वा विहाय विरमन्त्या निवर्तमानया । 'व्याङ्परिभ्यो रमः' इति परस्मैपदम् । सन्ध्यया चापलेनास्थैर्येण । युवादित्वादण्प्रत्ययः । सुजनादितरो दुर्जनस्तस्य मैत्री सख्यमनुविदधेऽनुचक्रे । कर्मणि लिट् । यथा दुर्जनमैत्री स्निह्यन्तमपि जहाति तद्वत्सन्ध्यापि सेवमानं जनमहासीदित्यर्थः । मित्रस्य कर्म मैत्री । अणन्तान्ङीष् । अत्र सन्ध्यादुर्जनमैत्र्योश्चापलं समानधर्मोऽनुविधानम् । अत एवार्थरूपेणेयमुपमा ॥ १० ॥

औषसातपभयादपलीनं वासरच्छविविरामपटीयः ।
सन्निपत्य शनकैरिव निम्नादन्धकारमुदवाप समानि ॥११॥

अन्वयः—औषसातपभयात्, इव, अपलीनं, वासरच्छविविरामपटीयः, अन्धकारम्, शनकैः, निम्नात्, सन्निपत्य, समानि, उदवाप ॥ ११ ॥

औषसेति ॥ औषसात्प्राभातिकादातपाद्भयं तस्मादिवेत्युत्प्रेक्षा । अपलीनं क्वचिद्गूढं वासरच्छवेरातपस्य विरामाद्धेतोः पटीयः प्रभविष्णुतरम् । अन्धं करोतीत्यन्धकारं ध्वान्तम् । 'अन्धकारोऽस्त्रियां ध्वान्तम्' इत्यमरः । अथ सन्ध्यापगमनानन्तरं शनकैर्मन्दमन्दं निम्नात्सन्निपत्यागत्य समानि समस्थलान्युदवाप व्याप्नोत् । अत्र प्रस्तुतान्धकारविशेषणसाम्यादप्रस्तुतार्थप्रतीतेः समासोक्तिरलङ्कारः । उत्प्रेक्षा त्वक्तः स्यात् ॥ ११ ॥

एकतामिव गतस्य विवेकः कस्यचिन्न महतोऽप्युपलेभे ।
भास्वता निदधिरे भुवनानामात्मनीव पतितेन विशेषाः ॥१२॥

अन्वयः—एकतां, गतस्य, इव, महतः, अपि, कस्यचित्, विवेकः, न, उपलेभे । पतितेन, भास्वता, भुवनानां, विशेषाः, आत्मनि, निदधिरे, इव ॥ १२ ॥

एकतामिति । एकतामभेदं गतस्येव । तमोव्याप्त्या तथा प्रतीतेरियमुत्प्रेक्षा । महतः शैलादेरपि कस्यचित्कस्यापि पदार्थस्य विवेको भेदो नोपलेभे न गृहीतः । अत एवोत्प्रेक्षते—पतितेनास्तमितेन भास्वता सूर्येण । 'भास्वद्विवस्वत्सप्ताश्व' इत्यमरः । भुवनानाम् । भुवनस्थपदार्थानामित्यर्थः । विशेषा भूधरादिभेदा आत्मनि स्वस्मिन्नेव निदधिर इव निहिता इव । कथमन्यथा नोपलभ्येरन्नित्यर्थः । अत्रोत्प्रेक्षयोः सजातीययोः सापेक्षत्वादङ्गाङ्गिभावेन सङ्करः ॥ १२ ॥

इच्छतां सह वधूभिरभेदं यामिनीविरहिणां विहगानाम् ।
आपुरेव मिथुनानि वियोगं लङ्घ्यते न खलु कालनियोगः ॥१३॥

अन्वयः—वधूभिः, सह, अभेदं, इच्छताम्, यामिनीविरहिणाम्, विहगानाम्, मिथुनानि, वियोगं, आपुः, एव । (तथाहि) कालनियोगः, न, लङ्घ्यते, खलु ॥१३॥

इच्छतामिति । वधूभिः स्वकामिनीभिः सहाभेदमवियोगमिच्छताम् । यथा

सहृदयवतामपीत्यर्थः । यामिनीषु विरहिणाम् । नियतवियोगानामित्यर्थः । रहते-रावश्यकेऽर्थे णिनिः । यद्वा निन्दायामिनिः । तेषां विहगानां चक्रवाकाणां मिथुनानि वियोगमापुरेव । न तु नापुरित्ययोगव्यवच्छेदः । तथाहि । कालनियोगा दैवाज्ञा न लङ्घ्यते खलु । दुर्वार इत्यर्थः ॥ १३ ॥

यच्छति प्रतिमुखं दयितायै वाचमन्तिकगतेऽपि शकुन्तौ ।
नीयते स्म नतिमुज्झितहर्षं पङ्कजं मुखमिवाम्बुरुहिण्या ॥ १४ ॥

अन्वयः—शकुन्तौ, अन्तिकगते, अपि, दयितायै, प्रतिमुखं, वाचं, यच्छति । अम्बुरुहिण्या, उज्झितहर्षं, पङ्कजं, मुखम्, इव, नतिं नीयते स्म ॥ १४ ॥

यच्छतीति । शकुन्तौ चक्रवाकपक्षिणि । सामान्यस्य प्राकरणिकविशेषपर्यवसानात् । 'शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः' इत्यमरः । अन्तिकगते समीपस्थेऽपि दयितायै चक्रवाक्यै प्रतिमुखमभिमुखं यथा तथा वाचं यच्छति वाचमेव ददाने । न तु सङ्गच्छमाने सतीत्यर्थः । 'पाघ्राध्मा–' इत्यादिना दाणो यच्छादेशः । अम्बुरुहिण्या नलिन्योज्झितहर्षं चक्रवाकदुर्दशादर्शनादिव त्यक्तविकासं पङ्कजं मुखमिव नतिं नम्रत्वं नीयते स्म नीतम् । 'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्' इति नयतेर्द्विकर्मकत्वात्प्रधाने कर्मणि लिट् । प्रायेण दुःखदर्शनात्स्त्रियः खिद्यन्ते । विशेषेण विरहदर्शनादिति भावः । अत्र पङ्कजावनतेश्चक्रवाकविक्रोशानन्तर्यात्तद्धेतुकत्वमुत्प्रेक्ष्यते । तच्च मुखोपमेयमम्बुरुहिण्या कामिनीसाम्यं गमयन्त्या निरुह्यत इत्युपमोत्प्रेक्षयोरङ्गाङ्गिभावेन सङ्करः । व्यञ्जकाप्रयोगात्प्रतीयमानोत्प्रेक्षा ॥ १४ ॥

रञ्जिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु ।
पूरिता नु विषमेषु धरित्री संहृता नु ककुभस्तिमिरेण ॥ १५ ॥

अन्वयः—तिमिरेण, विविधाः, तरुशैलाः, रञ्जिताः, नु । गगनं, नामितं, नु, (यद्वा) गगनं, स्थगितं, नु । धरित्री, विषमेषु, पूरिता, नु । ककुभः, संहृताः, नु ॥१५॥

रञ्जिता इति । तिमिरेणान्धकारेण विविधास्तरवः शैलाश्च रञ्जिताः स्वसावर्ण्यमापादिता नु । अन्यथा कथमेषां नीलाढ्यत्वमिति भावः । गगनं नामितं नु । आभूतलादिति शेषः । 'मितां ह्रस्वः' इत्यत्र वाशब्दानुवृत्त्या व्यवस्थितविभाषाश्रयणान्न ह्रस्वः । यद्वा गगनं स्थगितमाच्छादितं नु । उभयत्रापि तमसावृतत्वान्न दृश्यत इति भावः । तथा धरित्री विषमेषु निम्नोन्नतेषु पूरिता समीकृता नु । अन्यथा तद्विवेकः कथं न स्यादिति भावः । ककुभो दिशश्च संहृता नु लुप्ताः किम् । 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' इत्यमरः । कथमन्यथा न दृश्यन्त इति भावः । अत्र तिमिरे तरुशैलाद्यनेकविषयरञ्जकत्वादिकमारोप्य सन्दिग्ध इति

सन्देहालङ्कारः। अनेन नुशब्दस्य सम्भावनाद्योतकत्वमत्रोत्प्रेक्षाप्रकारमित्यलङ्कारस्सर्व-स्वकारः ॥ १९ ॥

रात्रिरागमलिनानि विकासं पङ्कजानि रहयन्ति विहाय ।
स्पष्टतारकमियाय नभः श्रीर्वस्तुमिच्छति निरापदि सर्वः ॥१६॥

अन्वयः—श्रीः, रात्रिरागमलिनानि, विकासं, रहयन्ति । पङ्कजानि, विहाय, स्पष्टतारकं, नभः, इयाय, सर्वः, निरापदि, वस्तुम् , इच्छति ॥ १६ ॥

रात्रीति ॥ श्रीः शोभा कर्त्री रात्रेः सन्ध्यायाः रागेण स्वच्छायोपरञ्जनेन मलिनान्यत एव विकासं रहयन्ति त्यजन्ति । रहतेस्त्यागार्थाच्छतृप्रत्ययः । पङ्कजानि विहाय त्यक्त्वा स्पष्टतारकं नभः खमियाय प्राप । तथाहि । सर्वो जनो निरापदि निर्बाधस्थले वस्तुं स्थातुम् । 'एकाच उपदेशेऽनुदात्तात्' इतीट्प्रतिषेधः । 'घसिभसान्तेषु वसिः प्रसारिणो' इति वचनात् । इच्छति ॥ १६ ॥

अस्तादिसन्ध्यान्तं वर्णयित्वा चन्द्रोदयवर्णनमारभते—

व्यानशे शशधरेण विमुक्तः केतकीकुसुमकेसरपाण्डुः ।
चूर्णमुष्टिरिव लम्भितकान्तिर्वासवस्य दिशमंशुसमूहः ॥ १७ ॥

अन्वयः—शशधरेण, विमुक्तः, केतकीकुसुमकेसरपाण्डुः, लम्भितकान्तिः, अंशुसमूहः, चूर्णमुष्टिः, इव, वासवस्य, दिशं, व्यानशे ॥ १७ ॥

व्यानश इति ॥ शशधरेण चन्द्रेण विमुक्तः क्षिप्तः केतकीकुसुमकेसर इव पाण्डुर्लम्भिता प्रापिता कान्तिर्यस्य सोंऽशुसमूहो रश्मिसमूहश्चूर्णस्य कर्पूरक्षोदस्य मुष्टिरिव मुष्टिशब्दस्य द्विलिङ्गत्वेऽप्यत्र पुंलिङ्गतैव ग्राह्या । उपमेयानुसारात् । वासवस्येन्द्रस्य दिशं प्राचीं व्यानशे व्याप । अनेन दिशानिशाकरयोर्नायिकानायकौपम्यं गम्यते ॥१७॥

उज्झती शुचमिवाशु तमिस्रामन्तिकं व्रजति तारकराजे ।
दिक्प्रसादगुणमण्डनमूहे रश्मिहासविशदं मुखमैन्द्री ॥ १८ ॥

अन्वयः—ऐन्द्री, दिक् , तारकराजे, अन्तिकं, व्रजति, आशु, तमिस्रां, शुचम् , इव, उज्झती, प्रसादगुणमण्डनम् , रश्मिहासविशदं, मुखम् , इव, ऊहे ॥ १८ ॥

उज्झतीति ॥ इन्द्रस्येयमैन्द्री दिक्प्राची तारकराजे नक्षत्रनाथे । 'कनीनिकायां नक्षत्रे तारकं तारकापि च' इति विश्वः । अन्तिकं समीपं व्रजति सति । आशु तमिस्रामन्धतमसम् । 'तमिस्रा स्त्री ध्वान्तनिशि निश्यन्धतमसे न ना' इति वैजयन्ती । शुचमिव । विरहदुःखमिवेत्यर्थः । उज्झती विजहती प्रसादो नैर्मल्यमेव गुणः स एव मण्डनं यस्य तत् । रश्मयो हास इव तेन विशदं मुखमिव मुखमग्रभागम् । श्लिष्टोपमेयम् । ऊहे वहति स्म । अत्र दिक्चन्द्रयोर्नायिकानायकौपम्यं गम्यते ॥ १८ ॥

नीलनीरजनिभे हिमगौरं शैलरुद्धवपुषः सितरश्मेः।
खे रराज निपतत्करजालं वारिधेः पयसि गाङ्गमिवाम्भः ॥१९॥

अन्वयः—शैलरुद्धवपुषः, सितरश्मेः, नीलनीरजनिभे, खे, निपतत्। हिमगौरं, करजालं, वारिधेः, पयसि, (निपतत्)। गाङ्गम्, अम्भः, इव, रराज ॥ १९ ॥

नीलेति ॥ शैलरुद्धवपुषः उदयगिरितिरोहितमण्डलस्य सितरश्मेरिन्दोः सम्बन्धि नीलनीरजनिभे श्यामकमलतुल्ये खे आकाशे निपतत्प्रसरत्। हिमवद्गौरं शुभ्रं करजालमंशुसमूहो वारिधेः पयसि निपतद्गाङ्गमम्भ इव रराज। उपमानेऽपि विशेषणानि याज्यानि ॥ १९ ॥

द्यां निरुन्धदतिनीलघनाभं ध्वान्तमुद्यतकरेण पुरस्तात्।
क्षिप्यमाणमसितेतरभासा शम्भुनेव करिचर्म चकासे ॥ २० ॥

अन्वयः—द्यां, निरुन्धत्, अतिनीलघनाभं, उद्यतकरेण, असितेतरभासा, पुरस्तात्, क्षिप्यमाणं, ध्वान्तम्, शम्भुना, (क्षिप्यमाणं) करिचर्म, इव, चकासे ॥२०॥

द्यामिति ॥ द्यां निरुन्धदाकाशमावृण्वदतिनीलघनाभं मेचकम्। उद्यन्तः करा अंशवो हस्ताश्च यस्य तेन। असिताभ्य इतराः शुभ्रा भासो यस्य तेन चन्द्रेण पुरस्तात्प्राच्यामग्रे च क्षिप्यमाणं नुद्यमानं ध्वान्तं शम्भुना क्षिप्यमाणं करिचर्मेव चकासे। उपमानेऽपि विशेषणानि योज्यानि ॥ २० ॥

अन्तिकान्तिकगतेन्दुविसृष्टे जिह्मतां जहति दीधितिजाले।
निःसृतस्तिमिरभारनिरोधादुच्छ्वसन्निव रराज दिगन्तः ॥ २१ ॥

अन्वयः—अन्तिकान्तिकगतेन्दुविसृष्टे, दीधितजाले, जिह्मतां, जहति, तिमिरभाररनिरोधात्, निःसृतः, दिगन्तः, उच्छ्वसन्, इव, रराज ॥ २१ ॥

अन्तिकेति ॥ अन्तिकान्तिकेऽतिसमीपे। 'प्रकारे गुणवचनस्य' इति द्विर्भावः। कर्मधारयवद्भावात्सुपो लुक्। अन्तिकान्तिकगतेनेन्दुना विसृष्टे मुक्ते दीधितिजाले किरणसमूहे जिह्मतां सङ्कोचं जहति त्यजति सति तिमिरभारैस्तमस्तोमैर्निरोधादुपरोधान्निःसृतो निर्गतो दिगन्त उच्छ्वसन्प्राणन्निव रराजेत्युत्प्रेक्षालङ्कारः ॥ २१ ॥

लेखया विमलविद्रुमभासा सन्ततं तिमिरमिन्दुरुदासे।
दंष्ट्रया कनकटङ्कपिशङ्ग्या मण्डलं भुव इवादिवराहः ॥ २२ ॥

अन्वयः—इन्दुः, विमलविद्रुमभासा, लेखया, सन्ततं, तिमिरम्, आदिवराहः, कनकटङ्कपिशङ्ग्या, दंष्ट्रया, भुवः, मण्डलम्, इव, उदासे ॥ २२ ॥

लेखयेति ॥ इन्दुर्विमलविद्रुमभासा स्वच्छप्रवालसवर्णया लेखया कलया सन्ततं

-सान्द्रं तिमिरमाद्रिवराहः कनकस्य टङ्कः शिलाभेदकं शस्त्रम्। 'टङ्कः पाषाणदारणः' इत्यमरः। तद्वत्पिशङ्गया लोहितवर्णया। 'पिशङ्गादुपसंख्यानम्' इति ङीप्। दंष्ट्रया भुवो मण्डलमिव। उदास उच्चिक्षिपे। अस्यतेः कर्तरि लिट्, सोपसर्गादस्यतेरात्मनेपदं विकल्पात्॥ २२॥

दीपयन्नथ नभः किरणौघैः कुङ्कुमारुणपयोधरगौरः।
हेमकुम्भ इव पूर्वपयोधेरुन्ममज्ज शनकैस्तुहिनांशुः॥ २३॥

अन्वयः—अथ, किरणौघैः, नभः, दीपयन्, कुङ्कुमारुणपयोधरगौरः, तुहिनांशुः, शनकैः, पूर्वपयोधेः, हेमकुम्भः, इव, उन्ममज्ज॥ २३॥

दीपयन्निति॥ अथोदयानन्तरं किरणौघैर्नभो दीपयन्प्रकाशयन्कुङ्कुमेनारुणो यः पयोधरः कुचस्तद्वद्गौरोऽरुणः। उदयरागादिति भावः। तुहिनांशुरिन्दुः शनकैः पूर्वपयोधेः पूर्वसागराद्धेम्नः कुम्भ इवोन्ममज्जोज्जगामेत्युत्प्रेक्षा॥ २३॥

उद्गतेन्दुमविभिन्नतमिस्रां पश्यति स्म रजनीमवितृप्तः।
व्यंशुकस्फुटमुखीमतिजिह्मां व्रीडया नववधूमिव लोकः॥ २४॥

अन्वयः—लोकः, उद्गतेन्दुम्, अविभिन्नतमिस्रां, रजनीं, व्यंशुकस्फुटमुखीं, व्रीडया, अतिजिह्मां, नववधूम्, इव, अवितृप्तः, (सन्) पश्यति स्म,॥ २४॥

उद्गतेन्दुमिति॥ लोको जनः। 'लोकस्तु भुवने जने' इत्यमरः। उद्गतेन्दुमुदितचन्द्रामविभिन्नतमिस्रामनिःशेषितध्वान्तां रजनीं व्यंशुकमपनीतावगुण्ठनमत एव स्फुटं दृश्यमानं मुखं यस्याः सा तां तथापि व्रीडयातिजिह्मां वक्रां नववधूं नवोढाम्। 'वधूर्नवोढयोषायां स्नुषाभार्याङ्गनासु च' इति धरणिः। प्रियमिवावितृप्तः सन् पश्यति स्म॥ २४॥

न प्रसादमुचितं गमिता द्यौर्नोद्धृतं तिमिरमद्रिवनेभ्यः।
दिङ्मुखेषु न च धाम विकीर्णं भूषितैव रजनी हिमभासा॥२५॥

अन्वयः—हिमभासा, द्यौः, उचितम्, प्रसादम्, न, गमिता। अद्रिवनेभ्यः, तिमिरम्, न, उद्धृतम्। दिङ्मुखेषु, धाम, च, न, विकीर्णम्। (तथापि) रजनी, भूषिता, एव॥ २५॥

नेति॥ हिमभासा चन्द्रेण द्यौराकाशमुचितं योग्यं प्रसादं न गमिता। अद्रयो वनानि च तेभ्यस्तिमिरं नोद्धृतं नोत्सारितम्। दिशां मुखेषु धाम तेजश्च न विकीर्णं न पर्यस्तम्। तथापि रजनी भूषितैव। उक्तगुणासम्पन्नाविति भावः। अत्र प्रसादनकारणाभावेऽपि तत्कार्यभूषणोक्त्या विभावनालङ्कारः॥ २५॥

मानिनीजनविलोचनपातानुष्णबाष्पकलुषान्प्रतिगृह्णन् ।
मन्दमन्दमुदितः प्रययौ खं भीतभीत इव शीतमयूखः ॥ २६ ॥

अन्वयः—उदितः, शीतमयूखः, उष्णबाष्पकलुषान्, मानिनीजनविलोचनपातान्, भीतभीत, इव, मन्दमन्दम्, खं, प्रययौ ॥ २६ ॥

मानिनीति ॥ उदितः शीतमयूख उष्णेन विरहतप्तेन बाष्पेण कलुषानाविलान्मानिनीजनस्य कलहान्तरितनायिकाजनस्य विलोचनपातान् । मानभङ्गजनितरोषेण भीषणानिति भावः । 'कोपात्कान्तं पराणुद्य पश्चात्तापसमन्विता । कलहान्तरिता' इति दशरूपके । प्रतिगृह्णन्स्वीकुर्वन् । अपरिहार्यत्वादिति भावः । अत एव भीतभीतो भीतप्रकार इवेत्युत्प्रेक्षा । मन्दमन्दं मन्दप्रकारम् । उभयत्रापि 'प्रकारे गुणवचनस्य' इति द्विर्भावे कर्मधारयवद्भावात्सुलोपः । खमाकाशं प्रययौ ॥ २६ ॥

श्लिष्यतः प्रियवधूरुपकण्ठं तारकास्ततकरस्य हिमांशोः ।
उद्वमन्नभिरराज समन्तादङ्गराग इव लोहितरागः ॥ २७ ॥

अन्वयः—ततकरस्य, तारकाः, प्रियवधूः, उपकण्ठं, श्लिष्यतः, हिमांशोः, समन्तात्, उद्वमन्, लोहितरागः, अङ्गरागः, इव, अभिरराज ॥ २७ ॥

श्लिष्यत इति ॥ ततः प्रसारिताः करा एव करा अंशुहस्ता येन तस्य ततकरस्य तारका एव प्रियवधूरुपकण्ठमन्तिके कण्ठे वा । अत्यन्तसंयोगे द्वितीया । विभक्त्यर्थेऽव्ययीभावः । श्लिष्यतः प्रत्यासीदत आलिङ्गतश्च हिमांशोः सम्बन्धी समन्तादुद्वमन्नुत्सर्पन् । अर्थान्तरत्वादकर्मकत्वम् । 'धातोरर्थान्तरे वृत्तेः' इति वचनात् । लोहितरागोऽरुणप्रभोऽङ्गराग इवाभिरराज । आलिङ्गनाद्रागो गलतीति प्रसिद्धिः । अत्र रूपकोपमयोरङ्गाङ्गिभावेन सङ्करः ॥ २७ ॥

प्रेरितः शशधरेण करौघः संहतान्यपि नुनोद तमांसि ।
क्षीरसिन्धुरिव मन्दरभिन्नः काननान्यविरलोच्चतरूणि ॥ २८ ॥

अन्वयः—शशधरेण, प्रेरितः, करौघः, संहतानि, अपि, तमांसि, मन्दरभिन्नः, क्षीरसिन्धुः, अविरलोच्चतरूणि, काननानि, इव, नुनोद ॥ २८ ॥

प्रेरित इति ॥ शशधरेण चन्द्रेण प्रेरितो विसृष्टः करौघः संहतानि सान्द्राण्यपि तमांसि मन्दरेण मन्दराचलेन भिन्नो नुन्नः क्षीरसिन्धुरविरलाः सान्द्रा उच्चा उन्नताश्च तरवो येषु तानि काननानीव नुनोद दूरीचकार ॥ २८ ॥

शारतां गमितया शशिपादैश्छायया विटपिनां प्रतिपेदे ।
न्यस्तशुक्लबलिचित्रतलाभिस्तुल्यता वसतिवेश्ममहीभिः ॥ २९ ॥

अन्वयः—शशिपादः, शारतां, गमितया, विटपिनां, छायया, न्यस्तशुक्लबलिचित्रतलाभिः, वसतिवेश्ममहीभिः, तुल्यता, प्रतिपेदे ॥ २९ ॥

शारतामिति ॥ शशिपादैश्चन्द्ररश्मिभिः । 'पादा रश्म्यङ्घ्रितुर्यांशाः' इत्यमरः । शारतां शबलतां गमितया । 'शारः शबलपीतयोः' इति विश्वः । विटपिनां तरूणां छायया न्यस्तैर्निक्षिप्तैः शुक्लबलिभिः श्वेतपुष्पाद्युपहारैश्चित्राणि तलान्युपरिभागा यासां ताभिः । 'करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियाम्' इत्यमरः । वसतिवेश्ममहीभिर्निवासगृहभूमिभिस्तुल्यता साम्यं प्रतिपेदे प्राप्ता । कर्मणि लिट् । आर्थीयमुपमा ॥ २९ ॥

आतपे धृतिमता सह वध्वा यामिनीविरहिणा विहगेन ।
सेहिरे न किरणा हिमरश्मेर्दुःखिते मनसि सर्वमसह्यम् ॥ ३० ॥

अन्वयः—आतपे, वध्वा, सह, धृतिमता, यामिनीविरहिणा, विहगेन, हिमरश्मेः, किरणाः, न, सेहिरे । दुःखिते, मनसि, सर्वम्, असह्यम् ॥ ३० ॥

आतप इति ॥ आतपे । दुःखकरेऽपीति भावः । वध्वा चक्रवाक्या सहात एव धृतिमता सन्तोषवता यामिनीषु विरहिणा नियतविरहेणात एव विहगेन चक्रवाकेण हिमरश्मेश्चन्द्रस्य किरणा न सेहिरे । तथाहि । दुःखिते सञ्जातदुःखे मनसि सर्वम् । मनोहरमपीति भावः । असह्यं सोढुमशक्यम् । 'शकिसहोश्च' इति यत्प्रत्ययः । पूर्वं तु 'आतपाः' इति पेठुः । तत्र वध्वा सहातपा अपि सेहिरे । तद्विरहिणा तु शशिकिरणा अपि न सेहिरे इति योज्यम् । फलं तु समानम् ॥ ३० ॥

गन्धमुद्धतरजःकणवाही विक्षिपन्विकसतां कुमुदानाम् ।
आदुधाव परिलीनविहङ्गा यामिनीमरुदपां वनराजीः ॥ ३१ ॥

अन्वयः—अपां, कणवाही, विकसतां, कुमुदानाम्, गन्धम्, उद्धतरजः, विक्षिपन्, यामिनीमरुत्, परिलीनविहङ्गाः, वनराजीः, आदुधाव ॥ ३१ ॥

गन्धमिति ॥ अपां कणवाही । योग्यान्वये व्यवधानमपि सोढव्यम् । विकसतां कुमुदानां गन्धं सौरभमुद्धतं रजः परागो यस्मिन्कर्मणि तद्यथा तथा । 'शेषाद्विभाषा' इति विकल्पान्न कप् । विक्षिपन्विकिरन् । इत्थं शिशिरः सुरभिः । यमिनीमरुद्रात्रिवायुः परितो लीनाः शयिता विहङ्गा यासु ता वनराजीरादुधावेषत्कम्पयामास । विहङ्गशयनाविरोधेन वनराजिः किञ्चित्कम्पितेत्यर्थः । 'आङीषदर्थेऽभिव्याप्तौ' इत्यमरः । तथा कश्चित्कामिनीं गन्धोदकादिना सिञ्चन्नाकर्षति तद्वदिति भावः ॥ ३१ ॥

संविधातुमभिषेकमुदासे मन्मथस्य लसदंशुजलौघः ।
यामिनीवनितया ततचिह्नः सोत्पलो रजतकुम्भ इवेन्दुः ॥३२॥

अन्वयः—यामिनीवनितया, मन्मथस्य, अभिषेकं, संविधातुं, लसदंशुजलौघः, ततचिह्नः, इन्दुः, सोत्पलः, रजतकुम्भः, इव, उदासे ॥ ३२ ॥

संविधातुमिति ॥ यामिनी वनितेव तया रात्रिरूपया कान्तया मन्मथस्याभिषेकं त्रिभुवनजैत्रयात्राभिषेकं संविधातुं सम्यक्कर्तुमंशवो जलानीव तेषामोघः पूरो लसन्यस्मिन्सः ततचिह्नः स्फुटलाञ्छन इन्दुः सोत्पलो रजतकुम्भ इवोदास उत्क्षिप्तः । अस्यतेः कर्मणि लिट् । अत्र संविधातुमिति तुमुना प्रतीयमानोत्प्रेक्षयानुप्राणितोऽयमुपमोत्प्रेक्षयोः सङ्करः ॥ ३२ ॥

ओजसापि खलु नूनमनूनं नासहायमुपयाति जयश्रीः ।
यद्विभुः शशिमयूखसखः सन्नाददे विजयि चापमनङ्गः ॥३३॥

अन्वयः—ओजसा, अनूनम्, अपि, असहायं, जयश्रीः, न, उपयाति, खलु, नूनम् । यत्, विभुः, (अपि) अनङ्गः, शशिमयूखसखः, सन्, विजयि, चापम्, आददे ॥३३॥

ओजसेति ॥ ओजसा अनूनं सम्पूर्णमप्यसहायं सहायरहितम् । पुरुषमिति शेषः । जयश्रीर्नोपयाति खलु नूनम् । कुतः । यद्यस्माद्विभुः समर्थोऽप्यनङ्गः शशिमयूखानां सखा सहचरस्तथोक्तः । ससहायः सन्नित्यर्थः । विजयि विजयशीलम् । 'जिदृक्षि—' इत्यादिनेनिप्रत्ययः । चापमाददे । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥३३॥

इत्थमुद्दीपनसामग्रीमुपवर्ण्य सम्प्रति तत्कार्यभूतं रतिवर्णनमारभते—

सद्मनां विरचनाहितशोभैरागतप्रियकथैरपि दूत्यम् ।
सन्निकृष्टरतिभिः सुरदारैर्भूषितैरपि विभूषणमीषे ॥ ३४ ॥

अन्वयः—सन्निकृष्टरतिभिः, सुरदारैः, आहितशोभैः, अपि, सद्मनां, विरचना, ईषे । आगतप्रियकथैः, अपि, दूत्यम्, (ईषे) । भूषितैः, अपि, विभूषणम् ईषे ॥ ३४ ॥

सद्मनामित्यादि ॥ सन्निकृष्टरतिभिरासन्नसुरतोत्सवैरत एव सुरदारैः सुरवधूभिराहितशोभैः प्रागेव विहितकेलिगृहमण्डनैरपि पुनः सद्मनां केलिगृहाणां विरचना मण्डनमीषेऽभिलेषे । इषेः कर्मणि लिट् । आगतप्रियकथैः प्राप्तप्रियजनवृत्तान्तैरपि दूतस्य कर्म दूत्यं दूतीव्यापार ईषे । दूतस्य भावकर्मणोर्यत्प्रत्ययः । तथा भूषितैरपि विभूषणं प्रसाधनमीषे । औत्सुक्यातिरेकादिति भावः ॥ ३४ ॥

न स्रजो रुरुचिरे रमणीभ्यश्चन्दनानि विरहे मदिरा वा ।
साधनेषु हि रतेरुपधत्ते रम्यतां प्रियसमागम एव ॥ ३५ ॥

अन्वयः—विरहे, स्रजः, चन्दनानि, मदिरा, वा, रमणीभ्यः, न, रुरुचिरे । हि, प्रियसमागमः एव, रतेः, साधनेषु, रम्यतां, उपधत्ते ॥ ३५ ॥

भेति ॥ विरहे वियोगावस्थायां स्रजो माल्यानि चन्दनानि गन्धा मदिरा मद्यानि वा रमणीभ्यः। 'रुच्यर्थानां प्रीयमाणः' इति सम्प्रदानत्वाच्चतुर्थी। न रुरुचिरे न रोचन्ते स्म। हि यस्मात्प्रियसमागम एव रतेः साधनेषु स्रगादिषु रम्यतां मनोहरत्वम्। रुचिकरत्वमिति यावत्। उपधत्त आदत्ते। तदभावादरुचिर्युक्तैवेत्यर्थः। अत एव वैधर्म्यात्कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासः। रम्यन्त एष्विति रम्याणि। 'पोरदुपधात्' इति यत्प्रत्ययः। 'कृत्यल्युटो बहुलम्' इत्यधिकरणार्थः॥ ३५॥

प्रस्थिताभिरधिनाथनिवासं ध्वंसितप्रियसखीवचनाभिः।
मानिनीभिरपहस्तितधैर्यैः सादयन्नपि मदोऽवललम्बे॥ ३६॥

अन्वयः—अधिनाथनिवासं, प्रस्थिताभिः, ध्वंसितप्रियसखीवचनाभिः, मानिनीभिः, अपहस्तितधैर्यैः, सादयन्, अपि, मदः, अवललम्बे॥ ३६॥

प्रस्थिताभिरिति॥ अधिनाथनिवासं प्रियगृहं प्रति प्रस्थिताभिः प्रचलिताभिर्ध्वंसितानि खण्डितानि प्रियसखीवचनानि स्वयं प्रस्थानं लाघवायेत्येवंरूपाणि याभिस्ताभिर्मानिनीभिः कोपनाभिः। 'स्त्रीणामीर्ष्याकृतः कोपो मानोऽन्यासङ्गिनि प्रिये' इति लक्षणात्। अपहस्तितं निरस्तं धैर्यं येन स तथा सादयन्मानं शरीरं च कर्षयन्नपि। सदोषोऽपीत्यर्थः। मदोऽवललम्बे स्वीकृतः। अज्ञानव्याजेन लाघवापह्नवसौकर्यादिति भावः॥ ३६॥

कान्तवेश्म बहु सन्दिशतीभिर्यातमेव रतये रमणीभिः।
मन्मथेन परिलुप्तमतीनां प्रायशः स्खलितमप्युपकारि॥ ३७॥

अन्वयः—रतये, बहु, सन्दिशतीभिः, रमणीभिः, कान्तवेश्म, यातम्, एव। मन्मथेन, परिलुप्तमतीनां, स्खलितम्, अपि, प्रायशः, उपकारि॥ ३७॥

कान्तेति॥ रतये सुरताय बहु सन्दिशतीभिरनेकं वाचिकं कथयन्तीभिः। सन्देशव्यसनाद्गन्तव्यमप्यजानतीभिरित्यर्थः। रमणीभिः। कान्तवेश्म यातं प्राप्तमेव। न तु मध्येमार्गान्निवृत्तमित्यर्थः। तथाहि। मन्मथेन परिलुप्तमतीनां स्खलितं विरुद्धाचरणमपि प्रायश उपकारि भवति॥ ३७॥

आशु कान्तमभिसारितवत्या योषितः पुलकरुद्धकपोलम्।
निर्जिगाय मुखमिन्दुमखण्डं खण्डपत्रतिलकाकृति कान्त्या॥ ३८॥

अन्वयः—आशु, कान्तम्, अभिसारितवत्या, योषितः, पुलकरुद्धकपोलम्, खण्डपत्रतिलकाकृति, मुखम्, कान्त्या, अखण्डम्, इन्दुम्, निर्जिगाय॥ ३८॥

आश्विति॥ आशु कान्तमभिसारितवत्या अभिगतवत्याः। स्वार्थे णिच्।

योषितः सम्बन्धि पुलकैः समाकुलौ कपोलौ यस्य तत्। लग्ना प्रसृता पत्रावली मकरके-खानां तिलकस्य चाकृतिः सन्निवेशो यस्य तत्तथोक्तं मुखं कान्त्या लावण्येन पूर्णमिन्दुं निर्जिगाय जयति स्मेत्यार्थीयमुपमा। 'जयति द्वेष्टि' इति दण्डिना सादृश्यार्थेषु गणनात् ॥ ३८ ॥

अथ युग्मेन सखीनायिकासंवादमाह—

उच्यतां स वचनीयमशेषं नेश्वरे परुषता सखि साध्वी।
आनयैनमनुनीय कथं वा विप्रियाणि जनयन्ननुनेयः ॥ ३९ ॥

अन्वयः—सः, अशेषं, वचनीयम्, उच्यताम्। हे सखि ?, ईश्वरे, परुषता, न, साध्वी। (तर्हि) एनम्, अनुनीय, आनय। विप्रियाणि, जनयन्, कथं, वा, अनुनेयः ॥३९॥

उच्यतामिति ॥ तत्र नायिकाह—स धूर्तोऽशेषमखिलं वचनीयं वक्तव्यमुच्यताम्। निःशङ्कमुपालभ्यतामित्यर्थः। ब्रूञो दुह्यादित्वादप्रधाने कर्मणि लोट्। अथ सख्याह—हे सखि, ईश्वरे भर्तरि नायके विषये परुषता पारुष्यं न साध्वी न हिता। अथ नायिकाह—तर्ह्येनमनुनीय सान्त्वयित्वानय। पुनः सख्याह—विप्रियाणि जनयन्नप्रियाणि कुर्वन्स कथं वानुनेयोऽनुनयार्हः ॥ ३९ ॥

किं गतेन न हि युक्तमुपैतुं कः प्रिये सुभगमानिनि मानः।
योषितामिति कथासु समेतैः कामिभिर्बहुरसा धृतिरूहे ॥ ४० ॥

अन्वयः—गतेन, किं, उपतुं न, युक्तं, हि। हे सुभगमानिनि ?, प्रिये, मानः कः, इति, योषितां, कथासु, समेतैः, कामिभिः, बहुरसा, धृतिः, ऊहे ॥ ४० ॥

किमिति ॥ पुनर्नायिकाह—तर्हि गतेन तं प्रति गमनेन किम्। कोऽर्थ इत्यर्थः। अत उपैतुं गन्तु न युक्तं हि। पुनः सख्याह—हे सुभगमानिनि सौन्दर्यमानिनि। सुभगमात्मानं मन्यत इति। 'आत्ममाने खश्च' इति चकाराण्णिनिप्रत्ययः। तस्मिन्प्रिये विषये को मानः। मानो न कर्तव्य इत्यर्थः। यद्वा। नहीत्यादि सखीवाक्यम्। तत्र नहीत्येकं वाक्यम्। यदुक्तं सखीत्यर्थ.। हे सखि, किं तूपैतुं युक्तम्। कुतः। सुभगमानिनि प्रिये को मानः। तादृग्जनस्य दुर्लभत्वादिति भावः। इत्येवंरूपासु योषितां कथासु विषये समेतैः। समीपमागत्याकर्णयद्भिरित्यर्थः। कमिभिर्बहुरसानेकास्वादा धृतिः सन्तोष ऊहे ऊढा। अत्र परोक्षौत्सुक्यनिर्वेदाद्यनेकभावशाबल्यपरिपूर्णकान्ताकथाकर्णनादुत्तरोत्तरमपूर्वहृद्यानन्दनिष्यन्दमानन्दसन्दोहमविन्दन्नित्यर्थः। प्रायेणात्र प्रौढाः कलहान्तरिताश्च नायिकाः ॥ ४० ॥

योषितः पुलकरोधि दधत्या घर्मवारि नवसङ्गमजन्म।
कान्तवक्षसि बभूव पतन्त्या मण्डनं लुलितमण्डनतैव ॥ ४१ ॥

अन्वयः—पुलकरोधि, नवसङ्गमजन्म, घर्मवारि, दधत्याः, कान्तवक्षसि, पतन्त्याः, योषितः, लुलितमण्डनता, एव, मण्डनं, बभूव ॥ ४१ ॥

योषित इति ॥ पुलकरोधि रोमाञ्चव्यापि नवसङ्गम एव जन्म यस्य तद्धर्मवारि स्वेदोदकं दधत्या इति सात्त्विकोक्तिः । कान्तवक्षसि पतन्त्येत्यौत्सुक्योक्तिः । योषितो या लुलितमण्डनतोत्सृष्टप्रसाधनत्वम् । भावे तल् । सैव मण्डनं बभूव । तादृश-फलत्वात्तस्येति भावः ॥ ४१ ॥

शीधुपानविधुरासु निगृह्णन्मानमाशु शिथिलीकृतलज्जः ।
सङ्गतासु दयितैरुपलेभे कामिनीषु मदनो नु मदो नु ॥ ४२ ॥

अन्वयः—शीधुपानविधुरासु, दयितैः, सङ्गतासु, कामिनीषु, आशु, मानं, निगृह्णन्, शिथिलीकृतलज्जः, मदनः, नु, मदः, नु, उपलेभे ॥ ४२ ॥

शीध्विति ॥ शेरतेऽनेनेति शीधु पक्वेक्षुरसविकारो मद्यविशेषस्तस्य पानेन विधुरासु विमूढासु । तथा दयितैः सङ्गतासु स्वयम्प्राप्तासु च कामिनीष्वतिमानवतीष्वाशु मानं कोपं निगृह्णन्निवर्तयन् । शिथिलीकृता लज्जा येन स मदनो नु मदो नूपलेभे लक्ष्यते स्मेत्यर्थः । प्रियसमागमशीधुपानरूपोभयकारणाभङ्गादुभयथा माननिग्रहाद्य-नुभावसाधारण्याच्च सन्देहः । स एवालङ्कारः ॥ ४२ ॥

द्वारि चक्षुरधिपाणि कपोलौ जीवितं त्वयि कुतः कलहोऽस्याः ।
कामिनामिति वचः पुनरुक्तं प्रीतये नवनवत्वमियाय ॥ ४३ ॥

अन्वयः—द्वारि, चक्षुः, अधिपाणि, कपोलौ, जीवितं, त्वयि, (अतः) अस्याः, कलहः, कुतः, इति, कामिनां, प्रीतये, पुनरुक्तं, वचः, नवनवत्वम्, इयाय ॥ ४३ ॥

द्वारीति ॥ द्वारि त्वदागमनमार्ग एव चक्षुरित्यौत्सुक्योक्तिः । अधिपाणि पाणौ करे कपोलाविति चिन्तोक्तिः । किम्बहुना जीवितं त्वयि त्वदधीनम् । त्वां विना न जीवतीत्यर्थः । इति गाढानुरागोक्तिः । अतोऽस्याः कलहो विग्रहः कुत इत्येव कामिनां प्रीतये पुनरुक्तं पुनः पुनरुच्यमानं वचो दूतीवाक्यं नवनवत्वं नवप्रकारत्वमपूर्वत्वभाव-मियाय । प्रकारार्थे द्विर्भावः । कर्मधारयवद्भावात्सुपो लुक् । कान्तानुरागप्रकटनात्का-मिनः प्रहृष्यन्तीति भावः । कलहान्तरितेयम् ॥ ४३ ॥

साचि लोचनयुगं नमयन्ती रुन्धती दयितवक्षसि पातम् ।
सुभ्रुवो जनयति स्म विभूषां सङ्गतावुपरराम च लज्जा ॥ ४४ ॥

अन्वयः—लोचनयुगं, साचि, नमयन्ती, दयितवक्षसि, पातं, रुन्धती, लज्जा, सुभ्रुवः, विभूषां, जनयति स्म । सङ्गतौ, उपरराम, च ॥ ४४ ॥

साचीति ॥ लोचनयुगं साचि तिर्यङ्नमयन्ती प्रिये तिर्यक्पातयन्ती । न तु समरेखयेत्यर्थः । दयितवक्षसि पातं रुन्धतीष्टमपि प्रतिबध्नती लज्जा सुभ्रुवो नायिकाया विभूषां शोभां जनयति स्म । सङ्गतौ सुरतप्रसङ्गे सत्युपरराम च । एवं यतस्तदा चाभूषणमेवेति भावः । 'विभाषाकर्मकात्' इति परस्मैपदम् ॥ ४४ ॥

सव्यलीकमवधीरितखिन्नं प्रस्थितं सपदि कोपपदेन ।
योषितः सुहृदिव स्म रुणद्धि प्राणनाथमभिबाष्पनिपातः ॥ ४५ ॥

अन्वयः—सव्यलीकम्, अवधीरितखिन्नम्, सपदि, कोपपदेन, प्रस्थितं, प्राणनाथं, योषितः, अभिबाष्पनिपातः, सुहृद्, इव, रुणद्धि स्म, ॥ ४५ ॥

सव्यलीकमिति ॥ सव्यलीकं सापराधमत एवावधीरितोऽवज्ञातः सन् । खिन्नस्तम् । 'पूर्वकाल-' इत्यादिना तत्पुरुषः । सपदि कोपस्य पदेन व्याजेन प्रस्थितं निर्गच्छन्तं प्राणनाथं प्रियं योषितः सम्बन्ध्यभिबाष्पनिपात आभिमुख्येनाश्रुमोक्षः सुहृदिव रुणद्धि स्म रुरोध । बाष्पपातस्य मन्युमोक्षलिङ्गतया प्रस्थानप्रतिबन्धकत्वात्सुहृदौपम्यम् । इयमधीरा खण्डिता—'ज्ञातेऽन्यासङ्गिनि पत्यौ खण्डितेर्ष्याकषायिता । अधीराश्रु विमुञ्चन्ती विज्ञेया चात्र नायिका ॥' इति दशरूपके ॥ ४५ ॥

शङ्किताय कृतबाष्पनिपातामीर्ष्यया विमुखितां दयिताय ।
मानिनीमभिमुखाहितचित्तां शंसति स्म घनरोमविभेदः ॥ ४६ ॥

अन्वयः—शङ्किताय, दयिताय, ईर्ष्यया, विमुखितां, कृतबाष्पनिपाताम्, मानिनीम्, घनरोमविभेदः, अभिमुखाहितचित्तां, शंसति स्म ॥ ४६ ॥

शङ्कितायेति ॥ शङ्किताय दयितायाविश्वस्ताय।।नायकायेर्ष्यया विमुखितां विमुखीकृताम् । अत एव कृतबाष्पनिपातां मानिनीं घनरोमविभेदः सान्द्रपुलकोदयोऽभिमुखमाहितं चित्तं यया ताम् । निष्कोपामित्यर्थः । शंसति स्म । व्यनक्ति स्मेत्यर्थः । अन्यथा सात्त्विकानुदयादिति भावः । अत्रापि पूर्वोक्तैव नायिका ॥ ४६ ॥

अथ सम्भोगशृङ्गारमाह । तत्रापि बाह्यरतमाह—

लोलदृष्टि वदनं दयितायाश्चुम्बति प्रियतमे रभसेन ।
व्रीडया सह विनीवि नितम्बादंशुकं शिथिलतामुपपेदे ॥ ४७ ॥

अन्वयः—प्रियतमे, लोलदृष्टि, दयितायाः, वदनं रभसेन, चुम्बति, विनीवि, अंशुकं, नितम्बात्, व्रीडया, सह शिथिलताम्, उपपेदे ॥ ४७ ॥

लोलेति ॥ प्रियतमे लोलदृष्टि चञ्चलेक्षणं दयिताया वदनं रभसेन बलात्कारेण चुम्बति सति विनीवि निर्गतबन्धनमंशुकं नितम्बाद्व्रीडया सह शिथिलतामुपपेदे । उभयमपि शिथिलमासीदित्यर्थः । अत्र व्रीडांशुकरूपसम्बन्धिभेदभिन्नवृत्तिस्रंसनरूप-

शैथिल्यस्याभेदाध्यवसायनिबन्धनातिशयोक्तिमूलः सहोक्तिविशेषोऽलङ्कारः। अत एव व्रीडांशुकौपम्यं च कल्प्यम्। अत्र वात्स्यायनः—'बाह्यमाभ्यन्तरं चेति द्विविधं रतमुच्यते। तत्राद्यं चुम्बनाश्लेषनखदन्तक्षतादिकम्॥ द्वितीयं सुरतं साक्षात्प्रानाकरणकल्पितम्' इति॥ ४७॥

ह्रीतया गलितनीवि निरस्यन्नन्तरीयमवलम्बितकाञ्चि।

मण्डलीकृतपृथुस्तनभारं सस्वजे दयितया हृदयेशः॥ ४८॥

अन्वयः—गलितनीवि, अवलम्बितकाञ्चि, अन्तरीयम्, निरस्यन्, हृदयेशः, ह्रीतया, दयितया, मण्डलीकृतपृथुस्तनभारं, सस्वजे, ॥ ४८॥

ह्रीतयेति॥ गलितनीवि गलितबन्धं तथाप्यवलम्बिता काञ्ची येन तत्। काञ्चीलग्नमित्यर्थः। तदन्तरीयमधोंशुकम्। 'अन्तरीयोपसंव्यानपरिधानान्यधोंशुके' इत्यमरः। निरस्यन्नाक्षिपन्। हृदयेशः प्रियो ह्रीतया वस्त्रापगमाल्लज्जितया। ह्रीधातोः कर्तरि क्तः। दयितया मण्डलीकृतो वर्तुलीकृतः पृथुस्तनभारो यस्मिन्कर्मणि तद्यथा तथा। गाढमित्यर्थः। सस्वज आश्लिष्टः। प्रियदृष्टेः प्रतिबन्धार्थमित्यर्थः॥ ४८॥

आहता नखपदैः परिरम्भाश्चुम्बितानि घनदन्तनिपातैः।

सौकुमार्यगुणसम्भृतकीर्तिर्वाम एव सुरतेष्वपि कामः॥ ४९॥

अन्वयः—परिरम्भाः, नखपदैः, आहताः, चुम्बितानि, घनदन्तनिपातैः, सौकुमार्यगुणसम्भृतकीर्तिः, कामः, सुरतेषु, अपि, वाम, एव॥ ४९॥

आहता इति॥ परिरम्भा आलिङ्गनानि नखपदैर्हेतुभिराहता अभिमताः। 'हेतौ' इति तृतीया। तथा चुम्बितानि चुम्बनानि घनदन्तनिपातैर्गाढदन्तक्षतैर्हेतुभिराहतानीति लिङ्गविपरिणामः। सुरतसुखोद्दीपकत्वान्नखदन्तक्षतपूर्वकेष्वालिङ्गनचुम्बनेष्वादरः संवृत्त इत्यर्थः। ननु सुकुमारे कामतन्त्रे कथं पीडाकरेष्वादर इति न वाच्यमित्याह—सौकुमार्येति। सौकुमार्यमेव गुणस्तेन सम्भृतकीर्तिर्लब्धयशाः कामः सुरतेषु सम्भोगेष्वपि। न केवलं विप्रलम्भेष्विति भाव.। वामः क्रूर एव। सुकुमारः काम इति वादमात्रम्। वस्तुतस्तु पीडयन्नेव सुखमावहतीति भावः। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः॥ ४९॥

अथाभ्यन्तरं रतमाह—

पाणिपल्लवविधूननमन्तः सीत्कृतानि नयनार्धनिमेषाः।

योषितां रहसि गद्गदवाचामस्त्रतामुपययुर्मदनस्य॥ ५०॥

अन्वयः—रहसि, गद्गदवाचां, योषितां, पाणिपल्लवविधूननम्, अन्तःसीत्कृतानि, नयनार्धनिमेषाः, मदनस्य, अस्त्रताम्, उपययुः॥ ५०॥

पाणीति ॥ रहस्येकान्ते इति विश्रम्भातिशयोक्तिः । गद्गदवाचां स्खलद्गिरां योषितां सम्बन्धीनि पाणिपल्लवयोर्विधूननं कम्पनमन्तः सीत्कृतानि सीत्काराः । एतेन कुट्टमिताख्यो भाव उक्तः । 'अधरपीडनादौ सुखेऽपि दुःखवदुपचारः कुट्टमितम्' इति लक्षणात् । नयनानामर्धनिमेषा अर्धनिमीलितानि । रहस्येकान्ते गद्गदवाचां योषितामिति विशेषणसामर्थ्याद् गद्गदकण्ठत्वं चेत्येतानि मदनस्याङ्गतामुपययु. । अस्त्रवत्पुंसामुद्दीपनान्यासन्नित्यर्थः । अत्र सीत्कारार्धनिमेषादिना सुखपारवश्यं व्यज्यते । तदुक्तं रतिरहस्ये—'अलसता वपुषि मीलनं दृशोर्मूर्च्छना च रतिलाभलक्षणम् । श्लेषयत्स्वजघनं मुहुर्मुहुः सीत्करोति गतलज्जिताकुला' इति ॥ ५० ॥

अथ मधुपानवर्णनमारभते—

पातुमाहितरतीन्यभिलेषुस्तर्षयन्त्यपुनरुक्तरसानि ।
सस्मितानि वदनानि वधूनां सोत्पलानि च मधूनि युवानः ॥५१॥

अन्वयः—युवानः, आहितरतीनि, अपुनरुक्तरसानि, तर्षयन्ति । सस्मितानि, वधूनां, वदनानि, सोत्पलानि, मधूनि, च, पातुम्, अभिलेषुः ॥ ५१ ॥

पातुमिति ॥ युवान आहितरतीनि वर्धितरागाण्यत एवापुनरुक्तरसानि पुनःपुनः पानेनाप्यपूर्वस्वादान्यत एव तर्षयन्ति तृष्णोत्पादकानि । अतृप्तिकराणीत्यर्थः । सस्मितानि वधूनां वदनानि सोत्पलानि मधूनि च पातुमभिलेषुरिच्छन्ति स्म । अत्र प्रस्तुतानामेव वदनानां मधूनां च पानक्रियौपम्यस्य गम्यत्वात्केवलं प्राकरणिकविषयतया तुल्ययोगितालङ्कारः । 'प्रस्तुतानां तथान्येषां केवलं तुल्यधर्मतः । औपम्यं गम्यते यत्र सा मता तुल्ययोगिता॥ ' इति लक्षणात् ॥ ५१ ॥

कान्तसङ्गमपराजितमन्यौ वारुणीरसनशान्तविवादे ।
मानिनीजन उपाहितसन्धौ सन्दधे धनुषि नेषुमनङ्गः ॥ ५२ ॥

अन्वयः—कान्तसङ्गमपराजितम् , अन्यौ, वारुणीरसनशान्तविवादे, उपाहितसन्धौ, मानिनीजने, अनङ्गः,धनुषि, इषुं, न, सन्दधे ॥ ५२ ॥

कान्तेति ॥ कान्तसङ्गमेन पराजितमन्यौ त्यक्तरोषे । तदवधिकत्वात्तस्येति भावः । किञ्च वारुणीरसनेन मद्यास्वादेन शान्तो विवादो वाक्कलहादिर्यस्य तस्मिन् । अत उपाहितसन्धौ प्रियैः सह कृतसन्धाने मानिनीजने विषयेऽनङ्गो धनुषीषुं न सन्दधे सन्धानं नाकरोत् । सिद्धसाध्ये साधनवैयर्थ्यादिति भावः ॥ ५२ ॥

कुप्यताशु भवतानतचित्ताः कोपितांश्च वरिवस्यत यूनः ।
इत्यनेक उपदेश इव स्म स्वाद्यते युवतिभिर्मधुवारः ॥ ५३ ॥

अन्वयः—यूनः, कुप्यत, आशु, आनतचित्ताः, भवत । कोपितान्, च, वरिवस्यत। इति, अनेकः, उपदेशः, इव, मधुवारः, युवतिभिः, स्वाद्यते स्म, ॥ ५३ ॥

कुप्यतेति ॥ यूनः प्रियान्कुप्यत यूनां कोपं जनयत । नात्र 'क्रुधद्रुह—' इत्यादिना यूनां सम्प्रदानत्वे चतुर्थी । तस्य 'यं प्रतिकोपः' इति नियमात् । अत्र कोपस्तावत्कृत्रिम इत्याश्वानतचित्ता अनुकूलचित्ता भवत । किञ्च कोपितास्तान्वरिवस्यत परिचरत । 'नमोवरिवश्चित्रङः क्यच्' इति क्यच् । वरिवसः परिचर्यायामित्यर्थे तस्य नियमश्च । इत्येवमनेकोऽनेकप्रकारो य उपदेशः प्रवर्तकवाक्यं स इव मधुवारो मधुपानावृत्तिः । 'मधुवारा मधुक्रमाः' इत्यमरः । युवतिभिः स्वाद्यते स्म । मधुवारस्य कोपादिकार्यप्रवर्तकत्वसाम्यादुपदेश इवेत्युत्प्रेक्षा । अनियताः खलु मत्तचेष्टा इति भावः ॥ ५३ ॥

भर्तृभिः प्रणयसम्भ्रमदत्तां वारुणीमतिरसां रसयित्वा ।
ह्रीविमोहविरहादुपलेभे पाटवं नु हृदयं नु वधूभिः ॥ ५४ ॥

अन्वयः—भर्तृभिः, प्रणयसम्भ्रमदत्ताम्, अतिरसां, वारुणीम्, रसयित्वा, वधूभिः, ह्रीविमोहविरहात्, पाटवं, नु, हृदयं नु, उपलेभे नु ॥ ५४ ॥

भर्तृभिरिति ॥ भर्तृभिः प्रणयसम्भ्रमाभ्यां प्रेमादराभ्यां दत्ताम् । 'सम्भ्रमः साध्वसेऽपि स्यात्संवेगादरयोरपि' इति विश्वः । अत एवातिरसामधिकस्वादां वारुणीं वरुणात्मजाम् । 'सुरा हलप्रिया हाला परिस्रुद्वरुणात्मजा' इत्यमरः । रसयित्वास्वाद्य वधूभिर्ह्रीविमोहविरहान्मदेन लज्जाजाड्यापगमाद्धेतोः पाटवं पटुत्वं नु हृदयं ज्ञानविशेषं नु उपलेभे । अत एव हृदयस्य तत्कार्यज्ञानसामर्थ्याद्धृदयमेव प्रागसत्पश्चाल्लब्धमिति सन्देहः । अन्यथा कथं प्रियं प्रति वक्रोक्त्याद्यर्थेषु प्रवृत्तिरिति भावः । सन्देहालङ्कारः ॥ ५४ ॥

स्वादितः स्वयमथैधितमानं लम्भितः प्रियतमैः सह पीतः ।
आसवः प्रतिपदं प्रमदानां नैकरूपरसतामिव भेजे ॥ ५५ ॥

अन्वयः—स्वयं, स्वादितः, अथ, प्रियतमैः, एधितमानं, लम्भितः, प्रियतमैः, सह, पीतः, आसवः, प्रमदानां, प्रतिपदं, नैकरूपरसताम्, भेजे, इव ॥ ५५ ॥

स्वादित इति ॥ स्वयं स्वादितः । आदौ स्वयमेवाद्य पीतः, अथानन्तरं प्रियतमरेधितमानं वर्धितबहुसम्मानं यथा तथा लम्भितो ग्राहितः । स्वहस्तेन पायित इत्यर्थः । ततः प्रियतमैः सह पीतः । युगपदेकपात्रेण पीत इत्यर्थः । आसव प्रमदानां प्रतिपदं प्रतिवारं नैकरूपरसतामनेकविधस्वादुत्वम् । नञर्थस्य नशब्दस्य सुप्सुपेति समासः । नञ्समासे नलोपः स्यात् । भेज इव प्रापेव । उपचारवि

केवाङ्गोऽन्येषु रसविशेषः स्यादिति भावः । आस्वादनादिपदार्थानामनेकरसता-प्राप्तिहेतुत्वात्काव्यलिङ्गं तावदेकं स्वादनादीनामनेकधर्माणामेकस्मिन्नेव सर्वक्रमेण सम्बन्धात्पर्यायभेदश्च, तयोश्च संसृष्टयोरनेकरसत्वोत्प्रेक्षाबीजत्वात्तया सहाङ्गाङ्गिभावेन सङ्करः ॥ ५५ ॥

भ्रूविलाससुभगाननुकर्तुं विभ्रमानिव वधूनयनानाम् ।
आददे मृदुविलोलपलाशैरुत्पलैश्चषकवीचिषु कम्पः ॥ ५६ ॥

अन्वयः—भ्रूविलाससुभगान्, वधूनयनानां, विभ्रमान्, अनुकर्तुम्, इव, मृदुविलोलपलाशैः, उत्पलैः, चषकवीचिषु, कम्पः, आददे ॥ ५६ ॥

भ्रूविलासेति ॥ भ्रूविलासैः सुभगान्सुन्दरान्वधूनयनानां विभ्रमाननुकर्तुं तैरात्मानं समीकर्तुमिवेति फलोत्प्रेक्षार्थत्वात् । मृदुविलोलपलाशैरीषच्चञ्चलदलैरुत्पलैश्चषकेषु या वीचयो मधूर्मयस्तासु यः कम्पः स आददे स्वीकृतः । न तु स्वकम्पस्तस्य विलोलविशेषणेनैवोक्तत्वात्तत्स्वीकारश्च तद्योग एव । पूर्वं नेत्रमात्रसाम्यभाजामुत्पलानां कम्पमानवीचियोगात्सुभ्रूविलासनेत्रसाम्यं जातमित्यर्थः ॥ ५६ ॥

ओष्ठपल्लवविदंशरुचीनां हृद्यतामुपययौ रमणानाम् ।
फुल्ललोचनविनीलसरोजैरङ्गनास्यचषकैर्मधुवारः ॥ ५७ ॥

अन्वयः—ओष्ठपल्लवविदंशरुचीनां, रमणानां, फुल्ललोचनविलीनसरोजैः, अङ्गनास्यचषकैः, मधुवारः, हृद्यताम्, उपययौ ॥ ५७ ॥

ओष्ठेति ॥ ओष्ठ इव पल्लवस्तस्य विदंशे दंशेन रुचिरभिलाषो येषां तेषाम् । मुखसुरापानमिषेणाधरं पिपासतामित्यर्थः । रमणानां फुल्लानि लोचनान्येव विनीलसरोजानि येषु तैः । अङ्गनास्यान्येव चषकाणि पानपात्राणि । 'चषकोऽस्त्री पानपात्रम्' इत्यमरः । तैर्मधुवारो मधुपानवृत्तिर्हृद्यतां हृदयप्रियतामुपययौ । 'हृदयस्य प्रियः' इति यत्प्रत्ययः । 'हृदयस्य हृल्लेखयदण्लासेषु–' इति हृद्भावः । रमणविशेषणार्थहेतुककाव्यलिङ्गसङ्कीर्णरूपकालङ्कारः ॥ ५७ ॥

प्राप्यते गुणवतापि गुणानां व्यक्तमाश्रयवशेन विशेषः ।
तत्तथा हि दयिताननदत्तं व्यानशे मधु रसातिशयेन ॥ ५८ ॥

अन्वयः—गुणवता, अपि, आश्रयवशेन, गुणानां विशेषः, प्राप्यते, व्यक्तम् । तत्तथा, हि, दयिताननदत्तम्, मधु, रसातिशयेन, व्यानशे ॥ ५८ ॥

प्राप्यत इति ॥ गुणवताप्याश्रयवशेन गुणानां विशेषः प्रकर्षः प्राप्यते व्यक्तम् । तत्तथा । यदुक्तं तत्तथैवेत्यर्थः । हि । यस्माद्दयितानां आननेन करणेन दत्तं मधु

रसातिशयेन स्वादुप्रकर्षेण कर्त्रा व्यानशे व्याप्तम् । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५८ ॥

वीक्ष्य रत्नचषकेष्वतिरिक्तां कान्तदन्तपदमण्डनलक्ष्मीम् ।
जज्ञिरे बहुमता प्रमदानामोष्ठयावकनुदो मधुवाराः ॥ ५९ ॥

अन्वयः—रत्नचषकेषु, अतिरिक्तां, कान्तदन्तपदमण्डनलक्ष्मीम्, वीक्ष्य, ओष्ठयावकनुदः, मधुवाराः, प्रमदानां, बहुमता, जज्ञिरे ॥ ५९ ॥

वीक्ष्येति ॥ रत्नचषकेषु स्फटिकादिमणिपात्रेष्वतिरिक्तां यावकापगमात्पूर्वाभ्यधिकां कान्तस्य यद्दन्तपदमण्डनं तस्य लक्ष्मीं शोभाम् । प्रतिबिम्बितामिति शेषः । वीक्ष्यौष्ठयावकनुदोऽधरलाक्षारागहारिणो मधुवारा मधुपानाभ्यासाः प्रमदानां बहुमता अभिमताः । वर्तमाने क्तः । तद्योगात्षष्ठी । जज्ञिरे जाताः । तेषां प्रियानुरागचिह्नप्रकाशकत्वादिति भावः ॥ ५९ ॥

मधुपानाद्धिलोचनेषु रागोत्पत्तिरधरेभ्यश्च लाक्षारागनिवृत्तिर्मधुरानयोश्चान्योन्यगन्धसङ्क्रान्तिरिति स्थिते सत्युत्प्रेक्षते—

लोचनाधरकृताहृतरागा वासिताननविशेषितगन्धा ।
वारुणी परगुणात्मगुणानां व्यत्ययं विनिमयं नु वितेने ॥ ६० ॥

अन्वयः—लोचनाधरकृताहृतरागा, वासिताननविशेषितगन्धा, वारुणी, परगुणात्मगुणानां, व्यत्ययं, विनिमयम्, नु, वितेने ॥ ६० ॥

लोचनेति ॥ लोचने चाधरश्च लोचनाधरम् । 'समुद्राभ्राद्घः—' इति व्यभिचारज्ञापकान्नात्राधारशब्दस्य पूर्वनिपातः । कृतश्चासावाहृतश्चेति विशेषणसमासः । लोचनाधरस्य कृताहृतो रागो यथा सा तथोक्ता । लोचनयोः कृतरागाधरादाहृतरागा चेत्यर्थः । षष्ठ्याश्चार्थसम्बन्धात्सामान्यस्य योगविशेषे पर्यवसाननियमेनाधिकरणापादानार्थयोराक्षेपात् । तथा चाधरलोचनगुणयो रागतद्विरहयोः स्थानपरिवृत्तिं कृतवतीत्यर्थः । तथा वासितेन स्वगन्धसङ्क्रान्तिसुरभितेनाननेन विशेषितोऽतिशयितो गन्धो यस्याः सा । यद्वा वासितानना चासावर्थादानेनव विशेषितगन्धा चेति कृतबहुव्रीहिर्विशेषणसमासः । उभयथाप्याननसङ्क्रान्तस्वगन्धा स्वसङ्क्रान्ताननगन्धा चेत्यर्थः । एवम्भूता वारुणी मदिरा परगुणात्मगुणानां परयोर्लोचनाधरयोर्गुणौ च परस्याननस्य गुण आत्मनो वारुण्या गुणश्च परगुणात्मगुणास्तेषां परगुणात्मगुणानां व्यत्ययं विनिमयं नु वितेने विस्तारयामास । चित्तत्र प्रामादिकी वस्तुपरिवृत्तिर्व्यत्ययः । बुद्धिपूर्वा तु विनिमयः । अत्र तन्त्रोच्चरितस्य परगुणशब्दस्यावृत्त्या परगुणौ च परगुणात्मगुणौ चेति विग्रहः कथञ्चिद्यत्या लोढव्यः । उपमानपूर्वपदबहुव्री-

ह्विषत्। तथा चायमर्थः। परगुणयोरधरलोचनगुणयो रागतद्विरहयोर्व्यत्ययं नु विनिमयं नु वितेने, तथा परगुणात्मगुणयोराननगन्धासवगन्धयोश्च व्यत्ययं नु विनिमयं नु वितेने। अन्यथा कथमन्यस्मिन्नन्यधर्मोपलम्भः सम्भवतीति भावः। अत्र लोचनाधर-रागयोस्तदभावयोर्वाभेदेऽप्यभेदाध्यवसायादेकत्ववाचोयुक्तिः। तस्मात्तन्मूलातिशयोक्त्यनुप्राणिता चेयं व्यत्ययविनिमययोरन्यतरकरणादुत्प्रेक्षेति सङ्क्षेपः। सा च प्रतीयमाना व्यञ्जकाप्रयोगात्। नुशब्दस्तु संशये ॥ ६० ॥

तुल्यरूपमसितोत्पलमक्ष्णोः कर्णगं निरुपकारि विदित्वा।
योषितः सुहृदिव प्रविभेजे लम्भितेक्षणरुचिर्मदरागः ॥ ६१ ॥

अन्वयः—अक्ष्णोः, तुल्यरूपं, योषितः, कर्णगम्, असितोत्पलं, निरुपकारि, विदित्वा, मदरागः, सुहृद्, इव, लम्भितेक्षणरुचिः, प्रविभेजे ॥ ६१ ॥

तुल्येति ॥ अक्ष्णोस्तुल्यरूपमक्षितुल्याकृति योषितः कर्णगं कर्णावतंसीकृतमसितोत्पलं निरुपकार्यनुपकारकं विदित्वा ज्ञात्वा। तत्कार्यशोभायाः कर्णान्तविश्रान्तेनाक्ष्णैव कृतत्वादिति भावः। मदरागः सुहृदिवोत्पलस्य बन्धुरिव। अनिष्टवारकत्वादिति भावः। लम्भितेक्षणरुचिराहितनयनकान्तिः सन्। प्रविभेजे वर्णान्तरापादनेन प्रविभक्तवान्। अवैलक्षण्यकरादक्ष्णो व्यावर्तयामास। ततो विच्छित्तिकरत्वादिति भावः ॥ ६१

क्षीणयावकरसोऽप्यतिपानैः कान्तदन्तपदसम्भृतशोभः।
आययावतितरामिव वध्वाः सान्द्रतामधरपल्लवरागः ॥ ६२ ॥

अन्वयः—अतिपानैः, क्षीणयावकरसः, कान्तदन्तपदसम्भृतशोभः, वध्वाः, अधरपल्लवरागः, अतितरां सान्द्रताम्, आययौ, इव, ॥ ६२ ॥

क्षीणेति ॥ अतिपानैः क्षीणयावकरसः क्षीणलाक्षारागोऽपि कान्तस्य दयितस्य दन्तपदेन दन्तक्षतेन सम्भृता शोभा यस्य सः। वध्वा अधरपल्लवरागोऽतितरामतिमात्रम्। अतिशब्दात्तरप्प्रत्यये 'किमेत्तिङव्यय—' इत्यादिनाम्प्रत्ययः। 'तद्धितश्चासर्वविभक्तिः' इत्यव्ययसंज्ञा। सान्द्रतां घनत्वमाययाविव। प्रियोपभोगचिह्नमण्डितानां कामिन्यवयवानां किमन्यैर्मण्डनैरिति भावः। तत्र क्षीणस्यापि सान्द्रतेति विरोधात्कान्तदन्तेत्यादिविशेषणगत्या सान्द्रत्वे हेतूक्त्या काव्यलिङ्गं तत्सङ्कीर्णा चोत्प्रेक्षा ॥६२॥

रागकान्तनयनेषु नितान्तं विद्रुमारुणकपोलतलेषु।
सर्वगापि ददृशे वनितानां दर्पणेष्विव मुखेषु मदश्रीः ॥ ६३ ॥

अन्वयः—वनितानां, सर्वगा, अपि, मदश्रीः, रागकान्तनयनेषु, विद्रुमारुणकपोलतलेषु, मुखेषु, दर्पणेषु, इव, नितान्तं, ददृशे, ॥ ६३ ॥

रागेति ॥ वनितानां सर्वगापि सर्वाङ्गगतापि । 'अन्तात्यन्त—' इत्यादिना डः । मदश्री रागेण कान्तानि नयनानि येषु तेषु विद्रुमवदरुणानि कपोलतलानि येषु तेषु मुखेषु दर्पणेष्विव नितान्तं ददृशे । तेषां नयनादिनैर्मल्येन रागाभिव्यक्तिसम्भवादिति भावः । अत्र मदश्रीः सर्वगतापि मुखेष्वेव ददृश इति विरोधः । तस्य मुखविशेषणैः समाधानात्काव्यलिङ्गानुप्राणितो विरोधवदाभासोऽलङ्कारः । स चोपमया संसृज्यते॥६३॥

बद्धकोपविकृतीरपि रामाश्चारुताभिमततामुपनिन्ये ।
वश्यतां मधुमदो दयितानामात्मवर्गहितमिच्छति सर्वः ॥६४॥

अन्वयः—बद्धकोपविकृतीः, अपि, रामाः, चारुताभिमतताम्, उपनिन्ये, मधुमदः, दयितानां, वश्यतां, (उपनिन्ये) सर्वः, आत्मवर्गहितम्, इच्छति ॥ ६४ ॥

बद्धेति ॥ बद्धा कोपेन विकृतिर्याभिस्तास्तथाभूता अपि रामाः कर्म चारुता तासां सौन्दर्यं कर्त्री अभिमततां प्रियवाल्लभ्यमुपनिन्ये । सौन्दर्यं हि विकृतिमपि रोचयत इति भावः । मधुमदो दयितानां वश्यतां विधेयत्वमुपनिन्ये । तथाहि । सर्व आत्मवर्गहितमिच्छति । अतश्चारुता स्त्रीत्वात्स्त्रीणामुपचकार । मधुमदस्तु पुंस्त्वात्पुंसामिति युक्तमित्यर्थः । अत्र विकृता अप्यभिमताः कुपिता अपि वश्या इति विरोधस्य चारुतामदाभ्यां समाधानादुभयथापि विरोधाभासो भवन्नर्थान्तरन्यासेन संसृज्यते ॥६४॥

वाससां शिथिलतामुपनाभि ह्रीनिरासमपदे कुपितानि ।
योषितां विदधती गुणपक्षे निर्ममार्ज मदिरा वचनीयम् ॥६५॥

अन्वयः—उपनाभि, वाससां, शिथिलतां, ह्रीनिरासम्, अपदे, कुपितानि, गुणपक्षे, विदधती, मदिरा, योषितां, वचनीयं, निर्ममार्ज ॥ ६५ ॥

वाससामिति ॥ उपनाभि नाभिसमीपे वाससां शिथिलतां ह्रीनिरासं लज्जात्यागमपदे कुपितान्यस्थानकोपांश्च गुणपक्षे गुणकोटौ विदधती निवेशयन्ती । दोषानप्येतान्गुणान्कुर्वतीत्यर्थः । मदिरापि योषितां वचनीयम् 'न नाभिं दर्शयेत्' इति शास्त्रविषिद्धाचरणनिन्दां निर्ममार्ज । तथा दोषाणामपि वस्त्रशैथिल्यादीनां तदानीं गुणत्वान्न कश्चिद्वचनीयावकाश इत्यर्थः ॥ ६५ ॥

भर्तृषूपसखि निक्षिपतीनामात्मनो मधुमदोद्यमितानाम् ।
व्रीडया विफलया वनितानां न स्थितं न विगतं हृदयेषु ॥६६॥

अन्वयः—उपसखि, आत्मनः, भर्तृषु, निक्षिपतीनां, मधुमदोद्यमितानाम्, वनितानां, हृदयेषु, विफलया, व्रीडया, न, स्थितं, न, विगतम् ॥ ६६ ॥

भर्तृष्विति ॥ उपसखि सखिसमीपे । समीपार्थेऽव्ययीभावः । आत्मनः स्वदेहान् ।

'आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि' इति वैजयन्ती । भर्तृषु निक्षिपतीनां निपातयन्तीनाम् । भर्तॄणामुपरि पतन्तीनामित्यर्थः। 'आच्छीनद्योर्नुम्' इति विकल्पान्नुमभावः । कुतः । मधुमदेनोपमितानां प्रेरितानाम् । न तु स्वेच्छयेति भावः । वनितानामनुरक्तस्त्रीणाम् । 'वनिता जनितात्यर्थानुरागायां च योषिति' इति विश्वः । हृदयेषु विफलया । अनुचिताचरणादिति भावः । व्रीडया न स्थितं न विगतम् । वैफल्यात्तस्या मदोपाधिकत्वाच्चेति भावः । अत एव नोभयनिषेधविरोधः ॥ ६६ ॥

रुन्धती नयनवाक्यविकासं सादितोभयकरा परिरम्भे ।
व्रीडितस्य ललितं युवतीनां क्षीबता बहुगुणैरनुजह्रे ॥ ६७ ॥

अन्वयः—नयनवाक्यविकासं, रुन्धती, परिरम्भे, सादितोभयकरा, युवतीनां, क्षीबता, बहुगुणैः, व्रीडितस्य, ललितम् , अनुजह्रे ॥ ६७ ॥

रुन्धतीति ॥ नयनानां वाक्यानां च विकासं प्रागल्भ्यं रुन्धती प्रतिबध्नती । तथा परिरम्भ आलिङ्गने सादितौ स्तम्भितावुभौ करौ यया सा युवतीनां सम्बन्धिनी क्षीबता मत्तता । कर्तरि क्तः । 'अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः' इति निपातनात्साधुः । क्षीबा मत्ता तस्य भावः क्षीबता । त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः । बहुगुणैर्दृष्टिसङ्कोचादिभिर्व्रीडितस्य व्रीडायाः । भावे क्तः । ललितं विलासमनुजह्रेऽनुचक्रे । कर्तरि लिट् । व्रीडाकार्यकरत्वाद्व्रीडानुकरणमित्युपमालङ्कारः ॥ ६७ ॥

योषिदुद्धतमनोभवरागा मानवत्यपि ययौ दयिताङ्कम् ।
कारयत्यनिभृता गुणदोषे वारुणी खलु रहस्यविभेदम् ॥ ६८ ॥

अन्वयः—उद्धतमनोभवरागा, योषित् , मानवती, अपि, दयिताङ्कं, ययौ । अनिभृता, वारुणी, गुणदोषे, रहस्यविभेदम् , कारयति, खलु ॥ ६८ ॥

योषिदिति ॥ उद्धत उत्कटो मनोभवेन यो रागः प्रीतिः स यस्याः सा योषिन्मानवत्यपि दयितस्याङ्कं ययौ । यतो मानाद्रागो बलीयानिति भावः । लाघवदोषं परिहरति—कारयतीति । अनिभृता चपला । न कार्यकारिणीत्यर्थः । वारुणी मदिरा गुणेषु दोषेषु च विषये । सर्वोऽपि द्वन्द्वो विभाषयैकवद्भवति । रहस्यविभेदं रहस्यभङ्गं कारयति खलु । बलान्निगूहितावपि गुणदोषौ प्रकाशयतीत्यर्थः । यतोऽतिगूढरागप्रकटनं प्रकटमानत्यागश्च प्रमत्ताया न लाघवमावहति । अबुद्धिपूर्वकत्वादिति भावः॥ ६८॥

आहिते नु मधुना मधुरत्वे चेष्टितस्य गमिते नु विकासम् ।
आबभौ नव इवोद्धतरागः कामिनीष्ववसरः कुसुमेषोः ॥ ६९ ॥

अन्वयः—मधुना, चेष्टितस्य, मधुरत्वे, आहिते, नु । विकासं, गमिते, नु । उद्धतरागः, कुसुमेषोः, कामिनीषु, अवसरः, नवः, इव, आबभौ ॥ ६९ ॥

आहित इति ॥ मधुना मद्येन चेष्टितस्य रतिव्यापारस्य मधुरत्वे माधुर्य आहिते नु सम्पादिते नु प्रागसत्येव मनोहरत्वे संप्रत्युत्पादिते वा। विकासं गमिते नु प्राक्सत्येव माधुर्ये प्रकर्षं प्रापिते वा। उद्धतराग उद्रिक्तरागः। अत एव कुसुमेषोः कामिनीष्ववसरः प्रवेशो नव इवाबभौ। नित्यसंनिहितोऽपि मदनः कामिनीषु मदकृततात्कालिकचेष्टामाधुर्याद्रागोद्रेके सत्यपूर्ववदुद्दीप्तोऽभूदित्यर्थः। संशयानुप्राणितेयमुत्प्रेक्षा ॥६९॥

मा गमन्मदविमूढधियो नः प्रोज्झ्य रन्तुमिति शङ्कितनाथाः।
योषितो न मदिरा भृशमीषुः प्रेम पश्यति भयान्यपदेऽपि ॥७०॥

अन्वयः—शङ्कितनाथाः, योषितः, मदविमूढधियः, नः, प्रोज्झ्य, रन्तुं मा, गमन्, इति, मदिरां, भृशं, न, ईषुः। प्रेम, अपदे, अपि, भयानि, पश्यति ॥ ७० ॥

मा गमन्निति ॥ शङ्कितनाथा अविश्वस्तपुरुषा योषितो मदेन विमूढधियः स्तब्धबुद्धयो नोऽस्मान्प्रोज्झ्य विसृज्य। प्रपूर्वादुज्झतेः 'समासेऽनञ्पूर्वे क्त्वो ल्यप्'। रन्तुं मा गमन् गच्छन्त्विति मनीषयेति शेषः। गमेर्माङि लुङ्। 'न माङ्योगे' इत्यडागमप्रतिषेधः। मदिरां भृशमतिमात्रं नेषुर्नैच्छन्ति स्म। किन्तु भर्तृवियोगभयादीषदेव पपुरित्यर्थः। तथाहि। प्रेम स्नेहोऽपदेऽस्थानेऽपि भयान्यनिष्टानि पश्यत्युत्प्रेक्षते। शङ्कत इति यावत्। शङ्काहेतौ प्रेम्णि कर्तृत्वोपचारः ॥ ७० ॥

चित्तनिर्वृतिविधायि विविक्तं मन्मथो मधुमदः शशिभासः।
सङ्गमश्च दयितैः स्म नयन्ति प्रेम कामपि भुवं प्रमदानाम् ॥७१॥

अन्वयः—चित्तनिर्वृतिविधायि, विविक्तं, मन्मथः, मधुमदः, शशिभासः, दयितैः, सङ्गमः, च, प्रमदानां, प्रेम, काम् अपि, भुवं, नयन्ति स्म ॥ ७१ ॥

चित्तेति ॥ चित्तस्य निर्वृतिविधायि सुखकरं विविक्तं रहः। 'विविक्तं रहसि स्मृतम्' इति विश्वः। मन्मथो मधुमदो मद्यमदः शशिभासश्चन्द्रिका दयितैः सह संगमश्च। 'वृद्धो यूना-' इति निर्देशात्सहशब्दाप्रयोगेऽपि सहार्थे तृतीया। एतानि प्रमदानां स्त्रीणां प्रेम वियोगासहत्वावस्थापन्नभोगं कामपि भुवं काञ्चिद्दशां नयन्ति स्म। रत्यवस्थामप्यतिक्रम्य शृङ्गारावस्थां क्रीडामयीं निन्युरित्यर्थः। 'प्रेमाभिलाषो रागश्च स्नेहः प्रेमरतिस्तथा। शृङ्गारश्चेति सम्भोगः सप्तावस्थः प्रकीर्तितः ॥' इत्युक्तं रसरत्नाकरे। 'प्रेमा दिदृक्षा रम्येषु तच्चिन्ता त्वभिलाषकः। रागस्तत्सङ्गबुद्धिः स्यात्स्नेहस्तत्प्रवणक्रिया। तद्वियोगासहं प्रेम रतिस्तत्सहवर्तनम्। शृङ्गारस्तत्समं क्रीडा सम्भोगः सप्तधा क्रमः ॥' इति ॥ ७१ ॥

कोकाहल्यामाह—

धाष्टर्यलङ्घितयथोचितभूमौ निर्दयं विलुलितालकमाल्ये।
मानिनीरतिविधौ कुसुमेषुर्मत्तमत्त इव विभ्रममाप॥ ७२॥

अन्वयः—धाष्टर्यलङ्घितयथोचितभूमौ, निर्दयं, विलुलितालकमाल्ये, मानिनीरतिविधौ, कुसुमेषुः, मत्तमत्तः, इव, विभ्रमम्, आप॥ ७२॥

धाष्टर्येति॥ धाष्टर्येन प्रागल्भ्येन लङ्घितातिक्रान्ता यथोचिता योग्या भूमिर्मर्यादा यस्मिंस्तथोक्ते। चुम्बनताडनमणितसीत्कारपुरुषायितादौ स्वयमुच्छृङ्खलवृत्तिरिति भावः। निर्दयं यथा तथा विलुलितान्याकर्षणाकुलितान्यलका माल्यानि च यस्मिंस्तस्मिन्मानिनीरतिविधौ सुरते कुसुमेषुः कामो मत्तमत्तो मत्तप्रकार इव विभ्रमं विजृम्भणमाप प्राप। मत्तः किं न करोतीति भावः। कारयितरि कर्तृत्वोपचारादुत्प्रेक्षा॥७२॥

शीधुपानविधुरेषु वधूनां निघ्नतामुपगतेषु वपुःषु।
ईहितं रतिरसाहितभावं वीतलक्ष्यमपि कामिषु रेजे॥७३॥

अन्वयः— शीधुपानविधुरेषु, वपुःषु, निघ्नताम्, उपगतेषु, वधूनां, रतिरसाहितभावम्, कामिषु, ईहितं, वीतलक्ष्यम्, अपि, रेजे॥ ७३॥

शीध्विति॥ शीधुपानेन मद्यपानेन विधुरेषु विह्वलेषु। 'मैरेयमासव. शीधुः' इत्यमर। अत एव वपुःष्वङ्गेषु निघ्नतां प्रियपराधीनतामुपगतेषु सत्सु। 'अधीनो निघ्न आयत्तः' इत्यमर.। वधूना सम्बन्धिनि रतिरसेसुरतरसास्वाद आहितभावं दत्तचित्तं कामिषु विषय ईहितं चुम्बनताडनादिचेष्टितं वीतलक्ष्यं निर्विषयम्। अस्थानकृतमपीत्यर्थः। रेजे। रागिणां स्खलितमपि शोभत इति भावः॥ ७३॥

अन्योन्यरक्तमनसामथ बिभ्रतीनां
चेतोभुवो हरिसखाप्सरसां निदेशम्।
वैबोधिकध्वनिविभावितपश्चिमार्धा
सा संहृतेव परिवृत्तिमियाय रात्रिः॥ ७४॥

अन्वयः—अथ, हरिसखाप्सरसाम्, च, अन्योन्यरक्तमनसां, चेतोभुवः, निदेशं, बिभ्रतीनां, वैबोधिकध्वनिविभावितपश्चिमार्धा, सा, रात्रिः, संहृता, इव, परिवृत्तिम्, इयाय॥ ७४॥

अन्योन्येति॥ अथ हरिसखा इन्द्रसचिवा गन्धर्वास्तेषामप्सरसां चान्योन्यरक्तमनसां परस्परानुरक्तचित्तानां चेतोभुवः कामस्य निदेशमाज्ञां बिभ्रतीनां स्मरविधेयानाम्। तासु रममाणस्येवेत्यर्थः। 'षष्ठी चानादरे' इति षष्ठी। विबोधः प्रबोधनं शील-

मेषां ते वैबोधिका वैतालिकाः। 'शीलम्' इति ठक्। तेषां ध्वनिभिर्मङ्गलरवैर्विभावितोऽभ्यूहितो ज्ञातः पश्चिमार्धश्चरमभागो यस्याः सा तथोक्ता सा रात्रिः मङ्क्षु संक्षिप्तेवेत्युत्प्रेक्षा। सुखिनां भूयानपि कालो लघीयानिव भवतीति भावः। परिवृत्ति विवृत्तिमियाय। प्रभातकल्पाभूदित्यर्थः॥ ७४॥

निद्राविनोदितनितान्तरतिक्रमाना-
मायामिमङ्गलनिनादविबोधितानाम्।
रामासु भाविविरहाकुलितासु यूनां
तत्पूर्वतामिव समादधिरे रतानि॥ ७५॥

अन्वयः—निद्राविनोदितनितान्तरतिक्रमानाम्, आयामिमङ्गलनिनादविबोधितानाम्, यूनां, रामासु, भाविविरहाकुलितासु, रतानि तत्पूर्वताम्, समादधिरे, इव॥७५॥

निद्रेति॥ निद्रया विनोदितोऽपनीतो नितान्तमत्यर्थं यो रत्याः क्रमः स येषां तेषामायामिभिरायामवद्भिर्दीर्घैर्मङ्गलनिनादैर्वैबोधिकध्वनिभिर्विबोधितानां यूनां रामासु। 'सुन्दरी रमणी रामा' इत्यमरः। भाविविरहेणाकुलितासु सतीषु रतानि तान्येव पूर्वाणि प्रथमानि तत्पूर्वाणि तेषां भावस्तत्पूर्वता ताम्। भावे तल्प्रत्ययः। समादधिरे प्रापुरिवेत्युत्प्रेक्षा। आद्यसुरतवदादरात्प्रवर्तन्त इत्यर्थः। यदुत्तरकाले दुर्लभं तदतितृष्णयानुभूयत इत्यर्थः॥ ७५॥

कान्ताजनं सुरतखेदनिमीलिताक्षं
सम्वाहितुं समुपयानिव मन्दमन्दम्।
हर्म्येषु माल्यमदिरापरिभोगगन्धा-
नाविश्चकार रजनीपरिवृत्तिवायुः॥ ७६॥

अन्वतः—सुरतखेदनिमीलताक्षं, कान्ताजनं, संवाहितुम्, इव, मन्दमन्दं, समुपयान्, रजनीपरिवृत्तिवायुः, हर्म्येषु, माल्यमदिरापरिभोगगन्धान्, आविश्चकार॥७६॥

कान्तेति॥ सुरतखेदेन निमीलितान्यक्षीणि येन तं कान्ताजनं स्त्रीसमूहं संवाहितुं सेवितुमिव। खेदापनोदार्थमङ्गमर्दनं कर्तुमिवेत्यर्थः। 'संवाहनं वाहनेऽपि नरादेरङ्गमर्दने' इति विश्वः। 'वाहृ प्रयत्ने' इति धातोरण्यन्तात्तुमुन्। अन्यथा णिज्ग्रहणे संवाहयितुमिति स्यात्। मन्दमन्दं मन्दप्रकारम्। 'प्रकारे गुणवचनस्य' इति द्विर्भावे कर्मधारयवद्भावात्सुपो लुक्। समुपयान्संवान्रजनीपरिवृत्तिवायुर्निशावसानमरुत्। हर्म्येषु माल्यानि च मदिरा च परिभोगो विमर्दश्च तेषां गन्धानाविश्चकार। बहिः प्रका-

श्यामासेत्यर्थः । अत्र संवाहितुमिवेत्युत्प्रेक्षा । मान्द्यगुणमूलत्वाद्गुणनिमित्तक्रियाफलोत्प्रेक्षा ॥ ७६ ॥

आमोदवासितचलाधरपल्लवेषु
निद्राकषायितविपाटललोचनेषु ।
व्यामृष्टपत्रतिलकेषु विलासिनीनां
शोभां बबन्ध वदनेषु मदावशेषः ॥ ७७ ॥

अन्वयः—आमोदवासितचलाधरपल्लवेषु, निद्राकषायितविपाटललोचनेषु, व्यामृष्टपत्रतिलकेषु, विलासिनीनाम्, वदनेषु, मदावशेषः, शोभां, बबन्ध ॥ ७७ ॥

आमोदेति ॥ आमोदेन मद्यगन्धेन वासिताः सुरभिताश्चला दष्टमुक्तत्वात्स्फुरन्तश्चाधरपल्लवा येषु तेषु निद्रया कषायितान्यपटूकृतानि विपाटलानि लोचनानि येषु तेषु। 'कषायस्तुवरे न स्त्री निर्यासे रञ्जकादिके । सुरभावपटौ रक्ते सुन्दरे लवणेऽपि च' इति केशवः । व्यामृष्टानि प्रमृष्टानि पत्त्राणि तिलकाश्च येषां तेषु विलासिनीनां वदनेषु मदावशेषः शोभां बबन्ध । मण्डनान्तरापाये मदशेष एव मण्डनं बभूवेत्यर्थः । स्त्रीणां मद एव विभूषणमिति भावः ॥ ७७ ॥

गतवति नखलेखालक्ष्यतामङ्गरागे
समददयितपीताताम्रबिम्बाधराणाम् ।
विरहविधुरमिष्टासत्सखीवाङ्गनानां
हृदयमवललम्बे रात्रिसम्भोगलक्ष्मीः ॥ ७८ ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये नवमः सर्गः ।

अन्वयः—अङ्गरागे, नखलेखालक्ष्यताम्, गतवति, (सति), समददयितपीताताम्रबिम्बाधराणाम्, अङ्गनानाम्, विरहविधुरम्, हृदयम्, रात्रिसम्भोगलक्ष्मीः, इष्टा, सत्सखी, इव, अवललम्बे ॥ ७८ ॥

गतवतीति ॥ अङ्गरागेऽङ्गविलेपने नखलेखासु नखपदेषु लक्ष्यतां दृश्यतां गतवति सति । विमर्दात्तन्मात्रावशेषे सतीत्यर्थः। किञ्च बिम्बतुल्या अधरा बिम्बाधराः। 'शाकपार्थिवादित्वान्मध्यमपदलोपीसमानाधिकरणसमासः' इति वामनः । समदैर्दयितैः पीताः पीडिता अत एवातिपीडनादाताम्रा आसमन्ताद्रक्ता बिम्बाधरा यासां तासामङ्गनानां सम्बन्धि विरहेणाह्निकेन वियोगेन विधुरं विह्वलं हृदयम्। रात्रिसम्भोग-

लक्ष्मीः । नखपदादिशोभेत्यर्थः । इहाप्ता स्वसखीव निपुणसहचरीवावलम्बे धारयामास । प्रियसम्भोगचिह्नशोभा स्पष्टा बभूवेत्यर्थः । प्रियोपभोगचिह्नशोभावलोकनलालसाः कथं विरहमसहन्तेत्यर्थः । श्रुतिपूर्णोपमालङ्कारः । मालिनीवृत्तम् । लक्षणं तूक्तम् ७८

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां नवमः सर्गः समाप्तः ॥

दशमः सर्गः ।

अथागन्तुकसहजशोभासम्पन्नतया समग्रसाधनाः स्त्रियो मुनिमनःप्रलोभनार्थं प्रास्थन्नित्याह—

अथ परिमलजामवाप्य लक्ष्मीमवयवदीपितमण्डनश्रियस्ताः ।
वसतिमभिविहाय रम्यहावाः सुरपतिसूनुविलोभनाय जग्मुः ॥१॥

अन्वयः—अथ, परिमलजां, लक्ष्मीं, अवाप्य, अवयवदीपितमण्डनश्रियः, रम्यहावाः, ताः, वसतिम् , अभिविहाय, सुरपतिसूनुविलोभनाय, जग्मुः ॥ १ ॥

अथेति ॥ अथ प्रभाते परिमलजां सम्भोगसम्भृतां लक्ष्मीं शोभामवाप्य । 'सम्भोगः स्यात्परिमले' इति वैजयन्ती । सम्भोगात्स्त्रियः शोभन्त इति भावः । एतेनागन्तुकशोभासम्पत्तिरुक्ता । अत एव सुरतादिवर्णनस्य प्रस्तुतोपयोगित्वं चोक्तम् । अथ सहजशोभासम्पत्तिमाह—अवयवेति । अवयवैः स्तनादिभिर्दीपिता मण्डिता च मण्डनश्रीः प्रसाधनशोभा याभिस्ताः । रम्यहावा मनोहरविलासास्ताः स्त्रियः । 'हावो विलासश्चेष्टायाम्' इति विश्वः । वसतिं शिबिरमभिविहाय सर्वतस्त्यक्त्वा सुरपतिसूनोरर्जुनस्य विलोभनाय जग्मुः । अत्रावयवदीपकतया प्रसिद्धस्य मण्डनस्य तद्दीप्यत्वासम्बन्धेऽपि सम्बन्धाभिधानादवयवसौन्दर्यातिशयद्योतनार्थत्वादतिशयोक्तिरलङ्कारः । अस्मिन्सर्गे पुष्पिताग्रावृत्तम्—'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा' इति लक्षणात् ॥ १ ॥

द्रुतपदमभियातुमिच्छतीनां गगनपरिक्रमलाघवेन तासाम् ।
अवनिषु चरणैः पृथुस्तनीनामलघुनितम्बतया चिरं निषेदे ॥२॥

अन्वयः—गगनपरिक्रमलाघवेन, द्रुतपदम् , अभियातुम् , इच्छतीनाम् , पृथुस्तनीनां, तासाम् , अलघुनितम्बतया, चरणैः, अवनिषु, चिरं, निषेदे ॥ २ ॥

द्रुतेति ॥ गगनपरिक्रमलाघवेन गगनगमनवेगेन द्रुतपदं यथा तथाभियातुं गन्तु-

मिच्छतीनाम् । किञ्च । पृथुस्तनीनां तासामप्यस्साम् । किञ्च अलघुनितम्बतया न लघवो नितम्बा यासां तासां भावस्तत्ता तया स्थूलनितम्बतया चरणैश्चनिभु चिरं विदेषे स्थितम् । अभ्यासपाटवेन मनसा त्वरमाणानामपि तासां स्तनजघनभारा- क्रान्ता नोत्तस्थुरित्यर्थः ॥ २ ॥

निहितसरसयावकैर्बभासे चरणतलैः कृतपद्धतिर्वधूनाम् ।
अविरलविततेव शक्रगोपैररुणितनीलतृणोलपा धरित्री ॥ ३ ॥

अन्वयः—निहितसरसयावकैः, वधूनां चरणतलैः, कृतपद्धतिः, (अत एव) अरुणितनीलतृणोलपा, धरित्री, शक्रगोपैः, अविरलविततेव, बभासे ॥ ३ ॥

निहितेति ॥ निहिता आरोपिताः सरसयावकाः सान्द्रलाक्षारागा येषु तैर्वधूनां चरणतलैश्चरणन्यासैः कृतपद्धतिः कृतमार्गरेखा । अत एवारुणिता अरुणीकृता नीला- स्तृणोलपास्तृणानि दूर्वादीन्युलपा बल्वजाख्यास्तृणविशेषाश्च यस्याः सा । 'उलपा बल्वजाः प्रोक्ता.' इति हलायुधः । 'उलपा उशीरतृणानि' इति क्षीरस्वामी । ब्राह्मण- परिव्राजकवदुलपानां पृथङ्निर्देशः । धरित्री शक्रगोपैरिन्द्रगोपाख्यैः कीटकैः । 'इन्द्र- गोपस्त्वग्निरजः' इति हैमः । अविरलं निरन्तरं यथा तथा वितता व्याप्तेवेत्यु- त्प्रेक्षा । बभासे ॥ ३ ॥

धवनिरगविवरेषु नूपुराणां पृथुरशनागुणशिञ्जितानुयातः ।
प्रतिरवविततो वनानि चक्रे मुखरसमुत्सुकहंससारसानि ॥ ४ ॥

अन्वयः—अगविवरेषु, प्रतिरवविततः, पृथुरशनागुणशिञ्जितानुयातः, नूपुराणां, ध्वनिः, वनानि, मुखरसमुत्सुकहंससारसानि, चक्रे ॥ ४ ॥

ध्वनिरिति ॥ अगविवरेषु नगरन्ध्रेषु । गुहास्वित्यर्थः । प्रतिरवैः प्रतिध्वनिभिर्वि- ततः संमूर्च्छितः पृथुभी रशनागुणानां शिञ्जितैः स्वनितैरनुयातोऽनुगतः । मिलित इति यावत् । 'स्वनिते वस्त्रपर्णानां भूषणानां तु शिञ्जितम्' इत्यमरः । नूपुराणां ध्व- निभिर्ध्वनैर्वनानि मुखराः शब्दायमानाः समुत्सुका उत्कण्ठिता हंसाः सारसाश्च येषां तानि चक्रे । अत्र हंसादिषु मुखरसमुत्सुकीकरणरूपेण वस्तुना तेषां नूपुरादिध्वनौ सा- दृश्याद्धंससारसान्तरकूजितभ्रान्तिप्रतीतेर्भ्रान्तिमदलङ्कारो व्यज्यते ॥ ४ ॥

अवचयपरिभोगवन्ति हिंस्रैः सहचरितान्यमृगाणि काननानि ।
अभिदधुरभितो मुनिं वधूभ्यः समुदितसाध्वसविक्लवं च चेतः ॥ ५ ॥

अन्वयः—अवचयपरिभोगवन्ति, हिंस्रैः, सहचरितान्यमृगाणि, काननानि, (तथा) समुदितसाध्वसविक्लवं, चेतश्च, वधूभ्यः, अभितः, मुनिम्, अभिदधुः ॥ ५ ॥

अवचयेति ॥ अवचयः पुष्पफलादिच्छेदनं परिभोग उपभोगस्तद्वन्ति । हिंस्रा घातुका व्याघ्रादयः । 'शरारुर्घातुको हिंस्रः' इत्यमरः । तैः सचरिताः सहचरन्तः । कर्तरि क्तः । 'मतिबुद्धि-' इत्यादिसूत्रेण चकारात्सुप्तशयितादिवद्वर्तमानार्थता । अन्ये हिंस्रेतरे मृगा हरिणादयो येषु तानि सहचरिन्तान्यमृगाणि काननानि । तथा समुदितेन साध्वसेन विक्लवं विवशं चेतश्च वधूभ्यः । 'क्रियाग्रहणमपि कर्तव्यम्' इति सम्प्रदानत्वाच्चतुर्थी । अभितो मुनिमभिदधुः । आसन्नं सूचयामासुरित्यर्थः । अवचयादिलिङ्गचतुष्टयेनासन्नो मुनिरित्यन्वमीयतेत्यर्थः ॥ ५ ॥

नृपतिमुनिपरिग्रहेण सा भूः सुरसचिवाप्सरसां जहार तेजः ।
उपहितपरमप्रभावधाम्नां न हि जयिनां तपसामलङ्घ्यमस्ति ॥६॥

अन्वयः—सा, भूः, नृपतिमुनिपरिग्रहेण, सुरसचिवाप्सरसां, तेजः, जहार । हि, उपहितपरमप्रभावधाम्नां, जयिनां, तपसाम्, अलङ्घ्यं, नास्ति ॥ ६ ॥

नृपतिमुनिपरिग्रहेणेति ॥ सा भूर्नृपतिरेव मुनिस्तस्य परिग्रहेणाधिष्ठानेन हेतुना सुरसचिवानां गन्धर्वाणामप्सरसां च तेजो जहार तदाश्रमप्रवेशादेव निस्तेजस्का अभूवन्नित्यर्थः । ननु कथं मानुषेण तेजसामानुषं तेजो निरस्तमित्याशङ्क्याह—हि यस्मादुपहित आहिते परमे प्रभावधाम्नी सामर्थ्यतेजसी येषां तेषां जयिनां जयनशीलानाम् । 'महताम्' इति पाठे महतामुत्कटानाम् । तपसामलङ्घ्यं नास्ति किमप्यसाध्यं नास्तीति भावः ॥ ६ ॥

सचकितमिव विस्मयाकुलाभिः शुचिसिकतास्वतिमानुषाणि ताभिः ।
क्षितिषु ददृशिरे पदानि जिष्णोरुपहितकेतुरथाङ्गलाञ्छनानि ॥७॥

अन्वयः—विस्मयाकुलाभिः, ताभिः, शुचिसिकतासु, क्षितिषु, उपहितकेतुरथाङ्गलाञ्छनानि, (अत एव) अतिमानुषाणि, जिष्णोः, पदानि, सचकितमिव, ददृशिरे॥७॥

सचकितमिति ॥ विस्मयाकुलाभिस्ताभिः, स्त्रीभिः कर्त्रीभिः शुचयः सिकता यासु तासु । पादरेखाभिव्यक्तियोग्यास्वित्यर्थः । क्षितिषूपहितानि विन्यस्तानि केतुरथाङ्गलाञ्छनानि रेखास्वरूपध्वजचक्राण्येव चिह्नानि येषु तान्यत एवातिमानुषाणि जिष्णोरर्जुनस्य पदानि सचकितमिव सभयमिव यथा तथा ददृशिरे दृष्टानि । अद्भुतवस्तुदर्शनाद्भयविस्मयौ भवत इति भावः ॥ ७ ॥

अतिशयितवनान्तरद्युतीनां फलकुसुमावचयेऽपि तद्विधानाम् ।
ऋतुरिव तरुवीरुधां समृद्ध्या युवतिजनैर्जगृहे मुनिप्रभावः ॥ ८ ॥

अन्वयः—अतिशयितवनान्तरद्युतीनां, फलकुसुमावचये, अपि, तद्विधानाम्, तरुवीरुधां, समृद्ध्या, युवतिजनैः, मुनिप्रभावः, ऋतुरिव, जगृहे ॥ ८ ॥

अतिशयितेति ॥ अतिशयिता तिक्रान्ता वनान्तराणां द्युतिर्याभिस्तासाम्। कुतः। फलानां कुसुमानां चावचयेऽपि लवनेऽपि सैव विधा प्रकारो यासां तद्विधानाम्। तथैव समग्राणामित्यर्थः। तरूणां वीरुधां च समृद्धया लिङ्गेन युवतिजनैर्मुनिप्रभावो ऋतुरिव जगृहे निश्चितः। कारणतयेति शेषः। उपमालङ्कारः ॥ ८ ॥

मृदितकिसलयः सुराङ्गनानां ससलिलवल्कलभारभुग्नशाखः।
बहुमतिमधिकां ययावशोकः परिजनतापि गुणाय सद्गुणानाम् ॥९॥

अन्वयः—ससलिलवल्कलभारभुग्नशाखः, (अत एव) मृदितकिसलयः, अशोकः, सुराङ्गनानाम्, अधिकां, बहुमतिं, ययौ। सद्गुणानाम्, परिजनतापि, गुणाय, भवति ॥९॥

मृदितेति ॥ ससलिलमार्द्रं यद्वल्कलं तदेव भारस्तेन भुग्नशाखो नम्रशाखः 'वल्कं वल्कलमस्त्रियाम्' इत्यमरः। अत एव मृदितकिसलयो विलुलितपल्लवः। 'क्वचिन्न' इति प्रतिषेधान्न मृदेर्गुणः। अशोको वृक्षविशेषः सुराङ्गनानामप्सरसां सम्बन्धिनीमधिकां बहुमतिं तत्कर्तृकसम्मानं सज्जनसेवो धन्योऽयमिति ययौ प्राप। ननु सेवकेषु का श्लाघेत्यत्राह—परीति। सद्गुणानां महतां परिजनताप्यनुचरत्वमपि। भावे तल्। गुणायोत्कर्षाय। भवतीति शेषः। एतेन तासां मुनेः प्रभावदर्शनादेव तत्पारवश्यं गम्यते ॥ ९ ॥

यमनियमकृशीकृतस्थिराङ्गः परिददृशे विधृतायुधः स ताभिः।
अनुपमशमदीप्ततागरीयान्कृतपदपङ्क्तिरथर्वणेव वेदः ॥ १० ॥

अन्वयः—यमनियमकृशीकृतस्थिराङ्गः, विधृतायुधः, सः, अनुपमशमदीप्ततागरीयान्, अथर्वणा, कृतपदपङ्क्तिः, इव, ताभिः, परिददृशे ॥ १० ॥

यमेति ॥ यमो देशकालाद्यनपेक्षया शुद्धिहेतुरहिंसादिः, नियमस्तदपेक्षया शुद्धिहेतुस्तपःस्वाध्यायादिः। ताभ्यां कृशीकृतान्यपि स्थिराणि दृढान्यङ्गानि यस्य सः। विधृतायुधो धृतशस्त्रोऽत एव तपःक्षात्रयुक्तः सोऽर्जुनः शमः शान्तिरभ्युदयकाण्डे दीप्ततोग्रताभिचारकाण्डे ताभ्यामनुपमाभ्यां गरीयानुदग्रः। अथर्वणा वसिष्ठेन कृता रचिता पदानां पङ्क्तिरानुपूर्वी यस्य स वेदः। चतुर्थवेद इत्यर्थः। अथर्वणस्तु मन्त्रो वसिष्ठकृत इत्यागमः। स इव ताभिः स्त्रीभिः परिददृशे दृष्टः ॥ १० ॥

अथ चतुर्भिस्तमेव विशिनष्टि—

शशधर इव लोचनाभिरामैर्गगनविसारिभिरंशुभिः परीतः।
शिखरनिचयमेकसानुसद्मा सकलमिवापि दधन्महीधरस्य ॥११॥

अन्वयः—शशधर इव, लोचनाभिरामैः, गगनविसारिभिः, अंशुभिः, परीतः, एकसानुसद्मा, महीधरस्य, शिखरनिचयमपि, दधत् ॥ ११ ॥

शशधर इति ॥ शशधरश्चन्द्र इव लोचनाभिरामैर्नेत्राह्लादकैर्गगनविसारिभिरंशुभिस्तेजोभिः परितो व्याप्तोऽम्बरवदेकं सानु सद्म यस्य सः । एकदेशस्थोऽपीत्यर्थः । महीधरस्येन्द्रकीलस्य सकलं शिखरनिचयमपि दधदावृण्वन्निवेत्युत्प्रेक्षा ॥ ११ ॥

सुरसरिति परं तपोऽधिगच्छन्विधृतपिशङ्गबृहज्जटाकलापः ।
हविरिव विततः शिखासमूहैः समभिलषन्नुपवेदि जातवेदाः॥१२॥

अन्वयः—सुरसरित्, इति परं, तपः, अधिगच्छन्, विधृतपिशङ्गबृहज्जटाकलापः, (अत एव) उपवेदि, शिखासमूहैः, विततः, हविः, समभिलषन्, जातवेदाः, इव, (स्थितः) ॥ १२ ॥

सुरेति ॥ पुनः । सुरसरिति गङ्गाकूले परं तपोऽधिगच्छन्नर्जयन् । फलाभिलाषेणेति शेषः । हविः समभिलषन्नित्युपमानविशेषणसामर्थ्यात् । तथा विधृतः पिशङ्गबृहज्जटाकलापो येन सः । अत एवोपवेदि वेद्याम् । विभक्त्यर्थेऽव्ययीभाव. । शिखासमूहैर्ज्वालाजालैर्विततो विस्तृतो हविराज्यादिकं समभिलषन् । जातं वेदो हिरण्यं यस्मादिति जातवेदा वह्निरिव स्थितः ॥ १२ ॥

सदृशमतनुमाकृतेः प्रयत्नं तदनुगुणामपरैः क्रियामलङ्घ्याम् ।
दधदलघु तपः क्रियानुरूपं विजयवतीं च तपःसमां समृद्धिम् ॥१३॥

अन्वयः—आकृतेः, सदृशम्, अतनुं प्रयत्नं, दधत्, तदनुगुणाम् अपरैः, अलङ्घ्यां क्रियाम्, दधत्, क्रियानुरूपम्, अलघु, तपः, दधत्, (तथा) विजयवतीं, (तपःक्रियानुरूपां) तपःसमां, समृद्धिं, दधत् ॥ १३ ॥

सदृशमिति ॥ पुनः । आकृतेर्वपुषः । 'आकृतिः कथिता रूपे सामान्यवपुषोरपि' इति विश्वः। सदृशं तुल्यमतनुं महान्तं प्रयत्नमुद्योगं दधत् । तथा तदनुगुणां प्रयत्नानुकूलामपरैरन्यैरलङ्घ्याम् । कर्तुमशक्यामित्यर्थः । क्रियां व्यापारं दधत् । तथा क्रियानुरूपं क्रियानुगुणमलघु गुरु तपो दधत् । तथा विजयवतीं सर्वोत्कर्षवतीं विजयफलां वा तपःक्रियानुरूपां तपःसमां समृद्धिमैश्वर्यं दधत् । अत्र पूर्वं प्रत्युत्तरस्य विशेषणतया स्थापनात्प्रथमैकावल्यलङ्कारः—'यथापूर्वं परस्य विशेषणतया स्थापन एकावली' इति सर्वस्वसूत्रात् ॥ १३ ॥

चिरनियमकृशोऽपि शैलसारः शमनिरतोऽपि दुरासदः प्रकृत्या ।
ससचिव इव निर्जनेऽपि तिष्ठन्मुनिरपि तुल्यरुचिस्त्रिलोकभर्तुः॥१४॥

अन्वयः—चिरनियमकृशः अपि, शैलसारः, शमनिरतः अपि, प्रकृत्या, दुरासदः, निर्जने, तिष्ठन् अपि, ससचिवः इव, मुनिरपि, त्रिलोकभर्तुः, तुल्यरुचिः ॥ १४ ॥

चिरनियमेति ॥ पुनश्च । चिरनियमेन दीर्घकालतपसा कृशः क्षीणाङ्गोऽपि शैलसार॰ । उपमानपूर्वपदो बहुव्रीहिः । शमे निरतोऽपि प्रकृत्या स्वभावेन दुरासदो दुर्धर्षो निर्जने विजने देशे तिष्ठन्नपि ससचिवः सपरिवार इव । किंच । मुनिरपि । ऐश्वर्यरहितोऽपीत्यर्थः । त्रयाणां लोकानां भर्तुरिन्द्रस्य । 'तद्धितार्थ—' इत्यादिनोत्तरपदसमासः । तुल्यरुचिः समानतेजाः । अपिशब्दः सर्वत्र विरोधद्योतनार्थः । स च मुनेरतर्क्यमहिमत्वेन निरस्त इति विरोधालङ्कारः—'विरोधाभासत्वं विरोधः' इति सूत्रात् ॥ १४ ॥

तनुमवजितलोकसारधाम्नीं त्रिभुवनगुप्तिसहां विलोकयन्त्यः ।
अवययुरमरस्त्रियोऽस्य यत्नं विजयफले विफलं तपोधिकारे ॥१५॥

अन्वयः—अवजितलोकसारधाम्नीं, त्रिभुवनगुप्तिसहां, तनुं, विलोकयन्त्यः, अमरस्त्रियः, विजयफले, तपोधिकारे, अस्य, यत्नं, विफलम्, अवययुः ॥ १५ ॥

तनुमिति ॥ अवजिते तिरस्कृते लोकानां सारधाम्नी सत्त्वतेजसी यया ताम् । 'अन उपधा—' इत्यादिना ङीप् । त्रयाणां भुवनानां समाहारस्त्रिभुवनम् । 'तद्धितार्थ—' इत्यादिना समाहारार्थे तत्पुरुषः । पात्रादित्वात्स्त्रीत्वप्रतिषेधः । तस्य गुप्तौ रक्षणे सहां समर्थाम् । पचाद्यच् । तनुं मूर्तिं विलोकयन्त्योऽमरस्त्रियोऽप्सरसो विजयफले विजयार्थे तपोधिकारे तपोनुष्ठानेऽस्यार्जुनस्य यत्नं विफलमवययुर्मेनिरे । त्रैलोक्याधिपत्यादिमहाफलसाधनसमर्थस्य तुच्छफलाभिलाषो मत्तमातङ्गमांसभोगोचितस्य कण्ठीरवस्य जीर्णतृणचर्वणोत्कण्ठेव न शोभामावहतीति भावः । अत्र विशिष्टतनुविलोकनस्य स्त्रीविशेषणत्वे फलयजननहेतुत्वोक्त्या पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ १५ ॥

मुनिदनुतनयान्विलोभ्य सद्यः प्रतनुबलान्यधितिष्ठतस्तपांसि ।
अलघुनि बहुमेनिरे च ताः स्वं कुलिशभृता विहितं पदे नियोगम् ॥१६॥

अन्वयः—प्रतनुबलानि, तपांसि, अधितिष्ठतः, मुनिदनुतनयान्, सद्यः, विलोभ्य, कुलिशभृता, अलघुनि, पदे, विहितं, स्वं, नियोगं, ताः, बहु, मेनिरे ॥ १६ ॥

मुनीति ॥ प्रतनुबलान्यनुत्कृष्टसाराणि तपांस्यधितिष्ठतोऽनुतिष्ठतो मुनीन्दनुतनयान्दानवांश्च सद्यस्तत्क्षणमेव विलोभ्याकृष्य चिरात्कुलिशभृता शक्रेणालघुनि महति पदे स्थाने विहितं दत्तं स्वं स्वकीयं नियोगमधिकारं ताः स्त्रियो बहु यथा तथा मेनिरे । निकृष्टपदवृत्तीनामुत्कृष्टपदलाभो महान् । बहुमानमूलमिति भावः । विलोभ्य मेनिरे इत्यन्वयः । यद्वा विलोभ्य लोभं कारयित्वा विहितं शक्रेणेत्यन्वयात्समानकर्तृत्वनिर्वाहः ॥ १६ ॥

अथ कृतकविलोभनं विधित्सौ युवतिजने हरिसूनुदर्शनेन ।
प्रसभमवततार चित्तजन्मा हरति मनो मधुरा हि यौवनश्रीः ॥१७॥

अन्वयः—अथ, कृतकविलोभनं, विधित्सौ, युवतिजने, हरिसूनुदर्शनेन, चित्तजन्मा, प्रसभम्, अवततार । हि, मधुरा, यौवनश्रीः, मनः, हरति ॥ १७ ॥

अथेति ॥ अथानन्तरं कृतकविलोभनं कृत्रिमं विलोभनं विधित्सौ विधातुमिच्छौ । विपूर्वाद्दधातेः सन्नन्तादुप्रत्ययः । युवतिजने हरिसूनोरर्जुनस्य दर्शनेन चित्तजन्मा कामः प्रसभं बलादवततार । दैवतत्परं वञ्चयितुमागतस्य मोहो भवति । यतः स्वयं मुनिवञ्चनप्रवृत्ताः स्त्रियस्तेन वञ्चिता इत्यर्थः । युक्तं चैतत् । हि यस्मान्मधुरा मनोहरा यौवनश्रीर्मनो हरति । बलादिति शेषः ॥ १७ ॥

सपदि हरिसखैर्वधूनिदेशाद्ध्वनितमनोरमवल्लकीमृदङ्गैः ।
युगपदृतुगणस्य सन्निधानं वियति वने च यथायथं वितेने ॥१८॥

अन्वयः—सपदि, वधूनिदेशाद्ध्वनितमनोरमवल्लकीमृदङ्गैः, हरिसखैः, वियति, वने, युगपत्, ऋतुगणस्य, सन्निधानं, यथायथम्, वितेने ॥ १८ ॥

सपदीति ॥ सपदि वधूनां निदेशान्नियोगाद्ध्वनिता नादिता मनोरमा वल्लक्यो वीणा मृदङ्गाश्च यैस्तैर्हरिसखैर्गन्धर्वैर्वियत्याकाशे वने च युगपदृतुगणस्यर्तुषट्कस्य सन्निधानमाविर्भावो यथायथं यथास्वम् । असङ्करेणेत्यर्थः । 'यथास्वं तु यथायथम्' इति निपातः । वितेने वितस्तरे । उद्दीपनसामग्री सम्पादितेत्यर्थः ॥ १८ ॥

अथ वर्षाक्रमेणर्तून्वर्णयति—सजलेत्यादि ॥

सजलजलधरं नभो विरेजे विवृतिमियाय रुचिस्तडिल्लतानाम् ।
व्यवहितरतिविग्रहैर्वितेने जलगुरुभिः स्तनितैर्दिगन्तरेषु ॥१९॥

अन्वयः—सजलजलधरं, नभः, विरेजे । तडिल्लतानां, रुचिः, विवृतिम् इयाय । व्यवहितरतिविग्रहैः, जलगुरुभिः, स्तनितैः, दिगन्तरेषु, वितेने ॥ १९ ॥

सजलेति ॥ सजला जलधरा यस्मिंस्तन्नभो विरेजे । तडितो लता इव तासां रुचिः प्रभा विवृतिं विजृम्भणमियाय । तथा व्यवहितरतिविग्रहैर्दूरीकृतरतिप्रकल्पितप्रणयकलहैर्जलगुरुभिः । जलभाराद्गम्भीरैरित्यर्थः । स्तनितैर्गर्जितैर्दिगन्तरेषु वितेने विततैरभावि । भावे लिट् । अकर्मकत्वं वैवक्षिकम् । अत एव दिगन्तरेष्वित्यधिकरणत्वेन प्रयोगः । अन्यथा कर्मत्वमेव स्यात् ॥ १९ ॥

परिसुरपतिसूनुधाम सद्यः समुपदधन्मुकुलानि मालतीनाम् ।
विरलमपजहार बद्धबिन्दुः सरजसतामवनेरपां निपातः ॥ २० ॥

अन्वयः—परि सुरपतिसूनुधाम, सद्यः, मालतीनां, मुकुलानि, समुपदधत्, विरलं, बद्धबिन्दुः, अपां, निपातः, अवनेः, सरजसताम्, अपजहार ॥ २० ॥

परीति ॥ परिसुरपतिसूनुधामार्जुनाश्रमं प्रति । परीति लक्षणार्थे कर्मप्रवचनीयस्य योगाद्द्वितीया । यद्वा वर्जनार्थस्य तस्यात्र विरोधाद्विभक्त्यर्थेऽव्ययीभावः । तथा च सुरपतिसूनुधाम्नीत्यर्थः । सद्यो मालतीनां जातीलतानाम् । 'सुमना मालती जातिः' इत्यमरः । मुकुलानि समुपदधज्जनयन्विरलं यथा तथा बद्धबिन्दुरपां निपातो वृष्टि-रवनेः सम्बन्धिनीं सरजसतां सरजस्कत्वम् । 'अचतुर-' इत्यादिसूत्रेण साकल्यार्थेऽव्ययीभावः । 'समासान्तनिपातश्च बहुव्रीह्यर्थस्तु लक्ष्यते । अव्ययीभावदर्शनं तु प्रायिकम्' इति केचित् । अपजहार । धूलिं शमयामासेत्यर्थः ॥ २० ॥

प्रतिदिशमभिगच्छताभिमृष्टः ककुभविकाससुगन्धिनानिलेन ।
नव इव विबभौ सचित्तजन्मा गतधृतिराकुलितश्च जीवलोकः ॥२१॥

अन्वयः—प्रतिदिशम्, अभिगच्छता, ककुभविकाससुगन्धिना, अनिलेन, अभिमृष्टः, (अत एव) सचित्तजन्मा, गतधृतिः, आकुलितश्च, रतिं, जीवलोकः, नव इव, विबभौ ॥ २१ ॥

प्रतिदिशमिति ॥ दिशि दिशि प्रतिदिशम् । यथार्थेऽव्ययीभाव. । शरत्प्रभृतित्वात्समासान्तनिपातः । अभिगच्छता संवाता ककुभान्यर्जुनकुसुमानि । 'इन्द्रद्रु. ककुभोऽर्जुनः' इत्यमरः । तेषां विकासेन सुगन्धिना मनोज्ञगन्धेन । गन्धस्येत्त्वे तदेकान्तग्रहणं प्रायिकम् । अनिलेनाभिमृष्टः संस्पृष्टोऽत एव सचित्तजन्मा । कामाक्रान्त इत्यर्थः । अत एव गतधृतिर्गतधैर्य आकुलितः क्षोभितश्च । रतिं प्रतीति भावः । एवंभूतो जीवलोको नव इवावस्थान्तरप्राप्त्यापूर्व इव विबभौ भाति स्मेत्युत्प्रेक्षा ॥२१॥

व्यथितमपि भृशं मनो हरन्ती परिणतजम्बुफलोपभोगहृष्टा ।
परभृतयुवतिः स्वनं वितेने नवनवयोजितकण्ठरागरम्यम् ॥२२॥

अन्वयः—व्यथितमपि, मनः, भृशं, हरन्ती । परिणतजम्बुफलोपभोगहृष्टा, (अत एव) परभृतयुवतिः, नवनवयोजितकण्ठरागरम्यं, स्वनं, वितेने ॥ २२ ॥

व्यथितमिति ॥ व्यथितं दुःखितमपि मनो भृशं हरन्ती । किमुत सुखितमिति भावः । जम्ब्वाः फलं जम्बु । 'बार्हतं च फले जम्ब्वाः जम्बूः स्त्री जम्बु जाम्बवम्' इत्यमरः । 'जम्ब्वा वा' इत्यणभावपक्षेऽपि 'फले लुक्' इति लुक् । 'लुक्तद्धितलुकि' इति स्त्रीप्रत्ययनिवृत्तिः । जम्बु च तत्फलं चेति सामान्यविशेषयोः सह निर्देशः । यद्वा जम्ब्वाः फलमिति विग्रहः । 'इको ह्रस्वोऽङ्यो गालवस्य' इति ह्रस्वः । तस्य परिणतस्योपभोगेन हृष्टा । अत एव परभृतयुवतिः कोकिलाङ्गना नवनवं नवं प्रकारं

यथा तथा योजितेन सम्पादितेन कण्ठरागेण कण्ठमाधुर्येण रम्यम् । सौम्यमित्यर्थः । स्वनं स्वरं वितेने । वर्षास्वपि मधुराः कोकिलालापा इति प्रसिद्धिः ॥ २२ ॥

अभिभवति मनः कदम्बवायौ मदमधुरे च शिखण्डिनां निनादे ।
जन इव न धृतेश्चचाल जिष्णुर्न हि महतां सुकरः समाधिभङ्गः॥२३॥

अन्वयः—कदम्बवायौ, मदमधुरे, शिखण्डिनां, निनादे, च, मनः, अभिभवति सति, जिष्णुः, जन इव, धृतेः न चचाल । हि, महतां, समाधिभङ्गः, न सुकरः ॥ २३ ॥

अभिभवतीति ॥ कदम्बवायौ कदम्बसम्बन्धिनि मारुते मदमधुरे शिखण्डिनां निनादे च मनोऽभिभवत्यभिहरति सति जिष्णुर्जयनशीलोऽर्जुनो जनः पृथग्जन इव धृतेर्धैर्यान्न चचाल । वर्षा अपि तदुद्दीपनाय न शेकुरित्यर्थः । हि यस्मान्महतां समाधिभङ्गो न सुकरः । न केनापि कर्तुं शक्यत इत्यर्थः ॥ २३ ॥

धृतबिसवलयावलिर्वहन्ती कुमुदवनैकदुकूलमात्तबाणा ।
शरदमलतले सरोजपाणौ घनसमयेन वधूरिवाललम्बे ॥ २४ ॥

अन्वयः—धृतबिसवलयावलिः, कुमुदवनैकदुकूलम्, आत्तबाणा, शरद्, वधूः इव घनसमयेन, अमलतले, सरोजपाणौ इव, आललम्बे ॥ २४ ॥

धृतेति ॥ बिसानि वलयानीव तेषामावलिर्धृता यया सा । कुमुदवनमेकं मुख्यं दुकूलमिव तद्वहन्ती । आत्ता गृहीता बाणा नीलझिण्टी यया सात्तबाणा, धृतशरा च । 'गृह्णीयात्क्षत्रिया शरम्' इति स्मरणात् । 'बाणो का नीलझिण्टी च' इति वैजयन्ती । शरद्वधूर्जायेव घनसमयेन वर्षर्तुना । वरेणेति शेषः । अमलतले निर्मलतले सरोजे पाणाविव तस्मिन्नाललम्बे जगृहे । कर्मणि लिट् । वधूवरसमागमवदतुसन्धिरशोभतेत्यर्थः । अत्र 'आत्तबाणा' इति झिण्टीशरयोर्बाणयोरभेदाध्यवसायाच्छ्लेषमूलातिशयोक्तिरुपमाङ्गमित्यनयोः सङ्करः ॥ २४ ॥

अथर्तुसन्धिं वर्णयति—

समदशिखिरुतानि हंसनादैः कुमुदवनानि कदम्बपुष्पवृष्ट्या ।
श्रियमतिशयिनीं समेत्य जग्मुर्गुणमहतां महते गुणाय योगः॥२५॥

अन्वयः—समदशिखिरुतानि, हंसनादैः, समेत्य, कुमुदवनानि, कदम्बपुष्पवृष्ट्या, समेत्य, अतिशयिनीं, श्रियं, जग्मुः हि गुणमहतां, योगः, महते, गुणाय, भवति ॥२५॥

समदेति ॥ समदशिखिरुतानि मत्तमयूरकूजितानि हंसनादैः समेत्य तथा कुमुदवनानि कदम्बपुष्पवृष्ट्या कदम्बपुष्पसम्पदा समेत्यातिशयिनीमतिशयवतीं श्रियं जग्मुः। तथा हि । गुणमहतां गुणाधिकानां योगः परस्परसमागमो महते गुणायोत्कर्षाय ।

अवतीति शेषः। अत्र त्रिपाद्यां समालङ्कारः—'सा समालङ्कृतिर्योग्यवस्तुनोरुभयोरपि' इति लक्षणात्। सोऽपि चतुर्थेनार्थान्तरन्यासेन स्वसमर्थकेनाङ्गाङ्गिभावेन सङ्कीर्यते ॥ २५ ॥

सरजसमपहाय केतकीनां प्रसवमुपान्तिकनीपरेणुकीर्णम् ।
प्रियमधुरसनानि षट्पदाली मलिनयति स्म विनीलबन्धनानि॥२६॥

अन्वयः—प्रियमधुरसनानि, षट्पदाली:, उपान्तिकनीपरेणुकीर्णं, सरजसं, केतकीनां, प्रसवम्, अपहाय, विनीलबन्धनानि, मलिनयति स्म ॥ २६ ॥

सरजसमिति ॥ प्रियमधुरिष्टमकरन्दा। नात्र कप्समासान्तः। 'पुंलिङ्गोत्तरपदो बहुव्रीहिः' इति केचित्। नपुंसकलिङ्गस्यैव मधुशब्दस्यार्धर्चादिषु पाठात् 'मकरन्दस्य मद्यस्य माक्षिकस्यापि वाचकः। अर्धर्चादिगणे पाठात्पुंनपुंसकयोर्मधुः' ॥ इत्यभिधानात्। षट्पदाली षट्पदावलिरुपान्तिके यानि नीपानि कदम्बकुसुमानि तेषां रेणुभिः परागैः कीर्णं व्याप्तम्। किं च स्वतोऽपि सह रजसा सरजसम्। न त्वरजस्कमिति भावः। साकल्येऽव्ययीभावः। 'अचतुर-' इत्यादिना निपातः। केतकीनां प्रसवं पुष्पमपहाय विनीलबन्धनानि,नीलवृन्तान्यसनानि प्रियकपुष्पाणि। मकरन्दभरितानीति भावः। 'सर्जकासनबन्धूकपुष्पप्रियकजीवकाः' इत्यमरः। मलिनयति स्म। यथा वृन्तादन्यत्रापि मालिन्यं स्यात्तथा मधुलोभाच्छादयामासेत्यर्थः। नहि मध्वासक्तो मधुलाभे विभूतिष्वासज्जतीति भावः ॥ २६ ॥

मुकुलितमतिशय्य बन्धुजीवं धृतजलबिन्दुषु शाद्वलस्थलीषु ।
अविरलवपुषः सुरेन्द्रगोपा विकचपलाशचयश्रियं समीयुः॥२७॥

अन्वयः—धृतजलबिन्दुषु, शाद्वलस्थलीषु, अविरलवपुषः, सुरेन्द्रगोपाः, मुकुलितं बन्धुजीवम्, अतिशय्य, विकचपलाशचयश्रियं, समीयुः ॥ २७ ॥

मुकुलितमिति ॥ धृता जलबिन्दवो यासु तासु शाद्वलस्थलीषु शादहरितप्रदेशेष्वविरलवपुषः स्थूलमूर्तयः सुरेन्द्रगोपाः कीटकविशेषा मुकुलितं मुकुलीकृतं बन्धुजीवम्। बन्धुजीवकमुकुलमित्यर्थः। 'बन्धूको बन्धुजीवकः' इत्यमरः। अतिशय्यातिक्रम्य विकचपलाशचयां विकसितकिंशुकराशिः। 'पलाशे किंशुकः पर्णः' इत्यमरः। तस्य श्रियम्। तत्सदृशीं श्रियमित्यर्थः। अत एव निदर्शनालङ्कारः। समीयुः प्रापुः ॥ २७ ॥

अथ हेमन्तवर्णनमाह—

अविरलफलिनीवनप्रसूनः कुसुमितकुन्दसुगन्धिगन्धवाहः ।
गुणमसमयजं चिराय लेभे विरलतुषारकणस्तुषारकालः॥२८॥

अन्वयः—अविरलफलिनीवनप्रसूनः, कुसुमितकुन्दसुगन्धिगन्धवाहः, विरलतुषारकणः, तुषारकालः, चिराय, असमयजं, गुणम्, लेभे ॥ २८ ॥

अविरलेति ॥ अविरलानि घनानि फलिनीवनानां प्रियङ्गुवनानां प्रसूनानि यस्मिन्सः। 'प्रियङ्गुः फलिनी फली' इत्यमरः। कुसुमितैः कुन्दैर्माध्यकुसुमैः सुगन्धिर्गन्धवाहो यस्मिन्सः। 'माध्यं कुन्दम्' इत्यमरः। शैशिराणामपि कुन्दानां हेमन्ते प्रादुर्भावादविरोधः। विरलतुषारकण इति प्रारम्भोक्तिः। तुषारकालो हेमन्तश्चिरराया-समयजमकालसम्भवं गुणमुत्कर्षं लेभे ॥ २८ ॥

निचयिनि लवलीलताविकासे जनयति लोध्रसमीरणे च हर्षम्।
विकृतिमुपययौ न पाण्डुसूनुश्चलति नयान्न जिगीषतां हि चेतः॥२९॥

अन्वयः—निचयिनि, लवलीलताविकासे, लोध्रसमीरणे, हर्षं च, जनयति सति, पाण्डुसूनुः, विकृतिं, न उपययौ। हि, जिगीषतां, चेतः, नयात् न चलति ॥ २९ ॥

निचयिनीति ॥ निचयिन्युपचयवति लवलीलतानां विकासे पुष्पविजृम्भणे तथा लोध्रसमीरणे हर्षं चोत्कण्ठां जनयति सति पाण्डुसूनुर्विकृतिं नोपययौ। कुतः। हि यस्माज्जिगीषतां जेतुमिच्छतां चेतो नयान्नीतेर्न चलति। नहि क्रोधाक्रान्ते चेतसि शृङ्गारस्यावकाशः। तद्विरुद्धत्वाद्रोषस्येति भावः ॥ २९ ॥

कतिपयसहकारपुष्परम्यस्तनुतुहिनोऽल्पविनिद्रसिन्दुवारः।
सुरभिमुखहिमागमान्तशंसी समुपययौ शिशिरः स्मरैकबन्धुः॥३०॥

अन्वयः—कतिपयसहकारपुष्परम्यः, तनुतुहिनः, अल्पविनिद्रसिन्दुवारः, सुरभिमुखहिमागमान्तशंसी, स्मरैकबन्धुः, शिशिरः, समुपययौ ॥ ३० ॥

कतिपयेति ॥ कतिपयैरेव सहकारपुष्पैश्चूतकुसुमै रम्यः। नतु वसन्तवत्समग्रैर्नापि हेमन्तवन्न्यूहिनैरिति भावः। तनुतुहिनोऽल्पहिमः। नतु हेमन्तवद्बहुतुहिनो नापि वसन्तवद्विरलतुहिन इति भावः। अल्पानि कतिपयानि विनिद्राणि सिन्दुवाराणि विकसितनिर्गुण्डीकुसुमानि यस्मिन्सः। अत्रापि सहकारवदभिप्रायो द्रष्टव्यः। 'सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि' इत्यमरः। इत्थं सुरभिमुखं वसन्तप्रारम्भं हिमागमान्तं हेमन्तावसानं च शंसति सूचयतीति स तथोक्तः। स्मरस्यैकबन्धुः सहकारी। उभयर्तुधर्मसम्पत्तेरिति भावः। शिशिरः समुपययौ ॥ ३० ॥

अथ वसन्तप्रारम्भमाह—

कुसुमनगवनान्युपैतुकामा किसलयिनीमवलम्ब्य चूतयष्टिम्।
क्वणदलिकुलनूपुरा निरासे नलिनवनेषु पदं वसन्तलक्ष्मीः॥३१॥

अन्वयः—कुसुमनगवनानि, उपैतुकामा, वसन्तलक्ष्मीः किसलयिनीं, चूतयष्टिम्, अवलम्ब्य, क्वणदलिकुलनूपुरा, नलिनवनेषु, पदं, निरासे ॥ ३१ ॥

कुसुमेति ॥ कुसुमप्रधानानां नगानां वृक्षाणां कुसुमानां नगा वृक्षा वा तेषां वना-

न्युपैतुमारोढुं कामो यस्याः सा। 'शैलवृक्षौ नगावगौ' इत्यमरः। 'लुम्पेदवश्यमः कृत्ये तुं काममनसोरपि' इति मकारलोपः। वसन्तलक्ष्मीः किसलयिनीं पल्लविनीं चूतयष्टिम्। चूतशाखामित्येति भावः। अवलम्ब्यावष्टभ्य। अन्यथारोढुमशक्यत्वा-दिति भावः। क्वणच्छिञ्जमानं शब्दायमानमलिकुलं नूपुरमिव यस्याः सा तथोक्ता सती। 'क्वणदलिकुलनूपुरम्' इत्यपि पाठः। अत्रालिकुलवन्नूपुरम्। नलिनवनेषु पदं निरासे निदधे। तेषु प्रथमं प्रादुरासीदित्यर्थः। 'उपसर्गादस्यत्यूह्योर्वा' इति वचना-दात्मनेपदम्। अत्र प्रक्रान्तवसन्तलक्ष्मीविशेषणसामर्थ्यादप्रस्तुतनायिकाव्यवहारस-मारोपात्समासोक्तिरलङ्कारः॥ ३१॥

विकसितकुसुमाधरं हसन्तीं कुरबकराजिवधूं विलोकयन्तम्।
ददृशुरिव सुराङ्गना निषण्णं सशरमनङ्गमशोकपल्लवेषु॥ ३२॥

अन्वयः—विकसितकुसुमाधरं, हसन्तीम्, कुरबकराजिवधूं, विलोकयन्तम्, (अत एव) अशोकपल्लवेषु, निषण्णं, सशरम्, अनङ्गं, सुराङ्गनाः, ददृशुरिव॥ ३२॥

विकसितेति॥ विकसितो विश्लिष्टः कुसुममेवाधरो यस्मिन्कर्मणि तद्यथा तथा हसन्तीं स्मयमानां कुरबकराजिरेव वधूस्तां विलोकयन्तम्। कामुकत्वेनेति भावः। अत एवाशोकपल्लवेषु पल्लवसंस्तरेषु निषण्णम्। स्थितमित्यर्थः। रिरंसयेति शेषः। सशरम्। नित्यविजयित्वादिति भावः। इत्थं शृङ्गारवीरयोरेकाधिकरणभूतमनङ्गं सु-राङ्गना ददृशुरिवेत्युत्प्रेक्षा। अशोकाद्यवलोकनान्मदनसाक्षात्कारादिव महान्मनः-क्षोभस्तासामासीदित्यर्थः। अत्र रूपकोत्प्रेक्षयोः संसृष्टिः॥ ३२॥

मुहुरनुपतता विधूयमानं विरचितसंहति दक्षिणानिलेन।
अलिकुलमलकाकृतिं प्रपेदे नलिनमुखान्तविसर्पि पङ्कजिन्याः॥३३॥

अन्वयः—अनुपतता दक्षिणानिलेन, मुहुः, विधूयमानं, विरचितसंहतिः, पङ्कजिन्याः नलिनमुखान्तविसर्पि, अलिकुलम्, अलकाकृति, प्रपेदे॥ ३३॥

मुहुरिति॥ अनुपततानुधावता दक्षिणानिलेन मलयमारुतेन मुहुर्विधूयमानं कम्पि-तमत एव विरचिता संहतिर्येन। तत्सम्भूतमित्यर्थः। पङ्कजिन्या यन्नलिनं मुखमिव तस्यान्तविसर्पि प्रान्तचार्यलिकुलं कर्तृ अलकाकृतिमलकसादृश्यं प्रपेदे॥ ३३॥

श्वसनचलितपल्लवाधरोष्ठे नवनिहितेर्ष्यमिवावधूनयन्ती।
मधुसुरभिणि षट्पदेन पुष्पे मुख इव शाललतावधूश्चुचुम्बे॥३४॥

अन्वयः—षट्पदेन, शाललतावधूः, श्वसनचलितपल्लवाधरोष्ठे, मधुसुरभिणि, पुष्पे, मुख इव, नवनिहितेर्ष्यम्, अवधूनयन्ती, चुचुम्बे॥ ३४॥

श्वसनेति॥ षट्पदेनालिना। शाललता सर्जतरुशाखा वधूरिव शाललतावधूः।

'प्राकारवृक्षयोः शालः शालः सर्जतरुः स्मृत.' इति शाश्वतः । श्वसनेन वायुना निःश्वासेन च चलितः पल्लवोऽधरोष्ठ इव पल्लवाधरोष्ठो यत्र तस्मिन् । 'ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यम्' । मधुना मकरन्देन मद्येन च सुरभिणि सुगन्धिनि पुष्पे मुख इव नवं यथा तथा निहितेर्ष्यं कृतकोपमिवेति क्रियाविशेषणम् । तथावधूनयन्ती कम्पयन्ती । 'धूञ्प्रीञोर्नुग्वक्तव्य.' इति णिचि नुगागमः । चुचुम्बे चुम्बिता । अत्र श्वसनशब्दार्थमधुशब्दार्थयोश्च स्वस्वभेदान्यवसायाच्छ्लेषमूलातिशयोक्तिः । सा चोपमाङ्गमित्यनयोः सङ्करः ॥ ३४ ॥

प्रभवति न तदा परो विजेतुं भवति जितेन्द्रियता यदात्मरक्षा ।
अवजितभुवनस्तथा हि लेभे सिततुरगे विजयं न पुष्पमासः ॥३५॥

अन्वयः—परः, तदा, विजेतुं, न प्रभवति, यदा, जितेन्द्रियता, आत्मरक्षा, भवति, तथा हि, अवजितभुवनः, पुष्पमासः, सिततुरगे, विजयं, न लेभे ॥ ३५ ॥

प्रभवतीति ॥ परः शत्रुस्तदा तस्मिन्काले विजेतुं न प्रभवति न शक्नोति । यदा जितेन्द्रियतेन्द्रियजयित्वमात्मरक्षा भवति विद्यते । तथाहि, अवजितभुवनस्त्रैलोक्यविजयी पुष्पमासो वसन्तः । सिततुरगेऽर्जुने विषये विजयं न लेभे । अतो जितेन्द्रिया दुर्जया इत्यर्थः । विशेषेण सामान्यार्थसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥ ३५ ॥

अथ ग्रीष्मं वर्णयति—

कथमिव तव संमतिर्भवित्री सममृतुभिर्मुनिनावधीरितस्य ।
इति विरचितमल्लिकाविकासः स्मयत इव स्म मधुं निदाघकालः ॥३६॥

अन्वय.—विरचितमल्लिकाविकासः, निदाघकालः, ऋतुभिः, समं, मुनिना, अवधीरितस्य, तव, सम्मतिः, कथमिव, भवित्री । इति, मधुं, स्मयते स्म इव ॥ ३६ ॥

कथमिति ॥ विरचितमल्लिकाविकासो निदाघकालो ग्रीष्मो ऋतुभिर्वर्षादिभिः समं मुनिनावधीरितस्य तिरस्कृतस्य तव सम्मतिर्लोके योग्यत्वेनानुमतिर्मान्यत्वं कथमिव भवित्री । न सम्मानः कथञ्चिदविष्यतीत्यर्थः । इतीत्थं मधुं वसन्तं । 'चैत्रे दैत्ये वसन्ते च जीवे लोके मधुः स्मृतः' इति विश्वः । स्मयते स्मेव जहास किमित्युत्प्रेक्षा । 'लट् स्मे' इति भूतार्थे लट् । प्रयासस्य शुभ्रत्वेन कविप्रसिद्धेर्मल्लिकाविकासे हासत्वाध्यवसायः । अत्रर्तुभिः सममवधीरितस्येत्यत्राभेदाध्यवसायमूला सहोक्तिरलङ्कारः । सम्बन्धभेदभिन्नस्यावधीरणस्याभिन्नतयाध्यवसायात्तदेवावधीरणमसम्मतिद्वारा स्मयोत्प्रेक्षेत्यनयोरङ्गाङ्गिभावेन सङ्करः ॥ ३६ ॥

बलवदपि बलं मिथोविरोधि प्रभवति नैव विपक्षनिर्जयाय ।
भुवनपरिभवी न यत्तदानीं तमृतुगणः क्षणमुन्मनीचकार ॥३७॥

अन्वयः—बलवत् अपि, मिथोविरोधि, बलं विपक्षनिर्जयाय, नैवप्रभवति । (कुतः) यत्, भुवनपरिभवी, ऋतुगणः, तदानीं, तं, क्षणं, न उन्मनीचकार ॥ ३७ ॥

बलवदिति ॥ बलवत्प्रबलमपि । प्रवृद्धगामीति यावत् । मिथोविरोधि परस्पर-स्पर्धि बलं सैन्यम् । 'वरूथिनी बलं सैन्यम्' इत्यमरः । विपक्षनिर्जयाय शत्रुविजयाय । 'तुमर्थाच्च—' इत्यादिना चतुर्थी । शत्रूञ्जेतुमित्यर्थः । न प्रभवति न शक्नोत्येव । कुतः । यद्यस्मात्कारणाद्भुवनानां परिभवी जेतापि । 'जिदृक्षि—' इत्यादिनेनिप्रत्ययः । ऋतुग-णस्तदानीं तमर्जुनं क्षणमपि नोन्मनीचकारानुन्मनसमुन्मनसं न चकार । 'अरुर्मन-श्चक्षुः—' इत्यादिनाऽभूततद्भावे च्विप्रत्ययः सलोपश्च । विशेषेण सामान्यसमर्थनरूपो-ऽर्थान्तरन्यासः ॥ ३७ ॥

एवं तटस्थस्योद्दीपनसामग्री विफलेत्युक्तम् । सम्प्रति विपरीता जातेत्याह—

श्रुतिसुखमुपवीणितं सहायैरविरललाञ्छनहारिणश्च कालाः ।
अविहितहरिसूनुविक्रियाणि त्रिदशवधूषु मनोभवं वितेनुः ॥३८॥

अन्वयः—सहायैः, श्रुतिसुखम्, उपवीणितम्, अविरललाञ्छनहारिणः, कालाः, अविहितहरिसूनुविक्रियाणि, त्रिदशवधूषु, मनोभवं, वितेनुः ॥ ३८ ॥

श्रुतीति ॥ सहायैस्तासां सहचरैर्गन्धर्वैः । कृतमिति शेषः । 'न लोक—' इत्यादिना षष्ठीप्रतिषेधः । कर्तरि तृतीया । श्रुतिसुखं श्रोत्रमधुरमुपवीणितं वीणयोपगानम् । 'सत्यापपाश—' इत्यादिना वीणाशब्दाण्णिजन्ताद्भावे क्तः । अविरलैर्भूयोभिर्लाञ्छनैः पूर्वोक्तैः फलकुसुमादिभिश्चिह्नैर्हारिणो मनोहराः काला वसन्तादिऋतवोऽविहिताऽकृता हरिसूनोरर्जुनस्य विक्रिया मनोविकृतिर्यैस्तानि तथाभूतानि सन्ति । 'नपुंसकमनपुं-सक—' इत्यादिना नपुंसकैकशेषः । त्रिदशवधूषु मनोभवं वितेनुर्विस्तारयामासुः । सोऽयं परप्रहारार्थमुद्यतमायुधं स्वात्मानमेव प्रहरतीति न्यायवज्जात इति भावः । अत्र मुनिविक्रियार्थं स्त्रीणां विक्रियारूपानर्थोत्पत्तिकथनाद्द्वितीयो विषमालङ्कारः । तथाच सूत्रम्—'विरूपकार्यानर्थयोरुत्पत्तिरूपसङ्घटनाद्विषमालङ्कारः' इति ॥ ३८ ॥

तटस्थवदालम्बनगणोऽपि विपरीतोऽभूदिति श्लोकद्वयेनाह—

न दलति निचये तथोत्पलानां न विषमच्छदगुच्छयूथिकासु ।
अभिरतिमुपलेभिरे यथासां हरितनयावयवेषु लोचनानि ॥३९॥

अन्वयः—आसां, लोचनानि, हरितनयावयवेषु, यथा तथा दलति, उत्पलानां, निचये, न उपलेभिरे । तथा, विषमच्छदगुच्छयूथिकासु, अभिरतिं, न उपलेभिरे ॥३९॥

नेत्यादि ॥ आसां लोचनानि हरितनयावयवेषु यथा तथा दलति विकसत्युत्पलानां निचयेऽभिरतिं नोपलेभिरे न प्रापुः । तथा विषमच्छदगुच्छाः सप्तपर्णस्तबका यूथिका मल्लिकाश्च तास्वभिरतिं नोपलेभिरे । 'सप्तपर्णो विशालत्वक्शारदो विषमच्छदः' इत्य-

मरः । तथा रमणीयत्वात् । तद्वयवानामित्यर्थः । इति चक्षुः प्रीतिरुक्ता ॥ ३९ ॥
अथ मनःसङ्गं सूचयति—

मुनिमभिमुखतां निनीषवो याः समुपययुः कमनीयतागुणेन ।
मदनमुपदधे स एव तासां दुरधिगमा हि गतिः प्रयोजनानाम्॥४०॥

अन्वयः—याः, कमनीयतागुणेन मुनिम्, अभिमुखतां, निनीषवः, समुपययुः । तासां, स एव, मदनम्, उपदधे, हि प्रयोजनानाम्, गतिः, दुरधिगमा (खलु) ॥ ४० ॥

मुनिमिति ॥ याः स्त्रियः कमनीयता सौन्दर्यं सैव गुणस्तेन मुनिमर्जुनमभिमुखतां वश्यतां निनीषवो नेतुमिच्छवः समुपययुः । तासां स्त्रीणां स मुनिरेव मदनमुपदधे जनयामास । तथा हि । प्रयोजनानामुद्देश्यानां गतिः परिणतिदुरधिगमा हि दुर्ज्ञेया खलु । अतः क्वचिद्भवति क्वचिन्न भवतीति भावः ॥ ४० ॥

अथासामनुरागमेव कार्यतः प्रपञ्चयति—

प्रकृतमनुससार नाभिनेयं प्रविकसदङ्गुलि पाणिपल्लवं वा ।
प्रथममुपहितं विलासि चक्षुः सिततुरगे न चचाल नर्तकीनाम्॥४१॥

अन्वयः—विलासि, नर्तकीनां, चक्षुः, प्रकृतं, अभिनेयं, न अनुससार । (तथा) प्रविकसदङ्गुलि, पाणिपल्लवं, न अनुससार । (किन्तु) प्रथमं, सिततुरगे, उपहितं, न चचाल ॥ ४१ ॥

प्रकृतमिति । विलासि सविलासं नर्तकीनां सम्बन्धि । 'शिल्पिनि ष्वुन्' इति ष्वुन्प्रत्ययः । 'नृतिखनिरञ्जिभ्य एव' इति नियमः । चक्षुः कर्तृ प्रकृतं प्रक्रान्तमभिनेयमभिनेतव्यं रसभावादिव्यञ्जकं नानुससार तद्रूपणं तदानुगुण्येनैव दृष्टिप्रयोगनियमादिति भावः । तथा प्रविकसदङ्गुलि चञ्चलाङ्गुलि पाणिपल्लवं वा नानुससार स च दोषः। 'यतो हस्तस्ततो दृष्टिः' इति नियमादिति भावः । 'पल्लवोऽस्त्री किसलयम्' इत्यमरः । 'वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये' इति विश्वः । किन्तु प्रथमं प्रवेश एव सिततुरगेऽर्जुन उपहितं सन्न चचाल तत्रैव लग्नं तस्थौ । रागान्धैर्न किञ्चित्करणीयमनुसन्धेयमिति भावः ॥ ४१ ॥

अभिनयमनसः सुराङ्गनाया निहितमलक्तकवर्तनाभिताम्रम् ।
चरणमभिपपात षट्पदाली धृतनवलोहितपङ्कजाभिशङ्का ॥४२॥

अन्वयः—अभिनयमनसः, सुराङ्गनायाः, अलक्तकवर्तनाभिताम्रं, निहितं, चरणं, षट्पदाली, धृतनवलोहितपङ्कजाभिशङ्का, अभिपपात स्म ॥ ४२ ॥

अभिनयेति ॥ अभिनयो रसभावादिव्यञ्जकचेष्टाविशेषः । 'व्यञ्जकाभिनयौ समौ' इत्यमरः । तत्र मनो यस्यास्तस्याः व्यासङ्गाद्भ्रमरागमनमजानत्या इत्यर्थः । सुराङ्ग-

नायाः सम्बन्ध्यलक्तकवर्तनया लाक्षारसरञ्जनेनाभिताम्रं निहितं न्यस्तं चरणं षट्पदाली कर्त्री धृता नवलोहितपङ्कजानामभिशङ्का प्रत्ययकोकनदभ्रमो यया साऽभिपपाताभिधावति स्म । अत्र षट्पदाल्याः स्त्रीचरणे पङ्कजभ्रमाभिधानाद्भ्रान्तिमदलङ्कारः । तेन चोपमा व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः ॥ ४२ ॥

अविरलमलसेषु नर्तकीनां द्रुतपरिषिक्तमलक्तकं पदेषु ।
सवपुषमिव चित्तरागमूहुर्नमितशिखानि कदम्बकेसराणि ॥४३॥

अन्वयः—नमितशिखानि, कदम्बकेसराणि, अविरलं, अत एव द्रुतपरिषिक्तं, नर्तकीनाम्, अलसेषु, पदेषु, अलक्तकं, सवपुषं चित्तरागम्, ऊहुः ॥ ४३ ॥

अविरलमिति ॥ नमितशिखानि नर्तकीपादपीडनान्नमिताग्राणि कदम्बकेसराणि रङ्गपूजादत्तानीति शेषः । अविरलं सान्द्रं यथा तथा द्रुतो रागोष्मणा विगलितोऽत एव परिषिक्तः प्रसृतस्तं द्रुतपरिषिक्तं नर्तकीनामलसेषु पदेषु पादन्यासेष्वलक्तकं लाक्षारागं सवपुषं मूर्तिमन्तं चित्तरागमुत्कटतया कायाद्बहिर्निःसृतं मुनिविषयकं रागमिवेत्युत्प्रेक्षा । ऊहुर्वहन्ति स्म ॥ ४३ ॥

अथासां शृङ्गारचेष्टां कथयति—

नृपसुतमभितः समन्मथायाः परिजनगात्रतिरोहिताङ्गयष्टेः ।
स्फुटमभिलषितं बभूव वध्वा वदति हि संवृतिरेव कामितानि ॥४४॥

अन्वयः—नृपसुतम्, अभितः, परिजनगात्रतिरोहिताङ्गयष्टेः, समन्मथायाः, वध्वाः, अभिलषितं, स्फुटं, बभूव । (यतः) संवृतिः एव, कामितानि, वदति हि ॥ ४४ ॥

नृपेति ॥ नृपसुतमर्जुनमभितः सम्मुखं परिजनस्य सखीजनस्य गात्रेण तिरोहिता लज्जया स्वाकारगोपनायान्तर्हिताऽङ्गयष्टिर्यस्याः सा तस्याः समन्मथाया वध्वा अभिलषितं मुनि प्रत्यनुरागः स्फुटं बभूव । न च संवियमाणस्याभिव्यक्तिर्विरुद्धेति वाच्यमित्याह—यतः संवृतिः सम्यग्गोपनमेव कामितान्यनुरागान् । कामयतेर्भावे क्तः । वदति हि । प्रकटयतीत्यर्थः । अयमनुरागस्य स्वभाव उक्तः । यया चेष्टया रागः संव्रियते सैवास्य प्रकाशिका जातेति भावः ॥ ४४ ॥

अभिमुनि सहसा हृते परस्या घनमरुता जघनांशुकैकदेशे ।
चकितमवसनोरु सत्रपायाः प्रतियुवतीरपि विस्मयं निनाय ॥४५॥

अन्वयः—अभिमुनि, घनमरुता, जघनांशुकैकदेशे, सहसा, हृते सति, सत्रपायाः, परस्याः, अवसनोरु, चकितं, प्रतियुवतीः अपि, विस्मयं, निनाय ॥ ४५ ॥

अभिमुनीति ॥ अभिमुनि मुनिसमक्षं घनेन महता जघनांशुकस्यैकदेशे सहसा हृते सति सत्रपायाः सलज्जायाः परस्याः सम्बन्ध्यवसनौ निरावरणावूरू यस्मिंस्तच्चकितं

भयसम्भ्रमः प्रतियुवतीरपि सपत्नीरपि विस्मयं निनाय। किमुतान्यजनमित्यपिशब्दार्थः। न तु मुनिमित्याशयः ॥ ४५ ॥

धृतबिसवलये निधाय पाणौ मुखमधिरूषितपाण्डुगण्डलेखम्।
नृपसुतमपरा स्मराभितापादमधुमदालसलोचनं निदध्यौ ॥४६॥

अन्वयः—अपरा, स्मराभितापात्, धृतबिसवलये, पाणौ, अधिरूषितपाण्डुगण्डलेखं, मुखं, निधाय, अमधुमदालसलोचनं, नृपसुतं, निदध्यौ ॥ ४६ ॥

धृतेति ॥ अपरा स्त्री स्मराभितापाद्धेतोर्धृतानि बिसान्येव वलयानि येन तस्मिन्पाणावधिरूषिते चन्दनादिचर्चिते पाण्डू गण्डलेखे गण्डस्थले यस्य तन्मुखं निधायारोप्याऽमधुमदे मधुमदरहिते तथाप्यलसे लोचने यस्मिन्कर्मणि तद्यथा तथा तं नृपसुतं निदध्यौ पश्यति स्म। 'निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्' इत्यमरः ॥ ४६ ॥

अथ पञ्चभिर्मुनिं प्रति दूतीवाक्यमाह—

सखि दयितमिहानयेति सा मां प्रहितवती कुसुमेषुणाभितप्ता।
हृदयमहृदया न नाम पूर्वं भवदुपकण्ठमुपागतं विवेद ॥ ४७ ॥

अन्वयः—कुसुमेषुणा, अभितप्ता, सा, हे सखि!, दयितम्, इहानयेति, मां प्रहितवती, अहृदया, पूर्वं, भवत् उपकण्ठम्, उपागतं हृदयं, न विवेद, नाम ॥ ४७ ॥

सखीति ॥ कुसुमेषुणा कामेनाभितप्ता पीडिता सा नायिका। हे सखि, दयितं मुनिमिहानयेति मां प्रहितवती भवदन्तिकं प्रेषितवती। किं त्वविमृश्यकारिणीयमित्याह—हृदयमिति। अहृदयाऽमनस्का। तस्यास्त्वद्गतत्वादिति भावः। अतएव सा पूर्वं प्रागेव भवदुपकण्ठं त्वत्समीपमुपागतं हृदयं मनो न विवेद। नाम सम्भावनायाम्। अतो मत्प्रेषणं व्यर्थं तस्यान्तरङ्गत्वाद्बहिरङ्गस्य दुर्बलत्वादिति भावः। एतेन मनःसङ्ग उक्तः। चक्षुःप्रीतिस्तु प्रागेव सर्वासामुक्तेति न पृथगुच्यते ॥ ४७ ॥

'दृङ्मनः सङ्गसङ्कल्पा जागरः कृशता रतिः। ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश॥' इति। तत्राद्यमवस्थाद्वयमभ्यधायि। सम्प्रति काश्चित्क्रमनैरपेक्ष्येण सूचयति—

चिरमपि कलितान्यपारयन्त्या परिगदितुं परिशुष्यता मुखेन।
गतघृण गमितानि सत्सखीनां नयनयुगैः सममार्द्रतां मनांसि॥४८॥

अन्वयः—चिरं कलितान्यपि, परिशुष्यता, मुखेन, परिगदितुम्, अपारयन्त्या, हे गतघृण ? सत्सखीनां मनांसि, नयनयुगैः, समम्, आर्द्रतां, गमितानि ॥ ४८ ॥

चिरमिति ॥ चिरं कलितान्यपि सन्देशार्थं बुद्ध्या योजितान्यपि। वचनानीति शेषः। परिशुष्यता मुखेनेति जागरोक्तिः। परिगदितुमपारयन्त्याशक्नुवत्या तया।

हे गतघृण । अद्यापि तां नानुकम्पस इति भावः । सत्सखीनां मनांसि नयनयुगैः सममार्द्रतां गमितानि । उपचयं गमितानीत्यर्थः । शोकबाष्पैरिति भावः । अत्र सखीशोकोक्त्या मूर्च्छावस्था सूच्यते । अत्र शोकबाष्परूपकारणभेदात्प्रतियोगि-भेदाच्चार्द्रत्वभेदेऽप्यभेदाध्यवसायः । तन्मूला चेयं नयनयुगैः सममिति सहोक्तिरलङ्कारः ॥ ४८ ॥

अचकमत सपल्लवां धरित्रीं मृदुसुरभिं विरहय्य पुष्पशय्याम् ।
भृशमरतिमवाप्य तत्र चास्यास्तव सुखशीतमुपैतुमङ्कमिच्छा ॥४९॥

अन्वयः—मृदुसुरभिं, पुष्पशय्यां, विरहय्य, सपल्लवां, धरित्रीम्, अचकमत, अस्याः, तत्र भृशम्, अरतिम्, अवाप्य, सुखशीतं, तव, अङ्कम्, उपैतुमिच्छा ॥४९॥

अचकमतेति ॥ किं वाच्यं चेत्याह—सा स्त्री मृद्वी सुरभिश्च या तां मृदुसुरभिं पुष्पशय्यां विरहय्य विहाय सपल्लवां धरित्रीमचकमतैच्छत् । तस्यास्ततोऽपि शीतलत्वादिति भावः । कमेर्णिङन्ताल्लुङ् । 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इति द्विर्भाव इति केचित् । तन्न । अचीकमतेति प्रसङ्गात् । अतो णिङभावपक्षे 'कमेश्च्लेश्चङ् वक्तव्यः' इति वक्तव्याच्चङि रूपमेतत् । अस्या नायिकायास्तत्र धरित्र्यामपि भृशमरतिं दुःखमवाप्य । सुखयतीति सुखः शीतः शीतलश्च तं सुखशीतं तवाङ्कमुत्सङ्गमुपैतुमिच्छा । वर्तत इति शेषः । अस्याश्चौत्सुक्यं कथितम् । अत्रारतिजागरौ सूच्येतावित्यस्या नायिकायाः क्रमेण पुष्पशय्याद्यनेकाधारसम्बन्धकथनात्प्रथमः पर्यायालङ्कारः । तदुक्तम्—'क्रमेणैकमनेकस्मिन्नाधारे वर्तते यदि । एकस्मिन्नथवानेकं पर्यायालङ्कृतिर्द्विधा ॥' इति लक्षणात् ॥ ४९ ॥

तदनघ तनुरस्तु सा सकामा व्रजति पुरा हि परासुतां त्वदर्थे ।
पुनरपि सुलभं तपोऽनुरागी युवतिजनः खलु नाप्यतेऽनुरूपः ॥५०॥

अन्वयः—तत्, हे अनघ !, तनुः, सा, सकामा, अस्तु । हि, त्वदर्थे परासुतां, पुरा, व्रजति । पुनरपि, तपः, सुलभम्, अनुरागी, अनुरूपः, युवतिजनः, नाप्यते खलु ॥५०॥

तदिति ॥ तत्तस्मात्कारणात्तस्या दुरवस्थत्वाद्धेतोः हे अनघ निष्पाप । तनुः कृशेति कार्श्यावस्थाकथनम् । सा नायिका सकामा सफलमनोरथास्तु । हि यस्मात्त्वमेवार्थः प्रयोजनं वस्तु वा तस्मिंस्त्वदर्थे निमित्ते । सतीति शेषः । त्वामुद्दिश्येत्यर्थः । परासुतां निष्प्राणत्वं पुरा व्रजति व्रजिष्यति । मरिष्यतीत्यर्थः । तथा च तेऽनिमित्तहत्ययानघत्वव्याघातः स्यादिति भावः । 'यावत्पुरानिपातयोर्लट्' इति भविष्यदर्थे लट् । इदं च दशमावस्थाप्रदर्शनम् । न च तपोनिष्ठत्वान्नैतच्यमित्याह—पुनरिति । पुनरपि पश्चादपि । 'पुनरप्रथमे भेदे' इति विश्वः । तपः सुलभम् । 'अनुरागयनुरूपो योग्यश्च युवतिजनस्तु नाप्यते न लभ्यते खलु ॥ ५० ॥

एवं प्रलोभितस्यापि मुनेर्मानं न भग्नमित्याह—

जहिहि कठिनतां प्रयच्छ वाचं ननु करुणामृदु मानसं मुनीनाम् ।
उपगतमवधीरयन्त्यभव्याः स निपुणमेत्य कयाचिदेवमूचे ॥५१॥

अन्वयः—कठिनतां, जहिहि । वाचं, प्रयच्छ, मुनीनां, मानसं, करुणामृदु, ननु । (किञ्च) अभव्याः, उपगतम्, अवधीरयन्ति । एवं, सः, कयाचिद् , एत्य, निपुणं, ऊचे ५१

जहिहीति ॥ कठिनतां निःस्पृहतां जहिहि । त्यजेत्यर्थः । जहातेः 'आ च हौ' इतीकारः । वाचं प्रयच्छ । सन्धत्स्वेत्यर्थः । मुनीनां मानसं मनः करुणामृदु ननु दयार्द्रं खलु । 'स्वान्तं हृन्मानसं मनः' इत्यमरः । किञ्च । अभव्या निर्भाग्याः उपग ं प्राप्तम् । विषयमिति शेषः । अवधीरयन्त्यवमन्यन्ते । एवमुक्तप्रकारेण सोऽर्जुनः कयाचिदेत्य समीपमागत्य निपुणं चतुरं यथा स्यात्तथोच उक्तः । अत्र पञ्चश्लोक्यां विप्रलम्भशृङ्गारस्यौत्सुक्यनाम्नो व्यभिचारिभावस्य चापुनरुक्तिः । अनौचित्येन नायिकायाः प्रवृत्तेराभासत्वमनुसन्धेयम् । तदुक्तम्—'एकत्र चेन्नानुरागस्तिर्यङ्म्ले-च्छगतोऽपि वा । योषितां बहुसक्तिश्चेद्रसाभासस्त्रिधा मतः ॥' इति । तन्निबन्ध-नादूर्जस्वलमलङ्कारः । तथा च सूत्रम्—'रसभेदतदाभासतत्प्रशमानां निबन्धेन रसवत्प्रायमूर्जस्वलम्' इति । समाहितातिरसबन्धे रसवदलङ्कारः । भावनिबन्धने प्रेयोऽलङ्कारः । रसभावनिबन्धे तूर्जस्वलालङ्कारः । तत्प्रशमनिबन्धने समाहितालङ्कार इति सूत्रार्थः ॥ ५१ ॥

सललितचलितत्रिकाभिरामा शिरसिजसंयमनाकुलैकपाणिः ।
सुरपतितनयेऽपरा निरासे मनसिजजैत्रशरं विलोचनार्धम् ॥५२॥

अन्वयः—सललितचलितत्रिकाभिरामा, शिरसिजसंयमनाकुलैकपाणिः, अपरा, सुरपतितनये, मनसिजजैत्रशरं, विलोचनार्धं, निरासे ॥ ५२ ॥

सललितेति ॥ सललितं सविलासं यथा तथा चलितेन विवर्तितेन त्रिकेण कटि-भागेन । 'पृष्ठवंशाधरे त्रिकम्' इत्यमरः । अभिरामा शिरसि जाताः शिरसिजाः । 'सप्तम्यां जनेर्डः' । 'अमूर्धमस्तकात्स्वाङ्गादकामे' इत्यलुक् । 'उपपदमतिङ्' इति समासः । एतेन मनसिजो व्याख्यातः । तेषां संयमने बन्धन आकुलो व्यग्र एकः पाणिर्यस्याः साऽपरा स्त्री सुरपतितनयेऽर्जुने । जेतैव जैत्रः । जेतृशब्दात्तृजन्तात् 'प्रज्ञादिभ्यश्च' इत्यण्प्रत्ययः । मनसिजस्य जैत्रः शरस्तं तथाभूतम् । विलोचनस्यार्ध-मेकदेशम् । कटाक्षमित्यर्थः । निरासे विससर्ज ॥ ५२ ॥

कुसुमितमवलम्ब्य चूतमुच्चैस्तनुरिभकुम्भपृथुस्तनानताङ्गी ।
तदभिमुखमनङ्गचापयष्टिर्विसृतगुणेव समुन्ननाम काचित् ॥५३॥

अन्वयः—इभकुम्भपृथुस्तनानताङ्गी, काचित् तनुः, कुसुमितम्, उच्चैः, चूतम्, अवलम्ब्य, विसृतगुणः, अनङ्गचापयष्टिः, इव, तदभिमुखं, समुन्ननाम ॥ ५३ ॥

कुसुमितमिति ॥ इभकुम्भवत्पृथुभ्यां स्तनाभ्यामानतमङ्गं यस्याः सा। 'अङ्गगात्रकण्ठेभ्यश्च' इति ङीष्। काचित्तनुस्तन्वी। 'वोतो गुणवचनात्' इति विकल्पान्न ङीष्। कुसुमितमुच्चैरुन्नतं चूतमवलम्ब्य। अत एव चूतलतायोगाद्विसृतो विस्तृतो गुणो ज्या यस्याः सा। 'विसृतं विस्तृतं ततम्' इति, 'मौर्वी ज्या शिञ्जिनी गुणः' इति चामरः। अनङ्गचापयष्टिरिव। आकृष्टमुक्तेति भावः। तदभिमुखं समुन्ननाम समुज्जजृम्भे। अङ्गभङ्गं चकारेत्यर्थः ॥ ५३ ॥

सरभसमवलम्ब्य नीलमन्या विगलितनीवि विलोलमन्तरीयम्।
अभिपतितुमनाः ससाध्वसेव च्युतरशनागुणसन्दितावतस्थे ॥५४॥

अन्वयः—अन्या, विगलितनीवि, (अत एव) विलोलं, नीलम्, अन्तरीयम्, अवलम्ब्य, सरभसम्, अभिपतितुमनाः, ससाध्वसेव, च्युतरशनागुणसन्दिता अवतस्थे ॥ ५४ ॥

सरभसमिति ॥ अन्यापरा विगलितनीवि श्लथबन्धनमत एव विलोलं स्थानचलितम्। नील्या रक्तं नीलम्। 'नील्या अन्वक्तव्यः' इत्यन्प्रत्ययः। अन्तरीयं परिधानमवलम्ब्य हस्तेन गृहीत्वा सरभसं सत्वरमभिपतितुं मनो यस्याः सा तथोक्ता। गन्तुमुद्युक्तेत्यर्थः। तथापि ससाध्वसेव। न तु वस्तुतः ससाध्वसा। किं तु च्युतेन गलितेन रशनागुणेन सन्दिता बद्धा सत्यवतस्थे स्थिता। 'बद्धे सन्दानितं मूतमुदितं सन्दितं सितम्' इत्यमरः। कर्मणि क्तः। 'द्यतिस्यतिमास्थाम्—' इतीकारः ॥ ५४ ॥

काचिद्युग्मेनाह—

यदि मनसि शमः किमङ्ग चापं शठ विषयास्तव वल्लभा न मुक्तिः।
भवतु दिशति नान्यकामिनीभ्यस्तव हृदये हृदयेश्वरावकाशम् ॥५५॥

अन्वयः—तव, मनसि, शमः, यदि, अङ्ग चापं, किम्, (किन्तु) हे शठ! तव, विषयाः, वल्लभाः, न मुक्तिः, भवतु। तव, हृदये, हृदयेश्वरा, तव, अन्यकामिनीभ्यः, अवकाशं, न दिशति ॥ ५५ ॥

यदीत्यादि ॥ तव मनसि शमः शान्तिर्यदि। अस्तीति शेषः। अङ्ग भोः, चापं किम्। किमर्थमित्यर्थः। किं तु हे शठ हे वञ्चक, तव विषयाः शब्दादयो वल्लभाः प्रियाः। न तु मुक्तिः। तदेव द्रढयितुमाह—भवतु। को दोष इति शेषः। यद्यहं रागी तर्हि किमिति भवतीर्न गणयामीति शङ्कां निवारयति—दिशतीति। तव हृदये मनसि हृदयेश्वरा काचित्तव प्रेयस्यन्यकामिनीभ्यः स्त्र्यन्तरेभ्योऽवकाशं न दिशति न प्रय-

च्छति । स्त्र्यन्तरासक्त्या नास्मान्गणयसि न तु वैराग्यात् । तदर्थमेवायं ते सकलः प्रयासोऽपीत्यर्थः ॥ ५५ ॥

इति विषमितचक्षुषाभिधाय स्फुरदधरोष्ठमसूयया कयाचित् ।
अगणितगुरुमानलज्जयासौ स्वयमुरसि श्रवणोत्पलेन जघ्ने ॥५६॥

अन्वयः—इति, असूयया, स्फुरत्, अधरोष्ठम्, अभिधाय, विषमितचक्षुषा, अगणितगुरुमानलज्जया, कयाचित् असौ, उरसि, स्वयं, श्रवणोत्पलेन, जघ्ने ॥ ५६ ॥

इतीति ॥ इतीत्थमसूयया मत्सरेण स्फुरन्नधरोष्ठो यस्मिन्कर्मणि तद्यथा तथाभिधायोक्त्वा विषमितचक्षुषा कुटिलीकृतदृष्ट्याऽगणिता गुरव आचार्यादयो मानोऽभिमानो लज्जा च यया तया कयाचिदसौ मुनिरुरसि स्वयं स्वहस्तेनैव श्रवणोत्पलेन जघ्ने हतः ॥ ५६ ॥

सविनयमपराभिसृत्य साचि स्मितसुभगैकलसत्कपोललक्ष्मीः ।
श्रवणनियमितेन तं निदध्यौ सकलमिवासकलेन लोचनेन ॥५७॥

अन्वयः—अपरा, सविनयं, साचि, अभिसृत्य, स्मितसुभगकलसत्कपोललक्ष्मीः, श्रवणनियमितेन, असकलेन, लोचनेन, तं, सकलमिव, निदध्यौ ॥ ५७ ॥

सविनयमिति ॥ अपरा सविनयमनौद्धत्येन साचि तिर्यगभिसृत्य समीपं गत्वा स्मितेन मन्दहासेन सुभगैकस्य लसतः कपोलस्य लक्ष्म्यो यस्याः सेति बहुवचनपदोत्तरो बहुव्रीहिः । अन्यथा कप्प्रत्ययः स्यादित्युक्तं प्राक् । श्रवणनियमितेन कर्णान्तप्रापितेन श्रोत्ररुद्धप्रसरण । तावदायतेनेत्यर्थः । असकलेनासम्पूर्णेन कटाक्षेणेति यावत् । लोचनेन तं मुनिं धनञ्जयं सकलमिव समग्रप्रायं यथा तथा निदध्यौ पश्यति स्म । कटाक्षेणव गाढमद्राक्षीदित्यर्थः । एषु श्लोकेषु भावाभासनिबन्धादूर्जस्वलालङ्कारः । औत्सुक्यमत्र भावः । आभासत्वं चास्य विरक्तमुनावनौचित्यादित्युक्तं प्रागेवेति ॥ ५७ ॥

अथासां मुनिविलोभनमुपसंहरति—

करुणमभिहितं त्रपा निरस्ता तदभिमुखं च विमुक्तमश्रु ताभिः ।
प्रकुपितमभिसारणेऽनुनेतुं प्रियमियती ह्यबलाजनस्य भूमिः ॥५८॥

अन्वयः—ताभिः, तत्, अभिमुखम्, करुणम्, अभिहितम् । त्रपा, निरस्ता । अश्रु, विमुक्तम् । हि, अबलाजनस्य, अभिसारणे, प्रकुपितं, प्रियम्, अनुनेतुम्, इयती ॥५८॥

करुणमिति ॥ ताभिः स्त्रीभिस्तदभिमुखं मुनिसमक्षं करुणं दीनमभिहितमुक्तम् । त्रपा निरस्ता लज्जा त्यक्ता । किम्बहुनाश्रु च विमुक्तम् । ततः परं न किञ्चिद्विधेयमा-

सोदिति भावः। कुतः। हि यस्मादबलाजनस्याभिसारणे समागमविषये प्रकुपितमनुकूलं प्रियमनुनेतुमनुकूलयितुमियती भूमिरित्येतावती सीमा। साधनानां परमावधिरिति भावः। अर्थान्तरन्यासोऽलङ्कारः ॥ ५८ ॥

अथासामनुरागदार्ढ्यं निगमयति—

असकलनयनेक्षितानि लज्जा गतमलसं परिपाण्डुता विषादः।
इति विविधमियाय तासु भूषां प्रभवति मण्डयितुं वधूरनङ्गः॥५९॥

अन्वयः—असकलनयनेक्षितानि, लज्जा, अलसं, गतं, परिपाण्डुता, विषादः, इति, विविधं, तासु, भूषाम्, इयाय। हि, अनङ्गः, वधूः, मण्डयितुं, प्रभवति ॥५९॥

असकलेति ॥ असकलनयनेक्षितानि नयनार्धविलोकितानि लज्जालसं गतं मन्दगमनं परिपाण्डुता पाण्डुरवर्णत्वं विषाद इष्टानवाप्तिनिमित्तश्चेतोभङ्ग इत्यं प्रकारं विविधं नानाविचेष्टितम्। 'नपुंसकमनपुंसक—' इत्यादिना नपुंसकैकशेषत्वम्। तासु भूषामियायेति भावप्राधान्येन योज्यम्। तथा हि। अनङ्गो मदनो वधूर्मण्डयितुं प्रभवति। सर्वावस्थास्विति शेषः। अतस्तासामनङ्गभूषितानामखिलं भूषणमेवेति भावः ॥५९॥

इदानीमेतासां त्रिभिर्मुनिविलोभने प्रयासवैफल्यमाह—

अलसपदमनोरमं प्रकृत्या जितकलहंसवधूगति प्रयातम्।
स्थितमुरुजघनस्थलातिभारादुदितपरिश्रमजिह्मितेक्षणं वा ॥६०॥

अन्वयः—प्रकृत्या, अलसपदमनोरमं, (अतएव) जितकलहंसवधूगति, प्रयातम्, उरुजघनस्थलातिभारात्, उदितपरिश्रमजिह्मितेक्षणं, स्थितं वा ॥६०॥

अलसेति ॥ वधूनां सम्बन्धि प्रकृत्यालसः पदैर्मनोरमं मनोज्ञमत एव जिता कलहंसवधूनां गतिर्येन तत्प्रयातं गमनम्। भावे क्तः। तथोरुणोऽतिविपुलस्य जघनस्थलस्यातिभारादतिगौरवादुदितपरिश्रमेणोन्नतश्रमेण जिह्मिते घूर्णिते ईक्षणे यस्मिंस्तत्स्थितं वा स्थितिश्च। सर्वत्र वाशब्दः समुच्चये ॥ ६० ॥

भृशकुसुमशरेषुपातमोहादनवसितार्थपदाकुलोऽभिलापः।
अधिकविततलोचनं वधूनामयुगपदुन्नमितभ्रु वीक्षितं च ॥ ६१ ॥

अन्वयः—भृशकुसुमशरेषुपातमोहात्, अनवसितार्थपदाकुलः, अभिलापः, वधूनां, अधिकविततलोचनम्, अयुगपत्, उन्नमितभ्रु, वीक्षितं च ॥ ६१ ॥

भृशेति ॥ तथा भृशेन गाढेन कुसुमशरस्य कामस्येषोर्निपातेन यो मोहो मूर्च्छा तस्माद्धेतोरनवसितार्थैरस्फुटोच्चारणादनवधारिताभिधेयैः पदैः सुप्तिङन्तशब्दैराकुलः सङ्कीर्णोऽभिलापो वाक्यप्रयोगश्चाधिकं विततं विस्तृते लोचने यस्मिंस्तदयुगपत्पर्या-

येणोन्नमिते भ्रुवौ यस्मिंस्तत्तथोक्तम् । 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वः । वीक्षितं वीक्षणं च ॥ ६१ ॥

रुचिकरमपि नार्थवद्बभूव स्तिमितसमाधिशुचौ पृथातनूजे ।
ज्वलयति महतां मनांस्यमर्षे न हि लभतेऽवसरं सुखाभिलाषः ॥६२॥

अन्वयः—रुचिकरम्, अपि, स्तिमितसमाधिशुचौ, पृथातनूजे, अर्थवत्, न बभूव । हि, महतां मनांसि, अमर्षे, ज्वलयति सति, सुखाभिलाषः, अवसरं, न लभते॥६२॥

रुचिकरमिति ॥ पूर्वोक्तं रुचिकरं स्पृहाजनकमपि । 'रुचिः कान्त्यर्चिषोर्भासि स्त्रियां शोभास्पृहार्थयोः' इति वैजयन्ती । स्तिमितेन स्थिरेण समाधिना तपोयोगेन शुचौ शुद्धे । निर्विकारचेतसीत्यर्थः । पृथातनूजेऽर्जुने विषयेऽर्थवत्सप्रयोजनं न बभूव । तथा हि । महतां धीराणां मनांस्यमर्षे क्रोधे ज्वलयति सति सुखाभिलाषोऽवसरमवकाशं न लभते । रौद्रस्य शृङ्गारविरोधित्वादिति भावः । अत्र विशेषकेऽर्थान्तरन्यासोऽलङ्कारः६२

स्वयं संराध्यैवं शतमखमखण्डेन तपसा
परोच्छित्त्या लभ्यामभिलषति लक्ष्मीं हरिसुते ।
मनोभिः सोद्वेगैः प्रणयविहतिध्वस्तरुचयः
सगन्धर्वा धाम त्रिदशवनिताः स्वं प्रतिययुः ॥ ६३ ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये दशमः सर्गः ।

अन्वयः—एवं हरिसुते, स्वयम्, अखण्डेन, तपसा, शतमखं, संराध्य, परोच्छित्त्या लभ्यां, लक्ष्मीम्, अभिलषति सति, सोद्वेगैः, मनोभिः, प्रणयविहतिध्वस्तरुचय, सगन्धर्वाः, त्रिदशवनिताः, स्वं, धाम, प्रतिययुः ॥ ६३ ॥

स्वयमिति ॥ एवं हरिसुतेऽर्जुने स्वयमखण्डेनाविलुप्तेन तपसा शतमखमिन्द्रं संराध्य प्राणयित्वा परोच्छित्त्या शत्रुवधेन लभ्यां साध्यां लक्ष्मीं राजलक्ष्मीमभिलषति सति सोद्वेगैः कार्यसिद्ध्यभावात्सनिर्वेदैर्मनोभिरुपलक्षिताः । किञ्च । प्रणयविहत्या प्रार्थनाभङ्गेन ध्वस्तरुचयो नष्टकान्तयः सगन्धर्वा गन्धर्वसहितास्त्रिदशवनिताः स्वं धाम स्वस्थानं प्रतिययुः । शिखरिणीवृत्तमेतत्—'रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी' इति लक्षणात् ॥ ६३ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां दशमः सर्गः समाप्तः ॥

एकादशः सर्गः ।

अथामर्षान्निसर्गाच्च जितेन्द्रियतया तया ।
आजगामाश्रमं जिष्णोः प्रतीतः पाकशासनः ॥ १ ॥

अन्वयः—अथ, पाकशासनः, तया, आमर्षात्, निसर्गात्, च, जितेन्द्रियतया, प्रतीतः, जिष्णोः, आश्रमम्, आजगाम ॥ १ ॥

अथेति ॥ अथाप्सरसां प्रतिप्रयाणानन्तरम् । पाको नाम कश्चिद्राक्षसस्तस्य शासन इन्द्रः । नन्द्यादित्वाल्ल्युप्रत्ययः । तयाप्सरोमुखाच्छ्रुतयामर्षाद्द्विषद्द्वेषान्निसर्गाच्च या जितेन्द्रियता तयागन्तुकानागन्तुकोभयविधहेतुकया प्रतीतो हृष्टः सन् । 'ख्याते हृष्टे प्रतीतः' इत्यमरः । जिष्णोरर्जुनस्य । 'जिष्णुः शक्रे धनञ्जये' इत्यमरः । आश्रममाजगाम । अत्रामर्षनिसर्गयोर्जितेन्द्रियताहेतुकं काव्यलिङ्गं स्फुटमवगम्यते ॥१॥

किमिन्द्रो निजरूपेणैवागतो नेत्याह—

मुनिरूपोऽनुरूपेण सूनुना ददृशे पुरः ।
द्राघीयसा वयोतीतः परिक्लान्तः किलाध्वना ॥ २ ॥

अन्वयः—मुनिरूपः, अनुरूपेण, सूनुना, पुरः, ददृशे । वयोतीतः, द्राघीयसा, अध्वना, परिक्लान्तः, किल ॥ २ ॥

मुनिरूप इति ॥ मुने रूपमिव रूपं यस्य स मुनिरूपः । मुनिवेषधारीत्यर्थः । इन्द्रोऽनुरूपेण । दर्शनप्रदानयोग्येनेत्यर्थः । सूनुना पुत्रेणार्जुनेन पुरोऽग्रे ददृशे दृष्टः । कथम्भूतः । वयो यौवनादिकमतीतो वृद्धः । 'द्वितीया श्रित—' इत्यादिना द्वितीयासमासः । द्राघीयसातिदीर्घेण । 'प्रियस्थिर—' इत्यादिना दीर्घशब्दस्य द्राघादेशः । अध्वना । अध्वगमनेनेत्यर्थः । परिक्लान्तः परिश्रान्तः । किलेत्यलीके । वृद्ध इव दूराध्वश्रान्त इव स्थित इत्यर्थः । 'इव' इति पाठे स्पष्टार्थः ॥ २ ॥

अथ चतुर्भिरिन्द्रं विशिनष्टि—

जटानां कीर्णया केशैः संहत्या परितः सितैः ।
पृक्तयेन्दुकरैरह्नः पर्यन्त इव सन्ध्यया ॥ ३ ॥

अन्वयः—परितः, सितैः, केशैः, कीर्णया, जटानां संहत्या, इन्दुकरैः, पृक्तया, सन्ध्यया, अह्नः, पर्यन्तः, इव ॥ ३ ॥

जटानामिति ॥ परितः सितैः केशैः कीर्णया व्याप्तया जटानां संहत्या समूहेनोपलक्षितः । अत एवेन्दुकिरणैः पृक्तया युक्तया सन्ध्ययोपलक्षितोऽह्नः पर्यन्तो दिना-

न्त इव स्थितः। तस्यापि परिणतरूपत्वाद्वृद्धोपमानत्वम्। जटानां संहत्येत्युक्तत्वात्सन्ध्यासाम्यम् ॥ ३ ॥

विशदभ्रूयुगच्छन्नवलितापाङ्गलोचनः।
प्रालेयावततिम्लानपलाशाब्ज इव ह्रदः ॥ ४ ॥

अन्वयः—विशदभ्रयुगच्छन्नवलितापाङ्गलोचनः, प्रालेयावततिम्लानपलाशाब्जः, ह्रदः इव ॥ ४ ॥

विशदेति ॥ पुनश्च। विशदेन पलितपाण्डुरेण भ्रूयुगेन छन्ने वलितापाङ्गे वलितप्रान्ते लोचने यस्य स तथोक्तः। 'अपाङ्गौ नेत्रयोरन्तौ' इत्यमरः। पामादित्वाल्लोमादिसूत्रेण वलच्प्रत्ययः। प्रालेयावतत्या हिमसंहत्या म्लानपलाशानि क्रान्तदलान्यब्जानि यस्मिन्स ह्रद इव स्थितः ॥ ४ ॥

आसक्तभरनीकाशैरङ्गैः परिकृशैरपि।
आद्यूनः सद्गृहिण्येव प्रायो यष्ट्यावलम्बितः ॥ ५ ॥

अन्वयः—परिकृशैः, अपि, आसक्तभरनीकाशैः, अङ्गैः, (उपलक्षितः) आद्यूनः, सद्गृहिण्या, इव, प्रायः, यष्ट्या, अवलम्बितः ॥ ५ ॥

आसक्तेति ॥ पुनश्च परिकृशैः परिक्षीणैरप्यासक्तभरनीकाशैर्भाराक्रान्तप्रख्यैः। सभारवद्गुरुभिरङ्गैरित्यर्थः। 'इकः काशे' इति दीर्घः। अङ्गैरुपलक्षितः। कार्श्याल्लघून्यपि स्वाङ्गानि स्वयं वोढुमसमर्थ इत्यर्थः। अत एवाद्यून औदरिकः। 'आद्यूनः स्यादौदरिको विजिगीषाविवर्जिते' इत्यमरः। अङ्पूर्वाद्दीव्यतेः क्तः। 'च्छ्वोः शूडनुनासिके च' इत्यूठादेशः। 'दिवोऽविजिगीषायाम्' इति निष्ठानत्वम्। सद्गृहिण्यानुकूलकलत्रेणेव प्रायः प्राचुर्येण यष्ट्यावलम्बनदण्डेनावलम्बितो धारितः। न तु स्वशक्त्येति भावः ॥ ५ ॥

गूढोऽपि वपुषा राजन्धाम्ना लोकाभिभाविना।
अंशुमानिव तन्वभ्रपटलच्छन्नविग्रहः ॥ ६ ॥

अन्वयः—वपुषा, गूढः, अपि तन्वभ्रपटलच्छन्नविग्रहः, अंशुमान्, इव, लोकाभिभाविना, धाम्ना, राजन्, (ददृशे) ॥ ६ ॥

गूढ इति ॥ वपुषा गूढोऽपि। प्रच्छन्नरूपोऽपीत्यर्थः। प्रकृत्यादिभ्य उपसंख्यानात्तृतीया। तन्वभ्रपटलच्छन्नविग्रहः स्तोकाभ्रवृन्दान्तरितमूर्तिरंशुमानिव लोकाभिभाविना लोकव्यापिना धाम्ना तेजसा। राजन्दीप्यमानो ददृशे इति पूर्वेण सम्बन्धः ॥ ६ ॥

जरतीमपि बिभ्राणस्तनुमप्राकृताकृतिः ।
चकाराक्रान्तलक्ष्मीकःससाध्वसमिवाश्रमम् ॥ ७ ॥

अन्वयः—जरतीम्, तनुम्, बिभ्राणः, अपि, अप्राकृताकृतिः, आक्रान्तलक्ष्मीकः, आश्रमम्, ससाध्वसम्, इव, चकार ॥ ७ ॥

जरतीमिति ॥ जरतीं जीर्णाम् । 'जीनो जीर्णो जरन्नपि' इत्यमरः । जीर्यतेरतीतार्थे शतृप्रत्ययः । 'उगितश्च' इति ङीप् । तनुं शरीरं बिभ्राणो दधदप्यप्राकृताऽलोकसामान्याकृतिर्मूर्तिर्यस्य स इन्द्र आक्रान्ताभिभूता लक्ष्मीराश्रमशोभा येन स आक्रान्तलक्ष्मीकः । अत्र 'उरःप्रभृतिभ्यः कप्' इति नित्यकबाश्रयणम् । एकवचनोत्तरपदस्यैव लक्ष्मीशब्दस्योरःप्रभृतिषु पाठात् । 'शेषाद्विभाषा' इति विकल्पाश्रयणे तु बहुवचनोत्तरपद इति विवेकः । आश्रमं ससाध्वसमिव चकार । तेजस्विदर्शनाद्भयं भवति । तत्तु न दुःखजनकं तस्यामानुषत्वादिति सूचयितुमिवशब्दः ॥ ७ ॥

अभितस्तं पृथासूनुः स्नेहेन परितस्तरे ।
अविज्ञातेऽपि बन्धौ हि बलात्प्रह्लादते मनः ॥ ८ ॥

अन्वयः—पृथासूनुः, तम्, अभितः, स्नेहेन, परितस्तरे, अविज्ञाते, बन्धौ, अपि, बलात्, मनः, प्रह्लादते, हि ॥ ८ ॥

अभित इति ॥ पृथासूनुरर्जुनस्तमिन्द्रमभितस्तं प्रति स्नेहेन परितस्तरे । तद्गोचरेण प्रेम्णा पर्यावृत्तः । स्तृणातेः कर्मणि लिट् । 'ऋतश्च संयोगादेर्गुणः' इति गुणः । नन्वज्ञातसम्बन्धविशेषस्य तस्येन्द्रे कथं स्नेहोदय इत्यत आह—अविज्ञात इति । बन्धौ सुहृद्यविज्ञातेऽपि बन्धुरयमित्यज्ञातेऽपि बलाद्वान्धवसत्तावशादेव मनः प्रह्लादते हि । स्निह्यतीत्यर्थः ॥ ८ ॥

आतिथेयीमथासाद्य सुतादपचितिं हरिः ।
विश्रम्य विष्टरे नाम व्याजहारेति भारतीम् ॥ ९ ॥

अन्वयः—अथ, हरिः, सुतात्, आतिथेयीम्, अपचितिम्, आसाद्य, विष्टरे, विश्रम्य, नाम, इति, भारतीम्, व्याजहार ॥ ९ ॥

अतिथेयीमिति ॥ अथ हरिरिन्द्रः सुतादर्जुनादातिथेयीमतिथिषु साध्वीम् । 'पथ्यतिथिवसतिस्वपतेर्ढञ्' । अपचितिं पूजामासाद्य प्राप्य । 'पूजा नमस्यापचितिः' इत्यमरः । विष्टर आसने । 'ऋदोरप्' इति स्तृणातेरप्प्रत्ययः । 'वृक्षासनयोर्विष्टरः' इति षत्वम् । विश्रम्य नाम विश्रम्य किल । श्रममपनीयेत्यर्थः । इति वक्ष्यमाणप्रकारां भारतीं व्याजहारोक्तवान् । 'व्याहार उक्तिर्लपितम्' इत्यमरः ॥ ९ ॥

अथ तावन्मुनिवदेनं मुमुक्षुं कृत्वाह—

त्वया साधु समारम्भि नवे वयसि यत्तपः ।
ह्रियते विषयैः प्रायो वर्षीयानपि मादृशः ॥ १० ॥

अन्वयः—त्वया, साधु, समारम्भि, यत्, नवे, वयसि, तपः, (चर्यते) मादृशः, वर्षीयान्, अपि, प्रायः, विषयैः, ह्रियते ॥ १० ॥

त्वयेति ॥ त्वया साधु समारम्भि सम्यगुपक्रान्तम् । रभेः कर्मणि लुङ् । कुतः । यद्यस्मान्नवे वयसि यौवने । तपः । चर्यत इति शेषः । तथा हि । अहमिव दृश्यतेऽसौ मादृशो वर्षीयानतिवृद्धोऽपि । 'प्रियस्थिर–' इत्यादिना वृद्धशब्दस्य वर्षादेशः । प्रायो विषयैर्ह्रियत आकृष्यते । किमु भवादृशो यवीयानिति भावः ॥ १० ॥

अथैनमनारम्भे तव स्वाकारलाभोऽपि विफलः स्यादित्याशयेनाह—

श्रेयसीं तव सम्प्राप्ता गुणसम्पदमाकृतिः ।
सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम् ॥ ११ ॥

अन्वयः—तव, आकृतिः, श्रेयसीं, गुणसम्पदम्, सम्प्राप्ता, लोके, रम्यता, सुलभा, हि, गुणार्जनम्, दुर्लभम् ॥ ११ ॥

श्रेयसीमिति ॥ तवाकृतिर्मूर्तिः । रम्येति शेषः । श्रेयसीं श्रेष्ठां गुणसम्पदं तपः समारम्भरूपां सम्प्राप्ता । अतो न निष्फलेति भावः । न च स्वाकारा गुणाढ्याश्च कियन्तो न सन्तीति वाच्यमित्याह—लोक इति । लोके रम्यता रम्याकारता सुलभा हि । गुणार्जनं गुणसम्पादनं दुर्लभम् । त्वयि तूभयं सम्पन्नमिति हेम्नः परमामोद इति भावः ॥ ११ ॥

यदुक्तम् 'त्वया साधु समारम्भि' इति तदेव साधुत्वं संसारानःसारताख्यापनाद् युग्मेनोपपादयति—

शरदम्बुधरच्छायागत्वर्यो यौवनश्रियः ।
आपातरम्या विषयाः पर्यन्तपरितापिनः ॥ १२ ॥

अन्वयः—यौवनश्रियः, शरदम्बुधरच्छायागत्वर्यः, विषयाः, आपातरम्याः, पर्यन्तपरितापिनः ॥ १२ ॥

शरदिति ॥ यौवनश्रियस्तावच्छरदम्बुधरच्छाया इव गत्वर्यश्चञ्चलाः । 'गत्वरश्च' इति क्वरबन्तो निपातः । 'टिड्ढाणञ्–' इत्यादिना ङीप् । विषयाः शब्दादयस्त्वापातरम्यास्तत्कालरमणीयाः । 'तदात्वे पात आपातः' इति वैजयन्ती । पर्यन्तेऽवसाने परितापयन्ति दुःखं कुर्वन्तीति तथोक्ताः ॥ १२ ॥

अन्तकः पर्यवस्थाता जन्मिनः सन्ततापदः ।
इति त्याज्ये भवे भव्यो मुक्तावुत्तिष्ठते जनः ॥ १२ ॥

अन्वयः—सन्ततापदः, जन्मिनः, अन्तकः, पर्यवस्थाता, इति, त्याज्ये, भवे, भव्यः, जनः, मुक्तौ, उत्तिष्ठते ॥ १३ ॥

अन्तक इति ॥ किं च । सन्तता अनवच्छिन्ना आपदः क्लेशा यस्य तस्य जन्मिनः प्राणिनः । 'प्राणी तु चेतनो जन्मी' इत्यमरः । व्रीह्यादित्वादिनिः । अन्तको मृत्युः पर्यवस्थाता प्रतिरोद्धा । प्रथमं तावज्जन्मिनो जन्मदुःखमेव दुस्तरम्, ततो जातस्य जीवनमपि सततं दुःखसम्भिन्नतया विषयुक्तान्नप्रायम्, तदपि मृत्युग्रस्तमिति सोऽयम् । 'काकमांसं शुनोच्छिष्टं [दुर्गन्धं क्रिमिसङ्कुलम् । म्लेच्छपक्वं सुरासिक्तं] स्वल्पं तदपि दुर्लभम् ॥' इति न्यायादिति भावः । इत्युक्तहेतोस्त्याज्ये भवे संसारे । भवतीति भव्यो योग्यो जनः । भवादृश इति शेषः । 'भव्यं सुखे शुभे चापि भेद्यवद्योग्यभाविनोः' इति विश्वः । 'भव्यगेय—' इत्यादिना कर्तरि निपातः । मुक्तौ मोक्षे उत्तिष्ठत उद्युक्तो भवति । 'उदोऽनूर्ध्वकर्मणि' इत्यात्मनेपदम् ॥ १३ ॥

सम्प्रति प्रशंसापूर्वकं स्वाभिसन्धिं दर्शयति—

चित्तवानसि कल्याणी यत्त्वां मतिरुपस्थिता ।
विरुद्धः केवलं वेषः सन्देहयति मे मनः ॥ १४ ॥

अन्वयः—चित्तवान्, असि, यत्, त्वां, कल्याणी, मतिः, उपस्थिता, केवलं, विरुद्धः, वेषः, मे, मनः, सन्देहयति ॥ १४ ॥

चित्तवानिति ॥ चित्तवान्प्रशस्तचित्तोऽसि । प्रशंसायां मतुप् । कुतः । यतस्त्वां कल्याणी साध्वी । 'बह्वादिभ्यश्च' इति ङीप् । मतिरुपस्थिता सङ्गता । किं तु केवलमेकं यथा तथा विरुद्धो वेषो मे मनः सन्देहयति संशययुक्तं करोति । यद्वा वेषः केवलम् । वेष एवेत्यर्थः । 'केवलः कृत्स्न एके च केवलं चावधारिते' इत्युभयत्रापि शाश्वतः ॥ १४ ॥

वेषविरोधमेवाह—

युयुत्सुनेव कवचं किमामुक्तमिदं त्वया ।
तपस्विनो हि वसते केवलाजिनवल्कले ॥ १५ ॥

अन्वयः—युयुत्सुना, इव, त्वया, किम्, इदम्, कवचम्, आमुक्तम्, हि, तपस्विनः, केवलाजिनवल्कले, वसते ॥ १५ ॥

युयुत्सुनेति ॥ युयुत्सुनेव योद्धुमिच्छुनेव त्वया । युधेः सन्नन्तादुप्रत्ययः । कि-

मिदं कवचं वर्मामुक्तमर्पितम् । तत्र को विरोध इत्यत्राह—हि यस्मात्तपस्विनः केवले एके । कवचाद्यसहचरिते इति यावत् । ते च ते अजिनवल्कले च । 'निर्णीते केवल-मिति त्रिलिङ्गं त्वेककृत्स्नयोः' इत्यमरः । वसत आच्छादयन्ति । अतस्तपस्विनस्ते कवचधारणं विरुद्धमित्यर्थः ॥ १५ ॥

प्रपित्सोः किं च ते मुक्तिं निःस्पृहस्य कलेवरे ।
महेषुधी धनुर्भीमं भूतानामनभिद्रुहः ॥ १६ ॥

अन्वयः—किञ्च, मुक्तिं, प्रपित्सोः, कलेवरे, निःस्पृहस्य, भूतानां, अनभिद्रुहः, ते, महेषुधी, भीमं, धनुः, च, ॥ १६ ॥

प्रपित्सोरिति ॥ किं च । मुक्तिं प्रपित्सोः प्राप्तुमिच्छोः । 'सनि मीमा-' इत्यादिनेसादेशः । 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपः । अतो मुमुक्षुत्वादेव कलेवरे शरीरे गतस्पृहस्य निःस्पृहस्य । अतो नात्मरक्षार्थं धनुर्धारणं युक्तमित्यर्थः । नापि परहिंसार्थमित्याह—भूतानां जन्तूनाम् । 'क्ष्मादौ जन्तौ च भूतानि' इति वैजयन्ती । 'क्रुधद्रुहोरुपसृष्टयोः कर्म' इति कर्मसंज्ञायाम् 'कर्तृकर्मणोः कृति' इति कर्तरि षष्ठी । अनभिद्रुहोऽहिंसकस्य । 'सत्सूद्विष-' इत्यादिना क्विप् । ते तव महेषुधी महानिषङ्गौ भीमं त्रासजनकं धनुश्च । न समर्थयते शममित्युत्तरेणान्वयः । समर्थयत इति वचन-विपरिणामः कार्यः ॥ १६ ॥

भयङ्करः प्राणभृतां मृत्योर्भुज इवापरः ।
असिस्तव तपस्थस्य न समर्थयते शमम् ॥ १७ ॥

अन्वयः—मृत्योः, अपरः, भुजः, इव, प्राणभृताम्, भयङ्करः, असिः, तपस्थस्य, तव, शमं, न, समर्थयते ॥ १७ ॥

भयङ्कर इति ॥ तथा मृत्योरपरो भुज इव प्राणभृतां प्राणिनां भयं करोतीति भयङ्करः । 'मेघर्तिभयेषु कृञः' इति खच्प्रत्ययः । 'अरुर्द्विष—' इत्यादिना मुमा-गमः । असिः खड्गः । तपसि तिष्ठतीति तपस्थः । तपश्चरणरत इत्यर्थः । 'सुपि स्थः' इति कप्रत्ययः । तस्य तव शमं शान्तिं न समर्थयते न सम्भावयति । किं शान्तस्य शस्त्रे-णेति भावः ॥ १७ ॥

नन्वशान्तस्य किं तपसेत्याशङ्क्य जयार्थमित्याह—

जयमत्रभवान्नूनमरातिष्वभिलाषुकः ।
क्रोधलक्ष्म क्षमावन्तः क्वायुधं क्व तपोधनाः ॥ १८ ॥

अन्वयः—अत्र भवान्, अरातिषु, जयम्, अभिलाषुकः, नूनम्, क्रोधलक्ष्म, आयुधं, क्व, क्षमावन्तः, तपोधनाः, क्व, ॥ १८ ॥

जयमिति ॥ अत्र भवान्। पूज्य इत्यर्थः,। 'इतराभ्योऽपि दृश्यन्ते' इति प्रथमार्थे प्राग्दिशीयस्त्रल्प्रत्ययः। सुप्सुपेति समासः। 'त्रिषु तत्र भवान्पूज्यस्तथैवात्रभवानपि' इति यादवः। अरातिषु शत्रुषु विषये जयमभिलाषुको जयमिच्छुः। 'लषपत–' इत्यादिनोकञ्प्रत्ययः। 'न लोक–' इत्यादिना षष्ठीप्रतिषेधः। नूनमिति निश्चये। 'नूनं तर्केऽपि निश्चये' इत्यमरः। क्रोधस्य लक्ष्म कोपस्य लिङ्गमायुधं क्व। क्षमावन्तः शान्तास्तपोधनाः क्व। क्रोधशान्त्योर्विरोधात्तत्कार्ययोः शस्त्रतपसोरप्येकत्रासङ्गतेश्च शस्त्रिणस्ते तपो जयार्थं न तु मोक्षार्थमिति निश्चय इत्यर्थः ॥ १८ ॥

तपसो जयार्थत्वे दोषमाह—

> यः करोति वधोदर्का निःश्रेयसकरीः क्रियाः।
> ग्लानिदोषच्छिदः स्वच्छाः स मूढः पङ्कयत्यपः ॥ १९ ॥

अन्वयः—यः, निःश्रेयसकरीः, क्रियाः, वधोदर्काः, करोति, मूढः, सः, ग्लानिदोषच्छिदः, स्वच्छाः, अपः, पङ्कयति, ॥ १९ ॥

य इति ॥ यः पुमान्निश्चितं श्रेयो निःश्रेयसं मुक्तिः। 'अचतुर–' इत्यादिना समासान्तो निपातः। 'मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्' इत्यमरः। निःश्रेयसं कुर्वन्तीति निःश्रेयसकरीः। निःश्रेयसहेतूनित्यर्थः। 'कृञो हेतुताच्छील्यानुलोम्येषु' इति हेत्वर्थे टप्रत्ययः। टित्वान्ङीप्। क्रियास्तपोदानादिकर्माणि वधोदर्का हिंसाफलकाः करोति। 'उदर्कः फलमुत्तरम्' इत्यमरः। अत एव मूढः स पुमान् ग्लानिरेव दोषस्तं छिन्दन्तीति ग्लानिदोषच्छिदः पिपासाहारिणीः। क्विप्। स्वच्छा निर्मला अपः पङ्कयति पङ्कवतीः करोति। 'णाविष्ठवद्भावे विन्मतोर्लुक्' इति मतुपो लुक्। महाफलसाधनस्य तपसस्तुच्छफलैर्विनियोगः स्वच्छाम्बुनः पङ्कसङ्करवत्प्रेक्षावद्भिर्गर्हित इत्यर्थः। अत्र 'यत्तपसो वधोदर्कीकरणं तन्निर्मलस्य पयसः पङ्कसङ्करीकरणम्' इति वाक्यार्थे वाक्यार्थान्तरमारोप्य प्रतिबिम्बकरणाक्षेपादसम्भवद्वस्तुसम्बन्धाद्वाक्यार्थवृत्तिनिदर्शनालङ्कारः ॥ १९ ॥

नन्वर्थकामयोरपि मोक्षवत्पुरुषार्थत्वात्तपसस्तदर्थत्वे को दोषस्तत्राह—

> मूलं दोषस्य हिंसादेरर्थकामौ स्म मा पुषः।
> तौ हि तत्त्वावबोधस्य दुरुच्छेदावुपप्लवौ ॥ २० ॥

अन्वयः—हिंसादेः, दोषस्य, मूलम्, अर्थकामौ, मा, स्म, पुषः, हि, तौ, तत्त्वावबोधस्य, दुरुच्छेदौ, उपप्लवौ ॥ २० ॥

मूलमिति ॥ हिंसादेरिति तद्गुणसंविज्ञानो बहुव्रीहिः। आदिशब्दादनृतस्तेयादीनां सङ्ग्रहः। दोषस्यावगुणस्य मूलं कारणभूतौ। 'स्त्रीकामा धनकामाश्च किं न

कुर्वन्ति पातकम्' इति भावः। अर्थकामौ मा स्म पुषो नोपचिनुष्व। 'स्मोत्तरे लङ् च' इति लङ्। 'पुषादि-' इत्यादिना च्लेरङादेशः। हि यस्मात्तावर्थकामौ तत्त्वावबोधस्य तत्त्वज्ञानस्य। मोक्षसाधनस्येति शेषः। दुरुच्छेदौ दुर्वारावुपप्लवौ हिंसादिप्रवर्तकत्वादन्तकौ। अतः पुरुषार्थपरिपन्थिनावेतौ न पुरुषार्थावित्यर्थः॥ २०॥

मुक्तिप्रतिबन्धकत्वादपुरुषार्थावर्थकामावित्युक्तम्। तत्रार्थस्य दुःखैकनिदानत्वादप्यपुरुषार्थत्वमिति पञ्चभिः प्रपञ्चयति—

अभिद्रोहेण भूतानामर्जयन्गत्वरीः श्रियः।
उदन्वानिव सिन्धूनामापदामेति पात्रताम्॥ २१॥

अन्वयः—भूतानाम्, अभिद्रोहेण, गत्वरीः, श्रियः, अर्जयन्, उदन्वान्, सिन्धूनाम्, इव, आपदाम्, पात्रताम्, एति॥ २१॥

अभिद्रोहेणेत्यादि॥ भूतानामभिद्रोहेण हिंसया गत्वरीरस्थिराः श्रियः सम्पदोऽर्जयञ्जनः। उदकमस्तीत्युदन्वानुदधिः। 'उदन्वानुदधौ च' इति निपातनात्साधुः। सिन्धूनां नदीनामिवापदां विपदां पात्रतां मूलत्वमेति॥ २१॥

आपत्पात्रतामेव व्यनक्ति—

या गम्याः सत्सहायानां यासु खेदो भयं यतः।
तासां किं यन्न दुःखाय विपदामिव सम्पदाम्॥ २२॥

अन्वयः—याः, (सम्पदः), सत्सहायानाम्, गम्याः, यासु, खेदः, यतः, भयम्, विपदाम्, इव, तासाम्, सम्पदाम्, न, किम्, यत्, दुःखाय,॥ २२॥

या इति॥ याः सम्पदः सत्सहायानां विद्यमानसाधनानामेव पुंसां गम्याः साध्याः। विपदोऽपि सत्सहायानामेव गम्याः। निस्तीर्या इत्यर्थः। 'कृत्यानां कर्तरि वा' इति षष्ठी। यासु सतीषु खेदो रक्षणादिक्लेशः। विपत्सु स्वरूप एवेति विशेषः। यतो याभ्यः सम्पद्भ्यो भयम्। अनेकानर्थमूलत्वादिति भावः। विपद्भ्यस्तु स्वरूपत एवेति भावः। किं बहुना। विपदामिव तासां सम्पदां सम्बन्धि न किम्। अस्तीति शेषः। यद्दुःखाय न भवति। सर्वं दुःखावहमेवेति भावः। यथाहुः—'अर्थानामर्जने दुःखमर्जितानां च रक्षणे। नाशे दुःखं व्यये दुःखं धिगर्थं दुःखभाजनम्॥' इति। अतो हेया इति भावः। अत्र यन्न दुःखायेत्युत्तरवाक्यस्य यच्छब्दसामर्थ्यात्तासां किमिति पूर्ववाक्ये तच्छब्दोपादानं नापेक्षते। तदेतत्काव्यप्रकाशे स्पष्टम्॥ २२॥

दुरासदानरीनुग्रान्धृतेर्विश्वासजन्मनः।
भोगान्भोगानिवाहेयानध्यास्यापन्न दुर्लभा॥ २३॥

अन्वयः—दुरासदान्, विश्वासजन्मनः, धनैः, उग्रान्, अरीन्, भोगान्, आहेयान्, भोगान्, इव, अध्यास्य, आपत्, न, दुर्लभा ॥ २३ ॥

दुरासदानिति ॥ किं च । दुरासदान्दुःप्रापान् । विश्वासाज्जन्म यस्यास्तस्याः । जन्मोत्तरपदत्वाद्व्यधिकरणो बहुव्रीहिः । धनैः सन्तोषस्योग्रानरीन् । धनिकस्य सर्वत्रानाश्वाससम्भवाद्विश्रम्भसुखभञ्जकानित्यर्थः । भुज्यन्त इति भोगान्धनान्याहेयानहिषु भवान् । 'दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्' । भोगान्फणानिव । 'भोगः सुखे धने चाहेः शरीरफणयोरपि' इत्युभयत्रापि विश्वः । अध्यास्याधिष्ठायापद्विपन्न दुर्लभा । आशीविषमुखमिव नेच्छन्तमेव भोगिनं पुमांसं बलादापदवस्कन्दतीत्यर्थः ॥ २३ ॥

इतोऽपि श्रियो हेया इत्याह—

नान्तरज्ञाः श्रियो जातु प्रियैरासां न भूयते ।

आसक्तास्तास्वमी मूढा वामशीला हि जन्तवः ॥ २४ ॥

अन्वयः—श्रियः, जातु, अन्तरज्ञाः, न, आसां, प्रियैः, न, भूयते, मूढाः, अमी, तासु, आसक्ताः, हि, जन्तवः वामशीलाः ॥ २४ ॥

नेति ॥ श्रियः सम्पदो जातु कदाचिदन्तरज्ञा नीचानीचविशेषाभिज्ञा न भवन्ति । अत एवासां श्रियां प्रियैर्न भूयते । न ताः कुत्राप्यनुरज्यन्तीत्यर्थः । नन्वयं श्रीदोषो न पुरुषदोष इति चेत्तत्राह—मूढा अमी जनास्तास्वननुरक्तास्वपि श्रीष्वासक्ताः । स्त्रीष्विव श्रीष्वननुरक्तास्वनुरागः पुंसामेवायं दोष इत्यर्थः । किमर्थं तर्हि तास्वेव सर्वेषामासक्तिरित्यर्थान्तरं न्यस्यति—वामेति । जन्तवो वामशीला वक्रस्वभावा हि । स्वभावस्य दुर्वारत्वादिति भावः ॥ २४ ॥

यदुक्तम् 'नान्तरज्ञाः श्रियः' इति, तदेव भङ्ग्यन्तरेणाह—

कोऽपवादः स्तुतिपदे यदशीलेषु चञ्चलाः ।

साधुवृत्तानपि क्षुद्रा विक्षिपन्त्येव सम्पदः ॥ २५ ॥

अन्वयः—सम्पदः, अशीलेषु, यत्, चञ्चलाः, (अतः) स्तुतिपदे, कः, अपवादः, (किन्तु) क्षुद्राः, साधुवृत्तान्, अपि, विक्षिपन्ति, एव ॥ २५ ॥

क इति ॥ सम्पदोऽशीलेषु दुःशीलेषु विषये न तद्विरुद्धमुच्यते यच्चञ्चला इति । अतः स्तुतिपदे स्तुतिविषये तत्र कोऽपवादः का निन्दा । किन्तु क्षुद्राः सम्पदः साधुवृत्तानपि विक्षिपन्त्येव जहत्येव । तदेव तासां निन्दापदमित्यर्थः । तस्मादर्थो न पुरुषार्थ इति सन्दर्भार्थः ॥ २५ ॥

ननु मार्थमहमर्थये, किन्तु वीरधर्ममनुपालयन्वैरनिर्यातनमिच्छामीत्याशङ्क्य तदपि

परपीडात्मकत्वादयुक्तमिति श्लोकचतुष्टयेनाचष्टे—

कृतवानन्यदेहेषु कर्ता च विधुरं मनः ।
अप्रियैरिव संयोगो विप्रयोगः प्रियैः सह ॥ २६ ॥

अन्वयः—अप्रियैः, संयोगः, इव, प्रियः, सह, विप्रयोगः, अन्यदेहेषु, मनः, विधुरम्, कृतवान्, कर्ता, च ॥ २६ ॥

कृतवानिति ॥ तत्रात्मदृष्टान्तेनैव परपीडातो निवर्तितव्यमित्याशयेनाह—अप्रियैरनिष्टवस्तुभिः संयोग इव प्रियैरिष्टवस्तुभिः सह विप्रयोगो विरहोऽन्यदेहेषु स्वस्यैव देहान्तरेषु । अतीतानागतेष्विति शेषः । मनो विधुरं दुःखितं कृतवान् कर्ता करिष्यति च । भविष्ये लुट् । तद्वर्तमाने चानुभूयत इति शेषः । इष्टनाशो दुःखहेतुरिति सर्वत्रापि त्रैकालिकसिद्धमिति श्लोकार्थः ॥ २६ ॥

सम्प्रतीष्टसमागमस्य सुखहेतुत्वमाह—

शून्यमाकीर्णतामेति तुल्यं व्यसनमुत्सवैः ।
विप्रलम्भोऽपि लाभाय सति प्रियसमागमे ॥ २७ ॥

अन्वयः—प्रियसमागमे, सति, शून्यम्, अपि आकीर्णताम्, एति व्यसनम्, (अपि) उत्सवैः, तुल्यम्, विप्रलम्भः, (अपि) लाभाय ॥ २७ ॥

शून्यमिति ॥ प्रियसमागम इष्टजनसंयोगे सति शून्यं रिक्तमप्याकीर्णतां सम्पूर्णतामेति । समृद्धमिव प्रतीयत इत्यर्थः । व्यसनं विपदप्युत्सवैस्तुल्यम् । 'व्यसनं विपदि भ्रंशे' इत्यमरः । विप्रलम्भो वञ्चना । प्रतारणमिति यावत् । सोऽपि लाभाय । किं बहुना, प्रियसङ्गतस्य सर्वावस्थास्वपि सुखमेवेत्यर्थः ॥ २७ ॥

पुनः प्रकारान्तरेण प्रियवियोगस्य दुःखहेतुत्वमाह—

तदा रम्याण्यरम्याणि प्रियाः शल्यं तदासवः ।
तदैकाकी सबन्धुः सन्निष्टेन रहितो यदा ॥ २८ ॥

अन्वयः—तदा, रम्याणि, अरम्याणि, (भवन्ति) प्रियाः, असवः (अपि) शल्यम्, तदा, सबन्धुः, सन्, (अपि) एकाकी, यदा, इष्टेन, रहितः ॥ २८ ॥

तदेति ॥ तदा रम्याण्यप्यरम्याण्यमनोहराणि भवन्ति । किं बहुना, प्रिया असवः प्राणा अपि शल्यम् । शल्यवदसह्या भवन्तीत्यर्थः । किं च । तदा सबन्धुः सन्नप्येकाक्यसहाय एव । 'एकादाकिनिच्चासहाये' इत्याकिनिच्प्रत्ययः । यदेष्टेन रहितः ॥ २८ ॥

युक्तः प्रमाद्यसि हितादपेतः परितप्यसे ।
यदि नेष्टात्मनः पीडा मा सञ्जि भवता जने ॥ २९ ॥

अन्वयः—युक्तः, प्रमाद्यसि, हितात्, अपेतः, परितप्यसे, पीडा, आत्मनः, नेष्टा, यदि, भवता, जने, मा सञ्जि ॥ २९ ॥

युक्त इति ॥ किं च । युक्तः हितेनेति शेषः । हितेनेष्टेन युक्तः सन् । प्रमाद्यसि प्रकर्षेण माद्यसि हृष्यसि । हितादपेतः परितप्यसे परितप्तो भवसि । तपेदवादिकात्कर्तरि लट् । सत्यमेवं ततः किमत आह—यदीति । पीडा आत्मनः स्वस्य च नेष्टा यदि तर्हि भवता जने परस्मिन्नपि मा सञ्जि न सञ्ज्यताम् । सञ्जतेर्ण्यन्तात्कर्मणि लुङ् । आत्मदृष्टान्तेन परपीडातो निवर्तितव्यमित्यर्थः । पीडायाः परात्मनोः समत्वात्॥२९॥

अथ देहास्थैर्यश्रद्धया च परपीडा न कार्येत्याह—

जन्मिनोऽस्य स्थितिं विद्वांल्लक्ष्मीमिव चलाचलाम् ।
भवान्मा स्म वधीन्न्याय्यं न्यायाधारा हि साधवः ॥३०॥

अन्वयः—अस्य, जन्मिनः, स्थितिम्, लक्ष्मीम्, इव, चलाचलाम्, विद्वान्, भवान्, न्याय्यम्, मास्म वधीत्, हि, साधवः, न्यायाधाराः ॥ ३० ॥

जन्मिन इति ॥ अस्य जन्मिन उत्पत्तिधर्मिकस्य शरीरिणः । व्रीह्यादित्वादिनिः । स्थितिं लक्ष्मीमिव चलाचलां चञ्चलां जन्मिधर्मत्वादेव चलाम् । अनित्यामित्यर्थः । चलतेः पचाद्यच् । 'चरिचलिपतिवदीनां वा द्वित्वमच्याक्चाभ्यासस्येति वक्तव्यम्' इति द्विर्भावः । अभ्यासस्यागागमश्च । विद्वान् । जानन्नित्यर्थः । 'विदेः शतुर्वसुः' इति वैकल्पिको वस्वादेशः । भवान् । न्यायादनपेतं न्याय्यम् । 'धर्मपथ्यर्थन्यायादनपेते' इति यत्प्रत्ययः । मा स्म वधीत् । मा नाशयेत्यर्थः । 'स्मोत्तरे लङ् च' इति लुङ् । 'लुङि च' इति हनो वधादेशः । 'शेषे प्रथमः' इति प्रथमपुरुषः । हि यस्मात्साधवो न्यायाधारा न्यायावलम्बाः । बहुव्रीहिस्तत्पुरुषो वा । न्यायत्यागे साधुत्वमेव न स्यादिति भावः । 'न्यायाचाराः' इति पाठे न्यायमाचरन्तीति तथोक्ताः । कर्मण्यण् ॥ ३० ॥

तर्हि किं मे कर्तव्यं तत्राह—

विजहीहि रणोत्साहं मा तपः साधु नीनशः ।
उच्छेदं जन्मनः कर्तुमेधि शान्तस्तपोधन ॥ ३१ ॥

अन्वयः—हे तपोधन ! रणोत्साहम्, विजहीहि, साधु, तपः, मा, नीनशः, जन्मनः, उच्छेदम्, कर्तुम्, शान्तः, एधि ॥ ३१ ॥

विजहीहीति ॥ हे तपोधन, रणोत्साहं रणोद्योगम् । लोकोत्तरेषु कार्येषु स्थेयान्प्रयत्न उत्साहस्तं विजहीहि त्यज । 'आ च हौ' इतीकारः । साधु समीचीनम् । निःश्रेयस्करत्वादिति भावः । तपो मा नीनशो न नाशय । नश्यतेर्ण्यन्तान्माङ्योगा-

दाशिषि लुङ् । अडागमनिषेधश्च । किन्तु जन्मन उच्छेदं कर्तुम् । मोक्षं साधयितुमित्यर्थः । शान्त एधि । विजिगीषानिवृत्तो भवेत्यर्थः । 'हुझल्भ्यो हेर्धिः' इति धिः । 'घ्वसोरेद्धावभ्यासलोपश्च' इत्येकार इति ॥ ३१ ॥

अथ सर्वथा मे विजयकण्डूतिर्न निवर्तत इत्याशङ्क्य तर्ह्यन्तःशत्रुविजयेन विधीयतां तदपनोद इत्याह—

जीयन्तां दुर्जया देहे रिपवश्चक्षुरादयः ।
जितेषु ननु लोकोऽयं तेषु कृत्स्नस्त्वया जितः ॥ ३२ ॥

दुर्जयाः, चक्षुरादयः, देहे, (वर्तमानाः) ।रिपवः, जीयन्ताम् , तेषु जितेषु, त्वया, अयं, कृत्स्नः, लोकः, जितः, ननु ॥ ३२ ॥

जीयन्तामिति ॥ दुर्जया अजय्याश्चक्षुरादयो देहे वर्तमाना रिपवो जीयन्ताम् । यस्मात्तेष्वन्तःशत्रुषु जितेषु सत्सु त्वयायं कृत्स्नो लोको जितो ननु । किमुतान्ये शत्रवस्तदन्तर्गता इत्यर्थः । जितेन्द्रियस्येन्द्रियार्थनिःस्पृहस्य वैरानुदयाद्विजयव्यपदेशः ॥ ३२ ॥

अजितेन्द्रियस्यानिष्टमाचष्टे—

परवानर्थसंसिद्धौ नीचवृत्तिरपत्रपः ।
अविधेयेन्द्रियः पुंसां गौरिवैति विधेयताम् ॥ ३३ ॥

अन्वयः—अर्थसंसिद्धौ, परवान् , नीचवृत्तिः, अपत्रपः, अविधेयेन्द्रियः, गौः, इव, पुंसाम् , विधेयताम् , एति ॥ ३३ ॥

परवानिति ॥ अर्थसंसिद्धाभ्यवहारादिस्वार्थसाधने परवान्पराधीनः । 'परतन्त्रः पराधीनः परवान्' इत्यमरः । नीचवृत्तिः कर्षणवहनादिनिकृष्टकर्मापत्रपो निर्लज्जोऽविधेयेन्द्रियोऽजितेन्द्रियः पुमान्गौर्बलीवर्द इव पुंसां विधेयतां यथोक्तकारिताम् । प्रेष्यतामिति यावत् । 'विधेयो विनयग्राही वचने स्थित आश्रव.' इत्यमरः । एति प्राप्नोति । उपमालङ्कारोऽयम्–'प्रकृताप्रकृतयोरर्थसाधर्म्याच्छेपे तु शब्दमात्रसाधर्म्यम्' इति ॥३३॥

न केवलं हिंसादिदोषमूलत्वाद्विषयाणां हेयत्वम् । किन्त्वपारमार्थिकत्वादपीत्याह—

श्वस्त्वया सुखसंवित्तिः स्मरणीयाधुनातनी ।
इति स्वप्नोपमान्मत्वा कामान्मा गास्तदङ्गताम् ॥ ३४ ॥

अन्वयः—अधुनातनी, सुखसंवित्तिः, श्वः, त्वया, स्मरणीया, इति, कामान् , स्वप्नोपमान् , मत्वा तदङ्गताम् , मा, गाः ॥ ३४ ॥

श्व इति ॥ अधुना भवा अधुनातनीत्यागोन्तनी । 'सायंचिरं—इत्यादिना ष्टु-

प्रत्ययः । सुखसंवित्तिः सुखानुभवः श्वः परेऽहनि त्वया स्मरणीया । न त्वनुभवनीया । इति हेतोः । काम्यन्त इति कामा विषयास्तान्स्वप्नोपमान्स्वप्नतुल्यान्मत्वाऽतास्त्विकाश्चिन्त्य तदङ्गतां तच्छेषत्वं कामपरतन्त्रतां मा गा न गच्छ । 'इणो गा लुङि' इति गादेशः ॥ ३४ ॥

इतोऽपि हेयाः कामा इत्याह—

अश्रद्धेया विप्रलब्धारः प्रिया विप्रियकारिणः ।

सुदुस्त्यजास्त्यजन्तोऽपि कामाः कष्टा हि शत्रवः ॥ ३५ ॥

अन्वयः—अश्रद्धेयाः, विप्रलब्धारः, प्रियाः, विप्रियकारिणः, त्यजन्तः, अपि, सुदुस्त्यजाः, कामाः, कष्टाः, शत्रवः, हि ॥ ३५ ॥

अश्रद्धेया इति ॥ श्रद्धातुमर्हाः श्रद्धेया विश्वसनीयास्तथा विप्रलब्धारः प्रतारकाः विश्वासघातका इत्यर्थः । तथा प्रीणयन्तीति प्रियाः प्रीतिजनकाः । 'इगुपध—'इत्यादिना कप्रत्ययः । तथापि विप्रियकारिणो दुःखजननशीलाः । किं च । त्यजन्तोऽपि पुरुषं विहाय गच्छन्तोऽपि सुदुस्त्यजाः स्वयं तेन त्यक्तुमशक्याः कामा विषयाः कष्टाः कुत्सिताः शत्रवो हि । प्रसिद्धशत्रुवैधर्म्यादिति भाव । अत्र श्रद्धेयत्वादीनां विप्रलम्भकत्वादीनां चैकत्र विरोधो विषयस्वाभाव्येन समाधीयत इति विरोधाभासोऽलङ्कारः । तेन च कामानां प्रसिद्धशत्रुवैधर्म्यं व्यतिरेकेण व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः ॥३५॥

तर्हि किं कर्तव्यमित्याशङ्क्योपसंहरन्नाह—

विविक्तेऽस्मिन्नगे भूयः प्लाविते जह्नुकन्यया ।

प्रत्यासीदति मुक्तिस्त्वां पुरा मा भूरुदायुधः ॥ ३६ ॥

अन्वयः—विविक्ते, जह्नुकन्यया, भूयः, प्लाविते, अस्मिन्, नगे, त्वां मुक्तिः, पुरा, प्रत्यासीदति, उदायुधः, मा भूः ॥ ३६ ॥

विविक्त इति ॥ विविक्ते विजने । 'विविक्तविजनच्छन्ननिःशलाकास्तथा रहः' इत्यमरः । जह्नुकन्यया गङ्गया भूयो भूयिष्ठं पुनःपुनर्वा । 'भूयः पुनःपुनः ख्यातं भूतार्थे पुनरव्ययम्' इति विश्व । प्लाविते सिक्ते । ''पाविते'' इति पाठे पवित्रीकृत इत्यर्थः । अस्मिन्नग इन्द्रकीले त्वां मुक्तिः पुरा निकटे प्रत्यासीदति । सन्निकृष्टा भविष्यतीत्यर्थः । 'पुरा पुराणे निकटप्रबन्धातीतभाविषु' इति विश्व । उदायुधो गृहीतशस्त्रो मा भूः । शस्त्रं विमुञ्चेत्यर्थः ॥ ३६ ॥

व्याहृत्य मरुतां पत्याविति वाचमवस्थिते ।

वचः प्रश्रयगम्भीरमथोवाच कपिध्वजः ॥ ३७ ॥

अन्वयः—मरुताम्, पत्यौ, इति, वाचम्, व्याहृत्य, अवस्थिते, अथ, कपिध्वजः, प्रश्रयगम्भीरम्, वचः, उवाच ॥ ३७ ॥

व्याहृत्येति ॥ मरुतां पत्यौ देवेन्द्र इति वाचं व्याहृत्योक्त्वावस्थिते सति तूष्णीं स्थिते सति। अथ कपिध्वजोऽर्जुनः प्रश्रयगम्भीरं विनयमधुरम्। 'विनयप्रश्रयौ समौ' इति यादवः। वच उवाचोक्तवान् ॥ ३७ ॥

किमुवाचेत्यपेक्षायामादौ चतुर्भिरिन्द्रवाक्यमुपश्लोकयन्नाह—

प्रसादरम्यमोजस्वि गरीयो लाघवान्वितम्।
साकाङ्क्षमनुपस्कारं विष्वग्गति निराकुलम् ॥ ३८ ॥

अन्वयः—प्रसादरम्यम्, ओजस्वि, गरीयः, लाघवान्वितम्, साकाङ्क्षम्, अनुपस्कारम्, विष्वग्गति, निराकुलम्, ॥ ३८ ॥

प्रसादेति ॥ प्रसादोऽत्र प्रसिद्धार्थपदत्वं तेन रम्यम्। 'प्रसिद्धार्थपदत्वं यत्स प्रसादो निगद्यते' इति लक्षणात्। ओजस्वि समासभूयिष्ठम्। 'ओजः समासभूयस्त्वम्' इति शासनात्। गरीयोऽर्थभूयस्त्वपरिगतम्। न तु शब्दाडम्बरमात्रमित्यर्थः। लाघवान्वितं विस्तरदोषरहितम्। साकाङ्क्षमाकाङ्क्षावत्पदकदम्बात्मकम्। न तु दशदाडिमादिवाक्यवदनाकाङ्क्षितमित्यर्थः। अनुपस्कारमध्याहारदोषरहितम्। विष्वग्गति कृत्स्नार्थप्रतिपादकम्। न तु सावशेषार्थमत एव निराकुलमसङ्कीर्णार्थम् ॥ ३८ ॥

न्यायनिर्णीतसारत्वान्निरपेक्षमिवागमे।
अप्रकम्प्यतयान्येषामाम्नायवचनोपमम् ॥ ३९ ॥

अन्वयः—न्यायनिर्णीतसारत्वात्, आगमे, निरपेक्षम्, इव, अन्येषां, अप्रकम्प्यतया आम्नायवचनोपमम् ॥ ३९ ॥

न्यायेति ॥ पुनर्न्यायेन युक्त्या निर्णीतसारत्वान्निश्चितार्थत्वाद्धेतोरागमे शास्त्रे, विषये निरपेक्षं स्वतन्त्रमिव। युक्तिदार्ढ्यादेवं प्रतीयते। वस्तुतस्तु शास्त्रसिद्धार्थमेवेतीवशब्दार्थः। किं च। अन्येषां प्रतिवादिनामप्रकम्प्यतयानुमानादिभिरबाध्यत्वादप्रत्याख्येयतयाम्नायवचनोपमम्। वेदवाक्यतुल्यमित्यर्थः ॥ ३९ ॥

अलङ्घ्यत्वाज्जनैरन्यैः क्षुभितोदन्वदूर्जितम्।
औदार्यादर्थसम्पत्तेः शान्तं चित्तमृषेरिव ॥ ४० ॥

अन्वयः—अन्यैः, जनैः, अलङ्घ्यत्वात्, क्षुभितोदन्वदूर्जितम्, औदार्यात्, अर्थसम्पत्तेः, ऋषेः, चित्तम्, इव, शान्तम् ॥ ४० ॥

अलङ्घ्यत्वादिति ॥ अन्यैर्जनैरलङ्घ्यत्वादनुल्लङ्घनीयत्वात्क्षुभितोदन्वदूर्जित-

सुहेलाम्भोधिगम्भीरम्। औदार्यादुक्तिविशेषत्वात्। श्लाघ्यविशेषणत्वाद्वा। तदुक्तं दण्डिना—'उत्कर्षवान्गुणः कश्चिदुक्ते यस्मिन्प्रतीयते। तदुदाराह्वयं तेन सनाथा काव्यपद्धतिः। श्लाघ्यैर्विशेषणैर्युक्तमुदारं कैश्चिदिष्यते॥' इति। 'अग्राम्यार्थत्वात्' इति केचित्। अन्यत्र त्यागित्वादित्यर्थः। अर्थसम्पत्तेः प्रयोजनसम्पत्तेः। अन्यत्राणिमादिसमृद्धेः। ऋषेर्मुनेश्चित्तमिव शान्तं सौम्यम्॥ ४०॥

इदमीदृग्गुणोपेतं लब्धावसरसाधनम्।

व्याकुर्यात्कः प्रियं वाक्यं यो वक्ता नेदृगाशयः॥ ४१॥

अन्वयः—इदमीदृग्गुणोपेतम्, लब्धावसरसाधनम्, प्रियम्, वाक्यम्, कः, वक्ता, व्याकुर्य्यात्, यः, ईदृगाशयः, न॥ ४१॥

इदमिति॥ इदमीदृग्गुणोपेतं यथोक्तगुणयुक्तम्। इदमुपपदादृदृशेः क्विप्। 'इदं किमोरीश्की' इतीशादेशः। लब्धे प्राप्तेऽवसरसाधने कालोपायौ येन तत्प्रियं प्रीतिकरं वाक्यं को वक्ता व्याकुर्याद्व्याहरेत्। यो वक्ता सोऽनीदृगाशय ईदृग्विवक्षाभावान्न भवति। अबुद्धिरित्यर्थः। तस्यार्थस्य वक्तुमशक्यत्वादिति भावः॥ ४१॥

एवमिन्द्रवाक्यमुपश्लोक्य नाहमस्योपदेशस्याधिकारीति परिहरति—

न ज्ञातं तात यत्नस्य पौर्वापर्यममुष्य ते।

शासितुं येन मां धर्मं मुनिभिस्तुल्यमिच्छसि॥ ४२॥

अन्वयः—तात! अमुष्य, यत्नस्य, पौर्वापर्यम्, ते, न, ज्ञातम्, येन, माम्, मुनिभिः, तुल्यम्, धर्म्मम्, शासितुम्, इच्छसि॥ ४२॥

नेति॥ हे तात, अमुष्य यत्नस्य तपोरूपस्यास्य मदीयोद्योगस्य पूर्वं चापरं च पूर्वापरे त एव पौर्वापर्यं कारणं फलं च। चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्प्रत्ययः। ते तव न ज्ञातम्। त्वया न ज्ञायत इत्यर्थः। 'मतिबुद्धि–' इत्यादिना वर्तमाने क्तः। तद्योगादेव षष्ठी। कुतः। येन कारणेन मां मुनिभिस्तुल्यं सदृशं धर्मं मोक्षधर्मं शासितुमुपदेष्टुमिच्छसि। शासिरयं दुहादित्वाद्द्विकर्मको ज्ञेयः॥ ४२॥

अथ पौर्वापर्यमज्ञात्वाप्युपदेशे दोषमाह—

अविज्ञातप्रबन्धस्य वचो वाचस्पतेरपि।

व्रजत्यफलतामेव नयद्रुह इवेहितम्॥ ४३॥

अन्वयः—अविज्ञातप्रबन्धस्य, वाचस्पतेः, अपि, वचः, नयद्रुहः, ईहितम्, इव, अफलताम्, व्रजति, एव॥ ४३॥

अविज्ञातेति॥ अविज्ञातः प्रबन्धः पूर्वापरसङ्गतिर्येन तस्य वाचस्पतेर्बृहस्पतेरपि। कस्कादित्वात्सः। अथवा 'षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु' इति सकारः। एव-

स्यादेव ज्ञापकादलुगिति केचित् । वच उपदेशो नयद्रुहो नीतिविरुद्धकारिणः पुरुषस्य अहितमुद्योग इवाफलतां निष्फलत्वं व्रजत्येव गच्छत्येव ॥ ४३ ॥

ननु सदुपदेशस्य कुतो वैफल्यमित्याशङ्क्य सोऽप्यस्थाने प्रयुक्तश्चेदूषरक्षेत्रे शालिबीजवद्विफल एवेत्याशयेनाह—

श्रेयसोऽप्यस्य ते तात वचसो नास्मि भाजनम् ।
नभसः स्फुटतारस्य रात्रेरिव विपर्ययः ॥ ४४ ॥

अन्वयः—तात, ! श्रेयसः, अपि, अस्य, ते, वचसः, रात्रेः, विपर्ययः, स्फुटतारस्य, नभसः, इव, भाजनम् , न, अस्मि ॥ ४४ ॥

श्रेयस इति ॥ हे तात । 'पुत्रे पितरि पूज्ये च तातशब्दं प्रचक्षते' इति श्रेयसोऽपि हितार्थयोगात्प्रशस्ततरस्याप्यस्य ते तव वचसो हितोपदेशरूपस्य रात्रेर्विपर्ययो दिवसः स्फुटतारस्य व्यक्ततारस्य नभस इव भाजनं पात्रं नास्मि । अनधिकारित्वादिति भावः । अत्राह्नो नभोमात्रसम्बन्धसम्भवेऽपि तारासम्बन्धासम्भवात्तद्विशिष्टनभः सम्बन्धविरोधादयुक्तं तारकितस्य नभसो न पात्रमहरिति ॥ ४४ ॥

कुतस्ते मोक्षोपदेशानधिकारित्वम् , किं च ते तपसः पौर्वापर्यमित्यपेक्षायां तत्सर्वं स्वजात्यादिकथनपूर्वकं निरूपयति—

क्षत्रियस्तनयः पाण्डोरहं पार्थो धनञ्जयः ।
स्थितः प्रास्तस्य दायादैर्भ्रातुर्ज्येष्ठस्य शासने ॥ ४५ ॥

अन्वयः—अहम् , क्षत्रियः, पाण्डोः, तनयः, पार्थः, धनञ्जयः, दायादैः, प्रास्तस्य, ज्येष्ठस्य, भ्रातुः, शासने, स्थितः ॥ ४५ ॥

क्षत्रिय इति ॥ अहं क्षत्रियः क्षत्रियकुले जातः । तत्रापि महाकुले प्रसूतः, वीरसन्तानश्चेत्याह—पाण्डोस्तनय इति । तत्रापि कौन्तेयोऽस्मि, न माद्रेय इत्याह—पार्थ इति । पृथा कुन्ती तत्सुतः पार्थः । 'तस्यापत्यम्' इत्यण् । अर्जुनोऽहं महावीरश्चेत्याह—धनञ्जय इति । उत्तरकुरून्विजित्य धनाहरणाद्धनञ्जयोऽस्मीत्यर्थः । 'खचि मुमागमः' इत्युक्तं प्राक् । धनञ्जय इत्युक्ते शरीरस्थो वायुः सर्पविशेषो वा स्यात्तदर्थं पार्थः, गन्धर्वोऽपि कश्चित्पृथासुतोऽस्ति तदर्थं पाण्डोः सुतः नैमिषारण्ये पाण्डुर्विप्रस्तत्पत्नी पृथा नाम काचिद्ब्राह्मणी तत्पुत्रोऽपि स्यात्तदर्थं क्षत्रिय इति । अथैवं चेत्किमर्थं तर्हि तपस्यसि, मोक्षार्थं वा किं न तपस्यसि, तत्राह—स्थित इति । दायं पैतृकं धनमाददत इति दायादा ज्ञातयः । 'दायादौ ज्ञातिपुत्रयोः' इति, 'विभक्तपितृद्रव्यं च दायमाहुर्मनीषिणः' इति च विश्वः । 'स्वामीश्वरादि' सूत्रेण सोपसर्गादपि दायादेति कप्रत्ययान्तो निपातनात्साधुः । तैः प्रास्तस्य राज्यान्निरस्तस्य । वैरिनिर्यातनार्थिन

इत्यर्थः। ज्येष्ठस्य भ्रातुर्युधिष्ठिरस्य। वृद्धशब्दादिष्ठन्प्रत्ययः। वृद्धस्य च ज्यादेशः। शासने निदेशे स्थितः। तदाज्ञया तपस्यामीत्यर्थः। अन्यथा मानहानिः सौभ्रात्रभङ्गः पूज्यपूजाव्यतिक्रमदोषश्च स्फुरतीति भावः। अत एव हिंसैकरसस्य रागद्वेषकषायितचेतसः कुतो मे मोक्षाधिकार इति तात्पर्यम्। सार्थविशेषणत्वात्परिकरालङ्कारः॥४५॥

यदुक्तम् 'विरुद्धः केवलं वेषः' इति तत्रोत्तरमाह--

कृष्णद्वैपायनादेशाद्बिभर्मि व्रतमीदृशम्।
भृशमाराधने यत्तः स्वाराध्यस्य मरुत्वतः॥ ४६॥

अन्वयः—कृष्णद्वैपायनादेशात्, ईदृशम्, व्रतम्, बिभर्मि, स्वाराध्यस्य, मरुत्वतः, भृशम्, आराधने, यत्तः॥ ४६॥

कृष्णेति॥ द्वीपोऽयनं जन्मभूमिर्यस्य स द्वीपायनः। स एव द्वैपायनो व्यासः। प्रज्ञादित्वात्स्वार्थेऽण्प्रत्ययः। स एव कृष्णवर्णत्वात्कृष्णद्वैपायनश्च। तस्यादेशादुपदेशादीदृशम्। विरुद्धवेषमित्यर्थः। व्रतं तपोनियमं बिभर्मि धारयामि। न तु स्वेच्छयेति भावः। अथोपास्यां देवतामाह-भृशमिति। स्वाराध्यस्य सुखमाराध्यस्य। प्रादिसमासः। 'स्वाराधस्य' इति पाठ उपसृष्टात्खलप्रत्ययः। मरुत्वत इन्द्रस्य। भृशं सम्यगाराधने यत्तः। प्रयत्नवानित्यर्थः। तस्य क्षत्रियदैवतत्वादिति भावः॥ ४६॥

ननु भवादृशभ्रातृसहायस्य महावीरस्य युधिष्ठिरस्य कथमरिपरिभवप्राप्तिरित्यत आह—

दुरक्षान्दीव्यता राज्ञा राज्यमात्मा वयं वधूः।
नीतानि पणतां नूनमीदृशी भवितव्यता॥ ४७॥

अन्वयः—दुरक्षान्, दीव्यता, राज्ञा, राज्यम्, आत्मा, वयम्, वधूः, पणताम्, नीतानि, नूनम्, भवितव्यता, ईदृशी॥ ४७॥

दुरक्षानिति॥ दुरक्षान्। कपटपाशकैरित्यर्थः। 'दिवः कर्म च' इति करणे कर्मसंज्ञा। दीव्यता क्रीडता 'आहूतो न निवर्तेत द्यूतादपि रणादपि' इति शास्त्रात्। न तु व्यसनितयेति भावः। राज्ञा युधिष्ठिरेण राज्यं राष्ट्रमात्मा स्वयं वयं चत्वारोऽनुजा वधूर्जाया द्रौपदी च पणतां ग्लहत्वम्। 'पणोऽक्षेषु ग्लहोऽक्षास्तु देवनाः पाशकाश्च ते' इत्यमरः। नीतानि। सर्वं द्यूते राज्ञा हारितमित्यर्थः। नीतानीति नपुंसकैकशेषः। नयतेर्द्विकर्मकत्वात्प्रधाने कर्मणि क्तः। ननु सर्वज्ञस्य राज्ञः कथमियमविमृश्यकारिता तत्राह-भवितव्यतानर्थानामवश्यम्भावितेदृशी नूनं निश्चितम्। नात्र संशय इत्यर्थः। बुद्धिरपि भवितव्यतानुसारिण्येव। न स्वतन्त्रेत्यर्थः॥ ४७॥

ननु तथापि तवैव तेष्वासङ्गो न तेषां त्वयि तत्राह—

तेनानुजसहायेन द्रौपद्या च मया विना ।
भृशमायामियामासु यामिनीष्वभितप्यते ॥ ४८ ॥

अन्वयः—अनुजसहायेन, तेन, द्रौपद्या, च, मया, विना, आयामियामासु, यामिनीषु, भृशम्, अभितप्यते ॥ ४८ ॥

तेनेति ॥ अनुजाः सहाया यस्य तेन । अनुजयुक्तेनेत्यर्थः । तुल्ययोगः सहार्थः । तेन युधिष्ठिरेण द्रौपद्या च मया विना । मद्विरहादित्यर्थः । आयामिनो दीर्घा यामाः प्रहरा यासां तास्तासु । दुःखितस्य तथाभावादिति भावः । यामिनीष्वभितप्यते । भावे लट् । तेषु मद्वत्तेषां मय्यप्यासङ्गान्न वैराग्यावकाश इत्यर्थः ॥ ४८ ॥

अथ वैरनिर्यातनस्यावश्यम्भावद्योतनाय चतुर्भिः परनिकारान्वर्णयति—

हृतोत्तरीयां प्रसभं सभायामागतह्रियः ।
मर्मच्छिदा नो वचसा निरतक्षन्नरातयः ॥ ४९ ॥

अन्वयः—अरातयः, सभायाम्, प्रसभम्, हृतोत्तरीयाम्, आगतह्रियः, नः मर्मच्छिदा, वचसा, निरतक्षन्, ॥ ४९ ॥

हृतेत्यादि ॥ अरातयः शत्रवः सभायां प्रसभं बलात्कारेण हृतोत्तरीयामत एवागतह्रियः सम्प्राप्तलज्जानोऽस्मान्मर्मच्छिदा मर्मच्छेदिना वचसा निरतक्षन्नशातयन् । वस्त्रापहारवाक्पारुष्याभ्यां तथा व्यथयामासुरित्यर्थः । तक्षणशब्दसामर्थ्याद्वचसो वास्यौपम्यं गम्यत इति वस्तुनालङ्कारध्वनिः ॥ ४९ ॥

अथातिदुःसहनिकारान्तरमाह—

उपाधत्त सपत्नेषु कृष्णाया गुरुसन्निधौ ।
भावमानयने सत्याः सत्यङ्कारमिवान्तकः ॥ ५० ॥

अन्वयः—अन्तकः, गुरुसन्निधौ, सत्याः, कृष्णायाः, आनयने, भावम्, सत्यङ्कारम्, इव, सपत्नेषु, उपाधत्त ॥ ५० ॥

उपाधत्तेति ॥ अन्तको मृत्युर्गुरुसन्निधौ भीष्मद्रोणादिसमक्षमेव सत्याः पतिव्रतायाः कृष्णाया द्रौपद्या आनयने केशाम्बरादिकर्षणे भावं चित्ताभिप्रायमितः परमनेन पाण्डवाभिभवेनैतान्स्वनगरं नेष्यामीत्येवम्भूतं सत्यङ्कारमिव । क्रियतेऽनेनेति कारः । करणे घञ् । सत्यस्य कारः सत्यङ्कारः सत्यापनम् । चिकीर्षितस्य कार्यस्यावश्यं क्रियास्थापनार्थं परहस्ते यद्दीयते स सत्यङ्कारः । क्रियादौ सत्यदार्ढ्याय प्राग्दीयमानो मूल्यैकदेशश्च । 'क्लीबे सत्यापनं सत्यङ्कारः सत्याकृतिः स्त्रियाम्' इत्यमरः ।

'कारे सत्यागदस्य' इति मुमागमः । तमित्र सपत्नेपूपाधत्त निहितवान् । तेषां विनाशकाले विपरीतबुद्धिमुत्पादितवानित्यर्थः ॥ ५० ॥

केनेयमाकृष्टा सभ्यैर्वा किं कृतं तत्राह—

तामैक्षन्त क्षणं सभ्या दुःशासनपुरःसराम् ।
अभिसायार्कमावृत्तां छायामिव महातरोः ॥ ५१ ॥

दुःशासनपुरःसरां, तां, सभ्याः, अभिसायार्कं, महातरोः, आवृत्तां, छायाम्, इव, क्षणम्, ऐक्षन्त ॥ ५१ ॥

तामिति ॥ दुःशासनः पुरःसरो यस्यास्तां तथोक्ताम् । दुःशासनेन सभां प्रत्याकृष्यमाणामित्यर्थः । 'अनुपसर्जनात्' इति न ङीप् । तां कृष्णाम् । सभायां साधवः सभ्याः । 'सभाया य.' इति यप्रत्ययः । अभिसायार्कं दिनान्तसूर्याभिमुखम् । स्थितस्येति शेषः । 'सायो नाशदिनान्तयोः' इति विश्वः । 'लक्षणेनाभिप्रती आभिमुख्ये' इत्यव्ययीभावः । महातरोः सम्बन्धिनीमावृत्तां छायामिव तां कृष्णां क्षणमैक्षन्त । न चिरं जुगुप्सितत्वात् । नापि किञ्चिद्व्याप्रियन्त माध्यस्थ्यभङ्गभयात् । ते त्वर्कवदेव साक्षित्वमात्रमास्थिता इत्यर्थः । अत्राकृष्यमाणायाः कृष्णाया आकष्टारं प्रति पराङ्मुखत्वादावृत्तच्छायौपम्यम् । तथापि तां न मुञ्चतीति दुःशासनस्य तत्साम्यम् ॥ ५१ ॥

अथास्यास्तादात्मिकमायथार्थ्यं वर्णयति—

अयथार्थक्रियारम्भैः पतिभिः किं तवेक्षितैः ।
अरुध्येतामितीवास्या नयने बाष्पवारिणा ॥ ५२ ॥

अन्वयः—अयथार्थक्रियारम्भैः, तव, पतिभिः, ईक्षितैः, किम्, इतीव बाष्पवारिणा, अस्याः, नयने, अरुध्येताम्, ॥ ५२ ॥

अयथार्थेति ॥ अयथार्था मिथ्याभूताः क्रियारम्भाः पतिशब्दप्रवृत्तिनिमित्तभूतकर्मोद्योगा येषां तैः । तामरक्षद्भिरित्यर्थः । तव सम्बन्धिभिः । पान्ति रक्षन्तीति पतयो भर्तारः । 'पातेर्डति.' इत्यौणादिको डतिप्रत्ययः । तैरीक्षितरवेक्षितैः किम् । न किञ्चित्फलमस्तीत्यर्थः । इतीवेत्थं विचार्येवेत्युत्प्रेक्षा । बाष्पवारिणास्या. कृष्णाया नयने अरुध्येतामावृते । रुधेः कर्मणि लङ् । अशरणा रुरोदेत्यर्थः ॥ ५२ ॥

ननु भवद्भिः किमर्थमसमर्थैरिवोपेक्षितं तत्राह—

सोढवान्नो दशामन्त्यां ज्यायानेव गुणप्रियः ।
सुलभो हि द्विषां भङ्गो दुर्लभा सत्स्ववाच्यता ॥ ५३ ॥

अन्वयः—गुणप्रियः, ज्यायान्, एव, नः, अन्त्यां, दशां, सोढ़वान्, द्विषां, भङ्गः, सुलभः, सत्सु, अवाच्यता, दुर्लभा, हि ॥ ५३ ॥

सोढवानिति ॥ गुणाः प्रिया यस्य स गुणप्रियः प्रियगुणः। 'वा प्रियस्य' इति परनिपातः। ज्यायानग्रजो युधिष्ठिर एव। वृद्धशब्दादीयसुनि 'ज्यादादीयसः' इत्याकारादेशः। नोऽस्माकमन्ते भवामन्त्यां निकृष्टां दशामवस्थां सोढवान्न तु वयम्। किन्तु तदवस्था इति भावः। ननु शत्रूपेक्षया महानर्थकारिणीत्याशङ्कयाह—सुलभ इति। द्विषां विद्विषां भङ्गः सुलभः। कालान्तरेऽपीति, शेषः। सत्सु सज्जनेष्ववाच्यता निन्द्यता दुर्लभा न तु शत्रूपेक्षा। हि प्रसिद्धौ। शत्रूपेक्षातो लोकापवाद एव बलवान्। तस्योत्पन्नस्य पुनरप्रतिविधेयत्वात्स च समयोल्लङ्घने स्यादेवेति भावः ॥ ५३ ॥

ननु शत्रुवधे राज्ञां को नामापवादः प्रत्युत कीर्तिरेवेत्याशङ्क्य, सत्यं स एव समयोल्लङ्घनकलङ्कितकीर्त्या महानिन्दानिदानमित्याशयेनाह—

स्थित्यतिक्रान्तिभीरूणि स्वच्छान्याकुलितान्यपि।
तोयानि तोयराशीनां मनांसि च मनस्विनाम् ॥ ५४ ॥

अन्वयः—तोयराशीनां, तोयानि, मनस्विनां, मनांसि, च, स्थित्यतिक्रान्तिभीरूणि, आकुलितानि, अपि, स्वच्छानि ॥ ५४ ॥

स्थितीति ॥ तोयराशीनां समुद्राणां तोयानि मनस्विनां मनांसि च स्थित्यतिक्रान्तेर्मर्यादोल्लङ्घनाद्धेतोर्भीरूण्यत एवाकुलितानि सङ्क्षोभितान्यपि स्वच्छान्यकलुषाणि। न त्वरन्त इत्यर्थः। मनस्व्ययं युधिष्ठिर इति भावः। अत्र तोयानां सामान्यतो मनस्विनां चाप्रकृतानामेव गुणतौल्यादौपम्यस्य गम्यतया तुल्ययोगितालङ्कारः। गुणश्चात्र भीरुत्वं स्वच्छता च ॥ ५४ ॥

नन्वजातशत्रोः स्वजनवैरे किं कारणमित्याशङ्कयास्मत्सौहार्दमेवेत्याह—

धार्तराष्ट्रैः सह प्रीतिर्वैरमस्मास्वसूयत।
असन्मैत्री हि दोषाय कूलच्छायेव सेविता ॥ ५५ ॥

अन्वयः—धार्तराष्ट्रैः, सह, प्रीतिः, (एव) अस्मासु, वैरम्, असूयत, हि, असन् मैत्री, कूलच्छाया, इव, सेविता, (सती) दोषाय ॥ ५५ ॥

धार्तराष्ट्रैरिति ॥ धार्तराष्ट्रैर्धृतराष्ट्रपुत्रैः सह प्रीतिः सौहार्दमेवास्मासु विषये वैरमसूयत सूतवती। सूयतेर्दैवादिकात्कर्तरि लङ्। ननु सौहार्दं वैरजनकं चेद्विप्रतिषिद्धं तत्राह—असदिति। हि यस्मादसन्मैत्री दुर्जनेन सङ्गतिः कूलस्यासन्नपातस्य नदीतटस्य छायेव सेविता श्रिता सती दोषायानर्थाय भवति। न खलु दुर्जनः सुजनवन्मित्रद्रोहपातकं पश्यतीति भावः। उपमाप्राणितोऽयमर्थान्तरन्यासालङ्कारः ॥ ५५ ॥

नन्वादावेव तेषां वृत्तमविज्ञाय कथं मैत्री कृतेत्याशङ्कय, किं कुर्मः, दुर्जनवृत्तं दुर्विज्ञेयमित्याह—

अपवादादभीतस्य समस्य गुणदोषयोः ।
असद्वृत्तेरहोवृत्तं दुर्विभावं विधेरिव ॥ ५६ ॥

अन्वयः—अपवादात्, अभीतस्य, गुणदोषयोः, समस्य, असद्वृत्तेः, अहोवृत्तं, विधेः, इव, दुर्विभावम् ॥ ५६ ॥

अपवादादिति ॥ अपवादाज्जनाक्रोशादभीतस्य । अजुगुप्समानस्येत्यर्थः । गुणदोषयोः समस्य तुल्यबुद्धेः । निग्रहानुग्रहौ गुणदोषयोरननुरुन्धत इत्यर्थः । विधावप्येतद्विशेषणं योज्यम् । असद्वृत्तेर्दुराचारस्य धूर्तस्याहोवृत्तमीहितं विधेर्दैवस्य वृत्तमिव दुर्विभावं विभावयितुमशक्यम् । किन्तु कार्यैकसमधिगम्यमित्यर्थः । भवतेर्ण्यन्तात्कृच्छ्रार्थे खल्प्रत्ययः ॥ ५६ ॥

नन्वेवं मानी कथं परिभूतो जीवसि तत्राह—

ध्वंसेत हृदयं सद्यः परिभूतस्य मे परैः ।
यद्यमर्षः प्रतीकारं भुजालम्बं न लम्भयेत् ॥ ५७ ॥

अन्वयः—परैः, परिभूतस्य, मे, हृदयं, सद्यः, ध्वंसेते, अमर्षः, प्रतीकारं, भुजालम्बं, न, लम्भयेत्, यदि ॥ ५७ ॥

ध्वंसेतेति ॥ परैः शत्रुभिः परिभूतस्य मे हृदयं सद्यो ध्वंसेत । भ्रश्येदित्यर्थः । अमर्षः कर्ता प्रतीकारं प्रतिक्रियारूपं भुजालम्बं हस्तावलम्बनं न लम्भयेन्न प्राहयेद्यदि । हृदयेनेति शेषः । सत्यं जीवामि प्रतिचिकीर्षया । न तु निर्लज्जतयेति भावः ॥ ५७ ॥

ननु तवैव कोऽयमभिमानस्तत्राह—

अवधूयारिभिर्नीता हरिणैस्तुल्यवृत्तिताम् ।
अन्योन्यस्यापि जिह्रीमः किं पुनः सहवासिनाम् ॥ ५८ ॥

अन्वयः—अरिभिः, अवधूय, हरिणैः, तुल्यवृत्तितां, नीताः, अन्योन्यस्य, अपि, जिह्रीमः सहवासिनां, किम्, पुनः ॥ ५८ ॥

अवधूयेति ॥ अरिभिरवधूय परिभूय हरिणैर्मृगैस्तुल्यवृत्तितां तुल्यजीवनत्वम् । वन्याहारतामित्यर्थः । नीताः प्रापिता वयम् । पञ्चापीति शेषः । अन्योन्यस्यापि जिह्रीमो लज्जामहे । सहवासिनां सहचारिणां किं पुनः । प्रागेव जिह्रीम इति किमु वक्तव्यमित्यर्थः । क्रियायोगे सम्बन्धसामान्ये षष्ठी । अत्र वयं पञ्चापि तुल्याभिमाना एव । इदं तु मदेकसाध्यं कर्मेति मुनिवासनान्मयानुष्ठीयत इति भावः ॥ ५८ ॥

ननु तर्हि दुःखैकनिदानमन्तःशत्रुर्मान एव त्यज्यतामित्याशङ्क्य तत्त्यागे दोषमाह—

शक्तिवैकल्यनम्रस्य निःसारत्वाल्लघीयसः ।
जन्मिनो मानहीनस्य तृणस्य च समा गतिः ॥ ५९ ॥

अन्वयः—शक्तिवैकल्यनम्रस्य, निःसारत्वात्, लघीयसः, मानहीनस्य, जन्मिनः, तृणस्य, च, समा, गतिः, ॥ ५९ ॥

शक्तीति ॥ शक्तिवैकल्येनोत्साहादिशक्तिवैधुर्येणावष्टम्भसामर्थ्यविरहेण च नम्रस्य प्रह्वीभूतस्य विधेयभूतस्य च निःसारत्वाद्दुर्बलत्वात् । स्थिरांशरहितत्वाच्च । 'सारो बले स्थिरांशे च' इत्यमरः । लघीयसो गौरवहीनस्य नीरसस्य च । मानहीनस्य जन्मिनो जन्तोः । व्रीह्यादित्वादिनिः । तृणस्य च गतिरवस्था समेति मानहीनस्य तृणादपि निकृष्टत्वान्न त्याज्यो मान इति भावः । श्लेषालङ्कारोऽयं तदनुगाणितेयमुपमेत्यनेकार्थदीपिकेति व्यज्यते ॥ ५९ ॥

मानत्यागे दोषमुक्त्वा तत्सद्भावे षड्भिर्गुणमाह—

अलङ्घ्यं तत्तदुद्वीक्ष्य यद्यदुच्चैर्महीभृताम् ।
प्रियतां ज्यायसीं मा गान्महतां केन तुङ्गता ॥ ६० ॥

अन्वयः—महीभृताम्, यद् यद्, उच्चैः, तत्तत्, अलङ्घ्यम्, उद्वीक्ष्य, महतां, तुङ्गता, ज्यायसीं, प्रियतां, केन मागात्, ॥ ६० ॥

अलङ्घ्यमिति ॥ महीभृतां पर्वतानां सम्बन्धि यद्यच्छृङ्गादिकमुच्चैरुन्नतं तत्तदलङ्घ्यमुद्वीक्ष्योत्प्रेक्ष्य । तर्कयित्वेति यावत् । महतां महात्मनां तुङ्गता मानौन्नत्यं ज्यायसीं प्रियतां प्रियत्वं केन हेतुना मागात् । न केनापि प्रियत्वं गच्छत्येवेत्यर्थः । आशिषि माङि लुङ् । अटोऽपवादः । दैवादनिच्छतोऽपीच्छामुत्पादयत्येवौषधवदित्यर्थः । आशासनार्थमाशीःप्रयोगः । उद्वीक्ष्येत्यसमानकर्तृकत्वनिर्देशः क्वचित्प्रयोगदर्शनात्सोढव्यः । केचित् 'उद्वीक्ष्यम्' इति पठन्ति । तत्र यद्यदुच्चैस्तत्तदलङ्घ्यमुद्वीक्ष्यमवलोकनीयं न चोल्लङ्घनीयमिति । अतो महतामित्यादि योजयन्ति ॥ ६० ॥

तावदाश्रीयते लक्ष्म्या तावदस्य स्थिरं यशः ।
पुरुषस्तावदेवासौ यावन्मानान्न हीयते ॥ ६१ ॥

अन्वयः—तावदेव, असौ, लक्ष्म्या, आश्रीयते, तावत्, अस्य, यशः, स्थिरं, तावत्, पुरुषः, यावत्, मानात्, न, हीयते ॥ ६१ ॥

तावदिति ॥ किं च । तावदेवासौ लक्ष्म्याश्रीयते । तावदस्य पुंसो यशः स्थिरम् । तावदेवासौ पुरुषः । पुरुषत्वेन गण्यत इत्यर्थः । यावन्मानादभिमानान्न हीयते न भ्रश्यति । मानहीनस्य न किञ्चिच्छुभमस्तीत्यर्थः ॥ ६१ ॥

स पुमानर्थवज्जन्मा यस्य नाम्नि पुरःस्थिते ।
नान्यामङ्गुलिमभ्येति संख्यायामुद्यताङ्गुलिः ॥ ६२ ॥

अन्वयः—सः, पुमान्, अर्थवज्जन्मा, यस्य, नाम्नि, पुरःस्थिते, सङ्ख्यायाम्, उद्यताङ्गुलिः, अन्याम्, अङ्गुलि, न, अभ्येति ॥ ६२ ॥

स इति ॥ स पुमानर्थवज्जन्मा सार्थकजन्मा यस्य पुंसो नाम्नि पुरोऽग्रे स्थिते सति सङ्ख्यायां पुरुषगणनाप्रस्ताव उद्यता गुणमधिकृत्योन्नमिताङ्गुलिरन्यां द्वितीयामङ्गुलिम् । उद्यतामिति शेष । नाभ्येति न प्राप्नोति । अद्वितीयत्वादस्येत्यर्थः । एतन्मानरहितस्य न सम्भवतीति भावः ॥ ६२ ॥

दुरासदवनज्यायान्गम्यस्तुङ्गोऽपि भूधरः ।
न जहाति महौजस्कं मानप्रांशुमलङ्घ्यता ॥ ६३ ॥

अन्वयः—दुरासदवनज्यायान्, तुङ्गः, अपि, भूधरः, गम्यः, महौजस्क, मान प्रांशुम्, अलङ्घ्यता, न जहाति ॥ ६३ ॥

दुरासदेति ॥ दुरासदैर्वनैर्ज्यायान्प्रवृद्धस्तथापि तुङ्गोऽपि भूधरो गम्यो गन्तुं शक्य एव । प्रसिद्धं चैतदिति भावः । महौजस्कं प्रतापसम्पन्नं मानप्रांशुं मानोन्नतम् । पुरुषमिति शेषः । अलङ्घ्यता न जहाति । कदाचिन्मानी लङ्घयितुं न शक्यत इत्यर्थः । गिरेरपि गरीयान्मानाधिक इति भावः । अत्रोपमानाद्भूधरादुपमेयस्य मानिनो धर्मान्तरसाम्येऽप्यलङ्घ्यत्वेनाधिक्यकथनाद्व्यतिरेकालङ्कारः ॥ ६३ ॥

गुरून्कुर्वन्ति ते वंश्यानन्वर्था तैर्वसुन्धरा ।
येषां यशांसि शुभ्राणि ह्रेपयन्तीन्दुमण्डलम् ॥ ६४ ॥

अन्वयः—ते, वंश्यान्, गुरून्, कुर्वन्ति, तैः, वसुन्धरा, अन्वर्था, येषां, शुभ्राणि, यशांसि, इन्दुमण्डलं, ह्रेपयन्ति ॥ ६४ ॥

गुरूनिति ॥ ते नरा वंश्यानन्वये भवान्गुरून्कुर्वन्ति प्रथयन्ति । स्वनाम्ना व्यपदेशयन्ति रघुदिलीपादिवदित्यर्थः । तैर्नरैः । वसूनि धनानि धरतीति वसुन्धरा । 'संज्ञायां भृतॄवृजि-' इत्यादिना खच्प्रत्यये 'खचि ह्रस्वः' इति ह्रस्वान्नुमागमश्च । अन्वर्थानुगतार्था । तेषां वसुभूतानां धारणादिति भावः । येषां शुभ्राणि यशांसीन्दुमण्डलं ह्रेपयन्ति लज्जयन्ति । यशसो निष्कलङ्कत्वादिति भावः । ईदृशं हि यशो मानमहत एव सम्भवतीति तात्पर्यार्थः । ह्रीधातोर्ण्यन्ताल्लट् । 'अर्तिह्री—' इत्यादिना पुगागमः । अत्र ह्रेपणस्य सादृश्यपर्यवसानादुपमालङ्कारः ॥ ६४ ॥

उदाहरणमाशीःषु प्रथमे ते मनस्विनाम् ।
शुष्केऽशनिरिवामर्षो यैररातिषु पात्यते ॥ ६५ ॥

अन्वयः—यैः, अमर्षः, शुष्के, अशनिः, इव, अरातिषु, पात्यते, मनस्विनां, प्रथमे, ते, आशीःषु, उदाहरणम् ॥ ६५ ॥

उदाहरणमिति ॥ यैरमर्षः क्रोधः शुष्के नीरसेऽशनिरिवारातिषु विषये पात्यते प्रक्षिप्यते मनस्विनां मानिनां प्रथमेऽग्रेसरास्त आशीःषु पुरुषैरेवं भवितव्यमेवंरूपासूदाहरणं निदर्शनम् । भवन्तीति शेषः । रामादिवदुपमानं भवन्तीत्यर्थः । अतो न त्याज्यो मान इति सन्दर्भार्थः ॥ ६५ ॥

यदुक्तम् 'अभिद्रोहेण भूतानाम्' इत्यादि, तत्र युग्मेनोत्तरमाह—

न सुखं प्रार्थये नार्थमुदन्वद्वीचिचञ्चलम् ।
नानित्यताशनेस्त्रस्यन्विविक्तं ब्रह्मणः पदम् ॥ ६६ ॥

अन्वयः—उदन्वद्वीचिचञ्चलं, सुखम् , न, प्रार्थये, अर्थञ्च, न, अनित्यता, अशनेः, त्रस्यन् , विविक्तं, ब्रह्मणः, पदं, न, ॥ ६६ ॥

नेत्यादि ॥ उदन्वद्वीचिरिव चञ्चलं समुद्रतरङ्गवदस्थिरं सुखं कामं न प्रार्थये नेच्छामि । तथा चञ्चलमर्थं च न प्रार्थये । किं चानित्यता विनाशिता सैवाशनिस्तस्मात्त्रस्यन्बिभ्यन् । 'वा भ्राश–' इत्यादिना श्यन्प्रत्ययः । विविक्तं निर्बाधं ब्रह्मणो वेधस आत्मनः । पद्यत इति पदं स्थानमैक्यलक्षणं मुक्तिं च न प्रार्थये । एतेन यदुक्तम् 'उच्छेदं जन्मनः कर्तुम्' इत्यदि, तत्समाहितम् । ६६ ॥

प्रमार्ष्टुमयशःपङ्कमिच्छेयं छद्मना कृतम् ।
वैधव्यतापितारातिवनितालोचनाम्बुभिः ॥ ६७ ॥

अन्वयः—(किन्तु) छद्मना, कृतम् , अयशःपङ्कं, वैधव्यतापितारातिवनितालोचनाम्बुभिः, प्रमार्ष्टुम् , इच्छेयम् ॥ ६७ ॥

प्रमार्ष्टुमिति ॥ किन्तु छद्मना कपटेन कृतम् । शत्रुभिरिति शेषः । अयश इव पङ्कमिति रूपकालङ्कारः । वैधव्येन तापितानां दुःखीकृतानामरातिवनितानां लोचनाम्बुभिः प्रमार्ष्टुं क्षालयितुमिच्छेयमभिलषेयम् । इषिधातोर्लिङि रूपम् । वैरनिर्यातनातिरिक्तं न किंचिदिच्छामीत्यर्थः ॥ ६७ ॥

एवं तर्हि 'यः करोति वधोदर्काः' इत्याद्युक्तदोषः स्यादित्याशङ्कामङ्गीकृत्याखलानिर्न दोषायेति न्यायमाश्रित्य युग्मेनोत्तरमाह—

अपहस्येऽथवा सद्भिः प्रमादो वास्तु मे धियः ।
अस्थानविहितायासः कामं जिहेतु मा भवान् ॥ ६८ ॥

अन्वयः—अथवा, सद्भिः, अपहस्ये, मे, धियः, प्रमादः, वा, अस्तु, भवान्, अस्थानविहितायासः, कामं, माजिह्रेतु ॥ ६८ ॥

अपहस्य इत्यादि ॥ अथवा सद्भिः पण्डितैरपहस्ये। अपहसिष्य इत्यर्थः। 'वर्तमानसामीप्ये वर्तमानवद्वा' इति हसतेरण्यन्तात्कर्मणि लट्। ण्यन्तस्तु भ्रान्तपाठः। मे धियः प्रमादोऽनवधानत्वं वास्तु। भवानप्यस्थानेऽयोग्यविषये विहित आयासो हितोपदेशप्रयासो येन स तथोक्तः। निष्फलप्रयत्नः सन्नित्यर्थः। कामं मा जिह्रेतु लज्जताम् ॥ ६८ ॥

वंशलक्ष्मीमनुद्धृत्य समुच्छेदेन विद्विषाम् ।
निर्वाणमपि मन्येऽहमन्तरायं जयश्रियः ॥ ६९ ॥

अन्वयः—अहं, विद्विषां, समुच्छेदेन, वंशलक्ष्मीम्, अनुद्धृत्य, निर्वाणम्, अपि, जयश्रियः, अन्तरायं, मन्ये ॥ ६९ ॥

वंशेति ॥ अहं तु विद्विषां शत्रूणां समुच्छेदेन विनाशेन कारणेन वंशलक्ष्मीमनुद्धृत्यापुनरावर्त्यं निर्वाणं मोक्षमपि जयश्रियोऽन्तरायं विघ्नं मन्ये। न तु पुरुषार्थमित्यर्थः। किमुतान्योत्सवादिकमिति भावः ॥ ६९ ॥

नन्वयं ते दुराग्रह इत्यत आह—

अजन्मा पुरुषस्तावद्गतासुस्तृणमेव वा ।
यावन्नेषुभिरादत्ते विलुप्तमरिभिर्यशः ॥ ७० ॥

अन्वय.—पुरुषः, यावत्, अरिभिः, विलुप्तं, यशः, इषुभिः, न आदत्ते, तावत्, अजन्मा, गतासुः, तृणम्, एव, वा ॥ ७० ॥

अजन्मेति ॥ पुरुषो यावदरिभिर्विलुप्तं संहृतं यश इषुभिर्नादत्ते। अरिवधेन न प्रत्याहरतीत्यर्थः। तावदजन्मा। अजातप्राय इत्यर्थः। नन्वजातोऽपि जननान्तरमुपयुज्यत एवेत्यरुच्या पक्षान्तरमाह—गतासुर्मृतः। मृततुल्य इत्यर्थः। मृतोऽपि प्रागुपयुक्तवानित्यरुच्याह—तृणमेवेति। तृणतुल्य इत्यर्थः। अकिञ्चित्करस्य त्रैकाल्यानुपयोगाज्जीवन्मृत इत्यर्थः। अतो नाहमाग्रहाद्ब्रवीमि। किं तु वीरधर्ममनुपालयामीति भावः ॥ ७० ॥

सर्वथा वैरनिर्यातनं कर्तव्यमित्युक्तम्। तदकरणे पुरुषगुणानां हानिदोषमाह—

अनिर्जयेन द्विषतां यस्यामर्षः प्रशाम्यति ।
पुरुषोक्तिः कथं तस्मिन्ब्रूहि त्वं हि तपोधन ॥ ७१ ॥

अन्वयः—यस्य, अमर्षः, द्विषताम्, अनिर्जयेन, प्रशाम्यति, तस्मिन्, पुरुषोक्तिः, कथं, तपोधन, ? त्वं, हि, ब्रूहि ॥ ७१ ॥

अनिर्जयेनेति ॥ यस्यामर्षः क्रोधो द्विषतां शत्रूणामनिर्जयेन निर्जयं विनैव प्रशाम्यति । उपलक्षणे तृतीया । तस्मिन्पुरुष इत्युक्तिः पुरुषशब्दः कथम् । न कथञ्चिदित्यर्थः । प्रवर्तत इति शेषः। प्रवृत्तिनिमित्तस्य पुरुषकारस्याभावादिति भावः । हे तपोधन, त्वं हि त्वमेव ब्रूहि कथय । न च ते किञ्चिदविदितमस्तीति भावः । 'हि हेताववधारणे' इत्यमरः ॥ ७१ ॥

ननु पुरुषत्वजात्यैव पुरुषोक्तिप्रवृत्तेः किं पुरुषकारेण, तत्राह-कृतमित्यादिद्वयेन—

कृतं पुरुषशब्देन जातिमात्रावलम्बिना ।
योऽङ्गीकृतगुणैः श्लाघ्यः सविस्मयमुदाहृतः ॥ ७२ ॥

अन्वयः—जातिमात्रावलम्बिना, पुरुषशब्देन, कृतम्, अङ्गीकृतगुणैः, यः, श्लाघ्यः, (सन्) सविस्मयम्, उदाहृतः ॥ ७२ ॥

कृतमिति ॥ जातिमात्रावलम्बिना जातिमात्राभिधायिना पुरुषशब्देन कृतमलम् । न तेन किञ्चित्साध्यत इत्यर्थः । अत्र गम्यमानसाधनक्रियापेक्षया करणत्वात्तृतीयेत्युक्तं प्राक् । कृतमिति निषेधार्थकमव्ययं चादिषु पठ्यते । सत्यं जातिमात्रेऽपि पुरुषशब्दः प्रवर्तते । परन्तु नासौ पुंसामाशास्यः । पश्वादिसाधारण्यादिति तात्पर्यार्थः । तर्हि कीदृक्श्लाघ्य इत्याशङ्कयाह—य इत्यादिनार्धद्वयेन । अङ्गीकृतगुणैर्गुणपक्षपातिभिर्यः पुमान् श्लाघ्यः स्तुत्यः सन्सविस्मयं ससम्भ्रममुदाहृतः कथितः । पुंसेदृशेन भवितव्यमिति निदर्शितः ॥ ७२ ॥

ग्रसमानमिवौजांसि सदसा गौरवेरितम् ।
नाम यस्याभिनन्दन्ति द्विषोऽपि स पुमान्पुमान् ॥ ७३ ॥

अन्वयः—सदसा, गौरवेरितम्, ओजांसि, ग्रसमानम्, इव, यस्य, नाम, द्विषः अपि, अभिनन्दन्ति, सः पुमान्, पुमान् ॥ ७३ ॥

ग्रसमानमिति ॥ किं च । सदसा सभया गौरवेणेरितं कथाप्रसङ्गेषु गौरवपूर्वकमुच्चारितं सत् । ओजांसि शृण्वतां तेजांसि ग्रसमानं गिलदिव स्थितं यस्य पुंसो नाम द्विषोऽप्यभिनन्दन्त्यनुमोदन्ते । किमुत सुहृद इति भावः । स पुमान्पुमान् । पुरुषत्वेन गण्यत इत्यर्थः । प्रथमः पुंशब्दो जातिवचनो द्वितीयो गुणवचनः । स एव श्लाघ्यः । अत्र पुमान्पुमानिति तात्पर्यमात्रभेदभिन्नशब्दार्थपौनरुक्त्यलक्षणो लाटानुप्रासोऽलङ्कारः । तथा च सूत्रम्—'तात्पर्यभेदयुक्तो लाटानुप्रासः' इति ॥ ७३ ॥

ननु सत्सु भीमादिषु तवैवायं कोऽभिनिवेश इत्यत्राह—

यथाप्रतिज्ञं द्विषतां युधि प्रतिचिकीर्षया ।
ममैवाध्येति नृपतिस्तृष्यन्निव जलाञ्जलेः ॥ ७४ ॥

अन्वयः—नृपतिः, यथाप्रतिज्ञं, युधि, द्विषतां, प्रतिचिकीर्षया, तृष्यन्, जलाञ्जलेः, इव, मम, एव, अध्येति ॥ ७४ ॥

यथेति ॥ नृपतिर्युधिष्ठिरो यथाप्रतिज्ञं युधि द्विषतां प्रतिचिकीर्षया द्विषतः प्रतिकर्तुमिच्छया । प्रतिज्ञानुसारेणैव जिघांसयेत्यर्थः । तृष्यन्पिपासुर्जलाञ्जलेरिव ममैवाध्येतीच्छति कार्यसिद्धेर्मदायत्तत्वान्मामेव स्मरति । अतोऽयं ममाभिनिवेश इत्यर्थः । 'अधीगर्थ'—इत्यादिना कर्मणि षष्ठी ॥ ७४ ॥

ननु युधिष्ठिरः स्वार्थं साधयति, त्वया च स्वार्थमात्रमनुसन्धीयतामित्यत आह—

स वंशस्यावदातस्य शशाङ्कस्येव लाञ्छनम् ।
कृच्छ्रेषु व्यर्थया यत्र भूयते भर्तुराज्ञया ॥ ७५ ॥

अन्वयः—सः, अवदातस्य, वंशस्य, शशाङ्कस्य, इव, लाञ्छनम्, यत्र, कृच्छ्रेषु, भर्तुः, आज्ञया, व्यर्थया, भूयते ॥ ७५ ॥

स इति ॥ स नरोऽवदातस्य स्वच्छस्य वंशस्य शशाङ्कस्येव लाञ्छनं कलङ्कः । यत्र यस्मिन्पुरुषे कृच्छ्रेषु व्यसनेषु भर्तुः स्वामिन आज्ञया व्यर्थया भूयते । भावे लट् । आपदि स्वार्थसाधकः कुलघातकः तत्कथं स्वार्थनिष्ठकार्यता युक्तेत्यर्थः ॥ ७५ ॥

यदुक्तम् 'विजहीहि रणोत्साहम्' इत्यादि, तत्रोत्तरमाह—

कथं वादीयतामर्वाङ्मुनिता धर्मरोधिनी ।
आश्रमानुक्रमः पूर्वैः स्मर्यते न व्यतिक्रमः ॥ ७६ ॥

अन्वयः—धर्मरोधिनी, अर्वाक्, मुनिता, कथं, वा, आदीयताम्, पूर्वैः, आश्रमानुक्रमः, स्मर्यते, न, व्यतिक्रमः ॥ ७६ ॥

कथमिति ॥ धर्मरोधिनी धर्मविरोधिन्यर्वाग्गार्हस्थ्यात्प्रागेव मुनिता वानप्रस्थत्वं चतुर्थाश्रमता वा । वर्णप्रक्रमेण तस्य विधानात् 'त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमाः' इति सूत्रकारवचनाच्च क्षत्रियस्यापि कैश्चिदिष्टत्वात् । तदेतत्सम्यग्विवेचितमस्माभी रघुवंशसंजीविन्याम्—'स किलाश्रममन्त्यमाश्रितः' इत्यत्र । कथं वा आदीयतां मया कथं वाङ्गीक्रियताम् । संप्रश्ने लोट् । तथाहि । पूर्वैर्मन्वादिभिराश्रमानुक्रमः स्मर्यते । न तु व्यतिक्रमः । 'ब्रह्मचारी भूत्वा गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत्' इति श्रुत्यनुसारादित्यर्थः । एतदपि 'चत्वार आश्रमाः' इत्येतत्पक्षमाश्रित्योक्तम् । 'यदि चेद्वैराग्यं तदा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा' इति व्युत्क्रमपक्षस्यापि श्रवणात् सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ७६ ॥

ननु भवान्गृहस्थ एव तत्कथमर्वाङ्मुनित्वविरोध इत्याशङ्क्य, सत्यं गृहस्थोऽस्मि, तथापि कृतनिखिलगृहस्थकर्तव्यस्यैव वानप्रस्थाधिकारो न गृहस्थमात्रस्य । न चाह-

मद्यापि कृतकृत्य इत्युत्तरमाह—

आसक्ता धूरियं रूढा जननी दूरगा च मे ।
तिरस्करोति स्वातन्त्र्यं ज्यायांश्चाचारवान्नृपः ॥ ७७ ॥

अन्वयः—आसक्ता, रूढा, इयं, धूः, दूरगा, जननी, च, नृपः, आचारवान्, ज्यायान्, च, मे, स्वातन्त्र्यम्, तिरस्करोति ॥ ७७ ॥

आसक्तेति ॥ आसक्ता लग्ना । अवश्यं कर्तव्येत्यर्थः । रूढा प्रसिद्धा । महतीत्यर्थः । इयं पूर्वोक्ता धूर्वैरनिर्यातनभारः । दूरगा दूरवर्तिनी जननी च मातापि । तथा नृपोऽप्याचारवान् । तपोऽधिक इत्यर्थः। तत्रापि ज्यायाञ्ज्येष्ठो नृपो युधिष्ठिरश्च मे मम स्वातन्त्र्यं स्वाच्छन्द्यं तिरस्करोति दूरीकरोति । आश्रमान्तरं प्रतिबध्नातीत्यर्थः । तिरस्करोतीति प्रत्येकमभिसम्बध्यते । अन्यथा बहुवचनप्रसङ्गात् ॥ ७७ ॥

उक्तमर्थमुपसंहरति—

स्वधर्ममनुरुन्धते नातिक्रममरातिभिः ।
पलायन्ते कृतध्वंसा नाहवान्मानशालिनः ॥ ७८ ॥

अन्वयः—मानशालिनः, स्वधर्मम्, अनुरुन्धन्ते, न, अतिक्रमम्, अरातिभिः, कृतध्वंसाः, आहवान्, न, पलायन्ते ॥ ७८ ॥

स्वधर्ममिति ॥ मानशालिनः स्वधर्मं क्षात्रधर्ममनुरुन्धन्तेऽनुवर्तन्ते । अतिक्रमं स्वधर्मातिक्रमं नानुरुन्धन्ते । ततः किमत आह—अरातिभिरिति । अरातिभिः कृतध्वंसाः कृतापकाराः सन्त आहवान्न पलायन्ते । अयमेव स्वधर्मानुरोध इत्यर्थः । 'उपसर्गस्यायतौ' इति रेफस्य लत्वम् । अत्र मनुः—'न निवर्तेत सङ्ग्रामात्क्षात्रं धर्ममनुस्मरन्' इति । अत्रोत्तरवाक्यार्थं प्रति पूर्ववाक्यार्थस्य हेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ७८ ॥

किम्बहुना ममायं निश्चयः श्रूयतामित्याह—

विच्छिन्नाभ्रविलायं वा विलीये नगमूर्धनि ।
आराध्य वा सहस्राक्षमयशःशल्यमुद्धरे ॥ ७९ ॥

अन्वयः—विच्छिन्नाभ्रविलायम्, नगमूर्धनि, विलीये, वा, सहस्राक्षम्, आराध्य, अयशः शल्यम्, उद्धरे ॥ ७९ ॥

विच्छिन्नेति ॥ विच्छिन्नं वाताहतं यदभ्रं तदिव विलीयेति विच्छिन्नाभ्रविलायं यथा तथा । 'उपमाने कर्मणि च' इति कर्तर्युपपदे णमुल् । नगमूर्धन्यस्मिन्निन्द्रकीले विलीये विशीर्ये वा । कथादिषु यथाविध्यनुप्रयोगः । यद्वा सहस्राक्षमिन्द्रमाराध्यायश एव शल्यं तदुद्धर उद्धरिष्यामि । न तु गत्यन्तरमस्तीत्यर्थः । वाशब्दो विकल्पे ॥७९॥

इत्युक्तवन्तं परिरभ्य दोर्भ्यां तनूजमाविष्कृतदिव्यमूर्तिः।
अघोपघातं मघवा विभूत्यै भवोद्भवाराधनमादिदेश ॥ ८० ॥

अन्वयः—मघवा, इति, उक्तवन्तम्, तनूजम्, आविष्कृतदिव्यमूर्तिः, दोर्भ्यां, परिरभ्य, विभूत्यै, अघोपघातं, भवोद्भवाराधनम्, आदिदेश ॥ ८० ॥

इतीति ॥ मघवेन्द्र इत्युक्तवन्तम् तनूजं पुत्रमर्जुनम्। आविष्कृता प्रकटिता दिव्यमूर्तिर्निजरूपं येन स तथोक्तः सन्। दोर्भ्यां बाहुभ्यां परिरभ्य विभूत्यै श्रेयसे। उपहन्यतेऽनेनेत्युपघातम्। करणे घञ्प्रत्ययः। अघानां दुःखानामुपघातमघोपघातम्। भवः संसारस्तस्योद्भवः कारणमिति भवोद्भवः शिवस्तस्याराधनमुपासनमादिदेश। शिवमुद्दिश्य तपश्चरेत्याज्ञापयामासेत्यर्थः ॥ ८० ॥

प्रीते पिनाकिनि मया सह लोकपालै-
र्लोकत्रयेऽपि विहिताप्रतिवार्यवीर्यः।
लक्ष्मीं समुत्सुकयितासि भृशं परेषा-
मुच्चार्य वाचमिति तेन तिरोबभूवे ॥ ८१ ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये एकादशः सर्गः।

अन्वयः—पिनाकिनि, प्रीते, लोकपालैः सह, मया, लोकत्रये, अपि, विहिताप्रतिवार्यवीर्यः, परेषां, लक्ष्मीम्, भृशम्, समुत्सुकयिता, असि, इति, वाचम्, उच्चार्य, तेन, तिरोबभूवे ॥ ८१ ॥

प्रीत इति ॥ पिनाकिनि शिवे प्रीते सति लोकपालैः सह मया लोकत्रयेऽपि हितं दत्तमप्रतिवार्यमनिवार्यं वीर्यं यस्य स तथोक्तः सन्। परेषां शत्रूणां लक्ष्मीं भृशं समुत्सुकयितासि समुत्सुकां त्वय्यनुरक्तां कर्तासि। पुनराहरिष्यसीत्यर्थः। वीरभाग्याः सम्पद इति भावः। उत्सुकशब्दात् 'तत्करोति' इति ण्यन्तात्कर्तरि लुट्। इति वाचमुच्चार्य तेनेन्द्रेण तिरोबभूवेऽन्तर्दधे। भावे लिट् ॥ ८१ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायामेकादशः सर्गः समाप्तः ॥

द्वादशः सर्गः ।

अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनम् ।
क्लान्तिरहितमभिराधयितुं विधिवत्तपांसि विदधे धनञ्जयः ॥१॥

अन्वयः—अथ, रुचिरवदनः, धनञ्जयः, वासवस्य, वचनेन, त्रिलोचनं, क्लान्तिरहितम्, अभिराधयितुं, तपांसि, विधिवत्, विदधे ॥ १ ॥

अथेति ॥ अथेन्द्रतिरोधानानन्तरं रुचिरवदन इन्द्रसाक्षात्कारसन्तोषात्प्रसन्नमुखो धनञ्जयोऽर्जुनो वासवस्य वचनेनोपदेशेन त्रिलोचनं शिवं क्लान्तिरहितं यथा तथाभिराधयितुं प्रसादयितुं तपांसि विधिवद्विध्यर्हम् । यथाशास्त्रमित्यर्थः । 'तदर्हम्' इति वतिप्रत्यय । विदधे चक्रे । अस्मिन्सर्ग उद्गतावृत्तम्—'सजमादिमे सलघुकौ च नसजगुरुकैरथोद्गता । अङ्घ्रिगतभनजला गयुताः सजसा जगौ चरणमेकतः पठेत् ॥' इति लक्षणात् ॥ १ ॥

अभिरश्मिमालि विमलस्य धृतजयधृतेरनाशुषः ।
तस्य भुवि बहुतिथास्तिथयः प्रतिजग्मुरेकचरणं निषीदतः ॥२॥

अन्वयः—अभिरश्मिमालि, भुवि, एकचरणम्, निषीदतः, विमलस्य, धृतजयधृतेः, अनाशुषः, तस्य, बहुतिथाः, तिथयः, प्रतिजग्मुः ॥ २ ॥

अभिरश्मीति ॥ अभिरश्मिमाल्यभिसूर्यं सूर्याभिमुखं भुव्येकचरणं निषीदत एकचरणेन तिष्ठतो विमलस्य बाह्यान्तरशुद्धिमत. । धृता जयधृतिर्जयेच्छा येन तस्यानाशुषोऽनश्नतः । 'उपेयिवाननाश्वाननूचानश्च' इति निपातः । तस्यार्जुनस्य बहूनां पूरणा बहुतिथाः । बहुसङ्ख्याका इत्यर्थः । 'तस्य पूरणे डट्' । 'बहुपूगगणसङ्घस्य तिथुक्' इति तिथुगागमः । तिथयो दिनानि प्रतिजग्मुः । अथ तिथिशब्दः पुंलिङ्गः । 'तदाद्यास्तिथयो द्वयोः' इत्यभिधानात् । अन्यथा बहुतिथा इत्यत्र टित्वान्ङीप्स्यात् ॥२॥

वपुरिन्द्रियोपतपनेषु सततमसुखेषु पाण्डवः ।
व्याप नगपतिरिव स्थिरतां महतां हि धैर्यमविभाव्यवैभवम् ॥३॥

अन्वयः—पाण्डवः, सततम्, वपुरिन्द्रियोपतपनेषु, असुखेषु, नगपतिः, इव, स्थिरताम्, व्याप, हि, महताम्, धैर्य्यम्, अविभाव्यवैभवम् ॥ ३ ॥

वपुरिति ॥ पाण्डवोऽर्जुनः सततं वपुष इन्द्रियाणां चोपतपनेषु सन्तापकरेषु । करणे ल्युट् । असुखेष्वनशनादिदुःखेष्वपि नगपतिर्गिरीन्द्र इव स्थिरतां दार्ढ्यं व्याप प्राप । तथाहि । महतां धैर्यमविभाव्यं दुर्बोधं वैभवं सामर्थ्यं यस्य तत्तथोक्तम् । धीराणामकिञ्चित्करं दुःखमिति भावः ॥ ३ ॥

न पपात सन्निहितपक्तिसुरभिषु फलेषु मानसम् ।
तस्य शुचिनि शिशिरे च पयस्यमृतायते हि सुतपः सुकर्मणाम् ॥४॥

अन्वयः—तस्य, मानसम् , सन्निहितपक्तिसुरभिषु, फलेषु, शुचिनि, शिशिरे, पयसि, च, न, पपात, हि, सुकर्मणाम् , सुतपः, अमृतायते ॥ ४ ॥

नेति ॥ तस्यार्जुनस्य मानसं मनः सन्निहितानि समीपस्थानि यानि पक्तिसुरभीणि पाकसुगन्धीनि तेषु फलेषु । तथा शुचिनि स्वच्छे शिशिरे शीतले पयसि च न पपात । न किञ्चिदाचकाङ्क्षेति भावः । प्राणधारणं तु तस्य तप एवेत्याह—तथाहि । सुकर्मणां सुकृतिनां शोभनं तपः सुतप एवामृतायतेऽमृतवदाचरति । किं तपस्तृप्तानां तर्पणान्तरैरिति भावः । 'लोहितादिडाज्भ्यः क्यष्' । 'वा क्यषः' इत्यात्मनेपदम् । लोहितादिराकृतिगणः ॥ ४ ॥

न विसिस्मिये न विषसाद मुहुरलसतां न चाददे ।
सत्त्वमुरुधृति रजस्तमसी न हतः स्म तस्य हतशक्तिपेलवे ॥५॥

अन्वयः—सः, न, विसिस्मिये, न विषसाद, मुहुः, अलसताम् , च, न, आददे, हतशक्तिपेलवे, रजस्तमसी, उरुधृति, तस्य, सत्वम् , न, हतःस्म ॥ ५ ॥

नेति ॥ सोऽर्जुनो न विसिस्मिये । अहो महत्तपस्तप्तमिति न विस्मयं जगाम । 'तपः क्षरति विस्मयात्' इति स्मृतेरिति भावः । न विषसाद फलविलम्बाद्गतोत्साहो न बभूव । 'विषादश्चेतसो भङ्गः' इति लक्षणात् । 'सदिरप्रतेः' इति षत्वम् । मुहुरलसतां तपसि मन्दोद्यमत्वं च नागमत् । किं च हतशक्तिनी हतसारे अत एव पेलवे नश्वरे ते हतशक्तिपेलवे रजस्तमसी गुणावुरुधृति महासारं तस्यार्जुनस्य सत्त्वं सत्त्वगुणं न हतः स्म न हतवती । हन्तेः 'लट् स्मे' इति भूतार्थे लट् ॥ ५ ॥

तपसा कृशं वपुरुवाह स विजितजगत्त्रयोदयम् ।
त्रासजननमपि तत्त्वविदां किमिवास्ति यन्न सुकरं मनस्विभिः ॥६॥

अन्वयः—सः, तपसा, कृशं, विजितजगत्त्रयोदयं, तत्वविदां, अपि, त्रासजननं, वपुः, उवाह, यत् , मनस्विभिः, सुकरं, (तत) किम् , इव, अस्ति न ॥ ६ ॥

तपसेति ॥ सोऽर्जुनस्तपसा कृशं तथापि विजितो जगत्त्रयस्य भुवनत्रयस्योदय उत्कर्षो येन तत्तथोक्तम् । किं च तत्त्वविदामपि लोकहितार्थतत्त्वं जानतामपि त्रासजननं भयङ्करं वपुरुवाह वहति स्म । न चैतच्चित्रमित्याह—किमिति । यन्मनस्विभिर्न सुकरं तत्किमिवास्ति । न किमपीत्यर्थः । इवशब्दो वाक्यालङ्कारे । 'मनस्विनाम्' इति पाठे शेषे षष्ठी स्यादेव । कृद्योगलक्षणायाः 'न लोक—' इत्यादिना निषेधात् ॥६॥

ज्वलतोऽनलादनुनिशीथमधिकरुचिरम्भसां निधेः ।
धैर्यगुणमवजयन्विजयी ददृशे समुन्नततरः स शैलतः ॥ ७ ॥

अन्वयः—विजयी, सः, अनुनिशीथं, ज्वलतः, अनलात् , अधिकरुचिः, अम्भसां, निधेः, धैर्यगुणम् , अवजयन् , शैलतः, समुन्नततरः, ददृशे ॥ ७ ॥

ज्वलत इति ॥ विजयी सोऽर्जुनोऽनुनिशीथमर्धरात्रे । विभक्त्यर्थेऽव्ययीभावः । 'अर्धरात्रनिशीथौ द्वौ' इत्यमरः । ज्वलतो दीप्यमानादनलादग्नेरधिकरुचिर्दीप्यमानस्तथाम्भसां निधेर्धैर्यं गाम्भीर्यं तदेव गुणस्तमवजयन् । किं च । शैलतः शैलादपि समुन्नततरो ददृशे दृष्टः । अत्र रुच्यादिभिरनलाद्याधिक्यासम्बन्धे सम्बन्धाभिधानादतिशयोक्तिरलङ्कारः ॥ ७ ॥

जपतः सदा जपमुपांशु वदनमभितो विसारिभिः ।
तस्य दशनकिरणैः शुशुभे परिवेषभीषणमिवार्कमण्डलम् ॥ ८ ॥

अन्वयः—सदा, उपांशुः, जपं, जपतः, तस्य, वदनम् , अभितः, विसारिभिः, दशनकिरणैः, परिवेषभीषणम् , अर्कमण्डलम् , इव, शुशुभे ॥ ८ ॥

जपत इति ॥ सदोपांशु रहः । गूढमित्यर्थः । 'रहश्चोपांशु चालिङ्गे' इत्यमरः । 'करणवदनशब्दमनुप्रयोग उपांशु' इति कौमारलक्षणम् । जप्यत इति जपस्तं जपम् । मन्त्रमित्यर्थः । जपतः पठतस्तस्यार्जुनस्य वदनं कर्तृ अभितो विसारिभिः प्रसरणशीलैर्दशनकिरणैर्दन्तभिः परिवेषभीषणमर्कमण्डलमिव शुशुभे । 'परिवेषस्तु परिधिरुपसूर्यकमण्डले' इत्यमरः ॥ ८ ॥

कवचं स बिभ्रदुपवीतपदनिहितसज्यकार्मुकः ।
शैलपतिरिव महेन्द्रधनुःपरिवीतभीमगहनो विदिद्युते ॥ ९ ॥

अन्वयः—कवचम् , बिभ्रत् , उपवीतपदनिहितसज्यकार्मुकः, सः, महेन्द्रधनुःपरिवीतभीमगहनः, शैलपतिः, इव, विदिद्युते ॥ ९ ॥

कवचमिति ॥ कवचं वर्म बिभ्रदुपवीतपदे यज्ञोपवीतस्थाने निहितमारोपितं सज्यं कार्मुकं येन स तथोक्तः । सोऽर्जुनो महेन्द्रधनुषा परिवीतं परिवेष्टितं भीमं गहनं वनं यस्य स शैलपतिरिव हिमवानिव विदिद्युते शुशुभे ॥ ९ ॥

प्रविवेश गामिव कृशस्य नियमसवनाय गच्छतः ।
तस्य पदविनमितो हिमवान्गुरुतां नयन्ति हि गुणा न संहतिः॥१०॥

अन्वयः—नियमसवनाय, कृशस्य, गच्छतः, तस्य, पदविनमितः, हिमवान् , गाम्, प्रविवेश, गुणाः, गुरुतां, नयन्ति, हि, संहतिः, न, नयन्ति ॥ १० ॥

प्रविवेशेति ॥ नियमसवनाय नियमस्नानाय कृशस्य तपःकर्शितस्य तथा । 'सवनं त्वध्वरे स्नाने सोमनिर्दलनेऽपि च' इति विश्वः । गच्छतस्तस्यार्जुनस्य पदैः पादन्यासैर्विनमितो हिमवान्गां भुवं प्रविवेशेत्युत्प्रेक्षा । ननु कृशस्य कथमियद्गौरवम् । तत्राह—गुणाः साराद्यो गुरुतां नयन्ति प्रापयन्ति हि । संहतिः संघातः । मूर्तिरिति यावत् । न नयन्ति । अन्तःसाराद्धि गौरवं भवति, न तु बाह्यस्यौल्यात् । तत्र च हेमपिण्डतूलपिण्डावेव निदर्शनमिति भावः ॥ १० ॥

परिकीर्णमुद्यतभुजस्य भुवनविवरे दुरासदम् ।
ज्योतिरुपरि शिरसो विततं जगृहे निजान्मुनिदिवौकसां पथः ॥११॥

अन्वयः—उद्यतभुजस्य, शिरसः, उपरि, विततं, भुवनविवरे, परिकीर्णं, दुरासदं, ज्योतिः, मुनिदिवौकसां, निजान्, पथः, जगृहे ॥ ११ ॥

परिकीर्णमिति ॥ उद्यतभुजस्योर्ध्वबाहोस्तस्य शिरस उपरि । 'षष्ठ्यतसर्थप्रत्ययेन' इति षष्ठी । विततं विस्तृतं भुवनयोर्विवरे द्यावापृथिव्योरन्तराले परिकीर्णं व्याप्तं दुरासदं दुर्धर्षं ज्योतिस्तेजो मुनीनां दिवौकसां च निजान्नियतान्पथो मार्गाञ्जगृहे जग्राह । प्रतिबबन्धेत्यर्थः ॥ ११ ॥

रजनीषु राजतनयस्य बहुलसमयेऽपि धामभिः ।
भिन्नतिमिरनिकरं न जहे शशिरश्मिसङ्गमयुजा नभःश्रिया ॥१२॥

अन्वयः—बहुलसमये, अपि, रजनीषु, राजतनयस्य, धामभिः, भिन्नतिमिरनिकरं, नभः, शशिरश्मिसङ्गमयुजा, श्रिया, न जहे ॥ १२ ॥

रजनीष्विति ॥ बहुलसमये कृष्णपक्षेऽपि रजनीषु रात्रिषु राजतनयस्यार्जुनस्य धामभिस्तेजोभिर्भिन्नस्तिमिरनिकरो यस्य तन्नभः शशिरश्मीनां सङ्गमेन हेतुना युजा सङ्गतया श्रिया । तच्छ्रीतुल्यया श्रियेत्यर्थः । अत एव निदर्शनालङ्कारः । न जहे न त्यक्तम् । जहातेः कर्मणि लिट् । ज्योत्स्नातुल्यं ज्योतिर्जातमित्यर्थः ॥ १२ ॥

महता मयूखनिचयेन शमितरुचि जिष्णुजन्मना ।
ह्रीतमिव नभसि वीतमले न विराजते स्म वपुरंशुमालिनः ॥१३॥

अन्वयः—जिष्णुजन्मना, महता मयूखनिचयेन, शमितरुचि, अंशुमालिनः, वपुः, ह्रीतम्, इव, वीतमले, नभसि, न, विराजते स्म, ॥ १३ ॥

महतेति ॥ जिष्णोरर्जुनाज्जन्म यस्य तेन । जन्मोत्तरपदत्वाद्व्यधिकरणो बहुव्रीहिः । महता मयूखनिचयेन बहुकिरणसमूहेन शमितरुचि हतप्रभमंशुमालिनो वपुरर्कबिम्बं ह्रीतं जितत्वाल्लज्जितमिवेत्युत्प्रेक्षा । वीतमले विमले । मेघनीहाराद्यावरणरहितेऽपीत्यर्थः । नभसि न विराजते स्म ॥ १३ ॥

तमुदीरितारुणजटांशुमधिगुणशरासनं जनाः ।
रुद्रमनुदितललाटदृशं ददृशुर्मिमन्थिषुमिवासुरीः पुरीः ॥१४॥

अन्वयः—उदीरितारुणजटांशुम्, अधिगुणशरासनं, तं, जनाः, आसुरीः, पुरीः, मिमन्थिषुम्, अनुदितललाटदृशं, रुद्रम्, इव, ददृशुः ॥ १४ ॥

तमिति ॥ उदीरिता उद्गता अरुणा जटानामंशवो यस्य तमधिगुणमधिज्यं शरासनं यस्य तमर्जुनं जनाः सिद्धगणा आसुरीरसुरसम्बन्धिनीः पुरीर्मिमन्थिषुं मथितुमिच्छुम् । मथेः सन्नन्तादुप्रत्ययः । तथानुदितानुत्पन्ना ललाटे दृग्यस्य तं साक्षात्त्रिपुरविजयोद्यतमभालाक्षं रुद्रमिव ददृशुः । अत्राभालाक्षस्य रुद्रस्यासम्भवात्स्वतःसिद्धोपमानासिद्धेर्नेयमुपमा । किन्तूत्प्रेक्षा । सा चाभालाक्षमित्युपमानादुपमेयस्य न्यूनत्वकथनार्थेऽन्वयव्यतिरेकेणोज्जीवितेत्यनयोरङ्गाङ्गिभावेन सङ्करः । उपमा तु व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः ॥ १४ ॥

मरुतां पतिः स्विदहिमांशुरुत पृथुशिखः शिखी तपः ।
तप्तुमसुकरमुपक्रमते न जनोऽयमित्यवयये स तापसैः ॥ १५ ॥

अन्वयः—मरुतां, पतिः, स्वित्, अहिमांशुः, उत, पृथुशिखः, शिखी (वा) असुकरम्, तपः, तप्तुम्, उपक्रमते, अयं, जनः, न, सः, तापसैः, इति, अवयये ॥ १५ ॥

मरुतामिति ॥ मरुतां पतिः स्विदेवेन्द्रो वा । अहिमांशुरुत सूर्यो वा । पृथुशिखो महाज्वालः शिखी पावको वा । असुकरं दुष्करं तपस्तप्तुमुपक्रमते । अयं जनः पुरुषः कश्चित्प्राकृतो नेति सोऽर्जुनस्तापसैस्तपस्विभिः । 'अण् च' इति मत्वर्थीयोऽण्प्रत्ययः । अवययेऽवगतः । यातेरवपूर्वात्कर्मणि लिट् । अत्रेन्द्रत्वादिकमारोप्य जनत्वापवादात्साम्यमारोप्यापह्नवालङ्कारः । सामान्यलक्षणं तु -'निषिद्धविषये साम्यारोपो ह्यपह्नवः' इति ॥

न ददाह भूरुहवनानि हरितनयधाम दूरगम् ।
न स्म नयति परिशोषमपः सुसहं बभूव न च सिद्धतापसैः ॥१६॥

अन्वयः—दूरगं, हरितनयधाम, भूरुहवनानि, न ददाह । अपः, परिशोषं, न नयतिस्म, सिद्धतापसैः, सुसहं न, बभूव ॥ १६ ॥

न ददाहेति ॥ दूरगम् । व्यापकमित्यर्थः । हरितनयस्येन्द्रसुतस्यार्जुनस्य धाम तेजो भूरुहवनानि वृक्षखण्डान्न ददाह । अग्निवदिति भावः । तथापो जलानि परिशोषं न नयति स्म । अर्कवदिति भावः । तथापीति शेषः । सिद्धाश्च तापसाश्च तैः सुसहं न बभूव । अतोऽस्यालौकिकं तेज इति भावः । अत एव दुःसहत्वदाहाद्यजनकत्वयोर्विरोधाद्विरोधाभासोऽलङ्कारः-'आभासत्वे विरोधस्य विरोधालङ्कृतिर्मता' इति लक्षणात् ॥

विनयं गुणा इव विवेकमपनयभिदं नया इव ।
न्यायमवधय इवाशरणाः शरणं ययुः शिवमथो महर्षयः ॥ १७ ॥

अन्वयः—अथ, अशरणाः, महर्षयः, विनयं, गुणा इव, अपनयभिदं, विवेकं, नया इव, न्यायम्, अवधय इव, शिवं, शरणं, ययुः ॥ १७ ॥

विनयमिति ॥ अथोऽनन्तरमशरणा महर्षयो मुनयो विनयं शिक्षां गुणा औदार्यादय इव । अशिक्षितस्य तदभावादिति भावः । अपनयभिदं दुर्नीतिवारकं विवेकं सदसज्ज्ञानं नया नीतय इव । अविवेकिनो नीत्यभावादिति भावः । नीतिः षाड्गुण्यप्रयोगः । नीयतेऽनेनेति न्यायो नियामकं प्रमाणं तम् । अवधयः समया इव । अप्रामाणिकस्य समयोल्लङ्घनादिति भावः । शिवं शरणं रक्षितारम् । 'शरणं गृहरक्षित्रोः' इत्यमरः । ययुर्जग्मुः । शरणत्वेन प्रापुरित्यर्थः । अशरणाः शरणमिति चापमास्वपि यथायोग्यं योज्यम् । उपमालङ्कारः ॥ १७ ॥

परिवीतमंशुभिरुदस्तदिनकरमयूखमण्डलैः ।
शम्भुमुपहतदृशः सहसा न च ते निचायितुमभिप्रसेहिरे ॥ १८ ॥

अन्वयः—उदस्तदिनकरमयूखमण्डलैः, अंशुभिः, परिवीतं, शम्भुम्, उपहतदृशः, ते, (महर्षयः,) सहसा, निचायितुं, नाभिप्रसेहिरे ॥ १८ ॥

परिवीतमिति ॥ उदस्तं निरस्तं कादितं दिनकरमयूखमण्डलं यैस्तैः । सूर्यतेजोविजयिभिरित्यर्थः । अंशुभिस्तेजोभिः परिवीतं व्याप्तं शम्भुं शिवमुपहतदृशः प्रतिहतदृष्टयस्ते महर्षयः सहसा झटिति निचायितुं निशामयितुम् । द्रष्टुमित्यर्थः । 'चायृ पूजानिशामनयोः' इति धातोः 'शकधृष–' इत्यादिना तुमुन् । नाभिप्रसेहिरे न शेकुः ॥ १८ ॥

अथ भूतभव्यभवदीशमभिमुखयितुं कृतस्तवाः ।
तत्र महसि ददृशुः पुरुषं कमनीयविग्रहमयुग्मलोचनम् ॥ १९ ॥

अन्वयः—अथ, भूतभव्यभवदीशम्, अभिमुखयितुं, कृतस्तवाः सन्तः, तत्र, महसि कमनीयविग्रहम्, अयुग्मलोचनं, पुरुषं, ददृशुः ॥ १९ ॥

अथेति ॥ अथ दृगुपघातानन्तरं भूतभव्यभवतां भूतभविष्यद्वर्तमानानामीशं देवमभिमुखयितुमभिमुखीकर्तुं कृतस्तवाः कृतस्तोत्राः सन्तः । न त्वनयेति भावः । 'स्तवः स्तोत्रं स्तुतिर्नुतिः' इत्यमरः । तत्र पूर्वोक्ते महसि तेजसि कमनीयविग्रहं रम्यमूर्तिमयुग्मानि त्रीणि लोचनानि यस्य तं पुरुषं ददृशुः ॥ १९ ॥

अथ पञ्चभिः पुरुषं विशिनष्टि—ककुद इत्यादिना ॥

ककुदे वृषस्य कृतबाहुमकृशपरिणाहशालिनि ।
स्पर्शसुखमनुभवन्तमुमाकुचयुग्ममण्डल इवार्द्रचन्दने ॥ २० ॥

अन्वयः—अकृशपरिणाहशालिनि, वृषस्य, ककुदे, आर्द्रचन्दने, उमाकुचयुग्ममण्डल इव, कृतबाहुं, स्पर्शसुखम्, अनुभवन्तम् ॥ २० ॥

कीदृशं पुरुषम् ॥ अकृशेन महता परिणाहेन विशालतया शालत इति तथोक्ते। 'परिणाहो विशालता' इत्यमरः। वृषस्य वृषभस्य ककुदेऽसकूटे। आश्रयीकृत इति शेषः। आर्द्रचन्दन उमायाः कुचयुग्ममण्डल इव कृतबाहुं न्यस्तहस्तमत एव स्पर्शसुखमनुभवन्तम्। ककुदस्य तथाविधस्पर्शसुखकरत्वादिति भावः। उपमालङ्कारः॥२०॥

स्थितमुन्नते तुहिनशैलशिरसि भुवनातिवर्तिना ।
साद्रिजलधिजलवाहपथं सदिगश्नुवानमिव विश्वमोजसा ॥२१॥

अन्वयः—उन्नते, तुहिनशैलशिरसि, स्थितम्, भुवनातिवर्तिना, ओजसा, साद्रिजलधिजलवाहपथं, सदिक्, विश्वम्, अश्नुवानमिव ॥ २१ ॥

स्थितमिति ॥ उन्नते तुहिनशैलशिरसि हिमवतः शिखरे स्थितम्। क्वचित्कोणे स्थितमित्यर्थः। तथापि भुवनातिवर्तिना सर्वलोकातिशायिनौजसा तेजसा। अद्रिभिः पर्वतैर्जलधिभिः समुद्रैर्जलवाहपथेनाकाशेन च सह वर्तत इति तथोक्तम्। दिग्भिः सह वर्तत इति सदिक्। उभयत्रापि 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः। विश्वमश्नुवानं व्याप्नुवन्तमिव स्थितमित्युत्प्रेक्षा। 'अशूङ् व्याप्तौ' इति धातोः शानच् ॥२१॥

अनुजानुमध्यमवसक्तविततवपुषा महाहिना ।
लोकमखिलमिव भूमिभृता रवितेजसामवधिनाधिवेष्टितम् ॥२२॥

अन्वय.—अनुजानुमध्यम्, अवसक्तविततवपुषा, महाहिना, अधिवेष्टितम् अत एव-रवितेजसाम्, अवधिना, भूमिभृता, अखिल, लोकमिव, स्थितम् ॥ २२ ॥

अनुजान्विति ॥ जानुनोर्मध्येऽनुजानुमध्यम्। विभक्त्यर्थेऽव्ययीभावः। अवसक्तं लग्नं विततमायतं च वपुर्यस्य तेन महाहिना। अवसक्तिकाबन्धभूतेनेत्यर्थः। अधिवेष्टितमत एव रवितेजसामवधिना पर्यन्तभूतेन भूमिभृता लोकालोकाचलेनाभिवेष्टितमखिलं लोकमिव स्थितमित्युपमा। 'असूर्यम्पश्यापरभागो लोकालोकाचल' इत्यागमः ॥ २२ ॥

परिणाहिना तुहिनराशिविशदमुपवीतसूत्रताम् ।
नीतमुरगमनुरञ्जयता शितिना गलेन विलसन्मरीचिना ॥ २३ ॥

अन्वयः— तुहिनराशिविशदम्, उपवीतसूत्रतां, नीतम्, उरगम्, अनुरञ्जयता, परिणाहिना विलसन्मरीचिना, शितिना, गलेन (उपलक्षितम्) ॥ २३ ॥

परिणाहिनेति ॥ पुनश्च। तुहिनराशिवद्विशदं शुभ्रमुपवीतसूत्रतां यज्ञोपवीतत्वं नीतं प्रापितमुरगं शेषाहिमनुरञ्जयता स्वगुणोपरक्तं कुर्वता। श्यामीकुर्वतेत्यर्थः। परि-

गाहिमा विशालेन विलसन्मरीचिना प्रसूनकिरणेन शिनिना नीलेन गलेन कण्ठेनोपलक्षितम् । 'कण्ठो गलोऽथ ग्रीवायाम्' इत्यमरः । अत्रोरगस्य स्वधवलिमत्यागेनान्यजन्यनीलिमग्रहणात्तद्गुणालङ्कारः—'तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणग्रहः' इति लक्षणात् ॥ २३ ॥

प्लुतमालतीसितकपालकुमुदमवरुद्धमूर्धजम् ।
शेषमिव सुरसरित्पयसां शिरसा विसारि शशिधाम बिभ्रतम् ॥२४॥*

अन्वयः—प्लुतमालतीसितकपालकुमुदम्, अवरुद्धमूर्धजम्, सुरसरित्, पयसां, शेषमिव, विसारि, शशिधाम, शिरसा, बिभ्रतं, (पुरुषं, ददृशुः) ॥ २४ ॥

प्लुतेति । पुनश्च । मालती जातीकुसुमम् । 'सुमना मालती जातिः' इति, 'पुष्पे जातीप्रभृतयः स्वलिङ्गा व्रीहयः फले' इति चामरः । तद्वत्सितं यत्कपालमेव कुमुदं तत्प्लुतमाप्लुतं येन तत्तथोक्तम् । अवरुद्धमूर्धजं व्याप्तशिरोरुहम् । अत एव सुरसरित्पयसां शेषमिव निर्यातावशिष्टं गाङ्गमम्भ इव । स्थितमित्यर्थः । उत्प्रेक्षालङ्कारः । विसारि विसृत्वरं शशिधाम चन्द्रतेजः शिरसा बिभ्रतम् । पुरुषं ददृशुरिति पूर्वेण सम्बन्धः ॥ २४ ॥

मुनयस्ततोऽभिमुखमेत्य नयनविनिमेषनोदिताः ।
पाण्डुतनयतपसा जनितं जगतामशर्म भृशमाचचक्षिरे ॥ २५ ॥

अन्वयः—ततः, मुनयः, अभिमुखम्, एत्य, नयनविनिमेषनोदिताः, पाण्डुतनयतपसा, जनितम्, जगताम्, अशर्म, भृशम्, आचचक्षिरे ॥ २५ ॥

मुनय इति ॥ ततो दर्शनानन्तरं मुनयोऽभिमुखमेत्य । शिवस्येति शेषः । नयनविनिमेषेण नेत्रसंज्ञया नोदिताः प्रेरिताः सन्त पाण्डुतनयस्यार्जुनस्य तपसा जनितं

*२४—२५ श्लोकयोर्मध्ये क्वचित्क्षेपकोऽयं दृश्यते—

बहुभिश्च बाहुभिरहीनभुजगवलयैर्विराजितम् ।
चन्दनतरुभिरिवालघुभिः प्रबलायतैर्मलयमेदिनीभृतम् ॥

बहुभिरिति ॥ अहीनां सर्पाणां मध्ये य इनाः श्रेष्ठा भुजगास्त एव वलयानि येषां तैः । सर्पाभरणैरित्यर्थः । बहुभिरनेकैर्बाहुभिः । सहस्रभुजत्वात्तस्येति भावः । विराजितं शोभितं चन्दनतरुभिरनेकैर्मलयमेदिनीभृतमिव स्थितम् । चन्दनतरवोऽप्यहीना महान्तो भुजगास्तेषां वलयो वेष्टनं येषां तैरिति । अलघुभिर्महद्भिः प्रबलाश्च त आयताश्च तदुभयविशेषणम् । प्रबलदीर्घैरित्यर्थः । अथवा । अमलायतैरमला निर्मला आयताश्च ते तैः । उपमालङ्कारः ॥

तत्पूर्वोक्तं जगतामशर्मासुखम् । दुःखमित्यर्थः । 'शर्मशातसुखानि च' इत्यमरः । भृशं सम्यगाचचक्षिरे कथितवन्तः ॥ २५ ॥

तरसैव कोऽपि भुवनैकपुरुष पुरुषस्तपस्यति ।
ज्योतिरमलवपुषोऽपि रवेरभिभूय वृत्र इव भीमविग्रहः ॥ २६ ॥

अन्वय–हे भुवनैकपुरुष ! वृत्रः, इव, भीमविग्रहः, कोऽपि, पुरुषः, तरसा, एव अमलवपुषः, रवेः, अपि, ज्योतिः, अभिभूय, तपस्यति ॥ २६ ॥

तरसेति ॥ हे भुवनैकपुरुष, वृत्रो वृत्रासुर एव भीमविग्रहः कोऽपि । अविज्ञात इत्यर्थः । पुरुषस्तरसा बलात्कारेणैव । 'तरसी बलरंहसी' इति विश्वः । अमलवपुष उज्ज्वलमूर्ते रवेरपि ज्योतिरभिभूय तपस्यति तपश्चरति । 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः' इति क्यङ् ॥ २६ ॥

स धनुर्महेषुधि बिभर्ति कवचमसिमुत्तमं जटाः ।
वल्कमजिनमिति चित्रमिदं मुनिताविरोधि न च नास्य राजते ॥२७॥

अन्वयः—सः महेषुधि, धनुः, कवचम्, उत्तमम्, असिम्, जटाः, वल्कम्, अजिनम्, च, बिभर्ति, इति, इदम्, मुनिताविरोधि, अस्य, न राजते, इति, न ॥ २७ ॥

स इति ॥ किं च । स पुरुषो महान्ताविषुधी यस्य तन्महेषुधि धनुः कवचं वर्मोत्तममसिं खड्गं जटा वल्कं चीरमजिनं चर्म च बिभर्ति इत्येवंरूपमिदं विरुद्धवेषधारणं मुनिताविरोधि मुनित्वप्रतिबन्धकं तथाप्यस्य न राजत इति न । किं तु राजत इत्यर्थः । चित्रमाश्चर्यम् । 'सम्भाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ' इति वामनः ॥ २७ ॥

चलनेऽवनिश्चलति तस्य करणनियमे सदिङ्मुखम् ।
स्तम्भमनुभवति शान्तमरुद्ग्रहतारकागणयुतं नभस्तलम् ॥ २८ ॥

अन्वयः—तस्य, चलने, अवनि, चलति, करणनियमे, सदिङ्मुखम्, शान्तमरुद्ग्रहतारकागणयुतम्, नभस्तलम्, स्तम्भम्, अनुभवति ॥ २८ ॥

चलन इति ॥ किंच । तस्य पुंसश्चलनेऽवनिः पृथिवी चलति । तथा करणनियमे समाधिष्विन्द्रियसंयमे सति । 'करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि' इत्यमरः । सदिङ्मुखं दिक्सहितं शान्तैः स्तिमितैर्मरुतां वायूनां ग्रहाणां सूर्यादीनां तारकाणां गणैर्युतं नभस्तलं व्योम स्तम्भं निश्चलतामनुभवतीत्यर्थः । अतो विश्वातिशायिनी तस्य शक्तिरुपलक्ष्यत इति भावः ॥ २८ ॥

न चैतदुपेक्ष्यमित्याशयेनाह—

स तदोजसा विजितसारममरदितिजोपसंहितम् ।
विश्वमिदमपिदधाति पुरा किमिवास्ति यन्न तपसामदुष्करम् ॥२९॥

अन्वयः—सः, ओजसा, विजितसारम्, अमरदितिजोपसंहितम्, तत्, इदम्, विश्वम्, पुरा, अपि, दधाति, (तथाहि) यत्, तपसाम्, अदुष्करम्, तत् किमिव, अस्ति, न ॥ २९ ॥

स इति ॥ स पुमानोजसा विजितसारं निरस्तसत्त्वम्। अमरदितिजोपसंहितं सुरासुरसहितं तदिदं विश्वं पुराऽपिदधाति। अपिधास्यतीत्यर्थ.। शीघ्रमेव हरिष्यतीति भावः। 'निकटागामिके पुरा' इत्यमरः। 'यावत्पुरानिपातयोर्लट्' इति भविष्यदर्थे लट्। तथाहि। यत्कर्म तपसामदुष्करं तत्किमिवास्ति। न किञ्चित्तेन दुष्करमस्तीत्यर्थः। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ २९ ॥

न चैतदन्यफलकं तप इत्याह—

विजिगीषते यदि जगन्ति युगपदथ सञ्जिहीर्षति।
प्राप्तुमभवमभिवाञ्छति वा वयमस्य नो विषहितुं क्षमा रुचः॥३०॥

अन्वयः—(सः) जगन्ति, युगपत्, विजिगीषते, यदि, अथ, (युगपत्) सञ्जिहीर्षति, अभवम्, प्राप्तुम्, अभिवाञ्छति, वा (किन्तु) वयम्, अस्य, रुचः, विषहितुम्, नो, क्षमा ॥ ३० ॥

विजिगीषत इति ॥ स पुरुषो जगन्ति भुवनानि युगपद्विजिगीषते यदि विजेतुमिच्छति वा। 'पूर्ववत्सन.' इत्यात्मनेपदम्। अथ युगपत्सञ्जिहीर्षति संहर्तुमिच्छति वा। अभवमपवर्गं प्राप्तुमभिवाञ्छति वा न विद्मो वयमिति शेषः। किं तु वयमप्यस्य रुचस्तेजांसि विषहितुं सोढुम्। 'तीषसहलुभरुषरिष.' इति विकल्पादिडागमः। नो क्षमा न शक्ताः। केचित् 'रुचः कामितानि विषहितुमवधारयितुम्' इति व्याचक्षते। तत्र सहेरवधारणार्थत्वं विचार्यम् ॥ ३० ॥

किमुपेक्षसे कथय नाथ न तव विदितं न किञ्चन।
त्रातुमलमभयदार्हसि नस्त्वयि मा स्म शासति भवत्पराभवः॥३१॥

अन्वयः—नाथ ! किम्, उपेक्षसे, कथय, तव, न, विदितम्, न, किञ्चन, अभयद ! नः, अलम्, त्रातुम्, अर्हसि, त्वयि, शासति, पराभवः, मास्म भवत् ॥ ३१ ॥

किमिति ॥ हे नाथ, किं किमर्थमुपेक्षसे कथय। त्वमिति शेषः। तव न विदितम्। त्वयाज्ञायमानमित्यर्थः। 'क्तस्य च वर्तमाने' इति षष्ठी। न किञ्चन किमपि न। हे अभयद, नोऽस्मानलं त्रातुमर्हसि। त्वयि शासति सति पराभवो मा स्म भवन्माभूत्। 'स्मोत्तरे लङ् च' इति लङ् ॥ ३१ ॥

इति गां विधाय विरतेषु मुनिषु वचनं समाददे।
भिन्नजलधिजलनादगुरु ध्वनयन्दिशां विवरमन्धकान्तकः ॥३२॥

अन्वयः—इति, गाम्, विधाय, मुनिषु, विरतेषु, अन्धकान्तकः, भिन्नजलधिजलनादगुरु, दिशां, विवरम्, ध्वनयन्, वचनम्, समाददे ॥ ३२ ॥

इतीति । इतीत्थं गां वाचं विधाय । अभिधायेत्यर्थः । सामान्यस्य विशेषपर्यवसानात् । मुनिषु विरतेषु तूष्णीम्भूतेषु सत्सु । अन्धकान्तकः शिवो भिन्नस्योद्वेलस्य जलधेर्जलस्य नादमिव गुरु गम्भीरं यथा तथा दिशां विवरमन्तरालं ध्वनयन्वचनं समाददे स्वीचकार । उवाचेत्यर्थः ॥ ३२ ॥

बदरीतपोवननिवासनिरतमवगात मान्यथा ।
धातुरुदयनिधने जगतां नरमंशमादिपुरुषस्य गां गतम् ॥ ३३ ॥

अन्वयः—बदरीतपोवननिवासनिरतम्, गां, गतम्, जगताम्, उदयनिधने, धातुः, आदिपुरुषस्य, अंशम्, नरम्, अन्यथा, मा, अवगात ॥ ३३ ॥

बदरीति ॥ बदरीतपोवने बदरिकाश्रमे निवासनिरतं नित्यनिवासिनं गां गतं भुवमवतीर्णं जगतामुदयनिधने सृष्टिसंहारौ धातुः । तयोः कर्तुरित्यर्थः । 'तृन्' इति दधातेस्तृन्प्रत्ययः । अत एव 'न लोक-' इत्यादिना कर्मणि षष्ठीप्रतिषेधः । आदिपुरुषस्य विष्णोरंशमंशभूतं नरम् । नरसंज्ञकमित्यर्थः । यो नारायणसखेति भावः । अन्यथोक्तवैपरीत्येनैनं मावगात । मनुष्यमात्रं मा जानीतेत्यर्थः । 'इणो गा लुङि' इति गादेशः॥३३॥

अथ तस्य तपसो निमित्तमाह—

द्विषतः परासिसिषुरेष सकलभुवनाभितापिनः ।
क्रान्तकुलिशकरवीर्यबलान्मदुपासनं विहितवान्महत्तपः ॥ ३४ ॥

अन्वयः—एषः, सकलभुवनाभितापिनः, क्रान्तकुलिशकरवीर्यबलान्, द्विषत, परासिसिषुः, मदुपासनं, महत्तपः, विहितवान् ॥ ३४ ॥

द्विषत इति ॥ एष नरः सकलभुवनान्यभितापयन्त्यभीक्ष्णमिति तथोक्तान् । 'बहुलमाभीक्ष्ण्ये' इति णिनिः । क्रान्त आक्रान्ते कुलिशकरस्येन्द्रस्य वीर्यबले शक्तिसैन्ये यैस्तान्द्विषतः शत्रून्परासिसिषुः परासितुमिच्छुः । अस्यतेः सन्नन्तादुप्रत्ययः । मदुपासनं मदाराधनम् । करणे ल्युट् । महत्तपो विहितवान् ॥ ३४ ॥

अथास्य मानुषावतारे कारणमाह—

अयमच्युतश्च वचनेन सरसिरुहजन्मनः प्रजाः ।
पातुमसुरनिधनेन विभू भुवमभ्युपेत्य मनुजेषु तिष्ठतः ॥ ३५ ॥

अन्वयः—विभूः, अयम्, अच्युतः, च, सरसिरुहजन्मनः, वचनेन, असुरनिधनेन, प्रजाः, पातुम्, भुवम्, अभ्युपेत्य, मनुजेषु, तिष्ठतः ॥ ३५ ॥

अयमिति ॥ विभू प्रभू अयं नरोऽच्युतः कृष्णश्च सरसिरुहजन्मनो ब्रह्मणो वचनेन प्रार्थनयासुराणां निधनेन मारणेन करणेन प्रजाः पातुं रक्षितुं भुवमभ्युपेत्य मनुजेषु तिष्ठतः । वस्तुतस्तु साक्षान्नरनारायणावेतौ कृष्णार्जुनावित्यर्थः ॥ ३५ ॥

अथास्य सत्त्वसम्पदं प्रकाशयितुमाह—

सुरकृत्यमेतदवगम्य निपुणमिति मूकदानवः ।
हन्तुमभिपतति पाण्डुसुतं त्वरया तदत्र सह गम्यतां मया ॥३६॥

अन्वयः—मूकदानवः, एतत्, (पाण्डवकृत्यम्) सुरकृत्यम्, इति, निपुणम्, अवगम्य, पाण्डुसुतम्, हन्तुम्, अभिपतति, तत्, अत्र, मया, सह, त्वरया, गम्यताम् ॥ ३६ ॥

सुरेति ॥ मूकदानवो मूकाख्यः कश्चिदसुर एतत्पाण्डवकृत्यं सुरकृत्यमिति निपुणमवगम्य साधु निश्चित्य पाण्डुसुतमर्जुनं हन्तुमभिपतति । तत्तस्मात्कारणादत्रार्जुनाश्रमे विषये । आश्रमं प्रतीत्यर्थः । मया सह त्वरया गम्यताम् । द्रष्टुमिति शेषः ॥३६॥

विवरेऽपि नैनमनिगूढमभिभवितुमेष पारयन् ।
पापनिरतिरविशङ्कितया विजयं व्यवस्यति वराहमायया ॥३७॥

अन्वयः—पापनिरतिः, एषः, विवरे, अपि, एनम्, अनिगूढम्, अभिभवितुम्, न, पारयन्, अविशङ्कितया, वराहमायया, विजयम्, व्यवस्यति ॥ ३७ ॥

विवर इति ॥ पापे निरतिर्रतिप्रीतिर्यस्य स एष दानवो विवरे रन्ध्रेऽपि । एकान्तेऽपीत्यर्थः । एनं पाण्डवमनिगूढं प्रकाशं स्पष्टं यथा तथाभिभवितुं न पारयन्न शक्नुवन् । विभाषायाम् 'नञ्' इति नञ्समासः । अविशङ्कितया स्वरूपगूहनान्निःशङ्कितया वराहमायया वराहभूमिकया विजयं व्यवस्यति विजयं प्रत्युद्युक्त इत्यर्थः॥३७॥

ततः किं भावीत्यत आह—

निहते विडम्बितकिरातनृपतिवपुषा रिपौ मया ।
मुक्तनिशितविशिखः प्रसभं मृगयाविवादमयमाचरिष्यति ॥३८॥

अन्वयः—विडम्बितकिरातनृपतिवपुषा, मया, रिपौ, निहते, मुक्तनिशितविशिखः (सन्) अयम्, प्रसभं, मृगयाविवादम्, आचरिष्यति ॥ ३८ ॥

निहत इति ॥ विडम्बितमनुकृतं किरातनृपतिवपुर्येन तेन । तद्रूपधारिणेत्यर्थः । मया रिपौ वराहे निहते मया हते विषये मुक्तनिशितविशिखः सन् । अयं पाण्डवः प्रसभं प्रसह्य मृगयाविवादं मृगप्रहारकलहमाचरिष्यति करिष्यति । मत्प्रहृतमेव मृगं प्रहृत्य स्वयमहमेव प्रहर्तेति कलहिष्यत इत्यर्थः ॥ ३८ ॥

ततोऽपि किं भावीत्याह—

तपसा निपीडितकृशस्य विरहितसहायसम्पदः ।

सत्त्वविहितमतुलं भुजयोर्बलमस्य पश्यत मृधेऽधिकुप्यतः ॥३९॥

अन्वयः—तपसा, निपीडितकृशस्य, विरहितसहायसम्पदः, मृधे, अधिकुप्यतः अस्य, सत्त्वविहितम्, अतुलम्, भुजयोः, बलं, पश्यत ॥ ३९ ॥

तपसेति ॥ तपसा नितरां पीडितोऽत एव कृशस्तस्य निपीडितकृशस्य । 'पूर्वकाल—' इत्यादिना समासः । तथा विरहिता सहायसम्पद्यस्य तस्यैकाकिनो मृधेरणे । 'मृधमास्कन्दनं संख्यम्' इत्यमरः । अधिकुप्यतोऽधिकं कुप्यतोऽधिकं पाण्डवस्य सत्त्वविहितं स्वभावकृतम् । स्वाभाविकमित्यर्थः । 'सत्त्वोऽस्त्री जन्तुषु क्लीबे व्यवसाये पराक्रमे । आत्मभावे पिशाचादौ द्रव्ये सत्तास्वभावयोः । प्राणे बलेऽन्तःकरणे' इति वैजयन्ती । अतुलं निरुपमं भुजयोर्बाह्वोर्बलं शक्तिं पश्यत । 'बलं शक्तिर्बलं सैन्यम्' इति शाश्वतः ॥ ३९ ॥

अथ त्रिभिरस्य किरातभावं वर्णयति—

इति तानुदारमनुनीय विषमहरिचन्दनालिना ।

घर्मजनितपुलकेन लसद्गजमौक्तिकावलिगुणेन वक्षसा ॥ ४० ॥

अन्वयः—(शिवः) इति तान्, उदारम्, अनुनीय, विषमहरिचन्दनालिना, घर्मजनितपुलकेन, लसद् गजमौक्तिकावलिगुणेन, वक्षसा, ॥ ४० ॥

इतीत्यादि ॥ शिव इतीत्थं तान्मुनीनुदारं युक्तियुक्तं यथा तथानुनीय शिक्षयित्वा । उक्त्वेति यावत् । 'रुचिरः किरातपृतनापतिः संववृते' इत्युत्तरेणान्वयः । किरातसेनापतिवेषधारी बभूवेत्यर्थः । कथम्भूतः । विषमा विकृतविन्यासा हरिचन्दनस्याल्यो रेखा यस्मिंस्तेन । घर्मेण स्वेदेन जनिताः पुलका रोमाञ्चा यस्मिंस्तेन । 'पुलकः पुनः । रोमाञ्चकण्टको रोमविकारो रोमहर्षणम्' इति हेमचन्द्रः । 'घर्मः स्यादातपे ग्रीष्मे उष्णस्वेदाम्भसोरपि' इति विश्वः । लसन्तः शोभमाना गजमौक्तिमानां करिकुम्भोद्भवमौक्तिकानामावल्य एव गुणाः सूत्राणि यस्मिंस्तेन वक्षसा वक्षःस्थलेनोपलक्षितः । करिणां मुक्तायोनित्वे प्रमाणमाहागस्त्यः—'जीमूतकरिमत्स्याहिवंशशङ्खवराहजाः । शुक्त्युद्भवाश्च विज्ञेया अष्टौ मौक्तिकयोनयः ॥' इति ॥ ४० ॥

वदनेन पुष्पितलतान्तनियमितविलम्बिमौलिना ।

बिभ्रदरुणनयनेन रुचं शिखिपिच्छलाञ्छितकपोलभित्तिना ॥४१॥

अन्वयः—पुष्पितलतान्तनियमितविलम्बिमौलिना, शिखिपिच्छलाञ्छितकपोलभित्तिना, अरुणनयनेन, वदनेन रुचम्, बिभ्रत् ॥ ४१ ॥

वदनेनेति ॥ पुष्पितैर्लतान्तैर्विकसितलताग्रैर्नियमिताः संयता विलम्बिनश्च ते मौलयः संयतकेशा यस्य तेन । 'चूडा किरीटं केशाश्च संयता मौलयस्त्रयः.' इत्यमरः । शिखिपिच्छलाञ्छिते बर्हिबर्हाङ्किते कपोलभित्ती यस्य तेनारुणनयनेनारक्तनेत्रेण वदनेन रुचं शोभां बिभ्रत् ॥ ४१ ॥

बृहदुद्वहज्जलदनादि धनुरुपहितैकमार्गणम् ।
मेघनिचय इव संववृते रुचिरः किरातपृतनापतिः शिवः ॥४२॥

अन्वयः—किरातपृतनापतिः, शिवः, जलदनादि, उपहितैकमार्गणम्, बृहत्, धनुः, उद्वहन् रुचिरः, मेघनिचयः, इव, संववृते ॥ ४२ ॥

बृहदिति ॥ पुनश्च । जलद इव नदतीति जलदनादि । 'कर्तर्युपमाने' इति णिनिः । उपहितैकमार्गणं संहितैकबाणं धनुरुद्वहन् । अत एव मेघनिचय इव स्थित इत्युपमा । अत्र विशेषके स्वभावोक्तिरलङ्कारः । 'स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम्' इति लक्षणात् ॥ ४२ ॥

अनुकूलमस्य च विचिन्त्य गणपतिभिरात्तविग्रहैः ।
शूलपरशुशरचापभृतैर्महती वनेचरचमूर्विनिर्ममे ॥ ४३ ॥

अन्वयः—अस्य, अनुकूलम्, विचिन्त्य, आत्तविग्रहैः, शूलपरशुशरचापभृतैः, गणपतिभिः, महती, वनेचरचमूः, विनिर्ममे ॥ ४३ ॥

अनुकूलमिति ॥ अस्य शिवस्यानुकूलं विचिन्त्य प्रियमिति निश्चित्यात्तविग्रहैर्गृहीतकिरातदेहैः । तथा शूलानि परशवः कुठाराः शराश्चापानि च तानि भृतानि यैस्तैः । 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ' इति निष्ठायाः परनिपातः । गणपतिभिः प्रमथमुख्यैर्महती वनेचरचमूः सेना विनिर्ममे निर्मिता । माङः कर्मणि लिट् ॥ ४३ ॥

विरचय्य काननविभागमनुगिरमथेश्वराज्ञया ।
भीमनिनदपिहितोरुभुवः परितोऽपदिश्य मृगयां प्रतस्थिरे ॥४४॥

अन्वयः—अथ, ईश्वराज्ञया, अनुगिरम्, काननविभागम्, विरचय्य, भीमनिनदपिहितोरुभुवः, मृगयाम्, अपदिश्य, परितः, प्रतस्थिरे ४४ ॥

विरचय्येति ॥ अथेश्वराज्ञयानुगिरं गिरौ । विभक्त्यर्थेऽव्ययीभावः । 'गिरेश्च सेनकस्य' इति समासान्तः । काननविभागं वनविभागं विरचय्य । अस्यायमिति देशविभागं कृत्वेत्यर्थः । भीमैर्निनदैः कलकलैः पिहिता उरवो भुवो यैस्ते तथोक्ताः सन्तः । मृगयामपदिश्य व्याजीकृत्य परितः प्रतस्थिरे प्रस्थिताः ॥ ४४ ॥

क्षुभिताभिनिःसृतविभिन्नशकुनिमृगयूथनिःस्वनैः ।
पूर्णपृथुवनगुहाविवरः सहसा भयादिव ररास भूधरः ॥ ४५ ॥

अन्वयः—क्षुभिताभिनिःसृतविभिन्नशकुनिमृगयूथनिःस्वनैः, पूर्णपृथुवनगुहाविवरः, भूधरः, सहसा, भयात्, इव, ररास ॥ ४५ ॥

क्षुभितेति ॥ क्षुभितास्त्रस्ता अभिनिःसृताः स्वस्थानान्निर्गता विभिन्ना मुक्तसङ्गाश्च ये शकुनयः पक्षिणो मृगाश्च तेषां यूथानि तानि तेषां निःस्वनैः पूर्णानि पृथूनि वनानि गुहाविवराणि च यस्य स भूधरः सहसा भयादिवेत्युत्प्रेक्षा । ररास चुक्रोश ॥४५॥

न विरोधिनी रुषमियाय पथि मृगविहङ्गसंहतिः ।
घ्नन्ति सहजमपि भूरिभियः सममागताः सपदि वैरमापदः ॥४६॥

अन्वयः—पथि, विरोधिनी, मृगविहङ्गसंहतिः, रुषम्, न, इयाय, भूरिभियः, समम्, आगताः, आपदः, सहजम्, अपि, वैरम्, सपदि, घ्नन्ति ॥ ४६ ॥

नेति ॥ पथि पलायनमार्गे विरोधिनी जातिवैरिणी मृगाणां सिंहव्याघ्रादीनां विहङ्गानां काकोलूकानां च संहतिः सङ्घो रुषं परस्परक्रोधं नेयाय न प्राप । किन्तु सहैव चचारेत्यर्थः । तथा हि । भूरि प्रभूता भीर्यासु ताः समं साधारण्येनागता आपदो विपत्तयः सहजं स्वाभाविकमपि वैरं सपदि घ्नन्ति । नहि सङ्घातव्यसनेषु प्रजायते वैरानुबन्ध इति भावः ॥ ४६ ॥

चमरीगणैर्गणबलस्य बलवति भयेऽप्युपस्थिते ।
वंशविततिषु विषक्तपृथुप्रियबालवालधिभिरादृदे धृतिः ॥ ४७ ॥

अन्वय.—वंशविततिषु, विषक्तपृथुप्रियबालवालधिभिः, चमरीगणैः, गणबलस्य, बलवति, भये, उपस्थिते, अपि, धृतिः, आददे ॥ ४७ ॥

चमरीति ॥ वंशविततिषु वेणुगुल्मेषु विषक्ता लग्नाः पृथवो भृशं प्रियबालाः प्रियरोमाणो वालधयः, पुच्छानि येषां तैः । 'पुच्छोऽस्त्री लूमलाङ्गूले वालहस्तश्च वालधिः' इत्यमरः । चमरीगणैर्मृगविशेषैर्गणबलस्य शिवबलस्य सम्बन्धिनि । तद्धेतुक इत्यर्थः । सम्बन्धमात्रविवक्षायां षष्ठी । अन्यथा 'भीत्रार्थानां भयहेतुः' इति पञ्चमी स्यात् । बलवति प्रबले भय उपस्थिते प्राप्तेऽपि धृतिर्धैर्यमाददे स्वीकृता । बालच्छेदभयात्प्राणहानिमप्यवगणय्य स्थितमित्यर्थः ॥ ४७ ॥

हरसैनिकाः प्रतिभयेऽपि गजमदसुगन्धिकेसरैः ।
स्वस्थमभिददृशिरे सहसा प्रतिबोधजृम्भितमुखैर्मृगाधिपैः ॥४८॥

अन्वयः—प्रतिभये, अपि, गजमदसुगन्धिकेसरैः, सहसा, प्रतिबोधजृम्भितमुखैः, मृगाधिपैः, स्वस्थम्, हरसैनिकाः, अभिदद्दशिरे ॥ ४८ ॥

हरेति ॥ प्रतिभये भयहेतौ । 'भयङ्करं प्रतिभयम्' इत्यमरः । प्राप्तेऽपीति शेषः । गजमदैः सुगन्धयः सुरभयः केसराः सटा येषां तैः । हतानेकगजैरित्यर्थः । सहसा सेनाकलकलश्रवणानन्तरमेव प्रतिबोधेन निद्रापगमेन जृम्भितानि व्यात्तानि मुखानि येषां तैर्मृगाधिपैः सिंहैः स्वस्थं निःशङ्कमेव यथा तथा हरसैनिका अभिदद्दशिरे ईक्षिताः । न तु किञ्चित्क्षुभितमित्यर्थः । युक्तं चैतद्राजनामधारिणां केसरिणामिति भावः ॥ ४८ ॥

विभराम्बभूवुरपवृत्तजठरशफरीकुलाकुलाः ।
पङ्कविषमिततटाः सरितः करिरुग्णचन्दनरसारुणं पयः ॥ ४९ ॥

अन्वयः—अपवृत्तजठरशफरीकुलाकुलाः, पङ्कविषमिततटाः, सरितः, करिरुग्णचन्दनरसारुणम्, पयः, बिभराम्बभूवुः ॥ ४९ ॥

बिभरामिति ॥ अपवृत्तजठरैस्तत्कालक्षोभात्परिलुठितोदरैः शफरीकुलैराकुला व्याप्ताः पङ्कैर्विषमितानि दुर्गमीकृतानि तटानि कूलानि यासां ताः सरितः करिभिः । पलायमानैरिति शेषः । रुग्णानां मार्गरोधितया भग्नानाम् । 'ओदितश्च' इति निष्ठानत्वम् । चन्दनानां रसैररुणं करिरुग्णचन्दनरसारुणं पयो बिभराम्बभूवुः । भृधातोः 'भीह्रीभृहुवां श्लुवच्च' इत्याम्प्रत्ययः श्लुवद्भावश्च । 'कृञ्चानुप्रयुज्यते लिटि' इति भुवोऽनुप्रयोगः ॥ ४९

महिषक्षतागुरुतमालनलदसुरभिः सदागतिः ।
व्यस्तशुकनिभशिलाकुसुमः प्रणुदन्ववौ वनसदां परिश्रमम् ॥ ५० ॥

अन्वयः—महिषक्षतागुरुतमालनलदसुरभिः, व्यस्तशुकनिभशिलाकुसुमः, सदागतिः, वनसदां, परिश्रमं, प्रणुदन्, ववौ ॥ ५० ॥

महिषेति ॥ महिषैर्लुलायैः क्षतानि विदलितानि तैरगुरुभिस्तमालैर्नलदैरुशीरैश्च सुरभिः सुगन्धिः । व्यस्तानि विक्षिप्तानि शुकनिभानि शुकसवर्णानि शिलाकुसुमानि शिलेयाख्या ओषधिविशेषा येन सः । अतः शीतल इति भावः । 'कालानुसार्यवृद्धाश्मपुष्पशीतशिवानि तु । शैलेयम्' इत्यमरः । शुकनिभेति स्वरूपकथनम् । सदागतिर्वायुर्वनसदां वनेचराणां परिश्रमं प्रणुदन् । अतो मन्द इति भावः । 'मातरिश्वा सदागतिः' इत्यमरः । ववौ वाति स्म ॥ ५० ॥

मथिताम्भसो रयविकीर्णमृदितकदलीगवेधुकाः ।
क्लान्तजलरुहलताः सरसीर्विदधे निदाघ इव सत्त्वसम्प्लवः ॥ ५१ ॥

अन्वयः—सत्त्वसम्प्लवः, निदाघः, इव, सरसीः, मथिताम्भसः, रयविकीर्णमृदितकदलीगवेधुकाः, क्लान्तजलरुहलताः, विदधे ॥ ५१ ॥

मथिताम्भस इति ॥ सत्त्वसम्प्लवः प्राणिसङ्क्षोभो निदाघो ग्रीष्म इव सरसी सरांसि । 'कासारः सरसी सरः' इत्यमरः । मथिताम्भसः सङ्क्षोभितोदका रयेण पलायनवेगेन विकीर्णं व्याकीर्णं यथा तथा मृदिता निष्पीडिताः कदम्यो गवेधुकास्तृणधान्यविशेषाश्च यासां तास्तथोक्ताः । 'तृणधान्यानि नीवाराः स्त्री गवेधुर्गवेधुका' इत्यमरः । मृदित इति 'क्ङिति च' इति गुणप्रतिषेधः । क्रान्ता जलरुहलताः पद्मिन्यो यासु ता एवम्भूता विदधे चकार ॥ ५१ ॥

इति चालयन्नचलसानुवनगहनजानुमापतिः ।
प्राप मुदितहरिणीदशनक्षतवीरुधं वसतिमैन्द्रसूनवीम् ॥ ५२ ॥

अन्वय.—इति, उमापतिः, अचलसानुवनगहनजान्, चालयन्, मुदितहरिणीदशनक्षतवीरुधम्, ऐन्द्रसूनवीम्, वसतिम्, प्राप ॥ ५२ ॥

इतीति ॥ इतीत्थमुमापतिरचलसानुषु वनेषूपभोग्यवृक्षेषु गहनेषु दावेषु च जातास्तथोक्तवान् । सत्त्वानिति शेषः । चालयन् । मुदितानां हरिणीनां दशनैः क्षता वीरुधो लता यस्यां तामिन्द्रसूनोरिमामैन्द्रसूनवीम् । वसत्यत्रेति वसतिमाश्रमम् । 'वहिवस्यर्तिभ्यश्च' इत्यौणादिको वसतेरतिप्रत्ययः । प्राप ॥ ५२ ॥

स तमाससाद घननीलमभिमुखमुपस्थितं मुनेः ।
पोत्रनिकषणविभिन्नभुवं दनुजं दधानमथ सौकरं वपुः ॥ ५३ ॥

अन्वयः—अथ, सः, घननीलम्, मुनेः अभिमुखम्, उपस्थितं, पोत्रनिकषणविभिन्नभुवं, सौकरं, वपुः, दधानं, दनुजम्, तम् आससाद ॥ ५३ ॥

स इति ॥ अथानन्तरं स शिवो घननीलं मेघमेचकं मुनेरर्जुनस्याभिमुखमुपस्थितमागं पोत्रस्य मुखाग्रस्य निकषणेनोल्लेखनेन विभिन्ना विदारिता भूर्येन तम् । 'मुखाग्रे क्रोडहलयोः पोत्रम्' इत्यमरः । 'हलसूकरयोः पुवः' इति ष्ट्रन्प्रत्ययः । सूकरस्येदं सौकरं वाराहं वपुर्दधानं दनुजं दानवमाससाद प्राप ॥ ५३ ॥

कच्छान्ते सुरसरितो निधाय सेनामन्वीतः स कतिपयैः किरातवर्यैः ।
प्रच्छन्नस्तरुगहनैः सगुल्मजालैर्लक्ष्मीवाननुपदमस्य सम्प्रतस्थे ॥ ५४ ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये द्वादशः सर्गः ।

अन्वयः—लक्ष्मीवान्, सः, सुरसरितः, कच्छान्ते, सेनां, निधाय, कतिपयैः, किरातवर्यैः, अन्वीतः, सगुल्मजालैः, तरुगहनैः, प्रच्छन्नः, अस्य, अनुपदं, सम्प्रतस्थे ॥ ५४ ॥

कच्छान्त इति ॥ लक्ष्मीवान् । 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः' इति मतुपो

मकारस्य वकारादेशः । स शिवः । सुरसरितो मन्दाकिन्याः कच्छान्तेऽनूपप्रान्ते 'जल-प्रायमनूपं स्यात्पुंसि कच्छस्तथाविधः' इत्यमरः । सेनां निधाय । स्थापयित्वेत्यर्थः । कतिपयैः किरातवर्यैरन्वीतोऽनुगतः सन् । 'ई गतौ' इति धातोरनुपूर्वात्कर्मणि क्तः । मगुल्मवाल्लीलताप्रतानसहितैस्तरुगहनैः प्रच्छन्नश्छादितः । 'वा दान्तशान्त—' इत्या-दिना निपातः । तस्य वराहस्य पदमन्वनुपदम् । पदानुसारेणेत्यर्थः । सम्प्रतस्थे प्रस्थितः । 'समवप्रविभ्यः स्थः' इत्यात्मनेपदम् । प्रहर्षिणीवृत्तम् ॥ ५४ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्य-व्याख्यायां घण्टापथसमाख्यायां द्वादशः सर्गः समाप्तः ॥

त्रयोदशः सर्गः ।

वपुषा परमेण भूधराणामथ सम्भाव्यपराक्रमं विभेदे ।
मृगमाशु विलोकयाञ्चकार स्थिरदंष्ट्रोग्रमुखं महेन्द्रसूनुः ॥ १ ॥

अन्वयः—अथ, महेन्द्रसूनुः, परमेण, वपुषा, भूधराणां, विभेदे, सम्भाव्यपराक्रमं, स्थिरदंष्ट्रोग्रमुखं, मृगम्, आशु, विलोकयाञ्चकार ॥ १ ॥

वपुषेति ॥ अथेश्वरप्रस्थानानन्तरं महेन्द्रसूनुरर्जुनः परमेण महता वपुषा हेतुना भूधराणां विभेदे विदारणे सम्भाव्यपराक्रमं क्षमोऽयमिति प्रतर्क्यपौरुषं स्थिराभ्यां दृढाभ्यां दंष्ट्राभ्यामुग्रं मुखं यस्य तं मृगम् । वराहमित्यर्थः । आशु तदागमनान-न्तरम् । अविलम्बेनेत्यर्थः । विलोकयाञ्चकार ददर्श । अस्मिन्सर्गे प्राक्पञ्चाशच्-च्छ्लोकादौपच्छन्दसिकं वृत्तम् ॥ १ ॥

स्फुटबद्धसटोन्नतिः स दूरादभिधावन्नवधीरितान्यकृत्यः ।
जयमिच्छति तस्य जातशङ्के मनसीमं मुहुराददे वितर्कम् ॥ २ ॥

अन्वयः—स्फुटबद्धसटोन्नतिः, दूरात्, अभिधावन्, अवधीरितानि, अकृत्यः, सः, जयम्, इच्छति, जातशङ्के, तस्य, मनसि, मुहुः, इमं, वितर्कम्, आददे ॥ २ ॥

स्फुटेति ॥ स्फुटं स्पष्टं बद्धा विरचिता सटानां केसराणामुन्नतिरुच्छ्रितत्वं यस्य सः । क्रोधादूर्ध्वितरोमेत्यर्थः । 'सटा जटाकेसरयोः' इति विश्वः । दूरादभिधाव सम्मुख-मापतन् । तथावधीरितान्यकृत्यस्त्यक्तान्यकर्मा स वराहो जयमिच्छति जयार्थिन्यत एव जातशङ्के । स्वयं जिघांसाद्विषामेकलक्ष्यत्वादिति भावः । तस्य मुनेर्मनसि मुहुरिमं वितर्कं वक्ष्यमाणमूहम् । 'अध्याहारस्तर्क ऊहः' इत्यमरः । आददे उत्पादितवान् ॥ २ ॥

अथैकादशभिर्वितर्कमेव निरूपयति—

घनपोत्रविदीर्णशालमूलो निबिडस्कन्धनिकाषरुग्णवप्रः ।
अयमेकचरोऽभिवर्तते मां समरायेव समाजुहूषमाणः ॥ ३ ॥

अन्वयः—घनपोत्रविदीर्णशालमूलः, निबिडस्कन्धनिकाषरुग्णवप्रः, एकचरः, अयं समराय, समाजुहूषमाणः इव, माम्, अभिवर्तते ॥ ३ ॥

घनपोत्रेति ॥ घनेन कठिनेन पोत्रेण मुखाग्रेण विदीर्णानि विदलितानि शालमूलानि वृक्षमूलानि येन सः । निबिडस्य स्कन्धस्य निकाषेण निकषणेन रुग्णा वप्रो भग्न-सानु । अतो महासत्त्वसम्पन्न इति भाव । एकश्चासौ चरश्चेत्येकचर एकाकी । यूथादपेत इत्यर्थः । अतोऽयं वराहः समराय समरं कर्तुम् । 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इति चतुर्थी । समाजुहूषमाण इव समाह्वातुमिच्छन्निव । इवशब्द सम्भावनायाम् । समाह्वयतः सन्नन्ताच्छानच्प्रत्ययः । 'स्पर्धायामाङः' । 'पूर्ववत्सन' इत्यात्मनेपदम् । 'अभ्यस्तस्य च' इति सम्प्रसारणम् । मामभिवर्तते मामभिधावति । उपसर्गवशात्सकर्मकत्वम् । अतः सर्वथा नायमुपेक्ष्य इति भावः ॥ ३ ॥

इह वीतभयास्तपोनुभावाज्जहति व्यालमृगाः परेषु वृत्तिम् ।
मयि तां सुतरामयं विधत्ते विकृतिः किं नु भवेदियं नु माया ॥४॥

अन्वयः—इह, तपोनुभावात्, वीतभया, व्यालमृगाः, परेषु, वृत्तिम्, जहति, अयं, मयि, तां, सुतरां, विधत्ते । इयं विकृतिः, भवेत् किं नु, माया, भवेत् (किं) नु ॥४॥

इहेति ॥ इहाश्रमे तपोनुभावाद्वीतभयाः । लक्षणया विगतवैरा इत्यर्थ. । अत एव व्यालमृगाः क्रूरव्याघ्रादयः । 'व्यालो भुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनि' इति विश्वः । परेषु प्राण्यन्तरेषु वृत्तिं जीविकां जहति । हिंसया न जीवन्तीत्यर्थः । अयं वराहो मयि मद्विषये तां वृत्तिं सुतरां विधत्ते करोति । मां हन्तुमिच्छतीत्यर्थः । तदियं विकृतिस्तपःसामर्थ्यभङ्गरूपा भवेत्किं नु । यद्वा । माया कस्यचिदित्यस्य वराह-भूमिका भवेन्नु । किन्नुशब्दौ वितर्के ॥ ४ ॥

अथवैष कृतज्ञयेव पूर्वं भृशमासेवितया रुषा न मुक्तः ।
अवधूय विरोधिनीः किमारान्मृगजातीरभियाति मां जवेन ॥५॥

अन्वयः—अथ, एषः, पूर्वं, भृशम्, आसेवितया, रुषा कृतज्ञयेव, न मुक्तः । (यत् आरात्, विरोधिनीः, मृगजातीः, अवधूय, जवेन मां, अभियाति किम् ॥ ५ ॥

अथवेति ॥ अथवेति पक्षान्तरे । एष मृगः पूर्वं जन्मान्तरे भृशमत्यर्थमासेवितया विपरिचितया रुषा क्रुधा । मद्रोषयेति शेषः । कृतज्ञयेव पूर्वकृतं वैरानुबन्धं सम्प्रति

आनात्येवेत्युत्प्रेक्षा । न मुक्तो न त्यक्तः । अद्यापीति शेषः । नूनमयं प्राग्भवीयवैरानुबन्धी कश्चित् । सम्प्रति वैरबीजासम्भवादिति भावः । कुतः । यद्यत आरात्समीपतः । 'आराद्दूरसमीपयोः' इत्यमरः । विरोधिनीर्मृगजातीरवधूय त्यक्त्वा जवेन मामभियात्यभिधावति । अन्यथा नाभियायादिति भावः ॥ ५ ॥

न केवलमभियानमेव । किं च मनोवृत्तिरप्यत्र प्रमाणमित्याह—

न मृगः खलु कोऽप्ययं जिघांसुः स्खलति ह्यत्र तथा भृशं मनो मे।
विमलं कलुषीभवच्च चेतः कथयत्येव हितैषिणं रिपुं वा ॥ ६ ॥

अन्वयः—अयं, मृगः, न खलु कोऽपि, जिघांसुः । हि, अत्र, मे, मनः, भृशं, स्खलति । हि, विमलं, कलुषीभवत्, चेत एव, हितैषिणं, रिपुं, वा, कथयति ॥ ६ ॥

न मृग इति ॥ अयं मृगो न खलु, किन्तु कोऽपि कश्चिदन्य एव जिघांसुर्हन्तुमिच्छुः । हन्तेः सन्नन्तादुप्रत्ययः । 'अभ्यासाच्च' इति कुत्वम् । 'अज्झनगमां सनि' इति दीर्घः । कुतः । हि यस्मात् । अत्रास्मिन्मृगविषये मे मनस्तथा भृशं स्खलति क्षुभ्यति । यथायं जिघांसुरयमिति बुद्धिरुत्पद्यत इत्यर्थः । तथा हि । विमलं प्रसन्नं तथा कलुषीभवत्क्षुभ्यच्च चेत एव हितैषिणं रिपुं वा मित्रममित्रं च कथयति । यत्र मनः प्रसीदति तदेव मित्रम् । यत्र क्षुभ्यति सोऽमित्र इति निश्चितमित्यर्थः । अतोऽयं वध्य इति भावः ॥ ६ ॥

ननु मुने. किमनया दुःशङ्कया, तत्राह—

मुनिरस्मि निरागसः कुतो मे भयमित्येष न भूतयेऽभिमानः ।
परवृद्धिषु बद्धमत्सराणां किमिव ह्यस्ति दुरात्मनामलङ्घ्यम् ॥७॥

अन्वयः—मुनिः, अस्मि, (अतः) निरागसः, मे, कुतः, भयं, इति, एषः, अभिमानः, न भूतये, हि, परवृद्धिषु बद्धमत्सराणां, दुरात्मनाम्, अलङ्घ्यं, किमिव अस्ति॥७॥

मुनिरिति ॥ मुनिरस्मि । अतो निरागसो निरपराधस्य मे कुतो भयमित्येषोऽभिमानोऽहङ्कारः । अनपकारिणं मां कोऽपि किं करिष्यतीति बुद्धिर्भूतये श्रेयसे न भवति । तथा हि । परवृद्धिषु विषये बद्धमत्सराणां दुरात्मनामलङ्घ्यं किमिवास्ति, न किञ्चिदकार्यमस्तीत्यर्थः । इवशब्दो वाक्यालङ्कारे ॥ ७ ॥

अस्तु । जिघांसुरपि तुच्छः किं करिष्यतीत्यत्राह—

दनुजः स्विदयं क्षपाचरो वा वनजे नेति बलं बतास्ति सत्त्वे ।
अभिभूय तथा हि मेघनीलः सकलं कम्पयतीव शैलराजम् ॥८॥

अन्वयः—अयं, दनुजः, स्वित्, क्षपाचरो वा, वनजे, सत्त्वे, इति, बलं, नास्ति, बत ?, तथा हि, मेघनीलः, सकलं, शैलराजम्, अभिभूय, कम्पयतीव ॥ ८ ॥

दनुज इति ॥ अयं दनुजः स्विद्दानवो वा क्षपाचरो राक्षसो वा । न तु मृग एवे-त्यर्थः । कुतः । वनजे सत्त्वे वन्यप्राणिनीतीदृशं बलं नास्ति । बतेत्याश्चर्ये । बलमेव स-मर्थयते । तथा हि । मेघनीलोऽयं वराहः सकलं शैलराजमभिभूयाक्रम्य कम्पयतीव । पदविष्टम्भभरात्तथा प्रतीयत इत्यर्थः । अत्र कम्पयतीवेत्युत्प्रेक्षागर्भोऽयं शैलकम्पनरू-पकार्येण तत्कारणबलातिरेकसमर्थनात्कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासः ॥ ८ ॥

किं च । योऽयं शैले मृगयाकलकलरवं श्रूयते सोऽप्येतन्मायापरिकल्पित एवेत्याह—

अयमेव मृगव्यसत्रकामः प्रहरिष्यन्मयि मायया शमस्थे ।
पृथुभिर्ध्वजिनीरवैरकार्षीच्चकितोद्भ्रान्तमृगाणि काननानि ॥९॥

अन्वयः—अयमेव, शमस्थे, मयि, मायया, प्रहरिष्यन्, मृगव्यसत्रकामः, पृथुभिः, ध्वजिनीरवैः, काननानि, चकितोद्भ्रान्तमृगाणि, अकार्षीत् ॥ ९ ॥

अयमिति ॥ अयमेव शमस्थे शान्तिनिविष्टे इति रन्ध्रोक्तिः । मयि । अधिकरण-विवक्षायां सप्तमी । मायया प्रहरिष्यन् । प्रहर्तुमिच्छन्नित्यर्थः । 'लृट् शेषे च' इति चकारात्क्रियार्थायां क्रियायां लृट् । 'लृटः सद्वा' इति शत्रादेशः । मृगव्यं मृगया तस्य सत्रं वनम् । तदर्थं वनमित्यर्थः । तत्कामयत इति मृगव्यसत्रकामः मृगयाभूमिपरिग्र-हार्थी सन्नित्यर्थः । 'कर्मण्यण्' 'आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रियाम्' इति, 'सत्रमाच्छादने यज्ञे सदादाने वनेऽपि च' इति चामरः । पृथुभिर्बृहद्भिर्ध्वजिनीरवैः सेनाकलकलैः । स्वमायया कल्पितैरेवेत्यर्थः । काननानि चकितोद्भ्रान्ताखस्तपलायिता मृगा येषु तान्यकार्षीच्चकार । अयमेव रन्ध्रान्वेषी मत्प्रहारार्थं स्वयमेव मृगयुर्भूत्वा वनावरोधाय सेनाघोषं कल्पयामास । स मृगरूपेणागच्छतीत्यर्थः ॥ ९ ॥

वितर्कान्तरमाह—

बहुशः कृतसत्कृतेर्विधातुं प्रियमिच्छन्नथवा सुयोधनस्य ।
क्षुभितं वनगोचराभियोगाद्गणमाशिश्रियदाकुलं तिरश्चाम् ॥१०॥

अन्वयः—अथवा, बहुशः, कृतसत्कृतेः, सुयोधनस्य, प्रियं, विधातुम्, इच्छन्, वनगोचराभियोगात्, क्षुभितम्, आकुलं, तिरश्चां गणम्, अशिश्रियत् ॥ १० ॥

बहुश इति ॥ अथवा बहुशः कृता सत्कृतिः सत्कारो येन तस्य दुर्योधनस्य प्रियं मद्वधरूपं प्रतिप्रियं विधातुं कर्तुमिच्छन् । यः कश्चिदिति शेषः । वनं गोचरः स्थानं येषां तेषां वनगोचराणामभियोगादवरोधात् । 'अभियोगोऽवरोधः स्यात्' इति हला-युधः । क्षुभितमुद्विग्नमाकुलं चलं तिरश्चां मृगादिजन्तूनां गणमाशिश्रियद्वराहरूपेण प्राविशत् । 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्', 'चङि' इति द्विर्भावः ॥ १० ॥

वितर्कान्तरमाह—

अवलीढसनाभिरश्वसेनः प्रसभं खाण्डवजातवेदसा वा ।
प्रतिकर्तुमुपागतः समन्युः कृतमन्युर्यदि वा वृकोदरेण ॥ ११ ॥

अन्वयः—खाण्डवजातवेदसा, प्रसभम्, अवलीढसनाभिः, (अत एव) समन्युः, अश्वसेनः, प्रतिकर्तुम्, उपागतः, यदि वा, वृकोदरेण कृतमन्युः ॥ ११ ॥

अवलीढेति ॥ खाण्डवजातवेदसा खाण्डववनाग्निना प्रसभमवलीढसनाभिर्दग्धबन्धुः । 'सपिण्डास्तु सनाभयः । सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः' इत्यमरः । अत एव समन्युर्बद्धवैरः । तस्यार्जुनस्यापकारयितृत्वादिति भावः । अश्वसेनस्तक्षकपुत्रः कश्चिन्महासर्पः प्रतिकर्तुं वैरनिर्यातनार्थमुपागतो वा वराहमाययेति शेषः । पक्षान्तरमाह—यदि वा वृकोदरेण भीमसेनेन कृतमन्युर्जनितक्रोधो वा । कश्चिदिति शेषः । पुरा किल पाण्डवः खाण्डवदाहे पावकभयात्पलायमानांस्तक्षकपुत्रानश्वसेनस्य बन्धून्बाणैरवरुध्य दाहयामासेति भारतकथा ॥ ११ ॥

अथ द्वाभ्यामनन्तरकरणीयमध्यवस्यति—बलेत्यादिना ॥

बलशालितया यथा तथा वा धियमुच्छेदपरामयं दधानः ।
नियमेन मया निबर्हणीयः परमं लाभमरातिभङ्गमाहुः ॥ १२ ॥

अन्वयः—(किं बहुना) यथा तथा वा, अयं, बलशालितया, उच्छेदपरां, धियं, दधानः, मया, नियमेन, निबर्हणीयः, हि अरातिभङ्गं, परमं, लाभम्, आहुः ॥ १२ ॥

किं बहुना । यथा तथा वास्तु । अयं मायिकः परमार्थिको वास्त्वित्यर्थः । सर्वथापि बलशालितया । बलहततयेत्यर्थः । उच्छेदपरां धियं दधानः । मां जिघांसुरित्यर्थः । अतोऽयं मृगो नियमेनावश्यं मया निबर्हणीयो वध्यः । 'प्रमापणं निबर्हणम्' इत्यमरः । तथा हि । अरातिभङ्गं शत्रुक्षयं परमं लाभमाहुः ॥ १२ ॥

ननु तपोविरोधिनी हिंसेत्याशङ्क्याह—

कुरु तात तपांस्यमार्गदायी विजयायेत्यलमन्वशान्मुनिर्माम् ।
बलिनश्च वधादृतेऽस्य शक्यं व्रतसंरक्षणमन्यथा न कर्तुम् ॥ १३ ॥

अन्वयः—हे तात ? अमार्गदायी, विजयाय, तपांसि, कुरु, इति, मुनिः, माम्, अलम्, अन्वशात् अस्य, बलिनः, वधादृते, अन्यथा, व्रतसंरक्षणं, कर्तुं, न शक्यम् ॥१३॥

कुर्विति ॥ हे तात वत्स, मार्गदायी न भवतीत्यमार्गदायी । रन्ध्रान्वेषिणां प्रवेशमयच्छन्नित्यर्थः । कुतः । जयार्थित्वादित्याह—विजयाय तपांसि कुर्विति मुनिर्व्यासो मामलं भृशमन्वशादनुशिष्टवान् । अनुशासेर्लङ् । ननु मुनिर्वा कथमधर्ममन्वशात्तत्राह—बलिन इति । अस्य मृगस्य बलिनः प्रबलस्य वधादृते वधं विना । 'अन्यारादितरर्ते—'

इत्यादिना पञ्चमी। अन्ययोपायान्तरेण व्रतसंरक्षणं तपोरक्षणं कर्तुं न शक्यम्। हिंसापि दुष्टनिग्रहात्मिका धर्म इत्यर्थः ॥ १३ ॥

इति तेन विचिन्त्य चापनाम प्रथमं पौरुषचिह्नमाललम्बे।
उपलब्धगुणः परस्य भेदे सचिवः शुद्ध इवाददे च बाणः ॥१४॥

अन्वयः—तेन, इति, विचिन्त्य, चापनाम, प्रथमं, पौरुषचिह्नम्, आललम्बे; (अथ,) परस्य, भेदे, उपलब्धगुणः, शुद्धः, बाणश्च, सचिव इव, आददे ॥ १४ ॥

इतीति ॥ तेनार्जुनेनेतीत्थं विचिन्त्य वितर्क्य चापनाम चापाख्यं प्रथमं पौरुषचिह्नम्। तस्य युद्धायुधत्वादिति भावः। आललम्बे गृहीतम्। कर्मणि लिट्। अथ परस्य शत्रोर्भेदे विदारणे उपजापे चोपलब्धगुणो ज्ञातशक्तिः। बाणस्तु प्राग्मौर्विकश्चेति शेषः। शुद्धो ऋजुर्दिग्धत्वादिदोषरहितो वा। 'न कर्णिभिर्दिग्धैर्नाग्निज्वलिततेजनैः' इति निषेधात्। अन्यत्रोपधाविशुद्धः। बाणश्च सचिव इवाददे जगृहे। अत्र बाणसचिवयोः शब्दमात्रसाधर्म्याच्छ्लेषालङ्कारः प्रकृताप्रकृतविषय इति सर्वस्वकारः। उपमेति केचित् ॥ १४ ॥

अनुभाववता गुरु स्थिरत्वादविसंवादि धनुर्धनञ्जयेन।
स्वबलव्यसनेऽपि पीड्यमानं गुणवन्मित्रमिवानतिं प्रपेदे ॥१५॥

अन्वयः—गुरु, स्थिरत्वात्, अविसंवादि, गुणवत्, धनुः, मित्रमिव, अनुभाववता, धनञ्जयेन, स्वबलव्यसनेऽपि, पीड्यमानं, (सन्मित्रमिव,) आनतिं, प्रपेदे ॥ १५ ॥

अनुभावेति ॥ गुरु महत्पूज्यं च स्थिरत्वात्सारवत्त्वादविसंवाद्यभङ्गुरम्। अन्यत्र प्रतिहितत्वादसत्यरहितम्। गुणवत्सज्यम्। अन्यत्रौदार्यादिगुणवत्। धनुर्मित्रमिवानुभाववता निश्चयबुद्धिमता। 'अनुभावः प्रभावे च सतां च मतिनिश्चये' इत्यमरः। धनञ्जयेन स्वबलव्यसनेऽपि तपसा क्षीणत्वेऽपि। अन्यत्र स्वं धनं तदेव बलं तस्य व्यसने नाशेऽपि। पीड्यमानमाकृष्यमाणमवरुध्यमानं च सन्मित्रमिवानतिं नम्रतामानुकूल्यं च प्रपेदे। अलङ्कारस्तु पूर्ववत् ॥ १५ ॥

प्रविकर्षनिनादभिन्नरन्ध्रः पदविष्टम्भनिपीडितस्तदानीम्।
अधिरोहति गाण्डिवं महेषौ सकलः संशयमारुरोह शैलः ॥१६॥

अन्वयः—तदानीं, महेषौ, गाण्डिवम्, अधिरोहति सति, प्रविकर्षनिनादभिन्नरन्ध्रः, पदविष्टम्भनिपीडितः, सकलः, शैलः, संशयम्, आरुरोह ॥ १६ ॥

प्रविकर्षेति ॥ तदानीं तस्मिन्काले महेषौ बाणे गाण्डिवमर्जुनधनुरधिरोहति सति 'कपिध्वजस्य गाण्डीवगाण्डिवौ पुंनपुंसकौ' इत्यमरः। 'गाण्डयजगात्संज्ञायाम्' इति वप्रत्ययः। प्रविकर्षेण ज्यास्फालनेन यो निनादस्तेन भिन्नरन्ध्रो विदलितगह्वरः तथा

पदविष्टम्भेन पादाक्रमणेन निपीडितो नुन्नः सकलः सर्वः शंकः संशयं जीवितसन्देहमारोह । प्रापेत्यर्थः । अत्र बालस्य संशयासम्बन्धेऽपि सम्बन्धकथनादतिशयोक्तिरलङ्कारः ॥ १६ ॥

ददृशेऽथ सविस्मयं शिवेन स्थिरपूर्णायतचापमण्डलस्थः ।
रचितस्तिसृणां पुरां विधातुं वधमात्मेव भयानकः परेषाम् ॥१७॥

अन्वयः—अथ, शिवेन, स्थिरपूर्णायतचापमण्डलस्थः, तिसृणां, पुरां, वधं, विधातुं, रचितः, आत्मा इव, परेषां, भयानकः, (सः), सविस्मयं, ददृशे, ॥ १७ ॥

ददृश इति ॥ अथ बाणसन्धानानन्तरं शिवेन स्थिरं निश्चलं पूर्णं च यथा तथायत आकृष्टे चापमण्डले तिष्ठतीति तथोक्तः । चापमण्डलमन्तर्धाय स्थित इत्यर्थः । तिसृणाम् । 'न तिसृचतसृ' इति दीर्घप्रतिषेधः । पुराम् । त्रिपुरासुरस्येत्यर्थः । वधं संहारं विधातुं कर्तुं रचितः कल्पितः । स्थानविशेषे स्थापित इति यावत् । आत्मा स्वयमिव परेषां भयानको भयङ्करः सोऽर्जुनः सविस्मयं ददृशे दृष्ट । उपमालङ्कारः ॥१७॥

अथ पिनाकिवृत्तान्तमाह—

विचकर्ष च संहितेषुरुच्चैश्चरणास्कन्दननामिताचलेन्द्रः ।
धनुरायतभोगवासुकिज्यावदनग्रन्थिविमुक्तवह्नि शम्भुः ॥ १८ ॥

अन्वयः—(अथ), शम्भुश्च, संहितेषुः सन्, उच्चैः, चरणास्कन्दननामिताचलेन्द्रः, आयतभोगवासुकिज्यावदनग्रन्थिविमुक्तवह्नि, धनुः, विचकर्ष ॥ १८ ॥

विचकर्षेति ॥ अथ शम्भुश्च संहितेषुः सन् । उच्चैर्भृशं चरणास्कन्दनेन पदविष्टम्भेन नामितोऽधो नीतोऽचलेन्द्रो येन स तथोक्तः । आयतभोग आकृष्टकायो वासुकिरेव ज्या तस्य वदनमेव ग्रन्थिस्तेन विमुक्त उत्सृष्टो वह्निर्यस्य तद्धनुर्विचकर्षेति स्वभावोक्तिः ॥ १८ ॥

स भवस्य भवक्षयैकहेतोः सितसप्तेश्च विधास्यतोः सहार्थम् ।
रिपुराप पराभवाय मध्यं प्रकृतिप्रत्यययोरिवानुबन्धः ॥ १९ ॥

अन्वयः—सहार्थं, विधास्यतोः, भवक्षयैकहेतोः, भवस्य, सितसप्तेश्च, मध्यं, रिपुः, प्रकृतिप्रत्यययोः, अनुबन्धः, स इव पराभवाय आप ॥ १९ ॥

स इति ॥ सह सम्भूयार्थमरिवधरूपप्रयोजनं विधास्यतोः करिष्यतोः । अन्यत्र सहार्थमभिधेयमभिधास्यतोरित्यर्थः । 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतः' इति वचनात् । भवक्षयैकहेतोः संसारोच्छेदनिदानस्य भवस्य शिवस्य सितसप्तेरर्जुनस्य च मध्यं रिपुर्वराहः । यस्मात्प्रत्ययो विधीयते सा प्रकृतिर्धात्वादिः । प्रत्ययः सनादिः । तयोर्मध्य-

मनुबन्ध इत्संज्ञको वर्णः। यथा भूतं भूतिरित्यादौ ककारः। स इव पराभवाय नाशाय लोपार्थमेवाप। न तु स्थित्यर्थमित्यर्थः॥ १९॥

अथ दीपितवारिवाहवर्त्मा रववित्रासितवारणादवार्यः।
निपपात जवादिषुः पिनाकान्महतोऽभ्रादिव वैद्युतः कृशानुः॥२०॥

अन्वयः—अथ, दीपितवारिवाहवर्त्मा, अवार्यः, इषुः, रववित्रासितवारणात् पिनाकात्, महतः, अभ्रात्, वैद्युतः, कृशानुः, जवात्, निपपात॥ २०॥

अथेति॥ अथ रिपोर्मध्यप्रवेशानन्तरं दीपितं वारिवाहवर्त्माकाशं येन सः। अवार्यो दुर्वार इषुः शरो रववित्रासितवारणात्स्वघोषभीषितगजात्पिनाकाच्छिवधनुषः। 'पिनाकोऽजगवं धनुः' इत्यमरः। महतोऽभ्रान्मेघाद्विद्युतोऽयं वैद्युतः कृशानुरशनिरिव जवाद्वेगान्निपपाताद्धाव॥ २०॥

व्रजतोऽस्य बृहत्पतत्रजन्मा कृततार्क्ष्योपनिपातवेगशङ्कः।
प्रतिनादमहान्महोरगाणां हृदयश्रोत्रभिदुत्पपात नादः॥ २१॥

अन्वयः—व्रजतः, अस्य, बृहत्पतत्रजन्मा, कृततार्क्ष्योपनिपातवेगशङ्कः, (अत एव) महोरगाणां, हृदयश्रोत्रभित्, प्रतिनादमहान्, नाद उत्पपात॥ २१॥

व्रजत इति॥ व्रजतो धावतोऽस्य बाणस्य बृहद्भ्यः पतत्रेभ्यः पक्षेभ्यो जन्म यस्य स तथोक्तः। कृता तार्क्ष्योपनिपातवेगशङ्का गरुडागमनवेगभ्रमो येन सः। अत एव महोरगाणां सर्पाणां हृदयानि श्रोत्राणि च भिनत्तीति हृदयश्रोत्रभित्। 'समुद्राभ्राद्' इति सूत्रे पूर्वनिपातव्यभिचाराच्छ्रोत्रशब्दस्य पूर्वनिपातव्यभिचारः। प्रतिनादैः प्रतिध्वनिभिर्महान्सम्मूर्छितो नाद उत्पपातोत्थितः। अत्र नादस्योरगहृदयभेदकत्वासम्बन्धेऽपि सम्बन्धाभिधानादतिशयोक्तिः। सा च तार्क्ष्यवेगभ्रमोत्प्रेक्षेति तयोरङ्गाङ्गिभावेन सङ्करः॥ २१॥

नयनादिव शूलिनः प्रवृत्तैर्मनसोऽप्याशुतरं यतः पिशङ्गैः।
विदधे विलसत्तडिल्लताभैः किरणैर्व्योमनि मार्गणस्य मार्गः॥२२॥

अन्वयः—शूलिनः, नयनात्, प्रवृत्तैः इव, पिशङ्गैः, विलसत्तडिल्लताभैः, मनसः, अपि, आशुतरम्, यतः, मार्गणस्य, किरणैः, व्योमनि, मार्गः, विदधे॥ २२॥

नयनादिति॥ शूलिनो नयनात्प्रवृत्तैर्निर्गतैरिव स्थितैरित्युत्प्रेक्षा। नेत्राग्निशिखाकल्पैरित्यर्थः। पिशङ्गैः पिङ्गलैर्विलसत्तडिल्लताभैर्विद्युद्दामतुल्यैरित्युपमा। मनसश्चित्तादप्याशुतरं शीघ्रतरम्। आशुशब्दादव्ययात्तरप्। अतः 'किमेत्तिङव्यय-' इत्यादिनाम्प्रत्ययो न। 'क्लीबे शीघ्राद्यसत्त्वे स्यात्त्रिष्वेषां सत्वगामि यत्' इत्यमरः। यतो गच्छतः। इणः शतृप्रत्ययः। मार्गणस्य शरस्य। 'कलम्बमार्गणशराः' इत्यमरः।

किरणव्योमन्याकाशे मार्ग उल्कारेखाकारः पन्था विदधे विरचित इति स्वभावोक्तिरलङ्कारः ॥ २२ ॥

अपयन्धनुषः शिवान्तिकस्थैर्विवरेसद्भिरभिख्यया जिहानः ।
युगपद्ददृशे विशन्वराहं तदुपोढैश्च नभश्चरैः पृषत्कः ॥ २३ ॥

अन्वयः—पृषत्कः, धनुषः, अपयन्, शिवान्तिकस्थैः, अभिख्यया, जिहानः, विवरेसद्भिः, वराहं, विशन्, तदुपोढैः, नभश्चरैः, युगपत्, ददृशे ॥ २३ ॥

अपयन्निति ॥ पृषत्को बाणः । 'पृषत्कबाणविशिखाः' इत्यमरः । धनुषः पिनाकादपयन्निर्यन् । निर्गच्छन्नित्यर्थः । इणः शतृप्रत्ययः । शिवान्तिकस्थैर्नभश्चरैरभिख्यया शोभया जिहानः । शोभनं गच्छन्नित्यर्थः । 'ओहाङ् गतौ' इति धातोः शानच् । 'अभिख्या नामशोभयोः' इत्यमरः । विवरे सीदन्तीति विवरेसदस्तैर्विवरेसद्भिरन्तरालवर्तिभिर्नभश्चरैः । 'सत्सूद्विष—' इत्यादिना क्विप् । 'तत्पुरुषे कृति बहुलम्' इत्यलुक् । अथ वराहं विशन्प्रविशंस्तदुपोढैस्तं वराहमुपोढैः प्रत्यासन्नैः । वहेः कर्तरि क्तः । नभश्चरैर्युगपद्ददृशे दृष्ट इति बाणवेगोक्तिः । अत्र क्रमेण निष्क्रमणादिक्रियाविशिष्टस्य बाणस्य शिवान्तिकादिभिन्नदेशस्थनभश्चरकर्तृकदर्शनयौगपद्यासम्बन्धेऽपि तत्सम्बन्धोक्तिमूलातिशयोक्त्या लोकोत्तरवेगप्रतीतेरलङ्कारेण वस्तुध्वनिः ॥ २३ ॥

स तमालनिभे रिपौ सुराणां घननीहार इवाविषक्तवेगः ।
भयविप्लुतमीक्षितो नभःस्थैर्जगतीं ग्राह इवापगां जगाहे ॥ २४ ॥

अन्वयः—सः, तमालनिभे, सुराणां, रिपौ, घननीहार इव, अविषक्तवेगस्सन्, नभःस्थैः, भयविप्लुतम्, ईक्षितस्सन्, आपगां, ग्राह इव, जगतीं, जगाहे ॥ २४ ॥

स इति ॥ स बाणस्तमालनिभे तमालप्रभे । नीलाभ इति यावत् । सुराणां रिपौ वराहे घननीहारे सान्द्रतुहिन इवाविषक्तवेगोऽप्रतिबद्धवेगः सन् । तथा नभःस्थैः खेचरैर्भयेन विप्लुतं विह्वलं यथा तथेक्षितः सन् । अपां सम्बन्धि वेग आपः, अपां समूहो वापम् । आपेन गच्छतीत्यापगा नदी ताम् । गृह्णातीति ग्राहो जलग्राहः । जलचर इति यावत् । 'जलचरे' इति वक्तव्यात् 'विभाषा ग्रहः' इति णप्रत्ययः । स इव । जगतीं भूमिम् । 'जगती विष्टपे मह्यां वास्तुच्छन्दोविशेषयोः' इति वैजयन्ती । जगाहे विवेश । अन्तर्हित इत्यर्थः ॥ २४ ॥

अथार्जुनबाणप्रयोगमाह—

सपदि प्रियरूपपर्वरेखः सितलोहाग्रनखः खमाससाद ।
कुपितान्तकतर्जनाङ्गुलिश्रीर्व्यथयन्प्राणभृतः कपिध्वजेषुः ॥ २५ ॥

अन्वयः—सपदि, प्रियरूपपर्वरेखः, सितलोहाग्रनखः, कुपितान्तकतर्जनाङ्गुलिश्रीः, कपिध्वजेषुः, प्राणभृतः, व्यथयन् , खम् , आससाद ॥ २९ ॥

सपदीति ॥ सपदि शिवबाणप्रयोगसमय एव प्रिया रूपमाकृतिः पर्वाणि ग्रन्थयो रेखा रचनाश्च यस्य सः अङ्गुलिपक्षे एवं रेखाः प्रसिद्धाः । लोहाग्रमयः फलं तन्नखमिवे-त्युपमितसमासः । सितं लोहाग्रनखं यस्य सः । कुपितस्यान्तकस्य मृत्योर्या तर्जन-स्याङ्गुलिस्तर्जनाङ्गुलिस्तस्याः श्रीरिव श्रीर्यस्य सः कपिध्वजेषुरर्जुनबाणः प्राणभृतो व्यथयन्भीषयमाणः खमाकाशमाससाद प्राप । उपमालङ्कारः ॥ २९ ॥

परमास्त्रपरिग्रहोरुतेजः स्फुरदुल्काकृति विक्षिपन्वनेषु ।
स जवेन पतन्परःशतानां पततां व्रात इवारवं वितेने ॥ २६ ॥

अन्वयः—परमास्त्रपरिग्रहोरु, स्फुरदुल्काकृति, तेजः, वनेषु, विक्षिपन् सन्, जवेन, पतन् , सः, परःशतानां, पततां, व्रात इव, आरवं वितेने ॥ २६ ॥

परमेति ॥ परमास्त्रपरिग्रहेण दिव्यास्त्राधिष्ठानेनोरु महदत एव स्फुरदुल्काकृति । उल्कावद्दीप्यमाणमित्यर्थः । तेजो वनेषु विक्षिपन्विकिरन्सन् । जवेन पतन्धावन्स बाणः । शतात्परे परःशतास्तेषाम् । शताधिकसङ्ख्याकानामित्यर्थः । 'परःशताद्यास्ते येषां परा संख्या शतादिकात्' इत्यमरः । 'पञ्चमी-' इति योगविभागात्समासः । 'राजदन्तादिषु परम्' इत्युपसर्जनस्य शतशब्दस्य परनिपातः । पारस्करादित्वात्सुडा-गमः । पततां पतत्रिणाम् । 'पतत्पत्ररथाण्डजाः' इत्यमरः । व्रातः समूह इवारवं वि-तेने विस्तारयामास ॥ २६ ॥

अविभावितनिष्क्रमप्रयाणः शमितायाम इवातिरंहसा सः ।
सह पूर्वतरं नु चित्तवृत्तेरपतित्वा नु चकार लक्ष्यभेदम् ॥ २७ ॥

अन्वयः—अतिरंहसा, अविभावितनिष्क्रमप्रयाणः, शमितायाम इव, सः, सह नु, चित्तवृत्तेः, पूर्वतरं नु, अपतित्वा नु, लक्ष्यभेदं, चकार ॥ २७ ॥

अविभावितेति ॥ अतिरंहसातिवेगेनाविभावितेऽलक्षिते निष्क्रमो गाण्डीवान्निः-सरणं प्रयाणमन्तरागमनं च यस्य सः । तथा शमितायामः सङ्क्षिप्तदैर्घ्य इव स्थित इत्युपात्तवेगगुणनिमित्ता दैर्घ्यगुणाभावोत्प्रेक्षा । स शरः । सह नु सह वा । चित्तवृ-त्त्येति शेषः । चित्तवृत्तेः पूर्वतरं नु प्रागेव वा । उभयत्रापि लक्ष्ये पतित्वेति शेषः । अथवाऽपतित्वा नु । लक्ष्यत इति शेषः । लक्ष्यभेदं चकार । अत्रोपात्तवेगगुणनिमि-त्तात्बाणस्य चित्तवृत्त्या सहपातपूर्वपतनाभावोत्प्रेक्षात्रितयं उत्तरोत्तरोत्कर्षेण वेगा-तिशयव्यञ्जिका इत्यलङ्कारेण वस्तुध्वनिः ॥ २७ ॥

स वृषध्वजसायकावभिन्नं जयहेतुः प्रतिकायमेषणीयम् ।
लघु साधयितुं शरः प्रसेहे विधिनेवार्थमुदीरितं प्रयत्नः ॥२८॥

अन्वयः—जयहेतुः, सः, शरः, वृषध्वजसायकावभिन्नम् एषणीयम्, प्रतिकायं, विधिना, उदीरितम्, अर्थं, प्रयत्न इव, लघु, साधयितुं प्रसेहे ॥ २८ ॥

स इति ॥ जयहेतुः स शरो वृषध्वजसायकावभिन्नं शिवशरविद्धमेषणीयम् । वेद्धुमिति शेषः । इषेरिच्छार्थादनीयर्प्रत्ययः । प्रतिकायम् । प्रतिलक्ष्यमिति यावत् । विधिना विधात्रा दैवेनोदीरितं फलदानाय प्रवर्तितमर्थं यागादिकं प्रयत्नः पुरुषव्यापार इव । लघु क्लेशेन यथा तथा साधयितुम् । स्वार्थणिजन्तात्तुमुन् । प्रसेहे शशाक । उपमालङ्कारः ॥ २८ ॥

अविवेकवृथाश्रमाविवार्थं क्षयलोभाविव संश्रितानुरागम् ।
विजिगीषुमिवानयप्रमादाववसादं विशिखौ विनिन्यतुस्तम् ॥२९॥

अन्वयः—अविवेकवृथाश्रमौ, अर्थम्, इव, क्षयलोभौ, संश्रितानुरागमिव, अनयप्रमादौ, विजिगीषुमिव, विशिखौ, तम्, अवसादं विनिन्यतुः ॥ २९ ॥

अविवेकेति ॥ अविवेकोऽन्तरानभिज्ञत्वं वृथाश्रमो निष्फलप्रयासस्तावर्थं धनमिव । अन्यथाविनियोगहेतुकत्वादनयोर्धनहानिकरत्वमिति भावः । क्षयोऽनुपचयो लोभोऽदातृत्वं तौ संश्रितानामनुजीविनामनुरागमिव । अकिञ्चित्करे स्वामिन्यनुरागस्यानवस्थानादिति भावः । अनयो दुर्नीतिः प्रमादोऽनवधानता तौ विजिगीषुमिव । रन्ध्रभूयिष्ठस्य जयासिद्धेरिति भावः । विशिखौ शिवार्जुनबाणौ तं वराहमवसादं करणशैथिल्यं विनिन्यतुर्नीतवन्तौ । नयतिर्द्विकर्मकः । मालोपमेयम् ॥ २९ ॥

अथ दीर्घतमं तमः प्रवेक्ष्यन्सहसा रुग्णरयः स सम्भ्रमेण ।
निपतन्तमिवोष्णरश्मिमुर्व्यां वलयीभूततरुं धरां च मेने ॥३०॥

अन्वयः—अथ, सः, दीर्घतमं, तमः, प्रवेक्ष्यन्, सहसा, रुग्णरयः, सम्भ्रमेण, उष्णरश्मिम्, उर्व्यां, निपतन्तमिव, मेने । धरां च, वलयीभूततरुं, मेने ॥ ३० ॥

अथेति ॥ अथ स वराहो दीर्घतमं तमो दीर्घनिद्रां प्रवेक्ष्यन् । मरिष्यन्नित्यर्थः । सहसा झटिति रुग्णरयो भग्नवेगः सम्भ्रमेण भ्रान्त्या । 'सम्भ्रमो भ्रान्तिहावयोः' इति विश्वः । उष्णरश्मिमुर्व्यां भूमौ निपतन्तमिव मेने । धरां च वलयीभूता मण्डलीभूतास्तरवो यस्यास्तां तथा मेने । तथा बभ्रामेत्यर्थः । स्वभावोक्तिरलङ्कारः ॥ ३० ॥

स गतः क्षितिमुष्णशोणिताद्रः खुरदंष्ट्राग्रनिपातदारिताश्मा ।
असुभिः क्षणमीक्षितेन्द्रसूनुर्विहितामर्षगुरुध्वनिर्निरासे ॥ ३१ ॥

अन्वयः—क्षितिं, गतः, उष्णशोणितार्द्रः, खुरदंष्ट्राग्रनिपातदारिताश्मा, क्षणम्, ईक्षितेन्द्रसूनुः, विहितामर्षगुरुध्वनिः, सः, असुभिः, निरासे ॥ ३१ ॥

स इति ॥ क्षितिं गतः क्षितौ पतित उष्णेन प्रत्यग्रत्वाच्छोणितेनार्द्रः प्लुतः खुराणां दंष्ट्रयोश्चाग्राणां निपातेनाघातेन दारिताश्मा पाटितपाषाणः। किञ्च। क्षणमीक्षितेन्द्रसूनुः। स्वार्थविघातरोषादिति भावः। अत एव विहितः कृतोऽमर्षगुरुः क्रोधोद्धतो ध्वनिः क्रन्दितं येन स तथोक्तः स वराहोऽसुभिः प्राणैर्निरासे निरस्तः। त्यक्त इत्यर्थः। अस्यतेः कर्मणि लिट्। इयं च स्वाभावोक्तिः ॥ ३१ ॥

स्फुटपौरुषमापपात पार्थस्तमथ प्राज्यशरः शरं जिघृक्षुः।
न तथा कृतवेदिनां करिष्यन्प्रियतामेति यथा कृतावदानः ॥३२॥

अन्वयः—अथ, पार्थः, प्राज्यशरः, स्फुटपौरुषं, शरं, जिघृक्षुः, आपपात, कृतवेदिनां, कृतावदानः, यथा, प्रियताम्, एति तथा करिष्यन् न ॥ ३२ ॥

स्फुटेति ॥ अथ वराहपातानन्तरं पार्थोऽर्जुनः प्राज्यशरः प्रभूतशरः। सन्नपीत्यर्थः। 'प्रभूतं प्रचुरं प्राज्यम्' इत्यमरः। स्फुटपौरुषं व्यक्तविक्रमं वराहभेदिनं शरं जिघृक्षुर्ग्रहीतुमिच्छुः। ग्रहेः सन्नन्तादुप्रत्ययः। आपपाताधावति स्म। कृतज्ञतया शरग्रहणं न तु लोभादित्यर्थः। नन्वन्योऽप्युपकर्तार एव, किमित्यत्रैवादरस्तस्येत्यत आह—कृतवेदिनां कृतज्ञानां कृतावदानः कृतकर्मा। 'अवदानं कर्म वृत्तम्' इत्यमरः। यथा प्रियतामेति तथा करिष्यन्नुपकरिष्यन्न प्रियतामेति। 'कृतकरिष्यमाणयोः कृतं बलीय' इति न्यायादिति भावः ॥ ३२ ॥

अथ युग्मेनाह—

उपकार इवासति प्रयुक्तः स्थितिमप्राप्य मृगे गतः प्रणाशम्।
कृतशक्तिरवाङ्मुखो गुरुत्वाज्जनितव्रीड इवात्मपौरुषेण ॥ ३३ ॥

अन्वयः—असति, प्रयुक्तः, उपकार इव, मृगे, स्थितिम्, अप्राप्य, प्रणाशं, गतः। कृतशक्तिः, गुरुत्वात्, अवाङ्मुखः, आत्मपौरुषेण, जनितव्रीड इव, स्थितः ॥ ३३ ॥

उपकार इति ॥ असति नीचे प्रयुक्त उपकार इव मृगे स्थितिमप्राप्य प्रणाशमदर्शनं गत इत्युपमा। यथा कृतशक्तिः कृतपौरुषो गुरुत्वाल्लोहभाराद्गौरवत्वाच्चावाङ्मुखो नम्रमुखः। अत एवात्मपौरुषेण जनितव्रीड इव स्थित इत्युत्प्रेक्षा ॥ ३३ ॥

स समुद्धरता विचिन्त्य तेन स्वरुचं कीर्तिमिवोत्तमां दधानः।
अनुयुक्त इव स्ववार्तमुच्चैः परिरेभे नु भृशं विलोचनाभ्याम् ॥३४॥

अन्वयः—उत्तमां, स्वरुचं, कीर्तिमिव, दधानः, विचिन्त्य, समुद्धरता, तेन, उच्चैः, स्ववार्तं, अनुयुक्त इव, सः, विलोचनाभ्यां, भृशं, परिरेभे नु ॥ ३४ ॥

स इति ॥ उत्तमां स्वरचं स्वकान्ति कीर्तिमिव दधान इत्युत्प्रेक्षा । किञ्च । विचिन्त्य सर्वथा ग्राह्योऽयमिति विमृश्य समुद्धरता तेनार्जुनेनोच्चैः स्ववार्तं स्वपाटवम् । 'वार्तं पाटवमारोग्यं भव्यं स्वास्थ्यमनामयम्' इति यादवः । अनुयुक्तः पृष्ट इव स्थित इत्युत्प्रेक्षा । आदरात्तथा प्रतीयत इत्यर्थः । 'प्रश्नोऽनुयोगः पृच्छा च' इत्यमरः । बाणो विलोचनाभ्यां नयनाभ्यां कृत्वा भृशं परिरेभे न्वालिङ्गितः किमित्युत्प्रेक्षा । तेनात्यादरेण दृष्ट इत्यर्थः ॥ ३४ ॥

तत्र कार्मुकभृतं महाभुजः पश्यति स्म सहसा वनेचरम् ।
सन्निकाशयितुमग्रतः स्थितं शासनं कुसुमचापविद्विषः ॥ ३५ ॥

अन्वयः—तत्र, महाभुजः, कुसुमचापविद्विषः, शासनं, सन्निकाशयितुम्, अग्रतः स्थितं, कार्मुकभृतं, वनेचरं, सहसा, पश्यति स्म ॥ ३५ ॥

तत्रेति ॥ तत्र प्रदेशे महाभुजोऽर्जुनः कुसुमचापविद्विषः स्मरारेः शासनं वक्ष्यमाणमादेशं सन्निकाशयितुं प्रकाशयितुम् । निवेदयितुमिति यावत् । अग्रतः स्थितं कार्मुकभृतं वनेचरं सहसा झटिति पश्यति स्म । इतः प्रभृति रथोद्धतावृत्तम्—'रो नराविह रथोद्धता लगौ' इति लक्षणात् ॥ ३५ ॥

स प्रयुज्य तनये महीपतेरात्मजातिसदृशीं किलानतिम् ।
सान्त्वपूर्वमभिनीतिहेतुकं वक्तुमित्थमुपचक्रमे वचः ॥ ३६ ॥

अन्वयः—सः, महीपतेः, तनये, आत्मजातिसदृशीं, किल ? (यतः) आनतिं प्रयुज्य, सान्त्वपूर्वम्, अभिनीतिहेतुकं, वचः, इत्थ, वक्तुम् , उपचक्रमे ॥ ३६ ॥

स इति ॥ स वनेचरो महीपतेस्तनये राजपुत्रेऽर्जुन आत्मजातिसदृशीं किरातजात्यनुरूपां किल । किलेति जातेरलीकतां दर्शयति । यतः । परमार्थतः प्रमथ एव सः । आनतिं प्रणतिं प्रयुज्य सान्त्वपूर्वं सामपूर्वकम् । 'साम सान्त्वमुभे समे' इत्यमरः, अभिनीतिहेतुकं प्रियुक्तिहेतुकं वच. । इत्थं वक्ष्यमाणप्रकारेण वक्तुमुपचक्रम उपक्रान्तवान् ॥ ३६ ॥

तत्र तावच्चतुर्भिः सान्त्वमाह—

शान्तता विनययोगि मानसं भूरि धाम विमलं तपः श्रुतम् ।
प्राह ते नु सदृशी दिवौकसामन्ववायमवदातमाकृतिः ॥३७॥

अन्वयः—शान्तता, ते, विनययोगि, मानसं, प्राह नु, तथा, भूरि, धाम, तपः, विमलं, श्रुतं, प्राह । दिवौकसां, सदृशी, आकृतिः, अवदातं, अन्ववायं, प्राह ॥ ३७ ॥

शान्ततेति ॥ शान्तता बहिरनौद्धत्यं ते तव विनययोग्यनौद्धत्ययुक्तं मानसं कर्म प्राह नु ब्रूते खलु । तथा भूरि बहु धाम तेजो यस्मिंस्तत्तपः कर्तृ विमलं सम्प्रदायशुद्धं

श्रुतं प्राह । किं च । द्यौर्दिवं द्यौको येषां तेषां दिवौकसां देवानाम् । पृषोदरादित्वात्साधुः । 'दिवं स्वर्गेऽन्तरिक्षे च' इति विश्वः । सदृशी तुल्याकृतिर्मूर्तिरवदातं शुद्धमन्ववायं वंशं प्राह । 'वंशोऽन्ववायः सन्तानः' इत्यमरः । शान्त्यादिभिर्लिङ्गैर्विनयादयोऽनुमीयन्ते । अन्यथा तदसम्भवादिति भावः ॥ ३७ ॥

दीपितस्त्वमनुभावसम्पदा गौरवेण लघयन्महीभृतः ।
राजसे मुनिरपीह कारयन्नाधिपत्यमिव शातमन्यवम् ॥ ३८ ॥

अन्वयः—मुनिरपि, अनुभावसम्पदा, दीपितः, गौरवेण, महीभृतः, लघयन् त्वम् इह, शातमन्यवम्, आधिपत्यं, कारयन्निव, राजसे ॥ ३८ ॥

दीपित इति ॥ मुनिरपि । ऐश्वर्यरहितोऽपीत्यर्थः । अनुभावसम्पदा प्रभावातिशयेन दीपितः प्रकाशितः । 'अनुभावः प्रभावे च' इत्यमरः । गौरवेण महत्तया महीभृतो राज्ञो लघयँल्लघूकुर्वन् । त्वमिहाद्रौ । शतमन्योरिदं शातमन्यवमैन्द्रम् । 'तस्येदम्' इत्यण्प्रत्ययः । 'शतमन्युर्दिवस्पतिः' इत्यमरः । अधिपतेः कर्माधिपत्यं त्रैलोक्यरक्षाधिकारम् । ब्राह्मणादित्वात्ष्यञ्प्रत्ययः । कारयन्निव इन्द्रेणेति शेषः । राजसे तस्याप्युपजीव्य इति प्रतीयसे । स्वमहिम्नेत्यर्थः ॥ ३८ ॥

तापसोऽपि विभुतामुपेयिवानास्पदं त्वमसि सर्वसम्पदाम् ।
दृश्यते हि भवतो विना जनैरन्वितस्य सचिवैरिव द्युतिः ॥३९॥

अन्वयः—विभुताम्, उपेयिवान्, तापसोऽपि, त्वं, सर्वसम्पदाम्, आस्पदम्, असि । तथाहि, भवतः, जनैर्विना, सचिवैः, अन्वितस्येव, द्युतिः, दृश्यते ॥ ३९ ॥

तापस इति ॥ विभुतां प्रभावमुपेयिवानुपगतः । अत एव तापसोऽपि त्वं सर्वसम्पदामास्पदं स्थानमसि । 'आस्पदं प्रतिष्ठायाम्' इति निपातः । विभुतामेव समर्थयते—तथाहि भवतस्तव जनैर्विनापि । एकाकिनोऽपीत्यर्थः । सचिवैरन्वितस्येवामात्यादियुक्तस्येव द्युतिस्तेजो दृश्यते । अतः सर्वसम्पदामास्पदत्वं युक्तमित्यर्थः ॥३९॥

विस्मयः क इव वा जयश्रिया नैव मुक्तिरपि ते दवीयसी ।
ईप्सितस्य न भवेदुपाश्रयः कस्य निर्जितरजस्तमोगुणः ॥४०॥

अन्वयः—(किञ्च) जयश्रिया, क इव वा, विस्मयः, अतः, मुक्तिरपि, ते, दवीयसी, नैव, तथाहि, निर्जितरजस्तमोगुणः, कस्य, ईप्सितस्य, उपाश्रयः, न भवेत् ॥४०॥

विस्मय इति ॥ किं च । जयश्रिया हेतुना । प्राप्तयापीति शेषः । क इव वा विस्मयः किमाश्चर्यम् । न कश्चिदित्यर्थः । 'विस्मयोऽद्भुतमाश्चर्यं चित्रम्' इत्यमरः । अतो मुक्तिरपि ते तव दवीयसी दूरतरा दुर्लभा न भवत्येव । 'स्थूलदूर—' इत्यादिना

वणादिपरलोपः पूर्वगुणश्च । तथाहि निर्जितौ रजस्तमसी एव गुणौ येन स रुरुत्सितस्य वाञ्छितस्योपाश्रय आस्पदं न भवेदित्यर्थः ॥ ४० ॥

अथागमनप्रयोजनमुपालम्भमुखेनाह—

ह्रेपयन्नहिमतेजसं त्विषा स त्वमित्थमुपपन्नपौरुषः ।
हर्तुमर्हसि वराहभेदिनं नैनमस्मदधिपस्य सायकम् ॥ ४१ ॥

अन्वयः—त्विषा, अहिमतेजसम्, ह्रेपयन्, उपपन्नपौरुषः, सः, त्वं, वराहभेदिनम्, एनम्, अस्मत्, अधिपस्यम्, सायकम्, इत्थं, हर्तुम्, अर्हसि ॥ ४१ ॥

ह्रेपयन्निति ॥ त्विषा तेजसाऽहिमतेजसमुष्णतेजसं ह्रेपयँल्लज्जयन्नुपपन्नपौरुषः सम्भावितपराक्रमः स प्रसिद्धस्त्वं वराहभेदिनम् । कृतोपकारमित्यर्थः । एनं त्वत्करगतमस्मदधिपस्य सायकं शरमित्थं साहसेन हर्तुं नार्हसि ॥ ४१ ॥

अनर्हत्वमेवाह—

स्मर्यते तनुभृतां सनातनं न्याय्यमाचरितमुत्तमैर्नृभिः ।
ध्वंसते यदि भवादृशस्ततः कः प्रयातु वद तेन वर्त्मना ॥४२॥

अन्वयः—उत्तमैः, नृभिः, तनुभृतां, सनातनं, न्याय्यम्, आचरितं, स्मर्यते । भवादृशः, ततः, ध्वंसते, यदि, तेन, वर्त्मना, कः, प्रयातु, वद, ॥ ४२ ॥

स्मर्यत इति ॥ उत्तमैर्नृभिः सत्पुरुषैर्मन्वादिभिस्तनुभृतां शरीरिणां सनातनं नित्यं न्याय्यं न्यायादनपेतमाचरितमाचारः स्मर्यते । कर्तव्यतयेति शेषः । न त्वनाचार इत्यर्थः । अथाप्यनाचरणे दोषमाह—ध्वंसत इति । भवानिव दृश्यते भवादृशस्ततः सदाचाराद्ध्वंसते भ्रश्यते यदि तदा तेन वर्त्मना न्यायमार्गेण कः प्रयातु गच्छतु वद कथय । न कोऽपीत्यर्थः । तथा च सन्मार्ग इव खिलः स्यादिति भावः ॥ ४२ ॥

आकुमारमुपदेष्टुमिच्छवः संनिवृत्तिमपथान्महापदः ।
योगशक्तिजितजन्ममृत्यवः शीलयन्ति यतयः सुशीलताम् ॥४३॥

अन्वयः—योगशक्तिजितजन्ममृत्यवः, यतयः, आकुमारं, महापदः, अपथात्, संनिवृत्तिम्, उपदेष्टुम्, इच्छवः, सन्तः, सुशीलतां, शीलयन्ति ॥ ४३ ॥

आकुमारमिति ॥ किं च । योगशक्त्यात्मज्ञानमहिम्ना जितौ जन्ममृत्यू यैस्ते यतयो योगिनः । आकुमारेभ्य आकुमारम् । कुमारादारभ्येत्यर्थः । 'आङ् मर्यादाभिविध्योः' इत्यव्ययीभावः । महत्य आपदो यस्मिंस्तस्मान्महापदः । महानर्थहेतोरित्यर्थः । अपथादमार्गात् । 'पथो विभाषा' इति निषेधविकल्पात्समासान्तः । 'अपथं नपुंसकम्' । संनिवृत्तिमपगममुपदेष्टुमिच्छवः सन्तः सुशीलतां सद्वृत्त-

ताम् । 'शीलं स्वभावे सद्वृत्ते' इत्यमरः । शीलयन्त्यभ्यस्यन्ति । अतो न त्याज्यं शीलमित्यर्थः ॥ ४३ ॥

न केवलं सौशील्यादनर्थनिवृत्तिः । किं त्वर्थप्राप्तिरपीत्याह--

तिष्ठतां तपसि पुण्यमासजन्सम्पदोऽनुगुणयन्सुखैषिणाम् ।

योगिनां परिणमन्विमुक्तये केन नास्तु विनयः सतां प्रियः ॥४४॥

अन्वयः—तपसि, तिष्ठतां, पुण्यम्, आसजन्, सुखैषिणां, सम्पदः, अनुगुणयन् तथा, योगिनां, विमुक्तये, परिणमन्, विनयः, केन, सतां प्रियः, नास्तु ॥ ४४ ॥

तिष्ठतामिति ॥ तपसि तिष्ठतां तपोनिष्ठानाम् । धर्मार्थिनामित्यर्थः । पुण्यं धर्ममासजन्सम्पादयन् । 'स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः' इत्यमरः । सुखैषिणां सुखार्थिनां सम्पदः सुखसाधनभूतानर्थाननुगुणयन्ननुकूलयन् । अर्थकामयोरपि हेतुभूत इत्यर्थः । तथा योगिनां विमुक्तयेऽपवर्गाय परिणमन्सम्पद्यमानो विनयः सौशील्यं केन हेतुना सतां प्रियो नास्तु । सम्भावनायां लोट् । सर्वथा विनय एव चतुर्वर्गसाधनमित्यर्थः । अतस्त्वया नास्मत्स्वामिशरचौर्यं कार्यमिति तात्पर्यम् ॥ ४४ ॥

अथवा किं भवादृशेष्वन्यसम्भावनया यतो भ्रान्तिरपि सम्भाव्यत इति मृदूक्तिमवलम्ब्याह—

नूनमत्रभवतः शराकृतिं सर्वथायमनुयाति सायकः ।

सोऽयमित्यनुपपन्नसंशयः कारितस्त्वमपथे पदं यया ॥ ४५ ॥

अन्वयः—अयं, सायकः, अत्र भवतः, शराकृतिं, सर्वथा, अनुयाति नूनम् । यया त्वम्, अनुपपन्नसंशयः, सः, अयम्, इति, अपथे, पदं कारितः ॥ ४५ ॥

नूनमिति ॥ अयमस्मदीयः सायकोऽत्रभवतः । पूज्यस्येत्यर्थः । 'पूज्यस्तत्रभवानत्रभवान्' इति सज्जनः । 'इतराभ्योऽपि दृश्यन्ते' इति सार्वविभक्तिकस्तसिल्प्रत्ययः । सुप्सुपेति समासः । शराकृतिं सर्वथा रूपेण रेखादिना सर्वप्रकारेणानुयात्यनुसरति । अत्यन्तमनुकरोतीत्यर्थः । नूनमिति वितर्के । ययाकृत्या कर्त्र्या त्वमनुपपन्नसंशयोऽत्यन्तसादृश्यादनुत्पन्नस्वान्यदीयत्वसंदेहः सन् । सोऽयमिति यः स्वकीयः स एवायमिति । भ्रान्त्युत्पत्त्यर्थेति शेषः । अपथेऽमार्गे शरापहरणरूपे पदं कारितः निधापित इत्यर्थः । 'हृक्रोरन्यतरस्याम्' इत्यणि कर्तुः कर्मता । 'ण्यन्ते कर्तुश्च कर्मणः' इति तत्रैवाभिहिते कर्मणि क्तः ॥ ४५ ॥

पुनरपि स्तेयमेव दूषयन्दोषान्तरमापादयति—

अन्यदीयविशिखे न केवलं निःस्पृहस्य भवितव्यमाहृते ।

निघ्नतः परनिबर्हितं मृगं व्रीडितव्यमपि ते सचेतसः ॥ ४६ ॥

अन्वयः—सचेतसः, ते अन्यदीयविशिखे, आहृते, निःस्पृहस्य, केवलं न भवितव्यम्, (किन्तु) परनिबर्हितं, मृगं, निघ्नतः, व्रीडितव्यमपि ॥ ४६ ॥

अन्यदीयेति ॥ सह चेतसा वर्तत इति सचेतास्तस्य मनस्विनस्तेऽन्यदीयविशिखे विषये यदाहृतमाहरणम् । भावे क्तः । तस्मिन् । अन्यदीयविशिखस्याहरण इत्यर्थः । निःस्पृहस्य केवलं निःस्पृहेणैव न भवितव्यम् । किं तु परनिबर्हितं परेण प्रहृतं मृगं निघ्नतः प्रहरतस्ते । निघ्नता त्वयेत्यर्थः । 'कृत्यानां कर्तरि वा' इति षष्ठी । व्रीडितव्यं लज्जितव्यमपि । भावे तव्यप्रत्ययः । सम्प्रति तु त्वया परविद्धं मृगं विद्ध्वापि न व्रीड्यते प्रत्युत स्तेयमेव क्रियत इत्यहो महत्साहसमित्यर्थः । मृगमित्यत्र शेषत्वाविवक्षणात् 'जासिनिप्रहणनाटक्राथपिषां हिंसायाम्' इति षष्ठी न भवति शेषाधिकारात् । निप्रहरणेत्यत्र निप्रयोः सङ्घातव्यस्तविपर्यस्तानां ग्रहणात् ॥ ४६ ॥

अथास्मिन्कृतघ्नताभियोगाय स्वोपकारकत्वं वर्णयितुं विकत्थनदोषं तावदुद्यमेन परिहरन्नाह—

सन्ततं निशमयन्त उत्सुका यैः प्रयान्ति मुदमस्य सूरयः ।
कीर्तितानि हसितेऽपि तानि यं व्रीडयन्ति चरितानि मानिनम् ॥४७॥

अन्वयः—सूरयः, अस्य, यैः, सन्ततम्, उत्सुकाः सन्तः, निशमयन्तः, मुदं, प्रयान्ति । तानि, चरितानि, हसितेऽपि, कीर्तितानि, यं, मानिनं, व्रीडयन्ति ॥ ४७ ॥

सन्ततमित्यादि ॥ सूरयो विद्वांसोऽस्यास्मत्स्वामिनः सम्बन्धिभिर्यैश्चरितैः करणभूतैः सन्ततं सततमुत्सुकाः सोत्कण्ठाः सन्तो निशमयन्तश्चरितानि शृण्वन्तो मुदं प्रयान्ति । अत्र चरितानां मुत्प्राप्तौ शाब्दं करणत्वम् । अर्थान्निशमनकर्मत्वमिति विवेकः । तानि चरितानि हसितेऽपि परिहासेऽपि कीर्तितानि परैरुच्चारितानि सन्ति यं मानिनं व्रीडयन्ति । मानित्वात्व्रीडा न तु चरितदोषात् । तेषामलङ्काररूपत्वादिति भावः ॥ ४७ ॥

अन्यदोषमिव स स्वकं गुणं ख्यापयेत्कथमधृष्टताजडः ।
उच्यते स खलु कार्यवत्तया धिग्विभिन्नबुधसेतुमर्थिताम् ॥ ४८ ॥

अन्वयः—अधृष्टताजडः, सः, अन्यदोषमिव, स्वकं, गुणं, कथं, ख्यापयेत्, तथापि, कार्यवत्तया, स, उच्यते, खलु, विभिन्नबुधसेतुम्, अर्थितां, धिक् ॥ ४८ ॥

अन्येति ॥ अधृष्टतया विकत्थनेन शालीनतया जडः स्तब्धः । अविकत्थन इत्यर्थः । सोऽस्मत्स्वाम्यन्यदोषं परावरगुणमिव स्वयं स्वकीयं गुणं कथं ख्यापयेत्प्रकटयेत् । 'आत्मप्रशंसां परगर्हामिव वर्जयेत्' इति स्मरणादिति भावः । तथापि कार्यवत्तया । कार्यार्थितयेत्यर्थः । स स्वगुण उच्यते खलु । कार्यार्थिनः कुतो गर्व इति भावः । निर्विण्ण इवाह—धिगिति । विभिन्नबुधसेतुमतिक्रान्तसुजनमर्यादामर्थितां याचनां

धिक्। निन्दामीत्यर्थः। यदयमपात्थं विकत्थयितुं प्रवृत्त इति भावः। 'धिङ्निर्भर्त्सननिन्दयोः' इत्यमरः। 'अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि' इति द्वितीया। 'अभिसर्वतसोः कार्याधिगुपर्यादिषु त्रिषु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते' इति द्वितीया ॥ ४८ ॥

सम्प्रति स्वकृतोपकारं दर्शयति—

दुर्वचं तदथ मा स्म भून्मृगस्त्वय्यसौ यदकरिष्यदोजसा।
नैनमाशु यदि वाहिनीपतिः प्रत्यपत्स्यत शितेन पत्त्रिणा ॥ ४९ ॥

अन्वयः—वाहिनीपतिः, शितेन, पत्त्रिणा, एनम्, आशु न प्रत्यपत्स्यत। यदि, असौ, मृगः, ओजसा, त्वयि, यद्, अकरिष्यत्, तत्, दुर्वचं, अथ, तत् मास्मभूत् ॥४९॥

दुर्वचमिति ॥ वाहिनीपतिः सेनापतिरस्मत्स्वामी शितेन पत्त्रिणा शरेणैनं मृगमाशु न प्रत्यपत्स्यत यदि नाभियुञ्जीत चेदसौ मृग ओजसा बलेन त्वयि विषये यदकरिष्यद्यदनिष्टं कुर्यात्तद्दुर्वचं दुर्वाच्यममङ्गलतया वक्तुं न शक्यते। तदनिष्टमथानन्तरमपि। मा स्म भूदिति सौहार्दकथनम्। तदुपेक्षणे स मृगस्त्वां हन्यादिति भावः। 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति करोतेः पद्यतेश्च लृङ् ॥ ४९ ॥

ननु मयैव हतो मृगो न तु सेनापतिना। तत्राह—

को न्विमं हरितुरङ्गमायुधस्थेयसीं दधतमङ्गसंहतिम्।
वेगवत्तरमृते चमूपतेर्हन्तुमर्हति शरेण दंष्ट्रिणम् ॥ ५० ॥

अन्वयः—हरितुरङ्गम्, आयुधस्थेयसीं, अङ्गसंहतिं, दधतं, वेगवत्तरं, इमं, दंष्ट्रिणं, चमूपतेः, ऋते, कः, नु, शरेण हन्तुमर्हति ॥ ५० ॥

क इति ॥ हरितुरङ्गमायुधमिन्द्रायुधं तद्वत्स्थेयसीं स्थिरतराम्। वज्रकठिनामित्यर्थः। स्थिरशब्दादीयसुन्। 'प्रियस्थिर—' इत्यादिना स्थादेशः। अङ्गसंहतिमवयवसङ्घातं दधतं धारयन्तं वेगवत्तरं दुर्वारवेगमिमं दंष्ट्रिणं वराहं चमूपतेः किरातवाहिनीपतेर्ऋते चमूपतिं विना। 'अन्यारात्—' इत्यादिना पञ्चमी। को नु को वा शरेण। एकेनेति भावः। हन्तुमर्हति। न कोऽपीत्यर्थः ॥ ५० ॥

अस्तु स एव मृगस्य हन्ता। ततः किमित्यत आह—

मित्रमिष्टमुपकारि संशये मेदिनीपतिरयं तथा च ते।
तं विरोध्य भवता निरासि मा सज्जनैकवसतिः कृतज्ञता ॥ ५१ ॥

अन्वयः—तथा च, अयं मेदिनीपतिः, ते संशये, उपकारि, इष्टं, मित्रं, तं विरोध्य सज्जनैकवसतिः, कृतज्ञता, मा निरासि भवता ॥ ५१ ॥

मित्रमिति ॥ तथा च। तस्यैव मृगहन्तृत्वे सतीत्यर्थः। अयं मेदिनीपतिः किरातभूपतिस्ते तव संशये प्राणसङ्कटे उपकारि उपकारकारकमिष्टं मित्रम्। ततोऽपि किं त-

आह—कमिति। तं मित्रभूतं विरोध्य सज्जनैकवसतिमेवाह्शासुजनमात्राधारा कृतज्ञतो-पकारवेदित्वं मा निरासि न निराक्रियतां भवता। अन्यथा जगति कृतज्ञतास्तमियात्, कृतघ्नता च ते भवेदित्यर्थः। अस्यतेः कर्मण्याशिषि माङि लुङ् ॥ ५१ ॥

ननु सर्वस्यार्थमूलत्वात्स एवास्तु, किं मित्रेणेत्याशङ्क्य मित्रस्य सर्वाधिक्यं युग्मेनाह—

लभ्यमेकसुकृतेन दुर्लभा रक्षितारमसुरक्ष्यभूतयः ।
स्वन्तमन्तविरसा जिगीषतां मित्रलाभमनु लाभसम्पदः ॥५२॥

अन्वयः—जिगीषतां, दुर्लभाः, असुरक्ष्यभूतय, अन्तविरसाः, लाभसम्पदः, एकसुकृतेन, लभ्यं, रक्षितारं, स्वन्तं, मित्रलाभम्, अनु ॥ ५२ ॥

लभ्यमिति ॥ जिगीषतां जेतुमिच्छताम्। जयतेः सन्नन्ताच्छतृप्रत्ययः। दुर्लभाः कृच्छ्रेणापि लब्धुमशक्यास्तथाप्यसुरक्ष्यभूतयो रक्षितुमशक्यमहिमानः। तथापि नित्यं रक्षणादिक्लेशावहाश्चेति भावः। अन्तविरसाः। गत्वर्य इत्यर्थः। लभ्यन्त इति लाभा अर्थास्तेषां सम्पदः। एकसुकृतेनैकोपकारेण लभ्यं सुलभं न तु दुर्लभं रक्षितारं न तु रक्ष्यं स्वन्तं शुभावसानं न त्वन्तविरसं मित्रलाभमनु मित्रलाभाद्धीनाः। निकृष्टा इत्यर्थः। 'हीने' इत्यनोः कर्मप्रवचनीयसंज्ञा। तद्योगे द्वितीया। अत्रोपमेयस्य मित्रलाभस्य लाभान्तरं प्रत्याधिक्याभिधानाद्व्यतिरेकालङ्कार ॥ ५२ ॥

चञ्चलं वसु नितान्तमुन्नता मेदिनीमपि हरन्त्यरातयः ।
भूधरस्थिरमुपेयमागतं मावमंस्त सुहृदं महीपतिम् ॥ ५३ ॥

वसु, नितान्तं चञ्चलं मेदिनीमपि, उन्नताः, अरातयः, हरन्ति, भूधरस्थिरम्, उपेयं, आगतं, महीपतिं, सुहृदं, मावमंस्त ॥ ५३ ॥

चञ्चलमिति ॥ किं च। वसु धनं नितान्तं मेदिनीमप्युन्नताः प्रबला अरातयो हरन्ति। मित्रं तु न तथेत्याह—भूधर इति। भूधरवत्स्थिरमुपेयमन्विष्य गन्तव्यमप्यागतं स्वतः प्राप्तमपि महीपतिम्। सर्वधुरीणमित्यर्थः। सुहृदं मित्रं मावमंस्त मावज्ञासीत। भवानिति शेषः। अन्यद्लोकगतो वा भवच्छब्दो विभक्तिविपरिणामेनात्र द्रष्टव्यः। अन्यथा मध्यमपुरुषः स्यात्। मन्यतेः कर्तरि माङि लुङ्। अलङ्कारस्तु व्यतिरेक एव। भूधरस्थिरमित्युपमागतिसङ्करः ॥ ५३ ॥

ननु मुमुक्षोः किं मित्रसंग्रहेणेत्यत्राह—

जेतुमेव भवता तपस्यते नायुधानि दधते मुमुक्षवः ।
प्राप्स्यते च सकलं महीभृता सङ्गतेन तपसः फलं त्वया ॥५४॥

अन्वयः—भवता, जेतुमेव, तपस्यते, (कुतः) मुमुक्षवः, आयुधानि, न दधते। महीभृता, (सह) सङ्गतेन, त्वया, सकलं, तपसः, फलं, प्राप्स्यते ॥ ५४ ॥

जेतुमिति ॥ भवता जेतुं जयार्थमेव तपस्यते तपश्चर्यते । 'कर्मणो रोमन्थ-' इत्यादिना चरणे क्यङ् । ततो भावे लट् । कुतः । मुमुक्षवो मोक्षार्थिन आयुधानि न दधते न धारयन्ति । अतो मित्रसंग्रहः कार्य इति भावः । तथापि किं भवत्स्वामिसख्येन, तत्राह—प्राप्स्यत इति महिभृता सह सङ्गतेन त्वया सकलं तपसः फलं प्राप्स्यते । अतस्ते सखाऽस्मत्स्वामी युक्त इत्यर्थः ॥ ५४ ॥

नन्वकिञ्चनः कुत्रोपयुज्यते, तत्राह—

वाजिभूमिरिभराजकाननं सन्ति रत्ननिचयाश्च भूरिशः ।
काञ्चनेन किमिवास्य पत्रिणा केवलं न सहते विलङ्घनम् ॥५५॥

अन्वयः—वाजिभूमिः, इभराजकाननं, भूरिशः, रत्ननिचयाश्च, सन्ति । अस्य, काञ्चनेन पत्रिणा, किमिव, परन्तु, केवलं, विलङ्घनं न सहते ॥ ५५ ॥

वाजीति ॥ तस्य भूपतेर्वाजिभूमिरश्वाकर इभराजानां काननं गजोत्पत्तिस्थानं भूरिशो रत्ननिचयाश्च । सन्तीति । शेषः । नन्वीदृगाढ्यः । किमेकस्मै काञ्चनपत्रकाण्डाय कलहायते, तत्राह-अस्य काञ्चनेन सावर्णेन पत्रिणा शरेण किमिव । न किञ्चित्प्रयोजनमस्तीत्यर्थः । परन्तु केवलं विलङ्घनं व्यतिक्रमं न सहते । नायं शरलुब्धः । किन्त्वधिक्षेपासहिष्णुरित्यर्थः । अत्र प्रथमार्धे समृद्धिमद्वस्तुवर्णनादुदात्तालङ्कारः॥५५॥

नन्वीदृग्लुब्धः किमुपकर्ता, तत्राह—

सावलेपमुपलिप्सिते परैरभ्युपैति विकृतिं रजस्यपि ।
अर्थितस्तु न महान्समीहते जीवितं किमु धनं धनायितुम् ॥५६॥

अन्वयः—महान् रजस्यपि, परैः, सावलेपम्, उपलिप्सिते सति, विकृतिम्, अभ्युपैति । अर्थितस्तु, जीवितं, धनायितुं, न समीहते । धनं किमु ॥ ५६ ॥

सावलेपमिति ॥ महानयं रजस्यपि धूलावपि परैः सावलेपं सगर्वमुपलिप्सित उपलब्धुमिष्टे जिघृक्षिते सति विकृतिमभ्युपैति । प्रकुप्यतीयः । अर्थितो याचितस्तु जीवितं धनायितुं धनीकर्तुम् । क्यजन्तात्तुमुन् । न समीहते नोत्सहते । जीवितमप्यात्मनो नेच्छति । किन्त्वर्थितः प्रयच्छतीत्यर्थः । तर्हि धनं किम् । धनमात्मन इच्छितुं धनायितुमिति विग्रहः । अत्र इच्छामात्रमर्थः । अन्यथा धनमित्यनेन पौनरुक्त्यं स्यात् । 'सुप आत्मनः क्यच्' । 'अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु' इति निपातनादाकारः ॥ ५६ ॥

उक्तमर्थं निगमयति—

तत्तदीयविशिखातिसर्जनादस्तु वां गुरु यदृच्छयागतम् ।
राघवप्लवगराजयोरिव प्रेम युक्तमितरेतराश्रयम् ॥ ५७ ॥

अन्वयः—तत्, तदीयविशिखातिसर्जनात्, वां, राघवप्लवगराजयोः इव, यदृच्छया, आगतं, गुरु, युक्तम् इतरेतराश्रयं, प्रेम अस्तु ॥ ५७ ॥

तदिति ॥ तत्तस्मात्तदीयविशिखस्यातिसर्जनात्प्रत्यर्पणाद्वां युवयोः। 'षष्ठीचतुर्थीद्वितीयास्थयोर्वानावौ' इति वामादेशः। राघवप्लवगराजयो रामसुग्रीवयोरिव यदृच्छया दैवादागतं गुरु महद्युक्तमनुरूपमितरेतराश्रयमन्योन्यविषयं प्रेम सख्यमस्तु ॥ ५७ ॥

ननु शरलोभान्मिथ्याभियुज्यस इत्याह—

नाभियोक्तुमनृतं त्वमिष्यसे यस्तपस्विविशिखेषु चादरः।
सन्ति भूभृति शरा हि नः परे ये पराक्रमवसूनि वज्रिणः॥५८॥

अन्वयः—त्वम्, अनृतम्, अभियोक्तुं, नेष्यसे। यः, तपस्विविशिखेषु, आदरः। हि, नः, भूभृति, परे, शराः, सन्ति। ये, वज्रिणः, पराक्रमवसूनि ॥ ५८ ॥

नेति ॥ त्वमनृतं मिथ्याभियोक्तुमभ्याख्यातुम्। भूञोऽर्थग्रहणाद्द्विकर्मकता। 'मिथ्याभियोगोऽभ्याख्यानम्' इत्यमरः। अस्माभिरिति शेषः। नेष्यसे नेष्टोऽसि। कुतः। तपस्वी मुनिः शोच्यश्च। 'मुनिशोच्यौ तपस्विनौ' इति शाश्वतः। तस्य विशिखेषु क आदरः कास्था। न कापिदित्यर्थः। हि यस्मान्नोऽस्माकं भूभृति शैले परेऽन्येऽपि शराः सन्ति ये शरा वज्रिणः शक्रस्य पराक्रमवसूनि पराक्रमधनानि। शौर्यसर्वस्वभूता इत्यर्थः। वज्रिग्रहणाद्वज्रादप्यतिरिच्यन्त इति सूच्यते। अत्र शरेषु पराक्रमसाधनेषु पराक्रमरूपेण वस्तु व्यज्यते ॥ ५८ ॥

अथ ते शरापेक्षा चेत्तर्हि तथोच्यतामित्याह—

मार्गणैरथ तव प्रयोजनं नाथसे किमु पतिं न भूभृतः।
त्वद्विधं सुहृदमेत्य सोऽर्थिनं किं न यच्छति विजित्य मेदिनीम्॥५९॥

अन्वयः—अथ, तव, मार्गणैः, प्रयोजनं, भूभृतः, पतिं, किमु, न नाथसे। सः, त्वद्विधं, (तथापि) सुहृदम्, अर्थिनम्, एत्य, मेदिनीं, विजित्य, न यच्छति किम्॥५९॥

मार्गणैरिति ॥ अथेत तव मार्गणैः शरैः प्रयोजनं कृत्यं तर्हि भूभृतो गिरेः पतिं प्रभुं किमु न नाथसे किमिति न याचसे। 'नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु' इति धातोर्लट्। न च याच्ञाभङ्गशङ्का कार्येत्याह—त्वदिति। सोऽस्मत्स्वामी तवेव विधा प्रकारो यस्य तं त्वद्विधं त्वादृशम्। महानुभावमित्यर्थः। तथापि सुहृदं मित्रभूतमर्थिनमेत्य लब्ध्वा मेदिनीं विजित्य न यच्छति किं न ददाति किम्। किं तु दास्यत्येव। किं पुनः शरानिति भावः॥ ५९ ॥

यदुक्तम् 'त्वद्विधम्' इत्यादि तत्रोपपत्तिमाह—

तेन सूरिरुपकारिताधनः कर्तुमिच्छति न याचितं वृथा।
सीदतामनुभवन्निवार्थिनां वेद यत्प्रणयभङ्गवेदनाम्॥६०॥

अन्वयः—तेन, सूरिरुपकारिताधनः, (सः) याच्ञां, वृथा, कर्तुं, न इच्छति, यत्, सीदताम्, अर्थिनां, प्रणयभङ्गवेदनाम्, अनुभवन्निव, वेद ॥ ६० ॥

तेनेति ॥ तेन कारणेन सूरिर्विद्वानत एवोपकारिताधन उपकारकत्वमात्रधनः स किरातभूपतिर्याचितं याच्ञां वृथा व्यर्थं कर्तुं नेच्छति । कुतः । यद्येन कारणेन सीदतां क्लिश्यतामर्थिनां प्रणयभङ्गवेदनां याच्ञाभङ्गदुःखं स्वयमनुभवन्निव वेद वेत्ति । अतो न वैफल्यशङ्का कार्येत्यर्थः ॥ ६० ॥

ननु स्वयङ्ग्राहिण. किं याच्ञादैन्यं तत्राह—

शक्तिरर्थपतिषु स्वयङ्ग्रहं प्रेम कारयति वा निरत्ययम् ।
कारणद्वयमिदं निरस्यतः प्रार्थनाधिकबले विपत्फला ॥ ६१ ॥

अन्वयः—अर्थपतिषु, शक्तिः, स्वयङ्ग्रहं, कारयति । वा, निरत्ययं, प्रेम, (कारयति इदं, कारणद्वयं, निरस्यतः, अधिकबले, प्रार्थना, विपत्फला ॥ ६१ ॥

शक्तिरिति ॥ अर्थपतिषु विषये शक्तिः सामर्थ्यं स्वयङ्ग्रहं स्वाम्यनुज्ञां विना ग्रहणं कारयति । यद्वा निरत्ययमपराधेऽप्यविकारि निर्बाधं प्रेम कर्तृ स्वयङ्ग्रहं कारयति । प्रबलः प्रियो वा परस्य धनं स्वयं गृह्णातीत्यर्थः । अन्यथा दोषमाह—इदं पूर्वोक्तं कारणद्वयं निरस्यतस्त्यजतः । पुंस इति शेषः । अधिकबले प्रबले विषये प्रार्थना तद्धनजिघृक्षा विपत्फलाऽनर्थफलका । अशक्तस्याप्रियस्य सत. प्रबलधनग्रहणाशा फणिशिरोमणिग्रहणसाहसवदनर्थाय कल्पत इत्यर्थः ॥ ६१ ॥

ननु शस्त्रार्थसम्पत्त्या शक्तत्वाभिमानः, तत्राह—

अस्त्रवेदमधिगम्य तत्त्वतः कस्य चेह भुजवीर्यशालिनः ।
जामदग्न्यमपहाय गीयते तापसेषु चरितार्थमायुधम् ॥ ६२ ॥

इह, तापसेषु जामदग्न्यम्, अपहाय, अस्त्रवेदम्, तत्त्वतः, अधिगम्य, भुजवीर्यशालिनः, कस्य, च, आयुधं, चरितार्थं, गीयते ॥ ६२ ॥

अस्त्रवेदमिति ॥ इह जगति तापसेषु तपस्विनां मध्ये । 'यतश्च निर्धारणम्' इति सप्तमी । जमदग्नेरपत्यं पुमाञ्जामदग्न्यः । 'गर्गादिभ्यो यञ्' । तमपहाय । परशुरामं विनेत्यर्थः । अस्त्रवेदं तत्त्वतोऽधिगम्य । भुजवीर्येण शालत इति भुजवीर्यशालिनः । उभयसम्पन्नस्येत्यर्थः । शालनक्रियापेक्षया समानकर्तृकत्वात्क्त्वानिर्देशः । कस्य वायुधं चरितः प्राप्तोऽर्थो येन तच्चरितार्थं सार्थकं गीयते । न कस्यापीत्यर्थः । अतस्त्वापि तापसत्वादकिञ्चित्करस्य तेन सह सख्यमेव मुख्यमिति भावः ॥ ६२ ॥

ननु युष्मन्मृगवधशरहरणाभ्यां द्रोहिणो मम तेन कथं सख्यं स्यादित्याशङ्क्य, सत्यं तथापि तावन्मृगवधापराधः क्षमिष्यत इत्याह—

अभ्यघानि मुनिचापलात्त्वया यन्मृगः क्षितिपतेः परिग्रहः ।
अक्षमिष्ट तदयं प्रमाद्यतां संवृणोति खलु दोषमज्ञता ॥६३॥

अन्वयः—त्वया, मुनिचापलात्, क्षितिपतेः, परिग्रहः, यत्, मृगः, अभ्यघानि, तत्, *अयम्*, *अक्षमिष्ट*, *हि*, *प्रमाद्यताम्*, दोषम्, *अज्ञता संवृणोति खलु* ॥ ६३ ॥

अभ्यघानीति ॥ त्वया मुनिचापलात् । ब्राह्मणचापल्यादित्यर्थः । क्षितिपतेरस्मत्स्वामिनः । परिगृह्यत इति परिग्रहः । तेन स्वीकृत इत्यर्थः । 'परिग्रहःपरिजने पत्न्यां स्वीकारमूलयोः' इति विश्वः । यन्मृगोऽभ्यघान्यभिहत इति । हन्तेः कर्मणि लुङ् । तद्धननमस्मत्स्वाम्यक्षमिष्ट सोढवानेव । तथा हि । प्रमाद्यताम् । अविमृश्यकारिणामित्यर्थः । दोषमपराधमज्ञताऽज्ञानिता संवृणोत्याच्छादयति । नाज्ञस्यापराधो गण्यत इत्यर्थः ॥ ६३ ॥

अथ सुहृद्भावेन हितमुपदिशति—

जन्मवेषतपसां विरोधिनीं मा कृथाः पुनरमूमपक्रियाम् ।
आपदेत्युभयलोकदूषणी वर्तमानमपथे हि दुर्मतिम् ॥६४॥

अन्वयः—जन्मवेषतपसां, विरोधिनीम्, अमूम्, अपक्रियां, पुनः मा कृथाः । हि (यस्मात्) अपथे, वर्तमानं, दुर्मतिम्, उभयलोकदूषणी, आपदेति ॥ ६४ ॥

जन्मेति ॥ जन्म सत्कुले प्रसूतिः, वेषो जटावल्कलादि, तपो नियमः, तेषां विरोधिनीं विरुद्धाममूमेवंविधामपक्रियामपकारम् । पुनः । इतः परमित्यर्थः । मा कृथाः मा कुरु । करोतेः कर्तरि माङि लुङ् । 'वयोबुद्ध्यर्थवाग्वेषश्रुताभिनयकर्मणाम् । आचरेत्सदृशीं वृत्तिमजिह्मामशठां तथा ॥' इति स्मरणात् । उक्तवैपरीत्ये दोषमाह—आपदेति । हि यस्मात् । अपथे वर्तमानं दुर्मतिम् । पुरुषमिति शेषः । उभौ लोकौ दूषयति हन्तीत्युभयलोकदूषणी । 'तद्धितार्थ—' इत्यादिनोत्तरपदसमासः । आपदेति प्राप्नोति । समासविषय उभशब्दस्थाने उभयशब्दप्रयोग एव साधुः । यदाह कैयटः—'उभादुदात्तो नित्यमिति नित्यग्रहणस्येदं प्रयोजनं वृत्तिविषय उभशब्दस्य प्रयोगो मा भूदुभयशब्दस्यैव रूपं यथा स्यादित्युभयत्रेत्यादि भवति' इति ॥ ६४ ॥

यदुक्तम् 'अभ्यघानि' इति तदेव स्फुटयति—

यष्टुमिच्छसि पितॄन्न साम्प्रतं संवृतोऽर्चिचयिषुर्दिवौकसः ।
दातुमेव पदवीमपि क्षमः किं मृगेऽङ्ग विशिखं न्यवीविशः ॥६५॥

अन्वयः—साम्प्रतं, पितॄन्, यष्टुं, नेच्छसि, (यतः) संवृतः, (तथा) दिवौ-

कसः, अर्चिचयिषुः अपि हे अङ्ग ?, पद्वीं, दातुमेव, क्षमोऽपि, किं, मृगे, विशिखं, न्यवीविशः ॥ ६५ ॥

यष्टुमिति ॥ साम्प्रतं सम्प्रति । 'सम्प्रतीदानीमधुना साम्प्रतं तथा' इत्यमरः । पितॄन्कव्यवाडादीन्यष्टुमर्चयितुं नेच्छसि । यतः संवृत एकान्ते स्थितः । तथा दिवौकसो देवानर्चिचयिषुरप्यर्चयितुमिच्छुरपि नासि । अतो न पित्रर्थं हिंसा, नापि देवतार्था । तदाराधने तद्विहितत्वादिति भाव. । अथ 'सर्वत आत्मानं गोपायीत' इति श्रुतेरात्मरक्षार्थमिति चेन्नेत्याह—दातुमिति । हे अङ्ग, पद्वीं मार्गं दातुमेव । न तु हन्तुम् । मुनित्वादिति भावः । क्षमोऽपि योग्यः सन्नपि । किं किमर्थं मृगे विशिखं न्यवीविशो निवेशितवान् । विशतेर्ण्यन्ताल्लुङ् । अभिधावतो मृगादपसरणेनैवात्मरक्षणे कर्तव्ये यद्वधोऽस्तच्चापलमेव । 'न हिंस्यात्सर्वा भूतानि' इति श्रुतिनिषेधादिति भावः ॥ ६५ ॥

किं बहुना, परमार्थः श्रूयतामित्याह—

सज्जनोऽसि विजहीहि चापलं सर्वदा क इव वा सहिष्यते ।
वारिधीनिव युगान्तवायवः क्षोभयन्त्यनिभृता गुरूनपि ॥६६॥

अन्वयः—सज्जनोऽसि, चापलं, विजहीहि । सर्वदा, क इव वा, सहिष्यते । अनिभृताः गुरूनपि, युगान्तवायवः वारिधीनिव, क्षोभयन्ति ॥ ६६ ॥

सज्जन इति ॥ सज्जनोऽसि । अत एव चापलं चपलस्य कर्म विजहीहि त्यज । जहातेर्लोट् । 'आ च हौ' इतीकारः । सर्वदा क इव वा को वा सहिष्यते । इवशब्दो वाक्यालङ्कारे । वाशब्दोऽवधारणे । असहने कारणमाह—वारिधीनिति । अनिभृताश्चपलाः पुनः पुनरकार्यकारिणो गुरून्धैर्ययुक्तानपि । अन्यत्र विशालानपि । युगान्तवायवः प्रलयपवना वारिधीनिव समुद्रानिव क्षोभयन्ति । उपमानुप्राणितोऽयमर्थान्तरन्यासः ॥ ६६ ॥

नन्वयं किरातः क्षुभितः किं करिष्यति, तत्राह—

अस्त्रवेदविदयं महीपतिः पर्वतीय इति मावजीगणः ।
गोपितुं भुवमिमां मरुत्वता शैलवासमनुनीय लम्भितः ॥६७॥

अन्वयः—अयं, महीपतिः, अस्त्रवेदवित्, पर्वतीयः, इति मावजीगणः, मरुत्वता, इमां, भुवम्, गोपितुम्, अनुनीय, शैलवासं, लम्भितः ॥ ६७ ॥

अस्त्रेति ॥ अयं महीपतिरस्त्रवेदवित् । निग्रहानुग्रहसमर्थ इति भावः । अतः पर्वते भवः पर्वतीयः । 'पर्वताच्च' इति छप्रत्ययः । इति हेतोर्मावजीगणः । वनेचरबुद्ध्या मावज्ञासीरित्यर्थः । गणयतेर्माङि लुङ् । 'ई च गणः' इतीकारः । नन्वीदृशश्चेत्किमर्थं-

मिह वने वसति तत्राह—गोपितुमिति । मरुत्वतेन्द्रेणेमां भुवं गोपितुं रक्षितुम् । 'आयादय आर्धधातुके वा' इति विकल्पात्, गुपूधूप-' इत्यादिनायप्रत्ययः । अनुनीय प्रार्थ्य शैलवासं लम्भितः प्रापितः । 'ण्यन्ते कर्तुश्च कर्मणः' इति वचनादणि कर्तुः कर्मणि क्तः । 'गतिबुद्धि-' इत्यादिनाणि कर्तुः कर्मत्वम् ॥ ६७ ॥

उपसंहरति—

तत्तितिक्षितमिदं मया मुनेरित्यवोचत वचश्चमूपतिः
बाणमत्रभवते निजं दिशन्नाप्नुहि त्वमपि सर्वसम्पदः ॥६८॥

अन्वयः—तत्, मुनेः, इदं, मया, तितिक्षितं, वचः, चमूपतिः अवोचत । अत्र, भवते, निजं, बाणं, दिशन्, त्वमपि, सर्वसम्पदः, आप्नुहि ॥ ६८ ॥

तदिति ॥ तत्तस्मान्मुनित्वापलान्मुनेः सम्बन्धीदं मृगवधरूपमागो मया तितिक्षितं सोढमिति वचश्चमूपतिरवोचत । शरद्रोहस्य प्रत्यर्पणमेव प्रतीकार इत्याह—अत्रभवते पूज्याय स्वामिने । अत्रभवान्व्याख्यातः । निजं बाणं तदीयमेव शरं दिशन्प्रत्यर्पयंस्त्वमपि सर्वसम्पद आप्नुहि । सख्येनेति भावः ॥ ६८ ॥

ननु मह्यमेतत्सख्यमेव न रोचते, किं पुनस्तन्मूला सम्पदस्तत्राह—

आत्मनीनमुपतिष्ठते गुणाः सम्भवन्ति विरमन्ति चापदः ।
इत्यनेकफलभाजि मा स्मभूदर्थिता कथमिवार्यसङ्गमे ॥६९॥

अन्वयः—आत्मनीनम्, उपतिष्ठते । गुणाः, सम्भवन्ति । आपदश्च, विरमन्ति । इति, अनेकफलभाजि, आर्यसङ्गमे, अर्थिता, कथमिव, मा स्म भूत् ॥ ६९ ॥

आत्मनीनमिति ॥ आत्मने हितमात्मनीनम् । 'आत्मन्विश्वजनभोगोत्तरपदात्खः' । उपतिष्ठते सङ्गच्छते । 'उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिषु' इति वक्तव्यादात्मनेपदम् । गुणा विनयादयः सम्भवन्त्यापदश्च विरमन्ति । 'व्याङ्परिभ्यो रमः' इति परस्मैपदम् । इत्यनेकफलभाजि नानाफलोत्पादक आर्यसङ्गमे साधुसङ्गतावर्थितापेक्षा कथमिव मा स्म भूत् । सर्वदा भवत्येव ॥ ६९ ॥

न चायं दूरे वर्तत इत्याह—

दृश्यतामयमनोकहान्तरे तिग्महेतिपृतनाभिरन्वितः ।
साहिवीचिरिव सिन्धुरुद्धतो भूपतिः समयसेतुवारितः ॥७०॥

अन्वयः—तिग्महेतिपृतनाभिः, अन्वितः, साहिवीचिः, सिन्धुरिव समयसेतुवारितः, अयम्, अनोकहान्तरे, दृश्यताम् ॥ ७० ॥

दृश्यतामिति ॥ तिग्महेतिभिस्तीक्ष्णायुधाभिः । 'हेतिर्ज्वालास्त्रसूर्योशुषु' इति हेमचन्द्रः । पृतनाभिर्वाहिनीभिः । 'वाहिनी पृतना चमूः' इत्यमरः । अन्वितो भूपतिः ।

साहय: ससर्पा वीचयो यस्य स सिन्धुः समुद्र इवोद्धतः। किन्तु समयो मर्यादा सेतु-रिव स समयसेतुस्तेन वारितः सन्। हस्तेन निर्दिशन्नाह--अयमनोकहान्तरे द्रुमा-न्तर्धाने। वर्तत इति शेषः। दृश्यताम्। 'अनोकहः कुटः शालः पलाशी द्रुद्रुमागमाः' इत्यमरः ॥ ७० ॥

अथास्य विज्ञानमेवाह—

सज्यं धनुर्वहति योऽहिपतिस्थवीयः
स्थेयाञ्जयन्हरितुरङ्गमकेतुलक्ष्मीम्।
अस्यानुकूलय मतिं मतिमन्ननेन
सख्या सुखं समभियास्यमि चिन्तितानि ॥ ७१ ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये त्रयोदशः सर्गः।

अन्वयः—स्थेयान्, यः हरितुरङ्गम्, अकेतुलक्ष्मीं, जयन्, अहिपतिस्थवीय., सज्यं, धनु, वहति। हे मतिमन्, अस्य, मतिम्, अनुकूलय, सख्या, अनेन, सुखं, चिन्तितानि, समभियास्यसि ॥ ७१ ॥

सज्यमिति ॥ स्थेयान्स्थिरतरः। 'प्रियस्थिर—' इत्यादिना स्थादेशः। यश्चमू पतिर्हरितुरङ्गमकेतोरिन्द्रध्वजस्य लक्ष्मीं शोभां जयन्। अहिपतिः शेष इव स्थवीयः स्थूलतरम्। 'स्थूलदूर—' इत्यादिना पूर्वगुणयणादिपरलोपौ। सह ज्यया सज्यं धनुर्वहति। हे मतिमन्, अस्य चमूपतेर्मतिमनुकूलयानुकूलां कुरु। सख्य कुर्वित्यर्थः। मतिमत्तायाः फलमेतदिति भावः। कुतः। सख्यानेन चमूपतिना हेतुना सुखमक्लेशेन चिन्तितानि मनोरथान्समभियास्यसि प्राप्स्यसि। वसन्ततिल-कावृत्तम् ॥ ७१ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्य-व्याख्यायां घण्टापथसमाख्यायां त्रयोदशः सर्गः समाप्तः ॥

चतुर्दशः सर्गः।

ततः किरातस्य वचोभिरुद्धतैः पराहतः शैल इवार्णवाम्बुभिः।
जहौ न धैर्यं कुपितोऽपि पाण्डवः सुदुर्ग्रहान्तःकरणा हि साधवः ॥ १ ॥

अन्वयः—ततः, उद्धतैः, किरातस्य, वचोभिः, अर्णवाम्बुभिः, शैलः, इव, पराहतः, कुपितः, अपि पाण्डवः, धैर्यं, न, जहौ, हि, साधवः, सुदुर्ग्रहान्तःकरणाः ॥ १ ॥

तत इति ॥ ततः किरातवाक्यानन्तरमुद्धतैः प्रगल्भैः किरातस्य वचोभिः । अर्णवाम्बुभिः शैल इव पराहतोऽभिहतोऽत एव कुपितोऽपि पाण्डवो धैर्यं निर्विकारचित्तत्वं न जहौ न तत्याज । उत्पन्नमपि कोपं स्तम्भयामासेत्यर्थः । तथाहि । साधवः सज्जनाः सुदुर्ग्रहं सुष्टु दुरासदमप्रकम्प्यमन्तःकरणं येषां ते सुदुर्ग्रहान्तःकरणा हि । अर्थान्तरन्यासः ॥ १ ॥

सलेशमुल्लिङ्गितशात्रवेङ्गितः कृती गिरां विस्तरतत्त्वसङ्ग्रहे ।
अयं प्रमाणीकृतकालसाधनः प्रशान्तसंरम्भ इवाददे वचः ॥ २ ॥

अन्वय —सलेशम्, उल्लिङ्गितशात्रवेङ्गितः, गिरां, विस्तरतत्त्वसङ्ग्रहे, कृती, प्रमाणीकृतकालसाधनः, अयं, प्रशान्तसंरम्भः, इव, वच, आददे ॥ २ ॥

सलेशमिति ॥ सह लेशैः सलेशं सकलं यथा तथोल्लिङ्गितमुद्धृतलिङ्गं कृतम् । लिङ्गैस्तद्वाक्यभङ्गिभिरेव सम्यगवगमितमित्यर्थः । शत्रुरेव शात्रवः । स्वार्थेऽण्प्रत्ययः । तस्येङ्गितमभिप्रायस्तदुल्लिङ्गितं येन स । गिरां वाचां सम्बन्धिनि विस्तरे तत्त्वसङ्ग्रहेऽर्थसङ्क्षेपे । वैभाषिको द्वन्द्वैकवद्भावः । कृती कुशल प्रमाणीकृतं प्रधानीकृतं काल एव साधनं येन स । अवसरोचितं विवक्षुरित्यर्थः । अयं पाण्डव प्रशान्तसंरम्भः सङ्क्षोभरहित इव वच आददे । उवाचेत्यर्थ ॥ २ ॥

सान्त्वपूर्वकमेवाह—

विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम् ।
प्रवर्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती ॥ ३ ॥

अन्वयः—विविक्तवर्णाभरणा, सुखश्रुतिः, द्विषाम्, अपि, हृदयानि, प्रसादयन्ती प्रसन्नगम्भीरपदा, सरस्वती, अकृतपुण्यकर्मणां न प्रवर्तते ॥ ३ ॥

विविक्तेति ॥ विविक्ताः सन्धानादिनाश्लिष्टाः स्फुटोच्चारिता वर्णा अक्षराण्येवाभरणानि यस्याः सा । अन्यत्र तु विविक्तानि शुद्धानि वर्णो रूपमाभरणानि च यस्याः सा । 'वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु चाक्षरे' इत्युभयत्राप्यमरः । सुखा श्रुतिः श्रवणं यस्याः सा सुखश्रुतिः । श्राव्येत्यर्थः । अन्यत्र श्रूयत इति श्रुतिर्वाक् । सा सुखा यस्याः सा । मञ्जुभाषिणीत्यर्थः । द्विषामपि हृदयानि प्रसादयन्ती । किं पुनः सुहृदामिति भावः । प्रसन्नानि वाचकानि गम्भीराण्यर्थगुरूणि च पदानि सुप्तिङन्तरूपाणि यस्याः सा । अन्यत्र तु प्रसन्ना विमला गम्भीरपदाऽलसचरणा सरस्वती वाक् । स्त्रीरत्नं च । तथा चोक्तम्—'सरस्वती सरिद्भेदे गोवाग्देवतयोरपि । स्त्रीरत्ने च' इति । न कृतं पुण्यकर्म यैस्तेषां न प्रवर्तते न प्रसरति । किं तु सुकृतिनामेवेत्यर्थः । भवद्वाणी चैवंविधेति धन्यो भवानिति भाव । अत्र काचिन्नायिका वाग्देवता च

प्रतीयते । तस्मादौ समासोक्तिरलङ्कारः । विशेषणमात्रसाम्येनाप्रस्तुतप्रतीतेः । अत एव न श्लेषः ॥ ३ ॥

भवन्ति ते सभ्यतमा विपश्चितां मनोगतं वाचि निवेशयन्ति ये ।
नयन्ति तेष्वप्युपपन्ननैपुणा गभीरमर्थं कतिचित्प्रकाशताम् ॥४॥

अन्वयः—ते, विपश्चितां, (मध्ये) सभ्यतमाः भवन्ति, ये मनोगतं, वाचि, निवेशयन्ति, तेषु, अपि, उपपन्ननैपुणाः, कतिचित्, गभीरम्, अर्थं, प्रकाशतां, नयन्ति ॥ ४ ॥

भवन्तीति ॥ ते पुरुषा विपश्चितां विदुषाम् । 'विद्वान्विपश्चिद्दोषज्ञः' इत्यमरः । मध्ये सभ्यतमाः सभायां साधुतमा निपुणतमाः । 'साधुः समर्थो निपुणश्च' इति काशिकायाम् । भवन्ति । ये मनोगतं मनसा गृहीतमर्थं वाचि निवेशयन्ति । वाचोयुक्तिरन्तीत्यर्थः । तेषु वक्तृष्वप्युपपन्ननैपुणाः सम्भावितकौशलाः कतिचिदेव गभीरं निगूढमर्थं प्रकाशतां स्फुटतां नयन्ति । लोके तावज्ज्ञातार इव दुर्लभाः । तत्रापि वक्तारः । तत्रापि निगूढार्थप्रकाशकाः । त्वयि सर्वमस्तीति स्तुतिः । वनेचरवाक्यरहस्यं ज्ञातमिति स्वयमपि तादृश एवेति हृदयम् ॥ ४ ॥

स्तुवन्ति गुर्वीमभिधेयसम्पदं विशुद्धिमुक्तेरपरे विपश्चितः ।
इति स्थितायां प्रतिपूरुषं रुचौ सुदुर्लभाः सर्वमनोरमा गिरः ॥५॥

अन्वयः—(केचित) गुर्वीम्, अभिधेयसम्पदं, स्तुवन्ति, अपरे, विपश्चितः, उक्तेः, विशुद्धिम्, (स्तुवन्ति) इति, प्रतिपूरुषं, रुचौ, स्थितायाम्, सर्वमनोरमा, गिरः, सुदुर्लभाः ॥ ५ ॥

स्तुवन्तीति ॥ किं च केचिद्गुर्वीं महतीमभिधेयसम्पदमर्थसम्पत्तिं स्तुवन्ति । अपरे विपश्चित उक्तेः शब्दस्य विशुद्धिं सामर्थ्यं स्तुवन्ति । इति प्रतिपूरुषं रुचौ प्रीतौ स्थितायां व्यवस्थितायां सर्वमनोरमाः सर्वेषां शब्दार्थरुचीनां पुंसां मनोरमा गिरः सुदुर्लभाः । त्वद्गिरस्तु सर्वमनोरमा उक्तसर्वगुणसम्पत्त्येति भावः ॥ ५ ॥

समस्य सम्पादयता गुणैरिमां त्वया समारोपितभार भारतीम् ।
प्रगल्भमात्मा धुरि धुर्य वाग्मिनां वनेचरेणापि सताधिरोपितः ॥६॥

अन्वयः—धुर्य ! समारोपितभार ! इमां, भारतीम्, गुणैः, समस्य, प्रगल्भं, सम्पादयता, त्वया, वनेचरेण, सता, अपि, आत्मा, वाग्मिनाम्, धुरि, अधिरोपितः ॥ ६ ॥

समस्येति ॥ धुरं वहतीति धुर्यस्तत्सम्बोधने हे धुर्य हे कार्यनिर्वाहक । 'धुरो यड्ढकौ' इति यत्प्रत्ययः । अत एव समारोपितभार हे स्वामिना निहितसन्ध्यादिकार्यभार ।

तदाह मनुः—'दूते सन्धिविपर्ययौ' इति । इमां 'शान्ततविनययोगि'त्यादिकां भारतीं वाचं गुणैर्विविक्तवर्णत्वादिभिः समस्य संयोज्य प्रगल्भं निर्भीकं यथा तथा सम्पादयता रचतया । व्याहरतेत्यर्थः । त्वया वनेचरेणापीत्यर्थः । सतामपि अपिशब्दो विरोधद्योतनार्थम् । आत्मा स्वयं वाग्मिनां वाचोयुक्तिपटूनाम् । 'वाचोयुक्तिपटुर्वाग्मी' इत्यमरः । 'वाचो ग्मिनिः' इति मत्वर्थीयो ग्मिनिप्रत्ययः । धुर्यग्रेऽधिरोपितः । स्थापित इत्यर्थः । 'रुहः पोऽन्यतरस्याम्' इति पकारः । अत्र मनुः—'वपुष्मान्वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते' इति ॥ ६ ॥

वाग्मितामेवाह—

प्रयुज्य सामाचरितं विलोभनं भयं विभेदाय धियः प्रदर्शितम् ।
तथाभियुक्तं च शिलीमुखार्थिना यथेतरन्न्याय्यमिवावभासते ॥७॥

अन्वयः—साम, प्रयुज्य, विलोभनम्, आचरितं, धियः, विभेदाय, भयं, प्रदर्शितम्, (किञ्च) शिलीमुखार्थिना, तथा, अभियुक्तं, यथा, इतरत्, न्याय्यम्, इव अवभासते ॥ ७ ॥

प्रयुज्येति ॥ 'शान्ततविनययोगि'त्यादिना साम सान्त्वम् । 'सामसान्त्वमुभे समे' इत्यमरः । प्रयुज्य नियुज्य विलोभनं प्रलोभनं 'मित्रमिष्टम्' इत्यादिनाचरितं सम्पादितम् । तथा धियो बुद्धेर्विभेदाय व्यामोहनार्थम् 'शक्तिरर्थपतिषु' इत्यादिना भयं प्रदर्शितम् । किं च शिलीमुखार्थिना । न तु न्यायार्थिनेति भावः । त्वयेति शेषः । 'नाभियोक्तुम्' इत्यादिना तथाभियुक्तं कथितं यथेतरन्न्यायादन्यत् । अन्याय्यमित्यर्थः । न्याय्यं न्यायादनपेतमिवावभासत इत्युपमा । अनेन वाग्मिनामग्रेसरोऽसीति भावः ॥ ७ ॥

ततः किमत आह—

विरोधि सिद्धेरिति कर्तुमुद्यतः स वारितः किं भवता न भूपतिः ।
हिते नियोज्यः खलु भूतिमिच्छता सहार्थनाशेन नृपोऽनुजीविना ॥८॥

अन्वयः—(किन्तु) सिद्धेः, विरोधि, इति, कर्तुम्, उद्यतः, सः, भूपतिः, भवता, किं, न, वारितः, भूतिम्, इच्छता, सहार्थनाशेन, अनुजीविना, नृपः, हिते नियोज्यः, खलु ॥ ८ ॥

विरोधीति ॥ किन्तु सिद्धेः फलस्य विरोधि विघातकमितीदमस्मदास्कन्दनरूपं कर्म कर्तुमुद्यतः स भूपतिर्महीपतिर्भवता । धुर्येणेति भावः । किं न वारितो न निवर्तितः । निवारणे हेतुमाह—भूतिमिच्छतेहामुत्र च श्रेयोर्थिना सहचरितावर्थनाशौ स्वार्थानर्थौ यस्य तेन सहार्थनाशेन । समानसुखदुःखेनेत्यर्थः । अनुजीविना भृत्येन नृपः

स्वामी हिते नियोज्यो नियम्यः खलु । अन्यथा स्वामिद्रोहपातकी श्रेयसो भ्रष्टः स्यादिति भावः ॥ ८ ॥

तर्हि नो बाणः क्व गतः, किमत्र वा न्याय्यम्, तत्राह—

ध्रुवं प्रणाशः प्रहितस्य पत्रिणः शिलोच्चये तस्य विमार्गणं नयः ।
न युक्तमत्रार्यजनातिलङ्घनं दिशत्यपायं हि सतामतिक्रमः ॥ ९ ॥

अन्वयः—प्रहितस्य, पत्त्रिणः, प्रणाशः, ध्रुवं, तस्य शिलोच्चये, विमार्गणं, नयः, अत्र, आर्यजनातिलङ्घनम्, न, युक्तम्, हि, सतां, अतिक्रमः, अपायम्, दिशति ॥ ९ ॥

ध्रुवमिति ॥ प्रहितस्य प्रयुक्तस्य पत्त्रिणः शरस्य प्रणाशोऽदर्शनं ध्रुवं निश्चितम् । प्रहितश्चेदिति भावः । तस्य नष्टस्य पत्त्रिणः शिलोच्चये शैले । 'अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः' इत्यमरः । विमार्गणमन्वेषणं नयो न्यायः । 'अन्वेषणं विचयनं मार्गणं मृगणा मृगः' इत्यमरः । अत्र विषये आर्यजनातिलङ्घनं सज्जनव्यतिक्रमो न युक्तम् । हि यस्मात्कारणात्सतामतिक्रमोऽपायमनर्थं दिशति ददाति ॥ ९ ॥

यदुक्तम् 'हर्तुमर्हसि' इति तत्रोत्तरमाह—

अतीतसंख्या विहिता ममाग्निना शिलीमुखाः खाण्डवमत्तुमिच्छता ।
अनादृतस्यामरसायकेष्वपि स्थिता कथं शैलजनाशुगे धृतिः ॥ १० ॥

अन्वयः—खाण्डवम्, अत्तुम्, इच्छता, अग्निना, मम, अतीतसङ्ख्याः, शिलीमुखाः, विहिताः, (अतः) अमरसायकेषु, अपि, अनादृतस्य (मम) कथं, शैलजनाशुगे, धृतिः, स्थिता ॥ १० ॥

अतीतेति ॥ खाण्डवमिन्द्रवनमत्तुं भक्षयितुमिच्छताग्निना ममातीतसङ्ख्या असंख्याः शिलीमुखाः शरा विहिता दत्ताः । खाण्डवदाहेऽक्षयतूणीरदानमुक्तं भारते । अतोऽमरसायकेष्वप्यनादृतस्यादररहितस्य । भावे क्तः । ततो नञ्बहुव्रीहिः । मम कथं शैलजनाशुगे किरातबाणे धृतिरास्था स्थिता । न कथञ्चिदित्यर्थः । अतो नापहारशङ्का कार्येत्यर्थः ॥ १० ॥

यदुक्तम् 'स्मर्यते तनुभृताम्' इत्यादिना सदाचारः प्रमाणमिति तत्रोत्तरमाह—

यदि प्रमाणीकृतमार्यचेष्टितं किमित्यदोषेण तिरस्कृता वयम् ।
अयातपूर्वा परिवादगोचरं सतां हि वाणी गुणमेव भाषते ॥ ११ ॥

अन्वयः—आर्यचेष्टितं, प्रमाणीकृतं, यदि, (तर्हि) अदोषेण, वयं, किमिति, तिरस्कृताः, हि, परिवादगोचरम्, अयातपूर्वा, सतां, वाणी, गुणम्, एव भाषते ॥ ११ ॥

यदीति ॥ आर्यचेष्टितं सच्चरितं प्रमाणीकृतं यदि । साधुत्वेनाङ्गीकृतं यदीत्यर्थः । तर्ह्यदोषेण दोषाभावेऽपि । 'क्वचित्प्रसज्यप्रतिषेधेऽपि नञ्समासः' इति भाष्यकारः । उपलक्षणे तृतीया । वयं किमिति निरस्कृताः । न युक्तमित्यर्थः । हि यस्मात्परिवाद-गोचरं परनिन्दास्पदमयातपूर्वा सतां वाणी गुणमेव भाषते न दोषम् । अतस्ते मृषा-वादभाषिणी न सदाचारप्रामाण्यबुद्धिरिति भाव । पूर्वं न यातेत्ययातपूर्वा । सुप्सु-पेति समासः । परत्वात्सर्वनाम्नो निष्ठायाः पूर्वनिपातः । 'स्त्रियाःपुंवत्—' इत्यादिना पुंवद्भावः पूर्वलिङ्गता च । अर्थान्तरन्यासः ॥ ११ ॥

नन्वप्रत्यक्षा परबुद्धिः कथं दुष्टेति निश्चीयते, तत्राह—

गुणापवादेन तदन्यरोपणाद्भृशाधिरूढस्य समञ्जसं जनम् ।
द्विधेव कृत्वा हृदयं निगूहतः स्फुरन्नसाधोर्विवृणोति वागसिः ॥१२॥

अन्वयः—गुणापवादेन, तदन्यरोपणात् , समञ्जसं, जनम् , भृशाधिरूढस्य, निगूहत , हृदयं, असाधो , (हृदयं) स्फुरन् , वागसि., द्विधा, कृत्वा, इव, विवृणोति ॥१२॥

गुणेति ॥ गुणापवादेन विद्यमानगुणापह्नवेन तदन्यरोपणात्तस्माद्गुणादन्यस्य दोष-स्याविद्यमानस्यैवारोपणाच्च समञ्जसं जनं सुजनं भृशाधिरूढस्यातिमात्रमाक्रम्य स्थि-तस्य । अभिक्षिप्तस्येत्यर्थः । कर्तरि क्तः । निगूहतो हृदयं संवृण्वतोऽप्यसाधोरनार्य-स्य हृदयं कर्म स्फुरन्विलसन्वागेवासिर्द्विधा कृत्वा भित्त्वेव विवृणोति । अतिदुष्टया वाचैवैतत्पूर्विकाया बुद्धेरपि दौष्ट्यमनुमीयत इति भावः । वागसिरित्यत्र रूपकं द्विधा-करणरूपकसाधकम् ॥ १२ ॥

यदुक्तम् 'अभ्यघानि' इति, तत्रोत्तरमाह—

वनाश्रयाः कस्य मृगाः परिग्रहाः शृणाति यस्तान्प्रसभेन तस्य ते ।
प्रहीयतामत्र नृपेण मानिता न मानिता चास्ति भवन्ति च श्रियः॥१३॥

अन्वयः—वनाश्रयाः, मृगाः, कस्य, परिग्रहाः, यः, तान् , प्रसभेन, शृणाति, ते, तस्य, (परिग्रहाः) अत्र, नृपेण, मानिता, प्रहीयतां, मानिता, च, अस्ति, श्रियः, च, न, भवन्ति ॥ १३ ॥

वनेति ॥ वनाश्रया अत एव मृगाः कस्य परिग्रहाः । न कस्यापीत्यर्थः । किन्तु यस्तान्मृगान्प्रसभेन बलात्कारेण शृणाति हिनस्ति । 'शृ हिंसायाम्' इति धातोर्लट् । ते मृगास्तस्य हन्तुः परिग्रहा. परिगृह्याः हन्ता चाहमेवेति भाव । ननु ममाय-मित्यभिमानान्नृपस्य स्वत्वमित्याशङ्कयाह-अत्रेति । अत्र मृगे नृपेण मानिता ममेत्यभिमानः प्रहीयतां त्यज्यताम् । कुत इत्याशङ्कयाभिमानमात्रेण स्वत्वाभावादि-त्याह-नेति । मानिता चास्ति । श्रियः स्वानि च भवन्तीति न । किंतु न भवन्त्येव ।

सत्यामभिमानितायामित्यर्थः । अभिमानमात्रेण स्वस्वेऽस्यासङ्गादिति भावः ॥१३॥

'यष्टुमिच्छसि पितॄन्' इत्यादिना यन्निष्कारणमवधीरित्युपालम्भि तत्रोत्तरमाह—

न वर्त्म कस्मैचिदपि प्रदीयतामिति व्रतं मे विहितं महर्षिणा ।
जिघांसुरस्मान्निहतो मया मृगो व्रताभिरक्षा हि सतामलङ्क्रिया॥१४॥

अन्वयः—कस्मैचित्, अपि, वर्त्म, न, प्रदीयताम्, इति, व्रतं, महर्षिणा, मे, विहितम्, अस्मात्, जिघांसुः, (अयम्) मृगः, मया, निहतः, हि, व्रताभिरक्षा, सताम्, अलङ्क्रिया ॥ १४ ॥

नेति ॥ कस्मैचिदपि वर्त्म न प्रदीयतामित्येवं व्रतं महर्षिणा व्यासेन मे मह्यं विहितम् । उपदिष्टमित्यर्थः । अस्मात्कारणाज्जिघांसुर्हन्तुमिच्छुरापतन्नभिधावन्नयं मृगो मया निहतः । हि यस्माद्व्रताभिरक्षा सतामलंक्रिया । न तु दोषः । अत आत्मरक्षणार्थमस्य वधो न निष्कारणमित्यर्थः ॥ १४ ॥

'दुर्वचं तत्' इत्यादिना यत्पंजातं बन्धुत्वमुक्तं तत्राचष्टे—

मृगान्विनिघ्नन्मृगयुः स्वहेतुना कृतोपकारः कथमिच्छतां तपः ।
कृपेति चेदस्तु मृगः क्षतः क्षणादनेन पूर्वं न मयेति का गतिः ॥१५॥

अन्वयः—स्वहेतुना, मृगान्, विनिघ्नन्, मृगयुः, तपः, इच्छतां, कथं, कृतोपकारः, चेत्, कृपा, इति, अस्तु, (परन्तु) मृगः, क्षणात्, क्षतः, अनेन, पूर्वं, (इतः) मया, (तु,) न, इति, का, गतिः ॥ १५ ॥

मृगानिति ॥ स्वमात्मैव हेतुस्तेन स्वहेतुना । स्वार्थमित्यर्थः । 'सर्वनाम्नस्तृतीया च' इति तृतीया । मृगान्विनिघ्नन्प्रहरन् । मृगान्यातीति मृगयुर्व्याधः । 'मृगयुर्व्याधश्च' इत्यौणादिको युप्रत्ययान्तो निपातः । 'व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः' इत्यमरः । तप इच्छतां तपस्विनां कथं कृतोपकारः । न कथञ्चिदित्यर्थः । अथ कृपेति चेत् । व्याधस्यापीति शेषः । अस्तु । किं शुष्ककलहेनेति भावः । परन्तु यदुक्तम् । 'निघ्नतः परनिर्बर्हितम्' इत्यादिना तस्य प्रथमप्रहर्तृत्वं तदयुक्तमित्याह—मृगः क्षणात्क्षतः । आवाभ्यां युगपदेव विद्ध इत्यर्थः । एवं सत्यनेन नृपेणैव पूर्वं हतो मया तु नेत्यत्र का गतिः किं प्रमाणम् । पौर्वापर्यस्य दुर्लक्ष्यत्वादिति भावः । तथा च यदुक्तम् 'व्रीडितव्यम्' इत्युपालम्भस्तत्तस्यैव किं न स्यादिति भावः ॥ १५ ॥

पूर्वं 'कृपेति चेदस्तु' इत्युक्तम् । सम्प्रति तदप्यसहमान आह—

अनायुधे सत्त्वजिघांसिते मुनौ कृपेति वृत्तिर्महतामकृत्रिमा ।
शरासनं बिभ्रति सज्यसायकं कृतानुकम्पः स कथं प्रतीयते ॥१६॥

अन्वयः—अनायुधे, सत्त्वजिघांसिते, मुनौ, कृपा, इति, वृत्तिः, महताम्, अकृत्रिमा, सज्यसायकम्, शरासनम्, बिभ्रति, सः, कथं कृतानुकम्पः, प्रतीयते ॥ १६ ॥

अनायुध इति ॥ अनायुधे निरायुधे सत्त्वेन केनचित्प्राणिना जिघांसिते हन्तुमिष्टे । हन्तेः सन्नन्तात्कर्मणि क्त । मुनौ विषये कृपेति वृत्तिर्व्यवहारो महतां महात्मनामकृत्रिमाऽकपटा । सह ज्यया सज्यः सायको यस्मिंस्तच्छरासनं धनुर्बिभ्रति दधति मयि स नृपः कथं कृतानुकम्पो मया प्रतीयते ज्ञायते । इणः कर्मणि लट् । अक्षमे कृपा विहिता न तु क्षम इत्यर्थः ॥ १६ ॥

अथ कृपामभ्युपगम्याह—

अथो शरस्तेन मदर्थमुज्झितः फलं च तस्य प्रतिकायसाधनम् ।
अविक्षते तत्र मयात्मसात्कृते कृतार्थता नन्वधिका चमूपतेः ॥१७॥

अन्वयः—अथो, तेन, मदर्थम्, शरः, उज्झितः, तस्य, फलम्, च, प्रतिकायसाधनम्, अविक्षते, तत्र, मयात्मसात्कृते चमूपतेः, अधिका, कृतार्थता, ननु ॥ १७ ॥

अथो इति ॥ अथो प्रश्ने । 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ' इत्यमरः तेन नृपेण मदर्थं यथा तथा । अर्थेन सह नित्यसमासः । शर उज्झितस्त्यक्तस्त्वोज्झितस्य फलं च प्रतिकायस्य प्रतिपक्षस्य साधनं वधः । 'साधनं निर्वृतौ मेढ्रे सैन्ये सिद्धौ वधे गतौ' इति विश्वः । अविक्षतेऽखण्डिते तत्र तस्मिन्सफले मयात्मसात्कृते स्वाधीनीकृते सति । 'तदधीनवचने' इति सातिप्रत्ययः । चमूपतेरधिका कृतार्थता साफल्यं ननु खलु । स्वायुधस्य परत्रागशत्रुवधपात्रप्रतिपादनार्थैकहेलया सिद्धेरित्यर्थः । तथाप्ययं शरलोभ इति कृपालुताया मूलान्यपि निकृन्ततीति भाव ॥ १७ ॥

'मार्गणैरथ तव प्रयोजनम्' इत्यादिना यदुक्तं तन्निराचष्टे—

यदात्थ कामं भवता स याच्यतामिति क्षमं नैतदनल्पचेतसाम् ।
कथं प्रसह्याहरणैषिणां प्रियाः परावनत्या मलिनीकृताः श्रियः ॥१८॥

अन्वयः—सः, कामं, भवता, याच्यताम्, इति, यत्, आत्थ, एतत्, अनल्पचेतसां, न, क्षमं, (कुतः) प्रसह्य, आहरणैषिणाम्, परावनत्या, मलिनीकृताः, श्रियः, कथं, प्रियाः ॥ १८ ॥

यदिति ॥ स नृपः कामं भवता याच्यतामिति यदात्थ । मामिति शेषः । एतदनल्पचेतसां मनस्विनां न क्षमं न युक्तम् । कुतः । प्रसह्य बलादाहरणैषिणामाहर्तुमिच्छूनाम् । 'क्षत्रियस्य विचितम्' इति स्मरणादिति भावः । परावनत्या याच्ञादैन्येन मलिनीकृताः श्रियः कथं प्रियाः । न कथञ्चिदित्यर्थः ॥ १८ ॥

अथ परेङ्गितमुद्धाक्ष्य भयं दर्शयति—

अभूतमासज्य विरुद्धमीहितं बलादलभ्यं तव लिप्सते नृपः ।
विजानतोऽपि ह्यनयस्य रौद्रतां भवत्यपाये परिमोहिनी मतिः॥१९॥

अन्वयः—तव, नृपः, अभूतम्, आसज्य, अलभ्यं, विरुद्धं, ईहितम्, बलात्, लिप्सते, हि, अनयस्य, रौद्रतां, विजानतः, अपि, (पुरुषस्य) मतिः, अपाये, परिमोहिनी, भवति ॥ १९ ॥

अभूतमिति ॥ तव नृपोऽभूतमनृतमासज्य । मिथ्याभियुज्येत्यर्थः । 'युक्ते क्ष्मादावृते भूतम्' इत्यमरः । अलभ्यं लब्धुमशक्यं विरुद्धं विपरीतफलकमीहितं मनोरथं बलाल्लिप्सते लब्धुमिच्छति । न चैतच्चित्रमित्याह—हि यस्मादनयस्य दुर्नयस्य रौद्रतां भयङ्करत्वं विजानतोऽपि पुरुषस्य मतिर्बुद्धिरपाये विनाशकाले परिमोहिनी भवति । परिमुह्यतीति परिमोहिनी । सम्पृचादिसूत्रेण ताच्छील्ये घिनुण्प्रत्ययः । प्रायेण विनाशकाले विपरीतबुद्धिर्भवतीति भावः ॥ १९ ॥

अथ सर्वथा लभ्यते शरस्तर्हि किमनेन । सुष्ठु विश्रब्धं याच्यतां शरोऽन्यद्वेत्याह—

असिः शरा वर्म धनुश्च नोच्चकैर्विविच्य किं प्रार्थितमीश्वरेण ते ।
अथास्ति शक्तिः कृतमेव याच्ञया न दूषितः शक्तिमतां स्वयङ्ग्रहः॥२०॥

अन्वयः—असिः, शरा, वर्म, उच्चकैः, धनुः, च, ते, ईश्वरेण, विविच्य, किं, न, प्रार्थितम्, अथ, (अस्य,) शक्तिः, अस्ति, याच्ञया, कृतम्, एव, शक्तिमतां स्वयंग्रहः, न, दूषितः, ॥ २० ॥

असिरिति ॥ असिः खड्गः शरा वर्म कवचमुच्चकैरुत्कृष्टं धनुश्च धनुर्वा ते तवेश्वरेण स्वामिना विविच्यैकैकशो विभज्य किं न प्रार्थितं न याचितम् । येन प्रयोजनं तद्दास्यामीति भावः । नपुंसकैकशेषः । अथास्य वीराभिमानिनो नृपस्य शक्तिरस्ति । चेदिति शेषः । याच्ञया कृतमेवालमेव साध्याभावान्न याचितव्यमेवेत्यर्थः । गम्यमानक्रियापेक्षया करणत्वात्तृतीयेत्युक्तं प्राक् । कृतमिति निषेधार्थमव्ययम् । यतः शक्तिमतां स्वयंग्रहो बलाद्ग्रहणं न दूषितं किन्तु भूषणमेव वीराणामिति भावः ॥२०॥

'राघवप्लवगराजयोरिव' इत्यादिनोपदिष्टं सख्यं प्रत्याचष्टे—

सखा स युक्तः कथितः कथं त्वया यदृच्छयासूयति यस्तपस्यते ।
गुणार्जनोच्छ्रायविरुद्धबुद्धयः प्रकृत्यमित्रा हि सतामसाधवः ॥२१॥

अन्वयः—सः, कथं, त्वया, युक्तः, सखा, कथितः, यः, तपस्यते, यदृच्छया, असूयति, हि, गुणार्जनोच्छ्रायविरुद्धबुद्धयः, असाधवः, सतां, प्रकृत्यमित्राः ॥ २१ ॥

सखेति ॥ स नृपः कथं त्वया युक्तो योग्यः सखा कथितः । न कथञ्चित्कथनीय इत्यर्थः। कुतः। यो नृपस्तपस्यते तपश्चरते। अनपराधिन इत्यर्थः । 'क्रुधद्रुह-' इत्यादिना सम्प्रदानत्वाच्चतुर्थी। यदृच्छया स्वैरवृत्त्या। 'यदृच्छा स्वैरिता' इत्यमरः। असूयत्यसूयां करोति। 'असूया तु दोषारोपो गुणेष्वपि' इत्यमरः। प्रत्युत शत्रुरेवायमित्याह—हि यस्माद्गुणानामर्जने य उच्छ्राय उत्कर्षस्तस्य विरुद्धा विमुखा बुद्धिर्येषां ते तथाऽसाधवो दुष्टाः सतां सज्जनानां प्रकृत्यमित्राः प्रकृत्या शत्रवः। 'द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः' इत्यमरः ॥ २१ ॥

हीनजातिवृत्तित्वात्सख्यानर्हः स इत्याह—

वयं क्व वर्णाश्रमरक्षणोचिताः क्व जातिहीना मृगजीवितच्छिदः।
सहापकृष्टैर्महतां न सङ्गतं भवन्ति गोमायुसखा न दन्तिनः॥२२॥

अन्वयः—वर्णाश्रमरक्षणोचिताः, वयं, क्व, जातिहीनाः, मृगजीवितच्छिदः, क्व, अपकृष्टैः, सह, महतां, सङ्गतं, न, (हि) दन्तिनः, गोमायुसखाः, न, भवन्ति ॥२२॥

वयमिति ॥ वर्णाश्रमरक्षणोचिता विशुद्धवृत्त्यो वयं राजानः क्व। जातिहीना मृगजीवितच्छिदो हिंसाजीविनो व्याधाः क्व। फलितमाह—अपकृष्टैरुत्करीत्या जात्या वृत्त्या च निकृष्टैः सह महतां ताभ्यामेवोत्कृष्टानां सङ्गतं सख्यं न। घटत इति शेषः। तथाहि। दन्तिनो गजा गोमायूनां शृगालानां सखायो गोमायुसखा न भवन्ति। 'स्त्रियां शिवा भूरिमायगोमायुमृगधूर्तकाः। शृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः॥' इत्यमरः। अत्र विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ २२ ॥

नीचसख्यं कथमधिक्षिप्यत इति चेत्तत्राह--

परोऽवजानाति यदज्ञताजडस्तदुन्नतानां न विहन्ति धीरताम्।
समानवीर्यान्वयपौरुषेषु यः करोत्यतिक्रान्तिमसौ तिरस्क्रिया॥२३॥

अन्वयः—अज्ञताजडः, परः, अवजानाति, यत्, तत्, उन्नतानां, धीरतां, न, विहन्ति, समानवीर्यान्वयपौरुषेषु, यः, अतिक्रान्तिं, करोति, असौ, तिरस्क्रिया ॥२३॥

पर इति ॥ अज्ञताजडो मोहान्धः परोऽवजानाति यत्तदवज्ञानमुन्नतानां महतां धीरतां निर्विकारचित्तत्वं न विहन्ति। न विकारं जनयतीत्यर्थः। क्रोष्टेव सिंहस्येति भावः। किन्तु समानानि तुल्यानि वीर्यान्वयपौरुषाणि शक्तिकुलविक्रमा येषां तेषु मध्ये। निर्धारणे सप्तमी। यः कश्चिदित्यर्थः। अतिक्रान्तिमतिक्रमं करोति चेदसौ सदृशजनातिक्रमस्तिरस्क्रिया तिरस्कारः। यथा सिंहे सिंहस्येति भावः ॥ २३ ॥

तर्हि नीचे कीदृशी वृत्तिरित्याशङ्क्य सोपपत्तिकमाह—

यदा विगृह्णाति हतं तदा यशः करोति मैत्रीमथ दूषिता गुणाः ।
स्थितिं समीक्ष्योभयथा परीक्षकः करोत्यवज्ञोपहतं पृथग्जनम् ॥२४॥

अन्वयः—यदा, विगृह्णाति, तदा, यशः, हतं, अथ, मैत्रीं, करोति, (तदा) गुणाः, दूषिताः, इति, उभयथा, स्थितिं, समीक्ष्य, परीक्षकः । पृथग्जनम् , अवज्ञोपहतं करोति ॥ २४ ॥

यदेति ॥ यदा विगृह्णाति विरुणद्धि । पृथग्जनेनेति शेषः । तदा यशो हतं नाशितं भवेत् । अथ मैत्रीं करोति तदा गुणा दूषिताः । भवेयुरिति शेषः । इत्युभयथा स्थिति समीक्ष्य प्रतर्क्य विमृश्य परीक्षको विवेचकः पृथग्जनं नीचजनमवज्ञयानादरेणोपहतं तिरस्कृतं करोति । उपेक्षत इत्यर्थः ॥ २४ ॥

उपसंहरन्नाह—

मया मृगान्हन्तुरनेन हेतुना विरुद्धमाक्षेपवचस्तितिक्षितम् ।
शरार्थमेष्यत्यथ लप्स्यते गतिं शिरोमणिं दृष्टिविषाज्जिघृक्षतः ॥२५॥

अन्वयः—अनेन, हेतुना, मया, मृगान्, हन्तुः, विरुद्धं, आक्षेपवचस्तितिक्षितम् , अथ, शरार्थम् , एष्यति, दृष्टिविषात्, शिरोमणिं, जिघृक्षतः, गतिं, लप्स्यते ॥ २५ ॥

मयेति ॥ अनेन हेतुना सन्धिविग्रहानर्हत्वेन कारणेन मया मृगान्हन्तुर्व्याधस्य सम्बन्धि । हन्तेस्तृन्प्रत्ययः । अत एव 'न लोक—' इत्यादिना षष्ठीप्रतिषेधः । विरुद्धमतिपरुषमाक्षेपवचस्तिरस्कारवचनं तितिक्षितं सोढम् । ननु सवयानङ्गीकारे बलाच्छरं ग्रहीष्यतीत्याशङ्क्याह—शरेति । अथ शरार्थमेष्यति दृष्टौ विषं यस्य तस्मात् दृष्टिविषात्सर्पविशेषाच्छिरोमणि जिघृक्षतो ग्रहीतुमिच्छतो गतिं दशां लप्स्यते प्राप्स्यति ॥ २५ ॥

इतीरिताकूतमनीलवाजिनं जयाय दूतः प्रतितर्ज्य तेजसा ।
ययौ समीपं ध्वजिनीमुपेयुषः प्रसन्नरूपस्य विरूपचक्षुषः ॥२६॥

अन्वयः—इति, ईरिताकूतम् , अनीलवाजिनम्, दूतः, जयाय, तेजसा, प्रतितर्ज्य ध्वजिनीम् , उपेयुषः, प्रसन्नरूपस्य, विरूपचक्षुषः, समीपं, ययौ ॥ २६ ॥

इतीति ॥ इतीत्थमीरिताकूतमुक्ताभिप्रायमनीलवाजिनं श्वेताश्वमर्जुनं दूतो जयाय तेजसा प्रतापेन प्रतितर्ज्य । अस्मानजित्वा क्व गमिष्यसीति भीषयित्वेत्यर्थः । ध्वजिनीमुपेयुषः सेनासङ्गतस्य प्रसन्नरूपस्य । अर्जुनं प्रतीति शेषः । विरूपचक्षुषस्त्र्यम्बकस्य समीपं ययौ ॥ २६ ॥

ततोऽपवादेन पताकिनीपतेश्चचाल निर्ह्रादवती महाचमूः ।
युगान्तवाताभिहतेव कुर्वती निनादमम्भोनिधिवीचिसंहतिः ॥२७॥

अन्वयः—ततः, पताकिनीपतेः, अपवादेन, निर्ह्रादवती, महाचमूः, युगान्तवाताभिहता, निनादं, कुर्वती, अम्भोनिधिवीचिसंहतिः, इव, चचाल ॥ २७ ॥

तत इति ॥ ततः पताकिनीपतेः सेनापतेरपवादेनादेशेन । 'अपवादोऽप्ययमादेशः' इति सज्जन. । निर्ह्रादवती शब्दवती महाचमूः सेना युगान्तवातरभिहता आन्दोलिता अत एव निनादं कुर्वत्यम्भोनिधिवीचिसंहतिरर्णवोर्मिसमूह इव चचाल ॥ २७ ॥

रणाय जैत्रः प्रदिशन्निव त्वरां तरङ्गितालम्बितकेतुसन्ततिः ।
पुरो बलानां सघनाम्बुशीकरः शनैः प्रतस्थे सुरभिः समीरणः॥२८॥

जैत्रः, तरङ्गितालम्बितकेतुसन्ततिः, सघनाम्बुशीकरः, सुरभिः, समीरणः, रणाय, त्वरां प्रदिशन्, इव, बलानां, पुरः, शनैः प्रतस्थे ॥ २८ ॥

रणायेति ॥ जेतैव जैत्रो जयनशीलः । अनुकूल इत्यर्थः । जयतेस्तृन्नन्तात्प्रज्ञादित्वात्स्वार्थेऽण्प्रत्ययः । तरङ्गितं सञ्जाततरङ्गं यथा तथालम्बिता अवस्थिताः केतुसन्ततयो येन सः सह घनैः सान्द्रैरम्बुशीकरैः सघनाम्बुशीकरः सुरभिः सुगन्धः समीरणो वायू रणाय त्वरां प्रदिशन्निव त्वरयन्निव बलानां सैन्यानां पुरोऽग्रे शनैः प्रतस्थे प्रस्थितः । ववावित्यर्थः ॥ २८ ॥

जयारवक्ष्वेडितनादमूर्च्छितः शरासनज्यातलवारणध्वनिः ।
असम्भवन्भूधरराजकुक्षिषु प्रकम्पयन्गामवतस्तरे दिशः ॥ २९ ॥

अन्वयः—जयारवक्ष्वेडितनादमूर्च्छितः, शरासनज्यातलवारणध्वनिः, भूधरराजकुक्षिषु, असम्भवन्, गां, प्रकम्पयन्, दिशः, अवतस्तरे ॥ २९ ॥

जयेति ॥ जयारवैर्बन्दिनां जयजयेतिशब्दैः क्ष्वेडितनादैः सिंहनादैश्च मूर्च्छितो वर्धितः शरासनज्यानां धनुर्गुणानां तलवारणानां ज्याघातवारणानां च ध्वनिर्भूधरराजकुक्षिषु गिरिगुहास्वसम्भवन्नमान् । अवकाशमलभमान इत्यर्थः । अत एव गां भुवं प्रकम्पयन् । एतेन बलानां बाहुल्यमुक्तम् । दिशोऽवतस्तरे व्याप्तवान् । 'ऋतश्च संयोगादेर्गुणः' । अत्र मूर्च्छापदार्थस्य विशेषणगत्यासम्भवनहेतुत्वात्काव्यलिङ्गभेदः, गिरिकुक्षिरूपापेक्षया ध्वनेराधेयस्याधिक्योक्तेरधिकालङ्कारश्च । तेऽमन्योन्यमसम्भवन्निति व्यञ्जकं विनोत्प्रेक्ष्यमानोपात्तमूर्च्छागुणनिमित्ता प्रतीयमाना क्रियोत्प्रेक्षा । तैरङ्गाङ्गिभावेन सङ्कीर्यत इति सङ्करः ॥ २९ ॥

निशातरौद्रेषु विकासतां गतैः प्रदीपयद्भिः ककुभामिवान्तरम् ।
वनेसदां हेतिषु भिन्नविग्रहैर्विपुस्फुरे रश्मिमतो मरीचिभिः ॥३०॥

अन्वयः—निशातरौद्रेषु, वनेसदां, हेतिषु, भिन्नविग्रहैः विकासतां गतैः, ककुभां अन्तरं, प्रदीपयद्भिः, इव, (स्थितैः) रश्मिमतः, मरीचिभिः, विपुस्फुरे ॥ ३० ॥

निशातेति ॥ निशातास्तीक्ष्णा अत एव रौद्रा भीषणाश्च ये तेषु निशातरौद्रेषु । विशेष्यविशेषणयोरन्यतरविशेष्यत्वविवक्षायामिष्टत्वाद्विशेषणसमासः । वने सीदन्तीति वनेसदां वनेचराणाम् । 'सत्सूद्विष—' इत्यादिना क्विप् । 'तत्पुरुषे कृति बहुलम्' इत्यलुक् । हेतिष्वायुधेषु । 'हेतिः शस्त्रेऽपि पुंस्त्रियोः' इति केशवः । भिन्नविग्रहैः संक्रान्तमूर्तिभिरत एव विकासतां विसृत्वरतां गतैरत एव ककुभां दिशामन्तरमवकाशं प्रदीपयद्भिः प्रज्वालयद्भिरिव स्थितैरित्युत्प्रेक्षा । रश्मिमतः सूर्यस्य । 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः' इति मतुपो मकारस्य न वकारः । मरीचिभिः करैः । 'भानु करो मरीचिः स्त्रीपुंसयोः' इत्यमरः । विपुस्फुरे बभासे । स्फुरतेर्भावे लिट् ॥ ३० ॥

उदूढवक्षःस्थगितैकदिङ्मुखो विकृष्टविस्फारितचापमण्डलः ।
वितत्य पक्षद्वयमायतं बभौ विभुर्गुणानामुपरीव मध्यगः ॥३१॥

अन्वयः—उदूढवक्षःस्थगितैकदिङ्मुखः, विकृष्टविस्फारितचापमण्डलः, विभुः, आयतं, पक्षद्वयं, वितत्य, गुणानां मध्यगः, उपरि, (स्थितः) इव, बभौ ॥ ३१ ॥

उदूढेति । उदूढेनोन्नतेन वक्षसा स्थगितमाच्छादितमेकमेकतरं दिङ्मुखं येन सः । विकृष्टमाकृष्टमत एव विस्फारितं निर्घोषितं चापमण्डलं येन स विभुः शिवः । आयतं विस्तृतं पक्षद्वयं पार्श्वद्वयं वितत्य स्वमहिम्ना व्याप्य । 'पक्षः साध्यगरुत्पार्श्वसहायबलभित्तिषु' इति वैजयन्ती । गुणानां मध्यगो मध्यस्थोऽप्युपरि स्थित इव बभौ । सर्वोन्नतत्वात्तथा लक्षित इत्यर्थः ॥ ३१ ॥

सुगेषु दुर्गेषु च तुल्यविक्रमैर्जवादहंपूर्विकया यियासुभिः ।
गणैरविच्छेदनिरुद्धमाबभौ वनं निरुच्छ्वासमिवाकुलाकुलम् ॥३२॥

अन्वय.—सुगेषु, दुर्गेषु, च, तुल्यविक्रमैः, जवात्, अहंपूर्विकया, यियासुभि, गणैः, अविच्छेदनिरुद्धम्, आकुलाकुलं, वनं, निरुच्छ्वासम्, इव आबभौ ॥३२॥

सुगेष्विति ॥ सुखेन दुःखेन च गच्छन्त्येष्विति सुगेषु सुगमेषु दुर्गेषु दुर्गमेषु च । समविषमदेशेष्वित्यर्थः । सुदुरोरधिकरणार्थे डो वक्तव्यः । अत एव टिलोपः । तुल्यविक्रमैर्लाघवात्समसञ्चारैर्जवाद्वेगादहंपूर्विकयाहमहमिकया । 'अहंपूर्वमहंपूर्वमित्यहंपूर्विका स्त्रियाम्' इत्यमरः । यियासुभिर्यातुमिच्छुभिः । यातेः सन्नन्तादुप्रत्ययः । गणैः प्रमथैः । मनोज्ञादित्वाद्वुञ्प्रत्ययः । पृषोदरादित्वाद्वृद्ध्यभावः । अवि-

च्छेदेन निरुद्धमत एवाकुलाकुलमाकुलप्रकारम्। 'प्रकारे गुणवचनस्य' इति द्विर्भावः। वनं निरुच्छ्वासं निरुद्धप्राणमिवाभवमाविरित्युत्प्रेक्षा ॥ ३२ ॥

तिरोहितश्वभ्रनिकुञ्जरोधसः समश्नुवानाः सहसातिरिक्तताम्।
किरातसैन्यैरपिधाय रेचिता भुवः क्षणं निम्नतयेव भेजिरे ॥३३॥

अन्वयः—किरातसैन्यैः, तिरोहितश्वभ्रनिकुञ्जरोधसः, भुवः, सहसातिरिक्तताम्, समश्नुवानाः, अपिधाय, रेचिता, क्षणं, निम्नतया, भेजिरे, इव ॥ ३३ ॥

तिरोहितेति ॥ किरातसैन्यैस्तिरोहितानि छन्नानि श्वभ्रनिकुञ्जरोधांसि गर्तकुञ्जतटानि यासां ताः। अत एव भुवः प्रदेशाः सहसातिरिक्ततामुत्तानतां समश्नुवाना आप्नुवत्यः। तथा अपिधायाच्छाद्य रेचिता रिक्तीकृता मुक्ताः क्षणं निम्नतया गाम्भीर्येण भेजिर इव प्राप्ता इवेत्युत्प्रेक्षा। सैन्यैर्व्याप्ता भुवो व्याप्तास्ता उत्ताना: प्रतीयन्ते। तैर्मुक्तास्ता एव निम्नाः प्रतीयन्त इत्यर्थः ॥ ३३ ॥

पृथूरुपर्यस्तबृहल्लताततिर्जवानिलाघूर्णितशालचन्दना।
गणाधिपानां परितः प्रसारिणी वनान्यवाञ्चीव चकार संहतिः॥३४॥

अन्वयः—पृथूरुपर्यस्तबृहल्लताततिर्जवानिलाघूर्णितशालचन्दना, परितः, प्रसारिणी, गणाधिपानां, संहतिः, वनानि, अवाञ्चि, इव चकार ॥ ३४ ॥

पृथ्विति ॥ पृथुभिर्विशालैरूरुभिः सक्थिभिः पर्यस्ताः क्षिप्ता बृहत्यो लताततयो यया सा जवानिलेन वेगमारुतेनाघूर्णिता भ्रामिताः शाला सर्जतरवश्चन्दनानि च यया सा। 'प्राकारवृक्षयोः शालः सालःसर्जतरुः स्मृत 'इति शाश्वतः। परितः सर्वत्र प्रसारिणी प्रसरणशीला गणाधिपानां संहतिः समूहो वनान्यवाञ्चि न्युब्जानीव चकारेत्युत्प्रेक्षा। अवाञ्चत्यधोमुखीभवति। अवपूर्वादञ्चतेः क्विप्। 'स्यादवाङप्यधोमुख' इत्यमरः ॥३४॥

अथाष्टभिः श्लोकैरर्जुनं विशेषयन्गणानां तदभियोगमाह—तत इत्यादिना ॥

ततः सदर्पं प्रतनुं तपस्यया मदस्रुतिक्षाममिवैकवारणम्।
परिज्वलन्तं निधनाय भूभृतां दहन्तमाशा इव जातवेदसम् ॥३५॥

अन्वयः—ततः, सदर्पं, तपस्यया, प्रतनुं, मदस्रुतिक्षामम्, एकवारणम्, इव, भूभृतां, निधनाय, परिज्वलन्तम्, आशाः, दहन्तम्, जातवेदसम्, इव ॥ ३५ ॥

तत इति ॥ ततः सदर्पं सगर्वं सान्तःसारं तपस्यया तपश्चर्यया। तपस्यतेः क्यजन्तात्स्त्रियामप्रत्यये टाप्। प्रतनुं कृशमत एव मदस्रुत्या मदक्षरणेन क्षामं कृशम्। 'क्षायो मः' इति निष्ठातकारस्य मकारः। एकवारणमेकाकिनं गजमिव स्थितमित्युपमा। पुनः। भूभृतां राज्ञां निधनाय नाशाय परिज्वलन्तं तेजस्विनमत एवाशा दिशो

दहन्तं जातवेदसमग्निमिव स्थितमित्युपमालङ्कारः । 'कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात्' इत्यमरः ॥ ३५ ॥

अनादरोपात्तधृतैकसायकं जयेऽनुकूले सुहृदीव सस्पृहम् ।
शनैरपूर्णप्रतिकारपेलवे निवेशयन्तं नयने बलोदधौ ॥ ३६ ॥

अन्वयः—अनादरोपात्तधृतैकसायकम् अनुकूले, सुहृदि, इव, जये, सस्पृहम् , अपूर्णप्रतिकारपेलवे, बलोदधौ, शनैः, नयने, निवेशयन्तम् ॥ ३६ ॥

अनादरेति ॥ पुनश्च । अनादरेणावगणनयोपात्तो निषङ्गादुद्धृतो धृतश्चैकः सायको येन तं, तथानुकूले सुहृदीव जये सस्पृहम् । जयमिच्छन्तमित्यर्थः । पुनश्च । अपूर्णो न्यूनः प्रतिकारो बाणाहरणप्रत्यर्पणरूपो यस्य सः । अत एव पेलवो लघुस्तस्मिन्नपूर्णप्रतिकारपेलवे बलोदधौ सेनासमुद्रे शनैरसम्भ्रमेण नयने दृष्टी निवेशयन्तमिति वीरस्वभावोक्तिः । बलमुदधिरिवेत्युपमितसमासः । 'पेषंवासवाहनधिषु च' इत्युदकस्योदादेशः ॥ ३६ ॥

निषण्णमापत्प्रतिकारकारणे शरासने धैर्य इवानपायिनि ।
अलङ्घनीयं प्रकृतावपि स्थितं निवातनिष्कम्पमिवापगापतिम् ॥३७॥

अन्वयः—आपत्प्रतिकारकारणे, अनपायिनि, शरासने, धैर्ये, इव, निषण्णं प्रकृतौ, स्थितम् , अपि, अलङ्घनीयं, निवातनिष्कम्पम् , आपगापतिम् , इव ॥ ३७ ॥

निषण्णमिति ॥ पुनश्च । आपदां प्रतिकारस्य कारणे साधनेऽनपायिनि स्थिरे शरासन एवम्भूते धैर्य इव निषण्णं स्थितं प्रकृतौ स्वभावे स्थितमपि । निर्विकारमपीत्यर्थः । अत एवालङ्घनीयमनतिक्रमणीयमत एव निवातनिष्कम्पं वाताभावान्निश्चलम् । 'निवातावाश्रयावातौ' इत्यमरः । आपगापतिं समुद्रमिव स्थितम् ॥ ३७ ॥

उपेयुषीं बिभ्रतमन्तकद्युतिं वधाददूरे पतितस्य दंष्ट्रिणः ।
पुरः समावेशितसत्पशुं द्विजैः पतिं पशूनामिव हूतमध्वरे ॥३८॥

अन्वयः—अदूरे, पतितस्य, दंष्ट्रिणः, वधात्, उपेयुषीं, अन्तकद्युतिं, बिभ्रतम् , द्विजैः, अध्वरे, हूतम् , पुरः समावेशितसत्पशुं, पशूनाम् , पतिम् , इव ॥ ३८ ॥

उपेयुषीमिति ॥ पुनश्च । अदूरे समीपे पतितस्य दंष्ट्रिणो वराहस्य । व्रीह्यादित्वादिनिप्रत्ययः । वधाद्धेतोरुपेयुषीं प्राप्तामन्तकस्येव यमस्येव द्युतिस्तां बिभ्रतं धारयन्तम् । तथा च द्विजैर्ब्राह्मणैरध्वरे यज्ञे । 'यज्ञः सवोऽध्वरो यागः' इत्यमरः । हूतमाहूतं पुरोऽग्रे समावेशितः स्थापितः सत्पशुर्यज्ञियपशुर्यस्य तं पशूनां पतिं रुद्रमिव स्थितम् ॥ ३८ ॥

निजेन नीतं विजितान्यगौरवं गभीरतां धैर्यगुणेन भूयसा ।
वनोदयेनेव घनोरुवीरुधा समन्धकारीकृतमुत्तमाचलम् ॥ ३९ ॥

अन्वयः—निजेन, भूयसा, धैर्यगुणेन, विजितान्यगौरवं, तथा गभीरतां, नीतम्, घनोरुवीरुधा, वनोदयेन, समन्धकारीकृतम्, उत्तमाचलम्, इव ॥ ३९ ॥

निजेनेति । पुनश्च । निजेन नैसर्गिकेण भूयसा बहुलेन धैर्यमेव गुणस्तेन विजितमन्येषां गौरवं गाम्भीर्यं यस्मिन्कर्मणि तथा गभीरतां दुरवगाहत्वं नीतम् । अत एव घनाः सान्द्रा उरवश्च महत्यो वीरुधो लताश्च यस्मिंस्तेन घनोरुवीरुधा वनोदयेनारण्यप्रादुर्भावेन समन्धकारीकृतं दुरवगाहीकृतमुत्तमाचलमिव स्थितम् । समन्ततोऽन्धकारो यस्य स इति विग्रहः ॥ ३९ ॥

महर्षभस्कन्धमनूनकन्धरं बृहच्छिलावप्रघनेन वक्षसा ।
समुज्जिहीर्षुं जगतीं महाभरां महावराहं महतोऽर्णवादिव ॥४०॥

अन्वयः—महर्षभस्कन्धम्, अनूनकन्धरम्, बृहच्छिलावप्रघनेन, वक्षसा, महाभरां, जगतीं, समुज्जिहीर्षुं, महतः, अर्णवात्, महावराहम्, इव (स्थितम्) ॥४०॥

महर्षभेति ॥ महर्षभस्य महावृषभस्य स्कन्ध इव स्कन्धावंसौ यस्य तम् । उपमानपूर्वपदत्वादुत्तरस्कन्धलोपः । 'ऋषभो वृषभो वृषः' इत्यमरः । 'स्कन्धो भुजशिरोंऽसोऽस्त्री' इत्यमरः । अनूनकन्धरं स्थूलग्रीवम् । 'अथ ग्रीवायां शिरोधिः कन्धरेत्यपि' इत्यमरः, बृहच्छिलावप्रं महाशिलातटं तद्वद्घनेन कठिनेन वक्षसोपलक्षितम् । महाभरां दुष्टैरतिभारवतीं जगतीं महीं समुज्जिहीर्षुं दुष्टराजकार्णवात्समुद्धर्तुमिच्छुम् । अत एव महतोऽर्णवाज्जगतीं समुज्जिहीर्षुमुक्तविशेषणविशिष्टं च महावराहमिव स्थितम् । अर्थसाधर्म्यादियमुपमा न श्लेषः शब्दमात्रसाधर्म्येण तस्य विधानादिति रहस्यम् ॥ ४० ॥

हरिन्मणिश्याममुदग्रविग्रहं प्रकाशमानं परिभूय देहिनः ।
मनुष्यभावे पुरुषं पुरातनं स्थितं जलादर्श इवांशुमालिनम् ॥४१॥

अन्वयः—हरिन्मणिश्यामम्, उदग्रविग्रहम्, देहिनः, परिभूय, प्रकाशमानं, जलादर्शे, अंशुमालिनम्, इव, मनुष्यभावे, स्थितं, पुरातनं, पुरुषम् ॥ ४१ ॥

हरिदिति ॥ पुनश्च । हरिन्मणिश्यामं मरकतमणिश्याममुदग्रविग्रहमुदारमूर्तिं देहिनः सत्त्वान्परिभूय तिरस्कृत्य प्रकाशमानम् । जलमेवादर्शो मुकुरस्तस्मिन्नंशुमालिनं सूर्यमिव । मनुष्यभावे मनुष्यरूपे स्थितं पुरातनं पुरुषम् । यो बदरीतपोवननिवासी नारायणसहचरो नरो नाम स एवायमित्यर्थः ॥ ४१ ॥

गुरुक्रियारम्भफलैरलङ्कृतं गतिं प्रतापस्य जगत्प्रमाथिनः ।
गणाः समासेदुरनीलवाजिनं तपात्यये तोयघना घना इव ॥४२॥

अन्वयः—गुरुक्रियारम्भफलैः, अलङ्कृतं, जगत्प्रमाथिनः, प्रतापस्य, गतिं, अनीलवाजिनं, गणाः, तपात्यये, तोयघनाः, घना, इव, समासेदुः ॥ ४२ ॥

गुर्विति । गुरुभिः क्रियारम्भाणां फलैरलंकृतम् । सफलकर्मारम्भमित्यर्थः । जगत्प्रमाथिनो जगद्विजयिनः प्रतापस्य तेजसो गतिं स्थानम् । अतोऽस्य बहूनामेकलक्ष्यत्वं च युज्यत इति सन्दर्भाभिप्रायः । पूर्वोक्तविशेषणविशिष्टमनीलवाजिनं श्वेताश्वमर्जुनं गणाः, प्रमथास्तपात्यये तोयघनास्तोयभरिताः । वार्षिका इत्यर्थः । घना मेघा इव । महाचलमिति शेषः समासेदुः । अवापुरित्यर्थः ॥ ४२ ॥

यथास्वमाशंसितविक्रमाः पुरा मुनिप्रभावक्षततेजसः परे ।
ययुः क्षणादप्रतिपत्तिमूढतां महानुभावः प्रतिहन्ति पौरुषम् ॥४३॥

अन्वयः—पुरा, यथास्वम्, आशंसितविक्रमाः, परे, मुनिप्रभावक्षततेजसः, क्षणात् अप्रतिपत्तिमूढतां, ययुः, महानुभावः, पौरुषम्, प्रतिहन्ति ॥ ४३ ॥

यथास्वमिति । पुरा पूर्वं स्वं स्वमनतिक्रम्य यथास्वमहमेवैनं जेष्यामीत्याशंसिताः काङ्क्षिताः कथिता वा विक्रमा यस्तैः परे शत्रवो मुनिप्रभावात्क्षततेजसो हतप्रभावाः सन्तः क्षणादप्रतिपत्तिमूढतामज्ञानमोहान्वतां ययुः । तथा हि । महानुभावोऽतिप्रतापः पौरुषं पुरुषस्य चेष्टितं प्रतिहन्ति नाशयति ॥ ४३ ॥

ततः प्रजह्रे सममेव तत्र तैरपेक्षितान्योन्यबलोपपत्तिभिः ।
महोदयानामपि सङ्घवृत्तितां सहायसाध्याः प्रदिशन्ति सिद्धयः ॥४४॥

अन्वयः—ततः, अपेक्षितान्योन्यबलोपपत्तिभिः, तैः, तत्र, समम्, एव, प्रजह्रे, सहायसाध्याः, सिद्धयः, महोदयानाम्, अपि, सङ्घवृत्तितां प्रदिशन्ति ॥ ४४ ॥

तत इति ॥ तत एकैकस्याशक्तावपेक्षिता वाञ्छितान्योन्यबलोपपत्तिरन्योन्यशक्त्यवष्टम्भो यस्तैः प्रमथैस्तत्रार्जुने । क्रियाधारत्वात्सप्तमी । समं युगपदेव प्रजह्रे प्रहृतम् । भावे लिट् । तथा हि । सहायसाध्याः सिद्धयः कार्यसिद्धयो महोदयानां महानुभावानामपि । सङ्घेन वृत्तिर्व्यापारो येषां तेषां भावस्तत्ता तां सङ्घवृत्तितां सम्भूयकारितां प्रदिशन्ति । अतो गणानामपि सम्भूयकारित्वं न दोष इति भावः॥४४॥

किरातसैन्यादुरुचापनोदिताः समं समुत्पेतुरुपात्तरंहसः ।
महावनादुन्मनसः खगा इव प्रवृत्तपत्रध्वनयः शिलीमुखाः ॥४५॥

अन्वयः—उरुचापनोदिताः, उपात्तरंहसः, प्रवृत्तपत्रध्वनयः, शिलीमुखाः, महावनात्, उन्मनसः, खगाः, इव, किरातसैन्यात्, समं, समुत्पेतुः ॥ ४५ ॥

किराततेति ॥ उरुभिर्दृढैश्चापैर्नोदिताः प्रक्षिप्ता उपात्तरंहसः प्राप्तवेगाः प्रवृत्तपत्रध्वनयः सञ्जातपक्षस्वनाः शिलीमुखा बाणाः। महावनादुन्मनसः क्वापि गन्तुमुत्सुकास्तथोक्तविशेषणविशिष्टाश्च खगाः पक्षिण इव। किरातसैन्यात्समं समन्ततः समुत्पेतुः ॥ ४५ ॥

गभीररन्ध्रेषु भृशं महीभृतः प्रतिस्वनैरुन्नमितेन सानुषु।
धनुर्निनादेन जवादुपेयुषा विभिद्यमाना इव दध्वनुर्दिशः ॥४६॥

अन्वयः—गभीररन्ध्रेषु, महीभृतः, सानुषु, प्रतिस्वनैः, भृशं, उन्नमितेन, जवात्, उपेयुषा, धनुर्निनादेन, दिशः, विभिद्यमानाः, इव, दध्वनुः ॥ ४६ ॥

गभीरेति ॥ गभीररन्ध्रेषु गम्भीरगह्वरेषु महीभृतः सानुषु ये प्रतिस्वनास्तैर्भृशमुन्नमितेनोत्थापितेन दीर्घीकृतेन जवादुपेयुषा प्राप्तवता धनुषां निनादेन दिशो विभिद्यमाना विदीर्यमाणा इव दध्वनुर्ध्वनिं चक्रुः ॥ ४६ ॥

विधूनयन्ती गहनानि भूरुहां तिरोहितोपान्तनभोदिगन्तरा।
महीयसी वृष्टिरिवानिलेरिता रवं वितेने गणमार्गणावलिः ॥४७॥

अन्वयः—भूरुहां, गहनानि, विधूनयन्ती, तिरोहितोपान्तनभोदिगन्तरा, गणमार्गणावलिः, अनिलेरिता, महीयसी, वृष्टिः, इव, रवं वितेने ॥ ४७ ॥

विधूनयन्तीति। भूरुहां गहनानि वनानि। 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः। विधूनयन्ती कम्पयन्ती तिरोहितानि च्छादितान्युपान्तानि प्रान्तानि नभोऽन्तरिक्षं दिगन्तराणि च यया सा गणमार्गणावलिः प्रमथशरसंहतिरनिलेन वायुनेरिता प्रेरिता महीयसी वृष्टिरिव रवं वितेने विस्तारयामास ॥ ४७ ॥

त्रयीमृतूनामनिलाशिनः सतः प्रयाति पोषं वपुषि प्रहृष्यतः।
रणाय जिष्णोर्विदुषेव सत्वरं घनत्वमीये शिथिलेन वर्मणा ॥४८॥

अन्वयः—ऋतूनाम्, त्रयीं, अनिलाशिनः, सतः, रणाय, प्रहृष्यतः, जिष्णोः, वपुषि, पोषं, प्रयाति, शिथिलेन, वर्मणा, विदुषेव, सत्वरं, घनत्वम्, ईये ॥ ४८ ॥

त्रयीमिति ॥ ऋतूनां त्रयीं षण्मासान्। कालाध्वनोरत्यन्तसंयोगे द्वितीया। अनिलाशिनो वायुभक्षकस्य। कृशस्येत्यर्थः। सतस्तथापि रणाय रणं कर्तुं प्रहृष्यत उत्सहमानस्य। 'क्रियार्थोप—' इत्यादिना चतुर्थी। जिष्णोरर्जुनस्य वपुषि पोषमुपचयं प्रयाति गच्छति सति शिथिलेन। प्रथममिति शेषः। वर्मणा कवचेन विदुषेवाभ्यास-

करणीयं जानतेवेत्युत्प्रेक्षा । सत्वरं शीघ्रं धनत्वं दृढत्वमीये प्रापम् । अन्यथानुपयोगादिति भावः । इणः कर्मणि लिट् ॥ ४८ ॥

पतत्सु शस्त्रेषु वितत्य रोदसी समन्ततस्तस्य धनुर्दुधूषतः ।
सरोषमुल्केव पपात भीषणा बलेषु दृष्टिर्विनिपातशंसिनी ॥४९॥

अन्वयः— शस्त्रेषु, रोदसी, समन्ततः, वितत्य, पतत्सु, धनुः, दुधूषतः, तस्य, भीषणा, विनिपातशंसिनी, दृष्टिः, उल्का, इव, बलेषु, सरोषं पपात ॥ ४९ ॥

पतत्स्विति ॥ शस्त्रेषु रोदसी द्यावापृथिव्यौ । 'द्यावापृथिव्यौ रोदस्यौ' इत्यमरः । समन्ततो वितत्य व्याप्य पतत्सु सत्सु धनुर्दुधूषतः कम्पितुमिच्छतः । आस्फालयत इत्यर्थः । धूञः सन्नन्ताच्छतृप्रत्ययः । 'स्वरतिसूतिसूयतिधूञूदितो वा' इति विकल्पादिडभावः । तस्यार्जुनस्य सम्बन्धिनी । भीषयत इति भीषणा । नन्द्यादित्वाल्ल्युः । विनिपातशंसिनी विनाशसूचिका दृष्टिरुल्काविशेषणमुल्केव बलेषु सरोषं यथा तथा पपात ॥ ४९ ॥

दिशः समूहन्निव विक्षिपन्निव प्रभां रवेराकुलयन्निवानिलम् ।
मुनिश्चचाल क्षयकालदारुणः क्षितिं सशैलां चलयन्निवेषुभिः ॥५०॥

अन्वयः—क्षयकालदारुणः, मुनिः, इषुभिः, दिशः, समूहन्, इव, रवेः, प्रभां, विक्षिपन्, इव, अनिलम्, आकुलयन्, इव सशैलां, क्षितिं, चलयन्, इव चचाल ॥५०॥

दिश इति ॥ क्षयकालः कल्पान्तकाल इव । 'संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि' इत्यमरः । दारुणो रौद्रो मुनिरर्जुन इषुभिर्बाणैर्दिशः । समूहन्निवैकत्र समाहरन्निव । अन्यथा तासां पारदर्शनं न स्यादिति भावः । रवेः प्रभां विक्षिपन्निवाधः प्रक्षिपन्निव । अन्यथा सा कथं न दृश्यत इति भावः । तथानिलं वायुमाकुलयन्निषुभिरन्तराल आघूर्णयन्निव । तस्य तथा गतिविघातादिति भावः । सशैलां क्षितिं चलयन्निव कम्पयन्निव । तथा सङ्क्षोभादिति भावः । चचाल गतिमकरोत् । सर्वत्रेवशब्द उत्प्रेक्षायाम् ॥ ५० ॥

विमुक्तमाशंसितशत्रुनिर्जयैरनेकमेकावसरं वनेचरैः ।
स निर्जघानायुधमन्तरा शरैः क्रियाफलं काल इवातिपातितः ॥५१॥

अन्वयः—आशंसितशत्रुनिर्जयैः वनेचरैः, एकावसरं, विमुक्तम्, अनेकम्, आयुधम्, सः, क्रियाफलम्, अतिपातितः कालः, इव, अन्तरा, शरैः, निर्जघान ॥ ५१ ॥

विमुक्तमिति ॥ आशंसितः काङ्क्षितः शत्रुनिर्जयो यैस्तैः । अहमहमिकया शत्रुविजिगीषुभिरित्यर्थः । वनेचरैरेकावसरं समकालम् । अत्यन्तसंयोगे द्वितीया । विमुक्तं प्रयुक्तमनेकं बहु आयुधम् । जातावेकवचनम् । सोऽर्जुनः क्रियाफलमतिपाति-

तोऽतिक्रान्तः काल इव । अतिक्रान्तकालस्य कर्मणो निष्फलत्वादिति भावः । अन्तरा मध्ये शरैर्निजघान ॥ ५१ ॥

गतैः परेषामविभावनीयतां निवारयद्भिर्विपदं विदूरगैः ।
भृशं बभूवोपचितो बृहत्फलैः शरैरुपायैरिव पाण्डुनन्दनः ॥५२॥

अन्वयः—पाण्डुनन्दनः, परेषां, अविभावनीयतां, गतैः, विपदं, निवारयद्भिः, विदूरगैः, बृहत्फलैः, शरैः, उपायैः, इव, भृशं, उपचितः, बभूव ॥ ५२ ॥

गतैरिति ॥ पाण्डुनन्दनोऽर्जुनः परेषामविभावनीयतां लघुप्रयोगादन्यत्र गूढप्रयोगाच्चादृश्यतामप्रकाश्यतां च गतैर्विपदमनर्थं निवारयद्भिर्विदूरगैर्दूरलक्ष्यगैः परमण्डलप्रवृत्तैश्च बृहत्फलैरायताग्रैर्महालाभैश्च । 'फलं बाणाग्रलाभयोः' इति शाश्वतः । शरैरुपायैः सामादिभिरिव भृशमुपचितः प्रवृद्धो बभूव । अत्र शब्दमात्रसाधर्म्यात्प्रकृताप्रकृतश्लेषः । उपमेति केचित् ॥ ५२ ॥

दिवः पृथिव्याः ककुभां नु मण्डलात्पतन्ति बिम्बादुत तिग्मतेजसः ।
सकृद्विकृष्टादथ कार्मुकान्मुनेः शराः शरीरादिति तेऽभिमेनिरे ॥५३॥

अन्वयः—अथ, शराः, दिवः, पृथिव्याः, ककुभां, मण्डलात्, नु, उत, तिग्मतेजसः, बिम्बात्, सकृद्विकृष्टात्, कार्मुकात्, मुनेः, शरीरात्, पतन्ति, इति, ते, अभिमेनिरे॥५३॥

दिव इति ॥ शरा दिवोऽन्तरिक्षात्पृथिव्या भूगोलाद्वा ककुभां मण्डलान्नु दिशां मण्डलाद्वोत तिग्मतेजसोऽर्कस्य बिम्बान्मण्डलाद्वाथवा सकृद्विकृष्टात्कार्मुकाद्वा मुनेः शरीराद्वा पतन्तीति ते गणा अभिमेनिरे ज्ञातवन्तः । अन्यथा कथममी विश्वमन्तर्धाय शराः सम्भाव्यन्त इति भावः । अत्र सर्वतः शरसम्पातदर्शनात्सम्भावनया पृथिव्यादीनामन्यतमस्यापादानत्वोत्प्रेक्षा । सा च प्रतीयमाना व्यञ्जकाप्रयोगात् । नुशब्दादयस्तु संशये ॥ ५३ ॥

गणाधिपानामविधाय निर्गतैः परासुतां मर्मविदारणैरपि ।
जवादतीये हिमवानधोमुखैः कृतापराधैरिव तस्य पत्त्रिभिः ॥५४॥

अन्वयः—मर्मविदारणैः, अपि, गणाधिपानां, परासुताम्, अविधाय, निर्गतैः, तस्य, पत्त्रिभिः, कृतापराधैः, इव, अधोमुखैः, जवात्, हिमवान्, अतीये ॥ ५४ ॥

गणेति ॥ मर्मविदारणैरपि । मर्मस्थानान्येव विदारयद्भिरपीत्यर्थः । गणाधिपानां परासुतां मरणमविधायाकृत्वा निर्गतैः । तेषाममर्त्यत्वादिति भावः । तस्य मुनेः पत्त्रिभिः शरैः कृतापराधैरिव स्वामिकार्याकरणात्सापराधैरिवेत्युत्प्रेक्षा । अधोमुखैः सद्भिर्जवाद्धिमवानतीयेऽतिचक्रमे । तत्र प्रविष्टमित्यर्थः । लज्जितस्य कचिन्निलयनमुचितमिति भावः ॥ ५४ ॥

द्विषां क्षतीर्याः प्रथमे शिलीमुखा विभिद्य देहावरणानि चक्रिरे।
न तासु पेते विशिखैः पुनर्मुनेररुन्तुदत्वं महतां ह्यगोचरः ॥५५॥

अन्वयः—प्रथमे, शिलीमुखाः, द्विषां, देहावरणानि, विभिद्य, याः, क्षतीः, चक्रिरे, तासु, पुनः, मुनेः, विशिखैः, न, पेते, अरुन्तुदत्वं, महतां, अगोचरः, हि ॥ ५५ ॥

द्विषामिति ॥ प्रथमे । प्रथममुक्ता इत्यर्थः । शिलीमुखा मुनिशरा द्विषां देहावरणानि वर्माणि विभिद्य याः क्षतीः प्रहारांश्चक्रिरे तासु क्षतिषु पुनः पश्चात्प्रयुक्तैर्मुनेर्विशिखैर्न पेते न पतितम् । पिष्टपेषणदोषापातादिति भावः । तथाहि । अरुन्तुदत्वं पीडितपीडनं सतामगोचरोऽविषयं हि । सन्तः पीडितपीडां न कुर्वन्तीत्यर्थः । 'न हन्याद्व्यसनप्राप्तं नार्तं नातिपरिक्षतम्' इति निषेधस्मरणादिति भावः । अरुर्मर्म तुदतीति अरुन्तुदः । 'व्रणोऽस्त्रियामीर्ममरु' इत्यमरः । 'विध्वरुषोस्तुदः' इति खश्प्रत्ययः । 'अरुर्द्विषदजन्तस्य मुम्' इति मुमागम ॥ ५५ ॥

समुज्झिता यावदराति निर्यती सहैव चापान्मुनिबाणसंहतिः।
प्रभा हिमांशोरिव पङ्कजावलिं निनाय सङ्कोचमुमापतेश्चमूम् ॥५६॥

अन्वयः—यावदराति, समुज्झिता, चापात्, सहैव, निर्यती, मुनिबाणसंहतिः, उमापतेः, चमूं, हिमांशोः, प्रभा, पङ्कजावलिम्, इव, सङ्कोचं, निनाय ॥ ५६ ॥

समुज्झितेति ॥ यावन्तोऽरातयो यावदराति । 'यावदवधारणे' इत्यव्ययीभावः । यावदराति यथा तथा समुज्झिताऽरातिसमसङ्ख्यया मुक्ता मुनिचापात्सह सम्भूयैव निर्यती निष्क्रामन्ती । ताहक्तस्य कौशलमिति भावः । इणः शतरि ङीप् । मुनिबाणसंहतिरुमापतेश्चमूं हिमांशोः प्रभा पङ्कजावलिमिव सङ्कोचं निनाय प्रापयामास । दुहादिपाठान्नयतिर्द्विकर्मकः ॥ ५६ ॥

अजिह्ममोजिष्ठममोघमक्लमं क्रियासु बह्वीषु पृथङ्नियोजितम् ।
प्रसेहिरे सादयितुं न सादिताः शरौघमुत्साहमिवास्य विद्विषः॥५७॥

अन्वयः—अजिह्मम्, ओजिष्ठम्, अमोघम्, अक्लमम्, बह्वीषु, क्रियासु, पृथङ्नियोजितम्, अस्य, शरौघम्, उत्साहम्, इव, सादिताः, विद्विषः, सादयितुं, न, प्रसेहिरे ॥ ५७ ॥

अजिह्ममिति ॥ अजिह्मं स्वरूपतो गत्या वा वक्रम् । अन्यत्र तु जिह्मस्यानप्रवृत्तो न भवतीत्यजिह्मस्तम् । ओजिष्ठमोजस्विनं सारवत्तमं तेजिष्ठं च । उभयत्राप्योजस्विशब्दाद्विन्मतादिष्ठन् । 'विन्मतोर्लुक्' इति लुक् । टिलोपश्च । अमोघमवन्ध्यमक्लमं निरन्तरव्यापारेऽप्यश्रान्तं बह्वीषु क्रियासु च्छेदनभेदनपातनादिकर्मसु पृथग्भेदेन नियोजितम् । कर्मानुगुण्येन विनियुक्तमित्यर्थः । अस्य मुनेः शरौघमुत्साहमौत्सु-

न्यमिव। वीररसस्य स्थायिभूतं प्रयत्नविशेषमिवेत्यर्थः। सादिताः कर्षिता विद्विषः शत्रवः सादयितुं प्रतिकर्तुं न प्रसेहिरे न शेकुः। तस्योत्साहवदेव शरवर्षं दुर्धर्षमभूदिति भावः॥ ५७॥

शिवध्वजिन्यः प्रतियोधमग्रतः स्फुरन्तमुग्रेषुमयूखमालिनम्।
तमेकदेशस्थमनेकदेशगा निदध्युरर्कं युगपत्प्रजा इव॥ ५८॥

अन्वयः—अनेकदेशगाः, शिवध्वजिन्यः, उग्रेषुमयूखमालिनम्, एकदेशस्थं, तम्, अर्कं, प्रजाः, इव, युगपत्, प्रतियोधम्, अग्रतः, स्फुरन्तम्, निदध्युः॥ ५८॥

शिवेति॥ अनेकदेशगा नानादेशस्थाः शिवध्वजिन्यो हरसेनाः। उग्रेषवो मयूखा इवेत्युपमितसमासः। अन्यत्र तूग्रेषव इव मयूखा इति मयूरव्यंसकादित्वात्समासः। तेषां मालास्यास्तीति तमुग्रेषुमयूखमालिनम्। व्रीह्यादित्वादिनिः। एकदेशस्थमेकत्रैव स्थितं तं मुनिमर्कं प्रजा इव युगपत्प्रतियोधं योधस्य योधस्य। 'अव्ययं विभक्ति—' इत्यादिना प्रत्यर्थे वीप्सायामव्ययीभावः। अग्रतः स्फुरन्तं निदध्युर्ददृशुः। यथैकोऽर्क एकत्रैव स्थितोऽपि नानादेशस्थानामपि प्रतिपुरुषं ममैवाग्रे वर्तत इति युगपत्प्रतीयते तद्वद्बाणवर्षी मुनिरपि प्रतियोधं तथैव प्रत्यभादित्यर्थः॥ ५८॥

मुनेः शरौघेण तदुग्ररंहसा बलं प्रकोपादिव विष्वगायता।
विधूनितं भ्रान्तिमियाय सङ्गिनीं महानिलेनेव निदाघजं रजः॥५९॥

अन्वयः—प्रकोपात्, इव, विष्वक्, आयता, उग्ररंहसा, मुनेः, शरौघेण, महानिलेन, निदाघजं, रजः, इव, विधूनितं, तत्, सङ्गिनीं, भ्रान्तिम्, इयाय॥ ५९॥

मुनेरिति॥ प्रकोपादमर्षादिव विष्वक्समन्तादायतागच्छतोग्ररंहसा तीव्रवेगेन मुनेः शरौघेणोक्तविशेषणेन। महानिलेन वात्यया निदाघजं ग्रीष्मोत्थं रज इव। विधूनितं व्याहतं तद्बलं प्रमथानां सैन्यं सङ्गिनीमनुबन्धिनीम्। अविच्छिन्नामिति यावत्। भ्रान्तिमनवस्थानमियाय प्राप॥ ५९॥

अथ त्रिभिर्विशेषकमाह—तप इत्यादिना—

तपोबलेनैष विधाय भूयसीस्तनूरदृश्याः स्विदिषून्निरस्यति।
अमुष्य मायाविहतं निहन्ति नः प्रतीपमागत्य किमु स्वमायुधम्॥६०॥

अन्वयः—एषः, तपोबलेन, भूयसीः, अदृश्याः, तनूः, विधाय, इषून्, निरस्यति, स्वित्, (अथवा) अमुष्य, मायाविहितं, स्वम्, आयुधम्, प्रतीपम्, आगत्य, नः, निहन्ति, किमु॥ ६०॥

तप इति॥ एष मुनिस्तपोबलेन तपःसामर्थ्येन भूयसीर्बह्वीरदृश्यास्तनूरात्मनः शरीराणि विधाय स्वित् इषून्निरस्यति क्षिपति किम्। अथवामुष्यास्य मुनेर्मायया

विहतं प्रतिहतं स्वं स्वकीयमिवायुधं प्रतीपं प्रतिकूलमागत्य । प्रत्यावृत्येत्यर्थः । नो-ऽस्माकं निहन्ति किमु । 'जासिनिप्रहण-' इत्यादिसूत्रेण कर्मणि षष्ठी । शेषाविवक्षायां तु द्वितीया ॥ ६० ॥

हृता गुणैरस्य भयेन वा मुनेस्तिरोहिताः स्वित्प्रहरन्ति देवताः ।
कथं न्वमी सन्ततमस्य सायका भवन्त्यनेके जलधेरिवोर्मयः ॥६१॥

अन्वयः—अस्य, मुनेः, गुणैः, हृताः, भयेन, वा, देवताः, तिरोहिताः प्रहरन्ति, स्वित्, (अन्यथा) अस्य, अमी, सायकाः, जलधेः, ऊर्मयः, इव, कथम्, नु, सन्ततम्, अनेके, भवन्ति ॥ ६१ ॥

हृता इति ॥ यद्वा अस्य मुनेर्गुणैः शान्त्यादिभिर्हृता आकृष्टाः । वशीकृता इति यावत् । भयेन दरेण वा भयाद्विभ्यत एवेत्यर्थः । देवतास्तिरोहिताः सत्यः प्रहरन्ति स्वित् । तत्कुतः । अन्यथा अस्य मुनेरमी सायका जलधेरूर्मय इव कथं नु सन्ततमनेकेऽसंख्या भवन्ति । एतच्चोक्तान्यतमपक्षासम्भवे न सम्भवतीत्यर्थः ॥ ६१ ॥

जयेन कच्चिद्विरमेदयं रणाद्भवेदपि स्वस्ति चराचराय वा ।
ततापं कीर्णा नृपसूनुमार्गणैरिति प्रतर्काकुलिता पताकिनी ॥६२॥

अन्वयः—कच्चित् अयं, रणात्, जयेन, विरमेत्, अपि, चराचराय, स्वस्ति, भवेत् इति, प्रतर्काकुलिता, नृपसूनुमार्गणैः, कीर्णा, पताकिनी, तताप ॥ ६२ ॥

जयेनेति ॥ कच्चिदयं रणाज्जयेन विरमेत् । अस्माञ्जित्वा कच्चिदयं युद्धमुपसंहरेदित्यर्थः । अपि चराचराय स्वस्ति भवेत्कच्चित् । अपि स्थावरजङ्गमं जगन्न विनाशयेदित्यर्थः । अपिशब्दः सम्भावनायाम् । प्रार्थनायां लिङ् । इति प्रतर्काः पूर्वोक्ता ये वितर्कास्तैराकुलिता विह्वला । अत्र सहेतुकं विशेषणमाह—नृपसूनुमार्गणैरर्जुनबाणैः कीर्णा क्षिप्ता पताकिनी सेना । किरातपतेरिति शेषः । तताप तापं प्राप ॥ ६२ ॥

अमर्षिणा कृत्यमिव क्षमाश्रयं मदोद्धतेनेव हितं प्रियं वचः ।
बलीयसा तद्विधिनेव पौरुषं बलं निरस्तं न रराज जिष्णुना ॥६३॥

अन्वयः—अमर्षिणा, क्षमाश्रयं, कृत्यम्, इव, मदोद्धतेन, हितं, प्रियं, वचः, निरस्तम्, इव, बलीयसा, विधिना, (निरस्तं,) पौरुषम्, इव, जिष्णुना, (निरस्तं) बलं न, रराज ॥ ६३ ॥

अमर्षिणेति ॥ अमर्षिणा क्रोधवता क्षमाश्रयं शान्तिसाध्यं कृत्यमिव । यथा मदोद्धतेन पुंसा हितं प्रियं वचो निरस्तं तिरस्कृतमिव । यथा बलीयसा बलवत्तरेण विधिना दैवेन निरस्तं पौरुषमिव । बलिष्ठदैवप्रतिहतपुरुषव्यापारस्य निष्फलत्वादिति भावः । तथा जिष्णुनार्जुनेन निरस्तं क्षिप्तं बलं किरातसैन्यं न रराज । मालोपमा ॥६३॥

प्रतिदिशं प्लवगाधिपलक्ष्मणा विशिखसंहतितापितमूर्तिभिः ।
रविकरग्लपितैरिव वारिभिः शिवबलैः परिमण्डलता दधे ॥ ६४ ॥

अन्वयः—प्लवगाधिपलक्ष्मणा विशिखसंहतितापितमूर्तिभिः, शिवबलैः, रविकरग्लपितैः, वारिभिः, इव, प्रतिदिशं, परिमण्डलता, दधे ॥ ६४ ॥

प्रतिदिशमिति ॥ प्लवगानामधिपोऽधीशो लक्ष्म यस्य तेन वानरचिह्नेन । 'कपि, प्लवङ्गप्लवग-' इति 'चिह्नं लक्ष्म च लक्षणम्' इति चामरः । अर्जुनेन विशिखसंहतितापितमूर्तिभिरिति । विशिखा बाणास्तेषां संहतयः समूहाः । 'स्त्रियां तु संहतिर्वृन्दम्' इत्यमरः । ताभिस्तापिताः पीडिता मूर्तयो देहा येषां तैस्तथाभूतैः । शरनिकरकर्तितकलेवरैरित्यर्थः । शिवबलैः प्रमथसैन्यैः कर्तृभिः रविकरेण ग्लपितैः सूर्यकिरणशोषितैर्वारिभिरुदकैरिव प्रतिदिशं दिक्षु परिमण्डलता । परितश्चक्राकारमण्डलतेति यावत् । दधेऽधारि । प्रतिदिशं मण्डलाकारेण स्थितमित्यर्थः । धाञः कर्मणि लिट् । आतपतप्तं हि नीरं परिभ्रमति तद्वन्मुनिपीडितं सैन्य बभ्रामेत्यर्थ । द्रुतविलम्बितं छन्दः—'द्रुतविलम्बितमाह नभौ भरौ' इति लक्षणात् ॥ ६४ ॥

प्रविततशरजालच्छन्नविश्वान्तराले
विधुवति धनुराविर्मण्डलं पाण्डुसूनौ ।
कथमपि जयलक्ष्मीर्भीतभीता विहातुं
विषमनयनसेनापक्षपातं विषेहे ॥ ६५ ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये चतुर्दशः सर्गः ।

अन्वयः—प्रविततशरजालच्छन्नविश्वान्तराले, पाण्डुसूनौ, आविर्मण्डलं, धनुः, विधुवति, भीतभीता, (इव) जयलक्ष्मीः, कथमपि, विषमनयनसेनापक्षपातम्, विहातुम्, विषेहे ॥ ६५ ॥

प्रविततेति ॥ प्रविततानि विस्तृतानि यानि शरजालानि तैश्छन्नमाच्छादितं विश्वान्तरालं येन तस्मिञ्छरसमूहपूरितब्रह्माण्डोदरे पाण्डुसूनावत एवाविर्मण्डलमाविर्भूतमण्डलं धनुः । आविर्भूतमिति वृत्तौ भूतार्थस्यानुप्रवेशाद्भूतशब्दस्याप्रयोगः । विधुवति कम्पयत्यास्फालयति सति भीतभीतेव भीतप्रकारेव जयलक्ष्मीर्विजयश्रीः कथमपि केनचित्प्रकारेण । महता कष्टेन वा । विषमनयनसेनापक्षपातं शिवसैन्यानुरागं विहातुं त्यक्तुं विषेहे । शशाकेत्यर्थः । मालिनीवृत्तम् । लक्षणं तूक्तम् ॥ ६५ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां चतुर्दशः सर्गः समाप्तः ॥

पञ्चदशः सर्गः ।

अथ भूतानि वार्त्रघ्नशरेभ्यस्तत्र तत्रसुः ।
भेजे दिशः परित्यक्तमहेष्वासा च सा चमूः ॥ १ ॥

अन्वयः—अथ, तत्र, भूतानि, वार्त्रघ्नशरेभ्यः, तत्रसुः । सा, चमूः, परित्यक्तमहेष्वासा, दिशः, भेजे ॥ १ ॥

अथेति ॥ अथानन्तरं तत्र रणे भूतानि सर्वप्राणिनः । वृत्रं हतवानिति वृत्रहेन्द्रः । 'ब्रह्मभ्रूणवृत्रेषु क्विप्' । तस्यापत्यं पुमान्वार्त्रघ्नोऽर्जुनः । 'तस्यापत्यम्' इत्यण्प्रत्ययः । तस्य शरेभ्यस्तत्रसुर्बिभ्युः । 'वा जॄभ्रमुत्रसाम्' इति विकल्पादेत्वाभ्यासलोपाभावः । सा चमूश्च । इषवोऽस्यन्त एभिरितीष्वासा धनूंषि । 'धनुश्चापोऽस्त्रमिष्वासः' इति हेमचन्द्रः । 'अकर्तरि च कारके संज्ञायाम्' इति करणे घञ् । परित्यक्ता महान्त इष्वासा यया सा । परित्यक्तायुधेत्यर्थः । दिशो भेजे । पलायांचक्र इत्यर्थः । अत्र भूतत्राससेनापलायनयोः समुच्चयकथनाद्भिन्नविषय क्रियासमुच्चयोऽलङ्कारः । 'गुणक्रियायौगपद्यं समुच्चयः' इति सामान्यलक्षणम् । तस्य यमकेन संसृष्टिः ॥ १ ॥

अपश्यद्भिरिवेशानं रणान्निववृते गणैः ।
मुह्यत्येव हि कृच्छ्रेषु सम्भ्रमज्वलितं मनः ॥ २ ॥

अन्वयः—गणैः, ईशानम् , अपश्यद्भिरिव, रणात्, निववृते । हि, कृच्छ्रेषु, संभ्रमज्वलितं, मनः, मुह्यत्येव ॥ २ ॥

अपश्यद्भिरिति ॥ गणैः प्रमथैरीशानं स्वामिनं शिवम् । पुरोवर्तिनमिति भावः । अपश्यद्भिरिव रणान्निववृते निवृत्तम् । भावे लिट् । तथा हि । कृच्छ्रेष्वापत्सु सम्भ्रमेण साध्वसेन ज्वलितं तप्तम् । 'सम्भ्रमः साध्वसेऽपि स्यात्' इति विश्वः । मनो मुह्यत्येव । अत्र पुरोवर्तिनोऽप्यदर्शनमुपपद्यत इति भावः ॥ २ ॥

खण्डिताशंसया तेषां पराङ्मुखतया तया ।
आविवेश कृपा केतौ कृतोच्चैर्वानरं नरम् ॥ ३ ॥

अन्वयः—खण्डिताशंसया, तेषां, तया, पराङ्मुखतया, केतौ, कृतः, उच्चैः, वानरं नरं, कृपा, आविवेश ॥ ३ ॥

खण्डितेति ॥ खण्डिता ध्वस्ताशंसा जयाशा यस्यास्तया तेषां गणानां सम्बन्धिन्या तया । अतिसन्निकृष्टयेत्यर्थः । पराङ्मुखतया रणवैमुख्येन । पलायनेनेत्यर्थः । केतौ ध्वजे कृत आरोपित उच्चैरुन्नतो वानरो हनूमान्येन तं नरं पुरुषम् । कपिध्वज-

मित्यर्थः। कृपा करुणाविवेश। तदायदुर्दशां दृष्ट्वा स कृपाविष्टोऽभूदित्यर्थः। यमकालङ्कारः॥ ३॥

ननु शत्रुषु कथं करुणा तत्राह—

आस्थामालम्ब्य नीतेषु वशं क्षुद्रेष्वरातिषु।
व्यक्तिमायाति महतां माहात्म्यमनुकम्पया॥ ४॥

अन्वयः—आस्थाम्, आलम्ब्य, वशं, नीतेषु क्षुद्रेषु, अरातिषु, अनुकम्पया, महतां, माहात्म्यं, व्यक्तिम्, आयाति॥ ४॥

आस्थामिति॥ आस्थां यत्नमालम्ब्य। 'आस्था त्वालम्बनास्थानयत्नापेक्षासु कथ्यते' इति विश्वः। वशं नीतेषु क्षुद्रेषु दुष्टेष्वरातिषु शत्रुषु विषयेऽनुकम्पया कृपया महतां वीराणां माहात्म्यं महानुभावत्वं व्यक्तिं स्फुटतामायाति प्राप्नोति। स्वपौरुषनिर्जितेष्वरातिष्वपि करुणा भूषणमेव महतामिति भावः॥ ४॥

स सासिः सासुसूः सासो येयायेयाययायय।
ललौ लीलां ललोऽलोलः शशीशशिशुशीः शशन्॥ ५॥

अन्वयः—सासिः, सासुसूः, सासः, येयायेयाययायय, ललः, अलोलः, शशीशशिशुशीः, शशन्, सः, लीलां ललौ॥ ५॥

स सासिरिति॥ सहासिना वर्तमानः सासिः सखड्गः असून्सुवन्ति प्रेरयन्तीत्यसुसुवो बाणाः। 'षू प्रेरणे' इति धातोः 'सत्सूद्विष–' इत्यादिना क्विप्। असुसूभिः सह वर्तत इति सासुसूः सबाणः। अस्यन्ते क्षिप्यन्ते शरा अनेनेत्यासो धनुः। 'अकर्तरि च कारके सञ्ज्ञायाम्' इति घञ्। आसेन सह वर्तत इति सासः सचापः सर्वत्र 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः। येया यातव्या यानसाध्याः अयेया अयातव्या यानं विनैव साध्याः। 'अचो यत्' इति यत्प्रत्ययः। येयाश्चायेयाश्च येयायेयास्तेषां द्वयानामाये स्वर्णगजादिलाभे याति प्राप्नोतीति येयायेयायय। अयः शुभावहदैवं यातीत्ययय। येयायेयाययश्चासावययश्चेति येयायेयाययायय। या धातोरुभयत्रापि 'आतोऽनुपसर्गे कः' इति कप्रत्ययः। अतो ललति विलसतीति ललः। 'लल विलासे' पचाद्यच्। अलोलोऽचपलः शशिन ईशः शिवस्तस्य शिशुः स्कन्दस्तं शृणाति हिनस्तीति शशीशशिशुशीः। क्विप्। शशन्प्लुतगतिं कुर्वन्। 'शश प्लुतगतौ' इति धातोः शतृप्रत्ययः। सोऽर्जुनो लीलां शोभां ललौ प्राप। 'ला आदाने' कर्तरि लिट्। एकाक्षरपादः॥ ५॥

त्रासजिह्मं यतश्चैतान्मन्दमेवान्वियाय सः।
नातिपीडयितुं भग्नानिच्छन्ति हि महौजसः॥ ६॥

अन्वयः—सः, त्रासजिह्मं, यतः, एतान्, मन्दमेव, अन्वियाय । हि, महौजसः, भग्नान्, अतिपीडयितुं, नेच्छन्ति ॥ ६ ॥

त्रासेति ॥ सोऽर्जुनस्त्रासजिह्मं भयक्लिष्टं यथा तथा यतो गच्छतः । पलायमानानित्यर्थः । एतान्गणान्मन्दमेवान्वियायानुजगाम । तथा हि । महौजसो महानुभावा भग्नानतिपीडयितुं नेच्छन्ति ॥ ६ ॥

अथाग्रे हसता साचिस्थितेन स्थिरकीर्तिना ।
सेनान्या ते जगदिरे किञ्चिदायस्तचेतसा ॥ ७ ॥

अन्वयः—अथ, अग्रे, हसता, साचिस्थितेन, स्थिरकीर्तिना, किञ्चिदायस्तचेतसा, सेनान्या, ते, जगदिरे ॥ ७ ॥

अथेति ॥ अथाग्रे । बलानामित्यर्थः । हसता तद्भङ्गदर्शनात्स्मयमानेन साचिस्थितेन तन्निवारणाय तिर्यगवस्थितेन । 'तिर्यगर्थे साचि तिरः' इत्यमरः । स्थिरकीर्तिना । स्वयमभङ्गत्वादिति भावः । किञ्चिदीषदायस्तं खिन्नं चेतो यस्य तेन स्वकीयगणभङ्गादीषत्खिन्नचित्तेन सेनान्या स्कन्देन । 'पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः' इत्यमरः । ते गणाः प्रथमादयो जगदिरे उक्ताः । ओष्ठ्यश्च भावान्निरोष्ठ्यमेतत् ॥ ७ ॥

अथैकविंशतिभिः श्लोकैः स्कन्दवाक्यमेवाह—मा विहासिष्टेत्यादिना ॥

मा विहासिष्ट समरं समरन्तव्यसंयतः ।
क्षतं क्षुण्णासुरगणैरगणैरिव किं यशः ॥ ८ ॥

अन्वयः—समरन्तव्यसंयतः, समरं, मा विहासिष्ट, क्षुण्णासुरगणैः, अगणैः, इव, किं, यशः, क्षतम् ॥ ८ ॥

मेति ॥ रन्तव्यं रमणं क्रीडा । बहुलग्रहणाद्भावे तव्यप्रत्ययः । संयद्युद्धम् । 'समुदायः स्त्रियः संयत्समित्याजिसमिद्युधः' इत्यमरः । समे रन्तव्यसंयती येषां ते समरन्तव्यसंयतः तुल्यक्रीडासङ्गरा इति तेषां सम्बोधनम् । यूयं समरं सङ्ग्रामं मा विहासिष्ट न त्यजत । जहातेर्माङि लुङ् । मध्यमबहुवचनम् । क्षुण्णाः पराजिता असुरगणा यैस्तैः । भवद्भिरिति शेषः । अगणैरिव गणेभ्योऽन्यैरिव किं किमर्थं यशः क्षतं नाशितम् । नैतद्युक्तं महाशूराणां भवादृशानामित्यर्थः ॥ ८ ॥

विवस्वदंशुसंश्लेषद्विगुणीकृततेजसः ।
अमी वो मोघमुद्गूर्णा हसन्तीव महासयः ॥ ९ ॥

अन्वयः—विवस्वदंशुसंश्लेषद्विगुणीकृततेजसः, मोघम्, उद्गूर्णाः, वः, अमी, महासयः, हसन्ति, इव ॥ ९ ॥

विवस्वदिति ॥ विवस्वदंशुसंश्लेषेण सूर्यकिरणसम्पर्केण द्विगुणीकृतान्युत्तेजितानि तेजांसि येषां ते तथोक्ता मोघं व्यर्थमुद्‌गूर्णा उद्यताः । 'गुरी उद्यमने' इति धातोः कर्मणि क्तः । वो युष्माकममी महासयः खड्गा हसन्तीवेत्युत्प्रेक्षा । किं पलायमानानां खड्गैरिति हासः ॥ ९ ॥

वनेऽवने वनसदां मार्गं मार्गमुपेयुषाम् ।

बाणैर्बाणैः समासक्तं शङ्केऽशं केन शाम्यति ॥ १० ॥

अन्वयः—वनसदाम्, अवने, वने, मार्गं, मार्गम्, उपेयुषां, बाणैः, बाणैः, समासक्तम्, अशं, केन, शाम्यति, शङ्के ? ॥ १० ॥

वन इति ॥ वनसदां वनेचराणामवने रक्षके वने मार्गं मृगसम्बन्धिनं मार्ग पन्थानमुपेयुषाम् । पलायमानानामित्यर्थः । युष्माकमिति शेषः । बाणो ध्वनिरेषामस्तीति तैर्बाणैर्ध्वनियुक्तैः । 'बण संशब्दने' इति धातोर्घञ् । ततः 'अर्शआदिभ्योऽच्' इत्यच्प्रत्ययः । यमकत्वाद्बवयोरभेदः । उक्तं च—'रलयोर्डलयोस्तद्वज्जययोर्बवयोरपि । शसयोर्मनयोश्चान्ते सविसर्गाविसर्गयोः । सबिन्दुकाबिन्दुकयोः स्यादभेदेन कल्पनम् ॥' इति । बाणैः शरैः समासक्तं समासञ्जितमशं दुःखं तत्केन शाम्यतीति शङ्के । केनोपायेन शाम्येदिति विचारयामीत्यर्थः ॥ १० ॥

पातितोत्तुङ्गमाहात्म्यैः संहृतायतकीर्तिभिः ।

गुर्वीं कामापदं हन्तुं कृतमावृत्तिसाहसम् ॥ ११ ॥

अन्वयः—पातितोत्तुङ्गमाहात्म्यैः, संहृतायतकीर्तिभिः, कां, गुर्वीम्, आपदं, हन्तुम्, आवृत्तिसाहसं, कृतम् ॥ ११ ॥

पातितेति ॥ पातितं भ्रंशितमुत्तुङ्गमाहात्म्यमुन्नतभावो यैस्तैः संहृता आहृता आयता विस्तृताः कीर्तयो यैस्तैः । युष्माभिरिति शेषः । कां गुर्वीमापदं हन्तुम् । न कांचिदपीत्यर्थः । आवृत्तिर्युद्धान्निवृत्तिः सैव साहसं कृतम् । अतः पापादन्यन्न किंचित्फलमस्तीति भावः । तदुक्तं मनुना—'यस्तु भीतः परावृत्तः सङ्ग्रामे हन्यते परैः । भर्तुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते ॥ यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितम् । भर्ता तत्सर्वमादत्ते परावृत्तहतस्य तु ॥' इति ॥ ११ ॥

नासुरोऽयं न वा नागो धरसंस्थो न राक्षसः ।

ना सुखोऽयं नवाभोगो धरणिस्थो हि राजसः ॥ १२ ॥

अन्वयः—अयम्, असुरः, न । नागः, वा, न । धरसंस्थः, राक्षसः, न । (किन्तु) अयं, सुखः, नवाभोगः, धरणिस्थः, राजसः, ना, हि ॥ १२ ॥

नेति ॥ किंच अयमसुरो दैत्यो न। नागो नागराजो वा पन्नगश्च न। धर इव संस्था यस्य स धरसंस्थः पर्वताकारः। 'अहार्यधरपर्वताः' इत्यमरः। 'संस्थाव्यवस्था-प्रणिधिसमाप्त्याकारमृत्युषु' इति वैजयन्ती। राक्षसो न। किंत्वयं सुखयतीति सुखः। सुखसाध्य इत्यर्थः। नवाभोगोऽभिनवप्रयत्नः। महोत्साह इत्यर्थः। 'आभोगा वरुणच्छत्रे पूर्णतायत्नयोरपि' इति विश्वः। धरणिस्थो भूतलचारी राजसो रजोगुणप्रधानो ना पुरुषो हि। कश्चिन्मानुष इत्यर्थः। 'पुरुषाः पूरुषा नरः। मनुष्या मानुषा मर्त्या मनुजा मानवा नराः' इत्यमरः। अतो न पलायनमुचितमिति भावः। गोमूत्रिकाबन्धः—'वर्णानामेकरूपत्वं यद्येकान्तरमर्धयोः। गोमूत्रिकेति तत्प्राहुर्दुष्करं तद्विदो विदुः॥' इति लक्षणात्। षोडशकोष्ठद्वयेऽर्धद्वयं क्रमेण विलिख्यैकान्तरविनिमयेन वाचने श्लोक निष्पत्तिरित्युद्धारः ॥ १२ ॥

मन्दमस्यन्निषुलतां घृणया मुनिरेष वः।
प्रणुदत्यागतावज्ञं जघनेषु पशूनिव ॥ १३ ॥

अन्वय—एषः, मुनिः, घृणया, इषुलताम्, मन्दम्, अस्यन् वः, पशूनिव, आगतावज्ञं, जघनेषु, प्रणुदति ॥ १३ ॥

मन्दमिति ॥ एष मुनिर्घृणया कृपयेषु लतां शाखामिव मन्दमस्यन्क्षिपन्वो युष्मान्पशूनिवागतावज्ञं यथा तथा जघनेषु प्रणुदति चोदयति। किमतः परं कष्टमस्तीति भाव. ॥ १३ ॥

न नोननुन्नो नुन्नोनो नाना नानानना ननु।
नुन्नोऽनुन्नो ननुन्नेनो नानेना नुन्ननुन्ननुत् ॥ १४ ॥

अन्वयः—हे नानानना, ऊननुन्नः, ना, न, तथा, नुन्नोनः, ना, अनाः खलु। ननुन्नेनः, नुन्नः, अनुन्नः, नुन्ननुन्ननुत्, ना, अनेनाः, न ॥ १४ ॥

नेति ॥ पदच्छेदस्तावत्—न ना ऊननुन्नः नुन्नोनः ना अना नानानना ननु। नुन्नः अनुन्नः ननुन्नेनः ना अनेनाः नुन्ननुन्ननुत् ॥ अथ योजना—हे नानानना नानाप्रकाराण्याननानि येषां ते। नानाविधास्या इत्यर्थः। ऊनेन निकृष्टेन नुन्नो विद्ध ऊननुन्नो यः स ना न पुरुषो न। तथा नुन्न ऊनो येन स नुन्नोनो ना पुरुषोऽना नन्वपुरुषः खलु। ऊनाद्भीतः पलायमानस्तु किं वक्तव्यमिति भावः। किं च। नुन्न इनः स्वामी यस्य स नुन्नेनः। स न भवतीति ननुन्नेनः। नञर्थस्य न शब्दस्य सुप्सुपेति समासः। स नुन्नो विद्धोऽप्यनुन्नोऽविद्ध एव। यूयमनुन्नस्वामिकत्वादनुन्ना एवेति भावः। तथा नुन्ननुन्ननुदतिशयेन नुन्ना नुन्ननुन्नास्तान्नुदतीति नुन्ननुन्ननुदतिपीडितपीडको ना पुरुषोऽनेना निर्दोषो न भवतीति। किंतु सदोष एवेति। 'नार्त

नातिपरिस्रुतम्' इति निषेधादित्यर्थः। अयं तु नैतादृश इति न पलायितव्यमिति भावः। अयमेकव्यञ्जनः। अन्त्यस्तकारस्तु न दोषावहः। 'नान्त्यवर्णस्तु भेदकः' इत्यभ्यनुज्ञानात्॥ १४॥

वरं कृतध्वस्तगुणादत्यन्तमगुणः पुमान्।

प्रकृत्या ह्यमणिः श्रेयान्नालङ्कारश्च्युतोपलः॥ १५॥

अन्वयः—कृतध्वस्तगुणात्, अत्यन्तम्, अगुणः, पुमान्, वरम्। हि, प्रकृत्या, अमणिः, अलङ्कारः, श्रेयान्, च्युतोपलः, न श्रेयान्॥ १५॥

वरमिति॥ कृताः पूर्वमुत्पादिताः पश्चाद्ध्वस्ता नष्टास्ते कृतध्वस्ताः। 'पूर्वकाल-' इत्यादिना समासः। कृतध्वस्ता गुणा यस्य तस्मात्पुंसोऽत्यन्तमतिशयेनागुणो निर्गुण. पुमान्वरं मनाक्प्रियः। किंचित्प्रिय इत्यर्थः। 'वरं क्लीबे मनाक्प्रिये' इत्यमरः। तथा हि। प्रकृत्या स्वभावेनामणिर्मणिरहितोऽलङ्कारः श्रेयान्। च्युतोपलो भ्रष्टरत्नो न श्रेयान्। 'उपलः प्रस्तरे रत्ने' इति विश्वः। पलायितुः समरादसमर एव वरमिति भावः। अत्र समानविषयारोपयोः प्रतिबिम्बकरणाद्दृष्टान्तालङ्कारः॥ १५॥

स्यन्दना नो चतुरगाः सुरेभा वाविपत्तयः।

स्यन्दना नो च तुरगाः सुरेभा वा विपत्तयः॥ १६॥

अन्वयः—स्यन्दनाः, स्यन्दना, नो सन्ति। चतुरगाः, तुरगाश्च, नो सन्ति, सुरेभाः, सुरेभा, वा, नो सन्ति। अविपत्तयः, विपत्तयः, नो, सन्ति॥ १६॥

स्यन्दना इति॥ स्यन्दन्ते प्रद्रवन्तीति स्यन्दना जवनाः। स्यन्दना रथा नो सन्ति। नन्द्यादित्वाल्ल्युः। चतुरं गच्छन्तीति चतुरगाः। तुरगाश्चाश्वा नो सन्ति। सुरेभाः शोभनबृंहणाः। सुरेभा वा सुरगजाश्च नो सन्ति। अविपत्तयो विपत्तिरहिता. विपत्तयो वा विशिष्टाः पदातयो नो सन्ति। अतो न भेतव्यमिति भावः। अत्र पूर्वोत्तरार्धगतानां विशेषणानां विशेष्याणां चोद्देशोद्देश्यीभूतानां यथासंख्यसंबन्धानुक्रमाद्यथासंख्यालङ्कारो यमकेन संसृष्टः॥ १६॥

भवद्भिरधुनारातिपरिहापितपौरुषैः।

ह्रदैरिवार्कनिष्पीतैः प्राप्तः पङ्को दुरुत्तरः॥ १७॥

अन्वयः—अधुनारातिपरिहापितपौरुषैः भवद्भिः, अर्कनिष्पीतैः ह्रदैरिव, दुरुत्तरः पङ्कः, प्राप्तः॥ १७॥

भवद्भिरिति॥ अधुनारातिभिः परिहापितानि त्याजितानि पौरुषाणि यैस्तैर्भवद्भिः। अर्कनिष्पीतैरर्केण संशोषितैर्ह्रदैरिव। दुरुत्तरो दुस्तरः पङ्क इव पङ्को दुष्कीर्तिरूपः प्राप्तः॥ १७॥

वेत्रशाककुजे शैलेऽलेशैजेऽकुकशात्रवे ।
यात किं विदिशो जेतुं तुञ्जेशो दिवि कितया ॥ १८ ॥

अन्वयः—वेत्रशाककुजे, अलेशैजे, अकुकशात्रवे, शैले, कितया, विदिशः, जेतुं यात किम्, दिवि, तुञ्जेशः ॥ १८ ॥

वेत्रेति ॥ वेत्राणि वंशाः फलिन्यो वा शाका वर्धराश्च कुजा वृक्षा यस्मिंस्तस्मिन्वेत्रशाककुजे । शत्रुणा दुःप्रवेशस्य इत्यर्थः । 'वेत्रं वंशफलिन्योश्च' इति विश्वः । 'शाक वर्धरवर्धकाः' इत्यमरः । लेशेन स्तोकेनाप्येजते कम्पत इति लेशैजः । स न भवतीत्यलेशैजस्तस्मिन् । अत्यन्ताकम्पन इत्यर्थः । 'एजृ कम्पने' । पचाद्यच् । न कोकन्ते नाददत इत्यकुका ग्रहणासमर्थाः शत्रवो यस्मिंस्तस्मिन्नकुकशात्रवे । कुक आदाने' । पचाद्यच् । शैले पर्वते । केषां भावः किता कुत्सितता तयोपलक्षिताः सन्तः । 'कुत्साप्रश्नवितर्केषु क्षेपे किंशब्द इष्यते' इति शाश्वत । विदिशो जेतुं यात गच्छत किम् । यातेः संप्रश्ने लोट् । मध्यमपुरुषबहुवचनम् । दिवि स्वर्गेऽपि । तुञ्जेश इति तेषां संबोधनम् । तुञ्जन्त इति तुञ्जा हिंसका दैत्याः । 'तुजि हिंसायाम्' । पचाद्यच् । तेभ्यो दैत्येभ्य ईशत इति तुञ्जेशः । ईशेः क्विप् । तेभ्योऽपि शक्ता इत्यर्थः । स्वर्गेऽप्यसुरविजयिनां युष्माकमत्र क्षुद्रस्थले क्षुद्रशत्रौ पलायनमनुचितमिति भावः । प्रतिलोमानुलोमपादः ॥ १८ ॥

नन्वनाथा वयं पलायामह इति तच्च न युक्तमित्याह—

अयं वः क्लैब्यमापन्नान्दृष्टपृष्ठानरातिना ।
इच्छतीशश्च्युताचारान्दारानिव निगोपितुम् ॥ १९ ॥

अन्वय—अयम्, ईशः, क्लैब्यम्, आपन्नान्, (तथा) अरातिना, दृष्टपृष्ठान्, वः, च्युताचारान्, दारानिव, निगोपितुम्, इच्छति ॥ १९ ॥

अयमिति ॥ अयमीशः स्वामी शिवः क्लैब्यं निष्पौरुषत्वमापन्नान्प्राप्तांस्तथारातिना दृष्टपृष्ठान् । पलायमानानित्यर्थः । वो युष्मांश्च्युताचारान्स्खलितव्रतान्दारान्कलत्राणीव । 'अथ पुंभूम्नि दाराः' इत्यमरः । निगोपितुं गोप्तुम् । ऊदित्त्वादिड्विकल्पः । दारदोषं भर्तेव स्वमहिम्ना युष्मद्दोषं संवरितुमिच्छति । अतः कुतो युष्माकमनर्थ इत्यर्थः ॥ १९ ॥

ननु हो मन्थना राघो घोरा नाथमहो नु न ।
तयदातवदा भीमा माभीदा बत दायत ॥ २० ॥

अन्वयः—ननु, हो, मन्थना, राघः, घोरा, नाथमहः, तयदातवदा, भीमा, माभीदाः, बत, नदायत नु ॥ २० ॥

नन्विति ॥ नन्वित्यामन्त्रणे । हो इत्याह्वाने । 'हे है व्यस्तौ समस्तौ च हूतिसंबोधनार्थयोः । हो हौ चैवंविधौ ज्ञेयौ संबुद्धयाह्वानयोरपि' इति विश्वः । मथ्नन्तीति मन्थनाः । 'मन्थ विलोडने' । कर्तरि ल्युट् । राघ्नन्ति समर्था भवन्तीति राघः 'राघृ सामर्थ्ये' । क्विप् । घोराः । क्रूराः । शत्रूणामिति भावः । नाथं महयन्ति पूजयन्तीति नाथमहः । हविग्रहणात्कर्मण्युपपदे क्विप् । तयन्ति रक्षन्तीति तया रक्षकाः । पचाद्यच् । दायन्तीति दाताः शुद्धाः । 'दैप् शोधने' । कर्तरि कः । वदन्तीति वदा वक्तारः । पचाद्यच् । तेषां द्वन्द्वस्तयदातवदाः । भीमा भयङ्करा माभीः । नञर्थमाशब्दस्य सुप्सुपेति समासः । तां ददतीति माभीदा अभयप्रदाः । एवंविधा यूयमिति शेषः । बतेति खेदे । बवयोरभेदः । न दायत नु न शुद्धाः किम् । नु पृच्छायाम् । किन्तु शुद्धा एव । काकुरत्रानुसन्धेया । 'दैप् शोधने' लोट्मध्यमपुरुषबहुवचनम् । प्रतिलोमानुलोमपादः ॥ २० ॥

किं त्यक्तापास्तदेवत्वमानुष्यकपरिग्रहैः ।
ज्वलितान्यगुणैर्गुर्वी स्थिता तेजसि मानिता ॥ २१ ॥

अन्वयः—अपास्तदेवत्वमानुष्यकपरिग्रहैः, ज्वलितान्यगुणैः, गुर्वी, तेजसि, स्थिता, मानिता, किं, त्यक्ता ॥ २१ ॥

किमिति ॥ आपास्तोऽवधीरितो देवत्वमानुष्यकयोः परिग्रहः स्वीकारो यैस्तैः । अतिदेवमानुषैरित्यर्थः । मनुष्याणां भावो मानुष्यकम् । 'योपधाद्गुरूपोत्तमाद्वुञ्' । ज्वलिता उज्ज्वलिताः । प्रकाशिता इति यावत् । अन्यगुणा असदृशगुणा यैस्तैः । 'अन्यौ विभिन्नासदृशौ' इति' वैजयन्ती । ईदृशैः । भवद्भिरिति शेषः । तेजसि प्रतापे स्थिता प्रतापैकशरणा मानिता शूरत्वाभिमानिता किमिति त्यक्ता । किमिति निर्लज्जः पलायत इति भावः ॥ २१ ॥

निशितासिरतोऽभीको न्येजतेऽमरणा रुचा ।
सारतो न विरोधी नः स्वाभासो भरवानुत ॥ २२ ॥

अन्वयः—हे अमरणाः, निशितासिरतः, अभीकः, रुचा, उत भरवान्, नः, विरोधी, स्वारतः, न्येजते न ॥ २२ ॥

निशितेति ॥ हे अमरणा मरणरहिताः, निशितासिरतोऽतितीक्ष्णखड्गरतोऽभीको निर्भीको रुचा तेजसोपलक्षितः सुष्ठ्वाभासत इति स्वाभासो रमणीयः । पचाद्यच् । उतात्यर्थमतिशयेन भरवान् । रणभरसहिष्णुरित्यर्थः । 'उतात्यर्थविकल्पयोः' इति विश्वः । ईदृशो नोऽस्माकं विरोधी शत्रुः सारतो बलतो न न्येजते न कम्पते । न प्रचलतीत्यर्थः । 'एजृ कम्पने' । लट् । अतो भवद्भिरपि स्थातव्यमेव । न चलितव्यमिति भावः ॥ २२ ॥

नन्वयं न चलतीति कथं ज्ञायते । तत्राह—

तनुवारभसो भास्वानधीरोऽविनतोरसा ।
चारुणा रमते जन्ये कोऽभीतो रसिताशिनि ॥ २३ ॥

अन्वयः—तनुवारभसः, भास्वान् , चारुणा, अविनतोरसा, अधीरः रसिताशिनि, जन्ये, अभीतः कः रमते ॥ २३ ॥

तन्विति ॥ तनुमावृणोत्याच्छादयतीति तनुवारं वर्म । कर्मण्यण् । तेन बभस्ति भासत इति तनुवारभसः । 'भस दीप्तौ' । पचाद्यच् । भास्वांस्तेजस्वी चारुणा भास्वताऽविनतेनोन्नतेनोरसा वक्षःस्थलेनोपलक्षित । एवंविधोऽप्यधीरो धैर्यरहितो रसितेन शब्दितेनैवाश्नाति ग्रसतीति रसिताशी तस्मिन् । रवेणैव विश्वप्राणहारिणीत्यर्थः । आभिक्ष्ण्ये णिनिः । जन्ये युद्धे । 'युद्धमायोधनं जन्यम्' इत्यमरः । अभीतो निर्भीकः सन्को रमते कः क्रीडति । यदि रमते तर्ह्ययमेवेति भावः । निर्भयसञ्चारादेवास्य निश्चलत्वं निश्चीयत इत्यर्थः । पूर्वश्लोकस्यायं प्रतिलोम ॥ २३ ॥

अथ पञ्चभिः कुलकमाह—विभिन्नेत्यादिभिः ॥

विभिन्नपातिताश्वीयनिरुद्धरथवर्त्मनि ।
हतद्विपनगष्ठ्यूतरुधिराम्बुनदाकुले ॥ २४ ॥

अन्वयः—विभिन्नपातिताश्वीयनिरुद्धरथवर्त्मनि, हतद्विपनगष्ठ्यूतरुधिराम्बुनदाकुले ॥ २३ ॥

आहवं विशिनष्टि—विभिन्नानि विदारितान्यत एव पातितान्यश्वीयान्यश्वसमूहाश्च ते तथा । 'पूर्वकाल—' इति समासः । तैरश्वसमूहैर्निरुद्धानि रथानां वर्त्मानि यस्मिंस्तथोक्ते । 'वृन्दे त्वश्वीयमाश्ववत्' इत्यमरः । 'केशाश्वाभ्यां यञ्छावन्यतरस्याम्' इति छप्रत्ययः । हतास्ताडिता द्विपा गजा नगाः शैलाः । "शैल वृक्षौ नगावगौ" इत्यमरः । तैः ष्ठ्यूतान्युज्झितानि । ष्ठीवतेः कर्मणि क्तः । 'छ्वोः शूडनुनासिके च' इत्यूठादेशः । तानि रुधिराण्येवाम्बूनि तेषां नदैः प्रवाहैराकुले व्याप्ते ॥ २४ ॥

देवाकानिनि कावादे वाहिकास्वस्वकाहि वा ।
काकारेभभरे काका निस्वभव्यव्यभस्वनि ॥ २५ ॥

अन्वयः—देवाकानिनि, कावादे, वाहिकास्वस्वकाहि, वा काकारेभभरे, काका, निस्वभव्यव्यभस्वनि ॥ २६ ॥

देवेति ॥ पुनश्च । देवानाकनयत्युद्दीपयत्युत्साहयतीति देवाकानी तस्मिन्देवा-

कानिनि। 'कन दीप्तौ' इति धातोर्ण्यन्ताण्णिनिः। कावाद ईषद्वादो वाक्कलहः। 'ईषदर्थे' इति कुशब्दस्य कादेशः। तद्वति कावादे। 'अर्शआदिभ्योऽच्'। वाहिका पर्यायेण रणभारोद्वहनम्। वहेः पर्याये धात्वर्थनिर्देशे ण्वुल्वक्तव्यः। वाहिकया क्रमप्रासरणक्रियया सुष्ठु शासन यथा तथाऽस्वकान्परानाजिहीतेऽभियुङ्क्ते। योजयतीति यावत्। वाहिकास्वस्वकाहास्तस्मिन्। योद्धृधर्मो युद्ध उपचर्यते। 'ओहाङ् गतौ' इति धातोर्विच्प्रत्ययः। सोमपाशब्दवत्प्रक्रिया। वाशब्दश्चार्थे। कं मदोदकमाकिरन्तीति काकारा मदस्राविणः। किरतेराङ्पूर्वात्कर्मण्यण्। एवंविधा इभभरा गजघटा यत्र तस्मिन्काकारेभभरे। काका इव काका गर्ह्या इति लक्षणया तेषामामन्त्रणम्। निस्वा निरुत्साहा भव्याः सोत्साहास्तानुभयान्व्ययन्ति संवृण्वन्तीति निस्वभव्यव्याः 'व्येञ् संवरणे'। 'आतोऽनुपसर्गे कः'। तैर्वभस्ति भासत इति निस्वभव्यव्यभस्वांस्तस्मिन्। 'अन्येभ्योऽपि दृश्यन्ते' इति क्वनिप्। सर्वतो भ्रमणात्सर्वतोभद्राख्यश्चित्रबन्धः। यथाह दण्डी—'तदिदं सर्वतोभद्रं भ्रमणं यदि सर्वतः' इति। उद्धारस्तु—चतुष्कोष्ठे चतुरङ्गबन्धक्रमेणाद्यपङ्क्तिचतुष्टये पादचतुष्टयं विलिख्यानन्तरपङ्क्तिचतुष्टयेऽप्यधः क्रमेण पादचतुष्टयलेखने प्रथमासु चतसृषु पङ्क्तिषु प्रथमः पादः सर्वतो वाच्यते, द्वितीयादिषु द्वितीय इत्यादि ॥ २५ ॥

प्रनृत्तशववित्रस्ततुरगाक्षिप्तसारथौ।
मारुतापूर्णतूणीरविक्रुष्टहतसादिनि ॥ २६ ॥

अन्वय.—प्रनृत्तशववित्रस्ततुरगाक्षिप्तसारथौ, मारुतापूर्णतूणीरविक्रुष्टहतसादिनि २६

प्रनृत्तेति ॥ प्रनृत्तशवेभ्यो नृत्यत्कबन्धेभ्यो वित्रस्तैः क्षुभितैस्तुरगैराक्षिप्ता अवधूताः सारथयो यत्र तस्मिन्। तथा मारुतेनापूर्णैर्व्याप्तैस्तूणीरैर्निषङ्गैर्विक्रुष्टाः शब्दायमाना हतास्ताडिताः सादिनस्तौरङ्गिका यत्र तस्मिन्। पाठान्तरे मारुतापूर्णतूणीरैर्विकृष्टा आकर्षिता अत एव हता मारिताः सादिनोऽश्ववारा यत्र तस्मिन् ॥ २६ ॥

ससत्त्वरतिदे नित्यं सदरामर्षनाशिनि।
त्वराधिककसन्नादे रमकत्वमकर्षति ॥ २७ ॥

अन्वय.—ससत्त्वरतिदे, नित्यं, सदरामर्षनाशिनि, त्वराधिककसन्नादे, रमकत्वम्, अकर्षति ॥ २७ ॥

ससत्त्वेति ॥ ससत्त्वानां सत्त्ववतां रतिदे रागप्रदे नित्यं सदराणां सभयानाममर्षनाशिनि क्रोधहारिणि त्वरयोत्साहेनाधिकं कसन्तो विकसन्तो नादा यत्र तस्मिन्। रमयतीति रमकः। रमधातोर्वुञ्। तस्याकादेशः तद्भावो रमकत्वम्। रणकर्मगा पररमकत्वमकर्षत्यनुवृत्ति। वीराणां परस्परमुत्साहं रणकर्मगा इत्योरयतीत्यर्थः। अर्धभ्रमकः ॥ २७ ॥

आसुरे लोकवित्रासविधायिनि महाहवे।
युष्माभिरुन्नतिं नीतं निरस्तमिह पौरुषम् ॥ २८ ॥

अन्वयः—आसुरे, लोकवित्रासविधायिनि, महाहवे, युष्माभिः, उन्नतिं, नीतं, पौरुषं, निरस्तम्, इह ॥ २८ ॥

आसुर इति ॥ एवंविध आसुरेऽसुरसम्बन्धिनो लोकवित्रासविधायिनि लोकभयंकरे महाहवे महायुद्धे युष्माभिरुन्नतिं वृद्धिं नीतं प्रापितं पौरुषं पुरुषकर्म निरस्तं नाशितमिह सङ्ग्रामे ॥ २८ ॥

इति शासति सेनान्यां गच्छतस्ताननेकधा।
निषिध्य हसता किंचित्तस्थे तत्रान्धकारिणा ॥ २९ ॥

अन्वयः—इति, सेनान्यां, शासति, अनेकधा, गच्छतः, तान्, निषिध्य, तत्र अन्धकारिणा, किञ्चित्, हसता, तस्थे ॥ २९ ॥

इतीति ॥ इतीत्थं सेनान्यां स्कन्दे शासत्याज्ञापयत्यनेकधा गच्छत पलायमानांस्तान्गणान्निषिध्य निवार्यान्धकारिणा हरेण किंचिद्धसता तस्थे स्थितम्। भावे लिट्। निरोष्ठ्यः ॥ २९ ॥

मुनीषुदहनातप्ताँल्लज्जया निविवृत्स्यतः।
शिवः प्रह्लादयामास तान्निषेधहिमाम्बुना ॥ ३० ॥

अन्वयः—मुनीषुदहनातप्तान्, लज्जया, निविवृत्स्यतः, तान्, शिवः, निषेधहिमाम्बुना, प्रह्लादयामास ॥ ३० ॥

मुनीति ॥ मुनेरिषव एव दहनस्तेनातप्तान्पीडितांस्तथा लज्जया रणभङ्गाच्छालीनत्वेन निविवृत्स्यतो निर्वर्तिष्यमाणान्। 'वृद्भ्यः स्यसनोः' इति विकल्पात्परस्मैपदम्। तान्गणाञ्छिवो निषेधो मा भैष्ट मा पलायतेति निवारणवचनं स एव हिमाम्बु शीतोदकं तेन प्रह्लादयामास। रूपकालङ्कारः ॥ ३० ॥

द्रूनास्तेऽरिबलादूना निरेभा बहु मेनिरे।
भीताः शितशराभीताः शङ्करं तत्र शङ्करम् ॥ ३१ ॥

अन्वयः—द्रूनाः, अरिबलात्, ऊना, निरेभाः, भीताः, शितशराभीताः, ते, तत्र, शङ्करं, शङ्करं, मेनिरे ॥ ३१ ॥

द्रूना इति ॥ द्रूनाः शरतप्ताः। 'ल्वादिभ्यः' इति निष्ठानत्वम्। अरिबलाच्छत्रुबलादूना ऊनबलाः। 'पञ्चमी विभक्ते' इति पञ्चमी। निरेभा निःशब्दाः।

भीतास्त्रस्ताः । कुतः यतः शितस्तीक्ष्णैः शरैरभीता अभिव्याप्ताः । इणः कर्मणि क्तः । ते गणास्तत्र रणे शङ्करमभयवचनेन सुखकरं शङ्करं शिवं बहु यथा तथा मेनिरेऽमन्यन्त । पादाद्यन्तयमकम् ॥ ३१ ॥

महेषुजलधौ शत्रोर्वर्तमाना दुरुत्तरे ।
प्राप्य पारमिवेशानमाशश्वास पताकिनी ॥ ३२ ॥

अन्वयः—दुरुत्तरे, शत्रोः, महेषुजलधौ, वर्तमाना, पताकिनी, ईशानं, पारमिव, प्राप्य, आशश्वास ॥ ३२ ॥

महेष्विति ॥ दुरुत्तरे दुस्तरे शत्रोः सम्बन्धिनि महेषुजलधौ महति बाणसागरे वर्तमाना पताकिनी सेनेशानं शिवं पारं परतीरमिव । 'पारावारे परार्वाची' इत्यमरः । प्राप्याशश्वास प्राणितिस्म ॥ ३२ ॥

स बभार रणापेतां चमूं पश्चादवस्थिताम् ।
पुरःसूर्यादपावृत्तां छायामिव महातरुः ॥ ३३ ॥

अन्वयः—सः, रणापेतां, पश्चात्, अवस्थितां, चमूं पुरःसूर्यात्, अपावृत्तां, छायां, महातरुरिव, बभार ॥ ३३ ॥

स इति ॥ स शिवो रणापेतां रणादपवृत्तां पराङ्मुखीभूतामत एव पश्चात्पृष्ठभागेऽवस्थितां चमूं पुरोऽग्रे स्थितः सूर्यः पुरःसूर्यः । रणोपमानमेषः । तस्मादपावृत्तां परावृत्तां छायां महातरुरिव बभार । छायां तरुरिवात्मैकशरणां तां चमूं न मुमोचेत्यर्थः ॥ ३३ ॥

मुञ्चतीशे शराञ्जिष्णौ पिनाकस्वनपूरितः ।
दध्वान ध्वनयन्नाशाः स्फुटन्निव धराधरः ॥ ३४ ॥

अन्वयः—ईशे, जिष्णौ, शरान्, मुञ्चति सति, पिनाकस्वनपूरितः, धराधरः, स्फुटन्निव, आशाः, ध्वनयन्, दध्वान ॥ ३४ ॥

मुञ्चतीति ॥ ईशे हरे कर्तरि जिष्णावर्जुने विषये शरान्मुञ्चति सति पिनाकस्य शिवकार्मुकस्य स्वनेन ध्वनिना पूरितो धराधर इन्द्रकीलः स्फुटन्निव विदीर्यमाण इवेत्युत्प्रेक्षा । आशा दिशो ध्वनयञ्शब्दयुक्ताः कुर्वन्दध्वान शब्दमकरोत् । 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' इत्यमरः ॥ ३४ ॥

तद्गणा ददृशुर्भीमं चित्रसंस्था इवाचलाः ।
विस्मयेन तयोर्युद्धं चित्रसंस्था इवाचलाः ॥ ३५ ॥

अन्वयः—भीमं तयोः, तत्, युद्धं, गणाः चित्रसंस्थाः, अचलाः इव, चित्रसंस्था-इव, अचलाः, विस्मयेन, ददृशुः ॥ ३५ ॥

तदिति ॥ भीमं तयोर्हरपाण्डवयोस्तत्प्रसिद्धं युद्धं गणाः प्रमथाश्चित्रसंस्थाश्चित्राकारा अचलाः शैला इव । तथा चित्र आलेख्ये संस्था स्थितिर्येषां ते चित्रसंस्थाश्चित्रलिखिता इवाचला आश्चर्यवशान्निश्चलाः सन्तो विस्मयेन ददृशुः ॥ ३५ ॥

परिमोहयमाणेन शिक्षालाघवलीलया ।
जैष्णवी विशिखश्रेणी परिजह्रे पिनाकिना ॥ ३६ ॥

अन्वयः—शिक्षालाघवलीलया, परिमोहयमाणेन, पिनाकिना, जैष्णवी, विशिखश्रेणी., परिजह्रे ॥ ३६ ॥

परीति ॥ शिक्षालाघवलीलयाभ्यासपाटवातिशयेन हेतुना परिमोहयमाणेन व्यामोहयता । 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इति परस्मैपदे प्राप्ते 'न पादमि—' इत्यादिना तत्प्रतिषेधादात्मनेपदं शानच् । 'णेर्विभाषा' इति कृत्स्थस्य नस्य वा णत्वम् । पिनाकिना हरेण जिष्णोरर्जुनस्येयं जैष्णवी विशिखश्रेणी बाणसङ्घात. परिजह्रे निरस्ता ॥ ३६ ॥

अवद्यन्पत्त्रिणः शम्भोः सायकैरवसायकैः ।
पाण्डवः परिचक्राम शिक्षया रणशिक्षया ॥ ३७ ॥

अन्वयः—पाण्डव, अवसायकैः, सायकैः, शम्भो, पत्त्रिणः, अवद्यन् , शिक्षया, रणशिक्षया, परिचक्राम ॥ ३७ ॥

अवद्यन्निति ॥ पाण्डवोऽर्जुनोऽवसायकैरवसानकरैः । स्यतेर्ण्यन्ताण्ण्वुल्प्रत्यय. । सायकैर्बाणैः शम्भो. पत्त्रिणः शरानवद्यन्खण्डयन् । द्यतेः शतृप्रत्ययः । 'ओतः श्यनि' इत्योकारलोपः । शिक्षया शक्तुं प्रभवितुमिच्छया । उत्साहेनेत्यर्थः । रणे शिक्षयाभ्यासेन च परिचक्राम । उत्साहनैपुण्याभ्यां चचारेत्यर्थः ॥ ३७ ॥

चारचुञ्चुश्चिरारेची चञ्चच्चीररुचा रुचः ।
चचार रुचिरश्चारु चारैराचारचञ्चुरः ॥ ३८ ॥

अन्वयः—चारचुञ्चुः, चिरारेची, चञ्चच्चीररुचा, रुचः, रुचिरः, आचारचञ्चुरः, चारु, चारैः चचार ॥ ३८ ॥

चारैरिति ॥ चारैर्गतिविशेषैर्वित्त इति चारचुञ्चुः । 'तेन वित्तश्चुञ्चुप्चणपौ' इति चुञ्चुप्प्रत्ययः । चिरमारेचयति रिक्तीकरोति शत्रूनिति चिरारेची । चञ्चतश्चलतश्चीरस्य वल्कलस्य रुचा प्रभया । रोचत इति रुचः शोभमानः । 'इगुपध—' इति कः । रुचिरः सुन्दरः । चञ्चूर्यते भृशं चरतीति चञ्चुरः । चरतेर्यङन्तात्पचाद्यच् । 'चरफलोश्च' इति नुमागमः । 'यङोऽचि च' इति यङो लुक् । आचा-

स्य युद्धव्यवहारस्य चञ्चुरो भृशमाचरितः स मुनिश्चारं यथा तथा चारैश्चक्रादिबन्धैर्गतिविशेषैश्चचार । 'चारः प्रियालवृक्षे स्याद्गता बन्धापसर्पयोः' इति विश्वः । व्यक्षरः ॥ ३८ ॥

स्फुरत्पिशङ्गमौर्वीकं धुनानः स बृहद्धनुः ।
धृतोल्कानलयोगेन तुल्यमंशुमता बभौ ॥ ३९ ॥

अन्वयः—सः, स्फुरत्पिशङ्गमौर्वीकं, बृहद्धनु, धुनानः, धृतोल्कानलयोगेन, अंशुमता, तुल्यं, बभौ ॥ ३९ ॥

स्फुरदिति ॥ स मुनिरर्जुनः स्फुरन्ती पिशङ्गी पिशङ्गवर्णा मौर्वी ज्या यस्य तत्तथोक्तम् । 'नद्यृतश्च' इति कप्प्रत्ययः । बृहद्धनुर्गाण्डीवं धुनानः कम्पयन् । उल्कैवानलस्तेन धृतो योगो येन तेनांशुमतार्केण सूर्येण तुल्यं बभौ । उपमा ॥ ३९ ॥

पार्थबाणाः पशुपतेरावव्रुर्विशिखावलीम् ।
पयोमुच इवारन्ध्राः सावित्रीमंशुसंहतिम् ॥ ४० ॥

अन्वयः—पार्थबाणाः, पशुपतेः, विशिखावलीं, सावित्रीं, अंशुसंहतिं, रन्ध्राः, पयोमुच इव, आवव्रुः ॥ ४० ॥

पार्थेति ॥ पार्थबाणा अर्जुनशराः पशुपतेर्विशिखावलीं शरसङ्घातम् । सवितुरियं सावित्री तामंशुसंहतिं किरणसमूहमरन्ध्रा निबिडाः पयोमुचो मेघा इव । आवव्रुस्तिरोदधुः ॥ ४० ॥

शरवृष्टिं विधूयोर्वीमुदस्तां सव्यसाचिना ।
रुरोध मार्गणैर्मार्गं तपनस्य त्रिलोचनः ॥ ४१ ॥

अन्वयः—त्रिलोचनः, सव्यसाचिना, उदस्तां, उर्वीं, शरवृष्टिं, मार्गणैः, विधूय, तपनस्य, मार्गम्, रुरोध ॥ ४१ ॥

शरेति ॥ त्रिलोचनः शिवः । सव्येन सचते समवैतीति तेन सव्यसाचिनार्जुनेनोदस्तां क्षिप्तामुर्वीं महतीं शरवृष्टिं मार्गणैः शरैर्विधूय निरस्य तपनस्य रवेर्मार्गं रुरोधावव्रे ॥ ४१ ॥

तेन व्यातेनिरे भीमा भीमार्जनफलाननाः ।
न नानुकम्प्य विशिखाः शिखाधरजवाससः ॥ ४२ ॥

अन्वयः—तेन, भीमाः, भीमार्जनफलाननाः, शिखाधरजवाससः, विशिखाः, अनुकम्प्य, न, व्यातेनिरे, (इति) न ॥ ४२ ॥

तेनेति ॥ तेन शिवेन भीमा भयङ्करास्तया भियो भयस्य मार्जनं निरासस्तदेव

फलं प्रयोजनं येषां तान्याननान्यग्राणि येषां ते भामार्जनफलाननाः। तथा शिखाधरा मयूरास्तेषु जातानि शिखाधरजानि बर्हाणि तानि वासांसीव वासांसि पक्षा येषां ते शिखाधरजवाससः। मयूरपक्षिण इत्यर्थः। विशिखा बाणा अनुकम्प्य कृपां कृत्वा न ब्यातेनिर इति न। किं त्वनुकम्प्यैवेत्यर्थः। अनुजिघृक्षुत्वादिति भावः। सम्भाव्य-निषेधने द्वौ प्रतिषेधार्थावित्युक्तम्। शृङ्खलायमकम्॥ ४२॥

द्युवियद्गामिनी तारसंरावविहतश्रुतिः।
हैमीषुमाला शुशुभे विद्युतामिव संहतिः॥ ४३॥

अन्वयः—द्युवियद्गामिनी, तारसंरावविहतश्रुतिः, हैमी, इषुमाला, विद्युतां, संहतिः, इव, शुशुभे॥ ४३॥

द्युवियादिति॥ द्यां स्वर्गं वियदन्तरिक्षं च गामिनी व्यापिनी द्युवियद्गामिनी। द्वितीयाप्रकरणे श्रितादिषु गम्यादीनामुपसंख्यानात्समासः। तारेणोच्चैस्तरेण संरा-वेण नादेन विहता विद्धाः श्रुतयः कर्णा यया सा तथोक्ता। हैमी हेममयीषुमाला शिवशरावलिर्विद्युतां संहतिरिवोक्तविशेषणा विद्युन्मालेव। शुशुभे। चतुर्थपादवर्णानां त्रिपाद्यां सम्भवाद्गूढचतुर्थपादमाहुः॥ ४३॥

विलङ्घ्य पत्रिणां पङ्क्तिं भिन्नः शिवशिलीमुखैः।
ज्यायो वीर्यमुपाश्रित्य न चकम्पे कपिध्वजः॥ ४४॥

अन्वयः—शिवशिलीमुखैः, पत्रिणां, पङ्क्तिं, विलङ्घ्य, भिन्नः, कपिध्वजः, ज्यायः, वीर्यम्, उपाश्रित्य, न, चकम्पे॥ ४४॥

विलङ्घ्येति॥ शिवशिलीमुखैः पत्रिणां पङ्क्तिं निजशरावलिं विलङ्घ्यातिक्रम्य भिन्नो विद्धः कपिध्वजोऽर्जुनो ज्यायः प्रशस्तम्। 'वृद्धप्रशस्ययोर्ज्यायान्' इत्यमरः। वीर्यं सत्त्वमुपाश्रित्यावस्थाय न चकम्पे न चचाल। किंतु तान्सहन्नवतस्थावित्यर्थः॥४४॥

जगतीशरणे युक्तो हरिकान्तः सुधासितः।
दानवर्षी कृताशंसो नागराज इवाबभौ॥ ४५॥

अन्वयः—जगतीशरणे, युक्तः, हरिकान्तः, सुधासितः, दानवर्षी, कृताशंसः, (सोऽर्जुनः) नागराजः, इव, आबभौ॥ ४५॥

जगतीति॥ अर्थत्रयवाची श्लोकोऽयम्। तत्रादावगराज इति पदच्छेदमाश्रित्य प्रथमोऽर्थोऽभिधीयते—ईशस्य रणे युक्तः शक्तः। अन्यत्र जगतीशरणे भूरक्षणे युक्तः स्थितः। विधिनेति शेषः। हरिः सिंह इव कान्तो मनोहरः। अन्यत्र हरीणां सिंहानां कान्त आवासदानात्प्रियः। सुष्ठु दधाति पालयति प्रजा इति सुधाः। क्विबन्तः।

असितः कृष्णवर्णः। ततो विशेषणसमासः। अन्यत्र सुधा लेपद्रव्यविशेषस्तद्वत्सितो धवलः। दानवर्षी बहुप्रदः कृताशंसः कृतजयाभिलाषः। अन्यत्र दानवैर्दस्यैर्ऋषिभिः इना कामेन च कृताशंसा नानाफलाभिलाषो यस्मिन्स ना नरोऽर्जुनः। अगराजो हिमवानिव जगत्याबभाविरयेकोऽर्थः॥ ॥ अथैरावतसाम्यमुच्यते—जगतीं भुवं श्यन्ति तनूकुर्वन्तीति ते जगतीशा राक्षसास्तेषां रणस्तत्र युक्तो विहितः समर्थः। हरिकान्त इन्द्रप्रियः। उभयत्रापि समानमेतत्। सुधासितोऽमृतस्वच्छः। एकत्र शीलतः अन्यत्र वर्णत इति विवेकः। दानवर्षी धनप्रदो मदस्रावी च। कृताशंस उभयत्र कृतजिगीषः। पार्थो नागराज एव ऐरावत इवाबभाविति द्वितीयोऽर्थः॥ ॥ अथ शेषौपम्यमुच्यते—जगतीशरणे भूरक्षणे युक्तो नियुक्तः। दैवेनेति शेषः। 'शरणं गृहरक्षित्रोः' इत्यमरः। हरिकान्तः कृष्णप्रियः। उभयत्रापि तुल्यम्। सुष्ठु दधातीति सुधा। वसुधेति केचित्। एकदेशग्रहणात्समुदायग्रहणम्। तत्र सितो बद्धः। 'षिञ् बन्धने' क्तः। अन्यत्र सुधयामृतेन सितो बद्धः। अमृतप्रिय इत्यर्थः। दानवाश्च ऋषयश्च ईर्लक्ष्मीश्च (ताभिः) कृताशंसो विहितप्रशंसः। उभयत्रापि तुल्यमेतत्। सोऽर्जुनो नागराजः शेष इवाबभाविति। तृतीयोऽर्थः॥ ४५॥

विफलीकृतयत्नस्य क्षतबाणस्य शम्भुना।
गाण्डीवधन्वनः खेभ्यो निश्चक्राम हुताशनः॥ ४६॥

अन्वयः—शम्भुना, क्षतबाणस्य, विफलीकृतयत्नस्य, गाण्डीवधन्वनः, खेभ्यः, हुताशनः, निश्चक्राम॥ ४६॥

विफलीति॥ शम्भुना क्षतबाणस्यात एव विफलीकृतयत्नस्य निष्फलप्रयत्नस्य गाण्डीवं धनुर्यस्य तस्य गाण्डीवधन्वनोऽर्जुनस्य। 'वा संज्ञायाम्' इत्यनङादेशः। खेभ्य इन्द्रियरन्ध्रेभ्यः। 'खमिन्द्रिये सुखे स्वर्गे' इति विश्वः। हुताशनोऽग्निर्निश्चक्राम निष्क्रान्तः। क्रोधादिति भावः॥ ४६॥

स पिशङ्गजटावलिः किरन्नुरुतेजः परमेण मन्युना।
ज्वलितौषधिजातवेदसा हिमशैलेन समं विदिद्युते॥ ४७॥

अन्वयः—पिशङ्गजटावलिः, परमेण, मन्युना, उरुतेजः, किरन्, सः, ज्वलितौषधिजातवेदसा, हिमशैलेन, समं, विदिद्युते॥ ४७॥

स इति॥ पिशङ्गजटावलिः पिशङ्गजटाजूटः परमेणोत्कृष्टेन मन्युना क्रोधेनोरु महत्तेजः किरन्निक्षिपन्सोऽर्जुनो ज्वलिता ओषधयस्तृणज्योतींषि जातवेदा दवाग्निश्च यस्मिंस्तेन हिमशैलेन समं तुल्यं हिमाद्रिरिव विदिद्युते हिमाद्रिवच्छुशुभ इति बिम्बप्रतिबिम्बभावोपमा॥ ४७॥

शतशो विशिखानवद्यते भृशमस्मै रणवेगशालिने ।
प्रथयन्ननिवार्यवीर्यतां प्रजिघायेषुमघातुकं शिवः ॥ ४८ ॥

अन्वयः—शिवः, शतशः, विशिखान्, अवद्यते, रणवेगशालिने, अस्मै, भृशम्, अनिवार्यवीर्यताम्, प्रथयन्, (किन्तु) अघातुकम्, इषुम्, प्रजिघाय ॥ ४८ ॥

शतश इति । शिवः शतशो विशिखानवद्यते खण्डयते रणवेगशालिने रणसंरम्भशोभिनेऽस्मै पार्थाय भृशमत्यर्थमनिवार्यवीर्यताम् । निजामिति शेषः । तस्मै प्रथयन्दर्शयन् । किं त्वघातुकममारकम् । 'लषपत—' इत्यादिना हन्तेरुकञ् । इषुम् । जातावेकवचनम् । प्रजिघाय प्रयुयुजे । 'हि गतौ' इति धातोर्लिट् । 'हेरचङि' इति कुत्वम् ॥ ४८ ॥

शम्भोर्धनुर्मण्डलतः प्रवृत्तं तं मण्डलादंशुमिवांशुभर्तुः ।
निवारयिष्यन्विदधे सिताश्वः शिलीमुखच्छायवृतां धरित्रीम् ॥४९॥

अन्वयः—सिताश्वः, शम्भोः, धनुः, मण्डलतः, प्रवृत्तं, तम्, अंशुभर्तुः, मण्डलात्, (प्रवृत्तम्) अंशुम्, इव, निवारयिष्यन्, धरित्रीं, शिलीमुखच्छायवृतां, विदधे ॥ ४९ ॥

शम्भोरिति ॥ सिताश्वोऽर्जुनः शंभोर्धनुर्मण्डलतो धनुर्वलयात्प्रवृत्तं निष्क्रान्तं तमिषुम् । अंशुभर्तुरर्कस्य मण्डलात्प्रवृत्तमंशुमिव । अत्रापीषुवज्जातावेकवचनम् । निवारयिष्यन्निवारयितुकामः । क्रियार्थक्रियायां लृटि तस्य शत्रादेशः । धरित्रीं भुवं शिलीमुखानां छाया शिलीमुखच्छायम् । 'छाया बाहुल्ये' इति नपुंसकत्वम् । तेन वृतां व्याप्तां विदधे कृतवान् । शरजालच्छायावृतां धरित्रीमकरोदित्यर्थः । उपमालङ्कारः ॥ ४९ ॥

घनं विदार्यार्जुनबाणपूगं ससारबाणोऽयुगलोचनस्य ।
घनं विदार्यार्जुनबाणपूगं ससार बाणोऽयुगलोचनस्य ॥५०॥

अन्वयः—अयुगलोचनस्य, ससारबाणः, घनम्, अर्जुनबाणपूगं, विदार्य घनम् विदार्य, अर्जुनबाणपूगम्, (ससार) (तदानीमेव) युगलोचनस्यबाणः ससार ॥५०॥

घनमिति ॥ अयुगलोचनस्य विषमनेत्रस्येशस्यालोचनस्य । लोच्यतेऽसौ लोचनः । कर्मणि ल्युट् । न लोचनोऽलोचनस्तस्यालोचनस्याचाक्षुषज्ञानविषयस्य सम्बन्धी सारो बलं बाणः शब्दस्ताभ्यां सारबाणाभ्यां स्थिरशब्दाभ्यां सह वर्तत इति ससारबाणः । बवयोरभेद इत्युक्तम् । न युज्यते कुत्रापीत्ययुक्सङ्गरहितः । क्विप् । बाणः शरः । जातावेकवचनम् । घनं सान्द्रमर्जुनस्य बाणपूगं शरव्रातं विदार्य विभिद्य घनं निबिडं विदार्यो भूमिकूष्माण्ड्यो लताविशेषा अर्जुनाः ककुभवृक्षा बाणा नीलसैरेयकाः पूगा

क्रमुकास्तेषाम्। 'विभाषा वृक्ष-' इत्यादिना द्वन्द्वैकवद्भावः। विदार्यार्जुनबाणपूगं ससार। विवेशेत्यर्थः। 'सृ गतौ'। यद्वा तदानीमेव युगलोचनस्यार्जुनस्य बाणः ससारेत्यर्थः॥ ५०॥

रुजन्महेषून्बहुधाशुपातिनो मुहुः शरौघैरपवारयन्दिशः।
चलाचलोऽनेक इव क्रियावशान्महर्षिसंघैर्बुबुधे धनञ्जयः॥५१॥

अन्वयः—बहुधाशुपातिनः, महेषून्, मुहुः शरौघैः, रुजन्, दिशः, (च) अपवारयन्, क्रियावशात्, चलाचलः, धनञ्जयः, महर्षिसङ्घैः, अनेकः, इव, बुबुधे॥ ५१॥

रुजन्नित्यादि॥ बहुधाशुपातिनः शीघ्रमापततो महेषून्मुहुः शरौघैः रुजन्भञ्जयन्। तथा दिशश्चापवारयन्नाच्छादयन्क्रियावशात्तत्तद्गतिवशाच्चलाचलोऽतिचञ्चलो धनञ्जयोऽर्जुनो महर्षिसंघैरनेको बहुविध इव बुबुधे ददृशे॥ ५१॥

विकाशमीयुर्जगतीशमार्गणा विकाशमीयुर्जगतीशमार्गणाः।
विकाशमीयुर्जगतीशमार्गणा विकाशमीयुर्जगतीशमार्गणाः॥५२॥

अन्वयः—जगतीशमार्गणाः, विकाशम्, ईयुः, जगति, ईशमार्गणाः, विकाशम्, ईयुः, जगतीशमार्गणाः, विकाशम्, ईयुः, जगतीशमार्गणाः, विकाशम्, ईयुः॥ ५२॥

विकाशमिति॥ जगतीशस्य पृथिवीपतेरर्जुनस्य मार्गणा बाणा विकाशं विस्तारमीयुः। तथा जगति लोके ईशमार्गणाः शम्भुशरा विकाशं विषमगतिमीयुः। भङ्गमीयुरित्यर्थः। तथा जगतीं पृथ्वीं श्यन्ति तनूकुर्वन्तीति जगतीशा दानवाः। 'आतोऽनुपसर्गे कः'। तान्मारयन्तीति जगतीशमार्। म्रियतेर्ण्यन्तात्क्विप्। ते च ते गणाः प्रमथाश्च जगतीशमार्गणा विकाशमुल्लासमीयुः। हर्षं प्रापुरित्यर्थः। अहो देवेऽप्यस्य पराक्रमप्रसर इति विस्मयादिति भावः। तदानीं मार्गयन्तीति मार्गणा अन्वेषकाः। कर्तरि ल्युट्। जगतीशस्य त्रैलोक्यनाथस्य मार्गणा अन्वेषकाः शिवद्रष्टारो देवर्ष्यादयो वीनां पक्षिणां काशो गतिरत्रेति विकाशमाकाशमीयुः। दिदृक्षयेति भावः॥५२॥

सम्पश्यतामिति शिवेन वितायमानं
लक्ष्मीवतः क्षितिपतेस्तनयस्य वीर्यम्।
अङ्गान्यभिन्नमपि तत्त्वविदां मुनीनां
रोमाञ्चमञ्चिततरं बिभराम्बभूवुः॥ ५३॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये पञ्चदशः सर्गः।

अन्वयः—इति, शिवेन, वितायमानम्, लक्ष्मीवतः क्षितिपतेः, तनयस्य, वीर्यम्, सम्पश्यताम्, तत्वविदाम्, अपि, मुनीनाम्, अङ्गानि, अभिन्नम्, अञ्चिततरम्, रोमाञ्चम्, बिभराम्बभूवुः ॥ ५३ ॥

सम्पश्यतामिति ॥ इतीत्थं शिवेन वितायमानं विस्तार्यमाणम्। 'तनोतेर्यकि' इति वैकल्पिक आकारादेशः। लक्ष्मीवतो जयश्रीमतः। 'मादुपधायाः-' इत्यादिना मतुपो मस्य वकारः। क्षितिपतेस्तनयस्यार्जुनस्य वीर्यं शौर्यं सम्पश्यतां तत्त्वविदामपि हरेरंशावतारोऽयमिति विदुषामपि। किमुतान्येषामिति भावः। मुनीनामङ्गानि गात्राण्यभिन्नमविरलमञ्चिततरमतिरुचिरं रोमाञ्चं रोमहर्षं बिभरांबभूवुर्बभ्रुः। 'भीह्री-' इत्यादिना विकल्पादाम्प्रत्ययः ॥ ५३ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीय-
काव्यव्याख्यायां घण्टापथसमाख्यायां पञ्चदशः सर्गः समाप्तः ॥

षोडशः सर्गः।

ततः किराताधिपतेरलघ्वीमाजिक्रियां वीक्ष्य विवृद्धमन्युः।
स तर्कयामास विविक्ततर्कश्चिरं विचिन्वन्निति कारणानि ॥ १ ॥

अन्वयः—ततः, किराताधिपतेः, अलघ्वीम्, आजिक्रियाम्, वीक्ष्य, विवृद्धमन्यु, विविक्ततर्कः, सः, चिरं कारणानि, विचिन्वन्, इति, तर्कयामास ॥ १ ॥

तत इति ॥ ततोऽनन्तरं किराताधिपतेः सम्बन्धिनीमलघ्वीं गुर्वीमाजिक्रियां रणकर्म वीक्ष्य विवृद्धमन्युर्विवृद्धकोपो विविक्तो निष्कलङ्कस्तर्क ऊहो ज्ञानं वा यस्य सोऽर्जुनः कारणानि रणभराशक्तिकारणानि विचिन्वन्विमृशन्नितीत्थं वक्ष्यमाणप्रकारेण तर्कयामासाभ्यूहितवान् ॥ १ ॥

अथ त्रयोविंशतिश्लोकैर्वितर्कमेवाह—

मदस्रुतिश्यामितगण्डलेखाः क्रामन्ति विक्रान्तनराधिरूढाः।
सहिष्णवो नेह युधामभिज्ञा नागा नगोच्छ्रायमिवाक्षिपन्तः ॥२॥

अन्वयः—(इह) मदस्रुतिश्यामितगण्डलेखाः, विक्रान्तनराधिरूढाः, सहिष्णव, युधाम्, अभिज्ञाः, नगोच्छ्रायम्, आक्षिपन्तः, इव, नागाः, इह, न, क्रामन्ति ॥ २ ॥

मदेत्यादि ॥ इहास्मिन्युद्धे मदस्रुतिभिर्मदप्रवाहैः श्यामाः कृताः श्यामिता गण्डलेखाः कपोलभागा येषां ते विक्रान्ताः पराक्रमं कुर्वन्तः। कर्तरि क्तः। 'शूरो वीरश्च

विक्रान्तः' इत्यमरः । तैर्नरैरधिरूढाः सहिष्णवो रणभरक्षमा युधां युद्धानामभिज्ञाः । शिक्षिता इत्यर्थः । कृद्योगात्कर्मणि षष्ठी । किं च । नगानामुच्छ्रायं पर्वतानामौन्नत्यम् । घञन्तेनोपसर्गस्य समासो नोपसृष्टाद्घञ्प्रत्ययः । 'श्रिणीभुवोऽनुपसर्गे' इत्यत्रानुपसर्ग इति निषेधात् । आक्षिपन्तः प्रतिषेधयन्त इव स्थिताः । तथोन्नता इत्यर्थः । नागा गजा इह सङ्ग्रामे न क्रामन्ति न चरन्ति । यथा युद्धान्तरेष्विति शेषः । एवमुत्तरत्रापि सर्वत्र द्रष्टव्यम् । तथापि कथं मे शक्तिह्रासोऽयमिति सर्वत्र तात्पर्यार्थः ॥ २ ॥

विचित्रया चित्रयतेव भिन्नां रुचं रवेः केतनरत्नभासा ।
महारथौघेन न सन्निरुद्धा पयोदमन्द्रध्वनिना धरित्री ॥ ३ ॥

अन्वयः—विचित्रया, केतनरत्नभासा, भिन्नां, रवेः, रुचं, चित्रयता, इव, पयोदमन्द्रध्वनिना, महारथौघेन, धरित्री, न, सन्निरुद्धा ॥ ३ ॥

विचित्रेति ॥ विचित्रया नानावर्णया केतनानां रत्नानि तेषां भासा प्रभया भिन्नां संवलितां रवे रुचं कान्तिं चित्रयता विचित्रवर्णां कुर्वतेव स्थितेनेति केतनौन्नत्यनिमित्तेयमुत्प्रेक्षा पयोदमन्द्रध्वनिना मेघगम्भीरघोषेण महतां रथानामोघेन समूहेन धरित्री न संनिरुद्धा नावृता ॥ ३ ॥

समुल्लसत्प्रासमहोर्मिमालं परिस्फुरच्चामरफेनपङ्क्ति ।
विभिन्नमर्यादमिहातनोति नाश्वीयमाशा जलधेरिवाम्भः ॥ ४ ॥

अन्वयः—इह, समुल्लसत्प्रासमहोर्मिमालं, परिस्फुरच्चामरफेनपङ्क्ति, अश्वीयं, जलधेः, अम्भः, इव, विभिन्नमर्यादम्, आशाः, न, आतनोति ॥ ४ ॥

समुल्लसदिति ॥ इह युद्धे प्रासाः कुन्ताः । 'प्रासस्तु कुन्तः' इत्यमरः । ते महोर्मय इव तेषां मालाः समुल्लसन्त्यो यत्र तत्समुल्लसत्प्रासमहोर्मिमालम् । चामराणि फेना इव चामरफेनास्तेषां पङ्क्तयः परिस्फुरन्त्यश्चामरफेनपङ्क्तयो यत्र तत्तथोक्तम् । अश्वीयमश्वसमूहः । 'वृन्दे त्वश्वीयमाश्ववत्' इत्यमरः । जलधेरम्भ इव विभिन्नमर्यादमुच्छृङ्खलं यथा तथाशा दिशो नातनोति नावृणोति ॥ ४ ॥

हताहतेत्युद्धतभीमघोषैः समुज्झिता योद्धृभिरभ्यमित्रम् ।
न हेतयः प्राप्ततडित्त्विषः खे विवस्वदंशुज्वलिताः पतन्ति ॥५॥

अन्वयः—हत, आहत, इति, उद्धतभीमघोषैः, योद्धृभिः, अभ्यमित्रं, समुज्झिता, विवस्वदंशुज्वलिताः, प्राप्ततडित्त्विषः, हेतयः, खे, न, पतन्ति ॥ ५ ॥

हतेति ॥ हत प्रहरताहत विध्यत । हन्तेर्लोट् । मध्यमपुरुषबहुवचनम् । 'अनुदा-

त्तोपदेश—' इत्यादिनानुनासिकलोपः । आहतेत्यत्र कर्मणः प्रयोगासंभवेऽपि हन्तेः स्वाभाविकसकर्मकत्वस्यानपायात् । अकर्मकत्वस्य चात्र विवक्षितत्वेन कर्मनिवृत्त्यैव तन्निवृत्तेः 'आङो यमहनः' इत्यात्मनेपदम् । इत्येवमुद्धताः प्रगल्भा भीमाश्च घोषा येषां तैर्योद्धृभिर्योधैरभ्यमित्रममित्रानभि समुज्झिता मुक्ता विवस्वतोंऽशुभिः । प्रतिफलितैरिति भावः । ज्वलिता दीपिता अत एव प्रासास्तद्विशां त्विष इव त्विषो याभिस्ता हेतयः शस्त्राणि खे न पतन्ति । समुल्लसन्तो न दृश्यन्त इत्यर्थः । 'हेतिः स्यादायुधे' इति विश्व. ॥ ५ ॥

अभ्यायतः सन्ततधूमधूम्रं व्यापि प्रभाजालमिवान्तकस्य ।
रजः प्रतूर्णाश्वरथाङ्गनुन्नं तनोति न व्योमनि मातरिश्वा ॥६॥

अन्वयः—अभ्यायतः, अन्तकस्य, सन्ततधूमधूम्रं, व्यापि, प्रभाजालम्, इव, प्रतूर्णाश्वरथाङ्गनुन्नं, रजः, मातरिश्वा, व्योमनि, न तनोति ॥६॥

अभीति ॥ अभ्यायतो वीरान्हन्तुमभ्यागच्छतः । इण. शतृप्रत्ययः । अन्तकस्य कालस्य संबन्धि सन्ततं सततं धूमवद्धूम्रं व्यापि व्यापकं प्रभाजालमिव स्थितं प्रतूर्णैर्वेगवद्भिरश्वै रथाङ्गै रथचक्रैश्च नुन्नं प्रेरितं रजो मातरिश्वा मरुद्व्योमन्यन्तरिक्षे न तनोति न विस्तारयति ॥ ६ ॥

भूरेणुना रासभधूसरेण तिरोहिते वर्त्मनि लोचनानाम् ।
नास्त्यत्र तेजस्विभिरुत्सुकानामह्नि प्रदोषः सुरसुन्दरीणाम् ॥७॥

अन्वयः—अत्र, रासभधूसरेण, भूरेणुना, लोचनानां, वर्त्मनि, तिरोहिते, तेजस्विभिः, उत्सुकानां, सुरसुन्दरीणाम्, अह्नि, (एव) प्रदोषः, नास्ति ॥ ७ ॥

भूरेणुनेति ॥ अत्राहवे रासभो गर्दभस्तद्वद्धूसरेणेषत्पाण्डुना । 'रासभो गर्दभः खरः' इत्यमरः । 'ईषत्पाण्डुस्तु धूसरः' इति च । भूरेणुना रजसा लोचनानां वर्त्मनि चक्षुर्मार्गे तिरोहिते सति तेजस्विभिस्तेजस्विषु वीरेषूत्सुकानाम् । वीरवरणार्थमागतानामित्यर्थः । 'प्रसितोत्सुकाभ्यां तृतीया च' इति विकल्पात्तृतीया । सुरसुन्दरीणामह्नि दिवस एव प्रदोषो रात्रिमुखं नास्ति । अन्धकारवत्त्वाद्दृष्टेस्तिरोधानाद्रात्रिभ्रमः स्यादिति भावः ॥ ७ ॥

रथाङ्गसंक्रीडितमश्वहेषा बृहन्ति मत्तद्विपबृंहितानि ।
संघर्षयोगादिव मूर्च्छितानि ह्रादं निगृह्णन्ति न दुन्दुभीनाम् ॥८॥

अन्वयः—रथाङ्गसङ्क्रीडितम्, अश्वहेषा, बृहन्ति, मत्तद्विपबृंहितानि, संघर्षयोगात्, इव, मूर्छितानि, दुन्दुभीनां, ह्रादं, न, निगृह्णन्ति ॥ ८ ॥

रथाङ्गेति ॥ रथाङ्गसंक्रीडितं रथचक्रकूजितमश्वानां च हेषा हेषितानि शब्दितानि । 'अश्वानां हेषा ह्रेषा च निःस्वनः' इत्यमरः । बृहन्ति महान्ति मत्तद्विपानां बृंहितानि । 'बृंहितं करिगर्जितम्' इत्यमरः । संघर्षयोगादिव परस्परस्पर्धासम्बन्धादिव मूर्छितानि वृद्धिं गतानि सन्ति । 'नपुंसकमनपुंसक—' इत्यादिना नपुंसकैकशेषः । दुन्दुभीनां भेरीणां ह्रादं निर्घोषम् । 'स्वाननिर्घोषनिर्ह्रादं—' इत्यमरः । न निगृह्णन्ति न तिरस्कुर्वन्ति ॥ ८ ॥

अस्मिन्यशःपौरुषलोलुपानामरातिभिः प्रत्युरसं क्षतानाम् ।

मूर्च्छान्तरायं मुहुरुच्छिनत्ति नासारशीतं करिशीकराम्भः ॥९॥

अन्वय—अस्मिन् , यशःपौरुषलोलुपानाम् , अरातिभिः, प्रत्युरसं , क्षतानां, मूर्छान्तरायम् , आसारशीतं , करिशीकराम्भः, मुहु., न, उच्छिनत्ति ॥ ९ ॥

अस्मिन्निति ॥ अस्मिन्रणे यशःपौरुषयोर्लोलुपानां गृध्नूनामत एवारातिभि प्रत्युरसमुरसि । 'प्रतेरुरसः सप्तमीस्थात्' इति समासान्तः । क्षतानां विद्धानां सम्बन्धिनं मूर्च्छैवान्तरायो रणविघ्नस्तमासारशीतं वर्षधाराशीतलम् । 'धारासम्पात आसारः' इत्यमर. । करिणां शीकर एवाम्भः कर्तृ मुहुर्नोच्छिनत्ति न नाशयति ॥ ९ ॥

असृङ्नदीनामुपचीयमानैर्विदारयद्भिः पदवीं ध्वजिन्याः ।

उच्छ्रायमायान्ति न शोणितौघैः पङ्कैरिवाश्यानघनैस्तटानि ॥१०॥

अन्वयः—असृङ्नदीनां , तटानि, उपचीयमानैः, ध्वजिन्याः, पदवीं, विदारयद्भिः, आश्यानघनैः, शोणितौघैः, पङ्कैः, इव, उच्छ्रायम् , न आयान्ति ॥ १० ॥

असृगिति ॥ असृङ्नदीनां तटान्युपचीयमानैरुपचयं नीयमानैस्तथा ध्वजिन्याः पदवीं विदारयद्भिर्दुःसञ्चारां कुर्वद्भिः । 'विदूरयद्भिः' इति पाठे विदूरां दूरसञ्चारां कुर्वद्भिः । आश्याना ईषच्छुष्काः । 'संयोगादेरातो धातोर्यण्वतः' इति श्यायतेर्निष्ठानत्वम् । घनाः सान्द्रास्तैराश्यानघनैः शोणितौघैः पङ्कैरिवोच्छ्रायं वृद्धिं नायान्ति न प्राप्नुवन्ति ॥ १० ॥

परिक्षते वक्षसि दन्तिदन्तैः प्रियाङ्कशीता नभसः पतन्ती ।

नेह प्रमोहं प्रियसाहसानां मन्दारमाला विरलीकरोति ॥ ११ ॥

अन्वयः—इह, दन्तिदन्तैः, परिक्षते, वक्षसि, नभसः, पतन्ती, प्रियाङ्कशीता, मन्दारमाला, प्रियसाहसानां, प्रमोहं, न, विरलीकरोति ॥ ११ ॥

परीति ॥ इह रणे दन्तिदन्तैर्गजदन्तैः परिक्षते ताडिते वक्षसि नभसः पतन्ती प्रियाया अङ्क इव शीता शीतला सुखकरी मन्दारमाला । सुरैर्मुक्तेति शेषः । प्रियं

साहसं येषां तेषां प्रियसाहसानाम् । यशो गजाभियायिनामिति भावः । प्रमोहं प्रहार-मूर्च्छां न विरलीकरोति न मन्दीकरोति । नापनयतीति यावत् ॥ ११ ॥

निषादिसंनाहमणिप्रभौघे परीयमाणे करिशीकरेण ।
अर्कत्विषोन्मीलितमभ्युदेति न खण्डमाखण्डलकार्मुकस्य ॥१२॥

अन्वयः—करिशीकरेण, परीयमाणे, निषादिसन्नाहमणिप्रभौघे, अर्कत्विषोन्मीलितम्, आखण्डलकार्मुकस्य, खण्डं, न, अभ्युदेति ॥ १२ ॥

निषादीति ॥ करिणां शीकरेण पुष्करतुषारेण परीयमाणे व्याप्यमाने निषादिनो हस्त्यारोहाः । 'हस्त्यारोहा निषादिनः' इत्यमरः । तेषां सन्नाहाः कवचानि तेषां मणिप्रभौघे रत्नांशुजालेऽर्कस्य त्विषा तेजसोन्मीलितमुत्पादितमाखण्डलकार्मुकस्येन्द्रधनुषः । 'आखण्डलः सहस्राक्षः' इत्यमरः । खण्डं नाभ्युदेति ॥ १२ ॥

महीभृता पक्षवतेव भिन्ना विगाह्य मध्यं परवारणेन ।
नावर्तमाना निनदन्ति भीममपां निधेराप इव ध्वजिन्यः ॥१३॥

अन्वयः—पक्षवता, महीभृता, इव, परवारणेन, मध्यं, विगाह्य, भिन्नाः, ध्वजिन्यः, अपां, निधेः, आपः, इव, आवर्तमानाः, भीमं, न निनदन्ति ॥ १३ ॥

महीति ॥ पक्षवता सपक्षेण महीभृता मैनाकेनेव परवारणेन शत्रुगजेन मध्यं विगाह्य प्रविश्य भिन्नाः क्षोभिता ध्वजिन्यः सेनाः । 'ध्वजिनी वाहिनी सेना' इत्यमरः । अपां निधेः सागरस्याप इव । आवर्तमाना भ्रमन्त्यः सत्यः । 'स्यादावर्तोऽम्भसां भ्रमः' इत्यमरः । भीमं न निनदन्ति ॥ १३ ॥

महारथानां प्रतिदन्त्यनीकमधिस्यदस्यन्दनमुत्थितानाम् ।
आमूललूनैरतिमन्युनेव मातङ्गहस्तैर्व्रियते न पन्थाः ॥ १४ ॥

अन्वयः—प्रतिदन्ति, अनीकम्, अधिस्यदस्यन्दनम्, उत्थितानां, महारथानां, पन्थाः, आमूललूनैः, मातङ्गहस्तैः, अतिमन्युना, इव, न, व्रियते ॥ १४ ॥

महारथानामिति ॥ प्रतिदन्त्यनीकं दन्तिसैन्यं प्रति । 'अनीकं तु रणे सैन्ये' इति विश्वः । अधिस्यदा महारयाः स्यन्दना रथा यत्र तत्तथा । 'रंहस्तरसी तु रयः स्यदः' इत्यमरः । उत्थितानां प्रस्थितानां महारथानां रथिकविशेषाणाम् । 'आत्मानं सारथिं चाश्वान्रक्षन्युध्येत यो नरः । स महारथसंज्ञः स्यादित्याहुर्नीतिकोविदाः ॥' इति लक्षणात् । पन्था मार्ग आमूलं लूनैश्छिन्नैर्मातङ्गहस्तैर्नागकरैरतिमन्युनातिक्रोधेनेव न व्रियते न निरुध्यते ॥ १४ ॥

धृतोत्पलापीड इव प्रियायाः शिरोरुहाणां शिथिलः कलापः ।
न बर्हभारः पतितस्य शङ्कोर्निषादिवक्षःस्थलमातनोति ॥ १५ ॥

अन्वयः—पतितस्य, शङ्कोः, बर्हभारः, धृतोत्पलापीडः, प्रियायाः, शिथिलः, शिरोरुहाणां, कलापः इव, निषादिवक्षःस्थलं, न आतनोति ॥ १५ ॥

धृतेति ॥ पतितस्य वक्षसि मग्नस्य शङ्कोस्तोमरस्य सम्बन्धी । 'वा पुंसि शल्यं शङ्कुर्ना सर्वला तोमरोऽस्त्रियाम्' इत्यमरः, बर्हभारस्तन्मूलबद्धो लाञ्छनपिच्छकलापो धृत उत्पलापीडः कुवलयशेखरो यस्मिन्स प्रियायाः सम्बन्धी शिथिलः स्रस्तः शिरोरुहाणां कलापः केशपाश इव निषादिनो हस्त्यारोहस्य वक्षःस्थलं नातनोति न व्याप्नोति ॥ १५ ॥

उज्झत्सु संहार इवास्तसंख्यमह्नाय तेजस्विषु जीवितानि ।
लोकत्रयास्वादनलोलजिह्वं न व्याददात्याननमत्र मृत्युः ॥१६॥

अन्वयः—अत्र, संहारे, इव, तेजस्विषु, अस्तसंख्यम्, अह्नाय, जीवितानि, उज्झत्सु, मृत्युः, लोकत्रयास्वादनलोलजिह्वम् आननं, न, व्याददाति ॥ १६ ॥

उज्झत्स्विति ॥ अत्राहवे संहारे कल्पान्त इव तेजस्विषु वीरेष्वस्तसंख्यमसंख्यं यथा तथाह्नाय झटिति । 'द्राग्झटित्यञ्जसाह्नाय' इत्यमरः । जीवितान्युज्झत्सु त्यजत्सु सत्सु मृत्युर्लोकत्रयस्यास्वादने भक्षणे लोला गृध्नुर्जिह्वा यस्मिंस्तदाननं न व्याददाति न विवृणोति । 'आङो दोऽनास्यविहरणे' इत्यत्रानास्यविहरण इति निषेधात्परस्मैपदम् ॥ १६ ॥

सत्यमेवं, तथापि किमेतत्कुत्सितम् । तत्राह—

इयं च दुर्वारमहारथानामाक्षिप्य वीर्यं महतां बलानाम् ।
शक्तिर्ममावस्यति हीनयुद्धे सौरीव ताराधिपधाम्नि दीप्तिः ॥१७॥

अन्वयः—इयं, मम, शक्तिः, च, दुर्वारमहारथानां, महतां, बलानां, वीर्यम् , आक्षिप्य, ताराधिपधाम्नि, सौरी, दीप्तिः, इव, हीनयुद्धे आवस्यति ॥१७॥

इयमिति ॥ इयं मम शक्तिश्च दुर्वाराः पराक्रमिणो महारथा येषु तेषां महतां बलानां वीर्यमाक्षिप्य निरस्य ताराधिपधाम्नि चन्द्रतेजसि । सूर्यस्येयं सौरी । 'सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः' इति स्त्रियां ङीप् । यकारस्य लोपः । दीप्तिरिव हीनयुद्धे किरातरणेऽवस्यत्यवसीदति एतच्च विरुद्धमत्यद्भुतं चेति भावः । 'षोऽन्तकर्मणि' इति धातोर्लट् ॥ १७ ॥

माया स्विदेषा मतिविभ्रमो वा ध्वस्तं नु मे वीर्यमुताहमन्यः ।
गाण्डीवमुक्ता हि यथापुरा मे पराक्रमन्ते न शराः किराते ॥१८॥

अन्वयः—एषा, माया, स्वित्, मतिविभ्रमः, वा, (अथवा) मे, वीर्यं, ध्वस्तं, नु, उत, अहम्, अन्यः, हि, गाण्डीवम्, उक्ता, मे, शराः, यथापुरा, किराते, न पराक्रमन्ते ॥ १८ ॥

मयेति ॥ एषा शक्तिह्रासरूपा माया स्विद्देवताक्षोभणं नाम । मतिविभ्रमो बुद्धिविपर्ययो वा । अथवा मे वीर्यं ध्वस्तं नष्टं नु उताहमन्योऽर्जुनो न वा । कुतः । हि यस्माद्गाण्डीवमुक्ता मे शराः यथापुरा यथापूर्वम् । परिपन्थिष्विवेत्यर्थः । किराते न पराक्रमन्तेऽप्रतिबन्धेन न प्रवर्तन्ते । उपपराभ्याम्' इति वृत्तावात्मनेपदम् । वृत्तिरप्रतिबन्धः ॥ १८ ॥

पुंसः पदं मध्यममुत्तमस्य द्विधेव कुर्वन्धनुषः प्रणादैः ।
नूनं तथा नैष यथास्य वेषः प्रच्छन्नमप्यूहयते हि चेष्टा ॥ १९ ॥

अन्वयः—उत्तमस्य, पुंसः, मध्यमम्, पदम्, धनुषः, प्रणादैः, द्विधा कुर्वन्, इव, एषः नूनं (तथा) न, अस्य, यथा, वेषः, हि, चेष्टा प्रच्छन्नम्, अपि, (स्वरूपम्) ऊहयते, ॥ १९ ॥

पुंस इति ॥ किञ्च । उत्तमस्य पुंसः पुरुषोत्तमस्य मध्यमं पदमाकाशं धनुषः प्रणादैः । 'उपसर्गादसमासेऽपि णोपदेशस्य' इति णत्वम् । द्विधा कुर्वन्निव विदारयन्निव स्थित एष किरातो नूनं तथा तथाभूतो न । कीदृशस्तत्राह—अस्य पुरुषस्य यथा यथाभूतो वेषः । वर्तत इति शेषः । वेषत एवायं किरातो न स्वरूपत इत्यर्थः । कुतः । हि यस्माच्चेष्टा व्यापारः प्रच्छन्नमपि निगूढमपि स्वरूपमूहयते तर्कयते । तस्यास्वभावादव्यभिचारादिति भावः ॥ १९ ॥

अथ चतुर्भिश्चेष्टामेवाचष्टे—

धनुः प्रबन्धध्वनितं रुषेव सकृद्विकृष्टा विततेव मौर्वी ।
सन्धानमुत्कर्षमिव व्युदस्य मुष्टेरसम्भेद इवापवर्गे ॥ २० ॥

अन्वय—धनुः, रुषा, इव, प्रबन्धध्वनितं, मौर्वी, सकृत्, विकृष्टा, वितता, इव, सन्धानम्, उत्कर्ष, व्युदस्य, इव, अपवर्गे, मुष्टेः, असम्भेदः, इव ॥ २० ॥

धनुरिति ॥ धनू रुषेव प्रबन्धेनाविच्छेदेन ध्वनितम् । ध्वनतेः कर्तरि क्तः । मौर्वी च सकृद्विकृष्टा विततेवैकवाराकर्षणादेव विततेव स्थिता । सन्धानं बाणसन्धानमुत्कर्षं तूणादुद्धरणं व्युदस्येव वर्जयित्वा । किमु कृतमिति शेषः । अपवर्गे बाणमोक्षेऽपि

मुष्टेरसम्भेदोऽसंघटनमिव। मुष्टिबन्धं विनैव बाणमोक्षः कृत इवेति। हस्तलाघवोक्तिः ॥ २० ॥

अंसाववष्टब्धनतौ समाधिः शिरोधराया रहितप्रयासः।

धृता विकारांस्त्यजता मुखेन प्रसादलक्ष्मीः शशलाञ्छनस्य ॥२१॥

अन्वयः—अंसाववष्टब्धनतौ, शिरोधरायाः, समाधिः, रहितप्रयासः, विकारान्, त्यजता, मुखेन, शशलाञ्छनस्य, प्रसादलक्ष्मीः, धृता ॥ २१ ॥

अंसाविति ॥ किञ्च। अंसाववष्टब्धौ। स्थिराववस्थापितौ च तौ नतौ चावष्टब्धनतौ शिरोधरायाः कन्धरायाः समाधिः संस्थानविशेषे रहितः प्रयासो यस्य स तथोक्तः। निःप्रयास इत्यर्थः। तथा विकारांस्त्यजता। जितश्रमत्वान्निर्विकारेणेत्यर्थः। मुखेन शशलाञ्छनस्येन्दोः प्रसादलक्ष्मीर्धृता। असम्भवत्सम्बन्धो निदर्शनालङ्कारः ॥ २१ ॥

प्रहीयते कार्यवशागतेषु स्थानेषु विष्टब्धतया न देहः।

स्थितप्रयातेषु ससौष्ठवश्च लक्ष्येषु पातः सदृशः शराणाम् ॥२२॥

अन्वयः—कार्यवशागतेषु, स्थानेषु, देहः, विष्टब्धतया, न, प्रहीयते, ससौष्ठवः, शराणां, पातः, च, स्थितप्रयातेषु, लक्ष्येषु, सदृशः ॥ २२ ॥

प्रहीयत इति ॥ कार्यवशेन प्रयोजनवशेनागतेषु स्थानेष्वालीढादिस्थानकेषु देहो विष्टब्धतया स्थिरतया कर्त्र्या न प्रहीयते न त्यज्यते। किन्तु स्थिर एव तिष्ठतीत्यर्थः। सुष्ठु भावः सौष्ठवं लाघवम्। उद्गात्रादित्वादञ्प्रत्ययः। तेन सह वर्तमानः ससौष्ठवः शराणां पातश्च स्थितान्यचलानि प्रयातानि चलानि तेषु स्थितप्रयातेषु चलाचलेषु लक्ष्येषु विषये सदृश एकरूपः ॥ २२ ॥

परस्य भूयान्विवरेऽभियोगः प्रसह्य संरक्षणमात्मरन्ध्रे।

भीष्मेऽप्यसम्भाव्यमिदं गुरौ वा न सम्भवत्येव वनेचरेषु ॥२३॥

अन्वयः—परस्य, विवरे, भूयान्, अभियोगः, आत्मरन्ध्रे, प्रसह्य, संरक्षणम्, (च) इदं, भीष्मे, अपि, गुरौ, वा, असम्भाव्यं, वनेचरेषु, न, सम्भवत्येव, ॥ २३ ॥

परस्येति ॥ किञ्च। परस्य विवरे रन्ध्रे। अल्पेऽपीति शेषः। भूयान्भूयिष्ठोऽभियोगो ज्ञातृत्वम्। परस्य रन्ध्रज्ञातृत्वात्प्रहार उद्योग इत्यर्थः। आत्मनो रन्ध्रे विवरे। अनल्पेऽपीति शेषः। प्रसह्य झटिति संरक्षणं गोपनं च। भूयिष्ठमिति शेषः। इदं द्वयं भीष्मेऽपि गुरौ वा द्रोणे वाऽप्यसम्भाव्यं दुर्वितर्क्यं वनेचरेषु न सम्भवत्येव। अतो नायं किरातः किन्त्वेषः तिरोहितवेषः कोऽप्यमानुषः पुरुष इति भावः ॥ २३ ॥

अप्राकृतस्याहवदुर्मदस्य निवार्यमस्यास्त्रबलेन वीर्यम् ।
अल्पीयसोऽप्यामयतुल्यवृत्तेर्महापकाराय रिपोर्विवृद्धिः ॥ २४ ॥

अन्वयः—अप्राकृतस्य, आहवदुर्मदस्य, अस्य, वीर्यम्, अस्त्रबलेन, निवार्यम्, अल्पीयसः, अपि, आमयतुल्यवृत्तेः, रिपोः, विवृद्धिः, महापकाराय ॥ २४ ॥

अप्राकृतस्येति ॥ अप्राकृतस्योत्कटस्याऽसाधारणस्याहवदुर्मदस्य रणमत्तस्यास्य किरातस्य वीर्यं तेजोऽस्त्रबलेन दिव्यास्त्रमहिम्ना निवार्यं निवारणीयम् । अन्यथाऽनिवार्यत्वमस्येति भावः । तथा हि । अल्पीयसोऽप्यत्यल्पस्याप्यामयतुल्यवृत्ते रोगसमानक्रियस्य । 'रोगव्याधिगदामयाः' इत्यमरः । रिपोर्विवृद्धिर्महापकाराय, किन्त्वयं महानुभाव इति भावः ॥ २४ ॥

स सम्प्रधार्यैवमहार्यसारः सारं विनेष्यन्सगणस्य शत्रोः ।
प्रस्वापनास्त्रं द्रुतमाजहार ध्वान्तं घनानद्ध इवार्धरात्रः ॥ २५ ॥

अन्वयः—अहार्यसारः, सः, एवं, सम्प्रधार्य, सगणस्य, शत्रोः, सारं, विनेष्यन्, प्रस्वापनास्त्रं, घनानद्धः, अर्धरात्रः, ध्वान्तम्, इव, द्रुतम्, आजहार ॥ २५ ॥

स इति ॥ महार्यसारोऽनिवार्यवीर्यः सोऽर्जुन एवं सम्प्रधार्य निश्चित्य सगणस्य सानुगस्य शत्रोः सारं सत्त्वं विनेष्यन्नपनेष्यन् । प्रस्वाप्यन्ते शाय्यन्तेऽनेनेति प्रस्वापनं तदेवास्त्रं । घनानद्धो मेघच्छन्नोऽर्धरात्रो निशीथः । 'अर्धरात्रनिशीथौ द्वौ' इत्यमरः । 'अर्धं नपुंसकम्' इति समासः । 'अहःसर्वैकदेश—' इत्यादिना समासान्तः । 'रात्राह्नाहाः पुंसि' इति पुंलिङ्गता । ध्वान्तमिव द्रुतमाजहाराचकर्ष ॥ २५ ॥

प्रसक्तदावानलधूमधूम्रा निरुन्धती धाम सहस्ररश्मेः ।
महावनानीव महातमिस्रा छाया ततानेशबलानि काली ॥२६॥

अन्वयः—प्रसक्तदावानलधूमधूम्रा, सहस्ररश्मेः, धाम, निरुन्धती, काली, छाया, ईशबलानि, महातमिस्रा, महावनानि, इव, ततान ॥ २६ ॥

प्रसक्तेति ॥ प्रसक्तः सन्ततो यो दावानलधूमस्तद्वद्धूम्रा धूसरा सहस्ररश्मेर्धाम तेजो निरुन्धत्यावृण्वती काली कृष्णवर्णा । 'जानपद-' इत्यादिना ङीष् । छाया कान्तिः । ईशबलानि महातमिस्रा महती तमःसन्ततिः । 'तमिस्रा तु तमस्ततिः' इति विश्वः । महावनानीव ततान व्यानशे ॥ २६ ॥

आसादिता तत्प्रथमं प्रसह्य प्रगल्भतायाः पदवीं हरन्ती ।
सभेव भीमा विदधे गणानां निद्रा निरासं प्रतिभागुणस्य ॥२७॥

अन्वयः—तत् प्रथमं, प्रसह्य, आसादिता, प्रगल्भतायाः, पदवीं, हरन्ती, भीमा, निद्रा, सभा इव, गणानाम्, प्रतिभागुणस्य, निरासम्, विदधे ॥ २७ ॥

आसादितेति ॥ तदेवासादनं प्रथमं तत्प्रथमं यथा तथा प्रसह्यासादिता प्राप्ता प्रगल्भताया व्यवहारधाष्टर्यस्य पदवीं हरन्ती भीमा भयङ्करी निद्रा उक्तविशेषणा सभा संसदिव । गणानां प्रतिभा प्रज्ञाशक्तिः सैव गुणस्तस्य निरासं प्रतिभाक्षयं विदधे चक्रे ॥ २७ ॥

गुरुस्थिराण्युत्तमवंशजत्वाद्विज्ञातसाराण्यनुशीलनेन ।
केचित्समाश्रित्य गुणान्वितानि सुहृत्कुलानीव धनूंषि तस्थुः ॥२८॥

अन्वयः—केचित्, उत्तमवंशजत्वात्, गुरुस्थिराणि, अनुशीलनेन विज्ञातसाराणि, गुणान्वितानि, धनूंषि, सुहृत्कुलानि, इव, समाश्रित्य, तस्थुः ॥ २८ ॥

गुर्विति ॥ केचिदुत्तमवंशजत्वाद्वंशो वेणुः कुलं च । 'वंशो वेणौ कुले च' इति विश्वः । गुरूणि महान्ति स्थिराणि दृढानि च गुरुस्थिराण्यनुशीलनेन परिचयबलेन विज्ञातः सारो बलं येषां तानि गुणैर्मौर्वीभिः शौर्यादिभिश्चान्वितानि धनूंषि सुहृत्कुलानि मित्रकुलानीव समाश्रित्य तस्थुः । धनूंष्यवष्टभ्य निदध्युरित्यर्थः ॥ २८ ॥

कृतान्तदुर्वृत्त इवापरेषां पुरः प्रतिद्वन्द्विनि पाण्डवास्त्रे ।
अतर्कितं पाणितलान्निपेतुः क्रियाफलानीव तदायुधानि ॥२९॥

अन्वयः—कृतान्तदुर्वृत्ते, इव, पाण्डवास्त्रे, पुरः, प्रतिद्वन्द्विनि, तदा, अपरेषाम्, आयुधानि, क्रियाफलानि, इव, अतर्कितम्, पाणितलात्, निपेतुः ॥ २९ ॥

कृतान्तेति ॥ कृतान्तदुर्वृत्ते दैवदुश्चेष्टित इव । 'कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु' इति विश्वः । पाण्डवास्त्रे पुरः प्रतिद्वन्द्विनि प्रतिकूलवर्तिनि सति तदा तस्मिन्कालेऽपरेषामायुधानि क्रियाफलानि कृष्यादिफलानीव अतर्कितमविचारितमेव पाणितलान्निपेतुः ॥ २९ ॥

अंसस्थलैः केचिदभिन्नधैर्याः स्कन्धेषु संश्लेषवतां तरूणाम् ।
मदेन मीलन्नयनाः सलीलं नागा इव स्रस्तकरा निषेदुः ॥३०॥

अन्वयः—अभिन्नधैर्याः, केचित्, अंसस्थलैः, संश्लेषवतां, तरूणां, स्कन्धेषु, मदेन, मीलन्नयनाः, नागाः, इव, स्रस्तकराः, सलीलम्, निषेदुः ॥ ३० ॥

अंसेति ॥ अभिन्नधैर्यास्तदानीमप्यक्षतधैर्याः केचिदंसस्थलैरंसभागैः सह संश्लेषवतां सङ्गच्छतां तरूणां स्कन्धेषु प्रकाण्डेषु मदेन मीलन्ति नयनानि येषां ते नागा गजा इव स्रस्तकराः स्रस्तहस्ताः सन्तः सलीलं निषेदुर्निषण्णाः ॥ ३० ॥

तिरोहितेन्दोरथ शम्भुमूर्ध्नः प्रणम्यमानं तपसां निवासैः ।
सुमेरुशृङ्गादिव बिम्बमार्कं पिशङ्गमुच्चैरुदियाय तेजः ॥ ३१ ॥

अन्वयः—अथ, तिरोहितेन्दोः, शम्भुमूर्ध्नः, सुमेरुशृङ्गात्, आर्कं, बिम्बम् इव, तपसां, निवासैः, प्रणम्यमानं, पिशङ्गं, तेजः, उच्चैः, उदियाय ॥ ३१ ॥

तिरोहितेति ॥ अथ तिरोहितेन्दोः किरातमायया छन्नचन्द्राच्छम्भुमूर्ध्नः सकाशात्। सुमेरुशृङ्गादर्कसम्बन्धि बिम्बमिव। तपसां निवासैस्तापसैः प्रणम्यमानमभिवन्द्यमानं पिशङ्गं तेज उच्चैरूर्ध्वमुदियाय प्रकटीबभूव। तच्च न चान्द्रमिति भावः ॥ ३१ ॥

छायां विनिर्धूय तमोमयीं तां तत्त्वस्य संवित्तिरिवापविद्याम् ।
ययौ विकासं द्युतिरिन्दुमौलेरालोकमभ्यादिशती गणेभ्यः ॥३२॥

अन्वयः—इन्दुमौलेः, द्युतिः, तत्वस्य, संवित्तिः, अपविद्याम्, इव, तां, तमोमयीं, छायां, विनिर्धूय, गणेभ्यः, आलोकम्, अभ्यादिशती, विकासं, ययौ ॥३२॥

छायामिति ॥ इन्दुमौलेर्द्युतिः कान्तिः। तत्त्वस्य संवित्तिस्तत्त्वज्ञानमपविद्यामिव तां तमोमयीं छायां निद्रां विनिर्धूय निरस्य गणेभ्य आलोकं वस्तुप्रकाशमभ्यादिशती वितरन्ती विकासं विस्तारं ययौ ॥ ३२ ॥

त्विषां ततिः पाटलिताम्बुवाहा सा सर्वतः पूर्वसरीव सन्ध्या ।
निनाय तेषां द्रुतमुल्लसन्ती विनिद्रतां लोचनपङ्कजानि ॥ ३३ ॥

अन्वयः—सर्वतः, पाटलिताम्बुवाहा, त्विषां, ततिः, सर्वतः, पूर्वसरी सन्ध्या, इव, उल्लसन्ती, तेषां, लोचनपङ्कजानि, द्रुतं, विनिद्रतां, निनाय ॥ ३३ ॥

त्विषामिति ॥ सर्वतः पाटलिताः पाटलीकृताः अम्बुवाहा यया सा तथोक्ता त्विषां तेजसां ततिः। पूर्वां सरतीति पूर्वसरी। 'पूर्वे कर्तरि' इति टप्रत्यये ङीप्। 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति पूर्वाशब्दस्य पुंवद्भावः। सन्ध्या प्रातःसन्ध्येवोल्लसन्ती प्रसरन्ती तेषां गणानां लोचनपङ्कजानि द्रुतं विनिद्रतां विकासं निनाय ॥ ३३ ॥

पृथग्विधान्यस्त्रविरामबुद्धाः शस्त्राणि भूयः प्रतिपेदिरे ते ।
मुक्ता वितानेन बलाहकानां ज्योतींषि रम्या इव दिग्विभागाः॥३४॥

अन्वयः—अस्त्रविरामबुद्धाः, ते, बलाहकानां, वितानेन, मुक्ताः, रम्याः, दिग्विभागाः, ज्योतींषि, इव, पृथग्विधानि, शस्त्राणि, भूयः, प्रतिपेदिरे ॥ ३४ ॥

पृथगिति ॥ अस्त्रविरामेण प्रस्वापनास्त्रोपरमेण बुद्धा विनिद्रास्ते गणा बलाहकानां वितानेन मेघपटलेन मुक्ता अत एव रम्या दिग्विभागा दिगन्ता ज्योतींषि नक्षत्राणीव । 'ज्योतिस्ताराग्निभाज्वालादृक्प्रकाशरमात्मसु' इति वैजयन्ती । पृथग्विधानि नानाविधानि शस्त्राणि भूयः प्रतिपेदिरे । जगृहुरित्यर्थः ॥ ३४ ॥

द्यौरुन्ननामेव दिशः प्रसेदुः स्फुटं विसस्रे सवितुर्मयूखैः ।
क्षयं गतायामिव यामवत्यां पुनः समीयाय दिनं दिनश्रीः ॥३५॥

अन्वयः—यामवत्यां, क्षयं, गतायाम्, इव, द्यौः, उन्ननाम, इव, दिशः, प्रसेदुः, सवितुः, मयूखैः, स्फुटं, विसस्रे, दिनश्रीः, पुनः, दिनं, समीयाय ॥ ३५ ॥

द्यौरिति ॥ तदा यामवत्यां रात्रौ क्षयं गतायां विभातायामिव द्यौरन्तरिक्षमुन्ननामेवोर्ध्वमुत्पपातेवेत्युत्प्रेक्षा । दिशः प्रसेदुः । सवितुर्मयूखैः स्फुटं स्पष्टं विसस्रे विसृतम् । भावे लिट् । दिनश्रीर्घस्रकान्तिः पुनर्दिनं समीयाय सङ्गगाम । अत्र वैयधिकरण्येन गुणक्रिययोः समुच्चयेन समुच्चयोऽलङ्कारः । तस्य च समुन्नमनोत्प्रेक्षयेवशब्दवाच्ययानुप्रवेशलक्षणः सङ्करः । दिक्प्रसादो गुणः । शेषाः क्रियाः ॥ ३५ ॥

महास्त्रदुर्गे शिथिलप्रयत्नं दिग्वारणेनेव परेण रुग्णे ।
भुजङ्गपाशान्भुजवीर्यशाली प्रबन्धनाय प्रजिघाय जिष्णुः ॥३६॥

अन्वयः—भुजवीर्यशाली, जिष्णुः, महास्त्रदुर्गे, दिग्वारणेन, इव, परेण, शिथिलप्रयत्नं, रुग्णे, प्रबन्धनाय, भुजङ्गपाशान्, प्रजिघाय ॥ ३६ ॥

महास्त्रेति ॥ भुजवीर्यशाली जिष्णुरर्जुनो महास्त्रं प्रस्वापनास्त्रं तद्दुर्गमिव तस्मिन्महास्त्रदुर्गे दिग्वारणेनेव दिग्गजेनेव परेण शत्रुणा शिथिलप्रयत्नमल्पप्रयासं यथा तथा रुग्णे भग्ने सति । 'रुजो भङ्गे' । कर्मणि क्तः । 'ओदितश्च' इति निष्ठातकारस्य नत्वम् । प्रबन्धनाय प्रकर्षेण बन्धनाय भुजङ्गा एव पाशास्तान्प्रजिघाय प्रहितवान् ॥ ३६ ॥

जिह्वाशतान्युल्लसयन्त्यजस्रं लसत्तडिल्लोलविषानलानि ।
त्रासान्निरस्तां भुजगेन्द्रसेना नभश्चरैस्तत्पदवीं विवव्रे ॥ ३७ ॥

अन्वयः—लसत्तडिल्लोलविषानलानि, जिह्वाशतानि, अजस्रम्, उल्लसयन्ती, भुजगेन्द्रसेना, त्रासात्, नभश्चरैः, निरस्तां, तत्पदवीं, विवव्रे ॥ ३७ ॥

जिह्वेति ॥ लसन्तस्तडिल्लोला विद्युच्चञ्चला विषानला विषाग्नयो येषु तानि जिह्वाशतान्यजस्रमुल्लसयन्ती चलयन्ती भुजगेन्द्रसेना त्रासाद्भयान्नभश्चरैर्निरस्तां त्यक्तां तेषां नभश्चराणां पदवीं मार्गं विवव्रे विशेषेण रुरोध ॥ ३७ ॥

दिङ्नागहस्ताकृतिमुद्वहद्भिर्भोगैः प्रशस्तासितरत्ननीलैः ।
रराज सर्पावलिरुल्लसन्ती तरङ्गमालेव नभोर्णवस्य ॥ ३८ ॥

अन्वयः—दिङ्नागहस्ताकृतिम्, उद्वहद्भिः, प्रशस्तासितरत्ननीलैः, भोगैः, (उपलक्षिता) सर्पावलिः, उल्लसन्ती, नभोर्णवस्य, तरङ्गमाला, इव, रराज ॥ ३८ ॥

दिङ्नागेति ॥ दिङ्नागहस्ताकृतिमुद्वहद्भिर्दिक्करिकराकारैस्तथा प्रशस्तानि समीचीनान्यसितरत्नानीन्द्रनीलमणयस्तद्वन्नीलैर्भोगैः कायैरुपलक्षिता सर्पावलिरुल्लसन्ती प्रक्षुभ्यन्ती नभ एवार्णवस्तस्य तरङ्गमालेव रराज। रूपकोत्थापितेयमुत्प्रेक्षा॥३८॥

निःश्वासधूमैः स्थगितांशुजालं फणावतामुत्फणमण्डलानाम् ।
गच्छन्निवास्तं वपुरभ्युवाह विलोचनानां सुखमुष्णरश्मिः ॥३९॥

अन्वयः—उष्णरश्मिः, तं, गच्छन्, इव, उत्फणमण्डलानां, फणावतां, निःश्वासधूमैः, स्थगितांशुजालं, विलोचनानां, सुखं, वपुः, अभ्युवाह ॥३९॥

निःश्वासेति ॥ उष्णरश्मिरस्तं गच्छन्निवोन्नमितानि फणामण्डलानि येषां तेषां फणावतां सर्पाणां निःश्वासेषु ये धूमास्तैः स्थगितमाच्छादितमंशुजालं यस्य तत्तथोक्तम्। अत एव विलोचनानां सुखं सुखकरं वपुरभ्युवाह ॥ ३९ ॥

प्रतप्तचामीकरभासुरेण दिशः प्रकाशेन पिशङ्गयन्त्यः ।
निश्चक्रमुः प्राणहरेक्षणानां ज्वाला महोल्का इव लोचनेभ्यः ॥४०॥

अन्वयः—प्राणहरेक्षणानां, लोचनेभ्यः, प्रतप्तचामीकरभासुरेण, प्रकाशेन, दिशः, पिशङ्गयन्त्यः, ज्वाला, महोल्का, इव, निश्चक्रमुः ॥ ४० ॥

प्रतप्तेति ॥ प्राणहराणीक्षणानि येषां तेषां प्राणहरेक्षणानां दृष्टिविषाणां सर्पविशेषाणां लोचनेभ्यो नेत्रेभ्यः। प्रतप्तं यच्चामीकरं सुवर्णं तद्वद्भासुरेण। 'भञ्जभासमिदो घुरच्' इति घुरच्प्रत्ययः। प्रकाशेन तेजसा दिशः पिशङ्गयन्त्यो ज्वाला महोल्का इव निश्चक्रमुर्निर्जग्मुः ॥ ४० ॥

आक्षिप्तसम्पातमपेतशोभमुद्वह्नि धूमाकुलदिग्विभागम् ।
वृतं नभो भोगिकुलैरवस्थां परोपरुद्धस्य पुरस्य भेजे ॥ ४१ ॥

अन्वयः—आक्षिप्तसम्पातम्, अपेतशोभम्, उद्वह्नि, धूमाकुलदिग्विभागं, भोगिकुलैः, वृतं नभः परोपरुद्धस्य, पुरस्य, अवस्थां, भेजे ॥ ४१ ॥

आक्षिप्तेति ॥ आक्षिप्तः प्रतिषिद्धः सम्पातः सञ्चारो यस्मिंस्तत्। सिद्धानां पक्षिणां चेति शेषः। अपेता गता शोभा यस्मात्तदपेतशोभं गतश्रीकम्। उद्गतः प्रदीप्तो वह्निर्यस्मिंस्तदुद्वह्नि सर्वत उद्भूतदहनम्। धूमैराकुला व्याप्ता दिग्विभागा

यस्य तत् । भोगिकुलैः सर्पकुलैर्वृतमावृतं नभः परोपरुद्धस्य शत्रुवेष्टितस्य पुरस्यावस्था-मिवावस्थां दशां भेजे । उक्तरीत्या तत्साधर्म्यं प्राप्तमित्यर्थः । निदर्शनालङ्कारः ॥४१॥

तमाशु चक्षुःश्रवसां समूहं मन्त्रेण तार्क्ष्योदयकारणेन ।
नेता नयेनेव परोपजापं निवारयामास पतिः पशूनाम् ॥ ४२ ॥

अन्वयः—पशूनां, पतिः, तं, चक्षुःश्रवसां, समूहं, तार्क्ष्योदयकारणेन, मन्त्रेण नेता नयेन, परोपजापम्, इव, आशु, निवारयामास ॥ ४२ ॥

तमिति ॥ पशूनां पतिः शिवस्तं चक्षुःश्रवसां सर्पाणां समूहं तार्क्ष्योदयकारणेन गरुडाविर्भावहेतुना मन्त्रेण नेता नायको नयेन नीत्या परेषामुपजापं परोपजापं परकृतं स्वमण्डलभेदमिव । 'भेदोपजापावुपधा' इत्यमरः । आशु निवारयामास ॥ ४२ ॥

प्रतिघ्नतीभिः कृतमीलितानि द्युलोकभाजामपि लोचनानि ।
गरुत्मतां संहतिभिर्विहायः क्षणप्रकाशाभिरिवावतेने ॥ ४३ ॥

अन्वयः—द्युलोकभाजाम्, अपि, कृतमीलितानि, लोचनानि, प्रतिघ्नतीभिः, गरुत्मतां, संहतिभिः, क्षणप्रकाशाभिः, इव, विहायः, अवतेने ॥ ४३ ॥

प्रतीति ॥ द्युलोकभाजामप्यनिमेषाणामपि कृतं मीलनं निमेषो येषां तानि लोचनानि दृष्टीः प्रतिघ्नतीभिः प्रतिबध्नतीभिः । हन्तेः शतरि ङीप् । गरुत्मतां तार्क्ष्याणां संहतिभिः समूहैः क्षणप्रकाशाभिर्विद्युद्भिरिव । तासां सौवर्णत्वादिति भावः । विहायोऽन्तरिक्षमवतेने व्यानशे ॥ ४३ ॥

ततः सुपर्णव्रजपक्षजन्मा नानागतिर्मण्डलयञ्जवेन ।
जरत्तृणानीव वियन्निनाय वनस्पतीनां गहनानि वायुः ॥ ४४ ॥

अन्वयः—ततः, सुपर्णव्रजपक्षजन्मा, नानागतिः, वायुः, वनस्पतीनां, गहनानि, जरत्तृणानि, इव, जवेन, मण्डलयन्, वियत्, निनाय ॥ ४४ ॥

तत इति ॥ ततः सुपर्णव्रजानां तार्क्ष्यकुलानां पक्षेभ्यो जन्म यस्य स नानागतिर्विचित्रगतिर्वायुर्वनस्पतीनां वृक्षाणां गहनानि जरत्तृणानि जीर्णतृणानीव जवेन मण्डलयन्भ्रमयन्वियदन्तरिक्षं निनाय ॥ ४४ ॥

मनःशिलाभङ्गनिभेन पश्चान्निरुध्यमानं निकरेण भासाम् ।
व्यूढैरुरोभिश्च विनुद्यमानं नभः ससर्पेव पुरः खगानाम् ॥४५॥

अन्वयः—मनःशिलाभङ्गनिभेन, भासां, निकरेण, पश्चात्, निरुध्यमानं, व्यूढैः, उरोभिः, च, विनुद्यमानं, नभः, खगानां, पुरः ससर्प, इव ॥ ४५ ॥

मनःशिलेति ॥ मनःशिला धातुविशेषस्तस्या भङ्गश्छेदस्तन्निभेन तत्सदृशेन भासां निकरेण कान्तिपुञ्जेन पश्चाद्भागे निरुध्यमानमाव्रियमाणं व्यूढैर्विशालैरुरोभिर्वक्षोभिश्च । 'उरो वत्सं च वक्षश्च' इत्यमरः । विनुद्यमानं प्रेर्यमाणं नभः खगानां गरुडानां पुरः ससर्पेव ससारेव । उत्तरोत्तरदेशतिरोधानेन गच्छतां खगानामपूर्वोऽपि पुरोभागः सादृश्यात्पूर्ववदुपलभ्यमानतया नभस एव छेदनात्पुरः ससर्पेवेत्युत्प्रेक्षा ॥४५॥

दरीमुखैरासवरागताम्रं विकासि रुक्मच्छदधाम पीत्वा ।
जवानिलाघूर्णितसानुजालो हिमाचलः क्षीब इवाचकम्पे ॥४६॥

अन्वयः—जवानिलाघूर्णितसानुजालः, हिमाचलः, आसवरागताम्रं, विकासि, रुक्मच्छदधाम, दरीमुखैः, इव, पीत्वा, क्षीबः, (इव) आचकम्पे ॥ ४६ ॥

दरीति ॥ जवानिलेनाघूर्णितानि भ्रमितानि सानुजालानि यस्य स हिमाचलः । आसवस्य रागो रक्तता तद्वत्ताम्रम् । गुणयोरेवोपमानोपमेयभावः । विकासि विकस्वरं रुक्मच्छदाः सुवर्णपक्षास्ताक्ष्यास्तेषां धाम तेजो दरीभिर्मुखैरिव दरीमुखैः पीत्वा क्षीबो मत्त इवाचकम्पे आचचाल । उपमाव्यापितेयमुत्प्रेक्षा ॥ ४६ ॥

प्रवृत्तनक्तन्दिवसन्धिदीप्तैर्नभस्तलं गां च पिशङ्गयद्भिः ।
अन्तर्हितार्कैः परितः पतद्भिश्छायाः समाचिक्षिपिरे वनानाम् ॥४७॥

अन्वयः—प्रवृत्तनक्तन्दिवसन्धिदीप्तैः, नभस्तलं, गां, च, पिशङ्गयद्भिः, अन्तर्हितार्कैः, पतद्भिः, परितः, वनानां, छायाः समाचिक्षिपिरे ॥ ४७ ॥

प्रवृत्तेति ॥ नक्तं च दिवा च नक्तन्दिवम् । 'अचतुर-' इत्यादिना सप्तम्यर्थवृत्त्योरव्यययोर्द्वन्द्वैकवद्भावनिपाते समासान्तः । लक्षणया त्वहोरात्रमात्रवाची । प्रवृत्तः प्रादुर्भूतो यो नक्तन्दिवस्य सन्धिः सन्ध्या तद्वद्दीप्तैः शोभितैर्नभस्तलं गां भुवं च पिशङ्गयद्भिः पिशङ्गीकुर्वद्भिरन्तर्हित आच्छादितोऽर्को यैस्तैः पतद्भिः पक्षिभिः परितः सर्वतो वनानां छायाः समाचिक्षिपिरे समाक्षिप्ताः । अन्तर्बहिश्च तेजःप्रवेशात्काप्यन्तर्हिता इत्यर्थः ॥ ४७ ॥

स भोगिसङ्घः शममुग्रधाम्नां सैन्येन निन्ये विनतासुतानाम् ।
महाध्वरे विध्यपचारदोषः कर्मान्तरेणेव महोदयेन ॥ ४८ ॥

अन्वयः—सः, भोगिसङ्घः, उग्रधाम्नां, विनतासुतानां, सैन्येन, महाध्वरे, विध्यपचारदोषः, महोदयेन, कर्मान्तरेण, इव, शमं, निन्ये ॥ ४८ ॥

स इति ॥ स भोगिसङ्घः सर्पसमूह उग्रधाम्नां तेजस्विनां विनतासुतानां तार्क्ष्याणां सैन्येन महाध्वरे महाक्रतौ विध्यपचारदोषः कर्मस्खलनदोषो महोदयेन महासा-

मर्थ्येन, अथवा महता फलेन । तन्मूलेन प्रकृतक्रियासिद्धेरिति । कर्मान्तरेण प्रायश्चित्तेनेव शमं शान्तिं निन्ये प्रापितः ॥ ४८ ॥

साफल्यमस्त्रे रिपुपौरुषस्य कृत्वा गते भाग्य इवापवर्गम् ।
अनिन्धनस्य प्रसभं समन्युः समाददेऽस्त्रं ज्वलनस्य जिष्णुः ॥४९॥

अन्वयः—अस्त्रे, भाग्ये, इव, रिपुपौरुषस्य, साफल्यं, कृत्वा, अपवर्गं, गते, समन्युः, जिष्णुः, अनिन्धनस्य, ज्वलनस्य, अस्त्रं, प्रसभं, समाददे ॥ ४९ ॥

साफल्यमिति ॥ अस्त्रे सर्पास्त्रे । भाग्ये प्राग्भवीये शुभे कर्मणीव । रिपुपौरुषस्य रिपुपराक्रमस्य साफल्यं कृत्वापवर्गमवसानं समाप्तिं गते सति । स्वनिवृत्त्या परसाफल्यात्सफलीकरणोपचारः । समन्युः सक्रोधो जिष्णुरर्जुनोऽनिन्धनस्येन्धनं विनैवोत्पादितस्य ज्वलनस्य ज्वलनप्रदीपकमस्त्रमाग्नेयास्त्रं प्रसभं शीघ्रं समाददे जग्राह ॥४९॥

ऊर्ध्वं तिरश्चीनमधश्च कीर्णैर्ज्वालासटैर्लङ्घितमेघपङ्क्तिः ।
आयस्तसिंहाकृतिरुत्पपात प्राण्यन्तमिच्छन्निव जातवेदाः ॥५०॥

अन्वयः—ऊर्ध्वं, तिरश्चीनम्, अधश्च, कीर्णैः, ज्वालासटैः, लङ्घितमेघपङ्क्तिः, आयस्तसिंहाकृतिः, जातवेदाः, प्राण्यन्तम्, इच्छन्, इव, उत्पपात ॥ ५० ॥

ऊर्ध्वमिति ॥ ऊर्ध्वं तिरश्चीनं तिर्यक् । 'विभाषाञ्चेरदिक्स्त्रियाम्' इति खप्रत्ययः । अधश्च कीर्णैर्विस्तृतैर्ज्वाला एव सटाः केसराः । 'सटा जटाकेसरयोः' इति विश्वः । तैर्लङ्घितमेघपङ्क्तिरतिक्रान्तजलदालिरायस्तस्य लङ्घनोद्यतस्य सिंहस्येवाकृतिर्यस्य स जातवेदा अग्निः प्राण्यन्तं प्राणिनां संहारमिच्छन्निवोत्पपात ॥ ५० ॥

भित्त्वेव भाभिः सवितुर्मयूखाञ्जज्वाल विष्वग्विसृतस्फुलिङ्गः ।
विदीर्यमाणाश्मनिनादधीरं ध्वनिं वितन्वन्नकृशः कृशानुः ॥५१॥

अन्वयः—भाभिः, सवितुः, मयूखान्, भित्वा, इव, विष्वक्, विसृतस्फुलिङ्गः, अकृशः, कृशानुः, विदीर्यमाणाश्मनिनादधीरं, ध्वनिं, वितन्वन्, जज्वाल ॥५१॥

भित्त्वेति ॥ भाभिस्तेजोभिः सवितुर्मयूखान्किरणान् । 'किरणोस्रमयूखांशु—' इत्यमरः । भित्त्वेवाभिहत्येव विष्वक्समन्ताद्विसृताः स्फुलिङ्गा यस्य सः । स्फुलिङ्गोदयस्य मयूखाभिघातहेतुकत्वमुत्प्रेक्षते । 'त्रिषु स्फुलिङ्गोऽग्निकणः' इत्यमरः । अकृशोऽतनुः कृशानुर्वह्निर्विदीर्यमाणस्य विदलतोऽश्मनो निनादमिव धीरमुद्धतं ध्वनिं वितन्वञ्जज्वाल ॥ ५१ ॥

चयानिवाद्रीनिव तुङ्गशृङ्गान्क्वचित्पुराणीव हिरण्मयानि ।
महावनानीव च किंशुकानां ततान वह्निः पवनानुवृत्त्या ॥५२॥

अन्वयः—वह्निः, पवनानुवृत्त्या, चयान्, इव, तुङ्गशृङ्गान्, अद्रीन्, इव, क्वचित् हिरण्मयानि, पुराणि, इव, किंशुकानां महावनानि, इव ततान ॥ ५२ ॥

चयानिति ॥ वह्निः पवनानुवृत्त्या वायुवशेन चयानिव हिरण्मयान्प्राकारानिव। 'चयः समूहे प्राकारे' इति विश्वः। तुङ्गशृङ्गानद्रीनिव क्वचिद्धिरण्मयानीति 'दाण्डिना-यन—' इत्यादिना निपातनात्साधुः। पुराणि नगराणीव तथा किंशुकानां पलाश-तरूणाम्। 'पलाशे किंशुकः पर्ण' इत्यमरः। महावनानीव पुष्पितानीति शेषः। ततान वितस्तार। तदाकारेण जज्वालेत्यर्थः ॥ ५२ ॥

मुहुश्चलत्पल्लवलोहिनीभिरुच्चैः शिखाभिः शिखिनोऽवलीढाः।
तलेषु मुक्ताविशदा बभूवुः सान्द्राञ्जनश्यामरुचः पयोदाः ॥५३॥

अन्वयः—सान्द्रान्, जनश्यामरुचः, पयोदाः मुहु, चलत्पल्लवलोहिनीभि, शिखिनः, उच्चैः, शिखाभिः, अवलीढाः, तलेषु, मुक्ताविशदाः, बभूवुः ॥ ५३ ॥

मुहुरिति ॥ सान्द्राञ्जनश्यामरुचो घनकज्जलश्यामरुचः पयोदा मुहुश्चलन्त्यश्च ताः पल्लवलोहिन्यो लोहितवर्णाश्च ताभिश्चलत्पल्लवलोहिनीभिः। 'वर्णादनुदात्ता-त्तोपधात्तो नः' इति ङीप्। तकारस्य नकारः। शिखिनोऽग्नेरुच्चैरुन्नताभिः शिखा-भिर्ज्वालाभिरवलीढाः। दग्धा इत्यर्थः। अत एव तलेष्वधोभागेषु मुक्ताविशदा मौक्तिकधवला बभूवुः। जलसंशोषणादिति भावः। 'अध स्वरूपयोरस्त्रीतलम्' इत्यमरः ॥ ५३ ॥

लिलिक्षतीव क्षयकालरौद्रे लोकं विलोलार्चिषि रोहिताश्वे।
पिनाकिना हूतमहाम्बुवाहमस्त्रं पुनः पाशभृतः प्रणिन्ये ॥ ५४ ॥

अन्वयः—क्षयकालरौद्रे, विलोलार्चिषि, रोहिताश्वे, लोकं, लिलिक्षति, इव, पि-नाकिना, पुनः, हूतमहाम्बुवाहं, पाशभृतः, अस्त्रं, प्रणिन्ये ॥ ५४ ॥

लिलिक्षतीति ॥ क्षयकालरौद्रे कल्पान्तकालवद्भयावहे विलोलार्चिषि चलज्ज्वाले रोहिताश्वे ज्वलने। 'रोहिताश्वो वायुसखः' इत्यमरः। लोकं लिलिक्षति लेढुमिच्छति जिघत्सति सतीव। लिहः सन्नन्ताच्छतृप्रत्ययः। पिनाकिना पुनर्हूता आहूता आका-रिता महाम्बुवाहा येन तत्पाशभृतो वरुणस्यास्त्रं प्रणिन्ये प्रयुक्तम् ॥ ५४ ॥

ततो धरित्रीधरतुल्यरोधसस्तडिल्लतालिङ्गितनीलमूर्तयः।
अधोमुखाकाशसरिन्निपातिनीरपः प्रसक्तं मुमुचुः पयोमुचः ॥५५॥

अन्वयः—ततः धरित्रीधरतुल्यरोधसः, तडिल्लतालिङ्गितनीलमूर्तयः, पयोमुचः, अधोमुखाकाशसरिन्निपातिनीः, अपः, प्रसक्तं, मुमुचुः ॥ ५५ ॥

तत इति ॥ ततो वरुणास्त्रप्रयोगानन्तरं धरित्रीधरतुल्यरोधसः पर्वतसमप्रान्ताः । 'रोधः स्यात्प्रान्तकूलयोः' इति विश्वः । तडिल्लताभिरालिङ्गिता नीलमूर्तयो नीलाङ्गानि येषां ते पयोमुचो मेघा अधोमुखा आकाशसरिदिव निपतन्तीत्यधोमुखाकाशसरिन्निपातिनीः । 'कर्तुर्युपमाने' इति णिनिः । अपो जलानि प्रसक्तमनुबन्धमविच्छिन्नं यथा तथा मुमुचुः । इतःप्रभृति वंशस्थवृत्तम् ॥ ५५ ॥

पराहतध्वस्तशिखे शिखावतो वपुष्यधिक्षिप्तसमिद्धतेजसि ।
कृतास्पदास्तप्त इवायसि ध्वनिं पयोनिपाताः प्रथमे वितेनिरे ॥५६॥

अन्वयः—पराहतध्वस्तशिखे, अधिक्षिप्तसमिद्धतेजसि, शिखावतः, वपुषि, तप्ते, अयसि, इव, कृतास्पदाः, प्रथमे, पयोनिपाताः, ध्वनिं, वितेनिरे ॥ ५६ ॥

पराहतेति ॥ पराहता आसाराभिहिता अतो ध्वस्ता निर्वापिताः शिखा ज्वाला यस्य तस्मिन्पराहतध्वस्तशिखे । अधिक्षिप्तं प्रहारितं नाशितम् । ताडितमिति यावत् । अतः समिद्धं झटिति प्रदीप्तं तेजो यस्य तस्मिञ्छिखावतोऽग्नेर्वपुषि स्वरूपे । तप्तेऽयसि लोह इव कृतास्पदाः कृतस्थितयः । 'आस्पदं प्रतिष्ठायाम्' इति निपातः । प्रथमे पयोनिपाता जलपाता ध्वनिं वितेनिरे विस्तारयामासुः ॥ ५६ ॥

महानले भिन्नसिताभ्रपातिभिः समेत्य सद्यः क्वथनेन फेनताम् ।
व्रजद्भिरार्द्रेन्धनवत्परिक्षयं जलैर्वितेने दिवि धूमसन्ततिः ॥५७॥

अन्वयः—महानले, भिन्नसिताभ्रपातिभिः, सद्यः क्वथनेन, फेनतां, समेत्य, परिक्षयं, व्रजद्भिः, जलैः, आर्द्रेन्धनवत्, दिवि, धूमसन्ततिः, वितेने ॥ ५७ ॥

महानल इति ॥ महानलेऽग्नौ भिन्नानि खण्डितानि सिताभ्राणीव पतन्तीति भिन्नसिताभ्रपातिभिः । 'कर्तर्युपमाने' इति णिनिप्रत्ययः । अत एव सद्यः क्वथनेन पाकेन फेनतां समेत्य प्राप्य परिक्षयं नाशं व्रजद्भिर्जलैरार्द्रेन्धनवदार्द्रकाष्ठैस्तुल्यम् । 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिप्रत्ययः । दिवि गगने धूमसन्ततिर्वितेने विस्तारिता । फेनादिकमार्द्रेन्धनेऽपि तुल्यम् ॥ ५७ ॥

स्वकेतुभिः पाण्डुरनीलपाटलैः समागताः शक्रधनुःप्रभाभिदः ।
असंस्थितामादधिरे विभावसोर्विचित्रचीनांशुकचारुतां त्विषः ॥५८॥

अन्वयः—पाण्डुरनीलपाटलैः, स्वकेतुभिः, समागताः, शक्रधनुः प्रभाभिदः, विभावसोः, त्विषः, असंस्थितां, विचित्रचीनांशुकचारुताम्, आदधिरे ॥ ५८ ॥

स्वकेतुभिरिति ॥ पाण्डुरैर्नीलैः पाटलैश्च पाण्डुरनीलपाटलैर्विचित्रैः स्वकेतुभिर्धूमैः

समागताः सङ्गताः। अत एव शक्रधनुषः प्रभामिद इन्द्रधनुर्द्युतिभाजो विभावसोरग्नेस्त्विषोऽसंस्थितामस्थिरां विचित्रस्य चीनांशुकस्य वह्नवस्त्रविशेषस्य चारुतामादधिरे दधुः ॥ ५८ ॥

जलौघसम्मूर्च्छनमूर्च्छितस्वनः प्रसक्तविद्युल्लसितैधितद्युतिः ।
प्रशान्तिमेष्यन्धुतधूममण्डलो बभूव भूयानिव तत्र पावकः॥५९॥

अन्वयः—जलौघसम्मूर्छनमूर्छितस्वनः, प्रसक्तविद्युल्लसितैधितद्युतिः, धुतधूममण्डलः, पावकः, प्रशान्तिम्, एष्यन्, तत्र, भूयान्, इव बभूव ॥ ५९ ॥

जलौघेति ॥ जलौघानामुदकप्रवाहाणां सम्मूर्च्छनेन मेलनेन मूर्च्छितस्वनः प्रवृद्धघोषः। 'मूर्च्छनं मेलने प्रोक्तं वृद्धौ मूर्च्छितमेव वा' इति सज्जनः। प्रसक्तैः सङ्गतैर्विद्युतां तडिल्लतानां लसितैः स्फुरणैरेधिता वर्धिता द्युतिर्यस्य स धूममण्डलो जलाघातात्सम्भूतधूमपटलः पावकः प्रशान्तिमेष्यंस्तत्र देशे भूयानिव बभूव। भूयस्त्वस्यास्थायित्वादिवेत्युक्तम् ॥ ५९ ॥

प्रवृद्धसिन्धूर्मिचयस्थवीयसां चयैर्विभिन्नाः पयसां प्रपेदिरे ।
उपात्तसन्ध्यारुचिभिः सरूपतां पयोदविच्छेदलवैः कृशानवः॥६०॥

अन्वयः—प्रवृद्धसिन्धूर्मिचयस्थवीयसां, पयसां, चयैः, विभिन्नाः, कृशानवः, उपात्तसन्ध्यारुचिभिः, पयोदविच्छेदलवैः, सरूपतां, प्रपेदिरे ॥ ६० ॥

प्रवृद्धेति ॥ प्रवृद्धानां सिन्धोः समुद्रस्योर्मीणां चया राशय इव स्थवीयसां स्थूलतराणां पयसां चयैः पूरैर्विभिन्ना विश्लेषिताः कृशानवोऽग्नय उपात्तसन्ध्यारुचिभिः प्राप्तसन्ध्यारागैः पयोदानां विच्छिद्यन्त इति विच्छेदा विच्छिन्ना विक्षिप्ता ये लवाः शकलास्तैः सरूपतां समानरूपतां प्रपेदिर इत्युपमा ॥ ६० ॥

उपैत्यनन्तद्युतिरप्यसंशयं विभिन्नमूलोऽनुदयाय सङ्क्षयम् ।
तथा हि तोयौघविभिन्नसंहतिः स हव्यवाहः प्रययौ पराभवम्॥६१॥

अन्वयः—अनन्तद्युतिः, अपि, विभिन्नमूलः, असंशयम्, अनुदयाय, सङ्क्षयम्, उपैति, तथा, हि, तोयौघविभिन्नसंहतिः सः, हव्यवाहः, पराभवम्, प्रययौ ॥ ६१ ॥

उपैतीति ॥ अनन्तद्युतिर्महातेजा अपि विभिन्नमूलो नष्टमूलोऽसंशयं यथा तथानुदयाय पुनरनुत्थानाय, संक्षयं नाशमुपैति। तथा हि। तोयौघैर्विभिन्ना संहतिः सङ्घातो यस्य स तथोक्तः हव्यवाहोऽग्निः पराभवं नाशं प्रययौ। विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ६१ ॥

अथ विहितविधेयैराशु मुक्ता वितानै-
रसितनगनितम्बश्यामभासां घनानाम् ।
विकसदमलधाम्नां प्राप नीलोत्पलानां
श्रियमधिकविशुद्धां वह्निदाहादिव द्यौः ॥ ६२ ॥

अन्वयः—अथ, विहितविधेयैः, असितनगनितम्बश्यामभासां, घनानां, वितानैः, मुक्ता, द्यौः, वह्निदाहात्, इव, विकसदमलधाम्नां, नीलोत्पलानाम्, अधिकविशुद्धाम्, श्रियं, आशु प्राप ॥ ६२ ॥

अथेति ॥ अथाग्निनिर्वाणानन्तरं विहितविधेयैः कृतकृत्यैरसितनगस्याञ्जनाद्रेर्नितम्बः कटकस्तद्वच्छ्यामभासां घनानां वितानैः पटलैर्मुक्ता द्यौराकाशो वह्निदाहादिवेत्युत्प्रेक्षा । विकसन्ति च तान्यमलधामानि स्वच्छकान्तीनि च तेषां नीलोत्पलानामधिकविशुद्धामत्युज्ज्वलां श्रियं प्राप । निदर्शनालङ्कारः ॥ ६२ ॥

इति विविधमुदासे सव्यसाची यदस्त्रं
बहुसमरनयज्ञः सादयिष्यन्नरातिम् ।
विधिरिव विपरीतः पौरुषं न्यायवृत्तेः
सपदि तदुपनिन्ये रिक्ततां नीलकण्ठः ॥ ६३ ॥

अन्वयः—बहुसमरनयज्ञः, सव्यसाची, अरातिं, सादयिष्यन्, इति, विविधं, यत्, अस्त्रम्, उदासे, विपरीतः, विधिः, न्यायवृत्तेः, पौरुषम्, इव, नीलकण्ठः, सपदि, तत्, रिक्तताम्, उपनिन्ये ॥ ६३ ॥

इतीति ॥ बहुसमरनयाननेकरणोपायाञ्जानातीति बहुसमरनयज्ञः । 'आतोऽनुपसर्गे कः' इति कप्रत्ययः । न तु 'इगुपध–'इत्यादिनाकारान्तात् 'अनुपपदात्कर्मोपपदो भवति विप्रतिषेधेन' इति वार्तिकव्याख्याने भाष्यकारेणार्थज्ञशब्दमुदाहृत्यास्यार्थशब्दस्य कर्मोपपदत्वं दर्शितम् । सव्यसाच्यर्जुनोऽरातिं किरातपतिं सादयिष्यन् । अवसादयितुकामः सन्नित्यर्थः । क्रियार्थक्रियायां लृट् तस्य शत्रादेशः । इति पूर्वोक्तप्रकारेण विविधं यदस्त्रमुदासे । प्रयुक्तवानित्यर्थः । 'उपसर्गादस्यत्यूह्योर्वेति वाच्यम्' इत्यात्मनेपदम् । विपरीतो विधिः प्रतिकूलं दैवम् । 'विधिर्विधाने दैवेऽपि' इत्यमरः । न्यायेन नीत्या वृत्तिर्वर्तनं यस्य तस्य नीतिनिष्ठस्य पौरुषमिव नीलकण्ठः शिवः सपदि तदस्त्रं रिक्ततां व्यर्थतामुपनिन्ये । संहृतवानित्यर्थः । मालिनीवृत्तम् ॥ ६३ ॥

वीतप्रभावतनुरप्यतनुप्रभावः
प्रत्याचकाङ्क्ष जयिनीं भुजवीर्यलक्ष्मीम् ।
अस्त्रेषु भूतपतिनापहृतेषु जिष्णु-
र्वर्षिष्यता दिनकृतेव जलेषु लोकः ॥ ६४ ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये षोडशः सर्गः ॥

अन्वयः—भूतपतिना, अस्त्रेषु, अपहृतेषु, वर्षिष्यता, दिनकृता, जलेषु, (अपहृतेषु) लोकः, इव, वीतप्रभावतनुः, अपि, अतनुप्रभावः, जिष्णुः, जयिनीं, भुजवीर्यलक्ष्मीं, प्रति, आचकाङ्क्ष ॥ ६४ ॥

वीतेति ॥ भूतपतिना शम्भुना । अनुग्रहीष्यतेति शेषः । अस्त्रेष्वपहृतेषु सत्सु वर्षिष्यतोत्तरत्र सहस्रगुणं वितरिष्यता दिनकृता सूर्येण जलेष्वपहृतेषु सत्सु लोक इव वीतप्रभावो गतास्त्रमहिमा । अन्यत्र गतशक्तिः । अत एव तनु क्षीणो वीतप्रभावतनुस्तथाप्यतनुप्रभावो निसर्गतः सामर्थ्यादधिकः । अन्यत्रोद्योगवान् । ततो जिष्णुरर्जुनो जयिनीं जयनशीलाम् । 'जिदृक्षि–' इत्यादिनेनिप्रत्ययः । भुजवीर्यलक्ष्मीं भुजपराक्रमसम्पदम् । उभयत्रापि पुरुषकारमिति यावत् । तत्कालकुण्ठितामिति शेषः । प्रत्याचकाङ्क्ष । प्रत्याहर्तुमियेषेत्यर्थः । यथा लोको नद्यादिजलापहारेऽप्युपायान्तरेण कूपादिना जीवितुमिच्छति तद्वदस्त्रबलापहारेऽपि भुजबलेनैव जेतुमियेषेति भावः । वसन्ततिलकावृत्तम् ॥ ६४ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां षोडशः सर्गः समाप्तः ॥

सप्तदशः सर्गः ।

अथ पञ्चभिः पार्थं विशेषयन्षड्भिः कुलकमाह—अथेत्यादिभिः ॥

अथापदामुद्धरणक्षमेषु मित्रेष्विवास्त्रेषु तिरोहितेषु ।
धृतिं गुरुश्रीर्गुरुणाभिपुष्यन्स्वपौरुषेणेव शरासनेन ॥ १ ॥

अन्वयः—अथ, आपदाम्, उद्धरणक्षमेषु, अस्त्रेषु मित्रेषु, इव, तिरोहितेषु, गुरुणा, स्वपौरुषेण, इव, शरासनेन, धृतिम्, अभिपुष्यन्, गुरुश्रीः ॥ १ ॥

अथ जयलक्ष्मीप्रत्याकाङ्क्षानन्तरमापदामुद्धरणक्षमेष्वापन्निवारणसमर्थेष्वक्षेषु प्रस्वपनादिषु ताद्दशेषु मित्रेष्विव तिरोहितेष्वन्तर्हितेषु सत्सु गुरुणा महता स्वपौरुषेणेव ताद्दशेन शरासनेन धृतिं धैर्यमभिपुष्यन्नवर्धयन्। अद्यापि धनुषि पौरुषे च सति कियानयं किरात इति धैर्यमवलम्बमान इत्यर्थः। अत एव गुरुश्रीः प्रवृद्धशोभासम्पत्तिः। 'पद्मा मा लक्ष्मीः श्रीर्निगद्यते' इति शाश्वतः ॥ १ ॥

भूरिप्रभावेण रणाभियोगात्प्रीतो विजिह्मश्च तदीयवृद्ध्या।
स्पष्टोऽप्यविस्पष्टवपुःप्रकाशः सर्पन्महाधूम इवाद्रिवह्निः ॥२॥

अन्वयः—भूरिप्रभावेण, रणाभियोगात्, प्रीतः, तदीयवृद्ध्या, विजिह्मः, च, स्पष्टः, अपि, अविस्पष्टवपुःप्रकाशः, सर्पन्, महाधूमः, अद्रिवह्निः, इव ॥ २ ॥

भूरीति ॥ पुनश्च। भूरिप्रभावेण महानुभावेन सह रणाभियोगाद्युद्धलाभात्प्रीतस्तदीयवृद्ध्या शत्रुवृद्ध्या विजिह्मो विच्छायश्च तथा स्पष्टो दीप्त्या प्रज्वलन्नप्यविस्पष्टो वपुःप्रकाशो यस्य सः। कुतः। सर्पन्प्रसरन्महान्धूमो यस्य सोऽद्रिवह्निरिव स्थितः ॥२॥

तेजः समाश्रित्य परैरहार्यं निजं महन्मित्रमिवोरुधैर्यम्।
आसादयन्नस्खलितस्वभावं भीमे भुजालम्बमिवारिदुर्गे ॥३॥

अन्वयः—परैः, अहार्यं, निजं, महत्, तेजः, मित्रम्, इव, समाश्रित्य भीमे, अरिदुर्गे, अस्खलितस्वभावम्, उरुधैर्यं, भुजालम्बम्, इव, आसादयन् ॥ ३ ॥

तेज इति ॥ पुनश्च। परैररिभिरहार्यमभेद्यं निजं स्वकीयं महत्तेजो वीर्यं मित्रमिव समाश्रित्य। अत एव भीमे भयानकेऽरिरेव दुर्गं तस्मिन्नरिदुर्गे शत्रुसङ्कटेऽस्खलितस्वभावमचलशीलमुरु महद्धैर्यं भुजालम्बमिव हस्तावष्टम्भमिवासादयन्प्राप्नुवन्। ईदृशे सङ्कटेऽपि महावीरत्वाद्धैर्यमत्यजन्नित्यर्थः ॥ ३ ॥

वंशोचितत्वादभिमानवत्या सम्प्राप्तया सम्प्रियतामसुभ्यः।
समक्षमादित्सितया परेण वध्वेव कीर्त्या परितप्यमानः ॥४॥

अन्वयः—अभिमानवत्या, वंशोचितत्वात्, असुभ्यः, सम्प्रियतां, सम्प्राप्तया, परेण, समक्षम्, आदित्सितया, वध्वा, इव कीर्त्या, परितप्यमानः ॥ ४ ॥

वंशेति ॥ पुनश्च। अभिमानो ममताबुद्धिस्तद्वत्या। विषयतया। कर्मणि कर्तृधर्मोपचारः। अभिमानास्पदेनेत्यर्थः। अन्यत्र कुलशीलाद्यभिमानवत्या। वंशोचितत्वात्स्वकुलानुरूपत्वादसुभ्यः प्राणेभ्योऽपि सम्प्रियतां सम्प्राप्तया परेण शत्रुणाक्ष्णोः समीपे समक्षमव्ययमेतत्। 'अव्ययीभावे शरत्प्रभृतिभ्यः' इति समासान्तष्टच्प्रत्ययः। आदातुं ग्रहीतुमिष्टयादित्सितया। आजिहीर्षितयेत्यर्थः। आङ्पूर्वाद्ददातेः सन्नन्तात्क-

र्मणि क्तः। कष्टेव कीर्त्या हेतुना परितप्यमानः। कर्तरि शानच् 'हेतौ' इति तृतीया। अन्यथा शोक इतिवत्॥ ४॥

पतिं नगानामिव बद्धमूलमुन्मूलयिष्यंस्तरसा विपक्षम्।
लघुप्रयत्नं निगृहीतवीर्यस्त्रिमार्गगावेग इवेश्वरेण॥ ५॥

अन्वयः—नगानां, पतिम्, इव, बद्धमूलं, विपक्षं, तरसा, उन्मूलयिष्यन्, त्रिमार्गगावेगः, इव, ईश्वरेण, लघुप्रयत्नं, निगृहीतवीर्यः॥ ५॥

पतिमिति॥ पुनश्च। नगानां पतिं हिमवन्तमिव बद्धमूलं विपक्षं शत्रुं तरसा बलेनोन्मूलयिष्यन्नुत्पाटयिष्यन्। किञ्च। त्रिभिर्मार्गैर्गच्छतीति त्रिमार्गगा गङ्गा। उत्तरपदसमासः। तस्या वेग इव। ईश्वरेण लघुप्रयत्नमल्पप्रयासं यथा तथा निगृहीतवीर्यः प्रतिबद्धशक्तिः। हृताखशक्तिरिति यावत्। पुरा किल हिमाद्रिविदलनाय गगनात्पतन्तं गङ्गाप्रवाहं गङ्गाधरो निजजटाजूटेन निजग्राहेति पौराणी कथा। तद्वदित्यर्थः॥५॥

संस्कारवत्त्वाद्रमयत्सु चेतः प्रयोगशिक्षागुणभूषणेषु।
जयं यथार्थेषु शरेषु पार्थः शब्देषु भावार्थमिवाशशंसे॥६॥

अन्वयः—पार्थः, संस्कारवत्त्वात्, चेतः, रमयत्सु, प्रयोगशिक्षागुणभूषणेषु, यथार्थेषु, शरेषु, जयं, शब्देषु, भावार्थं, इव, आशशंसे॥ ६॥

संस्कारेति॥ एवंभूतः पार्थः संस्कारवत्त्वात्संस्कारश्चित्तवासना। अन्यत्र साधुत्वम्। असाधूनां प्रयोगनिषेधादिति भावः। अथवा संस्कारो व्युत्पत्तिस्तद्वत्त्वात् चेतो रमयत्सु। प्रयोगः सन्धानमोक्षादिः शिक्षाभ्यासो गुणस्तदाहितोऽतिशयो मौर्वी वा अन्यत्र तु प्रयोगोऽभियुक्तव्यवहारः शिक्षाभ्यासो गुणाः स्वरस्थानकरणादयः श्लेषप्रसादादयो वा ते भूषणं येषां तेषु यथा यथाभूता अर्था येषां तेषु यथार्थेषु। अन्यत्र नियतार्थं। शृणन्ति हिंसन्तीति शरास्तेषु जयम्। तन्निर्वाहकत्वात्तदाधारत्वविवक्षायां सप्तमी। शब्देषु पदेषु भावः। प्रवृत्तिनिमित्तं सामान्यादिः स एवार्थस्तमिव। आशशंसे आचकाङ्क्षे। आङ्पूर्वयोः शंसत्योरिच्छायामात्मनेपदमुपसंख्यानात्। यथा शाब्दिकाः शब्दैरर्थं साधयन्ति तद्वदयं शरैर्जयं साधयितुमियेषेत्यर्थः॥ ६॥

भूयः समाधानविवृद्धतेजा नैवं पुरा युद्धमिति व्यथावान्।
स निर्ववामास्रममर्षनुन्नं विषं महानाग इवेक्षणाभ्याम्॥७॥

अन्वयः—भूयः, समाधानविवृद्धतेजाः, पुरा, युद्धम्, एवं, न, इति, व्यथावान्, सः, ईक्षणाभ्याम्, महानागः, विषम्, इव, अमर्षनुन्नम्, अस्रं, निर्ववाम॥७॥

भूय इति॥ भूयः पुनरपि समाधानेन युद्धाय मनोऽवधानेन विवृद्धतेजाः प्रवृ-

द्धप्रतापः पुरा पुरातनं युद्धमेवमित्थं शक्तिसादकरं नाभवदिति हेतोर्व्यथावान्परितापवान्सोऽर्जुन ईक्षणाभ्यां दृष्टिभ्यां महानागो महासर्पो विषमिवामर्षजं क्रोधोत्थापितमस्रमश्रु निर्ववाम निर्जगार। सात्त्विकानां रससाधारण्याद्रौद्रेऽश्रूद्‌योक्तिः ॥ ७ ॥

तस्याहवायासविलोलमौलेः संरम्भताम्रायतलोचनस्य।
निर्वापयिष्यन्निव रोषतप्तं प्रस्नापयामास मुखं निदाघः॥८॥

अन्वयः—आहवायासविलोलमौलेः, संरम्भताम्रायतलोचनस्य, तस्य, रोषतप्तं, मुखं, निदाघः, निर्वापयिष्यन्, इव, प्रस्नापयामास ॥ ८ ॥

तस्येति ॥ आहवायासेन युद्धायासेन विलोलमौलेः स्रस्तकेशबन्धस्य। 'चूडा किरीटं केशाश्च संयता मौलयस्त्रयः' इत्यमरः। संरम्भताम्रे कोपारुणे आयते विस्तृते लोचने यस्य। 'संरम्भः सम्भ्रमे कोपे' इति विश्वः। तस्यार्जुनस्य रोषतप्तं मुखं निदाघो घर्मो निर्वापयिष्यञ्शिशिरीकरिष्यन्निवेत्युत्प्रेक्षा। प्रस्नापयामास सिषेच। स्वेदं जनयामासेत्यर्थः। स्नातेर्मित्त्वविकल्पाद्ध्रस्वविकल्पः ॥ ८ ॥

क्रोधान्धकारान्तरितो रणाय भ्रूभेदरेखाः स बभार तिस्रः।
घनोपरुद्धः प्रभवाय वृष्टेरूर्ध्वांशुराजीरिव तिग्मरश्मिः॥९॥

अन्वयः—क्रोधान्धकारान्तरितः, सः, घनोपरुद्धः, तिग्मरश्मिः, वृष्टेः, प्रभवाय, तिस्रः, ऊर्ध्वांशुराजीः, इव, रणाय भ्रूभेदरेखाः, बभार ॥ ९ ॥

क्रोधेति ॥ क्रोधोऽन्धकार इव तेनान्तरित आवृतः सोऽर्जुनो घनोपरुद्धो मेघावृतस्तिग्मरश्मी रविर्वृष्टेः प्रभवाय वर्षणाय तिस्र ऊर्ध्वांशूनां राजीरिव। अर्कस्योर्ध्वांशुरेखोदये वृष्टिलिङ्गमित्यागमः। रणाय रणप्रवृत्तये तिस्रस्त्रिसंख्या भ्रूभेदो भ्रूभङ्गस्तस्य रेखा बभार ॥ ९ ॥

स प्रध्वनय्याम्बुदनादि चापं हस्तेन दिङ्नाग इवाद्रिशृङ्गम्।
बलानि शम्भोरिषुभिस्तताप चेतांसि चिन्ताभिरिवाशरीरः॥१०॥

अन्वयः—सः, अम्बुदनादि, चापं, दिङ्नागः, अद्रिशृङ्गम्, इव, हस्तेन, प्रध्वनय्य, शम्भोः, बलानि, अशरीरः, चेतांसि, चिन्ताभिः, इव, इषुभिः, तताप ॥ १० ॥

स इति ॥ सोऽर्जुनोऽम्बुदवन्नदतीत्यम्बुदनादि। 'कर्तर्युपमाने' इति णिनिः। चापं दिङ्नागो दिग्गजोऽद्रिशृङ्गमिव हस्तेन करेण प्रध्वनय्य ध्वनयित्वा शम्भोर्बलानि सैन्यान्यशरीरोऽनङ्गः कामश्चेतांसि युवमनांसि चिन्ताभिः प्रयोजनध्यानैरिवेषुभिस्तताप तापयामास। तपतिः सकर्मकः। अत्रेषुशब्दः स्त्रीलिङ्गः। अन्यथोपमानोपमेययोर्भिन्नलिङ्गतादोषात्। 'पत्री रोप इषुर्द्वयोः' इत्यमरः ॥ १० ॥

सद्वादितेवाभिनिविष्टबुद्धौ गुणाभ्यसूयेव विपक्षपाते ।
अगोचरे वागिव चोपरेमे शक्तिः शराणां शितिकण्ठकाये ॥११॥

अन्वयः—अभिनिविष्टबुद्धौ, सद्वादिता, इव, विपक्षपाते, गुणाभ्यसूया, इव, च, अगोचरे, वाक्, इव, शराणां, शक्तिः, शितिकण्ठकाये, उपरेमे ॥ ११ ॥

सद्वादितेति ॥ अभिनिविष्टा शास्त्रनिश्चिता बुद्धिर्यस्य स तस्मिन्नभिनिविष्टबुद्धौ शास्त्रनिश्चितमतौ विषये सद्वादिता प्रामाणिकार्थसमर्थकतेव । न हि सम्यगभ्यस्तशास्त्रं प्रति सद्वाद्यपि शक्नोतीति व्याचक्षते केचित् । अन्ये त्वभिनिविष्टबुद्धावाग्रहाविष्टचित्ते विषये सद्वादिता हितोपदेष्टृत्वमिव । न ह्याग्रही हितं गृह्णातीति भावः । विपक्षपाते वीतरागे विषये गुणाभ्यसूया गुणासहिष्णुतेव । स हि समदर्शी द्विषन्तमपि न द्वेष्टीति भावः । अगोचरे वाङ्मनसागोचरे ब्रह्मणि वागिव । 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति श्रुतेरिति भावः । शराणां शक्तिः शितिकण्ठकाये शिवशरीरे विषये उपरेम उपरता । तस्याक्षोभ्यमहिमत्वादिति भावः । 'विभाषाकर्मकात्' इत्यस्य वैकल्पिकत्वात्पक्ष आत्मनेपदम् । मालोपमा ॥ ११ ॥

उमापतिं पाण्डुसुतप्रणुन्नाः शिलीमुखा न व्यथयाम्बभूवुः ।
अभ्युत्थितस्याद्रिपतेर्नितम्बमर्कस्य पादा इव हैमनस्य ॥१२॥

अन्वयः—पाण्डुसुतप्रणुन्नाः, शिलीमुखाः, उमापतिम्, अभ्युत्थितस्य, अद्रिपतेः, नितम्बं, हैमनस्य, अर्कस्य, पादाः, इव, न, व्यथयाम्बभूवुः ॥ १२ ॥

उमेति ॥ पाण्डुसुतेन प्रणुन्नाः प्रक्षिप्ताः शिली शल्यं मुखे येषां ते शिलीमुखा बाणा उमापतिं शिवमभ्युत्थितस्याभ्युन्नतस्याद्रिपतेर्नितम्बं कटकम् । हेमन्ते भवस्य हैमनस्य । 'सर्वत्राण्च तलोपश्च' इत्यण्प्रत्ययः तकारलोपश्च । अर्कस्य पादा रश्मय इव । 'पादा रश्म्यङ्घ्रितुर्यांशाः' इत्यमरः । न व्यथयांबभूवुः । 'मध्ये स्थितस्यासुमतां समूहमर्कस्य' इति पाठान्तरे मध्ये स्थितस्य हैमनस्यार्कस्य पादाः किरणा असुमतां प्राणिनां समूहमिवेति न दुःखमुत्पादयामासुरिति योजना ॥ १२ ॥

सम्प्रीयमाणोऽनुबभूव तीव्रं पराक्रमं तस्य पतिर्गणानाम् ।
विषाणभेदं हिमवानसह्यं वप्रानतस्येव सुरद्विपस्य ॥ १३ ॥

अन्वयः—गणानां, पतिः, तीव्रं, तस्य पराक्रमं, वप्रानतस्य, सुरद्विपस्य, असह्यं, विषाणभेदं, हिमवान्, इव, संप्रीयमाणः, अनुबभूव ॥ १३ ॥

सम्प्रीति ॥ गणानां पतिः शिवस्तीव्रं तस्यार्जुनस्य पराक्रमं वप्रे रोधस्यानतस्य परिणतस्य । तटप्रहारिण इत्यर्थः । सुरद्विपस्यासह्यं विषाणभेदं दन्तप्रहारं हिम-

वानिव सम्प्रीयमाणः संह्रष्यन्ननुबभूवानुभवति स्म । तस्याक्षोभ्यत्वादनुजिघृक्षुत्वाच्चेति भावः ॥ १३ ॥

तस्मै हि भारोद्धरणे समर्थं प्रदास्यता बाहुमिव प्रतापम् ।
चिरं विषेहेऽभिभवस्तदानीं स कारणानामपि कारणेन ॥१४॥

अन्वयः—हि, तस्मै, भारोद्धरणे, समर्थं, प्रतापं, बाहुम्, इव, प्रदास्यता, कारणानाम्, अपि, कारणेन, सः, अभिभवः, तदानीं, चिरं, विषेहे ॥ १४ ॥

तस्मै हीति ॥ तस्मै पार्थाय भारस्य भूभारस्योद्धरण उद्वहने समर्थं प्रतापं बाहुमिव । अवष्टम्भतयेति शेषः । अन्यथा भारोद्वहनस्य दुष्करत्वादिति भावः । 'स प्रतापः प्रभावश्च यत्तेजः कोशदण्डजम्' इत्यमरः । प्रदास्यता वितरिष्यता कारणानां ब्रह्मादीनामपि कारणेन जनकेन देवेन सोऽभिभवोऽर्जुनपरिभवस्तदानीं चिरं विषेहे सोढः । वात्सल्यादिति भावः ॥ १४ ॥

अथ त्रिभिर्भगवदभिप्रायमाविष्कुर्वंश्चतुर्भिः कलापकमाह—

प्रत्याहतौजाः कृतसत्त्ववेगः पराक्रमं ज्यायसि यस्तनोति ।
तेजांसि भानोरिव निष्पतन्ति यशांसि वीर्यज्वलितानि तस्य ॥१५॥

अन्वयः—प्रत्याहतौजाः, कृतसत्त्ववेगः, यः, ज्यायसि, पराक्रमं, तनोति, तस्य, भानोः, तेजांसि, इव, वीर्यज्वलितानि, यशांसि, निष्पतन्ति ॥ १५ ॥

प्रत्याहतेति ॥ प्रत्याहतौजाः परेण प्रतिहतबलः सन्नपि कृतसत्त्ववेगः कृतोत्साहातिशयः सन्यः पुमाञ्ज्यायसि स्वस्मादभ्यधिके पराक्रमं तनोति तस्य पुंसो भानोरर्कस्य तेजांसीव वीर्येण शौर्येण ज्वलितानि प्रकाशितानि यशांसि निष्पतन्ति । उद्भवन्तीत्यर्थः । हीनस्याधिकाभियोगो यशस्कर इति भावः ॥ १५ ॥

ततः किमित्यत आह—

दृष्टावदानाद्व्यथतेऽरिलोकः प्रध्वंसमेति व्यथिताच्च तेजः ।
तेजोविहीनं विजहाति दर्पः शान्तार्चिषं दीपमिव प्रकाशः ॥१६॥

अन्वयः—दृष्टावदानात्, अरिलोकः, व्यथते, व्यथितात्, च, तेजः प्रध्वंसम्, एति, तेजोविहीनं, दर्पः, शान्तार्चिषं, दीपं, प्रकाशः, इव, विजहाति ॥ १६ ॥

दृष्टेति ॥ दृष्टमवदानं महत्कर्म यस्य तस्माद्दृष्टावदानाद्दृष्टपौरुषादरिलोकः शत्रुजनो व्यथते बिभेति । व्यथिताद्भीतात्तेजः प्रध्वंसं नाशमेति । तेजोविहीनं दर्प उत्साहः शान्तार्चिषं निर्वाणज्वालं दीपं प्रकाश इव विजहाति त्यजति ॥ १६ ॥

ततः प्रयात्यस्तमदावलेपः स जय्यतायाः पदवीं जिगीषोः ।
गन्धेन जेतुः प्रमुखागतस्य प्रतिद्विपस्येव मतङ्गजौघः ॥ १७ ॥

अन्वयः—ततः, सः, अस्तमदावलेपः, गन्धेन, (इव) जेतुः प्रमुखागतस्य, प्रतिद्विपस्य मतङ्गजौघः, इव, जिगीषोः, जय्यतायाः, पदवीं, प्रयाति ॥ १७ ॥

तत इति ॥ ततो दर्पहान्यनन्तरमस्तौ क्षयं गतौ मदावलेपौ मदगर्वौ यस्य सोऽरिलोको गन्धेन मदगन्धेनेव जेतुर्जयनशीलस्य । शीलार्थे तृच्प्रत्ययः । प्रमुखागतस्याभिमुखागतस्य प्रतिद्विपस्यान्यो मतङ्गजौघो मत्तगजसमूह इव जिगीषोर्नायकस्य जय्यतायाः पदवीं प्रयाति प्राप्नोति । विजिगीषुणा जेतुं शक्यो भवतीत्यर्थः । 'क्षय्यजय्यौ शक्यार्थे' इति निपातः । अत्र श्लोकद्वये ज्यायसि पराक्रमकरणादीनां पूर्वपूर्वस्योत्तरोत्तरं प्रति कारणत्वकथनात्कारणमालाख्योऽलङ्कारः । लक्षणं तूक्तम् ॥ १७ ॥

एवं प्रतिद्वन्द्विषु तस्य कीर्तिं मौलीन्दुलेखाविशदां विधास्यन् ।
इयेष पर्यायजयावसादां रणक्रियां शम्भुरनुक्रमेण ॥ १८ ॥

अन्वयः—शम्भुः, एवं, प्रतिद्वन्द्विषु, तस्य, मौलीन्दुलेखाविशदां, कीर्तिं, विधास्यन्, अनुक्रमेण, पर्यायजयावसादां, रणक्रियां, इयेष ॥ १८ ॥

एवमिति ॥ एवमुक्तरीत्या प्रतिद्वन्द्विषु प्रत्यर्थिषु मध्ये तस्यार्जुनस्य मौलीन्दुलेखाविशदां कीर्तिं विधास्यन्करिष्यन्ननुक्रमेणाविपर्यासेन पर्यायेण जयोऽवसादो भङ्गश्च तौ जयावसादौ यस्यां तां पर्यायजयावसादां रणक्रियामियेषेच्छति स्म । जयानन्तरं भङ्गो भङ्गानन्तरं जय इति पर्यायार्थः । तस्य विपर्यासोऽन्यतरनैरन्तर्यं तदभावोऽनुक्रम इत्यपौनरुक्त्यम् ॥ १८ ॥

मुनेर्विचित्रैरिषुभिः स भूयान्निन्ये वशं भूतपतेर्बलौघः ।
सहात्मलाभेन समुत्पतद्भिर्जातिस्वभावैरिव जीवलोकः ॥ १९ ॥

अन्वयः—मुनेः, विचित्रैः, इषुभिः, सः, भूयान्, भूतपतेः, बलौघः, आत्मलाभेन, सह, समुत्पतद्भिः, जातिस्वभावैः, जीवलोकः, इव, वशं, निन्ये ॥ १९ ॥

मुनेरिति ॥ मुनेर्विचित्रैरिषुभिः स भूयानसंख्यो भूतपतेर्बलौघ आत्मलाभेन जन्मना सह समुत्पतद्भिराविर्भवद्भिः । आजन्मसिद्धैरित्यर्थः । जातयो गोत्वमनुष्यत्वादयः, स्वभावा जातिनियता धर्मास्तैर्जातिस्वभावैर्जीवलोकः प्राणिजातमिव वशं निन्ये नीतः । कर्मणि लिट् । प्राणिनो जातिधर्मानिव गणा मुनिशरान्नातिक्रमितुं शेकुरित्यर्थः ॥ १९ ॥

वितन्वतस्तस्य शरान्धकारं त्रस्तानि सैन्यानि रवं निशेमुः ।
प्रवर्षतः सन्ततवेपथूनि क्षपाघनस्येव गवां कुलानि ॥ २० ॥

अन्वयः—त्रस्तानि, सैन्यानि, सन्ततवेपथूनि, गवां, कुलानि, प्रवर्षतः, क्षपाघनस्य, इव, शरान्धकारं, वितन्वतः, तस्य, रवं, निशेमुः ॥ २० ॥

वितन्वत इति ॥ त्रस्तानि सैन्यानि सन्ततवेपथूनि निरन्तरकम्पानि गवां कुलानि वृन्दानि प्रवर्षतो वृष्टिं कुर्वतः क्षपाघनस्य रात्रिमेघस्येव शरैर्योऽन्धकारस्तं वितन्वतो विस्तारयतस्तस्य मुनेः सम्बन्धिनं रवं शरवर्षघोषं निशेमुः शुश्रुवुः । न तु किञ्चिद् ददृशुः । चेष्टा तु दूरापास्तेति भावः ॥ २० ॥

स सायकान्साध्वसविप्लुतानां क्षिपन्परेषामतिसौष्ठवेन ।
शशीव दोषावृतलोचनानां विभिद्यमानः पृथगाबभासे ॥ २१ ॥

अन्वयः—अतिसौष्ठवेन, सायकान्, क्षिपन्, सः, साध्वसविप्लुतानां, परेषां, दोषावृतलोचनानां, शशी, इव, पृथग्, विभिद्यमानः, आबभासे ॥ २१ ॥

स इति ॥ अतिसौष्ठवेनातिलाघवेन सायकाञ्शरान्क्षिपन्सोऽर्जुनः साध्वसेन विप्लुतानां भ्रान्तानां परेषां द्विषां दोषेण काचकामलादिरोगेणावृतलोचनानां दुष्टचक्षुषां शशीव पृथग्विभिद्यमान आबभासे । यथा सदोषचक्षुषैकश्चन्द्रो नानेव लक्ष्यते तद्वदेकोऽप्यनेक इव दृष्ट इति भावः ॥ २१ ॥

क्षोभेण तेनाथ गणाधिपानां भेदं ययावाकृतिरीश्वरस्य ।
तरङ्गकम्पेन महाह्रदानां छायामयस्येव दिनस्य कर्तुः ॥ २२ ॥

अन्वयः—अथ, गणाधिपानां, तेन, क्षोभेण, ईश्वरस्य, आकृतिः, महाह्रदानां, तरङ्गकम्पेन, छायामयस्य, दिनस्य, कर्तुः, इव, भेदं, ययौ ॥ २२ ॥

क्षोभेणेति ॥ अथ गणाधिपानां सम्बन्धिना तेन क्षोभेण कम्पेनेश्वरस्याकृतिराकारो मूर्तिर्महाह्रदानां तरङ्गकम्पेन छायामयस्य प्रतिबिम्बरूपस्य दिनस्य कर्तुर्दिवाकरस्याकृतिरिव भेदं विकारं ययौ प्राप । स्वयं निर्विकारोऽपि प्रतिमासूर्यवत्परसंसर्गात्तथा प्रतीयत इत्यर्थः ॥ २२ ॥

यदि देवोऽपि विकृतस्तर्हि कोपः किं न कृतः । तत्राह—

प्रसेदिवांसं न तमाप कोपः कुतः परस्मिन्पुरुषे विकारः ।
आकारवैषम्यमिदं च भेजे दुर्लक्ष्यचिह्ना महतां हि वृत्तिः ॥ २३ ॥

अन्वयः—प्रसेदिवांसं, तं, कोपः, न, आप, परस्मिन्, पुरुषे, विकारः, कुतः, इदं, आकारवैषम्यं, च, भेजे, महतां, वृत्तिः, दुर्लक्ष्यचिह्ना, हि ॥ २३ ॥

प्रसेदिवांसमिति ॥ प्रसेदिवांसमर्जुनं प्रति प्रसन्नचित्तं तं देवं कोपो नाप न प्राप। तत्राप्यनुग्रहं ययाविति भावः। तत्र हेतुः—परस्मिन्पुरुषे परात्मनि देवे। स्वतो निर्विकार इत्यर्थः। विकारः कोपरूपः कुतः। न कुतश्चिदित्यर्थः। ननु तस्य निर्विकारस्य कथं बहिराकारभेदः कारणाभावादिति चेन्न विघ्न इत्याह—इदं पूर्वोक्तमाकारवैषम्यं च भेजे। किन्तु केनापि कारणेन न कुप्यतीत्यर्थः। ननु निर्विकारे कुत आकारभेदस्तत्राह—महतां वृत्तिश्चेष्टा दुर्लक्ष्यचिह्ना दुर्ग्रहहेतुका हि ॥ २३ ॥

वैषम्यमेवाह —

विस्फार्यमाणस्य ततो भुजाभ्यां भूतानि भर्त्रा धनुरन्तकस्य।
भिन्नाकृतिं ज्यां ददृशुः स्फुरन्तीं क्रुद्धस्य जिह्वामिव तक्षकस्य ॥२४॥

अन्वयः—ततः, भूतानि, भर्त्रा, भुजाभ्यां, विस्फार्यमाणस्य, धनुरन्तकस्य, स्फुरन्तीं, भिन्नाकृतिं, ज्यां, क्रुद्धस्य, तक्षकस्य, जिह्वाम्, इव, ददृशुः ॥ २४ ॥

विस्फार्यमाणस्येति ॥ ततोऽनन्तरं भूतानि भर्त्रा भूतपतिना। भृञस्तृच्प्रत्ययः। अत एव 'न लोक–' इत्यादिना षष्ठीप्रतिषेधः। भुजाभ्याम्। कर्तृकरणयोस्तृतीया। विस्फार्यमाणस्याकृष्यमाणस्य धनुरन्तक इव तस्य धनुरन्तकस्य सम्बन्धिनीं स्फुरन्तीं चलन्तीमत एव भिन्ना द्विधेव दृश्यमानाकृतिर्यस्यास्तां ज्यां धनुर्गुणं क्रुद्धस्य तक्षकस्य नागविशेषस्य जिह्वामिव ददृशुः। द्विधाभावाज्जयङ्करत्वाच्चेति भावः ॥२४॥

सव्यापसव्यध्वनितोग्रचापं पार्थः किराताधिपमाशशङ्के।
पर्यायसम्पादितकर्णतालं यन्ता गजं व्यालमिवापराद्धः ॥ २५ ॥

अन्वयः—पार्थः, सव्यापसव्यध्वनितोग्रचापं, किराताधिपम्, अपराद्धः, यन्ता, पर्यायसम्पादितकर्णतालं, व्यालं, गजम्, इव, आशशङ्के ॥ २५ ॥

सव्येति ॥ पार्थः सव्यापसव्याभ्यां वामदक्षिणगतिभ्यां ध्वनितं नादितमुग्रचापं येन तं किराताधिपम्। अपराद्धः प्रमत्तो यन्ता पर्यायेणायौगपद्येन सम्पादितः कर्णयोस्तालः आस्फालनं येन तं व्यालं दुष्टम्। 'भेद्यलिङ्गः शठे व्यालः" इत्यमरः। गजमिवाशशङ्के। तच्चापचातुर्यदर्शनाद्दुर्जयः कोऽप्ययमनर्थकरश्चेति शङ्कितवानित्यर्थः ॥ २५ ॥

निजघ्निरे तस्य हरेषुजालैः पतन्ति वृन्दानि शिलीमुखानाम्।
ऊर्जस्विभिः सिन्धुमुखागतानि यादांसि यादोभिरिवाम्बुराशेः ॥२६॥

अन्वयः—हरेषुजालैः, तस्य, पतन्ति, शिलीमुखानां, वृन्दानि, ऊर्जस्विभिः, अम्बुराशेः, यादोभिः, सिन्धुमुखागतानि, यादांसि, इव, निजघ्निरे ॥ २६ ॥

निजघ्निर इति ॥ हरेषुजालैस्तस्यार्जुनस्य पतन्त्यागच्छन्ति शिलीमुखानां

शराणां वृन्दानि। ऊर्जस्विभिः प्रबलैरम्बुराशेर्यादोभिर्जलग्राहैः सिन्धुमुखेन नदीमुखेनागतानि यादांसीव निजघ्निरे हतानि ॥ २६ ॥

विभेदमन्तः पदवीनिरोधं विध्वंसनं चाविदितप्रयोगः।
नेतारिलोकेषु करोति यद्यत्तच्चकारास्य शरेषु शम्भुः ॥२७॥

अन्वयः—अन्तः, विभेदं, पदवीनिरोधं, विध्वंसनं, च, यत्, यत्, नेता, अविदितप्रयोगः, अरिलोकेषु, करोति, तत्, तत्, शम्भुः, अस्य, शरेषु, चकार ॥ २७ ॥

विभेदमिति ॥ अन्तर्विभेदं व्यूहविश्लेषणमुपजापं च पदवीनिरोधं मार्ग एव प्रतिबन्धनमन्यत्र त्वासारप्रसारप्रतिबन्धं विध्वंसनं खण्डनं दुर्गलुण्ठनदाहादिकं चेत्यादि यद्यन्नेता नायको जिगीषुरविदितप्रयोगः संवृतमन्त्रत्वादविज्ञातोपायप्रयोगः सन्नरिलोकेषु शत्रुकुलेषु करोति तत्तच्छम्भुरविदितप्रयोगोऽज्ञातबाणसन्धानमोक्षादिकः सन्नस्यार्जुनस्य शरेषु चकार कृतवान्। कर्तरि लिट्। श्लेषालङ्कारः ॥ २७ ॥

सोढावगीतप्रथमायुधस्य क्रोधोज्झितैर्वेगितया पतद्भिः।
छिन्नैरपि त्रासितवाहिनीकैः पेते कृतार्थैरिव तस्य बाणैः ॥२८॥

अन्वयः—सोढावगीतप्रथमायुधस्य, क्रोधोज्झितैः, वेगितया, पतद्भिः, छिन्नैः अपि, त्रासितवाहिनीकैः, कृतार्थैः, इव, तस्य, बाणैः, पेते ॥ २८ ॥

सोढेति ॥ सोढानि परैरवगीतानि गर्हितानि प्रथमायुधानि सर्वोत्कृष्टबाणा यस्य तस्यार्जुनस्य सम्बन्धिभिः क्रोधोज्झितैः पूर्वबाणवैफल्यात्कोपेन त्यक्तैः। अत एव वेगितया वेगेन पतद्भिर्गतिं कुर्वद्भिः अत एव छिन्नैरपि त्रासिता वाहिन्यो यैस्तैस्त एव कृतार्थैरिव बाणैः पेते। भावे लिट्। वस्तुतस्त्वकृतार्था एवेत्यर्थः ॥ २८ ॥

अलङ्कृतानामृजुतागुणेन गुरूपदिष्टां गतिमास्थितानाम्।
सतामिवापर्वणि मार्गणानां भङ्गः स जिष्णोर्धृतिमुन्ममाथ ॥२९॥

अन्वयः—ऋजुतागुणेन, अलङ्कृतानां, गुरूपदिष्टां, गतिं, आस्थितानां, मार्गणानां, सताम्, इव, अपर्वणि, सः, भङ्गः, जिष्णोः, धृतिम्, उन्ममाथ ॥ २९ ॥

अलमिति ॥ ऋजुताऽवक्राकारत्वमवक्रशीलत्वं च सैव गुणस्तेनालङ्कृतानां गुरुभिर्धनुर्विद्यागुरुभिर्धर्मशास्त्रगुरुभिश्चोपदिष्टां दर्शितां गतिं गमनमाचारं चास्थितानां प्राप्तानां मार्गणानां शराणां सतां साधूनामिवाऽपर्वण्यग्रन्थौ। अन्यत्राप्रस्तावे। अकाण्ड इत्यर्थः। 'पर्व स्यादुत्सवे ग्रन्थौ प्रस्तावे लक्षणान्तरे' इति विश्वः। स ईश्वरकृतो भङ्गश्छेदो व्यसनं च जिष्णोरर्जुनस्य कस्यचिज्जित्वरस्य च। 'जिष्णुः शक्रे धनञ्जये। जित्वरे' इति विश्वः। धृतिं धैर्यमुन्ममाथ। जहारेत्यर्थः। अकाण्डे साधुविपत्तिदर्शनादिव शरभङ्गदर्शनाद्धैर्यभङ्गोऽभूदित्यर्थः ॥ २९ ॥

बाणच्छिदस्ते विशिखाः स्मरारेरवाङ्मुखीभूतफलाः पतन्तः ।
अखण्डितं पाण्डवसायकेभ्यः कृतस्य सद्यः प्रतिकारमापुः ॥३०॥

अन्वयः—बाणच्छिदः, ते, स्मरारेः, विशिखाः अवाङ्मुखीभूतफलाः, पतन्तः, पाण्डवसायकेभ्यः, कृतस्य, सद्यः, अखण्डितं, प्रतिकारम् , आपुः ॥ ३० ॥

बाणेति ॥ बाणच्छिदः पार्थशरच्छेदिनस्ते स्मरारेर्विशिखा अवाङ्मुखीभूतफला विमुखाग्रा विफलाश्च सन्तः पतन्तः पाण्डवसायकेभ्यः । क्रियाग्रहणाच्चतुर्थी । पाण्डवसायकानां कृतस्य फलमकुरूपस्य स्वकर्मणः सद्योऽखण्डितं प्रतिकारमापुः । अत्युत्कटं कर्म सद्यः दर्शयतीति भावः ॥ ३० ॥

पुनरर्जुनस्य जयमाह—

चित्रीयमाणानतिलाघवेन प्रमाथिनस्तान्भवमार्गणानाम् ।
समाकुलाया निचखान दूरं बाणान्ध्वजिन्या हृदयेष्वरातिः ॥३१॥

अन्वयः—अरातिः, अतिलाघवेन, चित्रीयमाणान् , भवमार्गणानां, प्रमाथिनः, तान् , बाणान् , समाकुलायाः, ध्वजिन्याः, हृदयेषु, दूरं, निचखान ॥ ३१ ॥

चित्रीयमाणानिति ॥ अरातिरर्जुनोऽतिलाघवेनातिशीघ्रत्वाच्चित्रीयमाणांश्चित्रमाश्चर्यं कुर्वाणान् । 'नमोवरिवश्चित्रङः क्यच्' । भवमार्गणानां प्रमाथिनः खण्डयतस्तान्बाणान् । समाकुलायाः संक्षुभिताया ध्वजिन्याः सेनाया हृदयेषु दूरं गाढं निचखान निखातवान् ॥ ३१ ॥

तस्यातियत्नादतिरिच्यमाने पराक्रमेऽन्योन्यविशेषणेन ।
हन्ता पुरां भूरि पृषत्कवर्षं निरास नैदाघ इवाम्बु मेघः ॥३२॥

अन्वयः—तस्य, पराक्रमे, अतियत्नात् , अन्योन्यविशेषणेन, अतिरिच्यमाने, पुरां, हन्ता, भूरि, पृषत्कवर्षं, नैदाघः, मेघः, अम्बु, इव, निरास, ॥ ३२ ॥

तस्येति ॥ तस्यार्जुनस्य पराक्रमेऽतियत्नाद्धेतोरन्योन्यस्य विशेषणेनातिशयकरणेनातिरिच्यमाने उत्कृष्यमाणे सति पुरां हन्ता त्रिपुरविजयी हरो भूरि प्रभूतं पृषत्कवर्षं बाणवर्षम् । 'पृषत्कबाणविशिखाः' इत्यमरः । निदाघे भवो नैदाघो मेघोऽम्बुवाहोऽम्बु जलमिव निरास मुमोच । अस्यतेर्लिट् । निदाघग्रहणं वर्षणस्यातितीव्रत्वद्योतनार्थम् ॥ ३२ ॥

अनामृशन्तः क्वचिदेव मर्म प्रियैषिणानुग्राहिताः शिवेन ।
सुहृत्प्रयुक्ता इव नर्मवादाः शरा मुनेः प्रीतिकरा बभूवुः ॥३३॥

अन्वयः—प्रियैषिणा, शिवेन, अनुप्रहिताः क्वचित्, एव, मर्म, अनामृशन्तः, शराः, सुहृत्प्रयुक्ता, नर्मवादाः, इव, मुनेः, प्रीतिकराः, बभूवुः ॥ ३३ ॥

अनामृशन्त इति ॥ प्रियैषिणा प्रियचिकीर्षुणा शिवेनानुप्रहिताः प्रयुक्ता अत एव क्वचिदेव मर्मानामृशन्तोऽस्पृशन्तः शराः सुहृन्मित्रं सोऽपि प्रियैषी तेन प्रयुक्ता उच्चारिता नर्मवादाः प्रियवादा इव मुनेरर्जुनस्य प्रीतिकराः प्रीतिजनका बभूवुः ॥ ३३ ॥

अस्त्रैः समानामतिरेकिणीं वा पश्यन्निषूणामपि तस्य शक्तिम् ।
विषादवक्तव्यबलः प्रमाथी स्वमाललम्बे बलमिन्दुमौलिः ॥ ३४ ॥

अन्वयः—अस्त्रैः, समानाम्, अतिरेकिणीं, वा, तस्य, इषूणाम्, अपि, शक्तिं, पश्यन्, विषादवक्तव्यबलः, प्रमाथी, इन्दुमौलिः, स्वं, बलम्, आललम्बे ॥ ३४ ॥

अस्त्रैरिति ॥ अस्त्रैः स्वायुधैः समानां तुल्यामतिरेकिणीं, ततोऽधिकां वा तस्य मुनेरिषूणामपि शक्तिं पश्यन्विषादेनोत्साहभङ्गेन वक्तव्यानि निर्वाच्यानि बलानि सैन्यानि यस्य स प्रमाथी शत्रुमर्दन इन्दुमौलिर्महादेवः स्वं बलमात्मीयं महिमानमाललम्बे स्वसामर्थ्यमवलम्बितवान् ॥ ३४ ॥

ततस्तपोवीर्यसमुद्धतस्य पारं यियासोः समरार्णवस्य ।
महेषुजालान्यखिलानि जिष्णोरर्कः पयांसीव समाचचाम ॥ ३५ ॥

अन्वयः—ततः, तपोवीर्यसमुद्धतस्य, समरार्णवस्य, पारं, यियासोः, जिष्णोः, अखिलानि, महेषुजालानि, अर्कः, पयांसि, इव, समाचचाम ॥ ३५ ॥

तत इति ॥ ततो महिमप्रादुर्भावानन्तरं देवस्तपोवीर्याभ्यां समुद्धतस्य प्रगल्भस्य समर एवार्णवस्तस्य पारमन्तं यियासोर्जिगमिषोर्जिष्णोरर्जुनस्याखिलानि महेषुजालानि समग्रबाणसमूहानर्कः सूर्यः पयांसीव जलानीव समाचचाम सञ्जहार ॥ ३५ ॥

रिक्ते सविस्रम्भमथार्जुनस्य निषङ्गवक्त्रे निपपात पाणिः ।
अन्यद्विपापीतजले सतर्षं मतङ्गजस्येव नगाश्मरन्ध्रे ॥ ३६ ॥

अन्वयः—अथ, अर्जुनस्य, पाणिः, रिक्ते, निषङ्गवक्त्रे, अन्यद्विपापीतजले, नगाश्मरन्ध्रे, सतर्षं, मतङ्गजस्य, (पाणिः,) इव, सविस्रम्भं, निपपात ॥ ३६ ॥

रिक्त इति ॥ अथ बाणान्तर्धानानन्तरमर्जुनस्य पाणिः करो रिक्ते बाणशून्ये निषङ्गवक्त्रे तूणीरमुखेऽन्यद्विपेन गजान्तरेणापीतजले पीततोये नगस्याचलस्याश्मरन्ध्रे शिलागर्ते । प्रदर इत्यर्थः । सतर्षं सतृष्णं यथा स्यात्तथा मतङ्गजस्य पाणिर्लक्षणया कर इव सविस्रम्भं सन्त्येव बाणा इति सविश्वासं निपपात ॥ ३६ ॥

च्युते स तस्मिन्निषुधी शरार्थाद्ध्वस्तार्थसारे सहसेव बन्धौ ।
तत्कालमोघप्रणयः प्रपेदे निर्वाच्यताकाम इवाभिमुख्यम् ॥ ३७ ॥

अन्वयः—शरार्थात्, च्युते, तस्मिन्, इषुधी, सहसा, ध्वस्तार्थसारे, बन्धौ, इव, तत्कालमोघप्रणयः, सः, निर्वाच्यताकामः, इव, आभिमुख्यं, प्रपेदे ॥ ३७ ॥

च्युत इति ॥ शरा एवार्थो धनं तस्माच्च्युते भ्रष्टे तस्मिन्निषुधौ निषङ्गे सहसा झटिति ध्वस्तार्थसारेऽकाण्डे नष्टधनसारे बन्धाविव तत्काले मोघो वितथः प्रणयः प्रीतिर्यस्य सः । तत्कालकृतव्यर्थप्रार्थनः । पूर्वं कृतार्थ एवेति भावः । स पाणिः निर्वाच्यतां कृतघ्नत्वापवादराहित्यं कामयत इति निर्वाच्यताकामः । 'शीलिकामिभक्ष्याचरिभ्यो णः' । स इवेत्युत्प्रेक्षा । आभिमुख्यं प्रपेदे । यथा कश्चित्कृतज्ञस्तत्कालेऽकृतोपकारमपि बन्धुं पूर्वोपकारस्मरणात्पुनः पुनरनुबध्नाति तद्वदित्यर्थः ॥ ३७ ॥

आघट्टयामास गतागताभ्यां सावेगमग्राङ्गुलिरस्य तूणौ ।
विधेयमार्गे मतिरुत्सुकस्य नयप्रयोगाविव गां जिगीषोः ॥ ३८ ॥

अन्वयः—अस्य, अग्राङ्गुलिः, विधेयमार्गे, उत्सुकस्य, गां, जिगीषोः, मतिः, नयप्रयोगौ, इव, तूणौ, सावेगं, गतागताभ्यां, (च) आघट्टयामास ॥ ३८ ॥

आघट्टयामासेति ॥ अस्य मुनेरग्रं चासावङ्गुलिश्चेत्यग्राङ्गुलिः । 'हस्ताग्राग्रहस्तयोर्गुणगुणिनोर्भेदाभेदात्' इति वामनः । विधेयमार्गे कर्तव्यान्वेषण उत्सुकस्य प्रवृत्तस्य गां भुवं जिगीषोर्नायकस्य मतिर्बुद्धिर्नयः षाड्गुण्यं प्रयोग उपायस्तौ नयनप्रयोगाविव तूणौ निषङ्गौ सावेगं ससम्भ्रमम् । 'इष्टानिष्टागमाज्ञाने आवेगश्चित्तसंभ्रमः' इति शाश्वतः । गतागताभ्यां यातायाताभ्यामावापोद्वापाभ्यां चाघट्टयामास । अन्यत्र तु वितर्कयामास । शरग्रहणाय पुनः पुनस्तूणयोः पाणिं व्यापारयामासेत्यर्थः ॥ ३८ ॥

बभार शून्याकृतिरर्जुनस्तौ महेषुधी वीतमहेषुजालौ ।
युगान्तसंशुष्कजलौ विजिह्मः पूर्वापरौ लोक इवाम्बुराशी ॥ ३९ ॥

अन्वयः—शून्याकृतिः, अर्जुनः, तौ, वीतमहेषुजालौ, महेषुधी, विजिह्मः, लोकः, युगान्तसंशुष्कजलौ, पूर्वापरौ, अम्बुराशी, इव, बभार ॥ ३९ ॥

बभारेति ॥ शून्याकृतिरिष्टनाशान्निस्तेजस्कल्पोऽर्जुनस्तौ वीतमहेषुजालौ वीतानि गतानि महेषुजालानि ययोस्तौ महेषुधी महानिषङ्गौ विजिह्मः शून्यो लोको युगान्ते संशुष्कजलौ । 'शुषः कः' इति निष्ठातकारस्य ककारः । पूर्वापरावम्बुराशी समुद्राविव बभार ॥ ३९ ॥

तेनानिमित्तेन तथा न पार्थस्तयोर्यथा रिक्ततयानुतेपे ।
स्वामापदं प्रोज्झ्य विपत्तिमग्नं शोचन्ति सन्तो ह्युपकारिपक्षम् ॥४०॥

अन्वयः—पार्थः, तयोः, रिक्ततया, यथा, अनुतेपे, तथा, तेन, अनिमित्तेन, न, (तथाहि) सन्तः, स्वामापदं, प्रोज्झ्य, विपत्तिमग्नम्, उपकारिपक्षं, शोचन्ति, हि ॥४०॥

तेनेति ॥ पार्थस्तयोस्तूणयो रिक्ततया हेतुना यथानुतेपे शुशोच तथा तेनानिमित्तेन बाणक्षयरूपेण दुर्निमित्तेन न शुशोच । तथा हि । सन्तः स्वामापदं प्रोज्झ्य विसृज्य विपत्तिमग्नमुपकारिणां पक्षं वर्गं शोचन्ति । स्वव्यसनापेक्षया परकीयव्यसनमेव सतामनुतापकमित्यर्थः ॥ ४० ॥

प्रतिक्रियायै विधुरः स तस्मात्कृच्छ्रेण विश्लेषमियाय हस्तः ।
पराङ्मुखत्वेऽपि कृतोपकारात्तूणीमुखान्मित्रकुलादिवार्यः ॥४१॥

अन्वयः—प्रतिक्रियायै, विधुरः, सः, हस्तः, पराङ्मुखत्वे, अपि, कृतोपकारात्, तस्मात्, तूणीमुखात्, मित्रकुलात्, आर्यः, इव, कृच्छ्रेण, विश्लेषम्, इयाय ॥४१॥

प्रतीति ॥ प्रतिक्रियायै विधुरः प्रतिकर्तुमसमर्थः । 'तुमर्थाच्च भाववचनात्' इति चतुर्थी । अर्जुनस्य स हस्तः पाणिः । पराङ्मुखत्वेऽपि तत्कालवैमुख्येऽपि कृतोपकारात्तस्मात्तूणीमुखान्मित्रकुलादार्यः साधुः कृतज्ञ इव । 'आर्यः साधुकुलीनयोः' इति विश्वः । कृच्छ्रेण महाकष्टेन विश्लेषमियाय । गौरादित्वात्तूणशब्दान्ङीष् ॥ ४१ ॥

पश्चात्क्रिया तूणयुगस्य भर्तुर्जज्ञे तदानीमुपकारिणीव ।
सम्भावनायामधरीकृतायां पत्युः पुरः साहसमासितव्यम् ॥ ४२ ॥

अन्वयः—तदानीं, भर्तुः, पश्चात्क्रिया, तूणयुगस्य, उपकारिणी, इव, जज्ञे, (तथा हि) सम्भावनायाम्, अधरीकृतायां, पत्युः, पुरः, आसितव्यं, साहसं, (न क्षमम्) ॥ ४२ ॥

पश्चादिति ॥ तदानीं भर्तुः स्वामिनः । कर्तरि षष्ठी । पश्चात्क्रिया पृष्ठतःकरणं तूणयुगस्योपकारिणीवोपकारिकेव जज्ञे जाता । तथा हि । सम्भावनायां स्वयोग्यतायामधरीकृतायामफलीकृतायां पत्युः स्वामिनः पुरोऽग्र आसितव्यमासितं स्थितिः । बहुलग्रहणाद्भावे तव्यप्रत्ययः । साहसं न क्षमं न योग्यम् । भर्त्रा सम्भावितस्यावसरेऽनुपकर्तुरनुजीविनस्तत्सामुख्यमनुचितमित्यर्थः ॥ ४२ ॥

तं शम्भुराक्षिप्तमहेषुजालं लौहैः शरैर्मर्मसु निस्तुतोद ।
हृतोत्तरं तत्त्वविचारमध्ये वक्तेव दोषैर्गुरुभिर्विपक्षम् ॥ ४३ ॥

अन्वयः—शम्भुः, आक्षिप्तमेरुजालं, तं, तत्त्वविचारमध्ये, इतोत्तरं, विपक्षं, वक्ता, गुरुभिः, दोषैः, इव, लौहैः, शरैः, मर्मसु, निस्तुतोद ॥ ४३ ॥

तमिति ॥ शम्भुराक्षिप्तान्याहतानि मेरुजालानि यस्य तं मुनिं तत्त्वविचारमध्ये वादमध्ये इतोत्तरं निरुत्तरीकृतं विपक्षं प्रतिवादिनं वक्ता वादी गुरुभिर्दोषैर्निग्रहस्थानैरिव लौहैर्लोहमयैः शरैर्मर्मसु निस्तुतोद व्यथयामास ॥ ४३ ॥

जहार चास्मादचिरेण वर्म ज्वलन्मणिद्योतितहैमलेखम् ।
चण्डः पतङ्गान्मरुदेकनीलं तडित्वतः खण्डमिवाम्बुदस्य ॥४४॥

अन्वयः—अस्मात्, अचिरेण, ज्वलन्मणिद्योतितहैमलेखं, वर्म, चण्डः, मरुत्, पतङ्गात्, एकनीलं, तडित्वतः, अम्बुदस्य, खण्डम्, इव, जहार ॥ ४४ ॥

जहारेति ॥ किं च । अस्मान्मुनेरचिरेण शीघ्रं ज्वलद्भिर्मणिभिर्द्योतिता हैम्यः सौवर्ण्यो लेखा यस्य तत्तथोक्तं वर्म कवचम् । चण्डो मरुत्पवनः पतङ्गात्सूर्यादेकनीलं केवलकृष्णवर्णम् । 'एके मुख्यान्यकेवलाः' इत्यमरः । तडित्वतस्तडिद्युक्तस्याम्बुदस्य खण्डमिव जहार । तदा भगवन्मायया मुक्तकञ्चुको मुनिर्मेघनिर्मुक्तः सूर्य इव दिदीपे इति भावः ॥ ४४ ॥

अथ युग्मेनाह—

विकोशनिर्धौततनोर्महासेः फणावतश्च त्वचि विच्युतायाम् ।
प्रतिद्विपाबद्धरुषः समक्षं नागस्य चाक्षिप्तमुखच्छदस्य ॥ ४५ ॥
विबोधितस्य ध्वनिना घनानां हरेरपेतस्य च शैलरन्ध्रात् ।
निरस्तधूमस्य च रात्रिवह्नेर्विना तनुत्रेण रुचिं स भेजे ॥ ४६ ॥

अन्वयः—सः, तनुत्रेण, विना, विकोशनिर्धौततनोः, महासेः, (तथा) त्वचि, विच्युतायां, फणावतः, च, प्रतिद्विपाबद्धरुषः, समक्षम्, आक्षिप्तमुखच्छदस्य, नागस्य, च, घनानां, ध्वनिना, विबोधितस्य, शैलरन्ध्रात, अपेतस्य, हरेः, च, निरस्तधूमस्य, रात्रिवह्नेः, च, रुचिं, भेजे ॥ ४५-४६ ॥

विकोशेति ॥ सोऽर्जुनः । तनुं त्रायतः इति तनुत्रं वर्म । 'आतोऽनुपसर्गे कः' इति कप्रत्ययः । तेन विना । विकोशः कोशादुद्धृतो निर्धौततनुः शाणोल्लीढमूर्तिः । अतो विशेषणसमासः । तस्य विकोशनिर्धौततनोर्महासेर्महाखड्गस्य तथा त्वचि विच्युतायां सत्यां फणावतश्च मुक्तकञ्चुकस्याहेश्च प्रतिद्विपे प्रतिगज आबद्धरुषो बद्धकोपस्य समक्षं प्रतिगजस्याग्र आक्षिप्तमुखच्छदस्य निरस्तमुखावरणस्य नागस्य गजस्य च ॥

विबोधितस्येति ॥ घनानां ध्वनिना गर्जितेन विबोधितस्य । शैलरन्ध्रात्कन्दरादपेतस्य निष्क्रान्तस्य हरेः सिंहस्य च । तथा निरस्तधूमस्य गतधूमस्य रात्रिवह्नेश्च

र्मि शोभां भेजे । एतेनास्य तीक्ष्णत्ववैरनिर्यातनत्वरणदुर्मदत्वमनस्वित्वतेजस्वित्वा-युक्तानि । अत्र रुचिमिव रुचिर्मिति सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धो निदर्शनाल-ङ्कारो भङ्गया संसृष्टः ॥ ४५-४६ ॥

अचित्ततायामपि नाम युक्तामनूर्ध्वतां प्राप्य तदीयकृच्छ्रे ।
महीं गतौ ताविषुधी तदानीं विवव्रतुश्चेतनयेव योगम् ॥ ४७ ॥

अन्वयः—तदानीं, महीं, गतौ, तौ, इषुधी, अचित्ततायाम्, अपि, तदीयकृच्छ्रे, युक्तां, नाम, अनूर्ध्वतां, प्राप्य, चेतनया, इव, योगं, विवव्रतुः, ॥ ४७ ॥

अचित्ततायामिति ॥ तदानीं कवचपतनसमये महीं गताविषुधी निषङ्गावचित्तता-यामप्यचेतनत्वेऽपि तदीयकृच्छ्रे स्वामिव्यसने युक्तां योग्याम् । नाम किल । अकि-ञ्चित्करत्वादिति भावः । अनूर्ध्वतामवाङ्मुखत्वं प्राप्य चेतनया प्राणिसाधारणज्ञाने-नेव योगं सम्बन्धं विवव्रतुरिवेत्युत्प्रेक्षा । अचेतनत्वेऽप्यवाङ्मुखत्वादिचेतनधर्मयो-गादिति भावः ॥ ४७ ॥

स्थितं विशुद्धे नभसीव सत्वे धाम्ना तपोवीर्यमयेन युक्तम् ।
शस्त्राभिघातैस्तमजस्रमीशस्त्वष्टा विवस्वन्तमिवोल्लिलेख ॥४८॥

अन्वयः—विशुद्धे, नभसि, इव, सत्वे, स्थितं, तपोवीर्यमयेन, धाम्ना, युक्तं, तम्, ईशः, त्वष्टा, विवस्वन्तम्, इव, अजस्रं, शस्त्राभिघातैः, उल्लिलेख ॥ ४८ ॥

स्थितमिति ॥ विशुद्धे निर्मले नभसि इव सत्वे सत्वगुणे स्थितं तपोवीर्यमयेन त-पोवीर्याभ्यामागतेन धाम्ना तेजसा युक्तं तमर्जुनमीशस्त्वष्टा विश्वकर्मा विवस्वन्तं सूर्यमिवाजस्रं निरन्तरं शस्त्राभिघातैः शस्त्रकर्षणैरुल्लिलेख ततक्ष ॥ ४८ ॥

संरम्भवेगोज्झितवेदनेषु गात्रेषु बाधिर्यमुपागतेषु ।
मुनेर्बभूवागणितेषुराशेर्लौहस्तिरस्कार इवात्ममन्युः ॥ ४९ ॥

अन्वयः—संरम्भवेगोज्झितवेदनेषु, गात्रेषु, बाधिर्यम्, उपागतेषु, अगणितेषु-राशेः, मुनेः, आत्ममन्युः, लौहः, तिरस्कारः, इव, बभूव ॥ ४९ ॥

संरम्भेति ॥ संरम्भवेगेन सम्भ्रमातिशयेनोज्झितवेदनेषु त्यक्तदुःखेषु गात्रेषु बाधिर्यं स्तैमित्यमुपागतेषु सत्सु न गणिता इषुराशयो येन तस्यागणितेषुराशेर्मुनेरर्जुन-स्यात्ममन्युः स्वकोपो लोहस्य विकारो लौहः कार्ष्णायसः तिरस्क्रियत आच्छाद्य-तेऽनेनेति तिरस्कारः कञ्चुक इव बभूव । रोषवशान्न किञ्चित्प्रहारदुःखमज्ञासीदि-त्यर्थः । क्रोधैकवर्मणां वीराणां किमन्यैर्लौहभारैरिति भावः ॥ ४९ ॥

अथ युग्मेनाह—

ततोऽनुपूर्वायतवृत्तबाहुः श्रीमान्क्षरल्लोहितदिग्धदेहः ।
आस्कन्द्य वेगेन विमुक्तनादः क्षितिं विधुन्वन्निव पार्ष्णिघातैः॥५०॥

अन्वयः—ततः, अनुपूर्वायतवृत्तबाहुः, श्रीमान्, क्षरल्लोहितदिग्धदेहः, पार्ष्णिघातैः, क्षिति, विधुन्वन्, इव, वेगेन, आस्कन्द्य, विमुक्तनादः ॥ ५० ॥

तत इति ॥ ततोऽनन्तरमनुपूर्वौ पूर्वमनुगतौ गोपुच्छाकारावायतौ दीर्घौ वृत्तौ वर्तुलौ च बाहू यस्य स श्रीमाञ्शोभावान्क्षरल्लोहितदिग्धदेहः स्रवद्रुधिरलिप्तगात्रः । पार्ष्णिघातैश्चरणतलाघातैः । 'तद्ग्रन्थी घुटिके गुल्फौ स्त्रियां पार्ष्णिरधस्तयोः' इत्यमरः । क्षिति विधुन्वन्प्रकम्पयन्निव वेगेनास्कन्द्याभिद्रुत्य विमुक्तनादः सोऽर्जुनः ॥५०॥

साम्यं गतेनाशनिना मघोनः शशाङ्कखण्डाकृतिपाण्डुरेण ।
शम्भुं बिभित्सुर्धनुषा जघान स्तम्बं विषाणेन महानिवेभः ॥५१॥

अन्वयः—मघोनः अशनिना, साम्यं गतेन, शशाङ्कखण्डाकृतिपाण्डुरेण, धनुषा, शम्भुं, बिभित्सुः, महान्, इभः, विषाणेन, स्तम्बम्, इव जघान ॥ ५१ ॥

साम्यमिति ॥ मघोन, इन्द्रस्याशनिना वज्रेण सह साम्यं गतेन वज्रकल्पेन शशाङ्कस्य खण्डं शकलं तस्येवाकृतिर्यस्य । तद्वद्वक्रमित्यर्थः । पाण्डुरं च । तद्वदेवेति भावः । तेन शशाङ्कखण्डाकृतिपाण्डुरेण धनुषा शम्भुं बिभित्सुर्भेत्तुमिच्छुः सन् । महानिभो गजो विषाणेन दन्तेन स्तम्बमिव जघान ॥ ५१ ॥

रयेण सा सन्निदधे पतन्ती भवोद्भवेनात्मनि चापयष्टिः ।
समुद्धता सिन्धुरनेकमार्गा परे स्थितेनौजसि जह्नुनेव ॥ ५२ ॥

अन्वयः—रयेण, पतन्ती, सा, चापयष्टिः, भवोद्भवेन, परे, ओजसि, स्थितेन, जह्नुना, समुद्धता, अनेकमार्गा, सिन्धुः, इव, आत्मनि, सन्निदधे ॥ ५२ ॥

रयेणेति ॥ रयेण वेगेन पतन्ती सा चापयष्टिर्भवस्य संसारस्योद्भव उत्पत्तिर्यस्मात्तेन भवोद्भवेनेश्वरेण पर ओजसि परमे ज्योतिषि स्थितेन जह्नुना राजर्षिणा समुद्धतास्युत्क्षिप्तानेकमार्गा त्रिस्रोताः सिन्धुर्गङ्गेवात्मनि सन्निदधे सम्यङ्निहिता । अन्तर्निलायितेत्यर्थः ॥ ५२ ॥

विकार्मुकः कर्मसु शोचनीयः परिच्युतौदार्य इवोपचारः ।
विचिक्षिपे शूलभृता सलीलं स पत्रिभिर्दूरमदूरपातैः ॥ ५३ ॥

अन्वयः—विकार्मुकः, परिच्युतौदार्यः, उपचारः, इव, कर्मसु, शोचनीयः, सः, शूलभृता, सलीलम्, अदूरपातैः, पत्रिभिः, दूरं, विचिक्षिपे ॥ ५३ ॥

विकार्मुक इति ॥ विकार्मुको भग्नचापोऽत एव परिच्युतौदार्यो दानवर्जित उपचारः, सत्कार इव कर्मसु रणक्रियासु कृत्येषु च शोचनीयः शोच्योऽपूज्यश्च सत्त्वावष्टम्भेनाभग्नचित्तत्वाच्च सोऽर्जुनः शूलभृता शिवेन सलीलं सहेलं यथा तथाऽक्रूरपातैरतिगाढप्रहारैः पत्त्रिभिः शरैर्दूरमत्यर्थं विचिक्षिपे नुन्नः ॥ ५३ ॥

उपोढकल्याणफलोऽभिरक्षन्वीरव्रतं पुण्यरणाश्रमस्थः ।
जपोपवासैरिव संयतात्मा तेपे मुनिस्तैरिषुभिः शिवस्य ॥ ५४ ॥

अन्वयः—उपोढकल्याणफलः, वीरव्रतम्, अभिरक्षन्, पुण्यरणाश्रमस्थः, संयतात्मा, मुनिः, तैः, शिवस्य, इषुभिः, जपोपवासैः, इव, तेपे ॥ ५४ ॥

उपोढेति ॥ उपोढमासन्नं कल्याणफलमस्त्रलाभरूपं स्वर्गादिकं च यस्य स वीरव्रतमाहवादनिवृत्तिरूपं तीव्रं तपश्चाभिरक्षन्पालयन्पुण्यो यो रण एवाश्रमस्तत्रतिष्ठतीति पुण्यरणाश्रमस्थः संयतात्मा नियमितचित्तो मुनिरर्जुनः कश्चित्तपस्वी च तैः शिवस्य महादेवस्येषुभिः शरैर्जपोपवासैरिव तेपे तप्तः । तपतेः कर्मणि लिट् ॥ ५४ ॥

ततोऽग्रभूमिं व्यवसायसिद्धेः सीमानमन्यैरतिदुस्तरं सः ।
तेजःश्रियामाश्रयमुत्तमासिं साक्षादहङ्कारमिवाललम्बे ॥ ५५ ॥

अन्वयः— ततः, सः, अग्रभूमिं, व्यवसायसिद्धेः, सीमानम्, अन्यैः, अतिदुस्तरं, तेजःश्रियाम्, आश्रयम्, उत्तमासिं, साक्षात्, अहङ्कारम्, इव, आललम्बे ॥ ५५ ॥

तत इति ॥ ततश्चापान्तर्धानानन्तरं सोऽर्जुनोऽग्रभूमिं विपदि गन्तव्यस्थानम् । शरण्यमित्यर्थः । कुतः । व्यवसायसिद्धेर्युद्धोद्योगसिद्धेः सीमानमवधिम् । साधकतममित्यर्थः । अन्यैः परैरतिदुस्तरं दुरतिक्रमं तेजः श्रियां प्रतापसम्पदामाश्रयम् । हेतुमित्यर्थः । उत्तमासिं महाखड्गम् । 'सन्महत्–' इत्यादिना समासः । साक्षादहङ्कारं सविग्रहमभिमानमिवाललम्बे जग्राह ॥ ५५ ॥

शरानवद्यन्ननवद्यकर्मा चचार चित्रं प्रविचारमार्गैः ।
हस्तेन निस्त्रिंशभृता स दीप्तः सार्कांशुना वारिधिरूर्मिणेव ॥५६॥

अन्वयः—अनवद्यकर्मा, शरान्, अवद्यन्, निस्त्रिंशभृता, हस्तेन, सार्कांशुना, ऊर्मिणा, वारिधिः, इव, दीप्तः, सः, प्रविचारमार्गैः, चित्रं, चचार ॥ ५६ ॥

शरानिति ॥ अनवद्यकर्माऽगर्ह्यकर्मा । 'अवद्यपण्य–' इत्यादिना निपातः । शरानवद्यन्खण्डयन्वीरो निस्त्रिंशभृता खड्गयुक्तेन हस्तेन सार्कांशुनार्कांशुसहितेनोर्मिणा तरङ्गेण वारिधिरिव दीप्तो दीपितः सोऽर्जुनः प्रविचारमार्गैः खड्गिनां गतिभेदैश्चित्रं यथा तथा चचार ॥ ५६ ॥

यथा निजे वर्त्मनि भाति भाभिश्छायामयश्चाप्सु सहस्ररश्मिः ।
तथा नभस्याशु रणस्थलीषु स्पष्टद्विमूर्तिर्ददृशे स भूतैः ॥ ५७ ॥

अन्वयः—भाभिः, सहस्ररश्मिः, यथा, निजे, वर्त्मनि, छायामयः, (सन्) अप्सु, स्पष्टद्विमूर्तिः, भाति, तथा, सः, नभसि, रणस्थलीषु, (च) भूतैः, आशु ददृशे ॥ ५७ ॥

यथेति ॥ भाभिर्दीप्तिभिरुपलक्षितः । 'स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः' इत्यमरः । सहस्ररश्मिरर्को यथा निजे वर्त्मनि नभसि छायामयः प्रतिबिम्बरूपः सन्नप्सु स्पष्टद्विमूर्तिर्भाति तथा सोऽर्जुनो नभस्याकाशे रणस्थलीषु च स्पष्टे द्वे मूर्ती यस्य सः स्पष्टद्विमूर्तिः सन् भूतैर्गणैर्ददृशे दृष्टः । यथैकोऽर्को नभस्यप्सु चानेक इव दृश्यते तथा सोऽपि दिवि भुवि चाशुसंचारायौगपद्यभ्रमादेवैकोऽप्यनेक इव गणैर्दृष्ट इत्युत्प्रेक्षा ॥ ५७ ॥

शिवप्रणुन्नेन शिलीमुखेन त्सरुप्रदेशादपवर्जिताङ्गः ।
ज्वलन्नसिस्तस्य पपात पाणेर्घनस्य वप्रादिव वैद्युतोऽग्निः ॥५८॥

अन्वय—शिवप्रणुन्नेन, शिलीमुखेन, त्सरुप्रदेशात्, अपवर्जिताङ्गः, असिः, तस्य, पाणेः, घनस्य, वप्रात्, वैद्युतः, अग्निः, इव, ज्वलन्, पपात ॥ ५८ ॥

शिवेति ॥ शिवेन प्रणुन्नः क्षिप्तस्तेन शिलीमुखेन त्सरुप्रदेशान्मुष्टिप्रदेशमवधि कृत्वा । 'त्सरुः खड्गादिमुष्टौ स्यात्' इत्यमरः । अपवर्जिताङ्गो लूनविग्रहोऽसिः खड्गस्तस्यार्जुनस्य पाणेः कराद्घनस्य मेघस्य वप्रात्तटाद्वैद्युतो विद्युत्सम्बन्ध्यग्निरिव ज्वलन्पपात ॥ ५८ ॥

आक्षिप्तचापावरणेषुजालश्छिन्नोत्तमासिः स मृधेऽवधूतः ।
रिक्तः प्रकाशश्च बभूव भूमेरुत्सादितोद्यान इव प्रदेशः ॥ ५९ ॥

अन्वय—आक्षिप्तचापावरणेषुजालः, छिन्नोत्तमासिः, मृधे, अवधूतः, सः, उत्सादितोद्यानः, भूमेः, प्रदेशः, इव, रिक्तः, प्रकाशः, च, बभूव ॥ ५९ ॥

आक्षिप्तेति ॥ आक्षिप्तान्यपहृतानि चापावरणेषुजालानि धनुर्वर्मबाणसमूहा यस्य स छिन्नोत्तमासिर्लूनमहाखड्गो मृधे रणे । 'मृधमास्कन्दनं संख्यम्' इत्यमरः । अवधूतो निरस्तः सोऽर्जुन उत्सादितमुत्पाटितमुद्यानं यस्य स भूमेः प्रदेशो भूमिभाग इव रिक्तः शून्यः प्रकाशो निःसंबाधश्च । दृश्य इति यावत् । बभूव ॥ ५९ ॥

स खण्डनं प्राप्य परादमर्षवान्भुजद्वितीयोऽपि विजेतुमिच्छया ।
ससर्ज वृष्टिं परिरुग्णपादपां द्रवेतरेषां पयसामिवाश्मनाम् ॥६०॥

अन्वयः—परात्, खण्डनं, प्राप्य, अमर्षवान्, सः, भुजद्वितीयः, अपि, विजेतुम्, इच्छया, द्रवेतरेषां, पयसाम्, इव, अश्मनां, परिरुग्णपादपां, वृष्टिं, ससर्ज॥ ६०॥

स इति॥ परात्परस्माच्छत्रोः। 'पूर्वादिभ्यो नवभ्यो वा' इति विकल्पात् स्मादादेशः। खण्डनं भङ्गं प्राप्यामर्षवान्सोऽर्जुनो भुजद्वितीयो भुजमात्रसहायः सन्नपि विजेतुमिच्छया द्रवेभ्य इतराणि तेषां द्रवेतरेषां कठिनानां पयसामिव। करकाणामित्यर्थः। अश्मनां सम्बन्धिनीं परिरुग्णा भग्नाः पादपा यया सा तां वृष्टिं ससर्ज। अश्मभिर्जघानेत्यर्थः॥ ६०॥

नीरन्ध्रं परिगमिते क्षयं पृषत्कैर्भूतानामधिपतिना शिलाविताने।
उच्छ्रायस्थगितनभोदिगन्तरालं चिक्षेप क्षितिरुहजालमिन्द्रसूनुः॥६१॥

अन्वयः—शिलाविताने, भूतानाम्, अधिपतिना, पृषत्कैः, क्षयं, परिगमिते, इन्द्रसूनुः, उच्छ्रायस्थगितनभोदिगन्तरालं, नीरन्ध्रं, क्षितिरुहजालं, चिक्षेप॥६१॥

नीरन्ध्रमिति॥ शिलाविताने शिलाजाले भूतानामधिपतिना शिवेन पृषत्कैर्बाणैः क्षयं परिगमिते नीते सतीन्द्रसूनुरर्जुन उच्छ्रायेणोत्सेधेन स्थगितमाच्छादितं नभो दिशामन्तरालं च येन तन्नीरन्ध्रं सान्द्रम्। रोहन्तीति रुहाः। इगुपधलक्षणः कप्रत्ययः। क्षितौ रुहा वृक्षास्तेषां जालं चिक्षेप प्रेरयामास। 'उच्छ्रायं गमितवति' इति प्रामादिकः पाठः॥ ६१॥

निःशेषं शकलितवल्कलाङ्गसारैः कुर्वद्भिर्भुवमभितः कषायचित्राम्।
ईशानः सकुसुमपल्लवैर्नगैस्तैरातेने बलिमिव रङ्गदेवताभ्यः॥६२॥

अन्वयः—ईशानः, निःशेषं, शकलितवल्कलाङ्गसारैः, भुवम्, अभितः, कषायचित्राम्, कुर्वद्भिः, सकुसुमपल्लवैः, तैः, नगैः, रङ्गदेवताभ्यः, बलिम्, इव आतेने॥६२॥

निःशेषमिति॥ ईशानः शिवः। शानच्प्रत्ययः। निःशेषं यथा तथा शकलितानि वल्कलानि त्वचोऽङ्गानि शाखाः सारो मज्जा च येषां तैर्भुवमभितः कषायो यो रागः। स्वरसेन रञ्जनमिति यावत्। 'रागे क्वाथे कषायोऽस्त्री' इति वैजयन्ती। तेन चित्रां विचित्रवर्णां कुर्वद्भिः सकुसुमपल्लवैस्तैर्नगैर्वृक्षै रङ्गे रणरङ्गे या देवतास्ताभ्यो बलिं पूजामिवातेने॥ ६२॥

उन्मज्जन्मकर इवामरापगाया वेगेन प्रतिमुखमेत्य बाणनद्याः।
गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः॥६३

अन्वयः—गाण्डीवी, उन्मज्जन् मकरः, अमरापगायाः, इव, बाणनद्याः, वेगेन, प्रतिमुखम्, एत्य, कनकशिलानिभं, विषमविलोचनस्य, वक्षः, भुजाभ्याम्, आजघ्ने॥ ६३॥

उन्मज्जन्निति ॥ गाण्डीव्यर्जुन उन्मज्जन्नुत्तरन्मकरो जलग्रहविशेषोऽम्भसामाया मकरावा इव बाणमय्या बाणप्रवाहाद्वेगेन प्रतिमुखमभिमुखमेत्यागत्य कनकशिलानिभम् । कनकग्रहणं काठिन्यातिशयद्योतनार्थम् । विषमविलोचनस्य त्र्यम्बकस्य वक्षो हृदयं भुजाभ्यामाजघ्ने ताडितवान् । अत्रात्मनेपदं विचार्यम् । 'आङो यमहनः' इत्यत्राकर्मकाधिकारात 'स्वाङ्गकर्मकाच्च' इति वक्तव्यत्वात् । न च शिवस्य प्रतिमुखमित्यन्वयात्कनकशिलानिभं कनकनिकषतुल्यं श्यामं स्ववक्ष आजघ्न इत्यर्थ इति वाच्यमनौचित्याचरणात् । न हि युद्धाय संनद्धा निपुणा अपि मल्लाः स्ववक्षस्ताडनमाचरन्ति । किं तु स्वभुजास्फालनम् । किं च । अनन्तरं वक्ष्यमाणभवकर्तृकाविनयसहनरोधाद्वक्ष एवेत्यन्वयस्याव्यवधानाच्च पूर्वैरेव दूषितत्वात् । अतो व्याकरणान्तरादूह्यम् । केचित्तु 'त्र्यम्बकस्य वक्षः प्राप्य' इत्यध्याहारे स्वाङ्गस्यात्मकर्मकत्वादात्मनेपदमाहुः ॥ ६३ ॥

अभिलषत उपायं विक्रमं कीर्तिलक्ष्म्यो-
रसुगममरिसैन्यैरङ्कमभ्यागतस्य ।
जनक इव शिशुत्वे सुप्रियस्यैकसूनो
रविनयमपि सेहे पाण्डवस्य स्मरारिः ॥ ६४ ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये सप्तदशः सर्गः ।

अन्वयः—कीर्तिलक्ष्म्योः, उपायम् , अरिसैन्यैः, असुगमं, विक्रमम् , अभिलषतः, अङ्कम्, अभ्यागतस्य, पाण्डवस्य, अविनयं, अपि, स्मरारिः, शिशुत्वे, सुप्रियस्य, एकसूनोः, (अविनयम्) जनकः, इव सेहे ॥ ६४ ॥

अभिलषत इति ॥ कीर्तिलक्ष्म्योरुपायं साधनभूतमरिसैन्यैरसुगमं दुरासदं विक्रममभिलषतः । सुनुपक्षे यत्किंचिन्महत्फलं प्रार्थयमानस्येत्यर्थः । अत एवाङ्कमन्तिकमभ्यागतस्योत्सङ्गमारूढस्य च पाण्डवस्याविनयं स्मरारिः । अनेन भक्तवात्सल्यमेव सहनकारणमिति सूच्यते । शिशुत्वे शैशवे सुप्रियस्य परमप्रेमास्पदस्य । कुतः । एक एव सूनुस्तस्यैकसूनोरविनयं जनक इव सेहे सोढवान् ॥ ६४ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां सप्तदशः सर्गः समाप्तः ॥

अष्टादशः सर्गः ।

तत उदग्र इव द्विरदे मुनौ रणमुपेयुषि भीमभुजायुधे ।
धनुरपास्य सबाणधि शङ्करः प्रतिजघान घनैरिव मुष्टिभिः ॥ १ ॥

अन्वयः—ततः, उदग्रे, द्विरदे, इव, भीमभुजायुधे, रणम्, उपेयुषि, मुनौ, शङ्करः, सबाणधि, धनुः, अपास्य, मुष्टिभिः, घनैः, इव, प्रतिजघान ॥ १ ॥

तत इति ॥ ततो मुष्टिनियुद्धानन्तरमुदग्रे महति द्विरदे गज इव भीमे भुजावेवायुधे यस्य तथाभूते रणमुपेयुषि मुनौ शङ्करः स्वयमपि सबाणधि सतूणं धनुरपास्य त्यक्त्वा मुष्टिभिर्घनैर्लोहमुद्गरैरिव प्रतिजघान । प्राङ्मुनिकृताघातस्य प्रतिघातं कृतवानित्यर्थः । 'घनाः कठिनसङ्घातमेघकाठिन्यमुद्गराः' इति वैजयन्ती । 'घनंस्तु लोहमुद्गरे' इति विश्वः । यद्यपि मुष्टिशब्दः 'मुष्ट्या तु बद्धया । सरत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना' इत्यमरः । उभयथा प्रयोगाद् द्विलिङ्गस्तथाप्यत्रोपमानसारूप्यात्पुंलिङ्गो प्राह्यः । द्रुतविलम्बितं वृत्तम् ॥ १ ॥

हरपृथासुतयोर्ध्वनिरुत्पतन्नमृदुसंवलिताङ्गुलिपाणिजः ।
स्फुटदनल्पशिलारवदारुणः प्रतिननाद दरीषु दरीभृतः ॥ २ ॥

अन्वयः—हरपृथासुतयोः, अमृदु, संवलिताङ्गुलिपाणिजः, स्फुटदनल्पशिलारवदारुणः, ध्वनिः, उत्पतन्, दरीभृतः, दरीषु, प्रतिननाद ॥ २ ॥

हरेति ॥ हरपृथासुतयोः शिवार्जुनयोरमृदु निबिडं यथा तथा संवलिताः सङ्कुचिता अङ्गुलयो येषां ते । मुष्टीकृता इत्यर्थः । तेषु पाणिषु जातस्तथोक्तः । स्फुटन्तीनां विदलन्तीनामनल्पशिलानामारव इव दारुणो भीषणो ध्वनिरुत्पतन्नुद्गच्छन् दरीभृतो गिरेर्दरीषु गुहासु प्रतिननाद प्रतिदध्वान ॥ २ ॥

शिवभुजाहतिभिन्नपृथुक्षतीः सुखमिवानुबभूव कपिध्वजः ।
क इव नाम बृहन्मनसां भवेदनुकृतेरपि सत्त्ववतां क्षमः ॥ ३ ॥

अन्वयः—कपिध्वजः, शिवभुजाहतिभिन्नपृथुक्षतीः, सुखम्, इव, अनुबभूव, क, इव, नाम, सत्त्ववताम्, बृहन्मनसां, अनुकृतेः, अपि, क्षमः, भवेत् ॥ ३ ॥

शिवेति ॥ कपिध्वजः शिवस्य भुजाहतिभिर्मुष्टिघातैर्भिन्ना विदीर्णा याः पृथवो महत्यः क्षतयः प्रहारा व्रणास्ताः सुखमिवानुबभूव । दुःखकरीरपीति भावः । क्षतिदुःखं नाजीगणदित्यर्थः । ननु दुःसहदुःखवेगेषु कथमगणनेत्यत्राह—क इति । क इव नाम को नु खलु सत्त्ववतां सत्त्वाधिकानां बृहन्मनसां तेजस्विनामनुकृतेरनुकरणस्यापि

क्षमा भवेत्। मनस्विनां चरितं महदप्युकर्षमपि न कश्चिद्दोष्टे तस्यावरणं तु दूरापास्तमिति भावः। रौद्ररसाविष्टमनसां मनस्विनां कुतः सुखदुःखगणनेति भावः ॥ ३ ॥

व्रणमुखच्युतशोणितशीकरस्थगितशैलतटाभभुजान्तरः।
अभिनवौषसरागभृता बभौ जलधरेण समानमुमापतिः ॥ ४ ॥

अन्वयः—व्रणमुखच्युतशोणितशीकरस्थगितशैलतटाभभुजान्तरः, उमापतिः, अभिनवौषसरागभृता, जलधरेण, समानं, बभौ ॥ ४ ॥

व्रणेति ॥ व्रणमुखेभ्यश्च्युतस्य क्षरितस्य शोणितस्य शीकरैः स्थगितमावृतं शैलतटाभं शिलासदृशं भुजान्तरं वक्षो यस्य स तथोक्त उमापतिरभिनवमौषसरागं सन्ध्यारागं बिभर्तीति तथोक्तेन जलधरेण समानं तुल्यं यथा तथा बभावित्युपमा॥४॥

उरसि शूलभृतः प्रहिता मुहुः प्रतिहतिं ययुरर्जुनमुष्टयः।
भृशरया इव सह्यमहीभृतः पृथुनि रोधसि सिन्धुमहोर्मयः ॥ ५ ॥

अन्वयः—शूलभृतः, उरसि, प्रहिताः, अर्जुनमुष्टयः, पृथुनि, सह्यमहीभृतः, रोधसि, भृशरयाः, सिन्धुमहोर्मयः, इव, मुहुः, प्रतिहतिं, ययुः ॥ ५ ॥

उरसीति ॥ शूलभृतः शिवस्योरसि प्रहिताः प्रयुक्ता अर्जुनस्य मुष्टयः पृथुनि विशाले सह्यमहीभृतः सह्याद्रे रोधसि तटे भृशरयास्तीव्रवेगाः सिन्धोः समुद्रस्य महोर्मय इव मुहुः, प्रतिहतिं ययुः ॥ ५ ॥

निपतितेऽधिशिरोधरमायते सममरत्नियुगेऽयुगचक्षुषः।
त्रिचतुरेषु पदेषु किरीटिना लुलितदृष्टि मदादिव चस्खले ॥ ६ ॥

अन्वयः—अयुगचक्षुषः, आयते, अरत्नियुगे, अधिशिरोधरं, समं, निपतिते, किरीटिना, मदात्, इव, त्रिचतुरेषु, पदेषु लुलितदृष्टि, चस्खले ॥ ६ ॥

निपतित इति ॥ अयुगानि चक्षूंषि यस्य तस्यायुगचक्षुषस्त्रिलोचनस्यायते दीर्घे अरत्नियुगे अरत्न्योर्बद्धमुष्ट्योर्हस्तयोर्युगे युग्मे। 'हस्तो मुष्ट्या तु बद्धया। सरत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना' इत्यमरः। प्रकृते तु मुष्टिमात्रविवक्षया प्रयोगः। शिरोधरायामधीत्यधिशिरोधरमधिकन्धरं समं युगपन्निपतिते सति। किरीटिनार्जुनेन मदादिव त्रीणि चत्वारि वा त्रिचतुराणि। 'संख्ययाव्ययासन्न-' इत्यादिना बहुव्रीहिः। चतुरोऽच्प्रकरणे 'त्र्युपाभ्यामुपसंख्यानम्' इति समासान्तोऽच्प्रत्ययः। तेषु त्रिचतुरेषु पदेषु लुलितदृष्टि घूर्णितनेत्रं यथा तथा चस्खले स्खलितम्। भावे लिट् ॥ ६ ॥

अभिभवोदितमन्युविदीपितः समभिसृत्य भृशं जवमोजसा।
भुजयुगेन विभज्य समाददे शशिकलाभरणस्य भुजद्वयम् ॥ ७ ॥

अन्वयः—अभिभवोदितमन्युविदीपितः, भृशं, जवं, समभिसृत्य, ओजसा, शशिकलाभरणस्य, भुजद्वयं, भुजयुगेन, विभज्य, समाददे ॥ ७ ॥

अभिभवेति ॥ अभिभवेनोत्करूपेण परिभवेनोदित उत्पन्नो यो मन्युः क्रोधस्तेन विदीपितः प्रज्वलितः सोऽर्जुनो भृशं जवं समभिसृत्य समभिद्रुत्यौजसा बलेन शशिकलाभरणस्येन्दुमौलेः शिवस्य भुजद्वयं भुजयुगेन विभज्य वियोज्य समाददे जग्राह ॥७॥

प्रववृतेऽथ महाहवमल्लयोरचलसञ्चलनाहरणो रणः ।
करणशृङ्खलसङ्कलनागुरुर्गुरुभुजायुधगर्वितयोस्तयोः ॥ ८ ॥

अन्वयः—अथ, महाहवमल्लयोः, गुरुभुजायुधगर्वितयोः, तयोः, करणशृङ्खलसङ्कलनागुरुः, अचलसञ्चलनाहरणः, रणः, प्रववृते ॥ ८ ॥

प्रववृत इति ॥ अथ महाहवे महारणे मल्लयोर्बलीयसोः । 'मल्लः पात्रे कपोले च मत्स्यभेदे बलीयसि' इति विश्वः । गुरू भुजावेवायुधं तेन गर्वितयोस्तयोः शिवार्जुनयोः करणानि करचरणबन्धनान्येव शृङ्खलानि तेषां सङ्कलना संघटना तया गुरुर्दुस्तरस्तथाचलस्य हिमाद्रेः सञ्चलनं कम्पस्तस्याहरण आरोपकः । कर्तरि ल्युट् । रणः प्रववृते प्रवृत्तः ॥ ८ ॥

अयमसौ भगवानुत पाण्डवः स्थितमवाङ्मुनिना शशिमौलिना ।
समधिरूढमजेन नु जिष्णुना स्विदिति वेगवशान्मुमुहे गणैः ॥९॥

अन्वयः—अयम्, असौ, भगवान्, उत, पाण्डवः, मुनिना, अवाक्, स्थितम्, (उत) शशिमौलिना, अजेन, नु, समधिरूढं, जिष्णुना, स्वित्, इति, गणैः, वेगवशात्, मुमुहे ॥ ९ ॥

अयमिति ॥ अयं पुरोवर्ती पुमानसौ भगवान्प्रसिद्धो देवः । तदुक्तम्—'इदमः समक्षरूपं समीपतरवर्ति चैतदो रूपम् । अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ॥' इति । उत पाण्डवः । अयं हि तिष्ठदवस्थायां भ्रम इति वेदितव्यम् । अथ पतनावस्थायामाह—मुनिनावागधः स्थितमुत शशि मौलिना । अजेन देवेन नु समधिरूढमुपरि स्थितमथ जिष्णुना स्विदर्जुनेन वा समधिरूढमित्येवं गणैः प्रमथैर्वेगवशान्मुमुहे भ्रान्तम् । 'मुह वैचित्त्ये' । भावे लिट् ॥ ९ ॥

प्रचलिते चलितं स्थितमास्थिते विनमिते नतमुन्नतमुन्नतौ ।
वृषकपिध्वजयोरसहिष्णुना मुहुरभावभयादिव भूभृता ॥ १० ॥

अन्वयः—असहिष्णुना, भूभृता, अभावभयात्, इव, मुहुः, वृषकपिध्वजयोः, प्रचलिते, चलितम्, आस्थिते, स्थितं, विनमिते, नतम्, उन्नतौ, उन्नतम् ॥ १० ॥

प्रचलित इति ॥ असहिष्णुना तयोर्भारमसहमानेन भूभृता शैलेनाभावभयाद्वि-नाशभयादिव मुहुर्वृषश्च कपिश्च ध्वजे ययोस्तयोर्वृषकपिध्वजयोः प्रचलिते चलने सति चाल्लं प्रचेले । आस्थिते तूष्णीमवस्थाने स्थितं तथैव तस्थे । विनमिते सम्यगाक्रमणे सति नतं नम्रीभूतम् । अनामीति यावत् । उन्नतावुन्नमने सत्युन्नतमुन्नामि । सर्वत्र भावे क्तः ॥ १० ॥

करणशृङ्खलनिःसृतयोस्तयोः कृतभुजध्वनि वल्गु विवल्गतोः ।
चरणपातनिपातितरोधसः प्रससृपुः सरितः परितः स्थलीः ॥११॥

अन्वयः—करणशृङ्खलनिःसृतयोः, कृतभुजध्वनि, वल्गु, विवल्गतोः, तयोः, चरणपातनिपातितरोधसः, सरितः, स्थलीः, परितः, प्रससृपुः, ॥ ११ ॥

करणेति ॥ करणानि करचरणबन्धविशेषास्तान्येव शृङ्खलानि तेभ्यो निःसृतयोः । मुहुस्त्यक्तबन्धयोरित्यर्थः । कृतो भुजध्वनिर्भुजास्फोटनशब्दो यस्मिन्कर्मणि तत्तथा वल्गु सुन्दरं च यथा तथा विवल्गतोस्प्लवमानयोस्तयोर्हरपार्थयोश्चरणपातैः पादक्षेपैर्निपातितानि रोधांसि यासां ताः सरितो नद्यः स्थलीः परितः स्थलीषु प्रससृपुः प्रसृताः । 'अभितः परितः–' इत्यादिना द्वितीया । 'जानपद–' इत्यादिना कृत्रिमार्थे ङीष् । कूलपातक्षोभादुद्वेलसलिलाः सरितः स्थलानि प्रामज्जयन्नित्यर्थः । एतेन तयोर्भार उक्तः॥ ११ ॥

वियति वेगपरिप्लुतमन्तरा समभिसृत्य रयेण कपिध्वजः ।
चरणयोश्चरणानमितक्षितिर्निजगृहे तिसृणां जयिनं पुराम् ॥१२॥

अन्वयः—वियति, वेगपरिप्लुतं, तिसृणां, पुराम् , जयिनं, कपिध्वजः, चरणानमितक्षितिः, रयेण, समभिसृत्य, अन्तरा, चरणयोः, निजगृहे ॥ १२ ॥

वियतीति ॥ वियत्यन्तरिक्षे वेगेन परिप्लुतमुत्पतितं तिसृणां पुरां जयिनं त्रिपुरान्तकम् । 'जिदृक्षि–' इत्यादिनेनिप्रत्ययः । कपिध्वजोऽर्जुनश्चरणाभ्यां पादाभ्यामानमितक्षितिः सन् । रयेण वेगेन समभिसृत्याभिद्रुत्यान्तरा मध्येमार्गं चरणयोः पदयोर्निजगृहे निगृहीतवान् । उत्पतितस्य भगवतश्चरणौ स्वकराभ्यां जग्राहेत्यर्थः ॥ १२ ॥

विस्मितः सपदि तेन कर्मणा कर्मणां क्षयकरः परः पुमान् ।
क्षेप्तुकाममवनौ तमक्लमं निष्पिपेष परिरभ्य वक्षसा ॥ १३ ॥

अन्वयः—तेन, कर्मणा, सपदि, विस्मितः, कर्मणां, क्षयकरः, परः, पुमान्, अवनौ, क्षेप्तुकामम् , अक्लमं, तं, वक्षसा, परिरभ्य, निष्पिपेष ॥ १३ ॥

विस्मित इति ॥ तेन कर्मणा चरणग्रहणरूपेण सपदि विस्मितः सविस्मयः कर्मणां क्षयकरः । मोक्षप्रद इत्यर्थः । परः पुमान्हरोऽवनौ क्षितौ क्षेप्तुं कामो यस्य तम् ।

'तुं काममनसोरपि' इति मकारलोपः । अक्लममक्लान्तं तं पार्थं वक्षसा परिरभ्य निष्पिपेष । गाढमालिलिङ्गेत्यर्थः । रथोद्धतावृत्तम् ॥ १३ ॥

तपसा तथा न मुदमस्य ययौ भगवान्यथा विपुलसत्त्वतया ।
गुणसंहतेः समतिरिक्तमहो निजमेव सत्त्वमुपकारि सताम् ॥१४॥

अन्वयः—भगवान्, अस्य, विपुलसत्त्वतया, यथा, मुदं, ययौ, तथा, तपसा, न (मुदं ययौ) सतां, गुणसंहतेः, समम्, अतिरिक्तम्, निजं, सत्त्वम्, एव, उपकारि, अहो ॥ १४ ॥

तपसेति ॥ भगवान्देवोऽस्यार्जुनस्य विपुलसत्त्वतया बहुसत्त्वसम्पदा । धैर्यसम्पत्त्येति यावत् । यथा मुदं ययौ तथा तपसा मुदं न ययौ । तथा हि सतां गुणसंहतेस्तपःसेवादिगुणसङ्घातात्समतिरिक्तमतिशयितं निजं सत्त्वमेवोपकार्युपकारकमहो । प्रमिताक्षरावृत्तम् ॥ १४ ॥

अथ हिमशुचिभस्मभूषितं शिरसि विराजितमिन्दुलेखया ।
स्ववपुरतिमनोहरं हरं दधतमुदीक्ष्य ननाम पाण्डवः ॥ १५ ॥

अन्वयः—अथ, हिमशुचिभस्मभूषितम्, शिरसि, इन्दुलेखया, विराजितम्, अतिमनोहरम्, स्ववपुः, दधतम्, हरम्, उद्वीक्ष्य पाण्डवः, ननाम ॥१५॥

अथेति ॥ अथ हिमशुचिना हिमशुभ्रेण भस्मना भूषितं शिरसीन्दुलेखया विराजितं शोभितमतिमनोहरं सुन्दरं स्ववपुर्दधतं किरातरूपं विहाय निजविग्रहं दधानं हरमुदीक्ष्य पाण्डवो ननाम प्रणतवान् । अपरवक्त्रं वृत्तम्—'अयुजि ननरला गुरुः समे तदपरवक्त्रमिदं नजौ जरौ' इति लक्षणात् ॥ १५ ॥

सहशरधि निजं तथा कार्मुकं वपुरतनु तथैव संवर्मितम् ।
निहितमपि तथैव पश्यन्नसिं वृषभगतिरुपाययौ विस्मयम् ॥१६॥

अन्वयः—वृषभगतिः, सहशरधि, निजं, कार्मुकम्, तथैव, संवर्मितम्, अतनु, वपुः, तथैव, निहितं, असिम् अपि (तथैव) पश्यन्, विस्मयम्, उपाययौ ॥ १६ ॥

सहेति ॥ वृषभस्येव गतिर्यस्य सोऽर्जुनस्तस्मिन्समये सह शरधिभ्यां वर्तत इति सहशरधि सनिषङ्गम् । 'वोपसर्जनस्य' इति विकल्पात्सहशब्दस्य न सभावः । निजं कार्मुकं गाण्डीवं तथैव पूर्ववदेव संवर्मितं सम्यक्कवचितमनु महन्निजं वपुस्तथैव विहितं यथापूर्वं स्थापितमसिमपि खड्गं च तथैव पश्यन्विस्मयमुपाययौ । क्वचित्तु 'वृषभगतिम्' इति पाठः । तत्र वृषभगतिं शिवं च पश्यन्विस्मयमुपाययावित्यर्थः । प्रमुदितवदना वृत्तम्—'प्रमुदितवदना भवेन्नौ रौ' इति लक्षणात् ॥ १६ ॥

सिषिचुरवनिमम्बुवाहाः शनैः सुरकुसुममियाय चित्रं दिवः ।
विमलरुचि भृशं नभो दुन्दुभेर्ध्वनिरखिलमनाहतस्यानशे ॥१७॥

अन्वयः—अम्बुवाहाः, शनैः, अवनिं, सिषिचुः, दिवः, चित्रं, सुरकुसुमम्, इयाय, अनाहतस्य, दुन्दुभेः, ध्वनिः, विमलरुचि, अखिलं, नभः, भृशम्, आनशे ॥ १७ ॥

सिषिचुरिति ॥ अम्बुवाहाः शनैरवनिं सिषिचुरुक्षाञ्चक्रुः । दिवोऽन्तरिक्षाच्चित्रं विचित्रं सुरकुसुमं मन्दारकुसुमानि । जातावेकवचनम् । इयायाजगाम । अनाहतस्याताडितस्य दुन्दुभेः । जातावेकवचनम् । ध्वनिः शब्दो विमलरुचि प्रसन्नमखिलं नभो भृशमानशे व्याप । अताडिता एव दुन्दुभयो नेदुरित्यर्थः । सर्वमिदमस्य सर्वलोकहितार्थित्वादिति वेदितव्यम् ॥ १७ ॥

आसेदुषां गोत्रभिदोऽनुवृत्त्या गोपायकानां भुवनत्रयस्य ।
रोचिष्णुरत्नावलिभिर्विमानैर्द्यौराचिता तारकितेव रेजे ॥ १८ ॥

अन्वयः—गोत्रभिदः, अनुवृत्त्या, आसेदुषां, भुवनत्रयस्य, गोपायकानां, रोचिष्णुरत्नावलिभिः, विमानैः, आचिता, द्यौः, तारकिता, इव, रेजे ॥ १८ ॥

आसेदुषामिति ॥ गोत्रभिद इन्द्रस्यानुवृत्त्यानुसरणेनासेदुषामासन्नानां भुवनत्रयस्य गोपायकानां रक्षकाणां लोकपालादीनाम् । 'गुपूधूप-' इत्यादिनायप्रत्ययः । तदन्ताण्ण्वुल् । रोचिष्णवः प्रकाशनशीला रत्नावलयो येषां तैः । 'अलंकृञ्-' इत्यादिनेष्णुच्प्रत्ययः । विमानैः पुष्पकैराचिता व्याप्ता द्यौस्तारकिता सञ्जाततारकेव रेजे । उत्प्रेक्षालङ्कारः ॥ १८ ॥

हंसा बृहन्तः सुरसद्मवाहाः संह्रादिकण्ठाभरणाः पतन्तः ।
चक्रुः प्रयत्नेन विकीर्यमाणैर्व्योम्नः परिष्वङ्गमिवाग्रपक्षैः ॥१९॥

अन्वयः—बृहन्तः, सुरसद्मवाहाः, संह्रादिकण्ठाभरणाः, पतन्तः, हंसाः, प्रयत्नेन विकीर्यमाणैः, अग्रपक्षैः, व्योम्नः, परिष्वङ्गं, चक्रुः इव ॥ १९ ॥

हंसा इति ॥ बृहन्तो महान्तः सुरसद्मानि विमानानि वहन्तीति सुरसद्मवाहाः । कर्मण्यण् । संह्रादीनि निह्रादीनि सुस्वराणि कण्ठाभरणानि किङ्किण्यो येषां ते । पतन्तो धावन्तो हंसाः प्रयत्नेन, विकीर्यमाणैर्विक्षिप्यमाणैरग्रपक्षैः पक्षाग्रैर्व्योम्नः । परिष्वङ्गमालिङ्गनं चक्रुरिवेत्युत्प्रेक्षा ॥ १९ ॥

मुदितमधुलिहो वितानीकृताः स्रज उपरि वितत्य सान्तानिकीः ।
जलद इव निषेदिवांसं वृषे मरुदुपसुखयाम्बभूवेश्वरम् ॥ २० ॥

अन्वयः—मरुत्, जलदे, इव, वृषे, निषेदिवांसम्, ईश्वरम्, मुदितमधुलिहः, वितानीकृताः, सान्तानिकीः, स्रजः, उपरि, विततय उपसुखयाम्बभूव ॥ २० ॥

मुदितेति ॥ अथ मरुद्वायुर्जलदे मेघ इव वृषे निषेदिवांसमुपविष्टमीश्वरं मुदिता मधुलिहो भृङ्गा याभिस्ता वितानीकृता उल्लोचाकाराः कृताः । 'अस्त्री वितानमुल्लोचः' इत्यमरः । सान्तानिकीः सन्तानकुसुमविकाराः स्रजः । मन्दारमाला इत्यर्थः । संतानशब्दाद्विकारार्थे ठक् । 'सन्तानः कल्पवृक्षश्च' इत्यमरः । उपरि विततय विस्तार्योपसुखयाम्बभूव प्रह्लादयामास ॥ २० ॥

कृतधृति परिवन्दितेनोच्चकैर्गणपतिभिरभिन्नरोमोद्गमैः ।
तपसि कृतफले फलज्यायसी स्तुतिरिति जगदे हरेः सूनुना ॥२१॥

अन्वयः—अभिन्नरोमोद्गमैः, गणपतिभिः, उच्चकैः, परिवन्दितेन, इति, हरेः, सूनुना, तपसि, कृतफले, कृतधृति, फलज्यायसी, स्तुतिः, जगदे ॥ २१ ॥

कृतेति ॥ अभिन्नरोमोद्गमैरविरलरोमाञ्चैर्गणपतिभिः प्रमथमुख्यैरुच्चकैः परिवन्दितेन साधु साध्विति संस्तुतेन । 'वदि अभिवादनस्तुत्योः' । कर्मणि क्तः । हरेः सूनुनार्जुनेन तपसि कृतं फलं भगवत्साक्षात्कारलक्षणं येन तस्मिन् । कृतफले सतीत्यर्थः । कृतधृति कृतसन्तोषं यथा तथा फलज्यायसी फलाधिकेति वक्ष्यमाणा स्तुतिर्जगदे कथिता ॥ २१ ॥

शरणं भवन्तमतिकारुणिकं भव भक्तिगम्यमधिगम्य जनाः ।
जितमृत्यवोऽजित भवन्ति भये ससुरासुरस्य जगतः शरणम् ॥२२॥

अन्वयः—हे अजित, हे भव, अतिकारुणिकं, भक्तिगम्यं, भवन्तम्, शरणम्, अधिगम्य, जितमृत्यवः, जनाः, ससुरासुरस्य, जगतः, भये शरणं, भवन्ति ॥ २२ ॥

शरणमिति ॥ हे अजित अपराजित हे भव, अतिकारुणिकमतिदयालुम् । 'तदस्य प्रयोजनम्' इति ठक् । भक्तिगम्यं भक्तिमात्रसुलभं भवन्तं शरणं रक्षकमधिगम्य जितमृत्यवो विगतमरणाः । अमरा भूत्वेत्यर्थः । जनाः ससुरासुरस्य जगतो भय आपदि शरणं स्वयं रक्षितारो भवन्ति । 'शरणं गृहरक्षित्रोः' इति विश्वः । प्रमिताक्षरावृत्तम् ॥ २२ ॥

विपदेति तावदवसादकरी न च कामसम्पदभिकामयते ।
न नमन्ति चैकपुरुषं पुरुषास्तव यावदीश न नतिः क्रियते ॥२३॥

अन्वयः—हे ईश, यावत्, तव, नतिः, न, क्रियते, तावत्, एकपुरुषम्, अवसादकरी, विपत्, एति, कामसम्पत् (मनोरथसम्पत्) च, न, अभिकामयते, पुरुषाः, (तम्) न, नमन्ति ॥ २३ ॥

विपदिति ॥ हे ईश, यावत्तव नतिः प्रणामो न क्रियते । पुरुषेणेति शेषः । तावदेवकं पुरुषमेकाकिनं सन्नमवसादकरी क्षयकरी विपदेति प्राप्नोति । 'कामसम्पन्मनोरथसम्पच्च नाभिकामयते नेच्छति । पुरुषाश्चान्ये लोकास्तमेकं पुरुषं तव स्तुतिमकुर्वाणं न नमन्ति न वशे वर्तन्ते । नानिष्टनिवृत्तिर्नापीष्टप्राप्तिरित्यर्थः । यदा तु त्वां प्रणमन्ति तदैव सर्वं लभ्यत इति भावः ॥ २३ ॥

संसेवन्ते दानशीला विमुक्त्यै सम्पश्यन्तो जन्मदुःखं पुमांसः ।
यन्निःसङ्गस्त्वं फलस्यानतेभ्यस्तत्कारुण्यं केवलं न स्वकार्यम् ॥२४॥

अन्वयः—दानशीलाः, जन्मदुःखम्, सम्पश्यन्तः, पुमांसः, विमुक्त्यै, संसेवन्ते, आनतेभ्यः, निःसङ्गः, त्वं, यत्, फलसि, तत्, केवलं, कारुण्यं, न स्वकार्यम् ॥ २४ ॥

संसेवन्त इति ॥ दानं शीलं स्वभावो निजधर्मो येषां ते दानशीलाः । त्वामेवोद्दिश्य दानं कुर्वन्त इत्यर्थः । 'तस्माद्दानं परमं वदन्ति' इति श्रुतेरिति भावः । कुतः । ततो जन्मदुःखं सम्पश्यन्तोऽनुभवन्तः पुमांसो विमुक्त्यै मोक्षाय संसेवन्ते । भवन्तमिति शेषः । न च तच्चित्रम् । किन्त्वानतेभ्यः प्रणतेभ्यो निःसङ्गो निःस्पृहस्त्वं यत्फलसि फलं ददासि । तेषां फलार्थित्वादिति भावः । तत्केवलं निरुपाधिकं कारुण्यं करुणा । स्वार्थे ष्यञ् । 'कारुण्यं करुणा घृणा' इत्यमरः । न स्वकार्यम् । एतदेव चित्रम् । केवलं परार्थत्वादिति भावः । शालिनीवृत्तम् ॥ २४ ॥

प्राप्यते यदिह दूरमगत्वा यत्फलत्यपरलोकगताय ।
तीर्थमस्ति न भवार्णवबाह्यं सार्वकामिकमृते भवतस्तत् ॥ २५ ॥

अन्वयः—यत्, इह, दूरम्, अगत्वा, प्राप्यते, यत्, अपरलोकगताय, फलति, भवार्णवबाह्यं, सार्वकामिकम्, तत्, तीर्थं, भवतः, ऋते, न, अस्ति ॥ २५ ॥

प्राप्यत इति ॥ यत्तीर्थमिहास्मिंल्लोके दूरमगत्वा प्राप्यते । स्मृतिमात्रसुलभमित्यर्थः । गङ्गादिकं तु न तथेति भावः । यत्तीर्थमपरलोकगताय फलति फलं प्रयच्छति । अत्रापि स्मरणमात्रादेवेति भावः । भवः संसारः स एवार्णवस्ततो बाह्यं बहिर्भवं संसारातीतम् । मोक्षपदमित्यर्थः । 'बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यम्' इति ष्यप्रत्ययः । सर्वे कामाः प्रयोजनमस्येति सार्वकामिकम् । 'तदस्य प्रयोजनम्' इति ठक् । तत्ताद्दृक्तरन्त्यनेनेति तीर्थं तारकं भवतस्त्वदृते । 'अन्यारात्–' इत्यादिना पञ्चमी । अन्यन्नास्ति । औपच्छन्दसिकं वृत्तम् ॥ २५ ॥

व्रजति शुचि पदं त्वयि प्रीतिमान्प्रतिहतमतिरेति घोरां गतिम् ।
इयमनघ निमित्तशक्तिः परा तव वरद न चित्तभेदः क्वचित् ॥२६॥

अन्वयः—हे वरद, त्वयि, प्रीतिमान्, शुचि, पदं, व्रजति, प्रतिहतमतिः, घोरां, गतिम्, एति, हे अनघ, इयं, परा, निमित्तशक्तिः, तव, क्वचित्, चित्तभेदः, न, (अस्ति) ॥ २६ ॥

व्रजतीति ॥ हे वरद, त्वयि प्रीतिमान्नरः शुचि निर्मलं पदं कैवल्यं मुक्तिं व्रजति । 'मुक्तिः कैवल्यनिर्वाण–' इत्यमरः । प्रतिहतमतिरुपहतबुद्धिः । त्वद्द्वेषीत्यर्थः । घोरां गतिं तीव्रं नरकमेति प्राप्नोति । नन्वेतावता तव रागद्वेषकलङ्कपङ्क इत्याह–इयमिति । हे अनघ निष्कलङ्क, इयम् । भक्ताभक्तयोरिति शेषः । विधेयप्राधान्यात्स्त्रीलिङ्गता । परा दुस्तरा निमित्तशक्तिर्निमित्तभूता शक्तिःस्वचेष्टितमहिमा । तव क्वचिद्भक्ते द्वेषिणि वा कुत्रापि चित्तभेदो बुद्धिवैषम्यं नास्ति । स्वकर्मणैव जन्तुस्तरति पतति वा । त्वं साक्षितया सर्वत्र सम इत्यर्थः ॥ २६ ॥

दक्षिणां प्रणतदक्षिण मूर्तिं तत्त्वतः शिवकरीमविदित्वा ।
रागिणापि विहिता तव भक्त्या संस्मृतिर्भव भवत्यभवाय ॥२७॥

अन्वयः—हे भव, हे प्रणतदक्षिण, शिवकरीं, तव, दक्षिणां, मूर्तिं, तत्त्वतः, अविदित्वा, अपि रागिणा (अपि) भक्त्या, विहिता, (तव) संस्मृतिः, अभवाय, भवति ॥ २७ ॥

दक्षिणामिति ॥ हे भव, हे प्रणतदक्षिण प्रणतेषु दाक्षिण्यसम्पन्न, दाक्षिण्यं परच्छन्दानुवर्तित्वम् । 'दक्षिणः सरलावामपरच्छन्दानुवर्तिषु' इति विश्वः । शिवकरीं श्रेयस्करीम् । 'कृञो हेतु–' इत्यादिना टप्रत्यये ङीप् । तव दक्षिणां मूर्तिं तत्त्वतो याथार्थ्येनाविदित्वापि रागिणा रागद्वेषवतापि भक्त्या विहिता तव संस्मृतिः सम्यक्स्मरणमभवाय संसारनिवृत्तये । प्रसज्यप्रतिषेधेऽपि नञ्समास इष्यते । भवति । तत्त्वज्ञानं विनापि भक्तिपूर्विका तव संस्मृतिरेव मुक्तिनिदानमित्यर्थः । स्वागतावृत्तम् ॥ २७ ॥

दृष्ट्वा दृश्यान्याचरणीयानि विधाय
प्रेक्षाकारी याति पदं मुक्तमपायैः ।
सम्यग्दृष्टिस्तस्य परं पश्यति यस्त्वां
यश्चोपास्ते साधु विधेयं स विधत्ते ॥ २८ ॥

अन्वयः—प्रेक्षाकारी, दृश्यानि, दृष्ट्वा, आचरणीयानि, विधाय, अपायैः, मुक्तं, पदं, याति, यः, परं, त्वां, पश्यति, तस्य, सम्यग्दृष्टिः, यश्च, (त्वाम्) उपास्ते सः, साधु, विधेयं, विधत्ते ॥ २८ ॥

दृष्ट्वेति ॥ प्रेक्षया बुद्धया करोतीति प्रेक्षाकारी विमृश्यकारी हृव्यानि दृष्टव्यानि दृष्ट्वा ज्ञात्वा आचरणीयानि कर्तव्यानि च विधाय कृत्वाऽपायैर्मुक्तं नाशवर्जितं पदं याति। 'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' इति श्रुतेः। ज्ञानकर्मभ्यां मुक्तिरित्यर्थः। किन्तु तेऽपि ज्ञानकर्मणी त्वद्विषय एव मुक्तिसाधनं नान्यविषय इत्याशयेनाह—सम्यगिति। यः पुमान्परं पुरुषोत्तमत्वेन सर्वोत्कृष्टं त्वां पश्यति तस्य सम्यग्दृष्टिः सम्यग्ज्ञानम्। यश्च त्वामुपास्ते सेवते स एव विधेयं विधत्ते। साधुकारीत्यर्थः। मत्तमयूरं वृत्तम्। लक्षणं तूक्तम् ॥ २८ ॥

युक्ताः स्वशक्त्या मुनयः प्रजानां हितोपदेशैरुपकारवन्तः।
समुच्छिनत्सि त्वमचिन्त्यधामा कर्माण्युपेतस्य दुरुत्तराणि ॥२९॥

अन्वयः—मुनयः, स्वशक्त्या, युक्ताः, हितोपदेशैः,प्रजानाम्, उपकारवन्तः, अचिन्त्यधामा, त्वम्, (एव) उपेतस्य, दुरुत्तराणि, कर्म्माणि समुच्छिनत्सि ॥ २९ ॥

युक्ता इति ॥ मुनयो व्यासादयः स्वशक्त्या निजयोगमहिम्ना युक्ताः। तथा हितोपदेशैर्विधिनिषेधवाक्यैः स्मृतीतिहासपुराणमुखेन प्रजानामुपकारवन्तः कृतोपकाराश्च। मोक्षप्रदस्तु तेषामन्येषां च त्वमेवेत्याह—समिति। अचिन्त्यधामाचिन्त्यमहिमा त्वमेवोपेतस्य शरणं प्राप्तस्य प्रपन्नस्य सम्बन्धीनि दुरुत्तराणि सुदुस्तराणि कर्माणि बन्धकानि पुण्यपापानि समुच्छिनत्सि नाशयसि। ते त्वत्रासमर्था एवेति भावः ॥२९॥

सन्निबद्धमपहर्तुमहार्यं भूरि दुर्गतिभयं भुवनानाम्।
अद्भुताकृतिमिमामतिमायस्त्वं बिभर्षि करुणामय मायाम् ॥३०॥

अन्वयः—अतिमायः, हे करुणामय, सन्निबद्धम्, अहार्यं, भूरि, भुवनानां, दुर्गतिभयम्, अपहर्तुम्, अद्भुताकृतिम्, इमाम्, मायां, बिभर्षि ॥ ३० ॥

सन्निबद्धमिति ॥ अतिक्रान्तो मायां बन्धरूपामतिमायः। 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासः। हे करुणामय हे कृपालो, सन्निबद्धं स्वकर्मणा दृढबद्धमत एवाहार्यमन्यैरनुच्छेद्यं भूरि प्रभूतं भुवनानां दुर्गतिभयं नरकभयम्। 'स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम्' इत्यमरः। अपहर्तुमद्भुताकृति विचित्ररूपामिमां मायां दृश्यमानां लीलाविग्रहरूपां बिभर्षि। अन्येषां कर्मानुबन्धी विग्रहपरिग्रहः। भवतस्तु परोपकारार्थ इत्यर्थः ॥ ३० ॥

न रागि चेतः परमा विलासिता वधूः शरीरेऽस्ति न चास्ति मन्मथः।
नमस्क्रिया चोषसि धातुरित्यहो निसर्गदुर्बोधमिदं तवेहितम् ॥३१॥

अन्वयः—(हे देव) चेतः, रागि, न, परमा, विलासिता, शरीरे, वधूः, अस्ति, मन्मथः, च, न, अस्ति, उषसि, धातुः, नमस्क्रिया, इति, इदं तव, ईहितम्, अहो, निसर्गदुर्बोधम् ॥ ३१ ॥

न रागीति ॥ हे देव, चेतस्तव चित्तं रागि रागयुक्तं न। परमयोगित्वादिति भावः। तथापि परमा निरतिशया विलासिता शृङ्गारादिचेष्टाशीलता। भिक्षाटनादिषु विहरणेन तौर्यत्रिकव्यसनितया चेति भावः। किञ्च। शरीरेऽर्धाङ्गे वधूरस्ति। प्रसिद्धं चैतदिति भावः। तथापि मन्मथः कामश्च नास्ति। तस्य भस्मीकरणादिति भावः। किञ्च। उषसि प्रातः सन्ध्यायां धातुर्ब्रह्मणो नमस्क्रिया वन्दनम्। स्वयं जगद्वन्द्यस्यापीत्यर्थः। इतीत्थं विरुद्धमिदमुक्तं तवेहितं चेष्टितं निसर्गतो दुर्बोधं दुराकलनीयम्। दुर्ग्रहमित्यर्थः। अदृष्टपूर्वत्वादिति भावः। वंशस्थं वृत्तम् ॥ ३१ ॥

तवोत्तरीयं करिचर्म साङ्कुशं ज्वलन्मणिः सारसनं महानहिः।
स्रगास्यपङ्क्तिः शवभस्म चन्दनं कला हिमांशोश्च समं चकासति॥३२॥

अन्वयः—तव, साङ्कुशं, करिचर्म, उत्तरीयं, ज्वलन्मणिः, महान्, अहिः, सारसनम्, आस्यपङ्क्तिः, स्रक्, शवभस्म, चन्दनं, हिमांशोः, कला, च, समं चकासति॥३२॥

तवेति ॥ हे देव, तव साङ्कुशं सलोमकं करिचर्मोत्तरीयं संव्यानम्। दुःस्पर्शमिति भावः। 'संव्यानमुत्तरीयं च' इत्यमरः। ज्वलन्मणिर्ज्वलद्रत्नो महानहिः सारसनं कटिभूषाविशेषः। योऽन्येषां प्राणहर इत्यर्थः। 'क्लीबे सारसनं चाथ पुंस्कट्यां शृङ्खलं त्रिषु' इत्यमरः। आस्यपङ्क्तिः कपालमाला स्रङ्माल्यम्। शवभस्म चन्दनम्। उभयत्राप्यस्पृश्यममङ्गलं चेति भावः। किञ्च एतानि वस्तूनि हिमांशोः कला च समं तुल्यतया चकासति दीप्यन्ते। त्वदाश्रयवशादरम्यस्यापि रम्यतेति किमशक्यं तवेति ॥ ३२ ॥

अविग्रहस्याप्यतुलेन हेतुना समेतभिन्नद्वयमूर्ति तिष्ठतः।
तवैव नान्यस्य जगत्सु दृश्यते विरुद्धवेषाभरणस्य कान्तता॥३३॥

अन्वयः—अविग्रहस्य, अपि, अतुलेन, हेतुना, समेतभिन्नद्वयमूर्ति, तिष्ठतः, तव, एव, जगत्सु, विरुद्धवेषाभरणस्य कान्तता, दृश्यते, अन्यस्य, न ॥ ३३ ॥

अविग्रहस्येति ॥ अविग्रहस्य वस्तुतोऽशरीरस्यापि सतोऽतुलेन दुर्बोधत्वादसदृशेन हेतुना। केनापि कारणेनेत्यर्थः। समेता सङ्गता भिन्ना विलक्षणा च द्वयी द्विविधा स्त्रीपुंसात्मिका मूर्तिर्यस्मिन्कर्मणि तत्समेतभिन्नद्वयमूर्ति यथा तथा तिष्ठतः। अशरीरस्य शरीरमेव विरुद्धम्। तदपि नारीनरात्मकमिति किमतश्चित्रमस्तीति भावः। एवंविधस्य तवैव जगत्सु विरुद्धे वेषाभरणे पूर्वोक्ते यस्य तस्य विरुद्धवेषाभरणस्यापि

सतः कान्तता रमणीयता दृश्यते । अन्यस्य न दृश्यते । तस्मादचिन्त्योऽसौ तव महिमेति भावः ॥ ३३ ॥

आत्मलाभपरिणामनिरोधैर्भूतसङ्घ इव न त्वमुपेतः ।
तेन सर्वभुवनातिग लोके नोपमानमसि नाप्युपमेयः ॥ ३४ ॥

अन्वयः—त्वं, भूतसङ्घः, इव, आत्मलाभपरिणामनिरोधैः, उपेतः, न, असि, तेन हे सर्वभुवनातिग, लोके, न, उपमानम्, (असि) नापि, उपमेयः, (असि) ॥ ३४ ॥

आत्मेति ॥ हे देव, त्वं भूतसङ्घ इव शरीरादिसङ्घात इव । आत्मलाभपरिणामनिरोधैर्जन्मजरामरणैरुपेतो युक्तो नासि । तेन कारणेन हे सर्वभुवनातिग सर्व लोकोत्तर उपमीयतेऽनेनेत्युपमानं नासि । उपमीयते यत्तदुपमेयमपि नासि । कश्चित्त्वादृशोऽस्ति । त्वमपि नान्यसदृशः । अनन्यसाधारणत्वादित्यर्थः । वृत्तमुक्तम् ॥ ३४ ॥

त्वमन्तकः स्थावरजङ्गमानां त्वया जगत्प्राणिति देव विश्वम् ।
त्वं योगिनां हेतुफले रुणत्सि त्वं कारणं कारणकारणानाम् ॥३५॥

अन्वयः—हे देव, त्वं, स्थावरजङ्गमानाम्, अन्तकः, त्वया, विश्वम्, जगत्प्राणिति, त्वं, योगिनां, हेतुफले, रुणत्सि, त्वं, कारणकारणानां, कारणम् ॥ ३५ ॥

त्वमिति ॥ हे देव, त्वं स्थावरजङ्गमानामन्तकः संहर्ता । त्वया हेतुना विश्वं सर्वं जगत्प्राणिति जीवति । त्वं योगिनां हेतुः प्रवर्तकं कर्म फलं भोगश्च ते हेतुफले रुणत्सि निवर्तयसि । तेषां त्वमेव बन्धविमोचक इत्यर्थः । किं च । त्वं कारणानि भूतानि तेषां कारणानि भूतसूक्ष्माणि परमाणवो वा तेषां कारणकारणानां कारणं प्रकृत्यादिद्वारोत्पत्तिस्थानम् । अत्र सर्वत्र 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति' इति श्रुतिः प्रमाणमिति भावः ॥ ३५ ॥

रक्षोभिः सुरमनुजैर्दितेः सुतैर्वा
यल्लोकेष्वविकलमाप्तमाधिपत्यम् ।
पाविन्याः शरणगतार्तिहारिणे त-
न्माहात्म्यं भव भवते नमस्क्रियायाः ॥३६॥

अन्वयः—रक्षोभिः, सुरमनुजैः, दितेः, सुतैः, वा, लोकेषु, यत्, अविकलम्, आधिपत्यम्, आप्तम्, तत् हे भव, शरणागतार्तिहारिणे, भवते, नमस्क्रियायाः, पाविन्याः माहात्म्यम् ॥ ३६ ॥

रक्षोभिरिति ॥ रक्षोभी राक्षसैः सुरमनुजैः सुराश्च मनुजाश्च तैर्देवमनुष्यैर्दितेः सुतैर्दैत्यैर्वा लोकेषु यदविकलं सम्पूर्णमाधिपत्यमाप्तं प्राप्तं तत् हे भव, शरणगतानामा-

तिहारिणे दुःखनाशकाय भवते तुभ्यं नमस्क्रियायाः। 'नमःस्वस्ति-' इत्यादिना चतुर्थी। पाविन्याः पापहारिण्या माहात्म्यं सामर्थ्यम्। 'न कस्या उन्नत्यै भवति शिरसस्त्वय्यवनतिः' इति भावः। प्रहर्षिणीवृत्तम्॥ ३६॥

अथाष्टमूर्तिषु काश्चित्स्तुवन्वायुमूर्तिं तावदाह—

तरसा भुवनानि यो बिभर्ति ध्वनति ब्रह्म यतः परं पवित्रम्।
परितो दुरितानि यः पुनीते शिव तस्मै पवनात्मने नमस्ते॥३७॥

अन्वयः—यः, तरसा, भुवनानि, बिभर्त्ति, यतः, पवित्रं, परम्, ब्रह्म, ध्वनति, यः, परितः, दुरितानि, पुनीते, हे शिव तस्मै, पवनात्मने, ते, नमः॥ ३७॥

तरसेति॥ यः पवनस्तरसा बलेन। 'तरसी बलरंहसी' इति विश्वः। भुवनानि बिभर्ति प्राणात्मना धारयति। यतो यत्प्रेरणात्पवित्रं परं परमं ब्रह्म वर्णात्मकं ध्वनति नदति। 'सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः। वर्णाञ्जनयते' इति वचनात्। यः पवनः परितो दुरितानि पातकानि पुनीते शोधयति। नाशयतीति यावत्। हे शिव, तस्मै पावयतीति पवनो वायुः स एवात्मा यस्य तस्मै पवनात्मने ते तुभ्यं नमः। वृत्तमुक्तम्॥ ३७॥

अथाग्निमूर्तिं स्तौति—

भवतः स्मरतां सदासने जयिनि ब्रह्ममये निषेदुषाम्।
दहते भवबीजसन्ततिं शिखिनेऽनेकशिखाय ते नमः॥ ३८॥

अन्वयः—जयिनि, ब्रह्ममये, सदासने, निषेदुषां, भवतः, स्मरतां, भवबीजसन्ततिं दहते, अनेकशिखाय, शिखिने, ते, नमः॥ ३८॥

भवत इति॥ जयिनि जयशीले सर्वोत्कृष्टे ब्रह्ममये ब्रह्मप्रधाने। तत्प्राप्त्युपायत्वात्। सदासने सम्यगासने। योगासन इत्यर्थः। निषेदुषामुपविष्टानां भवतः स्मरतां भवन्तं ध्यायताम्। 'अधीगर्थ-' इत्यादिना शेषे कर्मणि षष्ठी। भवबीजसन्ततिं संसारनिदानसमूहं भवनिदानकर्मसङ्घातं दहते भस्मीकुर्वतेऽनेकशिखाय बहुज्वालाय शिखिने वह्निमूर्तये ते तुभ्यं नमः॥ ३८॥

अथ जलमूर्तिं स्तौति—

आबाधामरणभयार्चिषा चिराय
प्लुष्टेभ्यो भव महता भवानलेन।
निर्वाणं समुपगमेन यच्छते ते
बीजानां प्रभव नमोऽस्तु जीवनाय॥ ३९॥

अन्वयः—हे भव, बीजानां, प्रभवः, आबाधामरणभयार्चिषा, महता, भवानलेन, चिराय, प्लुष्टेभ्यः, समुपगमेन, निर्वाणं, यच्छते, जीवनाय, ते, नमः, अस्तु ॥ ३९ ॥

आबाधेति ॥ हे भव बीजानां प्रभव कारणभूतः । 'जीवानाम्' इति पाठे तेषां त्वत्प्रतिबिम्बत्वादिति भावः । आबाधाध्यात्मिकादिदुःखं मरणं पञ्चत्वं ताभ्यां भयं तदेवार्चिर्यस्य तेन महता भवानलेन संसाराग्निना चिराय चिरं प्लुष्टेभ्यो दग्धेभ्यः समुपगमेन संसेवया निर्वाणं सन्तापशान्तिं यच्छते ददते जीवयतीति जीवनं तस्मै जीवनाय जलात्मने ते तुभ्यं नमः ॥ ३९ ॥

इदानीं नाभोमूर्तिं स्तौति—

यः सर्वेषामावरीता वरीयान्सर्वैर्भावैर्नावृतोऽनादिनिष्ठः ।
मार्गातीतायेन्द्रियाणां नमस्तेऽविज्ञेयाय व्योमरूपाय तस्मै ॥४०॥

अन्वयः—वरीयान्, यः (त्वं) सर्वेषाम्, आवरीता, सर्वैः, भावैः, न, आवृतः, अनादिनिष्ठः, इन्द्रियाणां, मार्गातीताय, अविज्ञेयाय, तस्मै, व्योमरूपाय, ते, नमः ॥ ४० ॥

य इति ॥ भवेत्यनुवर्तते । भवत्यस्मादयं प्रपञ्च इति भवस्तत्सम्बुद्धौ । सकलजगज्जनकेति यावत् । वरीयानुरुतरः । विभुरित्यर्थः । 'प्रियस्थिर-' इत्यादिनोरुशब्दस्य वरादेशः । यस्त्वं सर्वेषां वस्तूनामावरीताऽऽच्छादयिता । वृणोतेस्तृच्प्रत्ययः । सर्वैर्भावैः पदार्थैर्नावृतः केनापि कदाचिदप्यनावृतः स्वयं व्यापकत्वादिति भावः । अविद्यमाने आदिनिष्ठे उत्पत्तिनाशौ यस्यासावनादिनिष्ठो नित्यः । 'निष्ठानिष्पत्तिनाशान्ताः' इत्यमरः । इन्द्रियाणां चक्षुरादीनां मार्गातीतायातीन्द्रियाय । अत एवाविज्ञेयायापरिच्छेद्याय तस्मै व्योमरूपाय ते तुभ्यं नमः ॥ ४० ॥

अणीयसे विश्वविधारिणे नमो नमोऽन्तिकस्थाय नमो दवीयसे ।
अतीत्य वाचां मनसां च गोचरं स्थिताय ते तत्पतये नमो नमः ॥४१॥

अन्वयः—(हे भव) अणीयसे, विश्वविधारिणे, ते, नमः, नमः, अन्तिकस्थाय, दवीयसे, नमः, वाचां, मनसां, च, गोचरम्, अतीत्य, स्थिताय, तत्पतये, ते, नमः नमः ॥ ४१ ॥

अणीयस इति ॥ हे भवेत्यनुवर्तते । हे भव, अणीयसे सूक्ष्मतराय तथापि विश्वविधारिणे जगद्धारकाय ते तुभ्यं नमः । अन्तिकस्थायान्तर्यामितया संनिकृष्टाय सते । तथापि दवीयसे दुर्ग्रहत्वाद्दूरतराय ते तुभ्यं नमः । वाचां मनसां च गोचरं विषयमतीत्य स्थितायावाङ्मनसगोचराय । तत्पतये तेषां वाङ्मनसामध्यक्षाय । तदध्यक्षस्तैरेव न दृश्यत इति विरोधः । ते तुभ्यं नमो नमः । 'वाप्ले द्वे भवत इति वक्तव्यम्'

इति द्विरुक्तिः। 'सम्भ्रमेण प्रवृत्तिश्चापलम्' इति काशिका। भक्त्युद्रेकाच्च सम्भ्रमः। विरोधाभासोऽलङ्कारः ॥ ४१ ॥

असंविदानस्य ममेश संविदां तितिक्षितुं दुश्चरितं त्वमर्हसि ।
विरोध्य मोहात्पुनरभ्युपेयुषां गतिर्भवानेव दुरात्मनामपि ॥४२॥

अन्वयः—संविदां, ईश, असंविदानस्य, मम, दुश्चरितं, तितिक्षितुम्, त्वम्, अर्हसि, मोहात्, विरोध्य, पुनः, अभ्युपेयुषां, दुरात्मनाम्, अपि, भवान्, एव, गति. ॥ ४२ ॥

असंविदानस्येति ॥ संविदां ज्ञानानामीश। 'ईशानः सर्वविद्यानाम्' इति श्रुतेरिति भावः। 'प्रेक्षोपलब्धिश्चित्संवित्' इत्यमरः। असंविदानस्याज्ञानस्य। 'समो गम्यृच्छि-' इत्यादिना विदेः सम्पूर्वादकर्मकाच्छानच्प्रत्ययः। मम दुश्चरितं शस्त्रप्रयोगरूप दुश्चेष्टितं तितिक्षितुं सोढुम्। तिजेः सन्नन्तात्तुमुन्प्रत्ययः। त्वमर्हसि योग्योऽसि। ननु तव महानपराधः कथं सोढव्यस्तत्राह—विरोध्येति। मोहादज्ञानाद्विरोध्य वैरमुत्पाद्य पुनरभ्युपेयुषां पश्चाच्छरणागतानां दुरात्मनामपि भवानेव गतिः। त्वं हि शरणागतानामपराधं न गणयसीत्यर्थः ॥ ४२ ॥

सम्प्रति वरं याचते—

आस्तिक्यशुद्धमवतः प्रियधर्म धर्मं
धर्मात्मजस्य विहितागसि शत्रुवर्गे ।
सम्प्राप्नुयां विजयमीश यया समृद्ध्या
तां भूतनाथ विभुतां वितराहवेषु ॥ ४३ ॥

अन्वयः—हे प्रियधर्म, आस्तिक्यशुद्धं, धर्मम्, अवतः, धर्मात्मजस्य, विहितागसि, शत्रुवर्गे, हे ईश, यया, समृद्ध्या, विजयं, सम्प्राप्नुयां, हे भूतनाथ, आहवेषु, तां, विभुतां वितर ॥ ४३ ॥

आस्तिक्येति ॥ हे प्रियो धर्मो यस्येति प्रियधर्म। 'समासान्तो विधिरनित्यः' इति न समासान्तोऽनिच्प्रत्ययः। परलोके मतिरस्तीत्यास्तिकः पारलौकिकः। 'अस्तिनास्तिदिष्टम्-' इति ठक्। तस्य भाव आस्तिक्यं विश्वासस्तेन शुद्धं विमलं धर्मं वैदिकाचारमवतः पालयतो धर्मात्मजस्य युधिष्ठिरस्य विहितागसि कृतापराधे शत्रुवर्गे विषये हे ईश, यया समृद्ध्यास्त्रवैभवेन विजयं सम्प्राप्नुयां भजेयम्। हे भूतनाथ, आहवेषु तां विभुतां विभूतिमस्त्रविद्यां वितर देहि ॥ ४३ ॥

इति निगदितवन्तं सूनुमुच्चैर्मघोनः
प्रणतशिरसमीशः सादरं सान्त्वयित्वा ।
ज्वलदनलपरीतं रौद्रमस्त्रं दधानं
धनुरुपपदमस्मै वेदमभ्यादिदेश ॥ ४४ ॥

अन्वयः—इति, उच्चैः, निगदितवन्तं, प्रणतशिरसं, मघोनः, सूनुम्, ईशः, सादरं सान्त्वयित्वा, अस्मै, ज्वलदनलपरीतं, रौद्रम्, अस्त्रं, दधानं, धनुः, उपपदं, वेदम्, अभ्यादिदेश ॥ ४४ ॥

इतीति ॥ इत्युच्चैर्निगदितवन्तं प्रणतशिरसं मघोन इन्द्रस्य सूनुमर्जुनमीशो महादेवः सादरं यथा तथा सान्त्वयित्वोपसान्त्य अस्मै अर्जुनाय ज्वलतानलेन तेजसा परीतं व्याप्तं रौद्रं रुद्रदेवताकं पाशुपतमस्त्रं दधानं धनुरुपपदं धनुःशब्दोपपदं वेदम्। धनुर्वेदमित्यर्थः । अभ्यादिदेश ददौ । अध्यापयामासेत्यर्थः । 'धनुरुपपदं वेदम्' इत्यत्र धनुरुपपदत्वं वेदशब्दस्य न तु संज्ञिनस्तदर्थस्येति संज्ञायाः संज्ञिगतत्वाभावादवाच्यवचनदोषमाहुरालङ्कारिकाः । तदुक्तम्—'यदेवावाच्यवचनमवाच्यवचनं हि तत्' इति । समाधानं तु धनुःशब्दविशेषितेन वेदशब्देन । शब्दपरेणेत्यर्थः । परोपदेशयोग्यो धनुर्वेदो लक्ष्यत इति कथञ्चित्सम्पाद्यम् ॥ ४४ ॥

स पिङ्गाक्षः श्रीमान्भुवनमहनीयेन महसा
तनुं भीमां बिभ्रत्त्रिगुणपरिवारप्रहरणः ।
परीत्येशानं त्रिः स्तुतिभिरुपगीतः सुरगणैः
सुतं पाण्डोर्वीरं जलदमिव भास्वानभिययौ ॥ ४५ ॥

अन्वयः—पिङ्गाक्षः, श्रीमान्, भुवनमहनीयेन, महसा, भीमां, तनुं, बिभ्रत्, त्रिगुणपरिवारप्रहरणः, सः, सुरगणैः, स्तुतिभिः, उपगीतः, ईशानं, त्रिः, परीत्य, वीरं, पाण्डोः, सुतं, भास्वान्, जलदम्, इव, अभिययौ ॥ ४५ ॥

स इति ॥ पिङ्गाक्षः पिङ्गलाक्षः श्रीमाञ्छोभावान्भुवनमहनीयेन लोकपूज्येन महसा तेजसा भीमां तनुं बिभ्रत् । त्रिगुणस्त्रिशिखः परिवारः आकारो यस्य तत्त्रिगुणपरिवारं त्रिशूलं तदेव प्रहरणमायुधं यस्य स तथोक्तः । सूर्यपक्षे तु गुणत्रयपरिवारस्त्रय्यात्मक इति योज्यम् । स धनुर्वेदः सुरगणैः स्तुतिभिरुपगीतः सन् । ईशानं शिवं त्रिस्त्रिवारम् । 'द्वित्रिचतुर्भ्यः सुच्' इति सुच्प्रत्ययः । परीत्य प्रदक्षिणीकृत्य वीरं पाण्डोः सुतमर्जुनम् । भास्वान्सूर्यो जलदमिव अभिययौ । शिखरिणीवृत्तम् ॥ ४५ ॥

अथ शशधरमौलेरभ्यनुज्ञामवाप्य
त्रिदशपतिपुरोगाः पूर्णकामाय तस्मै ।
अवितथफलमाशीर्वादमारोपयन्तो
विजयि विविधमस्त्रं लोकपाला वितेरुः ॥ ४६ ॥

अन्वयः—अथ, त्रिदशपतिपुरोगाः, लोकपालाः, शशधरमौलेः, अभ्यनुज्ञाम्, अवाप्य, पूर्णकामाय, तस्मै, अवितथफलम्, आशीर्वादम्, आरोपयन्तः, विजयि, विविधम्, अस्त्रं, वितेरुः ॥ ४६ ॥

अथेति ॥ अथ शशधरमौलिवरप्रदानानन्तरं त्रिदशपतिपुरोगा इन्द्रादयो लोकपालाः शशधरमौलेः शम्भोरभ्यनुज्ञामवाप्य पूर्णकामाय तस्मै पाण्डवायावितथफलममोघफलमाशीर्वादमारोपयन्तः प्रयुञ्जाना विजयि जयशीलं विविधं नानाविधमस्त्रमैन्द्रादिकं वितेरुर्ददुः । मालिनीवृत्तम् ॥ ४६ ॥

असंहार्योत्साहं जयिनमुदयं प्राप्य तरसा
धुरं गुर्वीं वोढुं स्थितमनवसादाय जगतः ।
स्वधाम्ना लोकानां तमुपरि कृतस्थानममरा-
स्तपोलक्ष्म्या दीप्तं दिनकृतमिवोच्चैरुपजगुः ॥ ४७ ॥

अन्वयः—तरसा, जयिनम्, उदयम्, प्राप्य, असंहार्योत्साहं, जगतः, अनवसादाय, गुर्वीं, धुरम्, वोढुं, स्थितं, स्वधाम्ना, लोकानाम्, उपरि कृतस्थानम्, तपोलक्ष्म्या, दीप्तं, तम्, अमराः, दिनकृतम्, इव उच्चैः, उपजगुः ॥ ४७ ॥

असंहार्योत्साहमिति ॥ तरसा बलेन वेगेन च जयिनं जयशीलमुदयमस्त्रलाभरूपमभ्युदयम् । अन्यत्रोदयाद्रिं च । प्राप्यासंहार्योत्साहं संहर्तुमशक्यमुद्योगं जगतोऽनवसादाय क्षेमाय गुर्वीं धुरं दुष्टनिग्रहभरं तमोपसंहाररूपं च भारं वोढुं स्थितम् । स्वधाम्ना स्वतेजसा लोकानामुपरि कृतस्थानं कृतपदम् । अन्यत्रोपरिवर्तमानम् । तपोलक्ष्म्या दीप्तं तं पाण्डवममरा इन्द्रादयो दिनकृतं सूर्यमिवोच्चैरुपजगुः साधु महाभाग्योऽसीति तुष्टुवुः । शिखरिणीवृत्तम् ॥ ४७ ॥

व्रज जय रिपुलोकं पादपद्मानतः स-
न्गदित इति शिवेन श्लाघितो देवसङ्घैः ।
निजगृहमथ गत्वा सादरं पाण्डुपुत्रो
धृतगुरुजयलक्ष्मीर्धर्मसूनुं ननाम ॥ ४८ ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीयेऽष्टादशः सर्गः ।

अन्वयः—शिवेन, व्रज, रिपुलोकं, जय, इति, गदितः, (यतः) पादपद्मानतः, देवसङ्घैः, श्लाघितः, धृतगुरुजयलक्ष्मीः, पाण्डुपुत्रः, निजगृहं, गत्वा, अथ, सादरं, धर्मसूनुम्, ननाम ॥ ४८ ॥

व्रजेति ॥ शिवेन व्रज स्वपुरं गच्छारिलोकं जयेति गदित उक्तः । यतः पादपद्मानतः शिवपादपङ्कजानतः संस्तथा देवसङ्घः श्लाघितः स्तुतोऽत एव धृता गुर्वी जयलक्ष्मीर्येन स पाण्डुपुत्रोऽर्जुनो निजगृह स्वाश्रमं गत्वा प्राप्याथ सादरं यथातथा धर्मसूनुं युधिष्ठिरं ननाम नमश्चक्रे ॥ ४८ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीय-
काव्यव्याख्यायां घण्टापथसमाख्यायामष्टादशः सर्गः समाप्तः ॥

समाप्तमिदं किरातार्जुनीयं नाम महाकाव्यम् ।

प्राप्तिस्थानम्—
चौखम्बा संस्कृत पुस्तकालय,
बनारस सिटी ।

किरातार्जुनीयस्य १५ सर्गे स्थितानां चित्रबन्धानामुद्धारः ।

गोमूत्रिकाबन्धः । (१२ श्लोकः) ।

ना सु रो यं न वा ना गो ध र सं स्थो न रा क्ष सः

ना सु खो यं न वा भो गो ध र णि स्थो हि रा ज सः

सर्वतोभद्रः । (२५ श्लोकः) ।

दे	वा	का	नि	नि	का	वा	दे
वा	हि	का	स्व	स्व	का	हि	वा
का	का	रे	भ	भ	रे	का	का
नि	स्व	भ	व्य	व्य	भ	स्व	नि
नि	स्व	भ	व्य	व्य	भ	स्व	नि
का	का	रे	भ	भ	रे	का	का
वा	हि	का	स्व	स्व	का	हि	वा
दे	वा	का	नि	नि	का	वा	दे

अर्धभ्रमकः । (२७ श्लोकः) ।

स	स	त्व	र	ति	दे	नि	त्यं
स	द	रा	म	षै	ना	शि	नि
त्व	रा	धि	क	क	सं	ना	दे
र	म	क	त्व	म	क	षै	ति

किरातार्जुनीयव्याख्यायां प्रमाणत्वेन समुपन्यस्तानां ग्रन्थानां ग्रन्थकाराणां च नामानि ।

अगस्त्यः १२।४०

अमरः १।१, १।२, १।७, इत्यादि.

आगमः १।४६, ३।३७, ९।३ इत्यादि.

आलङ्कारिकाः १।१, १८।४४.

कामन्दकः १।३१, २।६, २।१० इत्यादि.

काव्यप्रकाशः १।८, १।१०, १।३९इत्यादि.

काशिका १।३, १।६, १।११ इत्यादि.

केशवः २।२१, ८।२४, ९।११ इत्यादि.

कैयटः १।१, १।१०, ८।११ इत्यादि.

क्षीरस्वामी १।९, १।२१, १०।३.

गणव्याख्यानम् २।१७, २।३०, ३।६.

दण्डी १।४६, ८।४४.

दशरूपकम् ८।१३, ९।२६, ९।४०.

धन्वन्तरिः ४।२८.

नारदः १।१३.

निरुक्तम् ७।१०

नीतिवाक्यामृतम् १।२, १।४, १।२६ इत्यादि.

नृत्यविलासः ८।५३.

नैषधम् ८।४९.

न्यायः १।२४, २।५.

न्यासोद्द्योतः २।१७.

पालकाप्यम् ७।८.

पुराणम् ५।२६.

प्रकाशवर्षः ४।१०.

भारतम् ५।३०, १३।१०, १४।१०.

भाष्यकारः १।१, १।१०, ८।११ इत्यादि.

मनुः २।६, २।१७, १४।६ इत्यादि.

माघः ५।३, ८।४९.

मातङ्गः ४।३३.

मार्तण्डः ८।१५.

यादवः १।३४, ३।११, ७।४ इत्यादि.

रघुवंशम् ८।४९.

रघुवंशसञ्जीविनी ११।७६.

रसरत्नाकरः ९।७२.

रसिकाः १२।४०.

रामायणम् १।९.

रुद्रटः ५।८.

वाग्भटः ५।८.

वात्स्यायनः ९।४७.

वामनः २।२७, २।३७, ४।२४ इत्यादि.

विद्याधरः ४।३८.

विश्वः १।९, १।८, १।२४ इत्यादि.

वैजयन्ती १।१३, २।८, ४।३६ इत्यादि.

वैद्यकम् ५।११.

व्यक्तिविवेकः ३।२१.

शब्दार्णवः ८।३१.

शाकटायनः ३।३५.

शाश्वतः २।२०, ३।५, ७।२७ इत्यादि.

श्रुतिः

सज्जनः १३।४५, १४।२७, १६।५९.

सर्वस्वकारः १।१८, ९।१५.

सामुद्रिकाः ६।१.

स्मरणम् (स्मृतिः) १।१३, ६।२९ इत्यादि.

हलायुधः २।३, ४।३८, ७।१३.

हैमः १।२९, ५।४९, १०।३.

किरातार्जुनीयश्लोकानां मातृकावर्णक्रमेणानुक्रमणिका ।

	स०	श्लो०
अकृत्रिमप्रेमरसाभिरामं	३	३७
अखण्डमाखण्डल	१	२९
अखिलमिदममुष्य	५	२१
अगूढहासस्फुटदन्त	८	३६
अग्रसानुषु नितान्त	९	७
अचकमत सपल्लवां	१०	४९
अचित्ततायामपि	१७	४७
अचिरेण परस्य	२	९
अजन्मा पुरुषस्तावत्	११	७०
अजिह्ममोजिष्ठममोघ	१४	५७
अणीयसे विश्वविधा	१८	४१
अणुरप्युपहन्ति	२	५१
अतिपातितकाल	२	४२
अतिशयितवनान्तर	१०	८
अतीतसंख्या विहिता	१४	१०
अत्यर्थं दुरुपसदादुपेत्य	७	९
अथ कृतकविलोभनं	१०	१७
अथ क्षमामेव	१	४४
अथ चेदवधिः	२	१६
अथ जयाय नु मेरुमही	५	१
अथ दीपितवारिवाहवर्त्मा	१३	२०
अथ दीर्घतमं तमः	१३	३०
अथ परिमलजामवाप्य	१०	१
अथ भूतभव्यभवदीश	१२	१९
अथ भूतानि वार्त्रघ्न	१५	१
अथ वासवस्य वचनेन	१२	१
अथ विहितविधेयै	१६	६२
अथवैष कृतज्ञयेव पूर्वं	१३	५
अथ शशधरमौलेरभ्य	१८	४६

	स०	श्लो०
अथ स्फुरन्मीनविधूत	८	२७
अथ स्वमायाकृतमन्दिरो	८	८
अथ हिमशुचिभस्म	१८	१५
अथाग्रे हसता साचि	१५	७
अथापदामुद्धरणक्षमेषु	१७	१
अथाभिपश्यन्निव	३	५६
अथामर्षान्निसर्गाच्च	११	१
अथोच्चकैरासनतः	२	५७
अथो शरस्तेन मदर्थं	१४	१७
अथोष्णभासेव सुमेरु	३	३२
अदीपितं वैद्युतजातवेदसा	४	२९
अथ क्रियाः कामदुघाः	३	६
अधरीचकार च विवेक	६	२१
अधिगम्य गुह्यकगणादिति	६	३८
अधिरुह्य पुष्पभरनम्रशिखैः	६	१७
अनादरोपात्तधृतैक	१४	३६
अनाप्तपुण्योपचयै	३	५
अनामृशन्तः क्वचिदेव	१७	३३
अनायुधे सत्वजिघांसिते	१४	१६
अनारतं तेन पदेषु	१	१५
अनारतं यौ मणिपीठ	१	४०
अनिर्जयेन द्विषतां	११	७१
अनुकूलपातिनमचण्ड	६	२५
अनुकूलमस्य च विचिन्त्य	१२	४३
अनुचरेण धनाधिपतेरथो	५	१६
अनुजगुरथ दिव्यं	३	६०
अनुजानुमध्यमवसक्त	१२	५२
अनुद्धताकारतया	३	३
अनुपालयता मुदे	२	१०

	स०	श्लो०
अनुभाववता गुरु स्थिर	१३	१९
अनुशासतमित्यना	२	५४
अनुसानु पुष्पितलता०	६	१
अनुहेमवप्रमरुणैः समतां	६	८
अनेकराजन्यरथाश्व	१	१६
अनेन योगेन विवृद्ध	३	२८
अन्तकः पर्यवस्थाता	११	१३
अन्तिकान्तिकगतेन्दु	९	२१
अन्यदीयविशिखे न	१३	४६
अन्यदोषमिव स स्वकं	१३	४८
अन्योन्यरक्तमनसा	९	७४
अपनेयमुदेतुमिच्छता	२	३६
अपयन्धनुषः शिवान्तिक	१३	२३
अपरागसमीरणे	२	५०
अपवर्जितविप्लवे	२	२६
अपवादादभीतस्य	११	५६
अपश्यद्भिरिवेशानं	१९	२
अपहस्त्येऽथवा सद्भिः	११	६८
अप्राकृतस्याहव	१६	२४
अभितस्तं पृथासूनुः	११	८
अभिद्रोहेण भूतानाम्	११	२१
अभिनयमनसः	१०	४०
अभिभवति मनः कदम्ब	१०	२३
अभिभवोदितमन्यु	१८	७
अभिमानधनस्य	२	१९
अभिमानवतो	२	१३
अभिमुनि सहसा	१०	४५
अभियोग इमान	२	४६
अभिरश्मिमालि विमलस्य	१२	२
अभिलषत उपायं	१७	३४
अभिवर्षति योऽनु	२	३१
...तमासज्य विरुद्ध	१४	१९
...पानि मुनिचापलात्	१३	६३
अभ्यायतः सन्ततधूम	१६	६
अमर्षिणा कृत्यमिव	१४	६३
अमी पृथुस्तम्बभृतः	४	२६
अमी समुद्भूतसरोज	४	३५
अयथार्थक्रियारम्भैः	११	५२
अयमच्युतश्च वचनेन	१२	३५
अयमसौ भगवानुत	१८	९
अयमेव मृगव्यसत्रकाम	१३	९
अयं वः क्लैब्यमापन्नान्	१५	१९
अलकाधिपभृत्यदर्शितं	३	५१
अलंकृतानामृजुता	१७	२९
अलङ्घ्यं तत्तदुद्वीक्ष्य	११	६०
अलङ्घ्यत्वाज्जनैः	११	४०
अलमेष विलोकितः	५	१७
अलसपदमनोरमं प्रकृत्या	१०	६०
अवचयपरिभोगवन्ति	१०	५
अवघ्नन्पत्रिणः शंभोः	१५	३७
अवधूतपङ्कजपराग	६	३
अवधूयारिभिर्नीता	११	५८
अवन्ध्यकोपस्य	१	३३
अवरुग्णतुङ्गसुरदारु	६	५
अवलीढसनाभिरश्वसेनः	१३	११
अवहितहृदयो विधाय	२	५८
अविग्रहस्याप्यतुलेन	१८	३३
अविज्ञातप्रबन्धस्य	११	४३
अवितृप्ततया तथापि	२	२९
अविभावितनिष्क्रम	१३	२७
अविमृष्यमेतदभिलष्यति	६	४४
अविरतोज्झितवारि	५	६
अविरलफलिनीवन	१०	२८
अविरलमलसेषु	१०	४३
अविलङ्घ्यविकर्षणम्	३	५७
अविवेकवृथाश्रमा	१३	२९

	स०	श्लो०
असकलनयनेक्षितानि	१०	५९
असक्तमाराधयतो	१	११
असमापितकृत्य	२	४८
असावनास्थापरया	४	३४
असिः शरा वर्म धनुश्च	१४	२०
असृड्नदीनामुपचीय	१६	१०
असंविदानस्य ममेश	१८	४२
असंशयं न्यस्तमुपान्त	८	३८
असंशयालोचितकार्य	३	३३
असंहार्योत्साहं जयिन	१८	४७
अस्त्रवेदमधिगम्य तत्त्वतः	१३	६२
अस्त्रवेदविदयं मही	१३	६७
अस्त्रैः समानामति	१७	३४
अस्मिन्नगृह्यत पिनाक	५	३३
अस्मिन्यशः पौरुष	१६	९
अंशुपाणिभिरतीव	९	३
अंसस्थलैः केचिद्	१६	३०
अंसावबष्टब्धनतौ	१६	२१
आकारमाशंसितभूरि	३	२७
अकीर्णं बलरजसा	७	३६
आकीर्णा मुखनलिनै	७	१८
आकुमारमुपदेष्टु	१३	४३
आकुलश्चलपतत्त्रि	९	८
आक्षिप्तचापावरणेषु	१७	५९
आक्षिप्तसम्पातमपेत	१६	४१
आक्षिप्यमाणं रिपुभिः	३	५०
आघट्टयामास गता	१७	३८
आघ्राय क्षणमतितृष्य	७	३४
आतपे धृतिमता	९	३०
आतिथेयीमथासाद्य	११	९
आत्मनीनमुपतिष्ठते	१३	६९
आत्मलाभपरिणाम	१८	३४
आहता नखपदैः	९	४९
आबाधामरणभया	१८	३९
आमत्तभ्रमरकुला	७	१०
आमोदवासितचला	९	७०
आयस्तः सुरसरिदोघ	७	३२
आरोढुः समवनतस्य	७	३३
आशंसितापचिति	६	४६
आशु कान्तमभिसारित	९	३८
आसक्तभरनीकाशै	११	५
आसक्ता धूरियं	११	७०
आसन्नद्विपपदवीमदा	७	२४
आसादिता तत्प्रथमं	१६	२७
आसुरे लोकवित्रास	१५	२८
आसेदुषां गोत्रभिदो	१८	१८
आस्तिक्यशुद्धमवतः	१८	४३
आस्थामालम्ब्य नीतेषु	१५	४
आस्थितः स्थगित	९	१
आहिते नु मधुना	९	६९
इच्छतां सह वधूभि	९	१३
इतरेतरानभिभवेन	६	३४
इति कथयति तत्र	४	३७
इति गां विधाय विरतेषु	१२	३२
इति चालयन्नचलसानु	१२	५२
इति तानुदारमनुनीय	१२	४०
इति तेन विचिन्त्य चाप	१३	१४
इति दर्शितविक्रियं	२	२५
इति निगदितवन्तं	१८	४४
इति ब्रुवाणेन महेन्द्र	३	३०
इति विविधमुदासे	१६	६३
इति विषमितचक्षुषा	१०	५६
इति शासति सेनान्यां	१५	२९
इतीरयित्वा गिरमात्त	१	२६
इतीरिताकूतमनील	१४	२४
इत्थं विहृत्य वनिताभि	८	५६

	स०	श्लो०
इत्युक्तवन्तं परिरभ्य	११	८०
इत्युक्तवन्तं व्रज साधये	३	५४
इत्युक्तवानुक्तिविशेष	३	१०
इत्युक्त्वा सपदि हितं	५	५१
इदमीदृग्गुणोपेतं	११	४१
इमामन्यमूनीत्यपवर्जिते	८	२०
इमामहं वेद न तावकीं	१	३७
इयमिष्टगुणाय रोचतां	२	५
इयं च दुर्वारमहारथानां	१६	१७
इयं शिवाया नियते	४	२१
इह दुरधिगमैः किंचिदेवा	५	१८
इह वीतभयास्तपोऽनुभावा	१३	४
इह सनियमयोः सुराप	५	४०
ईशार्थमम्भसि चिराय	५	२९
उच्यतां स वचनीय	९	३९
उज्झती शुचमिवाशु	९	१८
उज्झत्सु संहार इवा	१६	१६
उत्फुल्लस्थलनलिनी	५	३९
उत्सङ्गे समविषमे समं	७	२१
उत्सृष्टध्वजकुथकङ्कटा	७	३०
उदस्य धैर्यं दयितेन	८	५०
उदारकीर्तेरुदयं	१	१८
उदाहरणमाशीःषु	११	६५
उदितोपलस्खलन	६	४
उदीरितां तामिति	३	५५
उदूढवक्षःस्थगितैक	१४	३१
उद्धृतेन्दुमविभिन्न	९	२४
उन्मज्जन्मकर इवा	१७	६३
उपकार इवासति	१३	३३
उपकारकमाहते	२	४३
उपजापसहान्विल	२	४७
उपपत्तिरुदाहृता	२	२८
उपलभ्य चञ्चलतरङ्ग	६	१४
उपलाहतोद्धततरङ्ग	६	१०
उपाधत्त सपत्नेषु	११	५०
उपारताः पश्चिमरात्रि	४	१०
उपेयुषीणां बृहतीरधि	८	१२
उपेयुषी बिभ्रतमन्तक	१४	३८
उपैति सस्यं परिणाम	४	२२
उपैत्यनन्तद्युतिरप्य	१६	६१
उपोढकल्याणफलो	१७	५४
उमापतिं पाण्डुसुत	१७	१२
उरसि शूलभृतः प्रहिता	१८	६
उरु सत्त्वमाह विपरि	६	३५
ऊर्ध्वं तिरश्चीनमधश्च	१६	५०
ऋषिवंशजः स यदि	६	३६
एकतामिव गतस्य	९	१२
एवं प्रतिद्वन्द्विषु तस्य	१७	१८
ओजसापि खलु नून	९	३३
ओष्ठपल्लवविदंश	९	५७
औषसातपभयादप	९	११
ककुदे वृषस्य कृत	१२	२०
कच्छान्ते सुरसरितो	१२	५४
कतिपयसहकारपुष्प	१०	३०
कथमिव तव सम्मति	१०	३६
कथं वादीयतामर्वाक्	११	७६
कथाप्रसङ्गेन जनैः	१	२४
कपोलसंश्लेषि विलो	४	९
करणशृङ्खलनिःसृतयोः	१८	११
करिष्यसे यत्र सुदुश्च	३	४९
करुणमभिहितं त्रपा	१०	५८
करोति योऽशेषजनाति	३	५१
करौ धुनाना नवपल्लवाकृति [पयस्यगाधे	८	४८
करौ धुनाना नवपल्लवाकृती [वृथा कृथा	८	७

	स०	श्लो०
कलत्रभारेण विलोक	८	१७
कवचं स बिभ्रदुपवीत	१२	१
कषणकम्पनिरस्तमहा	६	४७
कान्तवृत्त्य इव कुङ्कुम	९	६
कान्तवेश्म बहु सन्दिशती	९	३७
कान्तसङ्गमपराजित	९	५२
कान्ताजनं सुरतखेद	९	७६
कान्तानां कृतपुलकः	७	५
किं गतेन न हि युक्त	९	४०
किं त्यक्तापास्तदेवत्व	१५	२१
किमपेक्ष्य फलं	२	२१
किमसामयिकं वित	२	४०
किमुपेक्षसे कथय	१२	३१
किरातसैन्यादुरुचाप	१४	४५
काप्यताशु भवतानत	९	५३
कुररीगणः कृतरवस्तरवः	६	२५
कुरु तन्मतिमेव	२	२२
कुरु तात तपांस्यमार्ग	१३	१३
कुसुमनगवनान्युपैतु	१०	३१
कुसुमितमवलम्ब्य	१०	५३
कृतधृति परिवन्दिते	१८	२१
कृतप्रणामस्य महीं	१	२
कृतं पुरुषशब्देन	११	७२
कृतवानन्यदेहेषु	११	२६
कृतानतिर्व्याहृतसा	३	३१
कृतान्तदुर्वृत्त इवा	१६	२१
कृतारिषड्वर्गजयेन	१	९
कृतावधानं जितबर्हि	४	३३
कृतोर्मिरेखं शिथिलत्व	४	६
कृष्णद्वैपायनादेशात्	११	४६
कोन्विमं हरितुरङ्ग	१३	५०
कोऽपवादः स्तुतिपदे	११	२५
क्रान्तानां ग्रहचरितात्	७	१२

	स०	श्लो०
क्रामद्भिर्घनपदवीमनेक	५	३४
क्रियासु युक्तैर्नृप	१	४
क्रोधान्धकारान्तरितो	१७	१
क्लान्तोऽपि त्रिदशवधू	७	२९
क्व चिराय परिग्रहः	२	३९
क्षत्रियस्तनयः पाण्डोः	११	४५
क्षययुक्तमपि स्वभावजं	२	११
क्षितिनभःसुरलोक	५	३
क्षिपति योऽनुवनं	५	४५
क्षीणयावकरसोऽप्यति	९	६२
क्षुभिताभिनिःसृत	१२	४५
क्षोभेण तेनाथ गणा	१७	२२
खण्डिताशंसया तेषां	१५	३
गणाधिपानामविधाय	१४	५४
गतवति नखलेखा	९	७८
गतान्यशूनां सहजन्म	४	१३
गतैः परेषामविभाव	१४	५२
गतैः सहावैः कलहंस	८	२९
गन्धमुद्धतरजःकण	९	३१
गभीररन्ध्रेषु भृशं महा	१४	४६
गम्यतामुपगते नयनानां	९	४
गुणसम्पदा समधिगम्य	५	२४
गुणानुरक्तामनुरक्त	१	३१
गुणापवादेन तदन्य	१४	१२
गुरुक्रियारम्भफलै	१४	४२
गुरुस्थिराण्युत्तम	१६	२८
गुरून्कुर्वन्ति ते वंश्यान्	११	६४
गूढोऽपि वपुषा राजन्	११	६
ग्रसमानमिवौजांसि	११	७३
ग्रहविमानगणानभितो	५	१४
घनपोत्रविदीर्णशाल	१३	३
घनं विदार्यार्जुन	१५	५०
घनानि कामं कुसुमानि	८	४

	स०	श्लो०
चञ्चलं वसु नितान्त	१३	५३
चतसृष्वपि ते विवेकिनी	२	६
चमरीगणैर्गणबलस्य	१२	४७
चयानिवाद्रीनिव	१६	६२
चलनेऽवनिश्चलति	१२	२८
चारचुञ्चुश्चिरारेची	१५	३८
चिरंधषतां जन्मवतां	३	११
चित्तनिर्वृतिविधायि	९	७१
चित्रवानसि कल्याणी	११	१४
चित्रीयमाणानति	१७	३१
चिरनियमकृशोऽपि	१०	१४
चिरमपि कलितान्य	१०	४८
च्युते स तस्मिन्निषुधौ	१७	३७
छायां विनिर्धूय तमोमयीं	१६	३२
जगतीशरणे युक्तो	१५	४५
जगत्प्रसूतिर्जगदेक	४	३२
जटानां कीर्णया केशैः	११	३
जनैरुपग्राममनिन्द्य	४	१९
जन्मवेषतपसां विरोधिनीं	१३	६४
जन्मिनोऽस्य स्थितिं	११	३०
जपतः सदा जपमुपांशु	१२	८
जयमत्रभवान्नून	११	१८
जयारवक्ष्वेडितनाद	१४	२१
जयेन कच्चिद्विरमेदयं	१४	६२
जरतीमपि बिभ्राण	११	७
जलदजालघनैरसिता	५	४८
जलौघनसंमूर्च्छनमूर्च्छित	१६	५९
जहातु नैनं कथमर्थ	३	१४
जहार चास्मादचिरेण	१७	४४
जहिहि कठिनतां	१०	५१
जहीहि कोपं दयितो	८	८
…शतान्युलूकस	१६	३७
…र्जया देहे	११	३२

	स०	श्लो०
जेतुमेव भवता	१३	५४
ज्वलतस्तव जात	२	२४
ज्वलतोऽनलादनुनि	१२	७
ज्वलितं न हिरण्य	२	२०
तत उदग्र इव द्विरदे	१८	१
ततः किरातस्य वचो	१४	१
ततः किराताधिपते	१६	१
ततः प्रजह्रे सममेव	१५	४४
ततः प्रयात्यस्तमदा	१७	१७
ततः शरच्चन्द्रकरा	३	१
ततः सकूजत्कलहंस	४	१
ततः सदर्पं प्रतनुं	१२	३५
ततः स संप्रेक्ष्य शरद्गुण	४	२०
ततः सुपर्णव्रजपक्ष	१६	४४
ततस्तपोवीर्यसमुद्धतस्य	१७	३५
ततोऽग्रभूमिं व्यवसाय	१७	५५
ततो धरित्रीधरतुल्य	१६	५५
ततोऽनुपूर्वायतवृत्त	१७	५०
ततोऽपवादेन पताकिनी	१४	२७
तत्तदीयविशिखा	१३	५७
तत्तितिक्षितमिदं	१३	६८
तत्र कार्मुकभृतं	१३	३५
तथा न पूर्वं कृतभूषणा	८	४१
तथापि जिह्मः स	१	८
तथापि निघ्नं नृप	३	१२
तदनघ तनुरस्तु	१०	५०
तदभूरिवासरकृतं	६	२९
तदलं प्रतिपक्ष	२	१५
तदा रम्याण्यरम्याणि	११	२८
तदाशु कर्तुं त्वयि	१	२५
तदाशु कुर्वन्वचनं	३	५४
तदुपेत्य विघ्नयत	६	४३
तद्गणा ददृशुर्भीमं	१५	३५

	स०	श्लो०
तनुमवजितलोक	१०	१९
तनुमरमसो भास्वान	१९	२३
तनूरलक्तारुणपाणि	८	९
तपनमण्डलदीपितमेक	९	२
तपसा कृशं वपुरुवाह	१२	६
तपसा तथा न मुदमस्य	१८	१४
तपसा निपीडितकृश	१२	३९
तपोबलेनैष विधाय	१४	६०
तप्तानामुपदधिरे विषाण	७	१३
तमतनुवनराजिश्यामितो	४	३८
तमनतिशयनीयं सर्वतः	९	९२
तमनिन्द्यबन्दिन इवेन्द्र	६	२
तमाशु चक्षुः श्रवसां	१६	४२
तमुदीरितारुणजटांशु	१२	१४
तरसा भुवनानि यो	१८	३७
तरसैव कोऽपि भुवनैक	१२	३६
तवोत्तरीयं करिचर्म	१८	३२
तस्मै हि भारोद्धरणे	१७	१४
तस्यातियत्नादति	१७	३२
तस्याहवायासविलोल	१७	८
तं शम्भुराक्षिप्तमहेषु	१७	४३
तान्भूरिधाम्नश्चतुरोऽपि	३	३९
तापसोऽपि विभुता	१३	३९
तामैक्षन्त क्षणं सभ्या	११	९१
तावदाश्रियते लक्ष्म्या	११	६१
तिरोहितश्वभ्रनिकुञ्ज	१४	३३
तिरोहितान्तानि नितान्त	८	४७
तिरोहितेन्दोरथ शम्भु	१६	३१
तिष्ठतां तपसि पुण्य	१३	४४
तिष्ठद्भिः कथमपि	७	४
तीरान्तराणि मिथुनानि	८	५६
तुतोष पश्यन्कमलस्य	४	४
तुल्यरूपमसितोत्पल	९	६१
तुषारलेखाकुलितो	३	३६
तेजः समाश्रित्य परं	१७	३
तेन व्यातेनिरे भीमा	१५	४२
तेन सूरिरुपकारिता	१३	६०
तेनानिमित्तेन तथा	१७	४०
तेनानुजसहायेन	११	४८
त्रयीमृतूनामनिला	१४	४८
त्रासजिह्मं यतश्चैना	१५	६
त्रिःसप्तकृत्वो जगती	३	१८
त्वमन्तकः स्थावरजङ्गमानां	१८	३९
त्वया साधु समारम्भि	११	१०
त्विषां ततिः पाटलिता	१६	३३
दक्षिणां प्रणतदक्षिणां	१८	२७
ददृशेऽथ सविस्मयं	१३	१७
दधत इव विलासशालि	९	३२
दधतमाकरिभिः करिभिः	९	७
दधति क्षतीः परिणत	६	७
दनुजः स्विदयं क्षपा	१३	८
दरीमुखैरासवराग	१६	४६
दिङ्नागहस्ताकृतिमुद्वहद्भिः	१६	३८
दिवः पृथिव्याः ककुभां	१४	९३
दिव्यस्त्रीणां सचरण	५	२३
दिशः समूहन्निव	१४	५०
दीपयन्नथ नभः	९	२३
दीपितस्त्वमनुभाव	१३	३८
दुरक्षान्दीव्यता राज्ञा	११	४७
दुरासदवनज्याया	११	६३
दुरासदानरीनुग्रान्	११	२३
दुर्वचं तदथ मा स्म	१३	४९
दुःशासनामर्षरजो	३	४७
दूनास्तेऽरिबलादूना	१५	३१
दृश्यतामयमनोकहा	१३	७०
दृष्टावदानाद्व्यथतेऽरि	१७	१६

	स०	श्लो०
दृष्ट्वा दृश्यान्याचरणीयानि	१८	२८
देवाकानिनि कावादे	१५	२१
द्यां निरुन्धदतिनील	९	२०
द्युतिं वहन्तौ वनिता	८	३९
द्युवियद्गामिनी तार	१५	४३
द्यौरुन्ननामेव दिशः	१६	३५
द्रुतपदमभियातुमिच्छतीवां	१०	२
द्वारि चक्षुरधिपाणि	९	४३
द्विरदानिव दिग्वि	२	२३
द्विषतः परासिसिषु	१२	३४
द्विषतामुदयः	२	८
द्विषतां विहितं	२	१७
द्विषन्निमित्ता यदियं	१	४१
द्विषां विघाताय	१	३
द्विषां क्षतीर्याः प्रथमे	१४	५५
धनुः प्रबन्धध्वनितं	१६	२०
धर्मात्मजो धर्मनिबन्धि	३	३४
धार्तराष्ट्रैः सह प्रीति	११	५५
धाष्टर्यलङ्घितयथोचित	९	७२
धूतानामभिमुखपातिभिः	७	३
धृतिबिसवलयावलि	१०	२४
धृतबिसवलये निधाय	१०	४६
धृतहेतिरप्यधृतजिह्म	६	२४
ध्वजोत्पलापीड इव	१६	१५
धैर्यावसादेन हृतप्रसादा	३	३८
धैर्येण विश्वास्यतया	३	३४
ध्रुवं प्रणाशः प्रहितस्य	१४	९
ध्वनिरगविवरेषु	१०	४
ध्वंसेत हृदयं सद्यः	११	५७
न ज्ञातं तात यत्नस्य	११	४२
न तेन सज्यं क्वचिदु	१	२१
ददाह भूरुहवनानि	१२	१६
ति विषये	१०	३९
ननु हो मथना राघो	१५	२०
न नोननुन्नो नुन्नोनो	१५	१४
न पपात सन्निहित	१०	४
न प्रसादमुचितं गमिता	९	२५
न मृगः खलु कोऽप्ययं	१३	६
नयनादिव शूलिनः	१३	२२
न रागि चेतः परमा	१८	३१
नवपल्लवाञ्जलिभृतः	६	२६
न वर्त्म कस्मैचिदपि	१४	१४
नवविनिद्रजपाकुसुम	५	८
नवातपालोहितमाहितं	४	८
न विरोधिनी रुषमियाय	१२	४६
न विसिस्मिये न विषसाद	१२	५
न समयपरिरक्षणं	१	४५
न सुखं प्रार्थये नार्थ	११	६६
न सज्जो रुरुचिरे	९	३५
नानारत्नज्योतिषां	५	३६
नान्तरज्ञाः श्रियो जातु	११	२४
नाभियोक्तुमनृतं	१३	५८
नासुरोऽयं न वा नागो	१५	१२
निचयिनि लवली	१०	२१
निजघ्निरे तस्य हरेषु	१७	२६
निजेन नीतं विजितान्य	१४	३९
निद्राविनोदितनितान्त	९	७५
निपतितेऽधिशिरोध	१८	६
निपीयमानस्तबका	८	६
निबद्धनिःश्वासविकम्पिता	४	१५
निमीलदाकेकरलोल	८	५३
निरञ्जने साचिविलोकितं	८	५२
निरत्ययं साम न दान	१	१२
निरास्पदं प्रश्नकुतूहलित्व	३	९
निरीक्ष्यमाणा इव	४	३
निरीक्ष्य संरम्भनिरस्त	३	२१

	स०	श्लो०
निर्याय विधाय दिनादि	३	२५
निवृत्तवृत्तोरुपयोधर	८	३
निशम्य सिद्धिं द्विषतां	१	२७
निशातरौद्रेषु विकासतां	१४	३०
निशितासिरितोऽभीको	१५	२२
निःशेषं प्रशमितरेणु	७	३८
निःशेषं सकलित	१७	६२
निःश्वासधूमैः स्थगितांशु	१६	३९
निषण्णमापत्प्रतिकार	१४	३७
निषादिसन्नाहमणि	१६	१२
निसर्गदुर्बोधमबोध	१	६
निहते विडम्बित	१२	३८
निहितसरसयावकै	१०	३
नीतोच्छ्रायं मुहुरशिशिर	५	३१
नीरन्ध्रं पथिषु रजो रथाङ्ग	७	२५
नीरन्ध्रं परिगमिते	१७	६
नीलनीरजनिभे हिम	९	१९
नुनोद तस्य स्थलपद्मिनी	४	५
नूनमत्रभवतः शराकृतिं	१३	४५
नृपतिमुनिपरिग्रहेण	१०	६
नृपसुतमभितः	१०	४४
न्यायनिर्णीतसारत्वा	११	३९
पतत्सु शस्त्रेषु वितत्य	१४	४९
पतन्ति नास्मिन्विशदाः	४	२३
पतितैरपेतजलदान्न	६	२७
पतिं नगानामिव	१७	५
पयस्स्युतायां समितौ	३	१५
पपात पूर्वां जहतो	४	१८
परमास्त्रपरिग्रहोरुतेजः	१३	२६
परवानर्थसंसिद्धौ	११	३३
परस्य भूयान्विवरे	१६	२३
पराहतध्वस्तविशसे	१६	५६
परिकीर्णमुद्यतभुजस्य	१२	११
परिक्षते वक्षसि दन्ति	१६	११
परिणामसुखे गरीयसि	२	४
परिणाहिना तुहिनराशि	१२	२३
परिभ्रमन्मूर्धजषट्पदा	४	१४
परिभ्रमंल्लोहित	१	३४
परिमोहयमाणेन	१५	३६
परिवीतमंशुभिरुदस्त	१२	१८
परिसरविषयेषु लीढ	५	३८
परिसुरपतिसूनुधाम	१०	२०
परिस्फुरन्मीनविघट्टितो	८	४५
परीतमुक्षावजये	४	११
परोऽवजानाति यदज्ञता	१४	२३
पश्चात्क्रिया तूणयुगस्य	१७	४२
पाणिपल्लवविधूनन	९	५०
पातितोत्तुङ्गमाहात्म्यैः	१५	११
पातुमाहितरतीन्यभि	९	५१
पार्थबाणाः पशुपते	१५	४०
पुरःसरा धामवतां	१	४३
पुराधिरूढः शयनं	१	३८
पुरोपनीतं नृप	१	३९
पुंसः पदं मध्यममुत्त	१६	१९
पृथग्विधान्यस्त्रविराम	१६	३४
पृथुकदम्बकदम्बकराजितं	५	९
पृथुधाम्नि तत्र परिबोधि	६	४५
पृथूरुपर्यस्तबृहल्लता	१४	३४
प्रकृतमनुससार नाभि	१०	४१
प्रचलिते चलितं	१८	१०
प्रणतिप्रवणान्विहाय	२	४४
प्रणतिमथ विधाय	६	४७
प्रणिधाय चित्तमथ	६	३९
प्रणिधाय तत्र विधि	६	१९
प्रतप्तचामीकरभासुरेण	१६	४०
प्रतिक्रियायै विधुरः	१७	४१

	स०	श्लो०		स	श्लो०
प्रतिघ्नतीभिः कृत	१६	४३	प्राप्तोऽभिमानव्यसनाद्	३	४५
प्रतिदिशमभिगच्छता	१०	२१	प्राप्यते गुणवतापि	९	४८
प्रतिदिशं प्लवगाधिप	१४	६४	प्राप्यते यदिह दूर	१८	२५
प्रतिबोधजृम्भणविभिन्न	६	१२	प्रियेऽपरा यच्छति	८	१५
प्रत्यार्द्रीकृततिलकास्तुषार	७	१५	प्रियेण संग्रथ्य विपक्ष	८	३७
प्रत्याहतौजाः कृत	१७	१५	प्रियेण सिक्ता चरमं	८	५४
प्रनृत्तशवविशस्त	१५	२६	प्रियेषु यैः पार्थ विनोप	३	५२
प्रपित्सोः किं च ते मुक्तिं	११	१६	प्रियैः सलीलं करवारि	८	४९
प्रबभूव नालमवलोकयितुं	६	६	प्रीते पिनाकिनि मया	११	८१
प्रभवति न तदा परो	१०	३५	प्रेरितः शशधरेण करौघः	९	२८
प्रभवः खलु कोश	२	१२	प्लुतमालतीसितकपाल	१२	२४
प्रमार्ष्टुमयशःपङ्क	११	६७	बदरीतपोवननिवास	१२	३३
प्रयच्छतोच्चैः कुसुमानि	८	१४	बद्धकोपविकृतीरपि	९	६४
प्रयुज्य सामाचरितं	१४	७	बभार शून्याकृति	१७	३९
प्रलीनभूपालमपि	१	२३	बलवदपि बलं मिथो	१०	३७
प्रववृतेऽथ महाहव	१८	८	बलवानपि कोपजन्मनः	२	३७
प्रवालभङ्गारुणपाणि	८	२१	बलशालितया यथा तथा	१३	१२
प्रविकर्षनिनादभिन्न	१३	१६	बहुधा गतां जगति	६	४२
प्रविततशरजालच्छन्न	१४	६५	बहु बर्हिचन्द्रकनिभं	६	११
प्रविवेश गामिव	१२	१०	(बहुभिश्च बाहुभिः)	१२	क्षेपकः
प्रवृत्तनक्तंदिव	१६	४७	बहुशः कृतसत्कृतेर्विधातुं	१३	१०
प्रवृद्धसिन्धूर्मिचय	१६	६०	बाणच्छिदस्ते विशिखाः	१७	२०
प्रशान्तघर्माभिभवः	८	२८	बिभराम्बभूवुरपवृत्त	१२	४९
प्रश्च्योतन्मदसुरभीणि	७	३५	बृहदुद्वहज्जलदनादि	१२	४२
प्रसक्तदावानल	१६	२६	भयङ्करः प्राणभृतां	११	१७
प्रसह्य योऽस्मासु परैः	३	४४	भयादिवाश्लिष्य झषाहते	८	४६
प्रसादरम्यमोजस्वि	११	३८	भर्तृभिः प्रणयसम्भ्रम	९	५४
प्रसादलक्ष्मीं दधतं	३	२	भर्तृषूपसखि निक्षिप	९	६६
प्रसेहिवांसं न तमाप	१७	२३	भवतः स्मरतां सदा	१८	३८
प्रस्थानश्रमजनितां	७	३१	भवद्भिरधुनाराति	१५	१७
प्रस्थिताभिरधिनाथ	९	३६	भवन्तमेतर्हि मनस्वि	१	३५
प्रहीयते कार्यवशा	१६	२२	भवन्ति ते सभ्यतमा	१४	५
प्राञ्जलावपि जने	९	१०	भवभीतये हतबृहत्तम	६	४१

	स०	श्लो०
भवाहवेषु प्रमदा	१	२८
भवो भवन्नपि मुने	५	४९
भिस्वेव भाभिः सवितु	१६	५१
भुजगराजसितेन	५	४
भूभर्तुः समधिकमादधे	७	२७
भूयः समाधानविरुद्ध	१७	७
भूरिप्रभावेण रणाभि	१७	२
भूरेणुना रासभधूसरेण	१६	७
भृशकुसुमशरेषु	१०	६१
भ्रूविलाससुभगाननु	९	५६
मन्नां द्विषच्छद्मनि	३	३९
मणिमयूखचयांशुक	६	५
मतिभेदतमस्तिरो	२	३:
मतिमान्विनयप्रमाथि	२	५२
मथिताम्भसो रयविकीर्णं	१२	५१
मदमानसमुद्धतं	२	४९
मदसिक्तमुखैर्मृगा	२	१८
मदस्रुतिश्यामित	१६	२
मधुरैरवशानि	२	८५
मध्यमोपलनिभे लसदंशा	९	२
मनसा जपैः प्रणतिभिः	६	•२
मन:शिलाभङ्गनिभेन	१६	४५
मनोरमं प्रापितमन्तरं	४	६
मन्दमस्यन्निषुलतां	१५	१३
मया मृगान्हन्तुरनेन	:४	२५
मरुतः शिवा नवतृणा	६	३३
मरुतां पतिः स्विद	१२	१५
महता मयूखनिचयेन	१२	१३
महते फलाय तदवेक्ष्य	६	२८
महत्त्वयोगाय महा	३	२३
महर्षभस्कन्धमनून	१४	४०
महानके भिन्नसिताभ्र	१६	५७
महारथानां प्रतिदन्त्य	१६	१४

	स०	श्लो०
महास्त्रदुर्गे शिथिल	१६	३६
महिषक्षतागुरुतमाल	१२	५८
महीभृता पक्षवतेव	१६	१३
महीभृतां सच्चरितै	१	२०
महेषुजलधौ शत्रो	१५	३२
महौजसो मानधना	१	१९
मा गमन्मदविमूढ	९	७०
मा गाश्चिरायैकचरः	३	५३
मानिनीजनविलोचन	९	•६
मा भूवन्नपथहृतस्तवे	५	६०
माया स्विदेषा मति	१६	१८
मार्गणैरथ तव	१३	५९
मा विहासिष्ट समरं	१५	'
माहेन्द्रं नगमभितः	७	•०
मित्रमिष्टमुपकारि	१३	५१
मुकुलितमतिशय्य	१०	•७
मुक्तमूललघुरुज्झित	९	५
मुखैरसौ विद्रुमभङ्ग	४	३६
मुञ्चतीशे शराञ्जिष्णौ	१५	३४
मुदितमधुलिहो वितानी	१८	२७
मुनयस्ततोऽभिमुख	१२	२५
मुनिदनुतनयान्विलोभ्य	१०	१६
मुनिमभिमुखतां	१०	१०
मुनिरस्मि निरागसः	१३	'
मुनिरूपोऽनुरूपेण	११	२
मुनीषुदहनातप्तां	१५	३०
मुनेर्विचित्रैरिषुभिः	१७	१९
मुनेः शरौघेण तदुग्र	१४	५९
मुहुरनुपतता विधूय	१०	३३
मुहुश्चलत्पल्लवलोहिनी	१६	५३
मूलं दोषस्य हिंसादे	११	२०
मृगान्विनिघ्नन्मृगयुः	१४	१९
मृणालिनीनामनुरञ्जितं	४	२७

	स०	श्लो०
यूथितकिसलयः सुराङ्गना	१०	९
यच्छति प्रतिमुखं	९	१४
यथा निजे वर्त्मनि	१७	५७
यथाप्रतिज्ञं द्विषतां	११	७४
यथायथं ताः सहिता	८	९
यथात्वमाशंसित	१४	४३
यद्वोचत वीक्ष्य	२	२
यदात्थ कामं भवता	१४	१८
यदा विगृह्णाति हतं	१४	२४
यदि प्रमाणीकृतमार्य	१४	११
यदि मनसि शमः किमङ्ग	१०	९५
यमनियमकृशीकृत	१०	१०
यया समासादित	३	२२
यशसेव तिरोदधन्मुहु	३	९८
यशोऽधिगन्तुं सुख	३	४०
यष्टुमिच्छसि पितॄन्न	१३	६९
यस्मिन्ननैश्वर्यकृत	३	१९
यः करोति वधोदर्का	११	१९
यः सर्वेषामावरीता	१८	४०
या गम्याः सत्सहायानां	११	२२
यातस्य प्रथिततरङ्ग	७	१६
युक्तः प्रमाद्यसि हिता	११	२९
युक्ताः स्वशक्त्या मुनयः	१८	२९
युयुत्सुनेव कवचं	११	१५
येनापविद्धसलिलः	५	३०
योगं च तं योग्यतमाय	३	२६
योषितः पुलकरोधि	९	४१
योषिदुद्धतमनोभव	९	६८
रक्षोभिः सुरमनुजैः	१८	३६
रजनीषु राजतनयस्य	१२	१२
रञ्जिता नु विविधा	९	१५
रणाय जैत्रः प्रदिशन्निव	१४	२८
रथाङ्गसंक्रीडितमद्य	१६	८

	स०	श्लो०
रम्या नवद्युतिरपैति	९	३७
रयेण सा संनिदधे	१७	५२
रहितरत्नचयान्न शिलो	९	१०
रागकान्तनयनेषु	९	३३
राजद्भिः पथि मरुता	७	६
रात्रिरागमलिनानि	९	१६
रामाप्समवर्जितमाल्य	७	७
रिक्ते सविस्रम्भमथा	१७	३६
रुचिकरमपि नार्थ	१०	६२
रुचिरपल्लवपुष्पलता	९	१९
रुचिराकृतिः कनकसानु	६	१
रुजन्महेषून्बहुधा	१५	५१
रुन्धती नयनवाक्य	९	६७
लघुवृत्तितया भिदां	२	५३
लब्ध्यमेकसुकृतेन	१३	५७
लभ्या धरित्री तव	३	१७
लिलिक्षतीव क्षयकाल	१६	५४
लेखया विमलविद्रुम	९	२१
लोकं विधात्रा विहितस्य	३	४१
लोचनाधरकृता	९	६०
लोलदृष्टि वदनं	९	४७
वदनेन पुष्पितलतान्त	१२	४१
वनान्वशय्याकठिनो	१	३६
वनाश्रयाः कस्य मृगाः	१४	१३
वनेऽवने वनसदां	१५	१०
वपुरिन्द्रियोपतपनेषु	१२	३
वपुषा परमेण भूधरा	१३	१
वयं क्व वर्णाश्रमरक्षणो	१४	२२
वरं कृतध्वस्तगुणा	१५	१५
वरोरुभिर्वारणहस्त	८	२
वसूनि वाञ्छन्न वशी	१	१
वंशलक्ष्मीमनुद्धृत्य	११	६९
वंशोचितत्वादभिमान	१७	४

	स०	श्लो०
वाजिभूमिरिभराज	१३	५१
वासांसि शिथिलतामुप	९	६१
विकचवारिरुहं दधतं	६	१३
विकसितकुसुमाधरं	१०	३२
विकार्मुकः कर्मसु शोच	१७	५३
विकाशमीयुर्जगतीश	१६	५२
विकीर्णसप्तार्णवशीकर	१७	४९
विगणय्य कारणमनेक	६	३७
विगाढमात्रे रमणीभि	८	३१
विचकर्ष च संहितेषु	१३	१८
विचित्रया चित्रयतेव	१६	३
विच्छिन्नाभ्रविलायं	११	७१
विजहीहि रणोत्साहं	११	३१
विजिगीषते यदि जगन्ति	१२	३०
विजित्य यः प्राज्य	१	३९
वितवशीकरराशिभि	५	१५
वितन्वतस्तस्य शरा	१७	२०
विदिताः प्रविश्य विहिता	६	३०
विदूरपातेन भिदामुपेयु	८	१०
विधाय रक्षान्परितः	१	१४
विधाय विध्वंसमनात्म	३	१६
विधिसमयनियोगा	१	४६
विधुरं किमतः परं	२	७
विधूतकेशाः परि	८	३३
विधूनयन्ती गहनानि	१४	४७
विनम्रशालिप्रसवौघ	४	२
विनयं गुणा इव विवेक	१२	१७
विनियंसोनां गुरुखेद	८	२६
विपक्षचित्तोन्मथना	८	३४
विपक्षलेखा निरलक्तका	८	४०
विपेति तावदवसाद	१८	२३
विपोऽभिभवत्त्य	२	१४
विपाण्डुभिर्म्लानतया	४	२४

	स०	श्लो०
विपाण्डु संव्यानमिवा	४	२८
विफलीकृतयत्नस्य	१५	४३
विबोधितस्य ध्वनिना	१०	४६
विभिन्नपर्यन्तगमीन	८	५०
विभिन्नपातितास्वीय	१३	३४
विभेदमन्तः पदवी	१७	२७
विमुक्तमाशंसित	१४	५१
विमुच्यमानैरपि तस्य	४	१५
विययति वेगपरिप्लुत	१८	१२
वियच्चर काननविभाग	१९	४४
विरोधि सिद्धेरिति	१४	८
विलङ्घ्य पत्रिणां पङ्क्ति	१५	४४
विलम्बमानाकुलकेश	८	१८
विवरेऽपि नैनमनिगूढ	१५	[illegible]
विवस्वदंशुसंश्लेष	११	९
विवक्तवर्णाभरणा	१४	३
विविक्तेऽस्मिन्नगे	११	३६
विशङ्कमानो भवतः	१	७
विशदभ्रूयुगच्छन्न	११	४
विषमोऽपि विगाह्यते	२	३
विसारिकाञ्चीमणि	८	२५
विस्फार्यमाणस्य ततो	१७	२४
विस्मयः क इव वा	१३	४०
विस्मितः सपदि तेन	१८	१३
विहस्य पाणौ विधृते	८	५१
विहाय वाञ्छामुदिते	४	३१
विहाय शान्तिं नृप	१	४२
विहारभूमेरभिघोष	४	३१
विहितां प्रियया	२	१
वीक्ष्य रत्नचयके	९	५१
वीक्ष्य रन्तुमनसः	९	१
वीतजन्मजरसं परं	५	२२
वीतप्रभावतनुरप्य	१६	६४

	स०	श्लो०
वीतराजसः सन्निधि	३	४९
वीर्यावदानेषु कृता	३	४३
वेत्राककुजे	१५	१८
व्यकोषितस्मितमयूख	२	५९
व्यथितमपि भृशं मनो	१०	२१
व्यथितसिन्धुमनीरशनैः	५	११
व्यर्थित बलिमन्पुरमुच्च	५	३५
व्यपोहितुं लोचनतो	८	१९
व्यानशे शशधरेण	९	१७
व्याहृत्य मरुतां पत्या	११	३७
व्रज जय रिपुलोकं	१८	४८
व्रजति शुचि पदं त्वयि	१८	२६
व्रजतोऽस्य बृहत्पतत्र	१३	२१
व्रजन्ति ते मूढधियः	१	३०
व्रजाजिरेष्वम्बुदनाद	४	१६
व्रणमुखच्युतशोणित	१८	४
व्रीडानतैराप्तजनोप	३	४२
शक्तिरर्थपतिषु स्वयं	१३	६१
शक्तिवैकल्यनम्रस्य	११	६९
शङ्किताय कृतबाष्प	९	४६
शतशो विशिखानवद्यते	१५	४८
शमयन्धृतेन्द्रियशमैक	६	२०
शरणं भवन्तमति	१८	३२
शरदम्बुधरच्छाया	११	१२
शरवृष्टिं विधूयोर्वी	१५	४१
शरानवद्यानवद्य	१७	५६
शशधर इव लोचनाभि	१०	११
शम्भोर्धनुर्मण्डलतः	१५	४९
शाखावसक्तकमनीय	७	४०
शान्तता विनययोगि	१३	३७
शारतां गमितया कांति	९	२९
शिरसा हरिन्मणिनिभः	६	२३
शिलाघनैर्नाकसदा	८	३१

	स०	श्लो०
शिवध्वजिन्यः प्रतियोध	१४	[illegible]
शिवप्रणुन्नेन शिलीमुखेन	१७	[illegible]
शिवभुजाहतिभिन्न	१८	३
शिवमौपयिकं गरी	२	३५
शीधुपानविधुरासु	९	४२
शीधुपानविधुरेषु	९	७३
शुक्लैर्मयूखनिचयैः	५	४२
शुचि भूषयति श्रुतं	२	३२
शुचिरप्सु विद्रुमलता	६	१३
शुचिवल्कवीततनुरन्य	६	३१
शुभाननाः साम्बुरुहेषु	८	३१
शून्यामाकीर्णतामेति	११	२७
श्च्योतन्मयूखेऽपि हिम	३	८
श्रद्धेया विप्रलब्धारः	११	३९
श्रियः कुरूणामधिपस्य	१	१
श्रियं विकर्षत्यपहन्त्य	३	[illegible]
श्रिया हसद्भिः कमलानि	८	४४
श्रीमद्भिर्नियमितकन्धरा	७	३७
श्रीमद्भिः सरथगजैः	७	१
श्रीमल्लताभवनमोषधयः	५	२८
श्रुतमप्यधिगम्य	२	४१
श्रुतिसुखमुपवीणितं	१०	३८
श्रेयसीं तव सम्प्राप्ता	११	११
श्रेयसोऽप्यस्य ते तात	११	४५
श्लिष्यतः प्रियवधूरुप	९	२५
श्वसनचलितपल्लवा	१०	[illegible]
श्वस्त्वया सुखसंवित्तिः	११	[illegible]
स किंसखा साधु न	१	[illegible]
सक्तिं जवादपनयत्य	५	[illegible]
स क्षत्रियस्त्राणसहः	३	[illegible]
स खण्डनं प्राप्य पराद्	१७	[illegible]
सखा स युक्तः कथितः	१४	[illegible]
सखि दयितमिहानयेति	१०	[illegible]

	स०	श्लो०
[illegible] प्रेम गुरूकृता	८	११
[illegible]ीनिव प्रीतिमुजो	१	१०
स ग[illegible]ः क्षितिमुष्ण	१३	३१
सचकितमिव विस्मया	१०	७
स जगाम विस्मयमुदीक्ष्य	६	१९
सजलजलधरं नभो	१०	१९
सज्जनोऽसि विजहीहि	१३	६६
सन्धं धनुर्वहति यो	१३	७१
स ततार सैकतवतीरभितः	६	१६
स तदोजसा विजित	१२	२९
स तमालनिभे रिपौ	१३	२४
स तमाससाद घननील	१२	५३
सदृशमतनुमाकृतेः	१०	१३
सद्मनां विरचनाहित	९	३४
सद्वादिसेवाभिनिविष्ट	१७	११
स धनुर्महेषुधि	१२	२७
सध्वानं निपतितनिर्झरासु	७	२२
सनाकवनितं नितम्ब	९	२७
सपदि प्रियरूपपर्वरेखः	१३	२९
सपदि हरिसखैर्वधू	१०	१८
स पिङ्गाक्षः श्रीमान्	१८	४९
स पिशङ्गजटावलिः	१२	४७
स पुमानर्थवज्जन्मा	११	६२
प्रध्वनन्ध्याम्बुदनादि	१७	१०
प्रयुज्य तनये	१३	३६
बभार रणापेतां	१५	३३
बिभर्ति भीषण	६	३२
भवस्य भवक्षयैक	१३	१९
भोगिसंघः शमम्	१६	४८
मदशिखिरुतानि	१०	२९
मन्थराचलिगत	४	१७
ममूस्तिरुपैति	२	३८
मस्य संपादयता	१४	६
समानकान्तीनि तुषार	८	२५
समुच्छ्वसत्पङ्कजकोश	८	२४
समुज्झिता यावदराति	१४	५६
समुन्नतैः काशदुकूल	८	९
समुल्लसत्प्रासमहोर्मि	१६	४
स यौवराज्ये नवयौव	[illegible]	[illegible]
सरजसमपहाय	१०	२१
सरभसमवलम्ब्य	१०	१४
सरोजपत्रे नु विलीन	८	३९
सललितचलित	१०	५२
सलीलमासक्तलता	८	१६
सलेशमुल्लिङ्गितशात्रवे	१४	२
स वंशस्यावदातस्य	११	५९
सविनयमपराभिसृत्य	१०	५७
स वृषध्वजसायकावभिन्न	१३	२८
सव्यलीकमवधीरित	९	४९
सव्यापसव्यध्वनितो	१७	२५
सव्रीडमन्दैरिव	३	४६
ससत्वरतिदे नित्यं	१५	२७
स समुद्धरता विचिन्त्य	१३	३४
स सम्प्रधार्यैवमहार्य	१६	२९
स सायकान्साध्वस	१७	२१
स सासिः सासुसूः	१५	५
ससुरचापमनेकमणि	५	१२
सहशरधि निजं तथा	१८	१६
सहसा विदधीत	२	३०
सहसोपगतः स	२	५६
संक्रान्तचन्दनरसा	८	५७
सन्ततं निशामयन्त	[illegible]	४७
सन्निबद्धमपहर्तुं	१८	३०
सम्पश्यतामिति	१६	६३
सम्प्रति लब्धजन्म	५	४३
सम्प्रीयमाणोऽनुबभूव	१७	१३

	स०	श्लो०
सम्भिन्नामविरलपातिभिः	७	२३
सम्भिन्नैरिभतुरगावगाह	७	११
सम्भोगक्षमगहनामथो	७	२६
सम्मूर्च्छतां रजतभित्ति	५	२१
संरम्भवेगोज्झित	१७	४९
संघाता मुहुरनिलेन	७	१४
संविधातुमभिषेक	९	३२
संसिद्धाविति करणीय	७	१७
संसेवन्ते दानशीला	१८	२४
संस्कारवत्वाद्रमयत्सु	१७	६
साचि लोचनयुगं	९	४४
सादृश्यं गतमपनिद्र	५	२६
सादृश्यं दधति गभीर	७	३९
साफल्यमस्त्रे रिपु	१६	४९
सामोदाः कुसुमतरु	७	२८
साम्यं गतेनाशनिना	१७	५१
सावलेपमुपलिप्सिते	१३	५६
सितच्छदानामपदिश्य	४	३०
सितवाजिने निजगदू	६	९
सिन्दूरैः कृतरुचयः	७	८
सिषिचुरवनिमम्बुवाहाः	१८	१७
सुकुमारमेकमणुममं	६	४०
सुखेन लभ्या दधतः	१	१७
सुगेषु दुर्गेषु च तुल्य	१४	३२
सुता न यूयं किमु	३	१३
सुरकृत्यमेतदवगम्य	१२	३६
सुरसरिति परं तपो	१०	१२
सुलभैः सदा नयवता	५	२०
सुहृदः सहजा	२	४०
सृजन्तमाजाविषु	३	२०
सेतुत्वं दधति पयोमुचां	७	१९

	स०	श्लो०
सोढवान्नो दशामन्त्यां	११	९
सोलाकगोतप्रथमा	१७	२
सोत्कण्ठैरमरगणै		
स्तुवन्ति गुर्वीमभिधेय	१४	
स्थितमुन्नते तुहिन	१२	२
स्थितं विशुद्धे नभसीव	१७	४
स्थित्यतिक्रान्तिभीरूणि	११	५
स्नपितनवलतातरु	५	६
स्पृहणीयगुणैर्महः	२	३
स्फुटता न पदैरपा	२	२
स्फुटपौरुषमापपात	१३	३
स्फुटबद्धसटोन्नति	१३	
स्फुरत्पिशङ्गमौर्वीकं	१५	३
स्मर्यते तनुभृतां सनातनं	१३	५
स्यन्दना नो चतुरगाः	१५	८
स्वकेतुभिः पाण्डुर	१६	८
स्वगोचरे सत्यपि चित्त	८	१
स्वधर्ममनुरुन्धते	११	५
स्वयं संराध्यैवं शतमख	१०	६
स्वादितः स्वयमथैधित	९	५
हताहतेत्युद्धतभीम	१५	
हरपृथासुतयो	१८	
हरसैनिकाः प्रतिभये	१०	२
हरिन्मणिश्याममुदग्र	१४	१
हंसा बृहन्तः सुरसद्म	१८	१
हृता गुणैरस्य भयेन	१४	६
हृतोत्तरीयां प्रसभं	११	२
ह्रदाम्भसि व्यस्तवधू	८	२
ह्रीतया गलितनीवि	९	५
हेपयन्नहिमतेजसं	१३	१